Digitized by Madhuban Trust

आश्वलायनशाखीया

ऋग्वेदसंहिता

पदपाठ्युता

Āśvalāyana-Saṁhitā of

The Ṛgveda

With Padapāṭha

द्वितीयो भागः
(मण्डलानि ६-१०)

Volume - II
(Maṇḍalas 6-10)

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आश्वलायनशाखीया

ऋग्वेदसंहिता

पदपाठयुता

Āśvalāyana-Saṁhitā of

The Ṛgveda

With Padapāṭha

Volume - II

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

Among the twenty-one Śākhā-Saṁhitās of the *Ṛgveda*, as mentioned by Patañjali, only seven Saṁhitās were known by name and among these too, only one Śākala-Saṁhitā was available in printed form so far. Now with the publication of the present editon of the *Āśvalāyana-Saṁhitā* a complete picture of a new Śākhā-Saṁhitā will come to fore for the first time. In comparison to the Śākala-Saṁhitā, the *Āśvalāyana-Saṁhitā* has 212 additional *mantra*s among which some occur in the common *sūkta*s and others form 16 additional complete *sūkta*s. Among these additional *sūkta*s special mention may be made of *Kapiñjala-sūkta* (II.44), *Lakṣmī-sūkta* (V.88-89), *Pāvamāna-sūkta* (IX.68), *Hiraṇya-sūkta* (X.130), *Medhā-sūkta* (X.155) and *Mānasa-sūkta* (X.171).

The book in two volumes presents the full text of the *Āśvalāyana Saṁhitā* of the *Ṛgveda* with *padapāṭha*, marked with proper accent marks. The additional *mantra*s of the *Āśvalāyana Saṁhitā* followed by their translation in English and Hindi are also provided at the end of the Saṁhitā text.

In a detailed introduction of the text the learned editor has examined the existence of Śākhā-Saṁhitās of the *Ṛgveda* as mentioned by the Purāṇas, Patañjali, Mahīdāsa and other authorities, scrutinising textual evidence in support of them. The focus is, however, on the *Āśvalāyana-Saṁhitā*, with a background on Ācārya Āśvalāyana and exploring the antiquity, treatment of accent and *padapāṭha* of the text by referring to various sources.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्य यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि ॥ १ ॥
दंस्य यत्तर्हृषितं वचो मे तत्पावमानीभिरहं पुनामि ॥ २ ॥
जनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि ॥ ३ ॥
च चरणेभ्यस्तत्पावमानीभिरहं पुनामि ॥ ४ ॥
दाराभिगमनाच्च तत्पावमानीभिरहं पुनामि ॥ ५ ॥
नात् । पापेभ्यश्च प्रतिग्रहात्सद्यः प्रहरन्ति सर्वदुष्कृ
हुताशने । संवत्सरकृतं पापं तत्पावमानीभिरहं पुनामि ॥ ७
पुरस्तत्पावमानीभिरहं पुनामि ॥ ८ ॥ ऋतस्य योनयोऽमृतस्
त्रो यच्छामि सुकृतामु लोकं तत्पावमानीभिरहं पुनामि ॥ ९
सो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयन्त्या पुना
संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ११ ॥ पावमानीर्दिशन्तु
हिताः ॥ १२ ॥ येन देवाः पवित्रेणात्मानं पुनते सदा ।
धारं हिरण्मयम् । तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनातु
श्च भक्षान् भक्षयत्यमृतत्वं च गच्छति ॥ १५ ॥ पाव
क्षीरं सर्पिर्मधूदकम् ॥ १६ ॥ ऋषयस्तु तपस्तेपुः
१७ ॥ पावमानं परं ब्रह्म ये पठन्ति मनीषिणः । सप्त
त्पावमानीः शतानि षट् । एतज्जुहुयाज्जपेच्चैव घोरं मृत्यु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

म । ऋषींस्तस्योप तिष्ठेत क्षीरं सर्पिर्मधूदकम् ॥

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आश्वलायनशाखीया

ऋग्वेदसंहिता

Āśvalāyana-Saṁhitā
of
The Ṛgveda

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U.A., Bungalow Road, Opp. Hansraj
College Back Gate, Delhi-110007
Ph.:- 23856391, 41530902

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आश्वलायनशाखीया

ऋग्वेदसंहिता

(पदपाठ-विशदभूमिका-अनुक्रमणीद्वय-संवलिता)

द्वितीयो भागः
(मण्डलानि ६-१०)

सम्पादकः
व्रजबिहारी चौबे

इन्दिरा गान्धी राष्ट्रीय कला केन्द्र, नई दिल्ली

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

Cataloging in Publication Data — DK
[Courtesy: D.K. Agencies (P) Ltd. <docinfo@dkagencies.com>]

Āśvalāyana-saṁhitā.
Āśvalāyana-saṁhitā of the Ṛgveda : with padapāṭha, detailed introduction and two indices / edited by B.B. Chaubey.
2 v. cm.
English and Sanskrit.
Added t.p. title: Āśvalāyanaśākhīyā Ṛgvedasaṁhitā.
Includes indexes.
Contents: vol. I. Maṇḍalas 1-5 — vol. II. Maṇḍalas 6-10.
ISBN 13: 9788185503172 (set)
ISBN 10: 8185503176 (set)

1. Vedas. Ṛgveda. — Criticism, interpretation, etc. I. Chaubey, B. B. (Braj Bihari), 1940- II. Āśvalāyana. III. Vedas. Ṛgveda. IV. Title. V. Title: Āśvalāyanaśākhīyā Ṛgvedasaṁhitā.

DDC 294.59212046 22

ISBN 13: 978-81-85503-17-2 set ISBN 10: 81-85503-17-6
ISBN 13: 978-81-85503-18-9 vol.I ISBN 10: 81-85503-18-4
ISBN 13: 978-81-85503-19-6 vol. II ISBN 10: 81-85503-19-2

सर्वप्रथम भारत में प्रकाशन वर्ष, २००९
© इन्दिरा गान्धी राष्ट्रीय कला केन्द्र, नई दिल्ली

सर्वाधिकार सुरक्षित। इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण, या किसी भी विधि (जैसे – इलेक्ट्रोनिक, यांत्रिक, फोटो-प्रतिलिपि, रिकॉर्डिंग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, कॉपीराइट धारक एवं प्रकाशक की पूर्वलिखित अनुमति के बिना नहीं किया जा सकता है।

प्रकाशक :
इन्दिरा गान्धी राष्ट्रीय कला केन्द्र
जनपथ, नई दिल्ली - ११० ००१
फोन : (०११) २३३८ १३०३; फैक्स : २३३८ ८२८०
ई-मेल : kalakosa_ed@yahoo.co.in
वेब : www.ignca.nic.in

वितरक :
डी॰के॰ प्रिंटवर्ल्ड (प्रा॰) लि॰
पंजीकृत कार्यालय : 'श्रीकुंज', एफ-५२, बाली नगर
रमेश नगर मेट्रो स्टेशन, नई दिल्ली - ११० ०१५
फोन : (०११) २५४५ ३९७५; २५४६ ६०१९; फैक्स : (०११) २५४६ ५९२६
ई-मेल : dkprintworld@vsnl.net वेब : www.dkprintworld.com

मुद्रक : डी॰के॰ प्रिंटवर्ल्ड (प्रा॰) लि॰, नई दिल्ली - ११० ०१५

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

Āśvalāyana-Saṁhitā

of

The Ṛgveda

(With Padapāṭha, Detailed Introduction and two Indices)

Volume II

(*Maṇḍalas* 6-10)

Edited by

B.B. Chaubey

Published by

Indira Gandhi National Centre for the Arts,

New Delhi

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

Cataloging in Publication Data — DK
[Courtesy: D.K. Agencies (P) Ltd. <docinfo@dkagencies.com>]

Āśvalāyana-saṁhitā.
Āśvalāyana-saṁhitā of the Ṛgveda : with padapāṭha, detailed introduction and two indices / edited by B.B. Chaubey.
2 v. cm.
English and Sanskrit.
Added t.p. title: Āśvalāyanaśākhīyā Ṛgvedasaṁhitā.
Includes indexes.
Contents: vol. I. Maṇḍalas 1-5 — vol. II. Maṇḍalas 6-10.
ISBN 13: 9788185503172 (set)
ISBN 10: 8185503176 (set)

1. Vedas. Ṛgveda. — Criticism, interpretation, etc. I. Chaubey, B. B. (Braj Bihari), 1940- II. Āśvalāyana. III. Vedas. Ṛgveda. IV. Title. V. Title: Āśvalāyanaśākhīyā Ṛgvedasaṁhitā.

DDC 294.59212046 22

ISBN 13: 978-81-85503-17-2 set ISBN 10: 81-85503-17-6
ISBN 13: 978-81-85503-18-9 vol.I ISBN 10: 81-85503-18-4
ISBN 13: 978-81-85503-19-6 vol. II ISBN 10: 81-85503-19-2

First Published in India in 2009
© Indira Gandhi National Centre for the Arts, New Delhi.

All rights reserved. No part of this publication may be reproduced or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording, or any information storage or retrieval system, without prior written permission of both the copyright owner, indicated above, and the publisher.

Published by:
Indira Gandhi National Centre for the Arts
Central Vista Mess, Janapath, New Delhi - 110 001
Ph: (011) 2338 1303; Fax: 2338 8280
E-mail: kalakosa_ed@yahoo.co.in Web: www.ignca.nic.in

Distributed by:
D.K. Printworld (P) Ltd.
Regd. office: *'Srikunj'*, F-52, Bali Nagar
Ramesh Nagar Metro Stn., New Delhi - 110 015
Phones : (011) 2545 3975; 2546 6019; *Fax* : (011) 2546 5926
E-mail: dkprintworld@vsnl.net *Web*: www.dkprintworld.com

Printed in India by: D.K. Printworld (P) Ltd., New Delhi - 110 015

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

Maṇḍala-wise chart of Additional *Mantra*s and *Sūkta*s

*Common Sūkta*s	*Mantras*
I.191	10 (17-26)
V.49	1 (6)
VI.44	3 (25-27)
X.9	1 (-10)
X.75	1 (6)
X.85	6 (48-53)
X.95	1 (19)
X.97	1 (24)
X.103	2 (14-15)
X.106	1 (12)
X.174 (169)	2 (5-6)
X.189 (184)	3 (4-6)
X.192 (187)	1 (6)

*Additional Sūkta*s	*Mantra*s
II.44 (New)	5 (1-5)
V.88 (New)	16 (1-16)
V.89 (New)	10 (1-10)
VII. 56 (New)	9 (1-8)
VIII. 58.1-3	Absent
IX.68 (New)	20 (1-20)
IX115 (New)	5 (1-5)
X.128 (New)	23 (1-23)
X.130 (New)	11 (1-11)
X.145 (New)	9 (1-9)
X.155 (New)	9 (1-9)
X.171 (New)	28 (1-28)
X.197 (New)	5 (1-5)
X.198 (New)	3 (1-3)
X. 199 (New)	7 (1-7)
X.200 (New)	13 (1-13)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

Contents

FOREWORD (vii-viii)

PREFACE (ix-xvii)

ABBREVIATIONS (xix-xxi)

INTRODUCTION 1-102

1. Evolution of Saṁhitā-Literature 1
2. Śākhā-Saṁhitās of the Ṛgveda 4
3. Textual Evidence in Support of the Śākhā-Saṁhitās 6
   - (i) *Śākala-Saṁhitā* 6
   - (ii) *Bahvṛca-Saṁhitā* 7
   - (iii) *Māṇḍūkeya-Saṁhitā* 9
   - (iv) *Bāṣkala-Saṁhitā* 12
   - (v) *Śāṅkhāyana-Saṁhitā* 18
4. Personality of Āśvalāyana 22
5. Works of Āśvalāyana— 25
   - (i) *Āśvalāyana-Śrautasūtra* 25
   - (ii) *Āśvalāyana-Gṛhyasūtra* 26
   - (iii) *Aitareya-Āraṇyaka (4th and 5th Chapters)* 27
6. Existence of the *Āśvalāyana-Saṁhitā* 29
7. Editions of the *Khila*s 32
8. Existence of the MSS of the *ĀśvS* 35
9. Antiquity and authenticity of the Additional *Ṛk*s of the *ĀśvS*— 38
   - (i) Additional *Ṛk*s occurring in the common *Sūkta*s 38
   - (ii) Complete additional *Sūkta*s occurring in the *ĀśvS* 44
10. Treatment of Accent in the *ĀśvS*. 54
11. *Padapāṭha* of the *ĀśvS*. 56

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

12 An account of MSS of the *ĀśvS* and *Padapāṭha* utilized for the present Edition 58

(i) *Saṁhitā-Text* 58

(ii) *Padapāṭha-Text* 85

Textual variants in the *AśvS* with regard to the additional *mantras* recorded from MSS, *Khilas* and other texts **103-146**

प्रथमो भागः

आश्वलायनशाखीय-ऋग्वेदसंहिता **1-673**

प्रथमं मण्डलम् 1-304

द्वितीयं मण्डलम् 305-376

तृतीयं मण्डलम् 377-472

चतुर्थं मण्डलम् 473-561

पञ्चमं मण्डलम् 562-673

द्वितीयो भागः

आश्वलायनशाखीय-ऋग्वेदसंहिता **1-886**

षष्ठं मण्डलम् 1-117

सप्तमं मण्डलम् 118-251

अष्टमं मण्डलम् 252-452

नवमं मण्डलम् 453-589

दशमं मण्डलम् 590-886

Translation of the Additional *Mantras* of the *ĀśvS* (आश्वलायनशाखीय-अतिरिक्तमन्त्रानुवादः) **887-943**

INDEX I : Word-Index of the Additional *Mantras* (आश्वलायनशाखीय-अतिरिक्तमन्त्रगतपदानुक्रमणी) **1-30**

INDEX II : Mantra-Index of *ĀśvS* (आश्वलायनशाखीय-मन्त्रानुक्रमणी) **31-172**

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वितीयो भागः

(मण्डलानि ६-१०)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ ॐ ॥

आश्वलायनशाखीया ऋग्वेदसंहिता

षष्ठं मण्डलम्

॥ अथ चतुर्थाष्टके चतुर्थोऽध्यायः ॥

[१] [१३ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्।]

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता।

त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै॥ १॥

त्वम्। हि। अग्ने। प्रथमः। मनोता। अस्याः। धियः। अभवः। दस्म। होता।

त्वम्। सीम्। वृषन्। अकृणोः। दुस्तरीतु। सहः। विश्वस्मै। सहसे। सहध्यै॥ १॥

अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन्।

तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन्॥ २॥

अध। होता। नि। असीदः। यजीयान्। इळः। पदे। इषयन्। ईड्यः। सन्।

तम्। त्वा। नरः। प्रथमम्। देवऽयन्तः। महः। राये। चितयन्तः। अनु। ग्मन्॥ २॥

वृतेव यन्तं बहुभिर्वसव्यै३स्त्वे रयिं जागृवांसो अनु ग्मन्।

रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम्॥ ३॥

वृताऽइव। यन्तम्। बहुऽभिः। वसव्यैः। त्वे इति। रयिम्। जागृऽवांसः। अनु। ग्मन्।

रुशन्तम्। अग्निम्। दर्शतम्। बृहन्तम्। वपाऽवन्तम्। विश्वहा। दीदिऽवांसम्॥ ३॥

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम्।

नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ॥ ४॥

पदम्। देवस्य। नमसा। व्यन्तः। श्रवस्यवः। श्रवः। आपन्। अमृक्तम्।

नामानि। चित्। दधिरे। यज्ञियानि। भद्रायाम्। ते। रणयन्त। सम्ऽदृष्टौ॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम्।

त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम्॥ ५॥ [३९ (३५)]

त्वाम्। वर्धन्ति। क्षितयः। पृथिव्याम्। त्वाम्। रायः। उभयासः। जनानाम्।

त्वम्। त्राता। तरणे। चेत्यः। भूः। पिता। माता। सदम्। इत्। मानुषाणाम्॥ ५॥

सपर्येण्यः स प्रियो विक्ष्व१ग्निर्होता मन्द्रो नि षसादा यजीयान्।

तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम॥ ६॥

सपर्येण्यः। सः। प्रियः। विक्षु। अग्निः। होता। मन्द्रः। नि। ससाद। यजीयान्।

तम्। त्वा। वयम्। दमे। आ। दीदिऽवांसम्। उप। ज्ञुऽबाधः। नमसा। सदेम॥ ६॥

त्वं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः।

त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन॥ ७॥

तम्। त्वा। वयम्। सुऽध्यः। नव्यम्। अग्ने। सुम्नऽयवः। ईमहे। देवऽयन्तः।

त्वम्। विशः। अनयः। दीद्यानः। दिवः। अग्ने। बृहता। रोचनेन॥ ७॥

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम्।

प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम्॥ ८॥

विशाम्। कविम्। विश्पतिम्। शश्वतीनाम्। निऽतोशनम्। वृषभम्। चर्षणीनाम्।

प्रेतिऽइषणिम्। इषयन्तम्। पावकम्। राजन्तम्। अग्निम्। यजतम्। रयीणाम्॥ ८॥

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम्।

य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः॥ ९॥

सः। अग्ने। ईजे। शशमे। च। मर्तः। यः। ते। आनट्। सम्ऽइधा। हव्यऽदातिम्।

यः। आऽहुतिम्। परि। वेद। नमःऽभिः। विश्वा। इत्। सः। वामा। दधते। त्वाऽऊतः॥ ९॥

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः।

वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम॥ १०॥

अस्मै। ऊँ इति। ते। महि। महे। विधेम। नमःऽभिः। अग्ने। सम्ऽइधा। उत। हव्यैः।

वेदी। सूनो इति। सहसः। गीःऽभिः। उक्थैः। आ। ते। भद्रायाम्। सुऽमतौ। यतेम॥ १०॥

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्य१स्तरुत्रः।

बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। यः। त॒त॒न्थ॑। रोद॑सी॒ इति॑। वि। भा॒सा। श्रवः॑ऽभिः। च॒। श्र॒व॒स्यः॑। त॒रु॒त्रः॑।

बृ॒ह॒त्ऽभिः॑। वाजैः॑। स्थवि॑रेभिः। अ॒स्मे इति॑। रे॒वत्ऽभिः॑। अ॒ग्ने॒। वि॒ऽत॒रम्। वि। भा॒हि॒॥ ११॥

नृ॒वद्व॑सो॒ सद॒मिद्धे॑ह्य॒स्मे भूरि॑ तो॒काय॒ तन॑याय प॒श्वः।

पू॒र्वीरिषो॑ बृह॒तीरा॒रेअ॑घा अ॒स्मे भ॒द्रा सौ॑श्रव॒सानि॑ सन्तु॥ १२॥

नृ॒ऽवत्। व॒सो॒ इति॑। सद॑म्। इत्। धे॒हि॒। अ॒स्मे इति॑। भूरि॑। तो॒काय॑। तन॑याय। प॒श्वः।

पू॒र्वीः। इषः॑। बृ॒ह॒तीः। आ॒रेऽअ॑घाः। अ॒स्मे इति॑। भ॒द्रा। सौ॒श्र॒व॒सानि॑। स॒न्तु॒॥ १२॥

पु॒रूण्य॑ग्ने पुरु॒धा त्वा॒या वसू॑नि राजन्व॒सुता॑ ते अश्याम्।

पु॒रूणि॒ हि त्वे पु॑रुवार॒ सन्त्य॑ग्ने॒ वसु॑ विध॒ते राज॑नि॒ त्वे॥ १३॥ [४० (३६)]

पु॒रूणि॑। अ॒ग्ने॒। पु॒रु॒धा। त्वा॒ऽया। वसू॑नि। रा॒ज॒न्। व॒सुता॑। ते॒। अ॒श्या॒म्।

पु॒रूणि॑। हि। त्वे इति॑। पु॒रु॒ऽवा॒र॒। सन्ति॑। अग्ने॑। वसु॑। वि॒ध॒ते। राज॑नि। त्वे इति॑॥ १३॥

इत्याश्वलायन-संहितायां

चतुर्थाष्टके

चतुर्थोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ चतुर्थाष्टके पंचमोऽध्यायः ॥

[२] [११ भरद्वाजो बार्हस्पत्यः। अग्निः। अनुष्टुप्, ११ शक्वरी।]

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे। त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि॥ १॥

त्वम्। हि। क्षैतऽवत्। यशः। अग्ने। मित्रः। न। पत्यसे।

त्वम्। विऽचर्षणे। श्रवः। वसो इति। पुष्टिम्। न। पुष्यसि॥ १॥

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते। त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः॥ २॥

त्वाम्। हि। स्म। चर्षणयः। यज्ञेभिः। गीःऽभिः। ईळते।

त्वाम्। वाजी। याति। अवृकः। रजःऽतूः। विश्वऽचर्षणिः॥ २॥

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते। यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे॥ ३॥

सऽजोषः। त्वा। दिवः। नरः। यज्ञस्य। केतुम्। इन्धते।

यत्। ह। स्यः। मानुषः। जनः। सुम्नऽयुः। जुह्वे। अध्वरे॥ ३॥

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते। ऊती ष बृहतो दिवो द्विषो अंहो न तरति॥ ४॥

ऋधत्। यः। ते। सुऽदानवे। धिया। मर्तः। शशमते।

ऊती। सः। बृहतः। दिवः। द्विषः। अंहः। न। तरति॥ ४॥

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत्। वयावन्तं स पुष्यति क्षयमग्ने शतायुषम्॥ ५॥

सम्ऽइधा। यः। ते। आऽहुतिम्। निऽशितिम्। मर्त्यः। नशत्। [१]

वयाऽवन्तम्। सः। पुष्यति। क्षयम्। अग्ने। शतऽआयुषम्॥ ५॥

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः। सूरो न हि द्युता त्वं कृपा पावक रोचसे॥ ६॥

त्वेषः। ते। धूमः। ऋण्वति। दिवि। सन्। शुक्रः। आऽततः।

सूरः। न। हि। द्युता। त्वम्। कृपा। पावक। रोचसे॥ ६॥

अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः। रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अव। हि। विक्षु। ईड्यः। असि। प्रियः। नः। अतिथिः।

रण्वः। पुरिऽइंव। जूर्यः। सूनुः। न। त्रययाय्यः॥ ७॥

क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः। परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः॥ ८॥

क्रत्वा। हि। द्रोणे। अज्यसे। अग्ने। वाजी। न। कृत्व्यः।

परिज्माऽइव। स्वधा। गयः। अत्यः। न। ह्वार्यः। शिशुः॥ ८॥

त्वं त्या चिदच्युताग्ने पशुर्न यवसे। धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः॥ ९॥

त्वम्। त्या। चित्। अच्युता। अग्ने। पशुः। न। यवसे।

धाम। ह। यत्। ते। अजर। वना। वृश्चन्ति। शिक्वसः॥ ९॥

वेषि ह्यध्वरीयतामग्ने होता दमे विशाम्। समृधो विशपते कृणु जुषस्व हव्यमङ्गिरः॥ १०॥

वेषि। हि। अध्वरिऽयताम्। अग्ने। होता। दमे। विशाम्।

सम्ऽऋधः। विशपते। कृणु। जुषस्व। हव्यम्। अङ्गिरः॥ १०॥

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः।

वीहि स्वस्तिं सुक्षितिं दिवो नृन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम॥ ११॥ [२]

अच्छ। नः। मित्रऽमहः। देव। देवान्। अग्ने। वोचः। सुऽमतिम्। रोदस्योः॥ वीहि। स्वस्तिम्।

सुऽक्षितिम्। दिवः। नृन्। द्विषः। अंहांसि। दुःऽइता। तरेम। ता। तरेम। तव। अवसा। तरेम॥ ११॥

[३] [८ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्।]

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे।

यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः॥ १॥

अग्ने। सः। क्षेषत्। ऋतऽपाः। ऋतेऽजाः। उरु। ज्योतिः। नशते। देवऽयुः। ते।

यम्। त्वम्। मित्रेण। वरुणः। सऽजोषाः। देव। पासि। त्यजसा। मर्तम्। अंहः॥ १॥

ईजे यज्ञेभिः शशमे शमीभिरृधद्वारायाग्नये ददाश।

एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः॥ २॥

ईजे। यज्ञेभिः। शशमे। शमीभिः। ऋधत्ऽवाराय। अग्नये। ददाश।

एव। चन। तम्। यशसाम्। अजुष्टिः। न। अंहः। मर्तम्। नशते। न। प्रऽदृप्तिः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः।

हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः॥ ३॥

सूरः। न। यस्य। दृशतिः। अरेपाः। भीमा। यत्। एति। शुचतः। ते। आ। धीः।

हेषस्वतः। शुरुधः। न। अयम्। अक्तोः। कुत्र। चित्। रण्वः। वसतिः। वने॰जाः॥ ३॥

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा।

विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत्॥ ४॥

तिग्मम्। चित्। एम। महि। वर्पः। अस्य। भसत्। अश्वः। न। यमसानः। आसा।

वि॰जेहमानः। परशुः। न। जिह्वाम्। द्रविः। न। द्रवयति। दारु। धक्षत्॥ ४॥

स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम्।

चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः॥ ५॥ [३]

सः। इत्। अस्ताऽइव। प्रति। धात्। असिष्यन्। शिशीत। तेजः। अयसः। न। धाराम्।

चित्र॰ध्रजतिः। अरतिः। यः। अक्तोः। वेः। न। द्रु॰सद्वा। रघुपत्म॰जंहाः॥ ५॥

स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः।

नक्तं य ईमरुषो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन्॥ ६॥

सः। ईम्। रेभः। न। प्रति। वस्ते। उस्राः। शोचिषा। ररपीति। मित्र॰महाः।

नक्तम्। यः। ईम्। अरुषः। यः। दिवा। नॄन्। अमर्त्यः। अरुषः। यः। दिवा। नॄन्॥ ६॥

दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत्।

घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी॥ ७॥

दिवः। न। यस्य। विधतः। नवीनोत्। वृषा। रुक्षः। ओषधीषु। नूनोत्।

घृणा। न। यः। ध्रजसा। पत्मना। यन्। आ। रोदसी इति। वसुना। दम्। सुपत्नी इति सु॰पत्नी॥ ७॥

धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः।

शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत्॥ ८॥ [४]

धायः॰भिः। वा। यः। युज्येभिः। अर्कैः। वि॰द्युत्। न। दविद्योत्। स्वेभिः। शुष्मैः।

शर्धः। वा। यः। मरुताम्। ततक्ष। ऋभुः। न। त्वेषः। रभसानः। अद्यौत्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[४] [८ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्।]

यथा॑ होत॒र्मनु॑षो दे॒वता॑ता य॒ज्ञेभि॑: सूनो सहसो॒ यजा॑सि।

ए॒वा नो॑ अ॒द्य स॑म॒ना स॑मा॒नानु॒शन्न॑ग्न उश॒तो य॑क्षि दे॒वान्॥ १॥

यथा॑। होत॒:। मनु॑षः। दे॒व°ता॑ता। य॒ज्ञेभि॑:। सूनो॒ इति॑। स॒ह॒सः। यजा॑सि।

ए॒व। न॒:। अ॒द्य। स॒म॒ना। स॒मा॒नान्। उ॒शन्। अ॒ग्ने॒। उ॒श॒तः। य॒क्षि॒। दे॒वान्॥ १॥

स नो॑ वि॒भावा॑ च॒क्षणि॒र्न वस्तो॑र॒ग्निर्व॒न्दारु॒ वेद्य॒श्चनो॑ धात्।

वि॒श्वायु॒र्यो अ॒मृतो॒ मर्त्ये॑षूष॒र्भुद्भूदति॑थिर्जा॒तवे॑दाः॥ २॥

सः। न॒:। वि॒भा°वा॑। च॒क्षणि॑:। न। वस्तो॑:। अ॒ग्निः। व॒न्दारु॑। वेद्य॑:। चन॑:। धा॒त्।

वि॒श्व°आ॑युः। यः। अ॒मृत॑:। मर्त्ये॑षु। उ॒ष॒:ऽभुत्। भूत्। अति॑थिः। जा॒त°वे॑दाः॥ २॥

द्यावो॒ न यस्य॑ प॒नय॒न्त्यभ्वं॒ भासां॑सि वस्ते॒ सूर्यो॒ न शु॒क्रः।

वि य इ॒नोत्य॒जरः॑ पाव॒कोऽश्न॑स्य चिच्छिश्नथत्पू॒र्व्याणि॑॥ ३॥

द्याव॑:। न। यस्य॑। प॒नय॑न्ति। अभ्व॑म्। भासां॑सि। व॒स्ते॒। सूर्य॑:। न। शु॒क्रः।

वि। यः। इ॒नोति॑। अ॒जर॑:। पा॒व॒कः। अश्न॑स्य। चि॒त्। शि॒श्न॒थ॒त्। पू॒र्व्याणि॑॥ ३॥

व॒द्मा हि सू॑नो॒ अस्य॑द्म॒सद्वा॑ च॒क्रे अ॒ग्निर्ज॒नुषाज्मान्न॑म्।

स त्वं न॑ ऊर्जसन॒ ऊर्जं॑ धा॒ राजे॑व जेरवृ॒के क्षे॑ष्य॒न्तः॥ ४॥

व॒द्मा। हि। सूनो॒ इति॑। असि॑। अ॒द्म॒°सद्वा॑। च॒क्रे। अ॒ग्निः। ज॒नुषा॑। अज्म॑। अन्न॑म्।

सः। त्वम्। न॒:। ऊर्ज॒°स॒ने॒। ऊर्ज॑म्। धा॒:। राजा॑ऽइव। जे॒:। अ॒वृ॒के। क्षे॒षि॒। अ॒न्तरिति॑॥ ४॥

निति॑क्ति यो वा॑र॒णमन्न॒मत्ति॑ वा॒युर्न राष्ट्र्यत्ये॑त्य॒क्तून्।

तु॒र्याम॒ यस्त॑ आ॒दिशा॒मरा॑ती॒रत्यो॒ न हु॒तः पत॑तः परि॒हुत्॥ ५॥ [५]

नि°ति॑क्ति। यः। वा॒र॒णम्। अन्न॑म्। अत्ति॑। वा॒युः। न। राष्ट्री॑। अति॑। ए॒ति॒। अ॒क्तून्।

तु॒र्याम॑। यः। ते॒। आ॒°दिशा॑म्। अरा॑तीः। अत्य॑:। न। हु॒त॑:। पत॑तः। प॒रि॒°हु॒त्॥ ५॥

आ सूर्यो॒ न भा॑नु॒मद्भि॑र॒र्कैरग्ने॑ त॒तन्थ॒ रोद॑सी॒ वि भा॒सा।

चि॒त्रो न॑यत्परि॒ तमां॑स्य॒क्तः शो॒चिषा॒ पत्म॑न्नौशि॒जो न दीय॑न्॥ ६॥

आ। सूर्य॑:। न। भा॒नु॒मत्°भि॑:। अ॒र्कैः। अग्ने॑। त॒तन्थ॑। रोद॑सी॒ इति॑। वि। भा॒सा।

चि॒त्रः। न॒य॒त्। परि॑। तमां॑सि। अ॒क्तः। शो॒चिषा॑। पत्म॑न्। औ॒शि॒जः। न। दीय॑न्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महिं नः श्रोष्यंग्ने।

इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः॥ ७॥

त्वाम्। हि। मन्द्रऽतमम्। अर्कऽशोकैः। ववृमहे। महिं। नः। श्रोषिं। अग्ने।

इन्द्रम्। न। त्वा। शवसा। देवता। वायुम्। पृणन्ति। राधसा। नृऽतमाः॥ ७॥

नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः।

ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः॥ ८॥ [६]

नु। नः। अग्ने। अवृकेभिः। स्वस्ति। वेषि। रायः। पथिऽभिः। पर्षि। अंहः।

ता। सूरिऽभ्यः। गृणते। रासि। सुम्नम्। मदेम। शतऽहिमाः। सुऽवीराः॥ ८॥

[५] [७ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्।]

हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम्।

य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक्॥ १॥

हुवे। वः। सूनुम्। सहसः। युवानम्। अद्रोघऽवाचम्। मतिऽभिः। यविष्ठम्।

यः। इन्वति। द्रविणानि। प्रऽचेताः। विश्वऽवाराणि। पुरुऽवारः। अध्रुक्॥ १॥

त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः।

क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके॥ २॥

त्वे इति। वसूनि। पुरुऽअनीक। होतः। दोषा। वस्तोः। आ। ईरिरे। यज्ञियासः।

क्षामऽइव। विश्वा। भुवनानि। यस्मिन्। सम्। सौभगानि। दधिरे। पावके॥ २॥

त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम्।

अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि॥ ३॥

त्वम्। विक्षु। प्रऽदिवः। सीदः। आसु। क्रत्वा। रथीः। अभवः। वार्याणाम्।

अतः। इनोषि। विधते। चिकित्वः। वि। आनुषक्। जातऽवेदः। वसूनि॥ ३॥

यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात्।

तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान्॥ ४॥

यः। नः। सनुत्यः। अभिऽदासत्। अग्ने। यः। अन्तरः। मित्रऽमहः। वनुष्यात्।

तम्। अजरेभिः। वृषऽभिः। तव। स्वैः। तप। तपिष्ठ। तपसा। तपस्वान्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्ते य॒ज्ञेन॑ स॒मिधा॒ य उ॒क्थैर॒र्केभि॑: सूनो सहसो॒ ददा॑शत्।

स मर्त्ये॑ष्वमृत॒ प्रचे॑ता रा॒या द्यु॒म्नेन॒ श्रव॑सा॒ वि भा॑ति॥ ५॥

यः। ते॒। य॒ज्ञेन॑। स॒म्ऽइधा॑। यः। उ॒क्थैः। अ॒र्केभि॑ः। सू॒नो॒ इति॑। स॒ह॒सः॒। ददा॑शत्।

सः। मर्त्ये॑षु। अ॒मृ॒त॒। प्रऽचे॑ताः। रा॒या। द्यु॒म्नेन॑। श्रव॑सा। वि। भा॒ति॒॥ ५॥

स तत्कृ॑धीषि॒तस्तूय॑मग्ने॒ स्पृधो॑ बाधस्व॒ सह॑सा॒ सह॑स्वान्।

यच्छ॒स्यसे॒ द्युभि॑र॒क्तो वचो॑भि॒स्तज्जु॑षस्व जरि॒तुर्घोषि॒ मन्म॑॥ ६॥

सः। तत्। कृ॒धि॒। इ॒षि॒तः। तूय॑म्। अ॒ग्ने॒। स्पृध॑ः। बा॒ध॒स्व॒। सह॑सा। सह॑स्वान्।

यत्। श॒स्यसे॑। द्यु॒ऽभि॑ः। अ॒क्तः। वच॑ःऽभिः। तत्। जु॒ष॒स्व॒। ज॒रि॒तुः। घोषि॑। मन्म॑॥ ६॥

अ॒श्याम॒ तं काम॑मग्ने॒ तवो॒ती अ॒श्याम॑ र॒यिं र॑यिवः सु॒वीर॑म्।

अ॒श्याम॒ वाज॑म॒भि वा॒जय॑न्तो॒ऽश्याम॑ द्यु॒म्नम॑जरा॒जरं॑ ते॥ ७॥ [७]

अ॒श्याम॑। तम्। काम॑म्। अ॒ग्ने॒। तव॑। ऊ॒ती। अ॒श्याम॑। र॒यिम्। र॒यि॒ऽव॒ः। सु॒ऽवीर॑म्।

अ॒श्याम॑। वाज॑म्। अ॒भि। वा॒जय॑न्तः। अ॒श्याम॑। द्यु॒म्नम्। अ॒ज॒र॒। अ॒जर॑म्। ते॒॥ ७॥

[६] [७ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्।]

प्र नव्य॑सा॒ सह॑सः सू॒नुमच्छा॑ य॒ज्ञेन॑ गा॒तुमव॑ इ॒च्छमा॑नः।

वृ॒श्चद्व॑नं कृ॒ष्णया॑मं॒ रुश॑न्तं वी॒ती होता॑रं दि॒व्यं जि॑गाति॥ १॥

प्र। नव्य॑सा। सह॑सः। सू॒नुम्। अच्छ॑। य॒ज्ञेन॑। गा॒तुम्। अव॑ः। इ॒च्छमा॑नः।

वृ॒श्चत्ऽव॑नम्। कृ॒ष्णऽया॑मम्। रुश॑न्तम्। वी॒ती। होता॑रम्। दि॒व्यम्। जि॒गा॒ति॒॥ १॥

स श्वि॑ता॒नस्त॑न्य॒तू रो॑चन॒स्था अ॒जरे॑भि॒र्नान॑दद्भि॒र्यवि॑ष्ठः।

यः पा॑व॒कः पु॑रु॒तम॑ः पु॒रूणि॑ पृ॒थून्य॒ग्निर॑नु॒याति॒ भर्व॑न्॥ २॥

स। श्वि॒ता॒नः। त॒न्य॒तुः। रो॒च॒न॒ऽस्थाः। अ॒जरे॑भिः। नान॑दत्ऽभिः। यवि॑ष्ठः।

यः। पा॒व॒कः। पु॒रु॒ऽतम॑ः। पु॒रूणि॑। पृ॒थूनि॑। अ॒ग्निः। अ॒नु॒ऽयाति॑। भर्व॑न्॥ २॥

वि ते॒ विष्व॒ग्वात॑जूतासो अग्ने॒ भामा॑सः शुचे॒ शुच॑यश्चरन्ति।

तु॒वि॒म्र॒क्षासो॑ दि॒व्या नव॑ग्वा॒ वना॑ वनन्ति धृष॒ता रु॒जन्त॑ः॥ ३॥

वि। ते॒। विष्व॑क्। वात॑ऽजूतासः। अ॒ग्ने॒। भामा॑सः। शु॒चे॒। शुच॑यः। च॒र॒न्ति॒।

तु॒वि॒ऽम्र॒क्षास॑ः। दि॒व्याः। नव॑ऽग्वाः। वना॑। व॒न॒न्ति॒। धृ॒ष॒ता। रु॒जन्त॑ः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः॥ ४॥

ये। ते। शुक्रासः। शुचयः। शुचिष्मः। क्षाम्। वपन्ति। वि॰सितासः। अश्वाः।
अध। भ्रमः। ते। उर्विया। वि। भाति। यातयमानः। अधि। सानु। पृश्नेः॥ ४॥

अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना।
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि॥ ५॥

अध। जिह्वा। पापतीति। प्र। वृष्णः। गोषु॰युधः। न। अशनिः। सृजाना।
शूरस्यऽइव। प्र॰सितिः। क्षातिः। अग्नेः। दुः२वर्तुः। भीमः। दयते। वनानि॥ ५॥

आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ।
स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन्वनुषो नि जूर्व॥ ६॥

आ। भानुना। पार्थिवानि। ज्रयांसि। महः। तोदस्य। धृषता। ततन्थ।
स। बाधस्व। अप। भया। सहः२भिः। स्पृधः। वनुष्यन्। वनुषः। नि। जूर्व॥ ६॥

स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम्।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व॥ ७॥ [८]

सः। चित्र। चित्रम्। चितयन्तम्। अस्मे इति। चित्र॰क्षत्र। चित्र॰तमम्। वयः२धाम्।
चन्द्रम्। रयिम्। पुरु॰वीरम्। बृहन्तम्। चन्द्र। चन्द्राभिः। गृणते। युवस्व॥ ७॥

[७] [७ भरद्वाजो बार्हस्पत्यः। वैश्वानरोऽग्निः। त्रिष्टुप्, ६-७ जगत्यौ।]

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥ १॥

मूर्धानम्। दिवः। अरतिम्। पृथिव्याः। वैश्वानरम्। ऋते। आ। जातम्। अग्निम्।
कविम्। सम्॰राजम्। अतिथिम्। जनानाम्। आसन्। आ। पात्रम्। जनयन्त। देवाः॥ १॥

नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः॥ २॥

नाभिम्। यज्ञानाम्। सदनम्। रयीणाम्। महाम्। आ॰हावम्। अभि। सम्। नवन्त।
वैश्वानरम्। रथ्यम्। अध्वराणाम्। यज्ञस्य। केतुम्। जनयन्त। देवाः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः।

वैश्वानर त्वमस्मासु धेहि वसूनि राजन्स्पृहयाय्याणि॥ ३॥

त्वत्। विप्रः। जायते। वाजी। अग्ने। त्वत्। वीरासः। अभिमातिऽसहः।

वैश्वानर। त्वम्। अस्मासु। धेहि। वसूनि। राजन्। स्पृहयाय्याणि॥ ३॥

त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते।

तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः॥ ४॥

त्वाम्। विश्वे। अमृत। जायमानम्। शिशुम्। न। देवाः। अभि। सम्। नवन्ते।

तव। क्रतुऽभिः। अमृतऽत्वम्। आयन्। वैश्वानर। यत्। पित्रोः। अदीदेः॥ ४॥

वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष।

यज्जायमानः पित्रोरुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम्॥ ५॥

वैश्वानर। तव। तानि। व्रतानि। महानि। अग्ने। नकिः। आ। दधर्ष।

यत्। जायमानः। पित्रोः। उपऽस्थे। अविन्दः। केतुम्। वयुनेषु। अह्नाम्॥ ५॥

वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना।

तस्येदु विश्वा भुवनाधि मूर्धनि वयाइव रुरुहुः सप्त विस्रुहः॥ ६॥

वैश्वानरस्य। विऽमितानि। चक्षसा। सानूनि। दिवः। अमृतस्य। केतुना।

तस्य। इत्। ऊँ इति। विश्वा। भुवना। अधि। मूर्धनि। वयाःऽइव। रुरुहुः। सप्त। विऽस्रुहः॥ ६॥

वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः।

परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता॥ ७॥ [९]

वि। यः। रजांसि। अमिमीत। सुऽक्रतुः। वैश्वानरः। वि। दिवः। रोचना। कविः।

परि। यः। विश्वा। भुवनानि। पप्रथे। अदब्धः। गोपाः। अमृतस्य। रक्षिता॥ ७॥

[८] [७ भरद्वाजो बार्हस्पत्यः। वैश्वानरोऽग्निः। जगती। ७ त्रिष्टुप्।]

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः।

वैश्वानराय मतिर्नव्यसी शुचिः सोमइव पवते चारुरग्नये॥ १॥

पृक्षस्य। वृष्णः। अरुषस्य। नु। सहः। प्र। नु। वोचम्। विदथा। जातऽवेदसः।

वैश्वानराय। मतिः। नव्यसी। शुचिः। सोमःऽइव। पवते। चारुः। अग्नये॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत।
व्यं१न्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत्॥ २॥
सः। जायमानः। परमे। विऽओमनि। व्रतानि। अग्निः। व्रतऽपाः। अरक्षत।
वि। अन्तरिक्षम्। अमिमीत। सुऽक्रतुः। वैश्वानरः। महिना। नाकम्। अस्पृशत्॥ २॥
व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्ज्योतिषा तमः।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम्॥ ३॥
वि। अस्तभ्नात्। रोदसी इति। मित्रः। अद्भुतः। अन्तःऽवावत्। अकृणोत्। ज्योतिषा। तमः।
वि। चर्मणी इवेति चर्मणीऽइव। धिषणे इति। अवर्तयत्। वैश्वानरः। विश्वम्। अधत्त। वृष्ण्यम्॥ ३॥
अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम्।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः॥ ४॥
अपाम्। उपऽस्थे। महिषाः। अगृभ्णत। विशः। राजानम्। उप। तस्थुः। ऋग्मियम्।
आ। दूतः। अग्निम्। अभरत्। विवस्वतः। वैश्वानरम्। मातरिश्वा। पराऽवतः॥ ४॥
युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीम्।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा॥ ५॥
युगेऽयुगे। विदथ्यम्। गृणत्ऽभ्यः। अग्ने। रयिम्। यशसम्। धेहि। नव्यसीम्।
पव्याऽइव। राजन्। अघऽशंसम्। अजर। नीचा। नि। वृश्च। वनिनम्। न तेजसा॥ ५॥
अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम्।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः॥ ६॥
अस्माकम्। अग्ने। मघवत्ऽसु। धारय। अनामि। क्षत्रम्। अजरम्। सुऽवीर्यम्।
वयम्। जयेम। शतिनम्। सहस्रिणम्। वैश्वानर। वाजम्। अग्ने। तव। ऊतिऽभिः॥ ६॥
अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन्।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः॥ ७॥ [१०]
अदब्धेभिः। तव। गोपाभिः। इष्टे। अस्माकम्। पाहि। त्रिऽसधस्थ। सूरीन्।
रक्ष। च। नः। ददुषाम्। शर्धः। अग्ने। वैश्वानर। प्र। च। तारीः। स्तवानः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[९] [७ भरद्वाजो बार्हस्पत्यः । वैश्वानरोऽग्निः । त्रिष्टुप्, (७ प्रस्तारपंक्तिर्वा)]

अह॑श्च कृ॒ष्णमह॒रर्जु॑नं च॒ वि व॑र्तेते॒ रज॑सी वे॒द्याभि॑ः ।
वै॒श्वा॒न॒रो जाय॑मानो॒ न राजावा॑तिर॒ज्ज्योति॑षा॒ग्निस्तमां॑सि ॥ १ ॥

अह॒रिति॑ । च॒ । कृ॒ष्णम् । अह॑ः । अर्जु॑नम् । च॒ । वि । व॒र्ते॑ते॒ इति॑ । रज॑सी॒ इति॑ । वे॒द्याभि॑ः ।
वै॒श्वा॒न॒रः । जाय॑मानः । न । राजा॑ । अव॑ । अ॒ति॒र॒त् । ज्योति॑षा । अ॒ग्निः । तमां॑सि ॥ १ ॥

नाहं तन्तुं॑ न वि जा॑ना॒म्योतुं॑ न यं वय॑न्ति सम॒रेऽत॑मानाः ।
कस्य॑ स्वित्पु॒त्र इ॒ह वक्त्वा॑नि प॒रो व॑दा॒त्यव॑रेण पि॒त्रा ॥ २ ॥

न । अ॒हम् । तन्तु॑म् । न । वि । जा॒ना॒मि॒ । ओतु॑म् । न । यम् । वय॑न्ति । स॒म्ऽअ॒रे । अत॑मानाः ।
कस्य॑ । स्वि॒त् । पु॒त्रः । इ॒ह । वक्त्वा॑नि । प॒रः । व॒दा॒ति॒ । अव॑रेण । पि॒त्रा ॥ २ ॥

स इत्तन्तुं॑ स वि जा॑ना॒त्योतुं॑ स वक्त्वा॑न्यृतु॒था व॑दाति ।
य ईं॒ चिके॑तद॒मृत॑स्य गो॒पा अ॒वश्चर॑न्प॒रो अ॒न्येन॒ पश्य॑न् ॥ ३ ॥

सः । इत् । तन्तु॑म् । सः । वि । जा॒ना॒ति॒ । ओतु॑म् । सः । वक्त्वा॑नि । ऋ॒तु॒ऽथा । व॒दा॒ति॒ ।
यः । ई॒म् । चिके॑तत् । अ॒मृत॑स्य । गो॒पाः । अ॒वः । चर॑न् । प॒रः । अ॒न्येन॑ । पश्य॑न् ॥ ३ ॥

अ॒यं होता॑ प्रथ॒मः पश्य॑ते॒मम॒िदं ज्योति॑र॒मृतं॒ मर्त्ये॑षु ।
अ॒यं स ज॑ज्ञे ध्रु॒व आ निष॒त्तोऽम॑र्त्यस्त॒न्वा३॒ वर्धमानः ॥ ४ ॥

अ॒यम् । होता॑ । प्र॒थ॒मः । पश्य॑त । इ॒मम् । इ॒दम् । ज्योति॑ः । अ॒मृत॑म् । मर्त्ये॑षु ।
अ॒यम् । सः । ज॒ज्ञे॒ । ध्रु॒वः । आ । निऽस॑त्तः । अम॑र्त्यः । त॒न्वा॑ । वर्ध॑मानः ॥ ४ ॥

ध्रु॒वं ज्योति॒र्निहि॑तं दृ॒शये॒ कं मनो॒ जवि॑ष्ठं प॒तय॑त्स्व॒न्तः ।
विश्वे॑ दे॒वाः सम॑नसः॒ सके॑ता॒ एकं॒ क्रतु॑म॒भि वि य॑न्ति सा॒धु ॥ ५ ॥

ध्रु॒वम् । ज्योति॑ः । निऽहि॑तम् । दृ॒शये॑ । कम् । मन॑ः । जवि॑ष्ठम् । प॒तय॑त्ऽसु । अ॒न्तरिति॑ ।
विश्वे॑ । दे॒वाः । सऽम॑नसः । सऽके॑ताः । एक॑म् । क्रतु॑म् । अ॒भि । वि । य॒न्ति॒ । सा॒धु ॥ ५ ॥

वि मे॒ कर्णा॑ पतयतो॒ वि चक्षु॒र्वी॒३॒दं ज्योति॒र्हृद॑य॒ आहि॑तं॒ यत् ।
वि मे॒ मन॑श्चरति दू॒रआ॑धीः॒ किं स्वि॑द्व॒क्ष्यामि॒ किमु॒ नू म॑निष्ये ॥ ६ ॥

वि । मे॒ । कर्णा॑ । प॒त॒य॒तः॒ । वि । चक्षु॑ः । वि । इ॒दम् । ज्योति॑ः । हृद॑ये । आऽहि॑तम् । यत् ।
वि । मे॒ । मन॑ः । च॒र॒ति॒ । दू॒रेऽआ॑धीः । किम् । स्वि॒त् । व॒क्ष्यामि॑ । किम् । ऊँ इति॑ । नु । म॒नि॒ष्ये॒ ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स जाय॑मानः पर॒मे व्यो॑मनि व्र॒तान्य॒ग्निर्व्र॑त॒पा अ॑रक्षत।
व्य१॒न्तरि॑क्षममिमीत सु॒क्रतु॑र्वैश्वान॒रो म॑हि॒ना नाक॑मस्पृशत्॥ २॥
सः। जाय॑मानः। प॒र॒मे। वि॒ऽओ॑मनि। व्र॒तानि॑। अ॒ग्निः। व्र॒त॒ऽपाः। अ॒र॒क्ष॒त॒।
वि। अ॒न्तरि॑क्षम्। अ॒मि॒मी॒त॒। सु॒ऽक्र॒तुः॑। वै॒श्वा॒न॒रः। म॒हि॒ना। नाक॑म्। अ॒स्पृ॒श॒त्॥ २॥
व्य॑स्तभ्ना॒द्रोद॑सी मि॒त्रो अद्भु॑तोऽन्त॒र्वाव॑दकृणो॒ज्ज्योति॑षा॒ तमः॑।
वि चर्म॑णीव धि॒षणे॑ अवर्तयद्वैश्वान॒रो विश्व॑मधत्त॒ वृष्ण्य॑म्॥ ३॥
वि। अ॒स्त॒भ्ना॒त्। रोद॑सी॒ इति॑। मि॒त्रः। अद्भु॑तः। अ॒न्तः॒ऽवाव॑त्। अ॒कृ॒णो॒त्। ज्योति॑षा। तमः॑।
वि। चर्म॑णी इ॒वेति॒ चर्म॑णीऽइव। धि॒षणे॒ इति॑। अ॒व॒र्त॒य॒त्। वै॒श्वा॒न॒रः। विश्व॑म्। अ॒ध॒त्त॒। वृष्ण्य॑म्॥ ३॥
अ॒पामु॒पस्थे॑ महि॒षा अ॑गृभ्णत॒ विशो॒ राजा॑न॒मुप॑ तस्थुर्ऋ॒ग्मिय॑म्।
आ दू॒तो अ॒ग्निम॑भरद्वि॒वस्व॑तो वैश्वान॒रं मा॑त॒रिश्वा॑ परा॒वतः॑॥ ४॥
अ॒पाम्। उ॒पऽस्थे॑। म॒हि॒षाः। अ॒गृ॒भ्ण॒त॒। विशः॑। राजा॑नम्। उप॑। त॒स्थुः॒। ऋ॒ग्मिय॑म्।
आ। दू॒तः। अ॒ग्निम्। अ॒भ॒र॒त्। वि॒वस्व॑तः। वै॒श्वा॒न॒रम्। मा॒त॒रिश्वा॑। प॒रा॒ऽवतः॑॥ ४॥
यु॒गेयु॑गे विद॒थ्यं॑ गृ॒णद्भ्योऽग्ने॑ र॒यिं य॒शसं॑ धेहि॒ नव्य॑सीम्।
प॒व्येव॑ राजन्न॒घशं॑समजर नी॒चा नि वृ॑श्च व॒निनं॒ न तेज॑सा॥ ५॥
यु॒गेऽयु॑गे। वि॒द॒थ्य॑म्। गृ॒णत्ऽभ्यः॑। अग्ने॑। र॒यिम्। य॒शस॑म्। धे॒हि॒। नव्य॑सीम्।
प॒व्याऽइ॑व। रा॒ज॒न्। अ॒घऽशं॑सम्। अ॒ज॒र॒। नी॒चा। नि। वृ॒श्च॒। व॒निन॑म्। न तेज॑सा॥ ५॥
अ॒स्माक॑मग्ने म॒घव॑त्सु धार॒याना॑मि क्ष॒त्रम॒जरं॑ सु॒वीर्य॑म्।
व॒यं ज॑येम श॒तिनं॑ सह॒स्रिणं॒ वैश्वा॑नर॒ वाज॑मग्ने॒ तवो॒तिभिः॑॥ ६॥
अ॒स्माक॑म्। अ॒ग्ने॒। म॒घव॑त्ऽसु। धा॒र॒य॒। अना॑मि। क्ष॒त्रम्। अ॒जर॑म्। सु॒ऽवीर्य॑म्।
व॒यम्। ज॒ये॒म॒। श॒तिन॑म्। स॒ह॒स्रिण॑म्। वैश्वा॑नर। वाज॑म्। अ॒ग्ने॒। तव॑। ऊ॒तिऽभिः॑॥ ६॥
अद॑ब्धेभि॒स्तव॑ गो॒पाभि॑रिष्टे॒ऽस्माकं॑ पाहि त्रिषधस्थ सू॒रीन्।
रक्षा॑ च नो द॒दुषां॒ शर्धो॑ अग्ने॒ वैश्वा॑नर॒ प्र च॑ तारीः॒ स्तवा॑नः॥ ७॥ [१०]
अद॑ब्धेभिः। तव॑। गो॒पाभिः॑। इ॒ष्टे॒। अ॒स्माक॑म्। पा॒हि॒। त्रि॒ऽस॒ध॒स्थ॒। सू॒रीन्।
रक्ष॑। च॒। नः॒। द॒दुषा॑म्। शर्धः॑। अ॒ग्ने॒। वैश्वा॑नर। प्र। च॒। ता॒री॒ः। स्तवा॑नः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[९] [७ भरद्वाजो बार्हस्पत्यः। वैश्वानरोऽग्निः। त्रिष्टुप्, (७ प्रस्तारपंक्तिर्वा)]

अह॑श्च कृ॒ष्णमह॒रर्जु॑नं च॒ वि व॑र्तेते॒ रज॑सी वे॒द्याभिः॑।

वै॒श्वा॒न॒रो जाय॑मानो॒ न राजावा॑तिर॒ज्ज्योति॑षा॒ग्निस्तमां॑सि॥ १॥

अह॒रिति॑। च॒। कृ॒ष्णम्। अहः॑। अर्जु॑नम्। च॒। वि। व॒र्तेते॒ इति॑। रज॑सी॒ इति॑। वे॒द्याभिः॑।

वै॒श्वा॒न॒रः। जाय॑मानः। न। राजा॑। अव॑। अ॒ति॒र॒त्। ज्योति॑षा। अ॒ग्निः। तमां॑सि॥ १॥

नाहं तन्तुं॒ न वि जा॑ना॒म्योतुं॒ न यं वय॑न्ति सम॒रेऽत॑मानाः।

कस्य॑ स्वित्पु॒त्र इ॒ह वक्त्वा॑नि प॒रो व॑दा॒त्यव॑रेण पि॒त्रा॥ २॥

न। अ॒हम्। तन्तु॑म्। न। वि। जा॒ना॒मि॒। ओतु॑म्। न। यम्। वय॑न्ति। स॒म्ऽअ॒रे। अत॑मानाः।

कस्य॑। स्वि॒त्। पु॒त्रः। इ॒ह। वक्त्वा॑नि। प॒रः। व॒दा॒ति॒। अव॑रेण। पि॒त्रा॥ २॥

स इत्तन्तुं॒ स वि जा॑ना॒त्योतुं॒ स वक्त्वा॑न्यृतु॒था व॑दाति।

य ईं॒ चिके॑तद॒मृत॑स्य गो॒पा अ॒वश्चर॑न्प॒रो अ॒न्येन॒ पश्य॑न्॥ ३॥

सः। इत्। तन्तु॑म्। सः। वि। जा॒ना॒ति॒। ओतु॑म्। सः। वक्त्वा॑नि। ऋ॒तु॒ऽथा। व॒दा॒ति॒।

यः। ई॒म्। चिके॑तत्। अ॒मृत॑स्य। गो॒पाः। अ॒वः। चर॑न्। प॒रः। अ॒न्येन॑। पश्य॑न्॥ ३॥

अ॒यं होता॑ प्रथ॒मः पश्य॑ते॒मम॒िदं ज्योति॑र॒मृतं॒ मर्त्ये॑षु।

अ॒यं स ज॑ज्ञे ध्रु॒व आ निष॒त्तोऽम॑र्त्य॒स्तन्वा॒३॒ वर्ध॑मानः॥ ४॥

अ॒यम्। होता॑। प्र॒थ॒मः। पश्य॑त। इ॒मम्। इ॒दम्। ज्योतिः॑। अ॒मृत॑म्। मर्त्ये॑षु।

अ॒यम्। सः। ज॒ज्ञे॒। ध्रु॒वः। आ। निऽस॑त्तः। अम॑र्त्यः। त॒न्वा॑। वर्ध॑मानः॥ ४॥

ध्रु॒वं ज्योति॒र्निहि॑तं दृ॒शये॒ कं मनो॒ जवि॑ष्ठं प॒तय॑त्स्व॒न्तः।

विश्वे॑ दे॒वाः सम॑नसः॒ सके॑ता॒ एकं॒ क्रतु॑म॒भि वि य॑न्ति सा॒धु॥ ५॥

ध्रु॒वम्। ज्योतिः॑। निऽहि॑तम्। दृ॒शये॑। कम्। मनः॑। जवि॑ष्ठम्। प॒तय॑त्ऽसु। अ॒न्तरिति॑।

विश्वे॑। दे॒वाः। स॒ऽम॑नसः। स॒ऽके॑ताः। एक॑म्। क्रतु॑म्। अ॒भि। वि। य॒न्ति॒। सा॒धु॥ ५॥

वि मे॒ कर्णा॑ पतयतो॒ वि चक्षु॒र्वी॒३॒दं ज्योति॒र्हृद॑य॒ आहि॑तं॒ यत्।

वि मे॒ मन॑श्चरति दू॒रआ॑धीः॒ किं स्वि॑द्व॒क्ष्यामि॒ किमु॑ नू म॑निष्ये॥ ६॥

वि। मे॒। कर्णा॑। प॒त॒य॒तः॒। वि। चक्षुः॑। वि। इ॒दम्। ज्योतिः॑। हृद॑ये। आऽहि॑तम्। यत्।

वि। मे॒। मनः॑। च॒र॒ति॒। दू॒रेऽआ॑धीः। किम्। स्वि॒त्। व॒क्ष्यामि॑। किम्। ऊँ इति॑। नु। म॒नि॒ष्ये॒॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वे॑ दे॒वा अ॑नमस्यन्भिया॒नास्त्वाम॑ग्ने॒ तम॑सि तस्थि॒वांस॑म्।

वै॒श्वा॒न॒रो॑ऽवतू॒तये॒ नो॑ऽमर्त्यो॑ऽवतू॒तये॑ नः॥ ७॥ [११]

विश्वे॑। दे॒वाः। अ॒न॒म॒स्य॒न्। भि॒या॒नाः। त्वाम्। अ॒ग्ने॒। तम॑सि। त॒स्थि॒ऽवांस॑म्।

वै॒श्वा॒न॒रः। अ॒व॒तु॒। ऊ॒तये॑। न॒ः। अम॑र्त्यः। अ॒व॒तु॒। ऊ॒तये॑। न॒ः॥ ७॥

[१०] [७ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्; ७ द्विपदा विराट्।]

पु॒रो वो॑ म॒न्द्रं दि॒व्यं सु॑वृ॒क्तिं प्र॑य॒ति य॒ज्ञे अ॒ग्निम॑ध्व॒रे द॑धिध्वम्।

पु॒र उ॒क्थेभि॒ः स हि नो॑ वि॒भावा॑ स्वध्व॒रा क॑रति जा॒तवे॑दाः॥ १॥

पु॒रः। व॒ः। म॒न्द्रम्। दि॒व्यम्। सु॒ऽवृ॒क्तिम्। प्र॒ऽय॒ति। य॒ज्ञे। अ॒ग्निम्। अ॒ध्व॒रे। द॒धि॒ध्व॒म्।

पु॒रः। उ॒क्थेभि॑ः। सः। हि। न॒ः। वि॒भाऽवा॑। सु॒ऽअ॒ध्व॒रा। क॒र॒ति॒। जा॒तऽवे॑दाः॥ १॥

तमु॑ द्युमः पु॒र्वणीक होत॒रग्ने॑ अ॒ग्निभि॒र्मनु॑ष इधा॒नः।

स्तोम॒ं यम॑स्मै म॒मते॑व शू॒षं घृ॒तं न शुचि॑ म॒तय॑ः पवन्ते॥ २॥

तम्। ऊँ इति॑। द्यु॒ऽम॒ः। पु॒रु॒ऽअ॒नी॒क॒। हो॒त॒ः। अग्ने॑। अ॒ग्निऽभि॑ः। मनु॑षः। इ॒धा॒नः।

स्तोम॑म्। यम्। अ॒स्मै॒। म॒मता॑ऽइव। शू॒षम्। घृ॒तम्। न। शुचि॑। म॒तय॑ः। प॒व॒न्ते॒॥ २॥

पी॒पाय॒ स श्रव॑सा॒ मर्त्ये॑षु॒ यो अ॒ग्नये॑ द॒दाश॒ विप्र॑ उ॒क्थैः।

चि॒त्राभि॒स्तमू॒तिभि॑श्चि॒त्रशो॑चिर्व्र॒जस्य॑ सा॒ता गोम॑तो दधाति॥ ३॥

पी॒पाय॑। सः। श्रव॑सा। मर्त्ये॑षु। यः। अ॒ग्नये॑। द॒दाश॑। विप्र॑ः। उ॒क्थैः।

चि॒त्राभि॑ः। तम्। ऊ॒तिऽभि॑ः। चि॒त्रऽशो॑चिः। व्र॒जस्य॑। सा॒ता। गोऽम॑तः। द॒धा॒ति॒॥ ३॥

आ यः प॒प्रौ जाय॑मान उ॒र्वी दू॒रे॒दृशा॑ भा॒सा कृ॒ष्णाध्वा॑।

अध॑ ब॒हु चि॒त्तम॒ ऊर्म्या॑यास्ति॒रः शो॒चिषा॑ ददृशे पाव॒कः॥ ४॥

आ। यः। प॒प्रौ। जाय॑मानः। उ॒र्वी इति॑। दू॒रे॒ऽदृशा॑। भा॒सा। कृ॒ष्णऽअ॑ध्वा।

अध॑। ब॒हु। चि॒त्। तम॑ः। ऊर्म्या॑याः। ति॒रः। शो॒चिषा॑। द॒दृ॒शे॒। पा॒व॒कः॥ ४॥

नू न॑श्चि॒त्रं पु॑रु॒वाजा॑भिरू॒ती अग्ने॑ र॒यिं म॒घव॑द्भ्यश्च धेहि।

ये राध॑सा श्रव॑सा॒ चात्य॒न्यान्सु॒वीर्ये॑भिश्चा॒भि सन्ति॒ जना॑न्॥ ५॥

नु। न॒ः। चि॒त्रम्। पु॒रु॒ऽवाजा॑भिः। ऊ॒ती। अग्ने॑। र॒यिम्। म॒घव॑त्ऽभ्यः। च॒। धे॒हि॒।

ये। राध॑सा। श्रव॑सा। च॒। अति॑। अ॒न्यान्। सु॒ऽवीर्ये॑भिः। च॒। अ॒भि। सन्ति॑। जना॑न्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान्।

भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ ॥ ६ ॥

इमम्। यज्ञम्। चनः। धाः। अग्ने। उशन्। यम्। ते। आसानः। जुहुते। हविष्मान्।

भरत्ऽवाजेषु। दधिषे। सुऽवृक्तिम्। अवीः। वाजस्य। गध्यस्य। सातौ ॥ ६ ॥

वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः ॥ ७ ॥ [१२]

वि। द्वेषांसि। इनुहि। वर्धय। इळाम्। मदेम। शतऽहिमाः। सुऽवीराः ॥ ७ ॥

[११] [६ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप्।]

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति।

आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥ १ ॥

यजस्व। होतः। इषितः। यजीयान्। अग्ने। बाधः। मरुताम्। न। प्रऽयुक्ति।

आ। नः। मित्रावरुणा। नासत्या। द्यावा। होत्राय। पृथिवी इति। ववृत्याः ॥ १ ॥

त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु।

पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम् ॥ २ ॥

त्वम्। होता। मन्द्रऽतमः। नः। अध्रुक्। अन्तः। देवः। विदथा। मर्त्येषु।

पावकया। जुह्वा। वह्निः। आसा। अग्ने। यजस्व। तन्वम्। तव। स्वाम् ॥ ३ ॥

धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै।

वेपिष्ठो अङ्गिरसां यद्ध विप्रो मधुच्छन्दो भनति रेभ इष्टौ ॥ ३ ॥

धन्या। चित्। हि। त्वे इति। धिषणा। वष्टि। प्र। देवान्। जन्म। गृणते। यजध्यै।

वेपिष्ठः। अङ्गिरसाम्। यत्। ह। विप्रः। मधु। छन्दः। भनति। रेभः। इष्टौ ॥ ३ ॥

अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची।

आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ॥ ४ ॥

अदिद्युतत्। सु। अपाकः। विऽभावा। अग्ने। यजस्व। रोदसी इति। उरूची इति।

आयुम्। न। यम्। नमसा। रातऽहव्याः। अञ्जन्ति। सुऽप्रयसम्। पञ्च। जनाः ॥ ४ ॥

वृञ्जे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः।

अभ्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृञ्जे। ह। यत्। नमसा। बर्हिः। अग्नौ। अयामि। स्रुक्। घृत॰वती। सु॰वृक्तिः।
अभि। अक्षि। सद्म। सदने। पृथिव्याः। अश्रायि। यज्ञः। सूर्ये। न। चक्षुः॥ ५॥

दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः॥ ६॥ [१३]

दशस्य। नः। पुरु॰अनीक। होतः। देवेभिः। अग्ने। अग्नि॰भिः। इधानः।
रायः। सूनो इति। सहसः। ववसानाः। अति। स्रसेम। वृजनम्। न। अंहः॥ ६॥

[१२] [६ भरद्वाजो बार्हस्पत्यः। अग्निः। त्रिष्टुप् (६ पुरस्ताज्ज्योतिर्वा)।]

मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै।
अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान॥ १॥

मध्ये। होता। दुरोणे। बर्हिषः। राट्। अग्निः। तोदस्य। रोदसी इति। यजध्यै।
अयम्। सः। सूनुः। सहसः। ऋत॰वा। दूरात्। सूर्यः। न। शोचिषा। ततान॥ १॥

आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्त्सर्वतातेव नु द्यौः।
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै॥ २॥

आ। यस्मिन्। त्वे इति। सु। अपाके। यजत्र। यक्षत्। राजन्। सर्वताताऽइव। नु। द्यौः।
त्रि॰सधस्थः। ततरुषः। न। जंहः। हव्या। मघानि। मानुषा। यजध्यै॥ २॥

तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत्।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु॥ ३॥

तेजिष्ठा। यस्य। अरतिः। वने॰राट्। तोदः। अध्वन्। न। वृधसानः। अद्यौत्।
अद्रोघः। न। द्रविता। चेतति। त्मन्। अमर्त्यः। अवर्त्रः। ओषधीषु॥ ३॥

सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः।
द्र्वन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः॥ ४॥

सः। अस्माकेभिः। एतरि। न। शूषैः। अग्निः। स्तवे। दमे। आ। जात॰वेदाः।
द्रु॰अन्नः। वन्वन्। क्रत्वा। न। अर्वा। उस्रः। पिताऽइव। जारयायि। यज्ञैः॥ ४॥

अध स्मास्य पनयन्ति भासो वृथा यत्तक्षदनुयाति पृथ्वीम्।
सद्यो यः स्पन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध॑ । स्म॒ । अ॒स्य॒ । प॒नय॑न्ति । भास॑: । वृथा॑ । यत् । तक्ष॑त् । अ॒नु॒ऽयाति॑ । पृ॒थ्वीम् ।

स॒द्यः । यः । स्प॒न्द्रः । विऽसि॑तः । धवी॑यान् । ऋ॒णः । न । ता॒युः । अति॑ । धन्व॑ । रा॒ट् ॥ ५ ॥

स त्वं नो॑ अर्व॒न्निदा॑या॒ विश्वे॑भिरग्ने अ॒ग्निभि॑रिधा॒नः ।

वेषि॑ रा॒यो वि या॑सि दु॒च्छुना॒ मदे॑म श॒तहि॑माः सु॒वीराः॑ ॥ ६ ॥ [१४]

सः । त्वम् । न॒ः । अ॒र्व॒न् । निदा॑याः । विश्वे॑भिः । अ॒ग्ने॒ । अ॒ग्निऽभि॑ः । इ॒धा॒नः ।

वेषि॑ । रा॒यः । या॒सि॒ । दु॒च्छुना॑ । मदे॑म । श॒तऽहि॑माः । सु॒ऽवीराः॑ ॥ ६ ॥

[१३] [६ भरद्वाजो बार्हस्पत्यः । अग्निः । त्रिष्टुप् ।]

त्वद्विश्वा॑ सुभग॒ सौभ॑गा॒न्यग्ने॒ वि य॑न्ति व॒निनो॒ न व॒याः ।

श्रु॒ष्टी र॒यिर्वाजो॑ वृत्र॒तूर्ये॑ दि॒वो वृष्टि॒रीड्यो॑ री॒तिर॒पाम् ॥ १ ॥

त्वत् । विश्वा॑ । सु॒ऽभ॒ग॒ । सौभ॑गानि । अग्ने॑ । वि । य॒न्ति॒ । व॒निन॑ः । न । व॒याः ।

श्रु॒ष्टी । र॒यिः । वाज॑ः । वृ॒त्र॒ऽतूर्ये॑ । दि॒वः । वृष्टि॑ः । ईड्य॑ः । री॒तिः । अ॒पाम् ॥ १ ॥

त्वं भगो॑ न॒ आ हि रत्न॑मि॒षे परि॑ज्मेव क्षयसि द॒स्मव॑र्चाः ।

अग्ने॑ मि॒त्रो न बृ॑ह॒त ऋ॒तस्या॑सि॑ क्ष॒त्ता वा॒मस्य॑ देव॒ भूरे॑ः ॥ २ ॥

त्वम् । भग॑ः । न॒ः । आ । हि । रत्न॑म् । इ॒षे । परि॑ज्माऽइव । क्षय॒सि॒ । द॒स्मऽव॑र्चाः ।

अग्ने॑ । मि॒त्रः । न । बृ॒ह॒तः । ऋ॒तस्य॑ । असि॑ । क्ष॒त्ता । वा॒मस्य॑ । दे॒व॒ । भूरे॑ः ॥ २ ॥

स सत्प॑तिः॒ शव॑सा हन्ति वृ॒त्रमग्ने॒ विप्रो॒ वि प॒णेर्भ॑र्ति॒ वाज॑म् ।

यं त्वं प्र॑चेत ऋतजात रा॒या स॒जोषा॒ नप्त्रा॒पां हि॒नोषि॑ ॥ ३ ॥

सः । सत्ऽप॑तिः । शव॑सा । ह॒न्ति॒ । वृ॒त्रम् । अग्ने॑ । विप्र॑ः । वि । प॒णेः । भ॒र्ति॒ । वाज॑म् ।

यम् । त्वम् । प्र॒ऽचे॒त॒ः । ऋ॒त॒ऽजा॒त॒ । रा॒या । स॒ऽजोषा॑ः । नप्त्रा॑ । अ॒पाम् । हि॒नोषि॑ ॥ ३ ॥

यस्ते॑ सूनो सहसो गी॒र्भिरु॒क्थैर्य॒ज्ञैर्मर्तो॒ निशि॑तिं वे॒द्यान॑ट् ।

विश्वं॒ स दे॑व॒ प्रति॒ वार॑मग्ने ध॒त्ते धा॒न्य॑१ पत्य॑ते वस॒व्यैः॑ ॥ ४ ॥

यः । ते॒ । सूनो॒ इति॑ । स॒ह॒सः॒ । गी॒ःऽभिः । उ॒क्थैः । य॒ज्ञैः । मर्त॑ः । निऽशि॑तिम् । वे॒द्या । आन॑ट् ।

विश्व॑म् । सः । दे॒व॒ । प्रति॑ । वा॒ । अर॑म् । अ॒ग्ने॒ । ध॒त्ते । धा॒न्य॑म् । पत्य॑ते । व॒स॒व्यैः॑ ॥ ४ ॥

ता नृभ्य॒ आ सौ॑श्रव॒सा सु॒वीराग्ने॑ सूनो सहसः पु॒ष्यसे॑ धाः ।

कृ॒णोषि॒ यच्छव॑सा॒ भूरि॑ प॒श्वो वयो॒ वृका॑या॒रये॒ जसु॑रये ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता। नृऽभ्यः। आ। सौश्रवसा। सुऽवीरा। अग्ने। सूनो इति। सहसः। पुष्यसे। धाः।
कृणोषि। यत्। शवसा। भूरि। पशवः। वयः। वृकाय। अरये। जसुरये॥ ५॥

वद्मा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः।
विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः॥ ६॥ [१५]

वद्मा। सूनो इति। सहसः। नः। विऽहायाः। अग्ने। तोकम्। तनयम्। वाजि। नः। दाः।
विश्वाभिः। गीःऽभिः। अभि। पूर्तिम्। अश्याम्। मदेम। शतऽहिमाः। सुऽवीराः॥ ६॥

[१४] [६ भरद्वाजो बार्हस्पत्यः। अग्निः। अनुष्टुप्, ६ शक्वरी]

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः। भसन्नु ष प्र पूर्व्य इषं वुरीतावसे॥ १॥
अग्ना। यः। मर्त्यः। दुवः। धियम्। जुजोष। धीतिऽभिः।
भसत्। नु। सः। प्र। पूर्व्यः। इषम्। वुरीत। अवसे॥ १॥

अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः। अग्निं होतारमीळते यज्ञेषु मनुषो विशः॥ २॥
अग्निः। इत्। हि। प्रऽचेताः। अग्निः। वेधःऽतमः। ऋषिः।
अग्निम्। होतारम्। ईळते। यज्ञेषु। मनुषः। विशः॥ २॥

नाना ह्य१ग्नेऽवसे स्पर्धन्ते रायो अर्यः। तूर्वन्तो दस्युमायवो व्रतैः सीक्षन्तो अव्रतम्॥ ३॥
नाना। हि। अग्ने। अवसे। स्पर्धन्ते। रायः। अर्यः।
तूर्वन्तः। दस्युम्। आयवः। व्रतैः। सीक्षन्तः। अव्रतम्॥ ३॥

अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम्। यस्य त्रसन्ति शवसः संचक्षि शत्रवो भिया॥ ४॥
अग्निः। अप्साम्। ऋतिऽसहम्। वीरम्। ददाति। सत्ऽपतिम्।
यस्य। त्रसन्ति। शवसः। सम्ऽचक्षि। शत्रवः। भिया॥ ४॥

अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति। सहावा यस्यावृतो रयिर्वाजेष्ववृतः॥ ५॥
अग्निः। हि। विद्मना। निदः। देवः। मर्तम्। उरुष्यति।
सहऽवा। यस्य। अवृतः। रयिः। वाजेषु। अवृतः॥ ५॥

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम॥ ६॥ [१६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अच्छं। नः। मित्रऽमहः। देव। देवान्। अग्ने। वोचः। सुऽमतिम्। रोदस्योः॥ वीहि। स्वस्तिम्।
सुऽक्षितिम्। दिवः। नॄन्। द्विषः। अंहांसि। दुःऽइता। तरेम। ता। तरेम। तव। अवसा। तरेम॥ ६॥

[१५] [१९ बार्हस्पत्यो भरद्वाजो, वीतहव्यो वा। अग्निः। जगती; ३, १५ शक्वरी,
६ अतिशक्वरी; १०-१४, १६ त्रिष्टुप्, १७ अनुष्टुप; १८ बृहती।]

इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा।
वेतीद्दिवो जनुषा कच्चिदा शुचिर्ज्योक्चिदत्ति गर्भो यदच्युतम्॥ १॥

इमम्। ऊँ इति। सु। वः। अतिथिम्। उषःऽबुधम्। विश्वासाम्। विशाम्। पतिम्। ऋञ्जसे। गिरा।
वेति। इत्। दिवः। जनुषा। कत्। चित्। आ। शुचिः। ज्योक्। चित्। अत्ति। गर्भः। यत्। अच्युतम्॥ १॥

मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम्।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे॥ २॥

मित्रम्। न। यम्। सुऽधितम्। भृगवः। दधुः। वनस्पतौ। ईड्यम्। ऊर्ध्वऽशोचिषम्।
सः। त्वम्। सुऽप्रीतः। वीतऽहव्ये। अद्भुत। प्रशस्तिऽभिः। महयसे। दिवेऽदिवे॥ २॥

स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यान्तरस्य तरुषः।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः॥ ३॥

सः। त्वम्। दक्षस्य। अवृकः। वृधः। भूः। अर्यः। परस्य। अन्तरस्य। तरुषः॥ रायः। सूनो इति।
सहसः। मर्त्येषु। आ। छर्दिः। यच्छ। वीतऽहव्याय। सऽप्रथः। भरत्ऽवाजाय। सऽप्रथः॥ ३॥

द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम्।
विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृञ्जसे॥ ४॥

द्युतानम्। वः। अतिथिम्। स्वःऽनरम्। अग्निम्। होतारम्। मनुषः। सुऽअध्वरम्।
विप्रम्। न। द्युक्षऽवचसम्। सुवृक्तिऽभिः। हव्यऽवाहम्। अरतिम्। देवम्। ऋञ्जसे॥ ४॥

पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः॥ ५॥ [१७]

पावकया। यः। चितयन्त्या। कृपा। क्षामन्। रुरुचे। उषसः। न। भानुना।
तूर्वन्। न। यामन्। एतशस्य। नु। रणे। आ। यः। घृणे। न। ततृषाणः। अजरः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निमग्निं वः समिधा दुवस्यत प्रियम्प्रियं वो अतिथिं गृणीषणि।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः॥ ६॥

अग्निम्ऽअग्निम्। वः। सम्ऽइधा। दुवस्यत। प्रियम्ऽप्रियम्। वः। अतिथिम्। गृणीषणि।
उप। वः। गीःऽभिः। अमृतम्। विवासत। देवः। देवेषु। वनते। हि। वार्यम्।
देवः। देवेषु। वनते। हि। नः। दुवः॥ ६॥

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम्।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम्॥ ७॥

सम्ऽइद्धम्। अग्निम्। सम्ऽइधा। गिरा। गृणे। शुचिम्। पावकम्। पुरः। अध्वरे। ध्रुवम्।
विप्रम्। होतारम्। पुरुऽवारम्। अद्रुहम्। कविम्। सुम्नैः। ईमहे। जातऽवेदसम्॥ ७॥

त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे॥ ८॥

त्वाम्। दूतम्। अग्ने। अमृतम्। युगेऽयुगे। हव्यऽवाहम्। दधिरे। पायुम्। ईड्यम्।
देवासः। च। मर्तासः। च। जागृविम्। विऽभुम्। विश्पतिम्। नमसा। नि। सेदिरे॥ ८॥

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव॥ ९॥

विऽभूषन्। अग्ने। उभयान्। अनु। व्रता। दूतः। देवानाम्। रजसी इति। सम्। ईयसे।
यत्। ते। धीतिम्। सुऽमतिम्। आऽवृणीमहे। अध। स्म। नः। त्रिऽवरूथः। शिवः। भव॥ ९॥

तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम।
स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत्॥ १०॥ [१८]

तम्। सुऽप्रतीकम्। सुऽदृशम्। सुऽअञ्चम्। अविद्वांसः। विदुःऽतरम्। सपेम।
सः। यक्षत्। विश्वा। वयुनानि। विद्वान्। प्र। हव्यम्। अग्निः। अमृतेषु। वोचत्॥ १०॥

तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम्।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत रायः॥ ११॥

तम्। अग्ने। पासि। उत। तम्। पिपर्षि। यः। ते। आनट्। कवये। शूर। धीतिम्।
यज्ञस्य। वा। निऽशितिम्। वा। उत्ऽइतिम्। वा। तम्। इत्। पृणक्षि। शवसा। उत। रायः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।

सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ १२॥

त्वम्। अग्ने। वनुष्यतः। नि। पाहि। त्वम्। ऊँ इति। नः। सहसाऽवन्। अवद्यात्।

सम्। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सम्। रयिः। स्पृहयाय्यः। सहस्री॥ १२॥

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।

देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा॥ १३॥

अग्निः। होता। गृहऽपतिः। सः। राजा। विश्वा। वेद। जनिम। जातऽवेदाः।

देवानाम्। उत। यः। मर्त्यानाम्। यजिष्ठः। सः। प्र। यजताम्। ऋतऽवा॥ १३॥

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा।

ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य॥ १४॥

अग्ने। यत्। अद्य। विशः। अध्वरस्य। होतरिति। पावकऽशोचे। वेः। त्वम्। हि। यज्वा।

ऋता। यजासि। महिना। वि। यत्। भूः। हव्या। वह। यविष्ठ। या। ते। अद्य॥ १४॥

अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै।

अवा नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम॥ १५॥ [१९]

अभि। प्रयांसि। सुऽधितानि। हि। ख्यः। नि। त्वा। दधीत। रोदसी इति। यजध्यै॥ अव। नः।

मघऽवन्। वाजऽसातौ। अग्ने। विश्वानि। दुःऽइता। तरेम। ता। तरेम। तव। अवसा। तरेम॥ १५॥

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम्।

कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु॥ १६॥

अग्ने। विश्वेभिः। सुऽअनीक। देवैः। ऊर्णाऽवन्तम्। प्रथमः। सीद। योनिम्।

कुलायिनम्। घृतऽवन्तम्। सवित्रे। यज्ञम्। नय। यजमानाय। साधु॥ १६॥

इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः। यमङ्कूयन्तमानयन्नमूरं श्याव्याभ्यः॥ १७॥

इमम्। ऊँ इति। त्यम्। अथर्वऽवत्। अग्निम्। मन्थन्ति। वेधसः।

यम्। अङ्कुऽयन्तम्। आ। अनयन्। अमूरम्। श्याव्याभ्यः॥ १७॥

जनिष्वा देववीतये सर्वताता स्वस्तये।

आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः॥ ६॥
अग्निम्ऽअग्निम्। वः। सम्ऽइधा। दुवस्यत। प्रियम्ऽप्रियम्। वः। अतिथिम्। गृणीषणि।
उप। वः। गीःऽभिः। अमृतम्। विवासत। देवः। देवेषु। वनते। हि। वार्यम्।
देवः। देवेषु। वनते। हि। नः। दुवः॥ ६॥
समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम्।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम्॥ ७॥
सम्ऽइद्धम्। अग्निम्। सम्ऽइधा। गिरा। गृणे। शुचिम्। पावकम्। पुरः। अध्वरे। ध्रुवम्।
विप्रम्। होतारम्। पुरुऽवारम्। अद्रुहम्। कविम्। सुम्नैः। ईमहे। जातऽवेदसम्॥ ७॥
त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे॥ ८॥
त्वाम्। दूतम्। अग्ने। अमृतम्। युगेऽयुगे। हव्यऽवाहम्। दधिरे। पायुम्। ईड्यम्।
देवासः। च। मर्तासः। च। जागृविम्। विऽभुम्। विश्पतिम्। नमसा। नि। सेदिरे॥ ८॥
विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव॥ ९॥
विऽभूषन्। अग्ने। उभयान्। अनु। व्रता। दूतः। देवानाम्। रजसी इति। सम्। ईयसे।
यत्। ते। धीतिम्। सुऽमतिम्। आऽवृणीमहे। अध। स्म। नः। त्रिऽवरूथः। शिवः। भव॥ ९॥
तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम।
स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत्॥ १०॥ [१८]
तम्। सुऽप्रतीकम्। सुऽदृशम्। सुऽअञ्चम्। अविद्वांसः। विदुःऽतरम्। सपेम।
सः। यक्षत्। विश्वा। वयुनानि। विद्वान्। प्र। हव्यम्। अग्निः। अमृतेषु। वोचत्॥ १०॥
तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम्।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया॥ ११॥
तम्। अग्ने। पासि। उत। तम्। पिपर्षि। यः। ते। आनट्। कवये। शूर। धीतिम्।
यज्ञस्य। वा। निऽशितिम्। वा। उत्ऽइतिम्। वा। तम्। इत्। पृणक्षि। शवसा। उत। राया॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।

सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ १२॥

त्वम्। अग्ने। वनुष्यतः। नि। पाहि। त्वम्। ऊँ इति। नः। सहसाऽवन्। अवद्यात्।

सम्। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सम्। रयिः। स्पृहयाय्यः। सहस्री॥ १२॥

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।

देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा॥ १३॥

अग्निः। होता। गृहऽपतिः। सः। राजा। विश्वा। वेद। जनिम। जातऽवेदाः।

देवानाम्। उत। यः। मर्त्यानाम्। यजिष्ठः। सः। प्र। यजताम्। ऋतऽवा॥ १३॥

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा।

ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य॥ १४॥

अग्ने। यत्। अद्य। विशः। अध्वरस्य। होतरिति। पावकऽशोचे। वेः। त्वम्। हि। यज्वा।

ऋता। यजासि। महिना। वि। यत्। भूः। हव्या। वह। यविष्ठ। या। ते। अद्य॥ १४॥

अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै।

अवा नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम॥ १५॥ [१९]

अभि। प्रयांसि। सुऽधितानि। हि। ख्यः। नि। त्वा। दधीत। रोदसी इति। यजध्यै॥ अव। नः।

मघऽवन्। वाजऽसातौ। अग्ने। विश्वानि। दुःऽइता। तरेम। ता। तरेम। तव। अवसा। तरेम॥ १५॥

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम्।

कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु॥ १६॥

अग्ने। विश्वेभिः। सुऽअनीक। देवैः। ऊर्णाऽवन्तम्। प्रथमः। सीद। योनिम्।

कुलायिनम्। घृतऽवन्तम्। सवित्रे। यज्ञम्। नय। यजमानाय। साधु॥ १६॥

इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः। यमङ्कूयन्तमानयन्नमूरं श्याव्याभ्यः॥ १७॥

इमम्। ऊँ इति। त्यम्। अथर्वऽवत्। अग्निम्। मन्थन्ति। वेधसः।

यम्। अङ्कुऽयन्तम्। आ। अनयन्। अमूरम्। श्याव्याभ्यः॥ १७॥

जनिष्वा देववीतये सर्वताता स्वस्तये।

आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जनिष्व। देव॰वीतये। सर्व॰ताता। स्वस्तये।

आ। देवान्। वक्षि। अमृतान्। ऋत॰वृधः। यज्ञम्। देवेषु। पिस्पृशः॥ १८॥

वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम्।

अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि॥ १९॥ [२०] {१}

वयम्। ऊँ इति। त्वा। गृह॰पते। जनानाम्। अग्ने। अकर्म। सम्॰इधा। बृहन्तम्।

अस्थूरि। नः। गार्ह॰पत्यानि। सन्तु। तिग्मेन। नः। तेजसा। सम्। शिशाधि॥ १९॥

[१६] [४८ बार्हस्पत्यो भरद्वाजः। अग्निः। गायत्री; १, ६ वर्धमाना; २७, ४७-४८ अनुष्टुप्, ४६ त्रिष्टुप्]

त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने॥ १॥

त्वम्। अग्ने। यज्ञानाम्। होता। विश्वेषाम्। हितः। देवेभिः। मानुषे। जने॥ १॥

स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः। आ देवान्वक्षि यक्षि च॥ २॥

सः। नः। मन्द्राभिः। अध्वरे। जिह्वाभिः। यज। महः। आ। देवान्। वक्षि। यक्षि। च॥ २॥

वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा। अग्ने यज्ञेषु सुक्रतो॥ ३॥

वेत्थ। हि। वेधः। अध्वनः। पथः। च। देव। अञ्जसा। अग्ने। यज्ञेषु। सुक्रतो इति सु॰क्रतो॥ ३॥

त्वामीळे अध द्विता भरतो वाजिभिः शुनम्। ईजे यज्ञेषु यज्ञियम्॥ ४॥

त्वाम्। ईळे। अध। द्विता। भरतः। वाजि॰भिः। शुनम्। ईजे। यज्ञेषु। यज्ञियम्॥ ४॥

त्वमिमा वार्या पुरु दिवोदासाय सुन्वते। भरद्वाजाय दाशुषे॥ ५॥ [२१]

त्वम्। इमा। वार्या। पुरु। दिवः२दासाय। सुन्वते। भरत्॰वाजाय। दाशुषे॥ ५॥

त्वं दूतो अमर्त्य आ वहा दैव्यं जनम्। शृण्वन्विप्रस्य सुष्टुतिम्॥ ६॥

त्वम्। दूतः। अमर्त्यः। आ। वह। दैव्यम्। जनम्। शृण्वन्। विप्रस्य। सु॰स्तुतिम्॥ ६॥

त्वामग्ने स्वाध्यो३ मर्तासो देववीतये। यज्ञेषु देवमीळते॥ ७॥

त्वाम्। अग्ने। सु॰आध्यः। मर्तासः। देव॰वीतये। यज्ञेषु। देवम्। ईळते॥ ७॥

तव प्र यक्षि संदृशमुत क्रतुं सुदानवः। विश्वे जुषन्त कामिनः॥ ८॥

तव। प्र। यक्षि। सम्॰दृशम्। उत। क्रतुम्। सु॰दानवः। विश्वे। जुषन्त। कामिनः॥ ८॥

त्वं होता मनुर्हितो वह्निरासा विदुष्टरः। अग्ने यक्षि दिवो विशः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। होता। मनुःऽहितः। वह्निः। आसा। विदुःऽतरः। अग्ने। यक्षि। दिवः। विशः॥ ९॥

अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि॥ १०॥ [२२]

अग्ने। आ। याहि। वीतये। गृणानः। हव्यऽदातये। नि। होता। सत्सि। बर्हिषि॥ १०॥

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य॥ ११॥

तम्। त्वा। समित्ऽभिः। अङ्गिरः। घृतेन। वर्धयामसि। बृहत्। शोच। यविष्ठ्य॥ ११॥

स नः पृथु श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यम्॥ १२॥

सः। नः। पृथु। श्रवाय्यम्। अच्छ। देव। विवाससि। बृहत्। अग्ने। सुऽवीर्यम्॥ १२॥

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः॥ १३॥

त्वाम्। अग्ने। पुष्करात्। अधि। अथर्वा। निः। अमन्थत। मूर्ध्नः। विश्वस्य। वाघतः॥ १३॥

तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरंदरम्॥ १४॥

तम्। ऊँ इति। त्वा। दध्यङ्। ऋषिः। पुत्रः। ईधे। अथर्वणः। वृत्रऽहनम्। पुरम्ऽदरम्॥ १४॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयं रणेरणे॥ १५॥ [२३]

तम्। ऊँ इति। त्वा। पाथ्यः। वृषा। सम्। ईधे। दस्युहन्ऽतमम्। धनम्ऽजयम्। रणेऽरणे॥ १५॥

एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः। एभिर्वर्धास इन्दुभिः॥ १६॥

आ। इहि। ऊँ इति। सु। ब्रवाणि। ते। अग्ने। इत्था। इतराः। गिरः। एभिः। वर्धासे। इन्दुऽभिः॥ १६॥

यत्र क्व च ते मनो दक्षं दधस उत्तरम्। तत्रा सदः कृणवसे॥ १७।

यत्र। क्व। च। ते। मनः। दक्षम्। दधसे। उत्ऽतरम्। तत्र। सदः। कृणवसे॥ १७॥

नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो। अथा दुवो वनवसे॥ १८॥

नहि। ते। पूर्तम्। अक्षिऽपत्। भुवत्। नेमानाम्। वसो इति। अथ। दुवः। वनवसे॥ १८॥

आग्निरगामि भारतो वृत्रहा पुरुचेतनः। दिवोदासस्य सत्पतिः॥ १९॥

आ। अग्निः। अगामि। भारतः। वृत्रऽहा। पुरुऽचेतनः। दिवःऽदासस्य। सत्ऽपतिः॥ १९॥

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना। वन्वन्नवातो अस्तृतः॥ २०॥ [२४]

सः। हि। विश्वा। अति। पार्थिवा। रयिम्। दाशत्। महिऽत्वना। वन्वन्। अवातः। अस्तृतः॥ २०॥

स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता। बृहत्ततन्थ भानुना॥ २१॥

सः। प्रत्नऽवत्। नवीयसा। अग्ने। द्युम्नेन। सम्ऽयता। बृहत्। ततन्थ। भानुना॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया। अर्च गाय च वेधसे॥ २२॥

प्र। वः। सखायः। अग्नये। स्तोमम्। यज्ञम्। च। धृष्णुऽया। अर्च। गाय। च। वेधसे॥ २२॥

स हि यो मानुषा युगा सीदद्धोता कविक्रतुः। दूतश्च हव्यवाहनः॥ २३॥

सः। हि। यः। मानुषा। युगा। सीदत्। होता। कविऽक्रतुः। दूतः। च। हव्यऽवाहनः॥ २३॥

ता राजाना शुचिव्रतादित्यान्मारुतं गणम्। वसो यक्षीह रोदसी॥ २४॥

ता। राजाना। शुचिऽव्रता। आदित्यान्। मारुतम्। गणम्। वसो इति। यक्षि। इह। रोदसी इति॥ २४॥

वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय। ऊर्जो नपादमृतस्य॥ २५॥ [२५]

वस्वी। ते। अग्ने। सम्ऽदृष्टिः। इषऽयते। मर्त्याय। ऊर्जः। नपात्। अमृतस्य॥ २५॥

क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्त्सुरेक्णाः। मर्त आनाश सुवृक्तिम्॥ २६॥

क्रत्वा। दाः। अस्तु। श्रेष्ठः। अद्य। त्वा। वन्वन्। सुऽरेक्णाः। मर्तः। आनाश। सुऽवृक्तिम्॥ २६॥

ते ते अग्ने त्वोता इषयन्तो विश्वमायुः। तरन्तो अर्यो अरातीर्वन्वन्तो अर्यो अरातीः॥ २७॥

ते। ते। अग्ने। त्वाऽऊताः। इषयन्तः। विश्वम्। आयुः।

तरन्तः। अर्यः। अरातीः। वन्वन्तः। अर्यः। अरातीः॥ २७॥

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्य१त्रिणम्। अग्निर्नो वनते रयिम्॥ २८॥

अग्निः। तिग्मेन। शोचिषा। यासत्। विश्वम्। नि। अत्रिणम्। अग्निः। नः। वनते। रयिम्॥ २८॥

सुवीरं रयिमा भर जातवेदो विचर्षणे। जहि रक्षांसि सुक्रतो॥ २९॥

सुऽवीरम्। रयिम्। आ। भर। जातऽवेदः। विऽचर्षणे। जहि। रक्षांसि। सुक्रतो इति सुऽक्रतो॥ २९॥

त्वं नः पाह्यंहसो जातवेदो अघायतः। रक्षा णो ब्रह्मणस्कवे॥ ३०॥ [२६]

त्वम्। नः। पाहि। अंहसः। जातऽवेदः। अघऽयतः। रक्ष। नः। ब्रह्मणः। कवे॥ ३०॥

यो नो अग्ने दुरेव आ मर्तो वधाय दाशति। तस्मान्नः पाह्यंहसः॥ ३१॥

यः। नः। अग्ने। दुःऽएवः। आ। मर्तः। वधाय। दाशति। तस्मात्। नः। पाहि। अंहसः॥ ३१॥

त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम्। मर्तो यो नो जिघांसति॥ ३२॥

त्वम्। तम्। देव। जिह्वया। परि। बाधस्व। दुःऽकृतम्। मर्तः। यः। नः। जिघांसति॥ ३२॥

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य। अग्ने वरेण्यं वसु॥ ३३॥

भरत्ऽवाजाय। सऽप्रथः। शर्म। यच्छ। सहन्त्य। अग्ने। वरेण्यम्। वसु॥ ३३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः॥ ३४॥

अग्निः। वृत्राणि। जङ्घनत्। द्रविणस्युः। विपन्यया। सम्ऽइद्धः। शुक्रः। आऽहुतः॥ ३४॥

गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे। सीदन्नृतस्य योनिमा॥ ३५॥ [२७]

गर्भे। मातुः। पितुः। पिता। विऽदिद्युतानः। अक्षरे। सीदन्। ऋतस्य। योनिम्। आ॥ ३५॥

ब्रह्म प्रजावदा भर जातवेदो विचर्षणे। अग्ने यद्दीदयद्दिवि॥ ३६॥

ब्रह्म। प्रजाऽवत्। आ। भर। जातऽवेदः। विऽचर्षणे। अग्ने। यत्। दीदयत्। दिवि॥ ३६॥

उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत। अग्ने ससृज्महे गिरः॥ ३७॥

उप। त्वा। रण्वऽसंदृशम्। प्रयस्वन्तः। सहःऽकृत। अग्ने। ससृज्महे। गिरः॥ ३७॥

उपच्छायामिव घृणेरगन्म शर्म ते वयम्। अग्ने हिरण्यसंदृशः॥ ३८॥

उप। छायाम्ऽइव। घृणेः। अगन्म। शर्म। ते। वयम्। अग्ने। हिरण्यऽसंदृशः॥ ३८॥

य उग्रइव शर्यहा तिग्मशृङ्गो न वंसगः। अग्ने पुरो रुरोजिथ॥ ३९॥

यः। उग्रःऽइव। शर्यऽहा। तिग्मऽशृङ्गः। न। वंसगः। अग्ने। पुरः। रुरोजिथ॥ ३९॥

आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति। विशामग्निं स्वध्वरम्॥ ४०॥ [२८]

आ। यम्। हस्ते। न। खादिनम्। शिशुम्। जातम्। न। बिभ्रति। विशाम्। अग्निम्। सुऽअध्वरम्॥ ४०॥

प्र देवं देववीतये भरता वसुवित्तमम्। आ स्वे योनौ नि षीदतु॥ ४१॥

प्र। देवम्। देवऽवीतये। भरत। वसुवित्ऽतमम्। आ। स्वे। योनौ। नि। सीदतु॥ ४१॥

आ जातं जातवेदसि प्रियं शिशीतातिथिम्। स्योन आ गृहपतिम्॥ ४२॥

आ। जातम्। जातऽवेदसि। प्रियम्। शिशीत। अतिथिम्। स्योने। आ। गृहऽपतिम्॥ ४२॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः। अरं वहन्ति मन्यवे॥ ४३॥

अग्ने। युक्ष्व। हि। ये। तव। अश्वासः। देव। साधवः। अरम्। वहन्ति। मन्यवे॥ ४३॥

अच्छा नो याह्या वहाभि प्रयांसि वीतये। आ देवान्त्सोमपीतये॥ ४४॥

अच्छ। नः। याहि। आ। वह। अभि। प्रयांसि। वीतये। आ। देवान्। सोमऽपीतये॥ ४४॥

उदग्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजर॥ ४५॥ [२९]

उत्। अग्ने। भारत। द्युऽमत्। अजस्रेण। दविद्युतत्। शोच। वि। भाहि। अजर॥ ४५॥

वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्।

होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत्॥ ४६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वी॒ती। यः। दे॒वम्। मर्तः॑। दु॒व॒स्येत्। अ॒ग्निम्। ई॒ळी॒त॒। अ॒ध्व॒रे। ह॒विष्मा॑न्।

होता॑रम्। स॒त्य॒°य॑जम्। रोद॑स्योः। उ॒त्ता॒न॑°ह॑स्तः। नम॑सा। आ। वि॒वा॒से॒त्॥ ४६॥

आ ते॑ अग्न ऋ॒चा ह॒विर्हृ॒दा त॒ष्टं भ॑रामसि। ते ते॑ भवन्तू॒क्षण॑ ऋष॒भासो॑ व॒शा उ॒त॥ ४७॥

आ। ते॒। अ॒ग्ने॒। ऋ॒चा। ह॒विः। हृ॒दा। त॒ष्टम्। भ॒रा॒म॒सि॒।

ते। ते॒। भ॒व॒न्तु॒। उ॒क्षणः॑। ऋ॒ष॒भासः॑। व॒शाः। उ॒त॥ ४७॥

अ॒ग्निं दे॒वासो॑ अग्नि॒यमि॒न्धते॑ वृत्र॒हन्त॑मम्। येना॒ वसू॒न्याभृ॑ता तृ॒ळ्हा रक्षां॑सि वा॒जिना॑॥ ४८॥

अ॒ग्निम्। दे॒वासः॑। अ॒ग्नि॒यम्। इ॒न्धते॑। वृ॒त्र॒हन्°त॑मम्। [३०]

येन॑। वसू॑नि। आ°भृ॑ता। तृ॒ळ्हा। रक्षां॑सि। वा॒जिना॑॥ ४८॥

इत्याश्वलायन-संहितायां
चतुर्थाष्टके
पञ्चमोऽध्यायः
समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ चतुर्थाष्टके षष्ठोऽध्यायः ॥

[१७] [१५ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्, १५ द्विपदा त्रिष्टुप्]

पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र।

वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया शवोभिः॥ १॥

पिब। सोमम्। अभि। यम्। उग्र। तर्दः। ऊर्वम्। गव्यम्। महि। गृणानः। इन्द्र।

वि। यः। धृष्णो इति। वधिषः। वज्रऽहस्त। विश्वा। वृत्रम्। अमित्रिया। शवःऽभिः॥ १॥

स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम्।

यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान्॥ २॥

सः। ईम्। पाहि। यः। ऋजीषी। तरुत्रः। यः। शिप्रऽवान्। वृषभः। यः। मतीनाम्।

यः। गोत्रऽभित्। वज्रऽभृत्। यः। हरिऽस्थाः। सः। इन्द्र। चित्रान्। अभि। तृन्धि। वाजान्॥ २॥

एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः।

आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि॥ ३॥

एव। पाहि। प्रत्नऽथा। मन्दतु। त्वा। श्रुधि। ब्रह्म। ववृधस्व। उत। गीःऽभिः।

आविः। सूर्यम्। कृणुहि। पीपिहि। इषः। जहि। शत्रून्। अभि। गाः। इन्द्र। तृन्धि॥ ३॥

ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम्।

महामनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम्॥ ४॥

ते। त्वा। मदाः। बृहत्। इन्द्र। स्वधाऽवः। इमे। पीताः। उक्षयन्त। द्युऽमन्तम्।

महाम्। अनूनम्। तवसम्। विऽभूतिम्। मत्सरासः। जर्हृषन्त। प्रऽसहम्॥ ४॥

येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप दृळ्हानि दर्द्रत्।

महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसः परि स्वात्॥ ५॥ [१]

येभिः। सूर्यम्। उषसम्। मन्दसानः। अवासयः। अप। दृळ्हानि। दर्द्रत्।

महाम्। अद्रिम्। परि। गाः। इन्द्र। सन्तम्। नुत्थाः। अच्युतम्। सदसः। परि। स्वात्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तव क्रत्वा तव तद्दंसनाभिरामासु पक्वं शच्या नि दीधः।
और्णोर्दुर उस्त्रियाभ्यो वि दृळ्होदूर्वाद्गा असृजो अङ्गिरस्वान्॥ ६॥
तव। क्रत्वा। तव। तत्। दंसनाभिः। आमासु। पक्वम्। शच्या। नि। दीधरिति दीधः।
और्णोः। दुरः। उस्त्रियाभ्यः। वि। दृळ्हा। उत्। ऊर्वात्। गाः। असृजः। अङ्गिरस्वान्॥ ६॥

पप्राथ क्षां महि दंसो व्यु१र्वीमुप द्यामृष्वो बृहदिन्द्र स्तभायः।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य॥ ७॥
पप्राथ। क्षाम्। महि। दंसः। वि। उर्वीम्। उप। द्याम्। ऋष्वः। बृहत्। इन्द्र। स्तभायः।
अधारयः। रोदसी इति। देवपुत्रे इति देव°पुत्रे। प्रत्ने इति। मातरा। यह्वी इति। ऋतस्य॥ ७॥

अध त्वा विश्वे पुर इन्द्र देवा एकं तवसं दधिरे भराय।
अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इन्द्रमत्र॥ ८॥
अध। त्वा। विश्वे। पुरः। इन्द्र। देवाः। एकम्। तवसम्। दधिरे। भराय।
अदेवः। यत्। अभि। औहिष्ट। देवान्। स्वः२साता। वृणते। इन्द्रम्। अत्र॥ ८॥

अध द्यौश्चित्ते अप सा नु वज्राद् द्वितानमद्भियसा स्वस्य मन्योः।
अहिं यदिन्द्रो अभ्योहसानं नि चिद्विश्वायुः शयथे जघान॥ ९॥
अध। द्यौः। चित्। ते। अप। सा। नु। वज्रात्। द्विता। अनमत्। भियसा। स्वस्य। मन्योः।
अहिम्। यत्। इन्द्रः। अभि। ओहसानम्। नि। चित्। विश्व°आयुः। शयथे। जघान॥ ९॥

अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृतच्छताश्रिम्।
निकाममरमणसं येन नवन्तमहिं सं पिणगृजीषिन्॥ १०॥ [२]
अध। त्वष्टा। ते। महः। उग्र। वज्रम्। सहस्र°भृष्टिम्। ववृतत्। शत°अश्रिम्।
नि°कामम्। अर°मनसम्। येन। नवन्तम्। अहिम्। सम्। पिणक्। ऋजीषिन्॥ १०॥

वर्धान्यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ इन्द्र तुभ्यम्।
पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमंशुमस्मै॥ ११॥
वर्धान्। यम्। विश्वे। मरुतः। स°जोषाः। पचत्। शतम्। महिषान्। इन्द्र। तुभ्यम्।
पूषा। विष्णुः। त्रीणि। सरांसि। धावन्। वृत्र°हनम्। मदिरम्। अंशुम्। अस्मै॥ ११॥

आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊर्मिमपाम्।
तासामनु प्रवत इन्द्र पन्थां प्रार्दयो नीचीरपसः समुद्रम्॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। क्षोदः। महि। वृतम्। नदीनाम्। परि॰स्थितम्। असृजः। ऊर्मिम्। अपाम्।
तासाम्। अनु। प्र॰वतः। इन्द्र। पन्थाम्। प्र। आर्दयः। नीचीः। अपसः। समुद्रम्॥ १२॥

एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम्।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात्॥ १३॥

एव। ता। विश्वा। चकृ॰वांसम्। इन्द्रम्। महाम्। उग्रम्। अजुर्यम्। सहः॰दाम्।
सु॰वीरम्। त्वा। सु॰आयुधम्। सु॰वज्रम्। आ। ब्रह्म। नव्यम्। अवसे। ववृत्यात्॥ १३॥

स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान्।
भरद्वाजे नृवत इन्द्र सूरीन्दिवि च स्मैधि पार्ये न इन्द्र॥ १४॥

सः। नः। वाजाय। श्रवसे। इषे। च। राये। धेहि। द्यु॰मतः। इन्द्र। विप्रान्।
भरत्॰वाजे। नृ॰वतः। इन्द्र। सूरीन्। दिवि। च। स्म। एधि। पार्ये। नः। इन्द्र॥ १४॥

अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः॥ १५॥ [३]

अया। वाजम्। देव॰हितम्। सनेम। मदेम। शत॰हिमाः। सु॰वीराः॥ १५॥

[१८] [१५ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः।
अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनाम्॥ १॥

तम्। ऊँ इति। स्तुहि। यः। अभिभूति॰ओजाः। वन्वन्। अवातः। पुरु॰हूतः। इन्द्रः।
अषाळ्हम्। उग्रम्। सहमानम्। आभिः। गीःरभिः। वर्ध। वृषभम्। चर्षणीनाम्॥ १॥

स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी।
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा॥ २॥

सः। युध्मः। सत्वा। खज॰कृत्। समत्॰वा। तुवि॰म्रक्षः। नदनु॰मान्। ऋजीषी।
बृहत्॰रेणुः। च्यवनः। मानुषीणाम्। एकः। कृष्टीनाम्। अभवत्। सह॰वा॥ २॥

त्वं ह नु त्यददमायो दस्यूँरेकः कृष्टीरवनोरार्याय।
अस्ति स्विन्नु वीर्य१ तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः॥ ३॥

त्वम्। ह। नु। त्यत्। अदमयः। दस्यून्। एकः। कृष्टीः। अवनोः। आर्याय॥
अस्ति। स्वित्। नु। वीर्यम्। तत्। ते। इन्द्र। न। स्वित्। अस्ति। तत्। ऋतु॰था। वि। वोचः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य।
उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव॥ ४॥
सत्। इत्। हि। ते। तुवि॑ऽजातस्य। मन्ये। सहः। सहिष्ठ। तुरतः। तुरस्य।
उग्रम्। उग्रस्य। तवसः। तवीयः। अरध्रस्य। रध्र॑ऽतुरः। बभूव॥ ४॥
तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः।
हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः॥ ५॥ [४]
तत्। नः। प्रत्नम्। सख्यम्। अस्तु। युष्मे इति। इत्था। वदत्ऽभिः। वलम्। अङ्गिरःऽभिः।
हन्। अच्युतऽच्युत्। दस्म। इषयन्तम्। ऋणोः। पुरः। वि। दुरः। अस्य। विश्वाः॥ ५॥
स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये।
स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु॥ ६॥
सः। हि। धीभिः। हव्यः। अस्ति। उग्रः। ईशानऽकृत्। महति। वृत्रऽतूर्ये।
सः। तोकऽसाता। तनये। सः। वज्री। वितन्तसाय्यः। अभवत्। समत्ऽसु॥ ६॥
स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः॥ ७॥
सः। मज्मना। जनिम। मानुषाणाम्। अमर्त्येन। नाम्ना। अति। प्र। सर्स्रे।
सः। द्युम्नेन। सः। शवसा। उत। राया। सः। वीर्येण। नृऽतमः। सम्ऽओकाः॥ ७॥
स यो न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरिं धुनिं च।
वृणक्पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित्॥ ८॥
सः। यः। न। मुहे। न। मिथु। जनः। भूत्। सुमन्तुऽनामा। चुमुरिम्। धुनिम्। च।
वृणक्। पिप्रुम्। शम्बरम्। शुष्णम्। इन्द्रः। पुराम्। च्यौत्नाय। शयथाय। नु। चित्॥ ८॥
उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः॥ ९॥
उत्ऽअवता। त्वक्षसा। पन्यसा। च। वृत्रऽहत्याय। रथम्। इन्द्र। तिष्ठ।
धिष्व। वज्रम्। हस्ते। आ। दक्षिणऽत्रा। अभि। प्र। मन्द। पुरुऽदत्र। मायाः॥ ९॥
अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा।
गम्भीरय ऋष्वया यो रुरोजाध्वानयद्दुरिता दम्भयच्च॥ १०॥ [५]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निः। न। शुष्कम्। वनम्। इन्द्र। हेतिः। रक्षः। नि। धक्षि। अशनिः। न। भीमा।
गम्भीरया। ऋष्वया। यः। रुरोज। अध्वनयत्। दुःऽइता। दम्भयत्। च॥ १०॥

आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक्।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः॥ ११॥

आ। सहस्रम्। पथिऽभिः। इन्द्र। राया। तुविऽद्युम्न। तुविऽवाजेभिः। अर्वाक्।
याहि। सूनो इति। सहसः। यस्य। नु। चित्। अदेवः। ईशे। पुरुऽहूत। योतोः॥ ११॥

प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः॥ १२॥

प्र। तुविऽद्युम्नस्य। स्थविरस्य। घृष्वेः। दिवः। ररप्शे। महिमा। पृथिव्याः।
न। अस्य। शत्रुः। न। प्रतिऽमानम्। अस्ति। न। प्रतिऽस्थिः। पुरुऽमायस्य। सह्योः॥ १२॥

प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै।
पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ॥ १३॥

प्र। तत्। ते। अद्य। करणम्। कृतम्। भूत्। कुत्सम्। यत्। आयुम्। अतिथिऽग्वम्। अस्मै।
पुरु। सहस्रा। नि। शिशाः। अभि। क्षाम्। उत्। तूर्वयाणम्। धृषता। निनेथ॥ १३॥

अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनाम्।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः॥ १४॥

अनु। त्वा। अहिऽघ्ने। अध। देव। देवाः। मदन्। विश्वे। कविऽतमम्। कवीनाम्।
करः। यत्र। वरिवः। बाधिताय। दिवे। जनाय। तन्वे। गृणानः॥ १४॥

अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इन्द्र देवाः।
कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः॥ १५॥ [६]

अनु। द्यावापृथिवी इति। तत्। ते। ओजः। अमर्त्याः। जिहते। इन्द्र। देवाः।
कृष्व। कृत्नो इति। अकृतम्। यत्। ते। अस्ति। उक्थम्। नवीयः। जनयस्व। यज्ञैः॥ १५॥

[१९] [१३ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मुहान्। इन्द्रः। नृऽवत्। आ। चर्षणिऽप्राः। उत। द्विऽबर्हाः। अमिनः। सहःऽभिः।
अस्मद्र्यक्। वृवृधे। वीर्याय। उरुः। पृथुः। सुऽकृतः। कर्तृऽभिः। भूत्॥ १॥

इन्द्रमेव धिषणा सातये धाद्बृहन्तमृष्वमजरं युवानम्।
अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि॥ २॥

इन्द्रम्। एव। धिषणा। सातये। धात्। बृहन्तम्। ऋष्वम्। अजरम्। युवानम्।
अषाळ्हेन। शवसा। शूशुऽवांसम्। सद्यः। चित्। यः। वृवृधे। असामि॥ २॥

पृथू करस्ना बहुला गभस्ती अस्मद्र्य१क्सं मिमीहि श्रवांसि।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ॥ ३॥

पृथू इति। करस्ना। बहुला। गभस्ती इति। अस्मद्र्यक्। सम्। मिमीहि। श्रवांसि।
यूथाऽइव। पश्वः। पशुऽपाः। दमूनाः। अस्मान्। इन्द्र। अभि। आ। ववृत्स्व। आजौ॥ ३॥

तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम।
यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः॥ ४॥

तम्। वः। इन्द्रम्। चतिनम्। अस्य। शाकैः। इह। नूनम्। वाजऽयन्तः। हुवेम।
यथा। चित्। पूर्वे। जरितारः। आसुः। अनेद्याः। अनवद्याः। अरिष्टाः॥ ४॥

धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः।
सं जग्मिरे पथ्या३ रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः॥ ५॥ [७]

धृतऽव्रतः। धनऽदाः। सोमऽवृद्धः। सः। हि। वामस्य। वसुनः। पुरुऽक्षुः।
सम्। जग्मिरे। पथ्याः। रायः। अस्मिन्। समुद्रे। न। सिन्धवः। यादमानाः॥ ५॥

शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम्।
विश्वा द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै॥ ६॥

शविष्ठम्। नः। आ। भर। शूर। शवः। ओजिष्ठम्। ओजः। अभिऽभूते। उग्रम्।
विश्वा। द्युम्ना। वृष्ण्या। मानुषाणाम्। अस्मभ्यम्। दाः। हरिऽवः। मादयध्यै॥ ६॥

यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम्।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः॥ ७॥

यः। ते। मदः। पृतनाषाट्। अमृध्रः। इन्द्र। तम्। नः। आ। भर। शूशुऽवांसम्।
येन। तोकस्य। तनयस्य। सातौ। मंसीमहि। जिगीवांसः। त्वाऽऊताः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम्।

येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामींरजामीन्॥ ८॥

आ। नः। भर। वृषणम्। शुष्मम्। इन्द्र। धनऽस्पृतम्। शूशुऽवांसम्। सुऽदक्षम्।

येन। वंसाम। पृतनासु। शत्रून्। तव। ऊतिऽभिः। उत। जामीन्। अजामीन्॥ ८॥

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात्।

आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे॥ ९॥

आ। ते। शुष्मः। वृषभः। एतु। पश्चात्। आ। उत्तरात्। अधरात्। आ। पुरस्तात्।

आ। विश्वतः। अभि। सम्। एतु। अर्वाङ्। इन्द्र। द्युम्नम्। स्वःऽवत्। धेहि। अस्मे इति॥ ९॥

नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः।

ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम्॥ १०॥

नृऽवत्। ते। इन्द्र। नृऽतमाभिः। ऊती। वंसीमहि। वामम्। श्रोमतेभिः।

ईक्षे। हि। वस्वः। उभयस्य। राजन्। धाः। रत्नम्। महि। स्थूरम्। बृहन्तम्॥ १०॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्।

विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥ ११॥

मरुत्वन्तम्। वृषभम्। ववृधानम्। अकवऽअरिम्। दिव्यम्। शासम्। इन्द्रम्।

विश्वऽसहम्। अवसे। नूतनाय। उग्रम्। सहःऽदाम्। इह। तम्। हुवेम॥ ११॥

जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रन्धया येष्वस्मि।

अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु॥ १२॥

जनम्। वज्रिन्। महि। चित्। मन्यमानम्। एभ्यः। नृऽभ्यः। रन्धय। येषु। अस्मि।

अध। हि। त्वा। पृथिव्याम्। शूरऽसातौ। हवामहे। तनये। गोषु। अप्ऽसु॥ १२॥

वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम।

घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः॥ १३॥ [८]

वयम्। ते। एभिः। पुरुऽहूत। सख्यैः। शत्रोःऽशत्रोः। उत्ऽतरे। इत्। स्याम।

घ्नन्तः। वृत्राणि। उभयानि। शूर। राया। मदेम। बृहता। त्वाऽऊताः॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[२०] [१३ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्, ७ विराट्।]

द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान्।

तं नः सहस्रभरमुर्वरायां दद्धि सूनो सहसो वृत्रतुरम्॥ १॥

द्यौः। न। यः। इन्द्र। अभि। भूम। अर्यः। तस्थौ। रयिः। शवसा। पृत्ऽसु। जनान्।

तम्। नः। सहस्रऽभरम्। उर्वराऽसाम्। दद्धि। सूनो इति। सहसः। वृत्रऽतुरम्॥ १॥

दिवो न तुभ्यमन्विन्द्र सत्रासुर्यं देवेभिर्धायि विश्वम्।

अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः॥ २॥

दिवः। न। तुभ्यम्। अनु। इन्द्र। सत्रा। असुर्यम्। देवेभिः। धायि। विश्वम्।

अहिम्। यत्। वृत्रम्। अपः। वव्रिऽवांसम्। हन्। ऋजीषिन्। विष्णुना। सचानः॥ २॥

तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेन्द्रो वृद्धमहाः।

राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत्॥ ३॥

तूर्वन्। ओजीयान्। तवसः। तवीयान्। कृतऽब्रह्मा। इन्द्रः। वृद्धऽमहाः।

राजा। अभवत्। मधुनः। सोम्यस्य। विश्वासाम्। यत्। पुराम्। दर्त्नुम्। आवत्॥ ३॥

शतैरपद्रन्पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ।

वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र॥ ४॥

शतैः। अपद्रन्। पणयः। इन्द्र। अत्र। दशऽओणये। कवये। अर्कऽसातौ।

वधैः। शुष्णस्य। अशुषस्य। मायाः। पित्वः। न। अरिरेचीत्। किम्। चन। प्र॥ ४॥

महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः।

उरु ष सरथं सारथये करिन्द्रः कुत्साय सूर्यस्य सातौ॥ ५॥ [९]

महः। द्रुहः। अप। विश्वऽआयु। धायि। वज्रस्य। यत्। पतने। पादि। शुष्णः।

उरु। सः। सऽरथम्। सारथये। करः। इन्द्रः। कुत्साय। सूर्यस्य। सातौ॥ ५॥

प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन्।

प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति॥ ६॥

प्र। श्येनः। न। मदिरम्। अंशुम्। अस्मै। शिरः। दासस्य। नमुचेः। मथायन्।

प्र। आवत्। नमीम्। साप्यम्। ससन्तम्। पृणक्। राया। सम्। इषा। सम्। स्वस्ति॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः।

सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः॥ ७॥

वि। पिप्रोः। अहिऽमायस्य। दृळ्हाः। पुरः। वज्रिन्। शवसा। न। दर्दरिति दर्दः।

सुऽदामन्। तत्। रेक्णः। अप्रऽमृष्यम्। ऋजिश्वने। दात्रम्। दाशुषे। दाः॥ ७॥

स वेतसुं दशमायं दशोणिं तूतुजिमिन्द्रः स्वभिष्टिसुम्नः।

आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै॥ ८॥

सः। वेतसुम्। दशऽमायम्। दशऽओणिम्। तूतुजिम्। इन्द्रः। स्वभिष्टिऽसुम्नः।

आ। तुग्रम्। शश्वत्। इभम्। द्योतनाय। मातुः। न। सीम्। उप। सृज। इयध्यै॥ ८॥

स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ।

तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम्॥ ९॥

सः। ईम्। स्पृधः। वनते। अप्रतिऽइतः। बिभ्रत्। वज्रम्। वृत्रऽहनम्। गभस्तौ।

तिष्ठत्। हरी इति। अधि। अस्ताऽइव। गर्ते। वचःऽयुजा। वहतः। इन्द्रम्। ऋष्वम्॥ ९॥

सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः।

सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन्॥ १०॥

सनेम। ते। अवसा। नव्यः। इन्द्र। प्र। पूरवः। स्तवन्ते। एना। यज्ञैः।

सप्त। यत्। पुरः। शर्म। शारदीः। दर्त्। हन्। दासीः। पुरुऽकुत्साय। शिक्षन्॥ १०॥

त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय।

परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम्॥ ११॥

त्वम्। वृधः। इन्द्र। पूर्व्यः। भूः। वरिवस्यन्। उशने। काव्याय।

परा। नवऽवास्त्वम्। अनुऽदेयम्। महे। पित्रे। ददाथ। स्वम्। नपातम्॥ ११॥

त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः।

प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति॥ १२॥

त्वम्। धुनिः। इन्द्र। धुनिऽमतीः। ऋणोः। अपः। सीराः। न। स्रवन्तीः।

प्र। यत्। समुद्रम्। अति। शूर। पर्षि। पारय। तुर्वशम्। यदुम्। स्वस्ति॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तव॑ ह॒ त्यदि॑न्द्र॒ विश्व॑माजौ स॒स्तो धुनी॒चुमु॑री॒ या ह॒ सिष्व॑प्।

दी॒दय॒दित्तुभ्यं॒ सोमे॑भिः सु॒न्वन्द॒भीति॑रि॒ध्मभृ॑तिः प॒क्थ्य१॒॑र्कैः ॥ १३ ॥ [१०]

तव॑। ह॒। त्यत्। इ॒न्द्र॒। विश्व॑म्। आ॒जौ। स॒स्तः। धुनी॒चुमु॑री॒ इति॑। या। ह॒। सिस्व॑प्।

दी॒दय॑त्। इत्। तुभ्य॑म्। सोमे॑भिः। सु॒न्वन्। द॒भीति॑ः। इ॒ध्मऽभृ॑तिः। प॒क्थी। अ॒र्कैः ॥ १३ ॥

[२१] [१२ भरद्वाजो बार्हस्पत्यः। इन्द्रः; ९, ११ विश्वे देवाः। त्रिष्टुप्।]

इ॒मा उ॑ त्वा पुरु॒तम॑स्य का॒रोर्हव्यं॑ वीर॒ हव्या॑ हवन्ते।

धियो॑ रथे॒ष्ठाम॒जरं॒ नवी॑यो र॒यिर्विभू॑तिरीयते वच॒स्या ॥ १ ॥

इ॒माः। ऊँ॑ इति॑। त्वा॒। पु॒रु॒ऽतम॑स्य। का॒रोः। हव्य॑म्। वी॒र॒। हव्याः॑। ह॒व॒न्ते॒।

धियः॑। र॒थे॒ऽस्थाम्। अ॒जर॑म्। नवी॑यः। र॒यिः। वि॑ऽभू॑तिः। ई॒य॒ते॒। व॒च॒स्या ॥ १ ॥

तमु॑ स्तु॒ष इन्द्रं॑ यो विदा॑नो॒ गिर्वा॑हसं गी॒र्भिर्य॒ज्ञवृ॑द्धम्।

यस्य॒ दिव॒मति॑ म॒ह्ना पृ॑थि॒व्याः पु॑रु॒माय॑स्य रिरि॒चे म॑हि॒त्वम् ॥ २ ॥

तम्। ऊँ॑ इति॑। स्तु॒षे॒। इन्द्र॑म्। यः। विदा॑नः। गिर्वा॑हसम्। गी॒ःऽभिः। य॒ज्ञऽवृ॑द्धम्।

यस्य॑। दिव॑म्। अति॑। म॒ह्ना। पृ॒थि॒व्याः। पु॒रु॒ऽमा॒यस्य॑। रि॒रि॒चे। म॒हि॒ऽत्वम् ॥ २ ॥

स इत्तमो॑ऽवयु॒नं त॑त॒न्वत्सूर्ये॑ण व॒युन॑वच्चकार।

क॒दा ते॒ मर्ता॑ अ॒मृत॑स्य॒ धामेय॑क्षन्तो॒ न मि॑नन्ति स्वधावः ॥ ३ ॥

सः। इत्। तम॑ः। अ॒व॒यु॒नम्। त॒त॒न्वत्। सूर्ये॑ण। व॒युन॑ऽवत्। च॒का॒र॒।

क॒दा। ते॒। मर्ता॑ः। अ॒मृत॑स्य। धाम॑। इय॑क्षन्तः। न। मि॒न॒न्ति॒। स्व॒धा॒ऽव॒ः ॥ ३ ॥

यस्ता च॒कार॒ स कुह॑ स्वि॒दिन्द्रः॑ कमा जनं॑ चरति॒ कासु॑ वि॒क्षु।

कस्ते॑ य॒ज्ञो मन॑से॒ शं वरा॑य॒ को अ॒र्क इ॑न्द्र कत॒मः स होता॑ ॥ ४ ॥

यः। ता। च॒कार॑। सः। कुह॑। स्वि॒त्। इन्द्र॑ः। कम्। आ। जन॑म्। च॒र॒ति॒। कासु॑। वि॒क्षु।

कः। ते॒। य॒ज्ञः। मन॑से। शम्। वरा॑य। कः। अ॒र्कः। इ॒न्द्र॒। क॒त॒मः। सः। होता॑ ॥ ४ ॥

इ॒दा हि ते॒ वेवि॑षतः पु॒रा॒जाः प्र॒त्नास॑ आ॒सुः पु॑रु॒कृ॒त्सखा॑यः।

ये म॑ध्य॒मास॑ उ॒त नूत॑नास उ॒ताव॒मस्य॑ पुरुहूत बोधि ॥ ५ ॥ [११]

इ॒दा। हि। ते॒। वेवि॑षतः। पु॒रा॒ऽजाः। प्र॒त्नास॑ः। आ॒सुः। पु॒रु॒ऽकृ॒त्। सखा॑यः।

ये। म॒ध्य॒मास॑ः। उ॒त। नूत॑नासः। उ॒त। अ॒व॒मस्य॑। पु॒रु॒ऽहू॒त॒। बोधि॒ ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं पृ॒च्छन्तोऽव॑रासः॒ परा॑णि प्र॒त्ना त॑ इन्द्र॒ श्रुत्यानु॑ येमुः।
अर्चा॑मसि वीर ब्रह्मवाहो॒ यादे॒व वि॒द्म तात्त्वा॑ म॒हान्त॑म्॥ ६॥

तम्। पृ॒च्छन्तः॑। अव॑रासः। परा॑णि। प्र॒त्ना। ते॒। इ॒न्द्र॒। श्रुत्या॑। अनु॑। ये॒मुः॒।
अर्चा॑मसि। वी॒र॒। ब्र॒ह्म॒ऽवा॒हः॒। यात्। ए॒व। वि॒द्म। तात्। त्वा॒। म॒हान्त॑म्॥ ६॥

अ॒भि त्वा॒ पाजो॑ र॒क्षसो॒ वि त॑स्थे॒ महि॑ जज्ञा॒नम॒भि तत्सु ति॑ष्ठ।
तव॑ प्र॒त्नेन॒ युज्ये॑न॒ सख्या॒ वज्रे॑ण धृष्णो॒ अप॒ ता नु॑दस्व॥ ७॥

अ॒भि। त्वा॒। पाजः॑। र॒क्षसः॑। वि। त॒स्थे॒। महि॑। ज॒ज्ञा॒नम्। अ॒भि। तत्। सु। ति॒ष्ठ॒।
तव॑। प्र॒त्नेन॑। युज्ये॑न। सख्या॑। वज्रे॑ण। धृ॒ष्णो॒ इति॑। अप॑। ता। नु॒द॒स्व॒॥ ७॥

स तु श्रु॑धीन्द्र॒ नूत॑नस्य ब्रह्मण्य॒तो वी॑र कारुधायः।
त्वं ह्या॒३॒॑पिः प्र॒दिवि॑ पितॄ॒णां शश्व॑द्बभू॒थ॑ सु॒हव॒ एष्टौ॑॥ ८॥

सः। तु। श्रु॒धि॒। इ॒न्द्र॒। नूत॑नस्य। ब्र॒ह्म॒ण्य॒तः। वी॒र॒। का॒रु॒ऽधा॒यः॒।
त्वम्। हि। आ॒पिः। प्र॒ऽदिवि॑। पि॒तॄ॒णाम्। शश्व॑त्। ब॒भूथ॑। सु॒ऽहवः॑। आऽइ॑ष्टौ॥ ८॥

प्रोतये॒ वरु॑णं मि॒त्रमिन्द्रं॑ म॒रुतः॑ कृष्वाव॑से नो अ॒द्य।
प्र पू॒षणं॒ विष्णु॑म॒ग्निं पुरं॑धिं सवि॒तार॒मोष॑धीः॒ पर्व॑तांश्च॥ ९॥

प्र। ऊ॒तये॑। वरु॑णम्। मि॒त्रम्। इन्द्र॑म्। म॒रुतः॑। कृ॒ष्व॒। अव॑से। नः॒। अ॒द्य।
प्र। पू॒षण॑म्। विष्णु॑म्। अ॒ग्निम्। पुर॑म्ऽधिम्। स॒वि॒तार॑म्। ओष॑धीः। पर्व॑तान्। च॒॥ ९॥

इ॒म उ॑ त्वा पुरुशाक प्रयज्यो जरि॒तारो॑ अ॒भ्य॑र्चन्त्य॒र्कैः।
श्रु॒धी हव॒मा हु॑व॒तो हु॑वा॒नो न त्वावाँ॑ अ॒न्यो अ॑मृत॒ त्वद॑स्ति॥ १०॥

इ॒मे। ऊँ॒ इति॑। त्वा॒। पु॒रु॒ऽशा॒क॒। प्र॒य॒ज्यो॒ इति॑ प्र॒ऽय॒ज्यो॒। ज॒रि॒तारः॑। अ॒भि। अ॒र्च॒न्ति॒। अ॒र्कैः।
श्रु॒धि। हव॑म्। आ। हु॒व॒तः। हु॒वा॒नः। न। त्वाऽवा॑न्। अ॒न्यः। अ॒मृ॒त॒। त्वत्। अ॒स्ति॒॥ १०॥

नू म॒ आ वाच॒मुप॑ याहि वि॒द्वान्विश्वे॑भिः सूनो सहसो॒ यज॑त्रैः।
ये अ॑ग्निजि॒ह्वा ऋ॑त॒साप॑ आ॒सुर्ये मनुं॑ च॒क्रुरुप॑रं॒ दसा॑य॥ ११॥

नु। मे॒। आ। वाच॑म्। उप॑। या॒हि॒। वि॒द्वान्। विश्वे॑भिः। सू॒नो॒ इति॑। स॒ह॒सः॒। यज॑त्रैः।
ये। अ॒ग्नि॒ऽजि॒ह्वाः। ऋ॒त॒ऽसाप॑ः। आ॒सुः। ये। मनु॑म्। च॒क्रुः। उप॑रम्। दसा॑य॥ ११॥

स नो॑ बोधि पुरए॒ता सु॒गेषू॒त दु॒र्गेषु॑ पथि॒कृद्विदा॑नः।
ये अश्र॑मास उ॒रवो॒ वहि॑ष्ठा॒स्तेभि॑र्न इन्द्रा॒भि व॑क्षि॒ वाज॑म्॥ १२॥ [१२]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। नः। बोधि। पुरःऽएता। सुऽगेषु। उत। दुःऽगेषु। पथिऽकृत्। विदानः।
ये। अश्रमासः। उरवः। वहिष्ठाः। तेभिः। नः। इन्द्र। अभि। वक्षि। वाजम्॥ १२॥

[२२] [११ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान्॥ १॥
यः। एकः। इत्। हव्यः। चर्षणीनाम्। इन्द्रम्। तम्। गीःऽभिः। अभि। अर्चे। आभिः।
यः। पत्यते। वृषभः। वृष्ण्यऽवान्। सत्यः। सत्वा। पुरुऽमायः। सहस्वान्॥ १॥
तमु नः पूर्वे पितरो नवग्वा सप्त विप्रासो अभि वाजयन्तः।
नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम्॥ २॥
तम्। ऊँ इति। नः। पूर्वे। पितरः। नवऽग्वाः। सप्त। विप्रासः। अभि। वाजयन्तः।
नक्षत्ऽदाभम्। ततुरिम्। पर्वतेऽस्थाम्। अद्रोघऽवाचम्। मतिऽभिः। शविष्ठम्॥ २॥
तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः।
यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै॥ ३॥
तम्। ईमहे। इन्द्रम्। अस्य। रायः। पुरुऽवीरस्य। नृऽवतः। पुरुऽक्षोः।
यः। अस्कृधोयुः। अजरः। स्वःऽवान्। तम्। आ। भर। हरिऽवः। मादयध्यै॥ ३॥
तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिन्द्र।
कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरुवसोऽसुरघ्नः॥ ४॥
तत्। नः। वि। वोचः। यदि। ते। पुरा। चित्। जरितारः। आनशुः। सुम्नम्। इन्द्र।
कः। ते। भागः। किम्। वयः। दुध्र। खिद्वः। पुरुऽहूत। पुरुवसो इति पुरुऽवसो। असुरऽघ्नः॥ ४॥
तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्वरी यस्य नू गीः।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ॥ ५॥ [१३]
तम्। पृच्छन्ती। वज्रऽहस्तम्। रथेऽस्थाम्। इन्द्रम्। वेपी। वक्वरी। यस्य। नु। गीः।
तुविऽग्राभम्। तुविऽकूर्मिम्। रभःऽदाम्। गातुम्। इषे। नक्षते। तुम्रम्। अच्छ॥ ५॥
अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन।
अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अया। ह। त्यम्। मायया। ववृधानम्। मनःऽजुवा। स्वऽतवः। पर्वतेन।
अच्युता। चित्। वीळिता। सुऽओजः। रुजः। वि। दृळ्हा। धृषता। विऽरप्शिन्॥ ६॥

तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै।
स नो वक्षदनिमानः सुवह्मेन्द्रो विश्वान्यति दुर्गहाणि॥ ७॥

तम्। वः। धिया। नव्यस्या। शविष्ठम्। प्रत्नम्। प्रत्नऽवत्। परिऽतंसयध्यै।
सः। नः। वक्षत्। अनिऽमानः। सुऽवह्मा। इन्द्रः। विश्वानि। अति। दुःऽगहानि॥ ७॥

आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा।
तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च॥ ८॥

आ। जनाय। द्रुह्वणे। पार्थिवानि। दिव्यानि। दीपयः। अन्तरिक्षा।
तप। वृषन्। विश्वतः। शोचिषा। तान्। ब्रह्मऽद्विषे। शोचय। क्षाम्। अपः। च॥ ८॥

भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक्।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः॥ ९॥

भुवः। जनस्य। दिव्यस्य। राजा। पार्थिवस्य। जगतः। त्वेषऽसंदृक्।
धिष्वः। वज्रम्। दक्षिणे। इन्द्र। हस्ते। विश्वाः। अजुर्य। दयसे। वि। मायाः॥ ९॥

आ संयतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम्।
यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि॥ १०॥

आ। सम्ऽयतम्। इन्द्र। नः। स्वस्तिम्। शत्रुऽतुर्याय। बृहतीम्। अमृध्राम्।
यया। दासानि। आर्याणि। वृत्रा। करः। वज्रिन्। सुऽतुका। नाहुषाणि॥ १०॥

स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो।
न या अदेवो वरते न देव आभिर्याहि तूयमा मद्र्यद्रिक्॥ ११॥ [१४]

सः। नः। नियुत्ऽभिः। पुरुऽहूत। वेधः। विश्वऽवाराभिः। आ। गहि। प्रयज्यो इति प्रऽयज्यो।
न। याः। अदेवः। वरते। न। देवः। आ। आभिः। याहि। तूयम्। आ। मद्र्यद्रिक्॥ ११॥

[२३] [१० भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे।
यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुते। इत्। त्वम्। निऽमिश्लः। इन्द्र। सोमे। स्तोमे। ब्रह्मणि। शस्यमाने। उक्थे।
यत्। वा। युक्ताभ्याम्। मघऽवन्। हरिऽभ्याम्। बिभ्रत्। वज्रम्। बाह्वोः। इन्द्र। यासि॥ १॥

यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ।
यद्वा दक्षस्य बिभ्युषो अबिभ्यदरन्धयः शर्धत इन्द्र दस्यून्॥ २॥

यत्। वा। दिवि। पार्ये। सुस्विम्। इन्द्र। वृत्रऽहत्ये। अवसि। शूरऽसातौ।
यत्। वा। दक्षस्य। बिभ्युषः। अबिभ्यत्। अरन्धयः। शर्धतः। इन्द्र। दस्यून्॥ २॥

पाता सुतमिन्द्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती।
कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित्॥ ३॥

पाता। सुतम्। इन्द्रः। अस्तु। सोमम्। प्रऽनेनीः। उग्रः। जरितारम्। ऊती।
कर्ता। वीराय। सुस्वये। ऊँ इति। लोकम्। दाता। वसु। स्तुवते। कीरये। चित्॥ ३॥

गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः॥ ४॥

गन्ता। इयन्ति। सवना। हरिऽभ्याम्। बभ्रिः। वज्रम्। पपिः। सोमम्। ददिः। गाः।
कर्ता। वीरम्। नर्यम्। सर्वऽवीरम्। श्रोता। हवम्। गृणतः। स्तोमऽवाहाः॥ ४॥

अस्मै वयं यद्वावान तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः।
सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत्॥ ५॥ [१५]

अस्मै। वयम्। यत्। ववान। तत्। विविष्मः। इन्द्राय। यः। नः। प्रऽदिवः। अपः। करिति कः।
सुते। सोमे। स्तुमसि। शंसत्। उक्था। इन्द्राय। ब्रह्म। वर्धनम्। यथा। असत्॥ ५॥

ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः।
सुते सोमे सुतपाः शंतमानि रान्द्र्या क्रियास्म वक्षणानि यज्ञैः॥ ६॥

ब्रह्माणि। हि। चकृषे। वर्धनानि। तावत्। ते। इन्द्र। मतिऽभिः। विविष्मः।
सुते। सोमे। सुतऽपाः। शम्ऽतमानि। रान्द्र्या। क्रियास्म। वक्षणानि। यज्ञैः॥ ६॥

स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिन्द्र।
इदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम्॥ ७॥

सः। नः। बोधि। पुरोळाशम्। रराणः। पिब। तु। सोमम्। गोऽऋजीकम्। इन्द्र।
आ। इदम्। बर्हिः। यजमानस्य। सीद। उरुम्। कृधि। त्वाऽयतः। ऊँ इति। लोकम्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवन्तु।
प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः॥ ८॥
सः। मन्दस्व। हि। अनु। जोषम्। उग्र। प्र। त्वा। यज्ञासः। इमे। अश्नुवन्तु।
प्र। इमे। हवासः। पुरुऽहूतम्। अस्मे इति। आ। त्वा। इयम्। धीः। अवसे। इन्द्र। यम्याः॥ ८॥
तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम्।
कुवित्तस्मा असति नो भराय न सुष्विमिन्द्रोऽवसे मृधाति॥ ९॥
तम्। वः। सखायः। सम्। यथा। सुतेषु। सोमेभिः। ईम्। पृणत। भोजम्। इन्द्रम्।
कुवित्। तस्मै। असति। नः। भराय। न। सुस्विम्। इन्द्रः। अवसे। मृधाति॥ ९॥
एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः।
असद्यथा जरित्र उत सूरिरिन्द्रो रायो विश्ववारस्य दाता॥ १०॥ [१६] {२}
एव। इत्। इन्द्रः। सुते। अस्तावि। सोमे। भरत्ऽवाजेषु। क्षयत्। इत्। मघोनः।
असत्। यथा। जरित्रे। उत। सूरिः। इन्द्रः। रायः। विश्वऽवारस्य। दाता॥ १०॥

[२४] [१० भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी।
अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिरामक्षितोतिः॥ १॥
वृषा। मदः। इन्द्रे। श्लोकः। उक्था। सचा। सोमेषु। सुतऽपाः। ऋजीषी।
अर्चत्र्यः। मघऽवा। नृऽभ्यः। उक्थैः। द्युक्षः। राजा। गिराम्। अक्षितऽऊतिः॥ १॥
ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः।
वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम्॥ २॥
ततुरिः। वीरः। नर्यः। विऽचेताः। श्रोता। हवम्। गृणतः। उर्विऽऊतिः।
वसुः। शंसः। नराम्। कारुऽधायाः। वाजी। स्तुतः। विदथे। दाति। वाजम्॥ २॥
अक्षो न चक्रयोः शूर बृहन्प्र ते मह्ना रिरिचे रोदस्योः।
वृक्षस्य नु ते पुरुहूत वया व्यू३तयो रुरुहुरिन्द्र पूर्वीः॥ ३॥
अक्षः। न। चक्रयोः। शूर। बृहन्। प्र। ते। मह्ना। रिरिचे। रोदस्योः।
वृक्षस्य। नु। ते। पुरुऽहूत। वयाः। वि। ऊतयः। रुरुहुः। इन्द्र। पूर्वीः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः।

वत्सानां न तन्तयस्त इन्द्र दामन्वन्तो अदामानः सुदामन्॥ ४॥

शची॰वतः। ते। पुरु॰शाक। शाकाः। गवाम्ऽइव। स्रुतयः। सम्॰चरणीः।

वत्सानाम्। न। तन्तयः। ते। इन्द्र। दामन्॰वन्तः। अदामानः। सु॰दामन्॥ ४॥

अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः।

मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति॥ ५॥ [१७]

अन्यत्। अद्य। कर्वरम्। अन्यत्। ऊँ इति। श्वः। असत्। च। सत्। मुहुः। आ॰चक्रिः। इन्द्रः।

मित्रः। नः। अत्र। वरुणः। च। पूषा। अर्यः। वशस्य। परि॰एता। अस्ति॥ ५॥

वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः।

तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः॥ ६॥

वि। त्वत्। आपः। न। पर्वतस्य। पृष्ठात्। उक्थेभिः। इन्द्र। अनयन्त। यज्ञैः।

तम्। त्वा। आभिः। सुस्तुति॰भिः। वाजयन्तः। आजिम्। न। जग्मुः। गिर्वाहः। अश्वाः॥ ६॥

न यं जरन्ति शरदो न मासा न द्याव इन्द्रमवकर्शयन्ति।

वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना॥ ७॥

न। यम्। जरन्ति। शरदः। न। मासाः। न। द्यावः। इन्द्रम्। अव॰कर्शयन्ति।

वृद्धस्य। चित्। वर्धताम्। अस्य। तनूः। स्तोमेभिः। उक्थैः। च। शस्यमाना॥ ७॥

न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान्।

अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद्भवति गाधमस्मै॥ ८॥

न। वीळवे। नमते। न। स्थिराय। न। शर्धते। दस्यु॰जूताय। स्तवान्।

अज्राः। इन्द्रस्य। गिरयः। चित्। ऋष्वाः। गम्भीरे। चित्। भवति। गाधम्। अस्मै॥ ८॥

गम्भीरेण न उरुणामत्रिन्प्रेषो यन्धि सुतपावन्वाजान्।

स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम्॥ ९॥

गम्भीरेण। नः। उरुणा। अमत्रिन्। प्र। इषः। यन्धि। सुत॰पावन्। वाजान्।

स्थाः। ऊँ इति। सु। ऊर्ध्वः। ऊती। अरिषण्यन्। अक्तोः। वि॰उष्टौ। परि॰तक्म्यायाम्॥ ९॥

सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः।

अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः॥ १०॥ [१८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सचस्व। नायम्। अवसे। अभीके। इतः। वा। तम्। इन्द्र। पाहि। रिषः।
अमा। च। एनम्। अरण्ये। पाहि। रिषः। मदेम। शतऽहिमाः। सुऽवीराः॥ १०॥

[२५] [९ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र॥ १॥

या। ते। ऊतिः। अवमा। या। परमा। या। मध्यमा। इन्द्र। शुष्मिन्। अस्ति।
ताभिः। ऊँ इति। सु। वृत्रऽहत्ये। अवीः। नः। एभिः। च। वाजैः। महान्। नः। उग्र॥ १॥

आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः॥ २॥

आभिः। स्पृधः। मिथतीः। अरिषण्यन्। अमित्रस्य। व्यथय। मन्युम्। इन्द्र।
आभिः। विश्वाः। अभिऽयुजः। विषूचीः। आर्याय। विशः। अव। तारीः। दासीः॥ २॥

इन्द्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे।
त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः॥ ३॥

इन्द्र। जामयः। उत। ये। अजामयः। अर्वाचीनासः। वनुषः। युयुज्रे।
त्वम्। एषाम्। विथुरा। शवांसि। जहि। वृष्ण्यानि। कृणुहि। पराचः॥ ३॥

शूरो वा शूरं वनते शरीरैस्तनूरुचा तरुषि यत्कृण्वैते।
तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते॥ ४॥

शूरः। वा। शूरम्। वनते। शरीरैः। तनूऽरुचा। तरुषि। यत्। कृण्वैते इति।
तोके। वा। गोषु। तनये। यत्। अप्ऽसु। वि। क्रन्दसी इति। उर्वरासु। ब्रवैते इति॥ ४॥

नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध।
इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि॥ ५॥ [१९]

नहि। त्वा। शूरः। न। तुरः। न। धृष्णुः। न। त्वा। योधः। मन्यमानः। युयोध।
इन्द्र। नकिः। त्वा। प्रति। अस्ति। एषाम्। विश्वा। जातानि। अभि। असि। तानि॥ ५॥

स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवन्ते।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। पत्यते। उभयोः। नृम्णम्। अयोः। यदि। वेधसः। सम्ऽइथे। हवन्ते।
वृत्रे। वा। महः। नृऽवति। क्षये। वा। व्यचस्वन्ता। यदि। वितन्तसैते इति॥ ६॥

अध स्मा ते चर्षणयो यदेजानिन्द्र त्रातोत भवा वरूता।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः॥ ७॥

अध। स्म। ते। चर्षणयः। यत्। एजान्। इन्द्र। त्राता। उत। भव। वरूता।
अस्माकासः। ये। नृऽतमासः। अर्यः। इन्द्र। सूरयः। दधिरे। पुरः। नः॥ ७॥

अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये।
अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये॥ ८॥

अनु। ते। दायि। महे। इन्द्रियाय। सत्रा। ते। विश्वम्। अनु। वृत्रऽहत्ये।
अनु। क्षत्रम्। अनु। सहः। यजत्र। इन्द्र। देवेभिः। अनु। ते। नृऽसह्ये॥ ८॥

एवा नः स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः॥
विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम्॥ ९॥ [२०]

एव। नः। स्पृधः। सम्। अज। समत्ऽसु। इन्द्र। ररन्धि। मिथतीः। अदेवीः।
विद्याम। वस्तोः। अवसा। गृणन्तः। भरत्ऽवाजाः। उत। ते। इन्द्र। नूनम्॥ ९॥

[२६] [८ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः।
सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन्दाः॥ १॥

श्रुधि। नः। इन्द्र। ह्वयामसि। त्वा। महः। वाजस्य। सातौ। ववृषाणाः।
सम्। यत्। विशः। अयन्त। शूरऽसातौ। उग्रम्। नः। अवः। पार्ये। अहन्। दाः॥ १॥

त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ।
त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन्॥ २॥

त्वाम्। वाजी। हवते। वाजिनेयः। महः। वाजस्य। गध्यस्य। सातौ।
त्वाम्। वृत्रेषु। इन्द्र। सत्ऽपतिम्। तरुत्रम्। त्वाम्। चष्टे। मुष्टिऽहा। गोषु। युध्यन्॥ २॥

त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क्।
त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। कविम्। चोदयः। अर्कऽसातौ। त्वम्। कुत्साय। शुष्णम्। दाशुषे। वर्क्।
त्वम्। शिरः। अमर्मणः। परा। अहन्। अतिथिऽग्वाय। शंस्यम्। करिष्यन्॥ ३॥

त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम्।
त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः॥ ४॥

त्वम्। रथम्। प्र। भरः। योधम्। ऋष्वम्। आवः। युध्यन्तम्। वृषभम्। दशऽद्युम्।
त्वम्। तुग्रम्। वेतसवे। सचा। अहन्। त्वम्। तुजिम्। गृणन्तम्। इन्द्र। तूतोरिति तूतोः॥ ४॥

त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि।
अव गिरेर्दासं शम्बरं हन्प्रावो दिवोदासं चित्राभिरूती॥ ५॥ [२१]

त्वम्। तत्। उक्थम्। इन्द्र। बर्हणा। करिति कः। प्र। यत्। शता। सहस्रा। शूर। दर्षि।
अव। गिरेः। दासम्। शम्बरम्। हन्। प्र। आवः। दिवःऽदासम्। चित्राभिः। ऊती॥ ५॥

त्वं श्रद्धाभिर्मन्दसानः सोमैर्दभीतये चुमुरिमिन्द्र सिष्वप्।
त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या सचाहन्॥ ६॥

त्वम्। श्रद्धाभिः। मन्दसानः। सोमैः। दभीतये। चुमुरिम्। इन्द्रम्। सिस्वप्।
त्वम्। रजिम्। पिठीनसे। दशस्यन्। षष्ठिम्। सहस्रा। शच्या। सचा। अहन्॥ ६॥

अहं चन तत्सूरिभिरानश्यां तव ज्याय इन्द्र सुम्नमोजः।
त्वया यत्स्तवन्ते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ॥ ७॥

अहम्। चन। तत्। सूरिऽभिः। आनश्याम्। तव। ज्यायः। इन्द्र। सुम्नम्। ओजः।
त्वया। यत्। स्तवन्ते। सधऽवीर। वीराः। त्रिऽवरूथेन। नहुषा। शविष्ठ॥ ७॥

वयं ते अस्यामिन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः।
प्रातर्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम्॥ ८॥ [२२]

वयम्। ते। अस्याम्। इन्द्र। द्युम्नऽहूतौ। सखायः। स्याम। महिन। प्रेष्ठाः।
प्रातर्दनिः। क्षत्रऽश्रीः। अस्तु। श्रेष्ठः। घने। वृत्राणाम्। सनये। धनानाम्॥ ८॥

[२७] [८ भरद्वाजो बार्हस्पत्यः। इन्द्रः, ८ अभ्यावर्ती चायमानः। दानस्तुतिः। त्रिष्टुप्।]

किमस्य मदे किम्वस्य पीताविन्द्रः किमस्य सख्ये चकार।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

किम्। अस्य। मदे। किम्। ऊँ इति। अस्य। पीतौ। इन्द्रः। किम्। अस्य। सख्ये। चकार।
रणाः। वा। ये। नि॰सदि। किम्। ते। अस्य। पुरा। विविद्रे। किम्। ऊँ इति। नूतनासः॥ १॥

सदस्य मदे सद्वस्य पीताविन्द्रः सदस्य सख्ये चकार।
रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः॥ २॥

सत्। अस्य। मदे। सत्। ऊँ इति। अस्य। पीतौ। इन्द्रः। सत्। अस्य। सख्ये। चकार।
रणाः। वा। ये। नि॰सदि। सत्। ते। अस्य। पुरा। विविद्रे। सत्। ऊँ इति। नूतनासः॥ २॥

नहि नु ते महिमनः समस्य न मघवन्मघवत्त्वस्य विद्म।
न राधसोराधसो नूतनस्येन्द्र नकिर्ददृश इन्द्रियं ते॥ ३॥

नहि। नु। ते। महिमनः। समस्य। न। मघ॰वन्। मघवत्॰त्वस्य। विद्म।
न। राधसः२राधसः। नूतनस्य। इन्द्र। नकिः। ददृशे। इन्द्रियम्। ते॥ ३॥

एतत्त्यत्त इन्द्रियमचेति येनावधीर्वरशिखस्य शेषः।
वज्रस्य यत्ते निहतस्य शुष्मात्स्वनाच्चिदिन्द्र परमो ददार॥ ४॥

एतत्। त्यत्। ते। इन्द्रियम्। अचेति। येन। अवधीः। वर॰शिखस्य। शेषः।
वज्रस्य। यत्। ते। नि॰हतस्य। शुष्मात्। स्वनात्। चित्। इन्द्र। परमः। ददार॥ ४॥

वधीदिन्द्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन्।
वृचीवते यद्धरियूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त्॥ ५॥ [२३]

वधीत्। इन्द्रः। वर॰शिखस्य। शेषः। अभि॰आवर्तिने। चायमानाय। शिक्षन्।
वृचीवतः। यत्। हरि॰यूपीयायाम्। हन्। पूर्वे। अर्धे। भियसा। अपरः। दर्त्॥ ५॥

त्रिंशच्छतं वर्मिण इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्यायन्॥ ६॥

त्रिंशत्॰शतम्। वर्मिणः। इन्द्र। साकम्। यव्या॰वत्याम्। पुरु॰हूत। श्रवस्या।
वृचीवन्तः। शरवे। पत्यमानाः। पात्रा। भिन्दानाः। नि॰अर्थानि। आयन्॥ ६॥

यस्य गावावरुषा सूयवस्यू अन्तरू षु चरतो रेरिहाणा।
स सृञ्जयाय तुर्वशं परादाद्वृचीवतो दैववाताय शिक्षन्॥ ७॥

यस्य। गावौ। अरुषा। सुयवस्यू इति सु॰यवस्यू। अन्तः। ऊँ इति। सु। चरतः। रेरिहाणा।
सः। सृञ्जयाय। तुर्वशम्। परा। अदात्। वृचीवतः। दैव॰वाताय। शिक्षन्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट्।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम्॥ ८॥ [२४]

द्वयान्। अग्ने। रथिनः। विंशतिम्। गाः। वधूऽमतः। मघऽवा। मह्यम्। सम्ऽराट्।
अभिऽआवर्ती। चायमानः। ददाति। दुःऽनशा। इयम्। दक्षिणा। पार्थवानाम्॥ ८॥

[२८] [८ भरद्वाजो बार्हस्पत्यः। गावः; २, ८ इन्द्रो गावो वा। त्रिष्टुप्, २-४ जगती, ८ अनुष्टुप्।]

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः॥ १॥

आ। गावः। अग्मन्। उत। भद्रम्। अक्रन्। सीदन्तु। गोऽस्थे। रणयन्तु। अस्मे इति।
प्रजाऽवतीः। पुरुऽरूपाः। इह। स्युः। इन्द्राय। पूर्वीः। उषसः। दुहानाः॥ १॥

इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम्॥ २॥

इन्द्रः। यज्वने। पृणते। च। शिक्षति। उप। इत्। ददाति। न। स्वम्। मुषायति।
भूयःऽभूयः। रयिम्। इत्। अस्य। वर्धयन्। अभिन्ने। खिल्ये। नि। दधाति। देवऽयुम्॥ २॥

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति।
देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह॥ ३॥

न। ताः। नशन्ति। न। दभाति। तस्करः। न। आसाम्। आमित्रः। व्यथिः। आ। दधर्षति।
देवान्। च। याभिः। यजते। ददाति। च। ज्योक्। इत्। ताभिः। सचते। गोऽपतिः। सह॥ ३॥

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः॥ ४॥

न। ताः। अर्वा। रेणुऽककाटः। अश्नुते। न। संस्कृतऽत्रम्। उप। यन्ति। ताः। अभि।
उरुऽगायम्। अभयम्। तस्य। ताः। अनु। गावः। मर्तस्य। वि। चरन्ति। यज्वनः॥ ४॥

गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः।
इमा या गावः स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम्॥ ५॥

गावः। भगः। गावः। इन्द्रः। मे। अच्छान्। गावः। सोमस्य। प्रथमस्य। भक्षः।
इमाः। याः। गावः। सः। जनासः। इन्द्रः। इच्छामि। इत्। हृदा। मनसा। चित्। इन्द्रम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यू॒यं गा॑वो मेदयथा कृ॒शं चि॑दश्री॒रं चि॑त्कृणुथा सु॒प्रती॑कम्।

भ॒द्रं गृ॒हं कृ॑णुथ भद्रवाचो बृ॒हद्वो॒ वय॑ उच्यते स॒भासु॑॥ ६॥

यू॒यम्। गा॒वः॒। मे॒द॒य॒थ॒। कृ॒शम्। चि॒त्। अ॒श्री॒रम्। चि॒त्। कृ॒णु॒थ॒। सु॒ऽप्रती॑कम्।

भ॒द्रम्। गृ॒हम्। कृ॒णु॒थ॒। भ॒द्र॒ऽवा॒च॒ः। बृ॒हत्। व॒ः। वय॑ः। उ॒च्य॒ते॒। स॒भासु॑॥ ६॥

प्र॒जाव॑तीः सू॒यव॑सं रि॒शन्ती॑ः शु॒द्धा अ॒पः सु॑प्रपा॒णे पिब॑न्तीः।

मा व॑ः स्ते॒न ई॑शत॒ माघशं॑स॒ः परि॑ वो हे॒ती रु॒द्रस्य॑ वृ॒ज्याः॥ ७॥

प्र॒जाऽव॑तीः। सु॒ऽयव॑सम्। रि॒शन्ती॑ः। शु॒द्धाः। अ॒पः। सु॒ऽप्र॒पा॒ने। पिब॑न्तीः।

मा। व॒ः। स्ते॒नः। ई॒श॒त॒। मा। अ॒घऽशं॑सः। परि॑। व॒ः। हे॒तिः। रु॒द्रस्य॑। वृ॒ज्या॒ः॥ ७॥

उपे॒दमु॑प॒पर्च॑नमा॒सु गोषूप॑ पृच्यताम्। उप॑ ऋष॒भस्य॒ रेत॒स्युपे॑न्द्र॒ तव॑ वी॒र्ये॑॥ ८॥ [२५]

उप॑। इ॒दम्। उ॒प॒ऽपर्च॑नम्। आ॒सु। गोषु॑। उप। पृ॒च्य॒ता॒म्।

उप॑। ऋ॒ष॒भस्य॑। रेत॑सि। उप॑। इ॒न्द्र॒। तव॑। वी॒र्ये॑॥ ८॥

इत्याश्वलायन-संहितायां

चतुर्थाष्टके षष्ठोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ चतुर्थाष्टके सप्तमोध्यायः ॥

[२९] [६ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

इन्द्रं वो नरः सख्याय सेपुर्महो यन्तः सुमतये चकानाः।

महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वम्॥ १॥

इन्द्रम्। वः। नरः। सख्याय। सेपुः। महः। यन्तः। सुऽमतये। चकानाः।

महः। हि। दाता। वज्रऽहस्तः। अस्ति। महाम्। ऊँ इति। रण्वम्। अवसे। यजध्वम्॥ १॥

आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठाः।

आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः॥ २॥

आ। यस्मिन्। हस्ते। नर्याः। मिमिक्षुः। आ। रथे। हिरण्यये। रथेऽस्थाः।

आ। रश्मयः। गभस्त्योः। स्थूरयोः। आ। अध्वन्। अश्वासः। वृषणः। युजानाः॥ २॥

श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान्।

वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नृतविषिरो बभूथ॥ ३॥

श्रिये। ते। पादा। दुवः। आ। मिमिक्षुः। धृष्णुः। वज्री। शवसा। दक्षिणऽवान्।

वसानः। अत्कम्। सुरभिम्। दृशे। कम्। स्वः। न। नृतो इति। इषिरः। बभूथ॥ ३॥

स सोम आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते सन्ति धानाः।

इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः॥ ४॥

सः। सोमः। आमिश्लऽतमः। सुतः। भूत्। यस्मिन्। पक्तिः। पच्यते। सन्ति। धानाः।

इन्द्रम्। नरः। स्तुवन्तः। ब्रह्मऽकाराः। उक्था। शंसन्तः। देववातऽतमाः॥ ४॥

न ते अन्तः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा।

आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती॥ ५॥

न। ते। अन्तः। शवसः। धायि। अस्य। वि। तु। बाबधे। रोदसी इति। महिऽत्वा।

आ। ता। सूरिः। पृणति। तूतुजानः। यूथाऽइव। अप्ऽसु। सम्ऽईजमानः। ऊती॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ए॒वेदिन्द्र॑ सु॒हव॑ ऋ॒ष्वो अ॑स्तू॒ती अनू॑ती हिरिशि॒प्रः सत्वा॑।
ए॒वा हि जा॒तो अस॑मात्योजाः पु॒रू च॑ वृ॒त्रा ह॑नति॒ नि दस्यू॑न्॥ ६॥ [१]
ए॒व। इत्। इन्द्र॑ः। सु॒ऽहव॑ः। ऋ॒ष्वः। अ॒स्तु। ऊ॒ती। अनू॑ती। हि॒रि॒ऽशि॒प्रः। सत्वा॑।
ए॒व। हि। जा॒तः। अस॑मातिऽओजाः। पु॒रु। च॒। वृ॒त्रा। ह॒न॒ति॒। नि। दस्यू॑न्॥ ६॥

[३०] [५ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

भूय॒ इद्वा॑वृधे वी॒र्या॑य॒ँ एको॑ अजु॒र्यो द॑यते॒ वसू॑नि।
प्र रि॑रिचे दि॒व इन्द्र॑ः पृथि॒व्या अ॒र्धमिद॑स्य॒ प्रति॒ रोद॑सी उ॒भे॥ १॥
भूय॑ः। इत्। व॒वृ॒धे॒। वी॒र्या॑य। एक॑ः। अ॒जु॒र्य॑ः। द॒य॒ते॒। वसू॑नि।
प्र। रि॒रि॒चे॒। दि॒वः। इन्द्र॑ः। पृ॒थि॒व्याः। अ॒र्धम्। इत्। अ॒स्य॒। प्रति॑। रोद॑सी॒ इति॑। उ॒भे इति॑॥ १॥
अधा॑ मन्ये बृ॒हद॑सु॒र्य॑मस्य॒ यानि॑ दा॒धार॒ नकि॒रा मि॑नाति।
दि॒वेदि॑वे॒ सूर्यो॑ दर्श॒तो भू॒द्वि सद्मा॑न्युर्वि॒या सु॒क्रतु॑र्धात्॥ २॥
अध॑। म॒न्ये॒। बृ॒हत्। अ॒सु॒र्य॑म्। अ॒स्य॒। यानि॑। दा॒धार॑। नकि॑ः। आ। मि॒ना॒ति॒।
दि॒वेऽदि॑वे। सूर्य॑ः। द॒र्श॒तः। भू॒त्। वि। सद्मा॑नि। उ॒र्वि॒या। सु॒ऽक्रतु॑ः। धा॒त्॥ २॥
अ॒द्या चि॒न्नू चि॒त्तदपो॑ न॒दीनां॒ यदा॑भ्यो॒ अर॑दो गा॒तुमि॑न्द्र।
नि पर्व॑ता अद्म॒सदो॒ न से॑दुस्त्वया॑ दृ॒ळ्हानि॑ सुक्रतो॒ रजां॑सि॥ ३॥
अ॒द्य। चि॒त्। नु। चि॒त्। तत्। अप॑ः। न॒दीना॑म्। यत्। आ॒भ्यः॒। अर॑दः। गा॒तुम्। इ॒न्द्र॒।
नि। पर्व॑ताः। अ॒द्म॒ऽसद॑ः। न। से॒दुः॒। त्वया॑। दृ॒ळ्हानि॑। सु॒क्र॒तो॒ इति॑ सुऽक्रतो। रजां॑सि॥ ३॥
स॒त्यमित्तन्न त्वावाँ॑ अ॒न्यो अ॒स्तीन्द्र॑ दे॒वो न मर्त्यो॒ ज्याया॑न्।
अह॒न्नहिं॑ परि॒शया॑न॒मर्णोऽवा॑सृजो अ॒पो अच्छा॑ समु॒द्रम्॥ ४॥
स॒त्यम्। इत्। तत्। न। त्वाऽवा॑न्। अ॒न्यः। अ॒स्ति॒। इन्द्र॑। दे॒वः। न। मर्त्य॑ः। ज्याया॑न्।
अह॑न्। अहि॑म्। प॒रि॒ऽशया॑नम्। अर्ण॑ः। अव॑। अ॒सृ॒जः॒। अ॒पः। अच्छ॑। स॒मु॒द्रम्॥। ४॥
त्वम॒पो वि दुरो॒ विषू॑ची॒रिन्द्र॑ दृ॒ळ्हम॑रुजः॒ पर्व॑तस्य।
राजा॑भवो॒ जग॑तश्चर्षणी॒नां सा॒कं सूर्यं॑ ज॒नय॒न्द्यामु॒षास॑म्॥ ५॥ [२]
त्वम्। अ॒पः। वि। दुर॑ः। विषू॑ची। इन्द्र॑। दृ॒ळ्हम्। अ॒रु॒जः॒। पर्व॑तस्य।
राजा॑। अ॒भ॒वः॒। जग॑तः। च॒र्ष॒णी॒नाम्। सा॒कम्। सूर्य॑म्। ज॒नय॑न्। द्याम्। उ॒षस॑म्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३१] [५ सुहोत्रो भारद्वाजः। इन्द्रः। त्रिष्टुप्, ४ शक्वरी।]

अभू॒रेको॑ रयिपते र॒यी॒णामा हस्त॑योरधिथा इन्द्र कृ॒ष्टीः।

वि तो॒के अ॒प्सु तन॑ये च॒ सूरेऽवो॑चन्त चर्ष॒णयो॒ विवा॑चः॥ १॥

अभूः॑। एकः॑। र॒यि॒ऽप॒ते॒। र॒यी॒णाम्। आ। हस्त॑योः। अ॒धि॒थाः॒। इ॒न्द्र॒। कृ॒ष्टीः।

वि। तो॒के। अ॒प्ऽसु। तन॑ये। च॒। सूरे॑। अवो॑चन्त। च॒र्ष॒णयः॑। विऽवा॑चः॥ १॥

त्वद्भि॒येन्द्र॒ पार्थि॑वानि॒ विश्वाच्यु॑ता चिच्च्यावयन्ते॒ रजां॑सि।

द्यावा॒क्षामा॒ पर्व॑तासो॒ वना॑नि॒ विश्वं॑ दृ॒ळ्हं भ॑यते॒ अज्म॒न्ना ते॑॥ २॥

त्वत्। भि॒या। इ॒न्द्र॒। पार्थि॑वानि। विश्वा॑। अच्यु॑ता। चि॒त्। च्य॒व॒य॒न्ते॒। रजां॑सि।

द्यावा॒क्षामा॑। पर्व॑तासः। वना॑नि। विश्व॑म्। दृ॒ळ्हम्। भ॒य॒ते॒। अज्म॑न्। आ। ते॒॥ २॥

त्वं कुत्से॑ना॒भि शुष्ण॑मिन्द्रा॒शुषं॑ युध्य॒ कुय॑वं॒ गवि॑ष्टौ।

दशं॑ प्रपि॒त्वे अध॒ सूर्य॑स्य मुषा॒यश्च॒क्रमवि॑वे॒ रपां॑सि॥ ३॥

त्वम्। कुत्से॑न। अ॒भि। शुष्ण॑म्। इ॒न्द्र॒। अ॒शुष॑म्। यु॒ध्य॒। कुय॑वम्। गोऽइ॑ष्टौ।

दशं॑। प्र॒ऽपि॒त्वे। अधं॑। सूर्य॑स्य। मु॒षा॒यः। च॒क्रम्। अवि॑वेः। रपां॑सि॥ ३॥

त्वं श॒तान्यव॒ शम्ब॑रस्य॒ पुरो॑ जघन्थाप्र॒तीनि॒ दस्योः॑।

अशि॑क्षो॒ यत्र॒ शच्या॑ शचीवो॒ दिवो॑दासाय सुन्व॒ते सु॑तक्रे भ॒रद्वा॑जाय गृण॒ते वसू॑नि॥ ४॥

त्वम्। श॒तानि॑। अव॑। शम्ब॑रस्य। पुरः॑। ज॒घ॒न्थ॒। अ॒प्र॒तीनि॑। दस्योः॑॥ अशि॑क्षः। यत्र॑। शच्या॑।

श॒ची॒ऽव॒ः। दिवः॑ऽदासाय। सु॒न्व॒ते। सु॒त॒ऽक्रे॒। भ॒र॒त्ऽवा॑जाय। गृ॒ण॒ते। वसू॑नि॥ ४॥

स स॑त्यसत्वन्मह॒ते रणा॑य॒ रथ॒मा ति॑ष्ठ तुविनृम्ण भी॒मम्।

या॒हि प्र॑पथि॒न्नव॒सोप॑ म॒द्रिक्प्र च॑ श्रुत श्रावय चर्ष॒णिभ्यः॑॥ ५॥ [३]

सः। स॒त्य॒ऽस॒त्व॒न्। म॒ह॒ते। रणा॑य। रथ॑म्। आ। ति॒ष्ठ॒। तु॒वि॒ऽनृ॒म्ण॒। भी॒मम्।

या॒हि। प्र॒ऽप॒थि॒न्। अव॑सा। उप॑। म॒द्रिक्। प्र। च॒। श्रु॒त॒। श्र॒व॒य॒। च॒र्ष॒णि॒ऽभ्यः॑॥ ५॥

[३२] [५ सुहोत्रो भारद्वाजः। इन्द्रः। त्रिष्टुप्।]

अपू॑र्व्या पुरु॒तमा॑न्यस्मै म॒हे वी॒राय॑ त॒वसे॑ तु॒राय॑।

वि॒र॒प्शिने॑ व॒ज्रिणे॒ शंत॑मानि॒ वचां॑स्या॒सा स्थवि॑राय तक्षम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपूर्व्या। पुरुऽतमानि। अस्मै। महे। वीराय। तवसे। तुराय।

विऽरप्शिने। वज्रिणे। शम्ऽतमानि। वचांसि। आसा। स्थविराय। तक्षम्॥ १॥

स मातरा सूर्येणा कवीनामवासयद्रुजदद्रिं गृणानः।

स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानम्॥ २॥

सः। मातरा। सूर्येण। कवीनाम्। अवासयत्। रुजत्। अद्रिम्। गृणानः।

सुऽआधीभिः। ऋक्वऽभिः। वावशानः। उत्। उस्रियाणाम्। असृजत्। निऽदानम्॥ २॥

स वह्निभिर्ऋक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय।

पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः सन्॥ ३॥

सः। वह्निऽभिः। ऋक्वऽभिः। गोषु। शश्वत्। मितज्ञुऽभिः। पुरुऽकृत्वा। जिगाय।

पुरः। पुरःऽहा। सखिऽभिः। सखीऽयन्। दृळ्हाः। रुरोज। कविऽभिः। कविः। सन्॥ ३॥

स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः।

पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि॥ ४॥

सः। नीव्याभिः। जरितारम्। अच्छ। महः। वाजेभिः। महत्ऽभिः। च। शुष्मैः।

पुरुऽवीराभिः। वृषभ। क्षितीनाम्। आ। गिर्वणः। सुविताय। प्र। याहि॥ ४॥

स सर्गेण शवसा तक्तो अत्यैरप इन्द्रो दक्षिणतस्तुराषाट्।

इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम्॥ ५॥ [४]

सः। सर्गेण। शवसा। तक्तः। अत्यैः। अपः। इन्द्रः। दक्षिणतः। तुराषाट्।

इत्था। सृजानाः। अनपऽवृत्। अर्थम्। दिवेऽदिवे। विविषुः। अप्रऽमृष्यम्॥ ५॥

[३३] [५ शुनहोत्रो भारद्वाजः। इन्द्रः। त्रिष्टुप्।]

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान्।

सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सासहदमित्रान्॥ १॥

यः। ओजिष्ठः। इन्द्र। तम्। सु। नः। दाः। मदः। वृषन्। सुऽअभिष्टिः। दास्वान्।

सौवश्व्यम्। यः। वनवत्। सुऽअश्वः। वृत्रा। समत्ऽसु। ससहत्। अमित्रान्॥ १॥

त्वां ही३न्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ।

त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वाम्। हि। इन्द्र। अवसे। विऽवाचः। हवन्ते। चर्षणयः। शूरऽसातौ।

त्वम्। विप्रेभिः। वि। पणीन्। अशायः। त्वाऽऊतः। इत्। सनिता। वाजम्। अर्वा॥ २॥

त्वं ताँ इन्द्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर।

वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम॥ ३॥

त्वम्। तान्। इन्द्र। उभयान्। अमित्रान्। दासा। वृत्राणि। आर्या। च। शूर।

वधीः। वनाऽइव। सुऽधितेभिः। अत्कैः। पृत्ऽसु। दर्षि। नृणाम्। नृऽतम॥ ३॥

स त्वं न इन्द्राकवाभिरूती सखा विश्वायुरविता वृधे भूः।

स्वर्षाता यद्ध्वयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर॥ ४॥

सः। त्वम्। नः। इन्द्र। अकवाभिः। ऊती। सखा। विश्वऽआयुः। अविता। वृधे। भूः।

स्वःऽसाता। यत्। ह्वयामसि। त्वा। युध्यन्तः। नेमऽधिता। पृत्ऽसु। शूर॥ ४॥

नूनं न इन्द्रापराय च स्या भवा मृळीक उत नो अभिष्टौ।

इत्था गृणन्तो महिनस्य शर्मन्दिवि ष्याम पार्ये गोषतमाः॥ ५॥ [५]

नूनम्। नः। इन्द्र। अपराय। च। स्याः। भव। मृळीकः। उत। नः। अभिष्टौ।

इत्था। गृणन्तः। महिनस्य। शर्मन्। दिवि। स्याम। पार्ये। गोसऽतमाः॥ ५॥

[३४] [५ शुनहोत्रो भारद्वाजः। इन्द्रः। त्रिष्टुप्।]

सं च त्वे जग्मुर्गिर इन्द्र पूर्वीर्वि च त्वद्यन्ति विभ्वो मनीषाः।

पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्का॥ १॥

सम्। च। त्वे इति। जग्मुः। गिरः। इन्द्र। पूर्वीः। वि। च। त्वत्। यन्ति। विऽभ्वः। मनीषाः।

पुरा। नूनम्। च। स्तुतयः। ऋषीणाम्। पस्पृध्रे। इन्द्रे। अधि। उक्थऽअर्का॥ १॥

पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः।

रथो न महे शवसे युजानो३स्माभिरिन्द्रो अनुमाद्यो भूत्॥ २॥

पुरुऽहूतः। यः। पुरुऽगूर्तः। ऋभ्वा। एकः। पुरुऽप्रशस्तः। अस्ति। यज्ञैः।

रथः। न। महे। शवसे। युजानः। अस्माभिः। इन्द्रः। अनुऽमाद्यः। भूत्॥ २॥

न यं हिंसन्ति धीतयो न वाणीरिन्द्रं नक्षन्तीदभि वर्धयन्तीः।

यदि स्तोतारः शतं यत्सहस्रं गृणन्ति गिर्वणसं शं तदस्मै॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न। यम्। हिंसन्ति। धीतयः। न। वाणीः। इन्द्रम्। नक्षन्ति। इत्। अभि। वर्धयन्तीः।

यदि। स्तोतारः। शतम्। यत्। सहस्रम्। गृणन्ति। गिर्वणसम्। शम्। तत्। अस्मै ॥ ३ ॥

अस्मा एतद्दिव्य१र्चेव मासा मिमिक्ष इन्द्रे न्ययामि सोमः।

जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥ ४ ॥

अस्मै। एतत्। दिवि। अर्चाऽइव। मासा। मिमिक्षः। इन्द्रे। नि। अयामि। सोमः।

जनम्। न। धन्वन्। अभि। सम्। यत्। आपः। सत्राः। ववृधुः। हवनानि। यज्ञैः ॥ ४ ॥

अस्मा एतन्मह्याङ्गूषमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि।

असद्यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च ॥ ५ ॥ [६]

अस्मै। एतत्। महि। आङ्गूषम्। अस्मै। इन्द्राय। स्तोत्रम्। मतिऽभिः। अवाचि।

असत्। यथा। महति। वृत्रऽतूर्ये। इन्द्रः। विश्वऽआयुः। अविता। वृधः। च ॥ ५ ॥

[३५] [५ नरो भारद्वाजः। इन्द्रः। त्रिष्टुप्।]

कदा भुवन्रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः।

कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः ॥ १ ॥

कदा। भुवन्। रथऽक्षयाणि। ब्रह्म। कदा। स्तोत्रे। सहस्रऽपोष्यम्। दाः।

कदा। स्तोमम्। वासयः। अस्य। राया। कदा। धियः। करसि। वाजऽरत्नाः ॥ २ ॥

कर्हि स्वित्तदिन्द्र यन्नृभिर्नॄन्वीरैर्वीरान्नीळयासे जयाजीन्।

त्रिधातु गा अधि जयासि गोष्विन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥ २ ॥

कर्हि। स्वित्। तत्। इन्द्र। यत्। नृऽभिः। नॄन्। वीरैः। वीरान्। नीळयासे। जय। आजीन्।

त्रिऽधातु। गाः। अधि। जयासि। गोषु। इन्द्र। द्युम्नम्। स्वःऽवत्। धेहि। अस्मे इति ॥ २ ॥

कर्हि स्वित्तदिन्द्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ।

कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥ ३ ॥

कर्हि। स्वित्। तत्। इन्द्र। यत्। जरित्रे। विश्वऽप्सु। ब्रह्म। कृणवः। शविष्ठ।

कदा। धियः। न। निऽयुतः। युवासे। कदा। गोऽमघा। हवनानि। गच्छाः ॥ ३ ॥

स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः।

पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। गोऽमघाः। जरित्रे। अश्वऽचन्द्राः। वाजऽश्रवसः। अधि। धेहि। पृक्षः।
पीपिहि। इषः। सुऽदुघाम्। इन्द्र। धेनुम्। भरत्ऽवाजेषु। सुऽरुचः। रुरुच्याः॥ ४॥

तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे।
मा निररं शुक्रदुघस्य धेनोराङ्गिरसान्ब्रह्मणा विप्र जिन्व॥ ५॥ [७]
तम्। आ। नूनम्। वृजनम्। अन्यथा। चित्। शूरः। यत्। शक्र। वि। दुरः। गृणीषे।
मा। निः। अरम्। शुक्रऽदुघस्य। धेनोः। आङ्गिरसान्। ब्रह्मणा। विप्र। जिन्व॥ ५॥

[३६] [५ नरो भारद्वाजः। इन्द्रः। त्रिष्टुप्।]

सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः।
सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यम्॥ १॥
सत्रा। मदासः। तव। विश्वऽजन्याः। सत्रा। रायः। अध। ये। पार्थिवासः।
सत्रा। वाजानाम्। अभवः। विऽभक्ता। यत्। देवेषु। धारयथाः। असुर्यम्॥ १॥

अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय।
स्यूमगृभे दुधयेऽर्वते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये॥ २॥
अनु। प्र। येजे। जनः। ओजः। अस्य। सत्रा। दधिरे। अनु। वीर्याय।
स्यूमऽगृभे। दुधये। अर्वते। च। क्रतुम्। वृञ्जन्ति। अपि। वृत्रऽहत्ये॥ २॥

तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिन्द्रम्।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति॥ ३॥
तम्। सध्रीचीः। ऊतयः। वृष्ण्यानि। पौंस्यानि। निऽयुतः। सश्चुः। इन्द्रम्।
समुद्रम्। न। सिन्धवः। उक्थऽशुष्माः। उरुऽव्यचसम्। गिरः। आ। विशन्ति॥ ३॥

स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः।
पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा॥ ४॥
सः। रायः। खाम्। उप। सृज। गृणानः। पुरुऽचन्द्रस्य। त्वम्। इन्द्र। वस्वः।
पतिः। बभूथ। असमः। जनानाम्। एकः। विश्वस्य। भुवनस्य। राजा॥ ४॥

स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः॥ ५॥ [८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। तु। श्रुधि। श्रुत्या। यः। दुवःऽयुः। द्यौः। न। भूम। अभि। रायः। अर्यः।

असः। यथा। नः। शवसा। चकानः। युगेऽयुगे। वयसा। चेकितानः॥ ५॥

[३७] [५ भारद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

अर्वाग्रथं विश्ववारं त उग्रेन्द्र युक्तासो हरयो वहन्तु।

कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य॥ १॥

अर्वाक्। रथम्। विश्वऽवारम्। ते। उग्र। इन्द्र। युक्तासः। हरयः। वहन्तु।

कीरिः। चित्। हि। त्वा। हवते। स्वःऽवान्। ऋधीमहि। सधऽमादः। ते। अद्य॥ १॥

प्रो द्रोणे हरयः कर्मांग्मन्पुनानास ऋज्यन्तो अभूवन्।

इन्द्रो नो अस्य पूर्व्यः पपीयाद् द्युक्षो मदस्य सोम्यस्य राजा॥ २॥

प्रो इति। द्रोणे। हरयः। कर्म। अग्मन्। पुनानासः। ऋज्यन्तः। अभूवन्।

इन्द्रः। नः। अस्य। पूर्व्यः। पपीयात्। द्युक्षः। मदस्य। सोम्यस्य। राजा॥ २॥

आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः।

अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत्॥ ३॥

आऽसस्राणासः। शवसानम्। अच्छ। इन्द्रम्। सुऽचक्रे। रथ्यासः। अश्वाः।

अभि। श्रवः। ऋज्यन्तः। वहेयुः। नु। चित्। नु। वायोः। अमृतम्। वि। दस्येत्॥ ३॥

वरिष्ठो अस्य दक्षिणामियर्तीन्द्रो मघोनां तुविकूर्मितमः।

यया वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन्॥ ४॥

वरिष्ठः। अस्य। दक्षिणाम्। इयर्ति। इन्द्रः। मघोनाम्। तुविकूर्मिऽतमः।

यया। वज्रिऽवः। परिऽयासि। अंहः। मघा। च। धृष्णो इति। दयसे। वि। सूरीन्॥ ४॥

इन्द्रो वाजस्य स्थविरस्य दातेन्द्रो गीर्भिर्वर्धतां वृद्धमहाः।

इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः॥ ५॥ [९]

इन्द्रः। वाजस्य। स्थविरस्य। दाता। इन्द्रः। गीःऽभिः। वर्धताम्। वृद्धऽमहाः।

इन्द्रः। वृत्रम्। हनिष्ठः। अस्तु। सत्वा। आ। ता। सूरिः। पृणति। तूतुजानः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३८] [५ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

अपादित उदु नश्चित्रतमो महीं भर्षद् द्युमतीमिन्द्रहूतिम्।
पन्यसीं धीतिं दैव्यस्य यामञ्जनस्य रातिं वनते सुदानुः॥ १॥

अपात्। इतः। उत्। ऊँ इति। नः। चित्रऽतमः। महीम्। भर्षत्। द्युऽमतीम्। इन्द्रऽहूतिम्।
पन्यसीम्। धीतिम्। दैव्यस्य। यामन्। जनस्य। रातिम्। वनते। सुऽदानुः॥ १॥

दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः।
एयमेन देवहूतिर्ववृत्यान्मद्र्य१गिन्द्रमियमृच्यमाना॥ २॥

दूरात्। चित्। आ। वसतः। अस्य। कर्णा। घोषात्। इन्द्रस्य। तन्यति। ब्रुवाणः।
आ। इयम्। एनम्। देवऽहूतिः। ववृत्यात्। मद्र्यक्। इन्द्रम्। इयम्। ऋच्यमाना॥ २॥

तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः।
ब्रह्मा च गिरो दधिरे समस्मिन्महांश्च स्तोमो अधि वर्धदिन्द्रे॥ ३॥

तम्। वः। धिया। परमया। पुराऽजाम्। अजरम्। इन्द्रम्। अभि। अनूषि। अर्कैः।
ब्रह्म। च। गिरः। दधिरे। सम्। अस्मिन्। महान्। च। स्तोमः। अधि। वर्धत्। इन्द्रे॥ ३॥

वर्धाद्यं यज्ञ उत सोम इन्द्रं वर्धाद् ब्रह्म गिर उक्था च मन्म।
वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः शरदो द्याव इन्द्रम्॥ ४॥

वर्धात्। यम्। यज्ञः। उत। सोमः। इन्द्रम्। वर्धात्। ब्रह्म। गिरः। उक्था। च। मन्म।
वर्ध। अह। एनम्। उषसः। यामन्। अक्तोः। वर्धान्। मासाः। शरदः। द्यावः। इन्द्रम्॥ ४॥

एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय।
महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु॥ ५॥ [१०]

एव। जज्ञानम्। सहसे। असामि। ववृधानम्। राधसे। च। श्रुताय।
महाम्। उग्रम्। अवसे। विप्र। नूनम्। आ। विवासेम। वृत्रऽतूर्येषु॥ ५॥

[३९] [५ भरद्वाजो बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्।]

मन्द्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः।
अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मन्द्रस्य। कवेः। दिव्यस्य। वह्नेः। विप्रऽमन्मनः। वचनस्य। मध्वः।

अपाः। नः। तस्य। सचनस्य। देव। इषः। युवस्व। गृणते। गोऽअग्राः॥ १॥

अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः।

रुजदरुग्णं वि वलस्य सानुं पणींर्वचोभिरभि योधदिन्द्रः॥ २॥

अयम्। उशानः। परि। अद्रिम्। उस्राः। ऋतधीतिऽभिः। ऋतऽयुक्। युजानः।

रुजत्। अरुग्णम्। वि। वलस्य। सानुम्। पणीन्। वचःऽभिः। अभि। योधत्। इन्द्रः॥ २॥

अयं द्योतयदद्युतो व्य१क्तून्दोषा वस्तोः शरद इन्दुरिन्द्र।

इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार॥ ३॥

अयम्। द्योतयत्। अद्युतः। वि। अक्तून्। दोषा। वस्तोः। शरदः। इन्दुः। इन्द्र।

इमम्। केतुम्। अदधुः। नु। चित्। अह्नाम्। शुचिऽजन्मनः। उषसः। चकार॥ ३॥

अयं रोचयदरुचो रुचानो३यं वासयद्व्यृ१तेन पूर्वीः।

अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः॥ ४॥

अयम्। रोचयत्। अरुचः। रुचानः। अयम्। वासयत्। वि। ऋतेन। पूर्वीः।

अयम्। ईयते। ऋतयुक्ऽभिः। अश्वैः। स्वःऽविदा। नाभिना। चर्षणिऽप्राः॥ ४॥

नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः।

अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि॥ ५॥ [११]

नु। गृणानः। गृणते। प्रत्न। राजन्। इषः। पिन्व। वसुऽदेयाय। पूर्वीः।

अपः। ओषधीः। अविषा। वनानि। गाः। अर्वतः। नॄन्। ऋचसे। रिरीहि॥ ५॥

[४०] [५ भरद्वाजो बार्हस्पत्यः। इन्द्र। त्रिष्टुप्।]

इन्द्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखाया।

उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः॥ १॥

इन्द्र। पिब। तुभ्यम्। सुतः। मदाय। अव। स्य। हरी इति। वि। मुच। सखाया।

उत। प्र। गाय। गणे। आ। निऽसद्य। अथ। यज्ञाय। गृणते। वयः। धाः॥ १॥

अस्य पिब यस्य जज्ञान इन्द्र मदाय क्रत्वे अपिबो विरप्शिन्।

तमु ते गावो नर आपो अद्रिरिन्दुं समह्यन्पीतये समस्मै॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्य । पिब । यस्य । जज्ञानः । इन्द्र । मदाय । क्रत्वे । अपिबः । विर॰प्शिन् ।

तम् । ऊँ इति । ते । गावः । नरः । आपः । अद्रिः । इन्दुम् । सम् । अह्यन् । पीतये । सम् । अस्मै ॥ २ ॥

समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः ।

त्वायता मनसा जोहवीमीन्द्रा याहि सुवितायं महे नः ॥ ३ ॥

सम्॰इद्धे । अग्नौ । सुते । इन्द्र । सोमे । आ । त्वा । वहन्तु । हरयः । वहिष्ठाः ।

त्वा॰यता । मनसा । जोहवीमि । इन्द्र । आ । याहि । सुवितायं । महे । नः ॥ ३ ॥

आ याहि शश्वदुशता ययाथेन्द्र महा मनसा सोमपेयम् ।

उप ब्रह्माणि शृणव इमा नोऽथा ते यज्ञस्तन्वे३ वयो धात् ॥ ४ ॥

आ । याहि । शश्वत् । उशता । ययाथ । इन्द्र । महा । मनसा । सोम॰पेयम् ।

उप । ब्रह्माणि । शृणवः । इमा । नः । अथ । ते । यज्ञः । तन्वे । वयः । धात् ॥ ४ ॥

यदिन्द्र दिवि पार्ये यदृधग्यद्वा स्वे सदने यत्र वासि ।

अतो नो यज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः ॥ ५ ॥ [१२]

यत् । इन्द्र । दिवि । पार्ये । यत् । ऋधक् । यत् । वा । स्वे । सदने । यत्र । वा । असि ।

अतः । नः । यज्ञम् । अवसे । नियुत्वान् । स॰जोषाः । पाहि । गिर्वणः । मरुत्॰भिः ॥ ५ ॥

[४१] [५ भरद्वाजो बार्हस्पत्यः । इन्द्रः । त्रिष्टुप् ।]

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।

गावो न वज्रिन्त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥ १ ॥

अहेळमानः । उप । याहि । यज्ञम् । तुभ्यम् । पवन्ते । इन्दवः । सुतासः ।

गावः । न । वज्रिन् । स्वम् । ओकः । अच्छ । इन्द्र । आ । गहि । प्रथमः । यज्ञियानाम् ॥ १ ॥

या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिम् ।

तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिन्द्र गव्युः ॥ २ ॥

या । ते । काकुत् । सु॰कृता । या । वरिष्ठा । यया । शश्वत् । पिबसि । मध्वः । ऊर्मिम् ।

तया । पाहि । प्र । ते । अध्वर्युः । अस्थात् । सम् । ते । वज्रः । वर्तताम् । इन्द्र । गव्युः ॥ २ ॥

एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे समकारि सोमः ।

एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एषः। द्रप्सः। वृषभः। विश्वऽरूपः। इन्द्राय। वृष्णे। सम्। अकारि। सोमः।

एतम्। पिब। हरिऽवः। स्थातः। उग्र। यस्य। ईशिषे। प्रऽदिवि। यः। ते। अन्नम्॥ ३॥

सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्चिकितुषे रणाय।

एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व॥ ४॥

सुतः। सोमः। असुतात्। इन्द्र। वस्यान्। अयम्। श्रेयान्। चिकितुषे। रणाय।

एतम्। तितिर्वः। उप। याहि। यज्ञम्। तेन। विश्वाः। तविषीः। आ। पृणस्व॥ ४॥

ह्वयामसि त्वेन्द्र याह्यर्वाङरं ते सोमस्तन्वे भवाति।

शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु॥ ५॥ [१३]

ह्वयामसि। त्वा। आ। इन्द्र। याहि। अर्वाङ्। अरम्। ते। सोमः। तन्वे। भवाति।

शतक्रतो इति शतऽक्रतो। मादयस्व। सुतेषु। प्र। अस्मान्। अव। पृतनासु। प्र। विक्षु॥ ५॥

[४२] [४ भरद्वाजो बार्हस्पत्यः। इन्द्रः। अनुष्टुप्, ४ बृहती।]

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर। अरंगमाय जग्मयेऽपश्चाद्दध्वने नरे॥ १॥

प्रति। अस्मै। पिपीषते। विश्वानि। विदुषे। भर।

अरम्ऽगमाय। जग्मये। अपश्चात्ऽदध्वने। नरे॥ १॥

एमेनं प्रत्येतन सोमेभिः सोमपातमम्। अमत्रेभिर्ऋजीषिणमिन्द्रं सुतेभिरिन्दुभिः॥ २॥

आ। ईम्। एनम्। प्रतिऽएतन। सोमेभिः। सोमऽपातमम्।

अमत्रेभिः। ऋजीषिणम्। इन्द्रम्। सुतेभिः। इन्दुऽभिः॥ २॥

यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ। वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते॥ ३॥

यदि। सुतेभिः। इन्दुऽभिः। सोमेभिः। प्रतिऽभूषथ।

वेद। विश्वस्य। मेधिरः। धृषत्। तम्ऽतम्। इत्। आ। ईषते॥ ३॥

अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम्।

कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत्॥ ४॥ [१४]

अस्मैऽअस्मै। इत्। अन्धसः। अध्वर्यो इति। प्र। भर। सुतम्।

कुवित्। समस्य। जेन्यस्य। शर्धतः। अभिऽशस्तेः। अवऽस्परत्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[४३] [४ भरद्वाजो बार्हस्पत्यः। इन्द्रः। उष्णिक्।]

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयः। अयं स सोम इन्द्र ते सुतः पिब॥ १॥

यस्य। त्यत्। शम्बरम्। मदे। दिवःऽदासाय। रन्धयः।

अयम्। सः। सोमः। इन्द्र। ते। सुतः। पिब॥ १॥

यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे। अयं स सोम इन्द्र ते सुतः पिब॥ २॥

यस्य। तीव्रऽसुतम्। मदम्। मध्यम्। अन्तम्। च। रक्षसे।

अयम्। सः। सोमः। इन्द्र। ते। सुतः। पिब॥ २॥

यस्य गा अन्तरश्मनो मदे दृळ्हा अवासृजः। अयं स सोम इन्द्र ते सुतः पिब॥ ३॥

यस्य। गाः। अन्त। अश्मनः। मदे। दृळ्हाः। अवऽअसृजः।

अयम्। सः। सोमः। इन्द्र। ते। सुतः। पिब॥ ३॥

यस्य मन्दानो अन्धसो माघोनं दधिषे शवः। अयं स सोम इन्द्र ते सुतः पिब॥ ४॥ [१५] {३}

यस्य। मन्दानः। अन्धसः। माघोनम्। दधिषे। शवः।

अयम्। सः। सोमः। इन्द्र। ते। सुतः। पिब॥ ४॥

[४४] [२७ शंयुर्बार्हस्पत्यः। इन्द्रः। त्रिष्टुप्, १-६ अनुष्टुभः, ८ विराट्]

यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः। सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः॥ १॥

यः। रयिऽवः। रयिम्ऽतमः। यः। द्युम्नैः। द्युम्नवत्ऽतमः।

सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः॥ १॥

यः शग्मस्तुविशग्म ते रायो दामा मतीनाम्। सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः॥ २॥

यः। शग्मः। तुविऽशग्म। ते। रायः। दामा। मतीनाम्।

सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः॥ २॥

येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः। सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः॥ ३॥

येन। वृद्धः। न। शवसा। तुरः। न। स्वाभिः। ऊतिऽभिः।

सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः॥ ३॥

त्यमु वो अप्रहणं गृणीषे शवसस्पतिम्। इन्द्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्यम्। ऊँ इति। वः। अप्रऽहनम्। गृणीषे। शवसः। पतिम्।

इन्द्रम्। विश्वऽसहम्। नरम्। मंहिष्ठम्। विश्वऽचर्षणिम्॥ ४॥

यं वर्धयन्तीद्गिरः पतिं तुरस्य राधसः। तमिन्न्वस्य रोदसी देवी शुष्मं सपर्यतः॥ ५॥ [१६]

यम्। वर्धयन्ति। इत्। गिरः। पतिम्। तुरस्य। राधसः।

तम्। इत्। नु। अस्य। रोदसी इति। देवी इति। शुष्मम्। सपर्यतः॥ ५॥

तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि। विपो न यस्योतयो वि यद्रोहन्ति सक्षितः॥ ६॥

तत्। वः। उक्थस्य। बर्हणा। इन्द्राय। उपऽस्तृणीषणि।

विपः। न। यस्य। ऊतयः। वि। यत्। रोहन्ति। सऽक्षितः॥ ६॥

अविदद्दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत्।

ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः॥ ७॥

अविदत्। दक्षम्। मित्रः। नवीयान्। पपानः। देवेभ्यः। वस्यः। अचैत्।

ससऽवान्। स्तौलाभिः। धौतरीभिः। उरुष्या। पायुः। अभवत्। सखिऽभ्यः॥ ७॥

ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन्।

दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः॥ ८॥

ऋतस्य। पथि। वेधाः। अपायि। श्रिये। मनांसि। देवासः। अक्रन्।

दधानः। नाम। महः। वचःऽभि। वपुः। दृशये। वेन्यः। वि। आवरित्यावः॥ ८॥

द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः।

वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि॥ ९॥

द्युमत्ऽतमम्। दक्षम्। धेहि। अस्मे इति। सेध। जनानाम्। पूर्वीः। अरातीः।

वर्षीयः। वयः। कृणुहि। शचीभिः। धनस्य। सातौ। अस्मान्। अविड्ढि॥ ९॥

इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः।

नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः॥ १०॥ [१७]

इन्द्र। तुभ्यम्। इत्। मघऽवन्। अभूम। वयम्। दात्रे। हरिऽवः। मा। वि। वेनः।

नकिः। आपिः। ददृशे। मर्त्यऽत्रा। किम्। अङ्ग। रध्रऽचोदनम्। त्वा। आहुः॥ १०॥

मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम।

पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा। जस्वने। वृषभ। नः। ररीथाः। मा। ते। रेवतः। सख्ये। रिषाम।

पूर्वीः। ते। इन्द्र। निःऽसिधः। जनेषु। जहि। असुस्वीन्। प्र। वृह। अपृणतः॥ ११॥

उदभ्राणीव स्तनयन्नियर्तीन्द्रो राधांस्यश्व्यानि गव्या।

त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः॥ १२॥

उत्। अभ्राणिऽइव। स्तनयन्। इयर्ति। इन्द्रः। राधांसि। अश्व्यानि। गव्या।

त्वम्। असि। प्रऽदिवः। कारुऽधायाः। मा। त्वा। अदामानः। आ। दभन्। मघोनः॥ १२॥

अध्वर्यो वीर प्र महे सुतानामिन्द्राय भर स ह्यस्य राजा।

यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणाम्॥ १३॥

अध्वर्यो इति। वीर। प्र। महे। सुतानाम्। इन्द्राय। भर। सः। हि। अस्य। राजा।

यः। पूर्व्याभिः। उत। नूतनाभिः। गीःऽभिः। ववृधे। गृणताम्। ऋषीणाम्॥ १३॥

अस्य मदे पुरु वर्पांसि विद्वानिन्द्रो वृत्राण्यप्रती जघान।

तमु प्र होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै॥ १४॥

अस्य। मदे। पुरु। वर्पांसि। विद्वान्। इन्द्रः। वृत्राणि। अप्रति। जघान।

तम्। ऊँ इति। प्र। होषि। मधुऽमन्तम्। अस्मै। सोमम्। वीराय। शिप्रिणे। पिबध्यै॥ १४॥

पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः।

गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः॥ १५॥ [१८]

पाता। सुतम्। इन्द्रः। अस्तु। सोमम्। हन्ता। वृत्रम्। वज्रेण। मन्दसानः।

गन्ता। यज्ञम्। पराऽवतः। चित्। अच्छ। वसुः। धीनाम्। अविता। कारुऽधायाः॥ १५॥

इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि।

मत्सद्यथा सौमनसाय देवं व्य१स्मद्द्वेषो युयवद्व्यंहः॥ १६॥

इदम्। त्यत्। पात्रम्। इन्द्रऽपानम्। इन्द्रस्य। प्रियम्। अमृतम्। अपायि।

मत्सत्। यथा। सौमनसाय। देवम्। वि। अस्मत्। द्वेषः। युयवत्। वि। अंहः॥ १६॥

एना मन्दानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान्।

अभिषेणाँ अभ्या३देदिशानान्पराच इन्द्र प्र मृणा जही च॥ १७॥

एना। मन्दानः। जहि। शूर। शत्रून्। जामिम्। अजामिम्। मघऽवन्। अमित्रान्।

अभिऽसेनान्। अभि। आऽदेदिशानान्। पराचः। इन्द्र। प्र। मृण। जहि। च॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आसु ष्मा णो मघवन्निन्द्र पृत्स्वस्मभ्यं महि वरिवः सुगं कः।

अपां तोकस्य तनयस्य जेष इन्द्र सूरीन्कृणुहि स्मा नो अर्धम्॥ १८॥

आसु। स्म। नः। मघऽवन्। इन्द्र। पृत्ऽसु। अस्मभ्यम्। महि। वरिवः। सुऽगम्। करिति कः।

अपाम्। तोकस्य। तनयस्य। जेषे। इन्द्र। सूरीन्। कृणुहि। स्म। नः। अर्धम्॥ १८॥

आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः।

अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु॥ १९॥

आ। त्वा। हरयः। वृषणः। युजानाः। वृषऽरथासः। वृषऽरश्मयः। अत्याः।

अस्मत्राञ्चः। वृषणः। वज्रऽवाहः। वृष्णे। मदाय। सुऽयुजः। वहन्तु॥ १९॥

आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदन्तः।

इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम्॥ २०॥ [१९]

आ। ते। वृषन्। वृषणः। द्रोणम्। अस्थुः। घृतऽप्रुषः। न। ऊर्मयः। मदन्तः।

इन्द्र। प्र। तुभ्यम्। वृषऽभिः। सुतानाम्। वृष्णे। भरन्ति। वृषभाय। सोमम्॥ २०॥

वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम्।

वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय॥ २१॥

वृषा। असि। दिवः। वृषभः। पृथिव्याः। वृषा। सिन्धूनाम्। वृषभः। स्तियानाम्।

वृष्णे। ते। इन्दुः। वृषभ। पीपाय। स्वादुः। रसः। मधुऽपेयः। वराय॥ २१॥

अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत्।

अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः॥ २२॥

अयम्। देवः। सहसा। जायमानः। इन्द्रेण। युजा। पणिम्। अस्तभायत्।

अयम्। स्वस्य। पितुः। आयुधानि। इन्दुः। अमुष्णात्। अशिवस्य। मायाः॥ २२॥

अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः।

अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळ्हम्॥ २३॥

अयम्। अकृणोत्। उषसः। सुऽपत्नीः। अयम्। सूर्ये। अदधात्। ज्योतिः। अन्तरिति।

अयम्। त्रिऽधातु। दिवि। रोचनेषु। त्रितेषु। विन्दत्। अमृतम्। निऽगूळ्हम्॥ २३॥

अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिम्।

अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम्॥ २४॥ (२०)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयम्। द्यावापृथिवी इति। वि। स्कभायत्। अयम्। रथम्। अयुनक्। सप्तऽरश्मिम्।
अयम्। गोषु। शच्या। पक्वम्। अन्तरिति। सोमः। दाधार। दशऽयन्त्रम्। उत्सम्॥ २४॥

चक्षुश्च श्रोत्रं च मनश्च वाक् च प्राणापानौ देह इदं शरीरम्।
द्वौ प्रत्यञ्चावनुलोमौ विसर्गावेतं तं मन्ये दशयन्त्रमुत्सम्॥ २५॥ ★

चक्षुः। च। श्रोत्रम्। च। मनः। च। वाक्। च। प्राणापानौ। देहः। इदम्। शरीरम्।
द्वौ। प्रत्यञ्चौ। अनुऽलोमौ। विऽसर्गौ। एतम्। तम्। मन्ये। दशऽयन्त्रम्। उत्सम्॥ २५॥

उरश्च पृष्ठश्च करौ च बाहू जंघे चोरू उदरं शिरश्च।
रोमाणि मांसं रुधिरास्थिमज्जमेतच्छरीरं जलबुद्बुदोपमम्॥ २६॥ ★

उरः। च। पृष्ठः। च। करौ। च। बाहू इति। जंघे इति। च। उरू इति। उत्ऽअरम्। शिरः। च।
रोमाणि। मांसम्। रुधिरास्थिमज्जम्। एतत्। शरीरम्। जलबुद्बुदऽउपमम्॥ २६॥

भ्रुवौ ललाटे च तथा च कर्णौ हनू कपोलौ छुबुकस्तथा च।
ओष्ठौ च दन्ताश्च तथैव जिह्वा एतच्छरीरं मुखरत्नकोशम्॥ २७॥ ★ [२०]

भ्रुवौ। ललाटे। च। तथा। च। कर्णौ। हनू इति। कपोलौ। छुबुकः। तथा। च।
ओष्ठौ। च। दन्ताः। च। तथा। एव। जिह्वा। एतत्। शरीरम्। मुखरत्नकोशम्॥ २७॥

[४५] [३३ शंयुर्बार्हस्पत्यः। इन्द्रः, ३१-३३ बृबुस्तक्षा। गायत्री, २९ अतिनिचृत्, ३१ पादनिचृत्, ३३ अनुष्टुप्।]

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा॥ १॥

यः। आ। अनयत्। पराऽवतः। सुऽनीती। तुर्वशम्। यदुम्। इन्द्रः। सः। नः। युवा। सखा॥ १॥

अविप्रे चिद्वयो दधदनाशुना चिदर्वता। इन्द्रो जेता हितं धनम्॥ २॥

अविप्रे। चित्। वयः। दधत्। अनाशुना। चित्। अर्वता। इन्द्रः। जेता। हितम्। धनम्॥ २॥

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। नास्य क्षीयन्त ऊतयः॥ ३॥

महीः। अस्य। प्रऽनीतयः। पूर्वीः। उत। प्रऽशस्तयः। न। अस्य। क्षीयन्ते। ऊतयः॥ ३॥

सखायो ब्रह्मवाहसेऽर्चत प्र च गायत। स हि नः प्रमतिर्मही॥ ४॥

सखायः। ब्रह्मऽवाहसे। अर्चत। प्र। च। गायत। सः। हि। नः। प्रऽमतिः। मही॥ ४॥

त्वमेकस्य वृत्रहन्नविता द्वयोरसि। उतेदृशे यथा वयम्॥ ५॥ [२१]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। एकस्य। वृत्रऽहन्। अविता। द्वयोः। असि। उत। ईदृशे। यथा। वयम्॥ ५॥

नयसीद्वति द्विषः कृणोष्युक्थशंसिनः। नृभिः सुवीर उच्यते॥ ६॥

नयसि। इत्। ऊँ इति। अति। द्विषः। कृणोषि। उक्थऽशंसिनः। नृऽभिः। सुऽवीरः। उच्यसे॥ ६॥

ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम्। गां न दोहसे हुवे॥ ७॥

ब्रह्माणम्। ब्रह्मऽवाहसम्। गीःऽभिः। सखायम्। ऋग्मियम्। गाम्। न। दोहसे। हुवे॥ ७॥

यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता। वीरस्य पृतनाषहः॥ ८॥

यस्य। विश्वानि। हस्तयोः। ऊचुः। वसूनि। नि। द्विता। वीरस्य। पृतनाऽसहः॥ ८॥

वि दृळ्हानि चिदद्रिवो जनानां शचीपते। वृह माया अनानत॥ ९॥

वि। दृळ्हानि। चित्। अद्रिऽवः। जनानाम्। शचीऽपते। वृह। मायाः। अनानत॥। ९॥

तमु त्वा सत्य सोमपा इन्द्र वाजानां पते। अहूमहि श्रवस्यवः॥ १०॥ [२२]

तम्। ऊँ इति। त्वा। सत्य। सोमऽपाः। इन्द्र। वाजानाम्। पते। अहूमहि। श्रवस्यवः॥ १०॥

तमु त्वा यः पुरासिथ यो वा नूनं हिते धने। हव्यः स श्रुधी हवम्॥ ११॥

तम्। ऊँ इति। त्वा। यः। पुरा। आसिथ। यः। वा। नूनम्। हिते। धने। हव्यः। सः। श्रुधि। हवम्॥ ११॥

धीभिरर्वद्भिरर्वतो वाजाँ इन्द्र श्रवाय्यान्। त्वया जेष्म हितं धनम्॥ १२॥

धीभिः। अर्वत्ऽभिः। अर्वतः। वाजान्। इन्द्र। श्रवाय्यान्। त्वया। जेष्म। हितम्। धनम्॥ १२॥

अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते। भरे वितन्तसाय्यः॥ १३॥

अभूः। ऊँ इति। वीर। गिर्वणः। महान्। इन्द्र। धने। हिते। भरे। वितन्तसाय्यः॥ १३॥

या त ऊतिरमित्रहन्मक्षूजवस्तमासति। तया नो हिनुही रथम्॥ १४॥

या। ते। ऊतिः। अमित्रऽहन्। मक्षुजवःऽतमा। असति। तया। नः। हिनुहि। रथम्॥ १४॥

स रथेन रथीतमोऽस्माकेनाभियुग्वना। जेषि जिष्णो हितं धनम्॥ १५॥ [२३]

सः। रथेन। रथिऽतमः। अस्माकेन। अभिऽयुग्वना। जेषि। जिष्णो इति। हितम्। धनम्॥ १५॥

य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः। पतिर्जज्ञे वृषक्रतुः॥ १६॥

यः। एकः। इत्। तम्। ऊँ इति। स्तुहि। कृष्टीनाम्। विऽचर्षणिः। पतिः। जज्ञे। वृषऽक्रतुः॥ १६॥

यो गृणतामिदासिथापिरूती शिवः सखा। स त्वं न इन्द्र मृळय॥ १७॥

यः। गृणताम्। इत्। आसिथ। आपिः। ऊती। शिवः। सखा। सः। त्वम्। नः। इन्द्र। मृळय॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः। सासहीष्ठा अभि स्पृधः॥ १८॥

धिष्व। वज्रम्। गभस्त्योः। रक्षःऽहत्याय। वज्रिऽवः। ससहीष्ठाः। अभि। स्पृधः॥ १८॥

प्रत्नं रयीणां युजं सखायं कीरिचोदनम्। ब्रह्मवाहस्तमं हुवे॥ १९॥

प्रत्नम्। रयीणाम्। युजम्। सखायम्। कीरिऽचोदनम्। ब्रह्मवाहःऽतमम्। हुवे॥ १९॥

स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते। गिर्वणस्तमो अध्रिगुः॥ २०॥ [२४]

सः। हि। विश्वानि। पार्थिवा। एकः। वसूनि। पत्यते। गिर्वणःऽतमः। अध्रिऽगुः॥ २०॥

स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः। गोमद्भिर्गोपते धृषत्॥ २१॥

सः। नः। नियुत्ऽभिः। आ। पृण। कामम्। वाजेभिः। अश्विऽभिः। गोमत्ऽभिः। गोऽपते। धृषत्॥ २१॥

तद्वो गाय सुते सचा पुरुहूताय सत्वने। शं यद्गवे न शाकिने॥ २२॥

तत्। वः। गाय। सुते। सचा। पुरुऽहूताय। सत्वने। शम्। यम्। गवे। न। शाकिने॥ २२॥

न घा वसुर्नि यमते दानं वाजस्य गोमतः। यत्सीमुप श्रवद्गिरः॥ २३॥

न। घ। वसुः। नि। यमते। दानम्। वाजस्य। गोऽमतः। यत्। सीम्। उप। श्रवत्। गिरः॥ २३॥

कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्। शचीभिरप नो वरत्॥ २४॥

कुवित्ऽसस्य। प्र। हि। व्रजम्। गोऽमन्तम्। दस्युऽहा। गमत्। शचीभिः। अप। नः। वरत्॥ २४॥

इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः। इन्द्र वत्सं न मातरः॥ २५॥ [२५]

इमाः। ऊँ इति। त्वा। शतक्रतो इति शतऽक्रतो। अभि। प्र। नोनुवुः। गिरः।

इन्द्र। वत्सम्। न। मातरः॥ २५॥

दूणाशं सख्यं तव गौरसि वीर गव्यते। अश्वो अश्वायते भव॥ २६॥

दुःऽनशम्। सख्यम्। तव। गौः। असि। वीर। गव्यते। अश्वः। अश्वऽयते। भव॥ २६॥

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः॥ २७॥

सः। मन्दस्व। हि। अन्धसः। राधसे। तन्वा। महे। न स्तोतारम्। निदे। करः॥ २७॥

इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः। वत्सं गावो न धेनवः॥ २८॥

इमाः। ऊँ इति। त्वा। सुतेऽसुते। नक्षन्ते। गिर्वणः। गिरः। वत्सम्। गावः। न। धेनवः॥ २८॥

पुरुतमं पुरूणां स्तोतॄणां विवाचि। वाजेभिर्वाजयताम्॥ २९॥

पुरुऽतमम्। पुरूणाम्। स्तोतॄणाम्। विऽवाचि। वाजेभिः। वाजऽयताम्॥ २९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अ॒स्माक॑मिन्द्र भूतु ते॒ स्तोमो॒ वाहि॑ष्ठो॒ अन्त॑मः। अ॒स्मान्रा॒ये म॒हे हि॑नु॥ ३०॥

अ॒स्माक॑म्। इ॒न्द्र॒। भू॒तु॒। ते॒। स्तोम॑ः। वाहि॑ष्ठः। अन्त॑मः। अ॒स्मान्। रा॒ये। म॒हे। हि॒नु॒॥ ३०॥

अधि॑ बृ॒बुः प॑णी॒नां वर्षि॑ष्ठे मू॒र्धन्न॑स्थात्। उ॒रुः कक्षो॒ न गा॒ङ्ग्यः॥ ३१॥

अधि॑। बृ॒बुः। प॒णी॒नाम्। वर्षि॑ष्ठे। मू॒र्धन्। अ॒स्था॒त्। उ॒रुः। कक्ष॑ः। न। गा॒ङ्ग्यः॥ ३१॥

यस्य॑ वा॒योरि॑व द्र॒वद्भ॒द्रा रा॒तिः स॑ह॒स्रिणी॑। स॒द्यो दा॒नाय॒ मंह॑ते॥ ३२॥

यस्य॑। वा॒योःऽइ॑व। द्र॒वत्। भ॒द्रा। रा॒तिः। स॒ह॒स्रिणी॑। स॒द्यः। दा॒नाय॑। मंह॑ते॥ ३२॥

तत्सु नो॒ विश्वे॑ अ॒र्य आ सदा॑ गृणन्ति का॒रव॑ः। बृ॒बुं स॑हस्र॒दात॑मं सू॒रिं स॑हस्र॒सात॑मम्॥ ३३॥[२६]

तत्। सु। नः॒। विश्वे॑। अ॒र्यः। आ। सदा॑। गृ॒ण॒न्ति॒। का॒रव॑ः। बृ॒बुम्। स॒ह॒स्र॒ऽदात॑मम्।

सू॒रिम्। स॒ह॒स्र॒ऽसात॑मम्॥ ३३॥

[४६] [१४ शंयुर्बार्हस्पत्यः। इन्द्रः। प्रगाथः (=अयुजो बृहत्यः, युजः सतोबृहत्यः)]

त्वामिद्धि हवा॑महे सा॒ता वाज॑स्य का॒रव॑ः। त्वां वृ॒त्रेष्वि॑न्द्र॒ सत्प॑तिं॒ नर॒स्त्वां काष्ठा॒स्वर्व॑तः॥ १॥

त्वाम्। इत्। हि। हवा॑महे। सा॒ता। वाज॑स्य। का॒रव॑ः।

त्वाम्। वृ॒त्रेषु। इ॒न्द्र॒। सत्ऽप॑तिम्। नरः। त्वाम्। काष्ठा॑सु। अर्व॑तः॥ १॥

स त्वं न॑श्चित्र वज्रहस्त धृष्णुया म॒हः स्त॑वा॒नो अ॑द्रिवः।

गामश्वं॑ र॒थ्य॑मिन्द्र॒ सं कि॑र स॒त्रा वाजं॒ न जि॒ग्युषे॑॥ २॥

सः। त्वम्। नः॒। चि॒त्र॒। व॒ज्र॒ऽह॒स्त॒। धृ॒ष्णु॒ऽया। म॒हः। स्त॒वा॒नः। अ॒द्रि॒ऽवः॒।

गाम्। अश्व॑म्। र॒थ्य॑म्। इ॒न्द्र॒। सम्। कि॒र॒। स॒त्रा। वाज॑म्। न। जि॒ग्युषे॑॥ २॥

यः स॑त्रा॒हा विच॑र्षणि॒रिन्द्रं॒ तं हू॑महे व॒यम्।

सह॑स्रमुष्क॒ तुवि॑नृम्ण॒ सत्प॑ते॒ भवा॑ स॒मत्सु॑ नो वृ॒धे॥ ३॥

यः। स॒त्रा॒ऽहा। वि॒ऽच॑र्षणिः। इन्द्र॑म्। तम्। हू॒म॒हे॒। व॒यम्।

सह॑स्रऽमुष्क। तुवि॑ऽनृम्ण। सत्ऽप॑ते। भव। स॒मत्ऽसु॑। नः॒। वृ॒धे॥ ३॥

बाध॑से॒ जना॑न्वृष॒भेव॑ म॒न्युना॒ घृषौ॑ मी॒ळ्ह ऋ॑चीषम।

अ॒स्माक॑ं बोध्यवि॒ता म॑हाध॒ने त॒नूष्व॒प्सु सूर्ये॑॥ ४॥

बाध॑से। जना॑न्। वृ॒ष॒भाऽइ॑व। म॒न्युना॑। घृषौ॑। मी॒ळ्हे। ऋ॒ची॒ष॒म॒।

अ॒स्माक॑म्। बो॒धि॒। अ॒वि॒ता। म॒हा॒ऽध॒ने। त॒नूषु॑। अ॒प्ऽसु। सूर्ये॑॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः।

येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः॥ ५॥ [२७]

इन्द्र। ज्येष्ठम्। नः। आ। भर। ओजिष्ठम्। पपुरि। श्रवः।

येन। इमे इति। चित्र। वज्रऽहस्त। रोदसी इति। आ। उभे इति। सुऽशिप्र। प्राः॥ ५॥

त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे।

विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्त्सुषहान्कृधि॥ ६॥

त्वाम्। उग्रम्। अवसे। चर्षणिऽसहम्। राजन्। देवेषु। हूमहे।

विश्वा। सु। नः। विथुरा। पिब्दना। वसो इति। अमित्रान्। सुऽसहान्। कृधि॥ ६॥

यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु।

यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या॥ ७॥

यत्। इन्द्र। नाहुषीषु। आ। ओजः। नृम्णम्। च। कृष्टिषु।

यत्। वा। पञ्च। क्षितीनाम्। द्युम्नम्। आ। भर। सत्रा। विश्वानि। पौंस्या॥ ७॥

यद्वा तृक्षौ मघवन्द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यम्।

अस्मभ्यं तद्रिरीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे॥ ८॥

यत्। वा। तृक्षौ। मघऽवन्। द्रुह्यौ। आ। जनै। यत्। पूरौ। कत्। च। वृष्ण्यम्।

अस्मभ्यम्। तत्। रिरीहि। सम्। नृऽसह्ये। अमित्रान्। पृत्ऽसु। तुर्वणे॥ ८॥

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत्।

छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः॥ ९॥

इन्द्र। त्रिऽधातु। शरणम्। त्रिऽवरूथम्। स्वस्तिऽमत्।

छर्दिः। यच्छ। मघवत्ऽभ्यः। च। मह्यम्। च। यवय। दिद्युम्। एभ्यः॥ ९॥

ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया।

अध स्म नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव॥ १०॥ [२८]

ये। गव्यता। मनसा। शत्रुम्। आऽदभुः। अभिऽप्रघ्नन्ति। धृष्णुऽया।

अध। स्म। नः। मघऽवन्। इन्द्र। गिर्वणः। तनूऽपाः। अन्तमः। भव॥ १०॥

अध स्मा नो वृधे भवेन्द्र नायमवा युधि।

यदन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस्तिग्ममूर्धानः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध॑। स्म॒। न॒:। वृ॒धे। भ॒व॒। इन्द्र॑। ना॒यम्। अ॒व॒। यु॒धि।

यत्। अ॒न्तरि॑क्षे। प॒तय॑न्ति। प॒र्णिन॑:। दि॒द्यव॑:। ति॒ग्मऽमू॑र्धानः॥ ११।

यत्र॒ शूरा॑सस्त॒न्वो॑ वितन्व॒ते प्रि॒या शर्म॑ पि॒तॄणा॑म्।

अध॑ स्मा यच्छ त॒न्वे॒३॑ तने॑ च छ॒र्दिर॒चित्तं॑ या॒वय॒ द्वेष॑:॥ १२॥

यत्र॑। शूरा॑सः। त॒न्व॑:। वि॒ऽत॒न्व॒ते। प्रि॒या। शर्म॑। पि॒तॄणा॑म्।

अध॑। स्म॒। य॒च्छ॒। त॒न्वै॑। तने॑। च॒। छ॒र्दिः। अ॒चित्त॑म्। य॒वय॑। द्वेष॑:॥ १२॥

यदि॑न्द्र॒ सर्गे॒ अर्व॑तश्चो॒दया॑से महाध॒ने।

अ॒स॒म॒ने अध्व॑नि वृजि॒ने प॒थि श्ये॒नाँइ॑व श्रवस्य॒तः॥ १३॥

यत्। इ॒न्द्र॒। सर्गे॑। अर्व॑तः। चो॒दया॑से। म॒हाऽध॒ने।

अ॒स॒म॒ने। अध्व॑नि। वृ॒जि॒ने। प॒थि। श्ये॒नान्ऽइ॑व। श्र॒व॒स्य॒तः॥ १३॥

सिन्धूँ॑रिव प्रव॒ण आ॑शु॒या य॒तो यदि॒ क्लोश॒मनु॒ ष्वणि॑।

आ ये वयो॒ न वर्वृ॑त॒त्यामि॑षि गृभी॒ता बा॒ह्वोर्गवि॑॥ १४॥ [२९]

सिन्धू॑न्ऽइव। प्र॒व॒णे। आ॒शु॒ऽया। य॒तः। यदि॑। क्लोश॑म्। अनु॑। स्वनि॑।

आ। ये। वय॑:। न। वर्वृ॑तति। आमि॑षि। गृ॒भी॒ताः। बा॒ह्वोः। गवि॑॥ १४॥

[४७] [३१ गर्गो भारद्वाजः। इन्द्रः, १-५ सोमः, २० देव-भूमि-बृहस्पतीन्द्राः, २२-२५ सार्ञ्जयस्यः प्रस्तोकस्य (दानस्तुतिः), २६-२८ रथः, २९-३० दुंदुभिः, ३१ दुंदुभीन्द्रौ। त्रिष्टुप्; १९ बृहती, २३ अनुष्टुप्, २४ गायत्री, २५ द्विपदा त्रिष्टुप्, २७ जगती।]

स्वा॒दुष्किला॒यं मधु॑माँ उ॒ताय॑ं ती॒व्रः किला॒यं रस॑वाँ उ॒ताय॑म्।

उ॒तो न्व॑१॒स्य प॑पि॒वांस॒मिन्द्रं॒ न कश्च॒न स॑हत आह॒वेषु॑॥ १॥

स्वा॒दुः। किल॑। अ॒यम्। मधु॑ऽमान्। उ॒त। अ॒यम्। ती॒व्रः। किल॑। अ॒यम्। रस॑ऽवान्। उ॒त। अ॒यम्।

उ॒तो इति॑। नु। अ॒स्य। प॒पि॒ऽवांस॑म्। इन्द्र॑म्। न। क॒:। च॒न। स॒ह॒ते। आ॒ऽह॒वेषु॑॥ १॥

अ॒यं स्वा॒दुरि॒ह मदि॑ष्ठ आस॒ यस्येन्द्रो॑ वृत्र॒हत्ये॑ म॒दाम॑।

पु॒रूणि॒ यश्च्यौ॒त्ना शम्ब॑रस्य॒ वि न॑व॒तिं नव॑ च दे॒ह्यो॒३॑ हन्॥ २॥

अ॒यम्। स्वा॒दुः। मदि॑ष्ठः। आ॒स॒। यस्य॑। इन्द्र॑ः। वृ॒त्र॒ऽहत्ये॑। म॒माद॑।

पु॒रूणि॑। यः। च्यौ॒त्ना। शम्ब॑रस्य। वि। न॒व॒तिम्। नव॑। च॒। दे॒ह्य॑ः। हन्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे॥ ३॥

अयम्। मे। पीतः। उत्। इयर्ति। वाचम्। अयम्। मनीषाम्। उशतीम्। अजीगरिति।
अयम्। षट्। उर्वीः। अमिमीत। धीरः। न। याभ्यः। भुवनम्। कत्। चन। आरे॥ ३॥

अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम्॥ ४॥

अयम्। सः। यः। वरिमाणम्। पृथिव्याः। वर्ष्माणम्। दिवः। अकृणोत्। अयम्। सः।
अयम्। पीयूषम्। तिसृषु। प्रवत्ऽसु। सोमः। दाधार। उरु। अन्तरिक्षम्॥ ४॥

अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके।
अयं महान्महता स्कम्भनेनोद्द्यामस्तभ्नाद्वृषभो मरुत्वान्॥ ५॥ [३०]

अयम्। विदत्। चित्रऽदृशीकम्। अर्णः। शुक्रऽसद्मनाम्। उषसाम्। अनीके।
अयम्। महान्। महता। स्कम्भनेन। उत्। द्याम्। अस्तभ्नात्। वृषभः। मरुत्वान्॥ ५॥

धृषत्पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम्।
माध्यंदिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि॥ ६॥

धृषत्। पिब। कलशे। सोमम्। इन्द्र। वृत्रऽहा। शूर। सम्ऽअरे। वसूनाम्।
माध्यंदिने। सवने। आ। वृषस्व। रयिऽस्थानः। रयिम्। अस्मासु। धेहि॥ ६॥

इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ।
भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः॥ ७॥

इन्द्र। प्र। नः। पुरएताऽइव। पश्य। प्र। नः। नय। प्रऽतरम्। वस्यः। अच्छ।
भव। सुऽपारः। अतिऽपारयः। नः। भव। सुऽनीतिः। उत। वामऽनीतिः॥ ७॥

उरुं नो लोकमनु नेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति।
ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता॥ ८॥

उरुम्। नः। लोकम्। अनु। नेषि। विद्वान्। स्वःऽवत्। ज्योतिः। अभयम्। स्वस्ति।
ऋष्वा। ते। इन्द्र। स्थविरस्य। बाहू इति। उप। स्थेयाम। शरणा। बृहन्ता॥ ८॥

वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा।
इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वरिष्ठे। नः। इन्द्र। वन्धुरे। धाः। वहिष्ठयोः। शत॰वन्। अश्वयोः। आ।

इषम्। आ। वक्षि। इषाम्। वर्षिष्ठाम्। मा। नः। तारीत्। मघ॰वन्। रायः। अर्यः॥ ९॥

इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम्।

यत्किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम्॥ १०॥ [३१]

इन्द्र। मृळ। मह्यम्। जीवातुम्। इच्छ। चोदय। धियम्। अयसः। न। धाराम्॥

यत्। किम्। च। अहम्। त्वा॰युः। इदम्। वदामि। तत्। जुषस्व। कृधि। मा। देव॰वन्तम्॥ १०॥

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम्।

ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः॥ ११॥

त्रातारम्। इन्द्रम्। अवितारम्। इन्द्रम्। हवे॰हवे। सु॰हवम्। शूरम्। इन्द्रम्।

ह्वयामि। शक्रम्। पुरु॰हूतम्। इन्द्रम्। स्वस्ति। नः। मघ॰वा। धातु। इन्द्रः॥ ११॥

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः।

बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम॥ १२॥

इन्द्रः। सु॰त्रामा। स्व॰वान्। अवः॰भिः। सु॰मृळीकः। भवतु। विश्व॰वेदाः।

बाधताम्। द्वेषः। अभयम्। कृणोतु। सु॰वीर्यस्य। पतयः। स्याम॥ १२॥

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम।

स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु॥ १३॥

तस्य। वयम्। सु॰मतौ। यज्ञियस्य। अपि। भद्रे। सौमनसे। स्याम।

सः। सु॰त्रामा। स्व॰वान्। इन्द्रः। अस्मे इति। आरात्। चित्। द्वेषः। सनुतः। युयोतु॥ १३॥

अव त्वे इन्द्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते।

उरू न राधः सवना पुरूण्यपो गा वज्रिन्युवसे समिन्दून्॥ १४॥

अव। त्वे इति। इन्द्र। प्र॰वतः। न। ऊर्मिः। गिरः। ब्रह्माणि। नि॰युतः। धवन्ते।

उरु। न। राधः। सवना। पुरूणि। अपः। गाः। वज्रिन्। युवसे। सम्। इन्दून्॥ १४॥

क ईं स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहावेत्।

पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः। १५॥ [३२]

कः। ईम्। स्तवत्। कः। पृणात्। कः। यजाते। यत्। उग्रम्। इत्। मघ॰वा। विश्वहा। अवेत्।

पादौऽइव। प्र॰हरन्। अन्यम्॰अन्यम्। कृणोति। पूर्वम्। अपरम्। शचीभिः॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्॥ १६॥

शृण्वे। वीरः। उग्रम्ऽउग्रम्। दमऽयन्। अन्यम्ऽअन्यम्। अतिऽनेनीयमानः।
एधमानऽद्विट्। उभयस्य। राजा। चोष्कूयते। विशः। इन्द्रः। मनुष्यान्॥ १६॥

परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति।
अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति॥ १७॥

परा। पूर्वेषाम्। सख्या। वृणक्ति। विऽतर्तुराणः। अपरेभिः। एति।
अननुऽभूतीः। अवऽधून्वानः। पूर्वीः। इन्द्रः। शरदः। तर्तरीति॥ १७॥

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय।
इन्द्रो मायाभिः पूरुरूप ईयते युक्ता ह्यस्य हरयः शता दश॥ १८॥

रूपम्ऽरूपम्। प्रतिऽरूपः। बभूव। तत्। अस्य। रूपम्। प्रतिऽचक्षणाय।
इन्द्रः। मायाभिः। पुरुऽरूपः। ईयते। युक्ताः। हि। अस्य। हरयः। शता। दश॥ १८॥

युजानो हरिता रथे भूरि त्वष्टेह राजति।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु॥ १९॥

युजानः। हरिता। रथे। भूरि। त्वष्टा। इह। राजति।
कः। विश्वाहा। द्विषतः। पक्षः। आसते। उत। आसीनेषु। सूरिषु॥ १९॥

अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत्।
बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम्॥ २०॥ [३३]

अगव्यूति। क्षेत्रम्। आ। अगन्म। देवाः। उर्वी। सती। भूमिः। अंहूरणा। अभूत्।
बृहस्पते। प्र। चिकित्स। गोऽइष्टौ। इत्था। सते। जरित्रे। इन्द्र। पन्थाम्॥ २०॥

दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः।
अहन्दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च॥ २१॥

दिवेऽदिवे। सऽदृशीः। अन्यम्। अर्धम्। कृष्णाः। असेधत्। अप। सद्मनः। जाः।
अहन्। दासा। वृषभः। वस्नऽयन्ता। उदऽव्रजे। वर्चिनम्। शम्बरम्। च॥ २१॥

प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात्।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र॒ऽस्तो॒कः। इत्। नु। राध॑सः। ते॒। इ॒न्द्र॒। दश॑। कोश॑यीः। दश॑। वा॒जिनः॑। अ॒दा॒त्।

दिवः॑ऽदासात्। अ॒ति॒थि॒ऽग्वस्य॑। राधः॑। शा॒म्ब॒रम्। वसु॑। प्रति॑। अ॒ग्र॒भी॒ष्म॒॥ २२॥

दशाश्वा॒न्दश॒ कोशा॒न्दश॒ वस्त्राधि॑योजना। दशो॑ हिरण्यपि॒ण्डान्दिवो॑दासादसानिषम्॥ २३॥

दश॑। अश्वा॑न्। दश॑। कोशा॑न्। दश॑। वस्त्रा॑। अधि॑ऽयोजना।

दशो॒ इति॑। हि॒र॒ण्य॒ऽपि॒ण्डान्। दिवः॑ऽदासात्। अ॒सा॒नि॒ष॒म्॥ २३॥

दश॒ रथा॒न्प्रष्टि॑मतः श॒तं गा अथ॑र्वभ्यः। अ॒श्व॒थः पा॒यवे॑ऽदात्॥ २४॥

दश॑। रथा॑न्। प्रष्टि॑ऽमतः। श॒तम्। गाः। अथ॑र्वऽभ्यः। अ॒श्व॒थः। पा॒यवे॑। अ॒दा॒त्॥ २४॥

महि॒ राधो॑ वि॒श्वज॑न्यं॒ दधा॑नान्भ॒रद्वा॑जान्त्सा॒र्ञ्ज॒यो अ॒भ्य॑यष्ट॥ २५॥ [३४]

महि॑। राधः॑। वि॒श्वऽज॑न्यम्। दधा॑नान्। भ॒रत्ऽवा॑जान्। सा॒र्ञ्ज॒यः। अ॒भि। अ॒य॒ष्ट॒॥ २५॥

वन॑स्पते वी॒ड्व॑ङ्गो॒ हि भू॒या अ॒स्मत्स॑खा प्र॒तर॑णः सु॒वीरः॑।

गोभिः॒ संन॑द्धो असि वी॒ळय॑स्वास्था॒ता ते॑ जयतु॒ जेत्वा॑नि॥ २६॥

वन॑स्पते। वी॒ळु॒ऽअ॑ङ्गः। हि। भू॒या। अ॒स्मत्ऽस॑खा। प्र॒ऽतर॑णः। सु॒ऽवीरः॑।

गोभिः॑। सम्ऽन॑द्धः। अ॒सि॒। वी॒ळय॑स्व। आ॒ऽस्था॒ता। ते। ज॒य॒तु॒। जेत्वा॑नि॥ २६॥

दि॒वस्पृ॑थि॒व्याः पर्योज॒ उद्भृ॑तं॒ वन॒स्पति॑भ्यः॒ पर्याभृ॑तं॒ सहः॑।

अ॒पामो॒ज्मानं॒ परि॒ गोभि॒रावृ॑त॒मिन्द्र॑स्य॒ वज्रं॑ ह॒विषा॒ रथं॑ यज॥ २७॥

दि॒वः। पृ॒थि॒व्याः। परि॑। ओजः॑। उत्ऽभृ॑तम्। व॒न॒स्पति॑ऽभ्यः। परि॑। आऽभृ॑तम्। सहः॑।

अ॒पाम्। ओ॒ज्मान॑म्। परि॑। गोभिः॑। आऽवृ॑तम्। इन्द्र॑स्य। वज्र॑म्। ह॒विषा॑। रथ॑म्। य॒ज॒॥ २७॥

इन्द्र॑स्य॒ वज्रो॑ म॒रुता॒मनी॑कं मि॒त्रस्य॒ गर्भो॒ वरु॑णस्य॒ नाभिः॑।

सेमां नो॑ ह॒व्यदा॑तिं जुषा॒णो देव॑ रथ॒ प्रति॑ ह॒व्या गृ॑भाय॥ २८॥

इन्द्र॑स्य। वज्रः॑। म॒रुता॑म्। अनी॑कम्। मि॒त्रस्य॑। गर्भः॑। वरु॑णस्य। नाभिः॑।

सः। इ॒माम्। नः॒। ह॒व्यऽदा॑तिम्। जु॒षा॒णः। देव॑। र॒थ॒। प्रति॑। ह॒व्या। गृ॒भा॒य॒॥ २८॥

उप॑ श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्।

स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑ सेध॒ शत्रू॑न्॥ २९॥

उप॑। श्वा॒स॒य॒। पृ॒थि॒वीम्। उ॒त। द्याम्। पु॒रु॒ऽत्रा। ते॒। म॒नु॒ता॒म्। वि॒ऽस्थि॑तम्। जग॑त्।

सः। दु॒न्दु॒भे॒। स॒ऽजूः। इन्द्रे॑ण। दे॒वैः। दू॒रात्। दवी॑यः। अप॑। से॒ध॒। शत्रू॑न्॥ २९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ क्रन्दय बलमोजो न आ धा नि ष्टनिहि दुरिता बाधमानः।

अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व॥ ३०॥

आ। क्रन्दय। बलम्। ओजः। नः। आ। धाः। निः। स्तनिहि। दुःऽइता। बाधमानः।

अप। प्रोथ। दुन्दुभे। दुच्छुनाः। इतः। इन्द्रस्य। मुष्टिः। असि। वीळयस्व॥ ३०॥

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति।

समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु॥ ३१॥ [३५]

आ। अमूः। अज। प्रति॰आवर्तय। इमाः। केतु॰मत्। दुन्दुभिः। वावदीति।

सम्। अश्व॰पर्णाः। चरन्ति। नः। नरः। अस्माकम्। इन्द्र। रथिनः। जयन्तु॥ ३१॥

इत्याश्वलायन-संहितायां

चतुर्थाष्टके

सप्तमोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ चतुर्थाष्टके अष्टमोऽध्यायः ॥

[४८] [२२ शंयुर्बार्हस्पत्यः। पृश्निः सूक्तम्। १-१० अग्निः; ११, १२, २०, २१ मरुतः (१३-१५ लिंगोक्ता वा), १६-१९ पूषा, २२ द्यावाभूमी वा पृश्निर्वा। प्रगाथः (१, ३, ५, ९, १४, १९, २० बृहती; २, ४, १०, १२, १७ सतोबृहती; ६, ८ महासतोबृहती), ७, २१ महाबृहती, ११ ककुप्, १३, १८ पुरउष्णिक्, १५ अतिजगती, १६ ककुप्, २२ अनुष्टुप्।]

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्॥ १॥

यज्ञाऽयज्ञा। वः। अग्नये। गिराऽगिरा। च। दक्षसे।

प्रऽप्र। वयम्। अमृतम्। जातऽवेदसम्। प्रियम्। मित्रम्। न। शंसिषम्॥ १॥

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये। भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम्॥ २॥

ऊर्जः। नपातम्। सः। हिन। अयम्। अस्मऽयुः। दाशेम। हव्यऽदातये।

भुवत्। वाजेषु। अविता। भुवत्। वृधः। उत। त्राता। तनूनाम्॥ २॥

वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा।

अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि॥ ३॥

वृषा। हि। अग्ने। अजरः। महान्। विऽभासि। अर्चिषा।

अजस्रेण। शोचिषा। शोशुचत्। शुचे। सुदीतिऽभिः। सु। दीदिहि॥ ३॥

महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना।

अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व॥ ४॥

महः। देवान्। यजसि। यक्षि। आनुषक्। तव। क्रत्वा। उत। दंसना।

अर्वाचः। सीम्। कृणुहि। अग्ने। अवसे। रास्व। वाजा। उत। वंस्व॥ ४॥

यमापो अद्रयो वना गर्भमृतस्य पिप्रति।

सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि॥ ५॥ [१]

यम्। आपः। अद्रयः। वना। गर्भम्। ऋतस्य। पिप्रति।

सहसा। यः। मथितः। जायते। नृऽभिः। पृथिव्याः। अधि। सानवि॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ यः प॒प्रौ भा॒नुना॒ रोद॑सी उ॒भे धू॒मेन॑ धावते दि॒व।

ति॒रस्तमो॑ ददृश॒ ऊर्म्या॒स्वा श्या॒वास्व॑रु॒षो वृषा॑ श्या॒वा अ॑रु॒षो वृषा॑॥ ६॥

आ। यः। प॒प्रौ। भा॒नुना॑। रोद॑सी॒ इति॑। उ॒भे इति॑। धू॒मेन॑। धा॒व॒ते॒। दि॒वि।

ति॒रः। तम॑ः। द॒दृ॒शे॒। ऊर्म्या॑सु। आ। श्या॒वासु॑। अ॒रु॒षः। वृषा॑। आ। श्या॒वाः। अ॒रु॒षः। वृषा॑॥ ६॥

बृ॒हद्भि॑रग्ने अ॒र्चिभि॑ः शु॒क्रेण॑ देव शो॒चिषा॑।

भ॒रद्वा॑जे समिधा॒नो य॑विष्ठ्य रे॒वन्न॑ः शुक्र दीदिहि द्यु॒मत्पा॑वक दीदिहि॥ ७॥

बृ॒हत्ऽभि॑ः। अ॒ग्ने॒। अ॒र्चिऽभि॑ः। शु॒क्रेण॑। दे॒व॒। शो॒चिषा॑। भ॒रत्ऽवा॑जे।

स॒म्ऽइ॒धा॒नः। य॒वि॒ष्ठ्य॒। रे॒वत्। न॒ः। शु॒क्र॒। दी॒दि॒हि॒। द्यु॒ऽमत्। पा॒व॒क॒। दी॒दि॒हि॒॥ ७॥

विश्वा॑सां गृ॒हप॑तिर्वि॒शाम॑सि॒ त्वम॑ग्ने॒ मानु॑षीणाम्।

श॒तं पू॒र्भिर्य॑विष्ठ पा॒ह्यंह॑सः समे॒द्धारं॑ श॒तं हिमा॑ः स्तो॒तृभ्यो॒ ये च॒ दद॑ति॥ ८॥

विश्वा॑साम्। गृ॒हऽप॑तिः। वि॒शाम्। अ॒सि॒। त्वम्। अ॒ग्ने॒। मानु॑षीणाम्॥ श॒तम्। पू॒ःऽभिः।

य॒वि॒ष्ठ॒। पा॒हि॒। अंह॑सः। स॒म्ऽए॒द्धार॑म्। श॒तम्। हिमा॑ः। स्तो॒तृऽभ्य॑ः। ये। च॒। दद॑ति॥ ८॥

त्वं न॑श्चि॒त्र ऊ॒त्या वसो॒ राधां॑सि चोदय।

अ॒स्य रा॒यस्त्वम॑ग्ने र॒थीर॑सि वि॒दा गा॒धं तु॒चे तु न॑ः॥ ९॥

त्वम्। न॒ः। चि॒त्रः। ऊ॒त्या। वसो॒ इति॑। राधां॑सि। चो॒द॒य॒।

अ॒स्य। रा॒यः। त्वम्। अ॒ग्ने॒। र॒थीः। अ॒सि॒। वि॒दाः। गा॒धम्। तु॒चे। तु। न॒ः॥ ९॥

पर्षि॑ तो॒कं तन॑यं प॒र्तृभि॒ष्ट्वमद॑ब्धै॒रप्र॑युत्वभिः।

अग्ने॒ हेळां॑सि॒ दैव्या॑ युयोधि॒ नोऽदे॑वानि॒ ह्वरां॑सि च॥ १०॥ [२]

पर्षि॑। तो॒कम्। तन॑यम्। प॒र्तृऽभि॑ः। त्वम्। अद॑ब्धैः। अप्र॑युत्वऽभिः।

अग्ने॑। हेळां॑सि। दैव्या॑। यु॒यो॒धि॒। न॒ः। अदे॑वानि। ह्वरां॑सि। च॒॥ १०॥

आ स॑खायः सब॒र्दुघां॑ धे॒नुम॑जध्व॒मुप॒ नव्य॑सा॒ वच॑ः। सृ॒जध्व॒मन॑पस्फुराम्॥ ११॥

आ। स॒खा॒य॒ः। स॒ब॒ःऽदुघा॑म्। धे॒नुम्। अ॒ज॒ध्व॒म्। उप॑। नव्य॑सा। वच॑ः।

सृ॒जध्व॑म्। अन॑पऽस्फुराम्॥ ११॥

या शर्धा॑य॒ मारु॑ताय॒ स्वभा॑नवे॒ श्रवोऽमृ॑त्यु॒ धुक्ष॑त।

या मृ॑ळी॒के म॒रुतां॑ तु॒राणां॒ या सु॒म्नैरे॑व॒याव॑री॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

या। शर्धाय। मारुताय। स्वऽभानवे। श्रवः। अमृत्यु। धुक्षत।

या। मृळीके। मरुताम्। तुराणाम्। या। सुम्नैः। एवऽयावरी॥ १२॥

भरद्वाजायाव धुक्षत द्विता। धेनुं च विश्वदोहसमिषं च विश्वभोजसम्॥ १३॥

भरत्ऽवाजाय। अव। धुक्षत। द्विता। धेनुम्। च। विश्वऽदोहसम्। इषम्। च। विश्वऽभोजसम्॥ १३॥

तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम्।

अर्यमणं न मन्द्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे॥ १४॥

तम्। वः। इन्द्रम्। न। सुऽक्रतुम्। वरुणम्ऽइव। मायिनम्।

अर्यमणम्। न। मन्द्रम्। सृप्रऽभोजसम्। विष्णुम्। न। स्तुषे। आऽदिशे॥ १४॥

त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता।

सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा वसू करत्सुवेदा नो वसू करत्॥ १५॥

त्वेषम्। शर्धः। न। मारुतम्। तुविऽस्वनि। अनर्वाणम्। पूषणम्। सम्। यथा। शता॥ सम्। सहस्रा।

कारिषत्। चर्षणिऽभ्यः। आ। आविः। गूळ्हा। वसु। करत्। सुऽवेदा। नः। वसु। करत्॥ १५॥

आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे। अघा अर्यो अरातयः॥ १६॥ [३]

आ। मा। पूषन्। उप। द्रव। शंसिषम्। नु। ते। अपिऽकर्णे। आघृणे॥ अघाः। अर्यः। अरातयः॥ १६॥

मा काकम्बीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः।

मोत सूरो अह एवा चन ग्रीवा आदधते वेः॥ १७॥

मा। काकम्बीरम्। उत्। वृहः। वनस्पतिम्। अशस्तीः। वि। हि। नीनशः।

मा। उत। सूरः। अहरिति। एव। चन। ग्रीवाः। आऽदधते। वेरिति वेः॥ १७॥

दृतेरिव तेऽवृकमस्तु सख्यम्। अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः॥ १८॥

दृतेःऽइव। ते। अवृकम्। अस्तु। सख्यम्। अच्छिद्रस्य। दधन्ऽवतः। सुऽपूर्णस्य। दधन्ऽवतः॥ १८॥

परो हि मर्त्यैरसि समो देवैरुत श्रिया। अभि ख्यः पूषन्पृतनासु नस्त्वमवा नूनं यथा पुरा॥ १९॥

परः। हि। मर्त्यैः। असि। समः। देवैः। उत। श्रिया।

अभि। ख्यः। पूषन्। पृतनासु। नः। त्वम्। अव। नूनम्। यथा। पुरा॥ १९॥

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता।

देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः॥ २०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वामी। वामस्य। धूतयः। प्रऽनीतिः। अस्तु। सूनृता।
देवस्य। वा। मरुतः। मर्त्यस्य। वा। ईजानस्य। प्रऽयज्युवः॥ २०॥

सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः॥ २१॥

सद्यः। चित्। यस्य। चर्कृतिः। परि। द्याम्। देवः। न। एति। सूर्यः।
त्वेषम्। शवः। दधिरे। नाम। यज्ञियम्। मरुतः। वृत्रऽहम्। शवः। ज्येष्ठम्। वृत्रऽहम्। शवः॥ २१॥

सकृद्ध द्यौरजायत सकृद्भूमिरजायत। पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते॥ २२॥ [४]

सकृत्। ह। द्यौः। अजायत। सकृत्। भूमिः। अजायत।
पृश्न्याः। दुग्धम्। सकृत्। पयः। तत्। अन्यः। न। अनु। जायते॥ २२॥

[४९] [१५ ऋजिश्वा भारद्वाजः। विश्वे देवाः। त्रिष्टुप्, १५ शक्वरी।]

स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता।
त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्निः॥ १॥

स्तुषे। जनम्। सुऽव्रतम्। नव्यसीभिः। गीःऽभिः। मित्रावरुणा। सुम्नऽयन्ता।
ते। आ। गमन्तु। ते। इह। श्रुवन्तु। सुऽक्षत्रासः। वरुणः। मित्रः। अग्निः॥ १॥

विशोविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै॥ २॥

विशःऽविशः। ईड्यम्। अध्वरेषु। अदृप्तऽक्रतुम्। अरतिम्। युवत्योः।
दिवः। शिशुम्। सहसः। सूनुम्। अग्निम्। यज्ञस्य। केतुम्। अरुषम्। यजध्यै॥ २॥

अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने॥ ३॥

अरुषस्य। दुहितरा। विरूपे इति विऽरूपे। स्तृऽभिः। अन्या। पिपिशे। सूरः। अन्या।
मिथःऽतुरा। विचरन्ती इति विऽचरन्ती। पावके इति। मन्म। श्रुतम्। नक्षतः। ऋच्यमाने इति॥ ३॥

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम्।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो॥ ४॥

प्र। वायुम्। अच्छ। बृहती। मनीषा। बृहत्ऽरयिम्। विश्वऽवारम्। रथऽप्राम्।
द्युतत्ऽयामा। निऽयुतः। पत्यमानः। कविः। कविम्। इयक्षसि। प्रयज्यो इति प्रऽयज्यो॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः।

येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च॥ ५॥ [५]

सः। मे। वपुः। च्छदयत्। अश्विनोः। यः। रथः। विरुक्मान्। मनसा। युजानः।

येन। नरा। नासत्या। इषयध्यै। वर्तिः। याथः। तनयाय। त्मने। च॥ ५॥

पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि।

सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वम्॥ ६॥

पर्जन्यवाता। वृषभा। पृथिव्याः। पुरीषाणि। जिन्वतम्। अप्यानि।

सत्यं॰श्रुतः। कवयः। यस्य। गीः२भिः। जगतः। स्थातः। जगत्। आ। कृणुध्वम्॥ ६॥

पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात्।

ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत्॥ ७॥

पावीरवी। कन्या। चित्र॰आयुः। सरस्वती। वीर॰पत्नी। धियम्। धात्।

ग्नाभिः। अच्छिद्रम्। शरणम्। स॰जोषाः। दुः२आधर्षम्। गृणते। शर्म। यंसत्॥ ७॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम्।

स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा॥ ८॥

पथः२पथः। परि॰पतिम्। वचस्या। कामेन। कृतः। अभि। आनट्। अर्कम्।

सः। नः। रासत्। शुरुधः। चन्द्र॰अग्राः। धियम्॰धियम्। सीसधाति। प्र। पूषा॥ ८॥

प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम्।

होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा॥ ९॥

प्रथम॰भाजम्। यशसम्। वयः२धाम्। सु॰पाणिम्। देवम्। सु॰गभस्तिम्। ऋभ्वम्।

होता। यक्षत्। यजतम्। पस्त्यानाम्। अग्निः। त्वष्टारम्। सु॰हवम्। विभा॰वा॥ ९॥

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ।

बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः॥ १०॥ [६]

भुवनस्य। पितरम्। गीः२भिः। आभिः। रुद्रम्। दिवा। वर्धय। रुद्रम्। अक्तौ।

बृहन्तम्। ऋष्वम्। अजरम्। सु॰सुम्नम्। ऋधक्। हुवेम। कविना। इषितासः॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम्।
अचित्रं चिद्धि जिन्वथा वृधन्त इथा नक्षन्तो नरो अङ्गिरस्वत्॥ ११ ॥

आ। युवानः। कवयः। यज्ञियासः। मरुतः। गन्त। गृणतः। वरस्याम्।
अचित्रम्। चित्। हि। जिन्वथ। वृधन्तः। इत्था। नक्षन्त। नरः। अङ्गिरस्वत्॥ ११ ॥

प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम्।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः॥ १२ ॥

प्र। वीराय। प्र। तवसे। तुराय। अज। यूथाऽइव। पशुऽरक्षिः। अस्तम्।
सः। पिस्पृशति। तन्वि। श्रुतस्य। स्तृऽभिः। न। नाकम्। वचनस्य। विपः॥ १२ ॥

यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च॥ १३ ॥

यः। रजांसि। विऽममे। पार्थिवानि। त्रिः। चित्। विष्णुः। मनवे। बाधिताय।
तस्य। ते। शर्मन्। उपऽदद्यमाने। राया। मदेम। तन्वा। तना। च॥ १३ ॥

तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात्।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये॥ १४ ॥

तत्। नः। अहिः। बुध्न्यः। अत्ऽभिः। अर्कैः। तत्। पर्वतः। तत्। सविता। चनः। धात्।
तत्। ओषधीभिः। अभि। रातिऽसाचः। भगः। पुरम्ऽधिः। जिन्वतु। प्र। राये॥ १४ ॥

नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम्।
क्षयं दाताजरं येन जनान्त्स्पृधो अदेवीरभि च क्रमाम विश आदेवीरभ्य१श्नवाम॥ १५ ॥ [७]{४}

नु। नः। रयिम्। रथ्यम्। चर्षणिऽप्राम्। पुरुऽवीरम्। महः। ऋतस्य। गोपाम्। क्षयम्। दात। अजरम्।
येन। जनान्। स्पृधः। अदेवीः। अभि। च। क्रमाम। विशः। आऽदेवीः। अभि। अश्नवाम॥ १५ ॥

[५०] [१५ ऋजिश्वा भारद्वाजः। विश्वे देवाः। त्रिष्टुप्।]

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम्।
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्त्सवितारं भगं च॥ १ ॥

हुवे। वः। देवीम्। अदितिम्। नमःऽभिः। मृळीकाय। वरुणम्। मित्रम्। अग्निम्।
अभिऽक्षदाम्। अर्यमणम्। सुऽशेवम्। त्रातॄन्। देवान्। सवितारम्। भगम्। च॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुज्योतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान्।

द्विजन्मानो य ऋतसापः सत्याः स्ववन्तो यजता अग्निजिह्वाः॥ २॥

सुऽज्योतिषः। सूर्य। दक्षऽपितॄन्। अनागाःऽत्वे। सुऽमहः। वीहि। देवान्।

द्विऽजन्मानः। ये। ऋतऽसापः। सत्याः। स्वःऽवन्तः। यजताः। अग्निऽजिह्वाः॥ २॥

उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने।

महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः॥ ३॥

उत। द्यावापृथिवी इति। क्षत्रम्। उरु। बृहत्। रोदसी इति। शरणम्। सुसुम्ने इति सुऽसुम्ने।

महः। करथः। वरिवः। यथा। नः। अस्मे इति। क्षयाय। धिषणे इति। अनेहः॥ ३॥

आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः।

यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान्॥ ४॥

आ। नः। रुद्रस्य। सूनवः। नमन्ताम्। अद्य। हूतासः। वसवः। अधृष्टाः।

यत्। ईम्। अर्भे। महति। वा। हितासः। बाधे। मरुतः। अह्वाम। देवान्॥ ४॥

मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा।

श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते॥ ५॥ [८]

मिम्यक्ष। येषु। रोदसी। नु। देवी। सिसक्ति। पूषा। अभ्यर्धऽयज्वा।

श्रुत्वा। हवम्। मरुतः। यत्। ह। याथ। भूम। रेजन्ते। अध्वनि। प्रऽविक्ते॥ ५॥

अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन।

श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः॥ ६॥

अभि। त्यम्। वीरम्। गिर्वणसम्। अर्च। इन्द्रम्। ब्रह्मणा। जरितः। नवेन।

श्रवत्। इत्। हवम्। उप। च। स्तवानः। रासत्। वाजान्। उप। महः। गृणानः॥ ६॥

ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः।

यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः॥ ७॥

ओमानम्। आपः। मानुषीः। अमृक्तम्। धात। तोकाय। तनयाय। शम्। योः।

यूयम्। हि। स्थ। भिषजः। मातृऽतमाः। विश्वस्य। स्थातुः। जगतः। जनित्रीः॥ ७॥

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात्।

यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। देवः। सविता। त्रायमाणः। हिरण्यऽपाणिः। यजतः। जगम्यात्।
यः। दत्रऽवान्। उषसः। न। प्रतीकम्। विऽऊर्णुते। दाशुषे। वार्याणि॥ ८॥

उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः।
स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः॥ ९॥

उत। त्वम्। सूनो इति। सहसः। नः। अद्य। आ। देवान्। अस्मिन्। अध्वरे। ववृत्याः।
स्याम्। अहम्। ते। सदम्। इत्। रातौ। तव। स्याम्। अग्ने। अवसा। सुऽवीरः॥ ९॥

उत त्या मे हवमा जगम्यातं नासत्या धीभिर्युवमङ्ग विप्रा।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके॥ १०॥ [९]

उत। त्या। मे। हवम्। आ। जग्म्यातम्। नासत्या। धीभिः। युवम्। अङ्ग। विप्रा।
अत्रिम्। न। महः। तमसः। अमुमुक्तम्। तूर्वतम्। नरा। दुःऽइतात्। अभीके॥ १०॥

ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः॥ ११॥

ते। नः। रायः। द्युऽमतः। वाजऽवतः। दातारः। भूत। नृऽवतः। पुरुऽक्षोः।
दशस्यन्तः। दिव्याः। पार्थिवासः। गोऽजाताः। अप्याः। मृळत। च। देवाः॥ ११॥

ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः॥ १२॥

ते। नः। रुद्रः। सरस्वती। सऽजोषाः। मीळ्हुष्मन्तः। विष्णुः। मृळन्तु। वायुः।
ऋभुक्षाः। वाजः। दैव्यः। विऽधाता। पर्जन्यावाता। पिप्यताम्। इषम्। नः॥ १२॥

उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः॥ १३॥

उत। स्यः। देवः। सविता। भगः। नः। अपाम्। नपात्। अवतु। दानु। पप्रिः।
त्वष्टा। देवेभिः। जनिऽभिः। सऽजोषाः। द्यौः। देवेभिः। पृथिवी। समुद्रैः॥ १३॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु॥ १४॥

उत। नः। अहिः। बुध्न्यः। शृणोतु। अजः। एकऽपात्। पृथिवी। समुद्रः।
विश्वे। देवाः। ऋतऽवृधः। हुवानाः। स्तुताः। मन्त्राः। कविऽशस्ताः। अवन्तु॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः।

ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः॥ १५॥ [१०]

एव। नपातः। मम। तस्य। धीभिः। भरत्ऽवाजाः। अभि। अर्चन्ति। अर्कैः।

ग्नाः। हुतासः। वसवः। अधृष्टाः। विश्वे। स्तुतासः। भूत। यजत्राः॥ १५॥

[५१] [१६ ऋजिश्वा भारद्वाजः। विश्वे देवाः। त्रिष्टुप्, १३-१५ उष्णिहः, १६ अनुष्टुप्]

उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम्।

ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत्॥ १॥

उत्। ऊँ इति। त्यत्। चक्षुः। महि। मित्रयोः। आ। एति। प्रियम्। वरुणयोः। अदब्धम्।

ऋतस्य। शुचि। दर्शतम्। अनीकम्। रुक्मः। न। दिवः। उत्ऽइता। वि। अद्यौत्॥ १॥

वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः।

ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान्॥ २॥

वेद। यः। त्रीणि। विदथानि। एषाम्। देवानाम्। जन्म। सनुतः। आ। च। विप्रः।

ऋजु। मर्तेषु। वृजिना। च। पश्यन्। अभि। चष्टे। सूरः। अर्यः। एवान्॥ २॥

स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान्।

अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान्॥ ३॥

स्तुषे। ऊँ इति। वः। महः। ऋतस्य। गोपान्। अदितिम्। मित्रम्। वरुणम्। सुऽजातान्।

अर्यमणम्। भगम्। अदब्धऽधीतीन्। अच्छ। वोचे। सऽधन्यः। पावकान्॥ ३॥

रिशादसः सत्पतीँरदब्धान्महो राज्ञः सुवसनस्य दातॄन्।

यूनः सुक्षत्रान्क्षयतो दिवो नॄनादित्यान्याम्यदितिं दुवोयु॥ ४॥

रिशादसः। सत्ऽपतीन्। अदब्धान्। महः। राज्ञः। सुऽवसनस्य। दातॄन्।

यूनः। सुऽक्षत्रान्। क्षयतः। दिवः। नॄन्। आदित्यान्। यामि। अदितिम्। दुवःऽयु॥ ४॥

द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः।

विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त॥ ५॥ [११]

द्यौः। पितरिति। पृथिवि। मातः। अध्रुक्। अग्ने। भ्रातः। वसवः। मृळत। नः।

विश्वे। आदित्याः। अदिते। सऽजोषाः। अस्मभ्यम्। शर्म। बहुलम्। वि। यन्त॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा नो वृकाय वृक्यै समस्या अघायते रीरधता यजत्राः।

यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव॥ ६॥

मा। नः। वृकाय। वृक्यै। समस्यै। अघऽयते। रीरधत। यजत्राः।

यूयम्। हि। स्थ। रथ्यः। नः। तनूनाम्। यूयम्। दक्षस्य। वचसः। बभूव॥ ६॥

मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे।

विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट॥ ७॥

मा। वः। एनः। अन्यऽकृतम्। भुजेम। मा। तत्। कर्म। वसवः। यत्। चयध्वे।

विश्वस्य। हि। क्षयथ। विश्वऽदेवाः। स्वयम्। रिपुः। तन्वम्। रिरिषीष्ट॥ ७॥

नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम्।

नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे॥ ८॥

नमः। इत्। उग्रम्। नमः। आ। विवासे। नमः। दाधार। पृथिवीम्। उत। द्याम्।

नमः। देवेभ्यः। नमः। ईशे। एषाम्। कृतम्। चित्। एनः। नमसा। आ। विवासे॥ ८॥

ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान्।

ताँ आ नमोभिरुरुचक्षसो नॄन्विश्वान्व आ नमे महो यजत्राः॥ ९॥

ऋतस्य। वः। रथ्यः। पूतऽदक्षान्। ऋतस्य। पस्त्यऽसदः। अदब्धान्।

तान्। आ। नमःऽभिः। उरुऽचक्षसः। नॄन्। विश्वान्। वः। आ। नमे। महः। यजत्राः॥ ९॥

ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयन्ति।

सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः॥ १०॥ [१२]

ते। हि। श्रेष्ठऽवर्चसः। ते। ऊँ इति। नः। तिरः। विश्वानि। दुःऽइता। नयन्ति।

सुऽक्षत्रासः। वरुणः। मित्रः। अग्निः। ऋतऽधीतयः। वक्मराजऽसत्याः॥ १०॥

ते न इन्द्रः पृथिवी क्षाम वर्धन्पूषा भगो अदितिः पञ्च जनाः।

सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः॥ ११॥

ते। नः। इन्द्रः। पृथिवी। क्षाम। वर्धन्। पूषा। भगः। अदितिः। पञ्च। जनाः।

सुऽशर्माणः। सुऽअवसः। सुऽनीथाः। भवन्तु। नः। सुऽत्रात्रासः। सुऽगोपाः॥ ११॥

नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता।

आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नु। सुद्मानम्। दिव्यम्। नंशि। देवाः। भारत्ऽवाजः। सुऽमतिम्। याति। होता।
आसानेभिः। यजमानः। मियेधैः। देवानाम्। जन्म। वसुऽयुः। ववन्द॥ १२॥

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम्। दविष्ठमस्य सत्पते कृधी सुगम्॥ १३॥

अप। त्यम्। वृजिनम्। रिपुम्। स्तेनम्। अग्ने। दुःऽआध्यम्।
दविष्ठम्। अस्य। सत्ऽपते। कृधि। सुऽगम्॥ १३॥

ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः। जही न्य१त्रिणं पणिं वृको हि षः॥ १४॥

ग्रावाणः। सोम। नः। हि। कम्। सखिऽत्वनाय। वावशुः।
जहि। नि। अत्रिणम्। पणिम्। वृकः। हि। सः॥ १४॥

यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः। कर्ता नो अध्वन्ना सुगं गोपा अमा॥ १५॥

यूयम्। हि। स्थ। सुऽदानवः। इन्द्रऽज्येष्ठाः। अभिऽद्यवः।
कर्त। नः। अध्वन्। आ। सुऽगम्। गोपाः। अमा॥ १५॥

अपि पन्थामगन्महि स्वस्तिगामनेहसम्। येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु॥ १६॥ [१३]

अपि। पन्थाम्। अगन्महि। स्वस्तिऽगाम्। अनेहसम्।
येन। विश्वाः। परि। द्विषः। वृणक्ति। विन्दते। वसु॥ १६॥

[५२] [१७ ऋजिश्वा भारद्वाजः। विश्वे देवाः। त्रिष्टुप्, ७-१२ गायत्र्यः, १४ जगती]

न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः।
उब्जन्तु तं सुभ्व१ः पर्वतासो नि हीयतामतियाजस्य यष्टा॥ १॥

न। तत्। दिवा। न। पृथिव्या। अनु। मन्ये। न। यज्ञेन। न। उत। शमीभिः। आभिः।
उब्जन्तु। तम्। सुऽभ्वः। पर्वतासः। नि। हीयताम्। अतिऽयाजस्य। यष्टा॥ १॥

अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात्।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः॥ २॥

अति। वा। यः। मरुतः। मन्यते। नः। ब्रह्म। वा। यः। क्रियमाणम्। निनित्सात्।
तपूंषि। तस्मै। वृजिनानि। सन्तु। ब्रह्मऽद्विषम्। अभि। तम्। शोचतु। द्यौः॥ २॥

किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः।
किमङ्ग नः पश्यसि निद्यमानान्ब्रह्मद्विषे तपुषिं हेतिमस्य॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

किम्। अङ्ग। त्वा। ब्रह्मणः। सोम। गोपाम्। किम्। अङ्ग। त्वा। आहुः। अभिशस्तिऽपाम्। नः।
किम्। अङ्ग। नः। पश्यसि। निद्यमानान्। ब्रह्मऽद्विषे। तपुषिम्। हेतिम्। अस्य॥ ३॥

अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ॥ ४॥

अवन्तु। माम्। उषसः। जायमानाः। अवन्तु। मा। सिन्धवः। पिन्वमानाः।
अवन्तु। मा। पर्वतासः। ध्रुवासः। अवन्तु। मा। पितरः। देवऽहूतौ॥ ४॥

विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम्।
तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः॥ ५॥ [१४]

विश्वऽदानीम्। सुऽमनसः। स्याम। पश्येम। नु। सूर्यम्। उत्ऽचरन्तम्।
तथा। करत्। वसुऽपतिः। वसूनाम्। देवान्। ओहानः। अवसा। आऽगमिष्ठः॥ ५॥

इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव॥ ६॥

इन्द्रः। नेदिष्ठम्। अवसा। आऽगमिष्ठः। सरस्वती। सिन्धुऽभिः। पिन्वमाना।
पर्जन्यः। नः। ओषधीभिः। मयःऽभुः। अग्निः। सुऽशंसः। सुऽहवः। पिताऽइव॥ ६॥

विश्वे देवास आ गत शृणुता म इमं हवम्। इदं बर्हिर्नि षीदत॥ ७॥

विश्वे। देवासः। आ। गत। शृणुत। मे। इमम्। हवम्। आ। इदम्। बर्हिः। नि। सीदत॥ ७॥

यो वो देवा घृतस्नुना हव्येन प्रतिभूषति। तं विश्व उप गच्छथ॥ ८॥

यः। वः। देवाः। घृतऽस्नुना। हव्येन। प्रतिऽभूषति। तम्। विश्वे। उप। गच्छथ॥ ८॥

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृळीका भवन्तु नः॥ ९॥

उप। नः। सूनवः। गिरः। शृण्वन्तु। अमृतस्य। ये। सुऽमृळीकाः। भवन्तु। नः॥ ९॥

विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः। जुषन्तां युज्यं पयः॥ १०॥ [१५]

विश्वे। देवाः। ऋतऽवृधः। ऋतुऽभिः। हवनऽश्रुतः। जुषन्ताम्। युज्यम्। पयः॥ १०॥

स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा। इमा हव्या जुषन्त नः॥ ११॥

स्तोत्रम्। इन्द्रः। मरुत्ऽगणः। त्वष्टृऽमान्। मित्रः। अर्यमा। इमा। हव्या। जुषन्त। नः॥ ११॥

इमं नो अग्ने अध्वरं होतर्वयुनशो यज। चिकित्वान्दैव्यं जनम्॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमम्। नः। अग्ने। अध्वरम्। होतः। वयुनऽशः। यज। चिकित्वान्। दैव्यम्। जनम्॥ १२॥

विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ।

ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम्॥ १३॥

विश्वे। देवाः। शृणुत। इमम्। हवम्। मे। ये। अन्तरिक्षे। ये। उप। द्यवि। स्थ।

ये। अग्निऽजिह्वाः। उत। वा। यजत्राः। आऽसद्य। अस्मिन्। बर्हिषि। मादयध्वम्॥ १३॥

विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म।

मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम॥ १४॥

विश्वे। देवाः। मम। शृण्वन्तु। यज्ञियाः। उभे इति। रोदसी इति। अपाम्। नपात्। च। मन्म।

मा। वः। वचांसि। परिऽचक्ष्याणि। वोचम्। सुम्नेषु। इत्। वः। अन्तमाः। मदेम॥ १४॥

ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे।

ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः॥ १५॥

ये। के। च। ज्मा। महिनः। अहिऽमायाः। दिवः। जज्ञिरे। अपाम्। सधऽस्थे।

ते। अस्मभ्यम्। इषये। विश्वम्। आयुः। क्षपः। उस्राः। वरिवस्यन्तु। देवाः॥ १५॥

अग्नीपर्जन्यावतवतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः।

इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे॥ १६॥

अग्नीपर्जन्यौ। अवतम्। धियम्। मे। अस्मिन्। हवे। सुऽहवा। सुऽस्तुतिम्। नः।

इळाम्। अन्यः। जनयत्। गर्भम्। अन्यः। प्रजाऽवतीः। इषः। आ। धत्तम्। अस्मे इति॥ १६॥

स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे।

अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम्॥ १७॥ [१६]

स्तीर्णे। बर्हिषि। सम्ऽइधाने। अग्नौ। सुऽउक्तेन। महा। नमसा। आ। विवासे।

अस्मिन्। नः। अद्य। विदथे। यजत्राः। विश्वे। देवाः। हविषि। मादयध्वम्॥ १७॥

[५३] [१० भरद्वाजो बार्हस्पत्यः। पूषा। गायत्री, ८ अनुष्टुप्]

वयमु त्वा पथस्पते रथं न वाजसातये। धिये पूषन्नयुज्महि॥ १॥

वयम्। ऊँ इति। त्वा। पथः। पते। रथम्। न। वाजऽसातये। धिये। पूषन्। अयुज्महि॥ १॥

अभि नो नर्यं वसु वीरं प्रयतदक्षिणम्। वामं गृहपतिं नय॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभि। नः। नर्यम्। वसु। वीरम्। प्रयतऽदक्षिणम्। वामम्। गृहऽपतिम्। नय॥ २॥

अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय। पणेश्चिद्वि म्रदा मनः॥ ३॥

अदित्सन्तम्। चित्। आघृणे। पूषन्। दानाय। चोदय। पणेः। चित्। वि। म्रद। मनः॥ ३॥

वि पथो वाजसातये चिनुहि वि मृधो जहि। साधन्तामुग्र नो धियः॥ ४॥

वि। पथः। वाजऽसातये। चिनुहि। वि। मृधः। जहि। साधन्ताम्। उग्र। नः। धियः॥ ४॥

परि तृन्धि पणीनामारया हृदया कवे। अथेमस्मभ्यं रन्धय॥ ५॥ [१७]

परि। तृन्धि। पणीनाम्। आरया। हृदया कवे। अथ। ईम्। अस्मभ्यम्। रन्धय॥ ५॥

वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम्। अथेमस्मभ्यं रन्धय॥ ६॥

वि। पूषन्। आरया। तुद। पणेः। इच्छ। हृदि। प्रियम्। अथ। ईम्। अस्मभ्यम्। रन्धय॥ ६॥

आ रिख किकिरा कृणु पणीनां हृदया कवे। अथेमस्मभ्यं रन्धय॥ ७॥

आ। रिख। किकिरा। कृणु। पणीनाम्। हृदया। कवे। अथ। ईम्। अस्मभ्यम्। रन्धय॥ ७॥

यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे। तया समस्य हृदयमा रिख किकिरा कृणु॥ ८॥

याम्। पूषन्। ब्रह्मऽचोदनीम्। आराम्। बिभर्षि। आघृणे।

तया। समस्य। हृदयम्। आ। रिख। किकिरा। कृणु॥ ८॥

या ते अष्ट्रा गोओपशाघृणे पशुसाधनी। तस्यास्ते सुम्नमीमहे॥ ९॥

या। ते। अष्ट्रा। गोऽओपशा। आघृणे। पशुऽसाधनी। तस्याः। ते। सुम्नम्। ईमहे॥ ९॥

उत नो गोषणिं धियमश्वसां वाजसामुत। नृवत्कृणुहि वीतये॥ १०॥ [१८]

उत। नः। गोऽसनिम्। धियम्। अश्वऽसाम्। वाजऽसाम्। उत। नृऽवत्। कृणुहि। वीतये॥ १०॥

[५४] [१० बार्हस्पत्यो भरद्वाजः। पूषा। गायत्री।]

सं पूषन्विदुषा नय यो अञ्जसानुशासति। य एवेदमिति ब्रवत्॥ १॥

सम्। पूषन्। विदुषा। नय। यः। अञ्जसा। अनुऽशासति। यः। एव। इदम्। इति। ब्रवत्॥ १॥

समु पूष्णा गमेमहि यो गृहाँ अभिशासति। इम एवेति च ब्रवत्॥ २॥

सम्। ऊँ इति। पूष्णा। गमेमहि। यः। गृहान्। अभिऽशासति। इमे। एव। इति। च। ब्रवत्॥ २॥

पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते। नो अस्य व्यथते पविः॥ ३॥

पूष्णः। चक्रम्। न। रिष्यति। न। कोशः। अव। पद्यते। नो इति। अस्य। व्यथते। पविः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो अस्मै हविषाविधन्न तं पूषापि मृष्यते। प्रथमो विन्दते वसु॥ ४॥

यः। अस्मै। हविषा। अविधत्। न। तम्। पूषा। अपि। मृष्यते। प्रथमः। विन्दते। वसु॥ ४॥

पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजं सनोतु नः॥ ५॥ [१९]

पूषा। गाः। अनु। एतु। नः। पूषा। रक्षतु। अर्वतः। पूषा। वाजम्। सनोतु। नः॥ ५॥

पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः। अस्माकं स्तुवतामुप॥ ६॥

पूषन्। अनु। प्र। गाः। इहि। यजमानस्य। सुन्वतः। अस्माकम्। स्तुवताम्। उत॥ ६॥

माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे। अथारिष्टाभिरा गहि॥ ७॥

माकिः। नेशत्। माकीम्। रिषत्। माकीम्। सम्। शारि। केवटे। अथ। अरिष्टाभिः। आ। गहि॥ ७॥

शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम्। ईशानं राय ईमहे॥ ८॥

शृण्वन्तम्। पूषणम्। वयम्। इर्यम्। अनष्ट॰वेदसम्। ईशानम्। रायः। ईमहे॥ ८॥

पूषन्तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि॥ ९॥

पूषन्। तव। व्रते। वयम्। न। रिष्येम। कदा। चन। स्तोतारः। ते। इह। स्मसि॥ ९॥

परि पूषा परस्ताद्धस्तं दधातु दक्षिणम्। पुनर्नो नष्टमाजतु॥ १०॥ [२०]

परि। पूषा। परस्तात्। हस्तम्। दधातु। दक्षिणम्। पुनः। नः। नष्टम्। आ। अजतु॥ १०॥

[५५] [६ भरद्वाजो बार्हस्पत्यः। पूषा। गायत्री।]

एहि वां विमुचो नपादाघृणे सं सचावहै। रथीर्ऋतस्य नो भव॥ १॥

आ। इहि। वाम्। वि॰मुचः। नपात्। आघृणे। सम्। सचावहै। रथीः। ऋतस्य। नः। भव॥ १॥

रथीतमं कपर्दिनमीशानं राधसो महः। रायः सखायमीमहे॥ २॥

रथि॰तमम्। कपर्दिनम्। ईशानम्। राधसः। महः। रायः। सखायम्। ईमहे॥ २॥

रायो धारास्याघृणे वसो राशिरजाश्व। धीवतोधीवतः सखा॥ ३॥

रायः। धारा। असि। आघृणे। वसो इति। राशिः। अज॰अश्व। धीवतः२धीवतः। सखा॥ ३॥

पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम्। स्वसुर्यो जार उच्यते॥ ४॥

पूषणम्। नु। अज॰अश्वम्। उप। स्तोषाम। वाजिनम्। स्वसुः। यः। जारः। उच्यते॥ ४॥

मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा मम॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मातुः । दिधिषुम् । अब्रवम् । स्वसुः । जारः । शृणोतु । नः । भ्राता । इन्द्रस्य । सखा । मम ॥ ५ ॥

आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ॥ ६ ॥ [२१]

आ । अजासः । पूषणम् । रथे । निऽशृम्भाः । ते । जनऽश्रियम् । देवम् । वहन्तु । बिभ्रतः ॥ ६ ॥

[५६] [६ भरद्वाजो बार्हस्पत्यः । पूषा । गायत्री, ६ अनुष्टुप् ।]

य एनमादिदेशति करम्भादिति पूषणम् । न तेन देव आदिशे ॥ १ ॥

यः । एनम् । आऽदिदेशति । करम्भऽअत् । इति । पूषणम् । न । तेन । देवः । आऽदिशे ॥ १ ॥

उत घा स रथीतमः सख्या सत्पतिर्युजा । इन्द्रो वृत्राणि जिघ्नते ॥ २ ॥

उत । घ । सः । रथिऽतमः । सख्या । सत्ऽपतिः । युजा । इन्द्रः । वृत्राणि । जिघ्नते ॥ २ ॥

उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् । न्यैरयद्रथीतमः ॥ ३ ॥

उत । अदः । परुषे । गवि । सूरः । चक्रम् । हिरण्ययम् । नि । ऐरयत् । रथिऽतमः ॥ ३ ॥

यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः । तत्सु नो मन्म साधय ॥ ४ ॥

यत् । अद्य । त्वा । पुरुऽस्तुत । ब्रवाम । दस्र । मन्तुऽमः । तत् । सु । नः । मन्म । साधय ॥ ४ ॥

इमं च नो गवेषणं सातये सीषधो गणम् । आरात्पूषन्नसि श्रुतः ॥ ५ ॥

इमम् । च । नः । गोऽएषणम् । सातये । सीसधः । गणम् । आरात् । पूषन् । असि । श्रुतः ॥ ५ ॥

आ ते स्वस्तिमीमह आरेअघामुपावसुम् । अद्या च सर्वतातये श्वश्च सर्वतातये ॥ ६ ॥ [२२]

आ । ते । स्वस्तिम् । ईमहे । आरेऽअघाम् । उपऽवसुम् ।

अद्य । च । सर्वऽतातये । श्वः । च । सर्वऽतातये ॥ ६ ॥

[५७] [६ भरद्वाजो बार्हस्पत्यः । इन्द्रापूषणौ । गायत्री ।]

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥ १ ॥

इन्द्रा । नु । पूषणा । वयम् । सख्याय । स्वस्तये । हुवेम । वाजऽसातये ॥ १ ॥

सोममन्य उपासदत्पातवे चम्वोः सुतम् । करम्भमन्य इच्छति ॥ २ ॥

सोमम् । अन्यः । उप । असदत् । पातवे । चम्वोः । सुतम् । करम्भम् । अन्यः । इच्छति ॥ २ ॥

अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां वृत्राणि जिघ्नते ॥ ३ ॥

अजाः । अन्यस्य । वह्नयः । हरी इति । अन्यस्य । सम्ऽभृता । ताभ्याम् । वृत्राणि । जिघ्नते ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः। तत्र पूषाभवत्सचा॥ ४॥

यत्। इन्द्रः। अनयत्। रितः। मही:। अपः। वृषन्ऽतमः। तत्र। पूषा। अभवत्। सचा॥ ४॥

तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव। इन्द्रस्य चा रभामहे॥ ५॥

ताम्। पूष्णः। सुऽमतिम्। वयम्। वृक्षस्य। प्र। वयाम्ऽइव। इन्द्रस्य। च। आ। रभामहे॥ ५॥

उत्पूषणं युवामहेऽभीशूँरिव सारथिः। मह्या इन्द्रं स्वस्तये॥ ६॥ [२३]

उत्। पूषणम्। युवामहे। अभीशून्ऽइव। सारथिः। मह्यै। इन्द्रम्। स्वस्तये॥ ६॥

[५८] [४ भरद्वाजो बार्हस्पत्यः। पूषा। त्रिष्टुप्, २ जगती।]

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ १॥

शुक्रम्। ते। अन्यत्। यजतम्। ते। अन्यत्। विषुरूपे इति विषुऽरूपे। अहनी इति। द्यौःऽइव। असि।
विश्वाः। हि। मायाः। अवसि। स्वधाऽवः। भद्रा। ते। पूषन्। इह। रातिः। अस्तु॥ १॥

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते॥ २॥

अजऽअश्वः। पशुऽपाः। वाजऽपस्त्यः। धियम्ऽजिन्वः। भुवने। विश्वे। अर्पितः।
अष्ट्राम्। पूषा। शिथिराम्। उत्ऽवरीवृजत्। सम्ऽचक्षाणः। भुवना। देवः। ईयते॥ २॥

यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः॥ ३॥

याः। ते। पूषन्। नावः। अन्तरिति। समुद्रे। हिरण्ययीः। अन्तरिक्षे। चरन्ति।
ताभिः। यासि। दूत्याम्। सूर्यस्य। कामेन। कृत। श्रवः। इच्छमानः॥ ३॥

पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम्॥ ४॥ [२४]

पूषा। सुऽबन्धुः। दिवः। आ। पृथिव्याः। इळः। पतिः। मघऽवा। दस्मऽवर्चाः।
यम्। देवासः। अददुः। सूर्यायै। कामेन। कृतम्। तवसम्। सुऽअञ्चम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[५९] [१० भरद्वाजो बार्हस्पत्यः। इन्द्राग्नी। बृहती, ७-१० अनुष्टुभः।]

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम्॥ १॥

प्र। नु। वोच। सुतेषु। वाम्। वीर्या। यानि। चक्रथुः।
हतासः। वाम्। पितरः। देवऽशत्रवः। इन्द्राग्नी इति। जीवथः। युवम्॥ १॥

बळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ।
समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा॥ २॥

बट्। इत्था। महिमा। वाम्। इन्द्राग्नी इति। पनिष्ठ। आ।
समानः। वाम्। जनिता। भ्रातरा। युवम्। यमौ। इहेहऽमातरा॥ २॥

ओकिवांसा सुते सचाँ अश्वा सप्तीइवादने।
इन्द्रा न्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे॥ ३॥

ओकिऽवांसा। सुते। सचा। अश्वा। सप्तीइवेति सप्तीऽइव। आदने।
इन्द्रा। नु। अग्नी इति। अवसा। इह। वज्रिणा। वयम्। देवा। हवामहे॥ ३॥

य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन॥ ४॥

यः। इन्द्राग्नी इति। सुतेषु। वाम्। स्तवत्। तेषु। ऋतऽवृधा।
जोषऽवाकम्। वदतः। पज्रऽहोषिणा। न। देवा। भसथः। चन॥ ४॥

इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति।
विषूचो अश्वान्युयुजान ईयत एकः समान आ रथे॥ ५॥ [२५]

इन्द्राग्नी इति। कः। अस्य। वाम्। देवौ। मर्तः। चिकेतति।
विषूचः। अश्वान्। युयुजानः। ईयते। एकः। समाने। आ। रथे॥ ५॥

इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः।
हित्वा शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत्॥ ६॥

इन्द्राग्नी इति। अपात्। इयम्। पूर्वा। आ। अगात्। पत्ऽवतीभ्यः।
हित्वा। शिरः। जिह्वया। वावदत्। चरत्। त्रिंशत्। पदा। नि। अक्रमीत्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रा॑ग्नी॒ आ हि त॑न्व॒ते नरो॒ धन्वा॑नि बा॒ह्वोः। मा नो॑ अ॒स्मिन्म॑हाध॒ने परा॑ वर्क्तं॒ गवि॑ष्टिषु॥ ७॥

इन्द्रा॑ग्नी॒ इति॑। आ। हि। त॒न्व॒ते। नर॑ः। धन्वा॑नि। बा॒ह्वोः।

मा। नः॒। अ॒स्मिन्। म॒हा॒ऽध॒ने। परा॑। व॒र्क्त॒म्। गोऽइ॑ष्टिषु॥ ७॥

इन्द्रा॑ग्नी॒ तप॑न्ति मा॒घा अ॒र्यो अरा॑तयः। अप॒ द्वेषां॑स्या कृ॑तं युयु॒तं सूर्या॒दधि॑॥ ८॥

इन्द्रा॑ग्नी॒ इति॑। तप॑न्ति। मा॒। अ॒घाः। अ॒र्यः। अरा॑तयः।

अप॑। द्वेषां॑सि। आ। कृ॒त॒म्। यु॒यु॒तम्। सू॒र्या॑त्। अधि॑॥ ८॥

इन्द्रा॑ग्नी युवोरपि॒ वसु॑ दि॒व्यानि॒ पार्थि॑वा। आ न॑ इ॒ह प्र य॑च्छतं र॒यिं वि॒श्वायु॑पोषसम्॥ ९॥

इन्द्रा॑ग्नी॒ इति॑। यु॒वोः। अपि॑। वसु॑। दि॒व्यानि॑। पार्थि॑वा।

आ। नः॒। इ॒ह। प्र। य॒च्छ॒त॒म्। र॒यिम्। वि॒श्वायु॑ऽपोषसम्॥ ९॥

इन्द्रा॑ग्नी उक्थवाहसा॒ स्तोमे॑भिर्हवनश्रुता। वि॒श्वा॑भिर्गी॒र्भिरा ग॑तम॒स्य सोम॑स्य पी॒तये॑॥ १०॥

इन्द्रा॑ग्नी॒ इति॑। उ॒क्थ॒ऽवा॒ह॒सा॒। स्तोमे॑भिः। ह॒व॒न॒ऽश्रु॒ता॒। [२६]

विश्वा॑भिः। गी॒ःऽभिः। आ। ग॒त॒म्। अ॒स्य। सोम॑स्य। पी॒तये॑॥ १०॥

[६०] [१५ भरद्वाजो बार्हस्पत्यः। इन्द्राग्नी। गायत्री; १-३ त्रिष्टुभः, १४ बृहती, १५ अनुष्टुप॥]

श्नथ॑द्वृ॒त्रमु॒त स॑नोति॒ वाज॒मिन्द्रा॒ यो अ॒ग्नी सहु॑री सप॒र्यात्।
इ॒र॒ज्यन्ता॑ वस॒व्य॑स्य॒ भूरेः॒ सह॑स्तमा॒ सह॑सा वाज॒यन्ता॑॥ १॥

श्नथ॑त्। वृ॒त्रम्। उ॒त। स॒नो॒ति॒। वाज॑म्। इन्द्रा॑। यः। अ॒ग्नी इति॑। सहु॑री॒ इति॑। स॒प॒र्यात्।

इ॒र॒ज्यन्ता॑। व॒स॒व्य॑स्य। भूरेः॑। सह॑ःऽतमा। सह॑सा। वा॒ज॒ऽयन्ता॑॥ १॥

ता यो॑धिष्टम॒भि गा इ॑न्द्र नू॒नम॒पः स्व॑रु॒षसो॑ अग्न ऊ॒ळ्हाः।
दिश॒ः स्व॑रु॒षस इन्द्र चि॒त्रा अ॒पो गा अ॑ग्ने युवसे नि॒युत्वा॑न्॥ २॥

ता। यो॒धि॒ष्टम्। अ॒भि। गाः। इ॒न्द्र॒। नू॒नम्। अ॒पः। स्व॑ः। उ॒षस॑ः। अ॒ग्ने॒। ऊ॒ळ्हाः।

दिश॑ः। स्व॑ः। उ॒षस॑ः। इ॒न्द्र॒। चि॒त्राः। अ॒पः। गाः। अ॒ग्ने॒। यु॒व॒से॒। नि॒युत्वा॑न्॥ २॥

आ वृ॑त्रहणा वृत्रह॒भिः॒ शुष्मै॒रिन्द्र॑ या॒तं नमो॑भिरग्ने अ॒र्वाक्।
यु॒वं राधो॑भि॒रक॑वेभिरि॒न्द्राग्ने॑ अ॒स्मे भ॑वतमुत्त॒मेभिः॑॥ ३॥

आ। वृ॒त्र॒ऽह॒ना॒। वृ॒त्र॒ह॒ऽभिः॑। शुष्मैः॑। इन्द्र॑। या॒तम्। नम॑ःऽभिः। अ॒ग्ने॒। अ॒र्वाक्।

यु॒वम्। राध॑ःऽभिः। अक॑वेभिः। इन्द्र॑। अग्ने॑। अ॒स्मे इति॑। भ॒व॒त॒म्। उ॒त्ऽत॒मेभि॑ः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता हु॑वे॒ ययो॑रि॒दं प॒प्ने विश्वं॑ पु॒रा कृ॒तम्। इ॒न्द्रा॒ग्नी न म॑र्धतः॥ ४॥

ता। हु॒वे। ययोः॑। इ॒दम्। प॒प्ने। विश्व॑म्। पु॒रा। कृ॒तम्। इ॒न्द्रा॒ग्नी इति॑। न। म॒र्ध॒तः॒॥ ४॥

उ॒ग्रा वि॑घ॒निना॒ मृध॑ इन्द्रा॒ग्नी ह॑वामहे। ता नो॑ मृळात ई॒दृशे॑॥ ५॥ [२७]

उ॒ग्रा। वि॒ऽघ॒निना॑। मृधः॑। इ॒न्द्रा॒ग्नी इति॑। ह॒वा॒म॒हे॒। ता। नः॒। मृ॒ळा॒तः॒। ई॒दृशे॑॥ ५॥

ह॒तो वृ॒त्राण्यार्या॑ ह॒तो दासा॑नि॒ सत्प॑ती। ह॒तो विश्वा॒ अप॒ द्विषः॑॥ ६॥

ह॒तः। वृ॒त्राणि॑। आर्या॑। ह॒तः। दासा॑नि। सत्प॑ती॒ इति॒ सत्ऽप॑ती। ह॒तः। विश्वाः॑। अप॑। द्विषः॑॥ ६॥

इन्द्रा॑ग्नी यु॒वामि॒मे॒३॒॑ऽभि स्तोमा॑ अनूषत। पिब॑तं शंभुवा सु॒तम्॥ ७॥

इन्द्रा॑ग्नी॒ इति॑। यु॒वाम्। इ॒मे। अ॒भि। स्तोमाः॑। अ॒नू॒ष॒त॒। पिब॑तम्। श॒म्ऽभु॒वा॒। सु॒तम्॥ ७॥

या वां॒ सन्ति॑ पुरु॒स्पृहो॑ नि॒युतो॑ दा॒शुषे॑ नरा। इन्द्रा॑ग्नी॒ ताभि॒रा ग॑तम्॥ ८॥

याः। वा॒म्। सन्ति॑। पु॒रु॒ऽस्पृहः॑। नि॒ऽयुतः॑। दा॒शुषे॑। न॒रा॒। इन्द्रा॑ग्नी॒ इति॑। ताभिः॑। आ। ग॒त॒म्॥ ८॥

ताभि॒रा ग॑च्छतं न॒रोपे॒दं सव॑नं सु॒तम्। इन्द्रा॑ग्नी॒ सोम॑पीतये॥ ९॥

ताभिः॑। आ। ग॒च्छ॒त॒म्। न॒रा॒। उप॑। इ॒दम्। सव॑नम्। सु॒तम्। इन्द्रा॑ग्नी॒ इति॑। सोम॑ऽपीतये॥ ९॥

तमी॑ळिष्व॒ यो अ॒र्चिषा॒ वना॒ विश्वा॑ परि॒ष्वज॑त्। कृ॒ष्णा कृ॒णोति॑ जि॒ह्वया॑॥ १०॥ [२८]

तम्। ई॒ळि॒ष्व॒। यः। अ॒र्चिषा॑। वना॑। विश्वा॑। प॒रि॒ऽस्वज॑त्। कृ॒ष्णा। कृ॒णोति॑। जि॒ह्वया॑॥ १०॥

य इ॒द्ध आ॒विवा॑सति सु॒म्नमिन्द्र॑स्य॒ मर्त्यः॑। द्यु॒म्नाय॑ सु॒तरा॑ अ॒पः॥ ११॥

यः। इ॒द्धे। आ॒ऽविवा॑सति। सु॒म्नम्। इन्द्र॑स्य। मर्त्यः॑। द्यु॒म्नाय॑। सु॒ऽतराः॑। अ॒पः॥ ११॥

ता नो॒ वाज॑वती॒रिष॑ आ॒शून्पि॑पृत॒मर्व॑तः। इन्द्र॑म॒ग्निं च॒ वोळ्ह॑वे॥ १२॥

ता। नः॒। वाज॑ऽवतीः। इषः॑। आ॒शून्। पि॒पृ॒त॒म्। अर्व॑तः। इन्द्र॑म्। अ॒ग्निम्। च॒। वोळ्ह॑वे॥ १२॥

उ॒भा वा॑मिन्द्राग्नी आहु॒वध्या॑ उ॒भा राध॑सः स॒ह मा॑द॒यध्यै॑।
उ॒भा दा॒तारा॑वि॒षां र॑यी॒णामु॒भा वाज॑स्य सा॒तये॑ हुवे वाम्॥ १३॥

उ॒भा। वा॒म्। इ॒न्द्रा॒ग्नी॒ इति॑। आ॒ऽहु॒वध्यै॑। उ॒भा। राध॑सः। स॒ह। मा॒द॒यध्यै॑।
उ॒भा। दा॒तारौ॑। इ॒षाम्। र॒यी॒णाम्। उ॒भा। वाज॑स्य। सा॒तये॑। हु॒वे॒। वा॒म्॥ १३॥

आ नो॒ गव्ये॑भि॒रश्व्यै॒र्वस॒व्यै॒३॒॑रुप॑ गच्छतम्।
सखा॑यौ दे॒वौ स॒ख्याय॑ शं॒भुवे॑न्द्रा॒ग्नी ता ह॑वामहे॥ १४॥

आ। नः॒। गव्ये॑भिः। अश्व्यैः॑। व॒स॒व्यैः॑। उप॑। ग॒च्छ॒त॒म्।
सखा॑यौ। दे॒वौ। स॒ख्याय॑। श॒म्ऽभुवा॑। इ॒न्द्रा॒ग्नी इति॑। ता। ह॒वा॒म॒हे॒॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः। वीतं हव्यान्या गतं पिबतं सोम्यं मधु॥ १५॥ [२९]

इन्द्राग्नी इति। शृणुतम्। हवम्। यजमानस्य। सुन्वतः।

वीतम्। हव्यानि। आ। गतम्। पिबतम्। सोम्यम्। मधु॥ १५॥

[६१] [१४ भरद्वाजो बार्हस्पत्यः। सरस्वती। गायत्री, १-३, १३ जगत्यः; १४ त्रिष्टुप्।]

इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे।

या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति॥ १॥

इयम्। अददात्। रभसम्। ऋणऽच्युतम्। दिवःऽदासम्। वध्रिऽअश्वाय। दाशुषे।

या। शश्वन्तम्। आऽचखाद। अवसम्। पणिम्। ता। ते। दात्राणि। तविषा। सरस्वति॥ १॥

इयं शुष्मेभिर्बिसखाइवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः।

पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः॥ २॥

इयम्। शुष्मेभिः। बिसखाःऽइव। अरुजत्। सानु। गिरीणाम्। तविषेभिः। ऊर्मिऽभिः।

पारावतऽघ्नीम्। अवसे। सुवृक्तिऽभिः। सरस्वतीम्। आ। विवासेम। धीतिऽभिः॥ २॥

सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः।

उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति॥ ३॥

सरस्वती। देवऽनिदः। नि। बर्हय। प्रऽजाम्। विश्वस्य। बृसयस्य। मायिनः।

उत। क्षितिऽभ्यः। अवनीः। अविन्दः। विषम्। एभ्यः। अस्रवः। वाजिनीऽवति॥ ३॥

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु॥ ४॥

प्र। नः। देवी। सरस्वती। वाजेभिः। वाजिनीऽवती। धीनाम्। अवित्री। अवतु॥ ४॥

यस्त्वा देवि सरस्वत्युपब्रूते धने हिते। इन्द्रं न वृत्रतूर्ये॥ ५॥ [३०]

यः। त्वा। देवि। सरस्वति। उपऽब्रूते। धने। हिते। इन्द्रम्। न। वृत्रऽतूर्ये॥ ५॥

त्वं देवि सरस्वत्यवा वाजेषु वाजिनि। रदा पूषेव नः सनिम्॥ ६॥

त्वम्। देवि। सरस्वति। अव। वाजेषु। वाजिनि। रद। पूषाऽइव। नः। सनिम्॥ ६॥

उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः। वृत्रघ्नी वष्टि सुष्टुतिम्॥ ७॥

उत। स्या। नः। सरस्वती। घोरा। हिरण्यऽवर्तनिः। वृत्रऽघ्नी। वष्टि। सुऽस्तुतिम्॥ ७॥

यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः। अमश्चरति रोरुवत्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्याः। अनन्तः। अह्रुतः। त्वेषः। चरिष्णुः। अर्णवः। अमः। चरति। रोरुवत्॥ ८॥

सा नो विश्वा अति द्विषः स्वसृरन्या ऋतावरी। अतन्नहेव सूर्यः॥ ९॥

सा। नः। विश्वाः। अति। द्विषः। स्वसृः। अन्याः। ऋतऽवरी। अतन्। अहाऽइव। सूर्यः॥ ९॥

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत्॥ १०॥ [३१]

उत। नः। प्रिया। प्रियासु। सप्तऽस्वसा। सुजुष्ठा। सरस्वती। स्तोम्या। भूत्॥ १०॥

आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम्। सरस्वती निदस्पातु॥ ११॥

आऽपप्रुषी। पार्थिवानि। उरु। रजः। अन्तरिक्षम्। सरस्वती। निदः। पातु॥ ११॥

त्रिषधस्था सप्तधातुः पञ्च जाता वर्धयन्ती। वाजेवाजे हव्या भूत्॥ १२॥

त्रिऽसधस्था। सप्तऽधातुः। पञ्च। जाता। वर्धयन्ती। वाजेऽवाजे। हव्या। भूत्॥ १२॥

प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा।

रथइव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती॥ १३॥

प्र। या। महिम्ना। महिना। आसु। चेकिते। द्युम्नेभिः। अन्याः। अपसाम्। अपःऽतमा।

रथःऽइव। बृहती। विऽभ्वने। कृता। उपऽस्तुत्या। चिकितुषा। सरस्वती॥ १३॥

सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक्।

जुषस्व नः सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म॥ १४॥ [३२] {५}

सरस्वति। अभि। नः। नेषि। वस्यः। मा। अप। स्फरीः। पयसा। मा। नः। आ। धक्।

जुषस्व। नः। सख्या। वेश्या। च। मा। त्वत्। क्षेत्राणि। अरणानि। गन्म॥ १४॥

इत्याश्वलायन-संहितायां चतुर्थाष्टके अष्टमोऽध्यायः समाप्तः

समाप्तं च चतुर्थाष्टकम॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके प्रथमोऽध्यायः ॥

[६२] [११ भरद्वाजो बार्हस्पत्यः । अश्विनौ । त्रिष्टुप् ।]

स्तुषे नरा दिवो अस्य प्रसन्ताश्विना हुवे जरमाणो अर्कैः ।
या सद्य उस्रा व्युषि ज्म अन्तान्युयूषतः पर्युरू वरांसि ॥ १ ॥
स्तुषे । नरा । दिवः । अस्य । प्रऽसन्ता । अश्विना । हुवे । जरमाणः । अर्कैः ।
या । सद्यः । उस्रा । विऽउषि । ज्मः । अन्तान् । युयूषतः । परि । उरु । वरांसि ॥ ११ ॥
ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।
पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान् ॥ २ ॥
ता । यज्ञम् । आ । शुचिऽभिः । चक्रमाणा । रथस्य । भानुम् । रुरुचुः । रजःऽभिः ।
पुरु । वरांसि । अमिता । मिमाना । अपः । धन्वानि । अति । याथः । अज्रान् ॥ २ ॥
ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धिय ऊहथुः शश्वदश्वैः ।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ॥ ३ ॥
ता । ह । त्यत् । वर्तिः । यत् । अरध्रम् । उग्रा । इत्था । धियः । ऊहथुः । शश्वत् । अश्वैः ।
मनःऽजवेभिः । इषिरैः । शयध्यै । परि । व्यथिः । दाशुषः । मर्त्यस्य ॥ ३ ॥
ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग्युवाना ॥ ४ ॥
ता । नव्यसः । जरमाणस्य । मन्म । उप । भूषतः । युयुजानसप्ती इति युयुजानऽसप्ती ।
शुभम् । पृक्षम् । इषम् । ऊर्जम् । वहन्ता । होता । यक्षत् । प्रत्नः । अध्रुक् । युवाना ॥ ४ ॥
ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्रराती ॥ ५ ॥ [१]
ता । वल्गू इति । दस्रा । पुरुशाकऽतमा । प्रत्ना । नव्यसा । वचसा । आ । विवासे ।
या । शंसते । स्तुवते । शम्ऽभविष्ठा । बभूवतुः । गृणते । चित्रराती इति चित्रऽराती ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके प्रथमोऽध्यायः ॥

[६२] [११ भरद्वाजो बार्हस्पत्यः। अश्विनौ। त्रिष्टुप्।]

स्तुषे नरा दिवो अस्य प्रसन्ताश्विना हुवे जरमाणो अर्कैः।
या सद्य उस्रा व्युषि ज्म अन्तान्युयूषतः पर्युरू वरांसि॥ १॥
स्तुषे। नरा। दिवः। अस्य। प्रऽसन्ता। अश्विना। हुवे। जरमाणः। अर्कैः।
या। सद्यः। उस्रा। विऽउषि। ज्मः। अन्तान्। युयूषतः। परि। उरु। वरांसि॥ ११॥
ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः।
पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान्॥ २॥
ता। यज्ञम्। आ। शुचिऽभिः। चक्रमाणा। रथस्य। भानुम्। रुरुचुः। रजःऽभिः।
पुरु। वरांसि। अमिता। मिमाना। अपः। धन्वानि। अति। याथः। अज्रान्॥ २॥
ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धियं ऊहथुः शश्वदश्वैः।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य॥ ३॥
ता। ह। त्यत्। वर्तिः। यत्। अरध्रम्। उग्रा। इत्था। धियः। ऊहथुः। शश्वत्। अश्वैः।
मनःऽजवेभिः। इषिरैः। शयध्यै। परि। व्यथिः। दाशुषः। मर्त्यस्य॥ ३॥
ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग्युवाना॥ ४॥
ता। नव्यसः। जरमाणस्य। मन्म। उप। भूषतः। युयुजानसप्ती इति युयुजानऽसप्ती।
शुभम्। पृक्षम्। इषम्। ऊर्जम्। वहन्ता। होता। यक्षत्। प्रत्नः। अध्रुक्। युवाना॥ ४॥
ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्ररांती॥ ५॥ [१]
ता। वल्गू इति। दस्रा। पुरुशाकऽतमा। प्रत्ना। नव्यसा। वचसा। आ। विवासे।
या। शंसते। स्तुवते। शम्ऽभविष्ठा। बभूवतुः। गृणते। चित्ररांती इति चित्रऽरांती॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभिः।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात्॥ ६॥

ता। भुज्युम्। विऽभिः। अत्ऽभ्यः। समुद्रात्। तुग्रस्य। सूनुम्। ऊहथुः। रजःऽभिः।
अरेणुऽभिः। योजनेभिः। भुजन्ता। पतत्रिऽभिः। अर्णसः। नि। उपऽस्थात्॥ ६॥

वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः।
दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू॥ ७॥

वि। जयुषा। रथ्या। यातम्। अद्रिम्। श्रुतम्। हवम्। वृषणा। वध्रिऽमत्याः।
दशस्यन्ता। शयवे। पिप्यथुः। गाम्। इति। च्यवाना। सुऽमतिम्। भुरण्यू इति॥ ७॥

यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात॥ ८॥

यत्। रोदसी इति। प्रऽदिवः। अस्ति। भूम। हेळः। देवानाम्। उत। मर्त्यऽत्रा।
तत्। आदित्याः। वसवः। रुद्रियासः। रक्षःऽयुजे। तपुः। अघम्। दधात॥ ८॥

य ईं राजानावृतुथा विदधद्रजसो मित्रो वरुणश्चिकेतत्।
गम्भीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचस आनवाय॥ ९॥

यः। ईम्। राजानौ। ऋतुऽथा। विऽदधत्। रजसः। मित्रः। वरुणः। चिकेतत्।
गम्भीराय। रक्षसे। हेतिम्। अस्य। द्रोघाय। चित्। वचसे। आनवाय॥ ९॥

अन्तरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम्॥ १०॥

अन्तरैः। चक्रैः। तनयाय। वर्तिः। द्युऽमता। आ। यातम्। नृऽवता। रथेन।
सनुत्येन। त्यजसा। मर्त्यस्य। वनुष्यताम्। अपि। शीर्षा। ववृक्तम्॥ १०॥

आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक्।
दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती॥ ११॥ [२]

आ। परमाभिः। उत। मध्यमाभिः। नियुत्ऽभिः। यातम्। अवमाभिः। अर्वाक्।
दृळ्हस्य। चित्। गोऽमतः। वि। व्रजस्य। दुरः। वर्तम्। गृणते। चित्ररातीइति चित्रऽराती॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६३] [११ भरद्वाजो बार्हस्पत्यः। अश्विनौ। त्रिष्टुप्, १ विराट्, ११ एकपदा त्रिष्टुप्।]

क्व१त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान्।
आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन्॥ १॥

क्व। त्या। वल्गू इति। पुरुऽहूता। अद्य। दूतः। न। स्तोमः। अविदत्। नमस्वान्।
आ। यः। अर्वाक्। नासत्या। ववर्त। प्रेष्ठा। हि। असथः। अस्य। मन्मन्॥ १॥

अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः।
परि ह त्यद्वर्तिर्याथो रिषो न यत्परो नान्तरस्तुतुर्यात्॥ २॥

अरम्। मे। गन्तम्। हवनाय। अस्मै। गृणाना। यथा। पिबाथः। अन्धः।
परि। ह। त्यत्। वर्तिः। याथः। रिषः। न। यत्। परः। न। अन्तरः। तुतुर्यात्॥ २॥

अकारि वामन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम्।
उत्तानहस्तो युवयुर्ववन्दा वां नक्षन्तो अद्रय आञ्जन्॥ ३॥

अकारि। वाम्। अन्धसः। वरीमन्। अस्तारि। बर्हिः। सुप्रऽअयनतमम्।
उत्तानऽहस्तः। युवऽयुः। ववन्द। आ। वाम्। नक्षन्त। अद्रयः। आञ्जन्॥ ३॥

ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन्॥ ४॥

ऊर्ध्वः। वाम्। अग्निः। अध्वरेषु। अस्थात्। प्र। रातिः। एति। जूर्णिनी। घृताची।
प्र। होता। गूर्तऽमनाः। उराणः। अयुक्त। यः। नासत्या। हवीमन्॥ ४॥

अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम्।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानाम्॥ ५॥ [३]

अधि। श्रिये। दुहिता। सूर्यस्य। रथम्। तस्थौ। पुरुऽभुजा। शतऽऊतिम्।
प्र। मायाभिः। मायिना। भूतम्। अत्र। नरा। नृतू इति। जनिमन्। यज्ञियानाम्॥ ५॥

युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः।
प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वाम्॥ ६॥

युवम्। श्रीभिः। दर्शताभिः। आभिः। शुभे। पुष्टिम्। ऊहथुः। सूर्यायाः।
प्र। वाम्। वयः। वपुषे। अनु। पप्तन्। नक्षत्। वाणी। सुऽस्तुता। धिष्ण्या। वाम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु।

प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः॥ ७॥

आ। वाम्। वयः। अश्वासः। वहिष्ठाः। अभि। प्रयः। नासत्या। वहन्तु।

प्र। वाम्। रथः। मनःऽजवाः। असर्जि। इषः। पृक्षः। इषिधः। अनु। पूर्वीः॥ ७॥

पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसंक्राम्।

स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन्॥ ८॥

पुरु। हि। वाम्। पुरुऽभुजा। देष्णम्। धेनुम्। नः। इषम्। पिन्वतम्। असंक्राम्।

स्तुतः। च। वाम्। माध्वी इति। सुऽस्तुतिः। च। रसाः। च। ये। वाम्। अनु। रातिम्। अग्मन्॥ ८॥

उत मे ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्वा।

शाण्डो दाद्धिरणिनः स्मद्दिष्टीन्दश वशासो अभिषाच ऋष्वान्॥ ९॥

उत। मे। ऋज्रे इति। पुरयस्य। रघ्वी इति। सुऽमीळ्हे। शतम्। पेरुके। च। पक्वा।

शाण्डः। दात्। हिरणिनः। स्मत्ऽदिष्टीन्। दश। वशासः। अभिऽसाचः। ऋष्वान्॥ ९॥

सं वां शता नासत्या सहस्राश्वानां पुरुपन्था गिरे दात्।

भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः॥ १०॥

सम्। वाम्। शता। नासत्या। सहस्रा। अश्वानाम्। पुरुऽपन्थाः। गिरे। दात्।

भरत्ऽवाजाय। वीर। नु। गिरे। दात्। हता। रक्षांसि। पुरुऽदंससा। स्युरिति स्युः॥ १०॥

आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम्॥ ११॥ [४]

आ। वाम्। सुम्ने। वरिमन्। सूरिऽभिः। स्याम्॥ ११॥

[६४] [६ भरद्वाजो बार्हस्पत्यः। उषाः। त्रिष्टुप्।]

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः।

कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी॥ १॥

उत्। ऊँ इति। श्रिये। उषसः। रोचमानाः। अस्थुः। अपाम्। न। ऊर्मयः। रुशन्तः।

कृणोति। विश्वा। सुऽपथा। सुऽगानि। अभूत्। ऊँ इति। वस्वी। दक्षिणा। मघोनी॥ १॥

भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन्।

आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भद्रा। ददृक्षे। उर्विया। वि। भासि। उत्। ते। शोचिः। भानवः। द्याम्। अपप्तन्।
आविः। वक्षः। कृणुषे। शुम्भमाना। उषः। देवि। रोचमाना। महःऽभिः॥ २॥

वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम्।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळ्हा॥ ३॥

वहन्ति। सीम्। अरुणासः। रुशन्तः। गावः। सुऽभगाम्। उर्विया। प्रथानाम्।
अप। ईजते। शूरः। अस्ताऽइव। शत्रून्। बाधते। तमः। अजिरः। न। वोळ्हा॥ ३॥

सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो।
सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै॥ ४॥

सुऽगा। उत। ते। सुऽपथा। पर्वतेषु। अवाते। अपः। तरसि। स्वभानो इति स्वऽभानो।
सा। नः। आ। वह। पृथुऽयामन्। ऋष्वे। रयिम्। दिवः। दुहितः। इषयध्यै॥ ४॥

सा वह योक्षभिरवातोषो वरं वहसि जोषमनु।
त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः॥ ५॥

सा। आ। वह। या। उक्षऽभिः। अवाता। उषः। वरम्। वहसि। जोषम्। अनु।
त्वम्। दिवः। दुहितः। या। ह। देवी। पूर्वऽहूतौ। मंहना। दर्शता। भूः॥ ५॥

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय॥ ६॥ [५]

उत्। ते। वयः। चित्। वसतेः। अपप्तन्। नरः। च। ये। पितुऽभाजः। विऽउष्टौ।
अमा। सते। वहसि। भूरि। वामम्। उषः। देवि। दाशुषे। मर्त्याय॥ ६॥

[६५] [६ भरद्वाजो बार्हस्पत्यः। उषाः। त्रिष्टुप्।]

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः।
या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून्॥ १॥

एषा। स्या। नः। दुहिता। दिवःऽजाः। क्षितीः। उच्छन्ती। मानुषीः। अजीगरिति।
या। भानुना। रुशता। राम्यासु। अज्ञायि। तिरः। तमसः। चित्। अक्तून्॥ १॥

वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः।
अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि। तत्। ययुः। अरुणयुक्ऽभिः। अश्वैः। चित्रम्। भान्ति। उषसः। चन्द्रऽरथाः।
अग्रम्। यज्ञस्य। बृहतः। नयन्तीः। वि। ताः। बाधन्ते। तमः। ऊर्म्यायाः॥ २॥

श्रवो वाजमिषमूर्जं वहन्तीर्नि दाशुष उषसो मर्त्याय।
मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य॥ ३॥

श्रवः। वाजम्। इषम्। ऊर्जम्। वहन्तीः। नि। दाशुषे। उषसः। मर्त्याय।
मघोनीः। वीरऽवत्। पत्यमानाः। अवः। धात। विधते। रत्नम्। अद्य॥ ३॥

इदा हि वो विधते रत्नमस्तीदा वीराय दाशुष उषासः।
इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित्॥ ४॥

इदा। हि। वः। विधते। रत्नम्। अस्ति। इदा। वीराय। दाशुषे। उषसः।
इदा। विप्राय। जरते। यत्। उक्था। नि। स्म। माऽवते। वहथ। पुरा। चित्॥ ४॥

इदा हि त उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्ति।
व्यर्केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः॥ ५॥

इदा। हि। ते। उषः। अद्रिसानो इत्यद्रिऽसानो। गोत्रा। गवाम्। अङ्गिरसः। गृणन्ति।
वि। अर्केण। बिभिदुः। ब्रह्मणा। च। सत्या। नृणाम्। अभवत्। देवऽहूतिः॥ ५॥

उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि।
सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः॥ ६॥ [६]

उच्छ। दिवः। दुहितरिति। प्रत्नऽवत्। नः। भरद्वाजऽवत्। विधते। मघोनि।
सुऽवीरम्। रयिम्। गृणते। रिरीहि। उरुऽगायम्। अधि। धेहि। श्रवः। नः॥ ६॥

[६६] [११ भरद्वाजो बार्हस्पत्यः। मरुतः। त्रिष्टुप्।]

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम्।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः॥ १॥

वपुः। नु। तत्। चिकितुषे। चित्। अस्तु। समानम्। नाम। धेनु। पत्यमानम्।
मर्तेषु। अन्यत्। दोहसे। पीपाय। सकृत्। शुक्रम्। दुदुहे। पृश्निः। ऊधः॥ १॥

ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधन्त।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ये। अ॒ग्नयः॑। न। शोशु॑चन्। इ॒धा॒नाः। द्विः। यत्। त्रिः। म॒रुतः॑। व॒वृ॒धन्त॑।

अ॒रे॒णवः॑। हि॒र॒ण्ययासः॑। ए॒षा॒म्। सा॒कम्। नृ॒म्णैः। पौंस्ये॑भिः। च॒। भू॒व॒न्॥ २॥

रु॒द्रस्य॒ ये मी॒ळ्हुषः॒ सन्ति॑ पु॒त्रा यांश्चो॒ नु दाधृ॑वि॒र्भर॑ध्यै।

वि॒दे हि मा॒ता म॒हो म॒ही षा सेत्पृश्निः॑ सु॒भ्वे३॒॑ गर्भ॒माधा॑त्॥ ३॥

रु॒द्रस्य॑। ये। मी॒ळ्हुषः॑। सन्ति॑। पु॒त्राः। यान्। चो॒ इति॑। नु। दाधृ॑विः। भर॑ध्यै।

वि॒दे। हि। मा॒ता। म॒हः। म॒ही। सा। सा। इत्। पृश्निः॑। सु॒ऽभ्वे॑। गर्भ॑म्। आ। अ॒धा॒त्॥ ३॥

न य ईष॑न्ते ज॒नुषोऽया॒ न्व१॒॑न्तः सन्तो॑ऽव॒द्यानि॑ पुना॒नाः।

निर्यद्दु॒ह्रे शुच॑यो॒ऽनु जोष॒मनु॑ श्रि॒या त॒न्व॑मु॒क्षमा॑णाः॥ ४॥

न। ये। ईष॑न्ते। ज॒नुषः॑। अया॑। नु। अ॒न्तरिति॑। सन्तः॑। अ॒व॒द्यानि॑। पु॒ना॒नाः।

निः। यत्। दु॒ह्रे। शुच॑यः। अनु॑। जोष॑म्। अनु॑। श्रि॒या। त॒न्व॑म्। उ॒क्षमा॑णाः॥ ४॥

म॒क्षू न येषु॑ दो॒हसे॑ चिद॒या आ नाम॑ धृ॒ष्णु मारु॑तं॒ दधा॑नाः।

न य स्तौ॒ना अ॒यासो॑ म॒ह्ना नू चि॑त्सु॒दानु॒रव॑ यासदु॒ग्रान्॥ ५॥ [७]

म॒क्षु। न। येषु॑। दो॒हसे॑। चि॒त्। अया॑ः। आ। नाम॑। धृ॒ष्णु। मारु॑तम्। दधा॑नाः।

न। ये। स्तौ॒नाः। अ॒यासः॑। म॒ह्ना। नु। चि॒त्। सु॒ऽदानुः॑। अव॑। या॒स॒त्। उ॒ग्रान्॥ ५॥

त इदु॒ग्राः शव॑सा धृ॒ष्णुषे॑णा उ॒भे यु॑जन्त॒ रोद॑सी सु॒मेके॑।

अध॑ स्मैषु रोद॒सी स्वशो॑चि॒राम॑वत्सु त॒स्थौ॒ न रोकः॑॥ ६॥

ते। इत्। उ॒ग्राः। शव॑सा। धृ॒ष्णु॒ऽसे॑नाः। उ॒भे इति॑। यु॒ज॒न्त॒। रोद॑सी॒ इति॑। सु॒मेके॒ इति॑ सु॒ऽमेके॑।

अध॑। स्म॒। ए॒षु॒। रो॒द॒सी। स्वऽशो॑चिः। आ। अम॑वत्ऽसु। त॒स्थौ॒। न। रोकः॑॥ ६॥

अ॒ने॒नो वो॑ मरुतो॒ यामो॑ अस्त्वन॒श्वश्चि॒द्यमज॒त्यर॑थीः।

अ॒न॒व॒सो अ॑नभी॒शू र॑ज॒स्तूर्वि रोद॑सी प॒थ्या॑ याति॒ साध॑न्॥ ७॥

अ॒ने॒नः। व॒ः। म॒रु॒तः॒। याम॑ः। अ॒स्तु॒। अ॒न॒श्वः। चि॒त्। यम्। अज॑ति। अर॑थीः।

अ॒न॒व॒सः। अ॒न॒भी॒शुः। र॒ज॒ःऽतूः। वि। रोद॑सी॒ इति॑। प॒थ्या॑ः। या॒ति॒। साध॑न्॥ ७॥

नास्य॑ व॒र्ता न त॑रु॒ता न्व॑स्ति॒ मरु॑तो॒ यमव॑थ॒ वाज॑सातौ।

तो॒के वा॒ गोषु॒ तन॑ये॒ यम॒प्सु स व्र॒जं दर्ता॒ पार्ये॒ अध॒ द्योः॥ ८॥

न। अ॒स्य॒। व॒र्ता। न। त॒रु॒ता। नु। अ॒स्ति॒। मरु॑तः। यम्। अव॑थ। वाज॑ऽसातौ।

तो॒के। वा॒। गोषु॑। तन॑ये। यम्। अ॒प्ऽसु। सः। व्र॒जम्। दर्ता॑। पार्ये॑। अध॑। द्योः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्।

ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः॥ ९॥

प्र। चित्रम्। अर्कम्। गृणते। तुराय। मारुताय। स्वऽतवसे। भरध्वम्।

ये। सहांसि। सहसा। सहन्ते। रेजते। अग्ने। पृथिवी। मखेभ्यः॥ ९॥

त्विषीमन्तो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः।

अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः॥ १०॥

त्विषिऽमन्तः। अध्वरस्यऽइव। दिद्युत्। तृषुऽच्यवसः। जुह्वः। न। अग्नेः।

अर्चत्रयः। धुनयः। न। वीराः। भ्राजत्ऽजन्मानः। मरुतः। अधृष्टाः॥ १०॥

तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे।

दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन्॥ ११॥ [८]

तम्। वृधन्तम्। मारुतम्। भ्राजत्ऽऋष्टिम्। रुद्रस्य। सूनुम्। हवसा। आ। विवासे।

दिवः। शर्धाय। शुचयः। मनीषाः। गिरयः। न। आपः। उग्राः। अस्पृध्रन्॥ ११॥

[६७] [११ भरद्वाजो बार्हस्पत्यः। मित्रावरुणौ। त्रिष्टुप्।]

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै।

सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः॥ १॥

विश्वेषाम्। वः। सताम्। ज्येष्ठऽतमा। गीःऽभिः। मित्रावरुणा। ववृधध्यै।

सम्। या। रश्माऽइव। यमतुः। यमिष्ठा। द्वा। जनान्। असमा। बाहुऽभिः। स्वैः॥ १॥

इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ।

यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदानू॥ २॥

इयम्। मत्। वाम्। प्र। स्तृणीते। मनीषा। उप। प्रिया। नमसा। बर्हिः। अच्छ।

यन्तम्। नः। मित्रावरुणौ। अधृष्टम्। छर्दिः। यत्। वाम्। वरूथ्यम्। सुदानू इति सुऽदानू॥ २॥

या यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना।

सं यावप्नःस्थो अपसेव जनाञ्छ्रुधीयतश्चिद्यतथो महित्वा॥ ३॥

आ। यातम्। मित्रावरुणा। सुऽशस्ति। उप। प्रिया। नमसा। हूयमाना।

सम्। यौ। अप्नःऽस्थः। अपसाऽइव। जनान्। श्रुधिऽयतः। चित्। यतथः। महिऽत्वा॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अश्वा न या वाजिना पूतबन्धू ऋता यद्गर्भमदितिर्भरध्यै।
प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः॥ ४॥
अश्वा। न। या। वाजिना। पूतबन्धू इति पूत॰बन्धू। ऋता। यत्। गर्भम्। अदितिः। भरध्यै।
प्र। या। महि। महान्ता। जायमाना। घोरा। मर्ताय। रिपवे। नि। दीधरिति दीधः॥ ४॥
विश्वे यद्वां मंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः।
परि यद्भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः॥ ५॥ [९]
विश्वे। यत्। वाम्। मंहना। मन्दमानाः। क्षत्रम्। देवासः। अदधुः। स॰जोषाः।
परि। यत्। भूथः। रोदसी इति। चित्। उर्वी इति। सन्ति। स्पशः। अदब्धासः। अमूराः॥ ५॥
ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सानुमुपमादिव द्योः।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः॥ ६॥
ता। हि। क्षत्रम्। धारयेथे इति। अनु। द्यून्। दृंहेथे इति। सानुम्। उपमात्ऽइव। द्योः।
दृळ्हः। नक्षत्रः। उत। विश्व॰देवः। भूमिम्। आ। अतान्। द्याम्। धासिना। आयोः॥ ६॥
ता विग्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति।
न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते॥ ७॥
ता। विग्रम्। धैथे इति। जठरम्। पृणध्यै। आ। यत्। सद्म। स॰भृतयः। पृणन्ति।
न। मृष्यन्ते। युवतयः। अवाताः। वि। यत्। पयः। विश्व॰जिन्वा। भरन्ते॥ ७॥
ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत्।
तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः॥ ८॥
ता। जिह्वया। सदम्। आ। इदम्। सु॰मेधा। आ। यत्। वाम्। सत्यः। अरतिः। ऋते। भूत्।
तत्। वाम्। महि॰त्वम्। घृत॰अन्नौ। अस्तु। युवम्। दाशुषे। वि। चयिष्टम्। अंहः॥ ८॥
प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनन्ति।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः॥ ९॥
प्र। यत्। वाम्। मित्रावरुणा। स्पूर्धन्। प्रिया। धाम। युव॰धिता। मिनन्ति।
न। ये। देवासः। ओहसा। न। मर्ताः। अयज्ञ॰साचः। अप्यः। न। पुत्राः॥ ९॥
वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः।
आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि। यत्। वाचम्। कीस्तासः। भरन्ते। शंसन्ति। के। चित्। निऽविदः। मनानाः।
आत्। वाम्। ब्रवाम। सत्यानि। उक्था। नकिः। देवेभिः। यतथः। महिऽत्वा॥ १०॥

अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु।
अनु यद्गावः स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन्॥ ११॥ [१०]

अवोः। इत्था। वाम्। छर्दिषः। अभिष्टौ। युवोः। मित्रावरुणौ। अस्कृधोयु।
अनु। यत्। गावः। स्फुरान्। ऋजिप्यम्। धृष्णुम्। यत्। रणे। वृषणम्। युनजन्॥ ११॥

[६८] [११ भरद्वाजो बार्हस्पत्यः। इन्द्रावरुणौ। त्रिष्टुप्; ९-१० जगत्यौ।]

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्वृक्तबर्हिषो यजध्यै।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत्॥ १॥

श्रुष्टी। वाम्। यज्ञः। उत्ऽयतः। सऽजोषाः। मनुष्वत्। वृक्तऽबर्हिषः। यजध्यै।
आ। यः। इन्द्रावरुणौ। इषे। अद्य। महे। सुम्नाय। महे। आऽववर्तत्॥ १॥

ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम्।
मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना॥ २॥

ता। हि। श्रेष्ठा। देवऽताता। तुजा। शूराणाम्। शविष्ठा। ता। हि। भूतम्।
मघोनाम्। मंहिष्ठा। तुविऽशुष्मा। ऋतेन। वृत्रऽतुरा। सर्वऽसेना॥ २॥

ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः॥ ३॥

ता। गृणीहि। नमस्येभिः। शूषैः। सुम्नेभिः। इन्द्रावरुणा। चकाना।
वज्रेण। अन्यः। शवसा। हन्ति। वृत्रम्। सिसक्ति। अन्यः। वृजनेषु। विप्रः॥ ३॥

ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वगूर्ताः।
प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी॥ ४॥

ग्नाः। च। यत्। नरः। च। ववृधन्त। विश्वे। देवासः। नराम्। स्वऽगूर्ताः।
प्र। एभ्यः। इन्द्रावरुणा। महिऽत्वा। द्यौः। च। पृथिवि। भूतम्। उर्वी इति॥ ४॥

स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन्।
इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान्॥ ५॥ [११]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। इत्। सुऽदानुः। स्वऽवान्। ऋतऽवा। इन्द्रा। यः। वाम्। वरुणा। दाशति। त्मन्।

इषा। सः। द्विषः। तरेत्। दास्वान्। वंसत्। रयिम्। रयिऽवतः। च। जनान्॥ ५॥

यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम्।

अस्मे स इन्द्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः॥ ६॥

यम्। युवम्। दाशुऽअध्वराय। देवा। रयिम्। धत्थः। वसुऽमन्तम्। पुरुऽक्षुम्।

अस्मे इति। सः। इन्द्रावरुणौ। अपि। स्यात्। प्र। यः। भनक्ति। वनुषाम्। अशस्तीः॥ ६॥

उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात्।

येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः॥ ७॥

उत। नः। सुऽत्रात्रः। देवऽगोपाः। सूरिऽभ्यः। इन्द्रावरुणा। रयिः। स्यात्।

येषाम्। शुष्मः। पृतनासु। सह्वान्। प्र। सद्यः। द्युम्ना। तिरते। ततुरिः॥ ७॥

नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा।

इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम॥ ८॥

नु। नः। इन्द्रावरुणा। गृणाना। पृङ्क्तम्। रयिम्। सौश्रवसाय। देवा।

इत्था। गृणन्तः। महिनस्य। शर्धः। अपः। न। नावा। दुःऽइता। तरेम॥ ८॥

प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः।

अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा॥ ९॥

प्र। सम्ऽराजे। बृहते। मन्म। नु। प्रियम्। अर्च। देवाय। वरुणाय। सऽप्रथः।

अयम्। यः। उर्वी इति। महिना। महिऽव्रतः। क्रत्वा। विऽभाति। अजरः। न। शोचिषा॥ ९॥

इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता।

युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये॥ १०॥

इन्द्रावरुणा। सुतऽपौ। इमम्। सुतम्। सोमम्। पिबतम्। मद्यम्। धृतऽव्रता।

युवोः। रथः। अध्वरम्। देवऽवीतये। प्रति। स्वसरम्। उप। याति। पीतये॥ १०॥

इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम्।

इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथाम्॥ ११॥ [१२]

इन्द्रावरुणा। मधुमत्ऽतमस्य। वृष्णः। सोमस्य। वृषणा। आ। वृषेथाम्।

इदम्। वाम्। अन्धः। परिऽसिक्तम्। अस्मे इति। आऽसद्य। अस्मिन्। बर्हिषि। मादयेथाम्॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६९] [८ भरद्वाजो बार्हस्पत्यः। इन्द्राविष्णू। त्रिष्टुप्।]

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता॥ १॥

सम्। वाम्। कर्मणा। सम्। इषा। हिनोमि। इन्द्राविष्णू इति। अपसः। पारे। अस्य।
जुषेथाम्। यज्ञम्। द्रविणम्। च। धत्तम्। अरिष्टैः। नः। पथि॰भिः। पारयन्ता॥ १॥

या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः॥ २॥

या। विश्वासाम्। जनितारा। मतीनाम्। इन्द्राविष्णू इति। कलशा। सोम॰धाना।
प्र। वाम्। गिरः। शस्यमानाः। अवन्तु। प्र। स्तोमासः। गीयमानासः। अर्कैः॥ २॥

इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना।
सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः॥ ३॥

इन्द्राविष्णू इति। मदपती इति मद॰पती। मदानाम्। आ। सोमम्। यातम्। द्रविणो इति। दधाना।
सम्। वाम्। अञ्जन्तु। अक्तु॰भिः। मतीनाम्। सम्। स्तोमासः। शस्यमानासः। उक्थैः॥ ३॥

आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु।
जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे॥ ४॥

आ। वाम्। अश्वासः। अभिमाति॰सहः। इन्द्राविष्णू इति। सध॰मादः। वहन्तु।
जुषेथाम्। विश्वा। हवना। मतीनाम्। उप। ब्रह्माणि। शृणुतम्। गिरः। मे॥ ४॥

इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे।
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि॥ ५॥

इन्द्राविष्णू इति। तत्। पनयाय्यम्। वाम्। सोमस्य। मदे। उरु। चक्रमाथे इति।
अकृणुतम्। अन्तरिक्षम्। वरीयः। अप्रथतम्। जीवसे। नः। रजांसि॥ ५॥

इन्द्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या।
घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः॥ ६॥

इन्द्राविष्णू इति। हविषा। ववृधाना। अग्र॰अद्वाना। नमसा। रात॰हव्या।
घृतासुती इति घृत॰आसुती। द्रविणम्। धत्तम्। अस्मे इति। समुद्रः। स्थः। कलशः। सोम॰धानः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम्।

आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे॥ ७॥

इन्द्राविष्णू इति। पिबतम्। मध्वः। अस्य। सोमस्य। दस्रा। जठरम्। पृणेथाम्।

आ। वाम्। अन्धांसि। मदिराणि। अग्मन्। उप। ब्रह्माणि। शृणुतम्। हवम्। मे॥ ७॥

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः।

इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्॥ ८॥ [१३]

उभा। जिग्यथुः। न। परा। जयेथे इति। न। परा। जिग्ये। कतरः। चन। एनोः।

इन्द्रः। च। विष्णो इति। यत्। अपस्पृधेथाम्। त्रेधा। सहस्रम्। वि। तत्। ऐरयेथाम्॥ ८॥

[७०] [६ भरद्वाजो बार्हस्पत्यः। द्यावापृथिवी। जगती]

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा।

द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा॥ १॥

घृतवती इति घृतऽवती। भुवनानाम्। अभिऽश्रिया। उर्वी इति। पृथ्वी इति। मधुदुघे इति मधुऽदुघे।

सुऽपेशसा॥ द्यावापृथिवी इति। वरुणस्य। धर्मणा। विस्कभिते इति विऽस्कभिते।

अजरे इति। भूरिऽरेतसा॥ १॥

असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते।

राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम्॥ २॥

असश्चन्ती इति। भूरिधारे इति भूरिऽधारे। पयस्वती इति। घृतम्। दुहाते इति। सुऽकृते।

शुचिव्रते इति शुचिऽव्रते॥ राजन्ती इति। अस्य। भुवनस्य। रोदसी इति।

अस्मे इति। रेतः। सिञ्चतम्। यत्। मनुःऽहितम्॥ २॥

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति।

प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता॥ ३॥

यः। वाम्। ऋजवे। क्रमणाय। रोदसी इति। मर्तः। ददाश। धिषणे इति। सः। साधति।

प्र। प्रऽजाभिः। जायते। धर्मणः। परि। युवोः। सिक्ता। विषुऽरूपाणि। सऽव्रता॥ ३॥

घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा।

उर्वी पृथ्वी होतृवूर्ये पुरोहिते न इद्विप्रा ईळते सुम्नमिष्टये॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

घृतेन। द्यावापृथिवी इति। अभिवृते इत्यभिऽवृते। घृतऽश्रिया। घृतऽपृचा। घृतऽवृधा॥ उर्वी इति।
पृथ्वी इति। होतृऽवूर्ये। पुरोहिते इति पुरःऽहिते। ते इति। इत्। विप्राः। ईळते। सुम्नम्। इष्टये॥ ४॥

मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम्॥ ५॥

मधु। नः। द्यावापृथिवी इति। मिमिक्षताम्। मधुऽश्चुता। मधुदुघे इति मधुऽदुघे। मधुव्रते इति मधुऽव्रते।
दधाने इति। यज्ञम्। द्रविणम्। च। देवता। महि। श्रवः। वाजम्। अस्मे इति। सुऽवीर्यम्॥ ५॥

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा।
संरराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वताम्॥ ६॥ [१४]

ऊर्जम्। नः। द्यौः। च। पृथिवी। च। पिन्वताम्। पिता। माता। विश्वऽविदा। सुऽदंससा।
संरराणे इति सम्ऽरराणे। रोदसी इति। विश्वऽशंभुवा।
सनिम्। वाजम्। रयिम्। अस्मे इति। सम्। इन्वताम्॥ ६॥

[७१] [६ भरद्वाजो बार्हस्पत्यः। सविता। जगती, ४-६ त्रिष्टुभः।]

उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः।
घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि॥ १॥

उत्। ऊँ इति। स्यः। देवः। सविता। हिरण्यया। बाहू इति। अयंस्त। सवनाय। सुऽक्रतुः।
घृतेन। पाणी इति। अभि। प्रुष्णुते। मखः। युवा। सुऽदक्षः। रजसः। विऽधर्मणि॥ १॥

देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने।
यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः॥ २॥

देवस्य। वयम्। सवितुः। सवीमनि। श्रेष्ठे। स्याम। वसुनः। च। दावने।
यः। विश्वस्य। द्विऽपदः। यः। चतुःऽपदः। निऽवेशने। प्रऽसवे। च। असि। भूमनः॥ २॥

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम्।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत॥ ३॥

अदब्धेभिः। सवितरिति। पायुऽभिः। त्वम्। शिवेभिः। अद्य। परि। पाहि। नः। गयम्।
हिरण्यऽजिह्वः। सुविताय। नव्यसे। रक्ष। माकिः। नः। अघऽशंसः। ईशत॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात्।

अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम्॥ ४॥

उत्। ऊँ इति। स्यः। देवः। सविता। दमूनाः। हिरण्यऽपाणिः। प्रतिऽदोषम्। अस्थात्।

अयःऽहनुः। यजतः। मन्द्रऽजिह्वः। आ। दाशुषे। सुवति। भूरि। वामम्॥ ४॥

उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका।

दिवो रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वम्॥ ५॥

उत्। ऊँ इति। अयान्। उपवक्ताऽइव। बाहू इति। हिरण्यया। सविता। सुऽप्रतीका।

दिवः। रोहांसि। अरुहत्। पृथिव्याः। अरीरमत्। पतयत्। कत्। चित्। अभ्वम्॥ ५॥

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः।

वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम॥ ६॥ [१५]

वामम्। अद्य। सवितः। वामम्। ऊँ इति। श्वः। दिवेऽदिवे। वामम्। अस्मभ्यम्। सावीः।

वामस्य। हि। क्षयस्य। देव। भूरेः। अया। धिया। वामऽभाजः। स्याम॥ ६॥

[७२] [५ भरद्वाजो बार्हस्पत्यः। इन्द्रासोमौ। त्रिष्टुप्।]

इन्द्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः।

युवं सूर्यं विविदथुर्युवं स्व१र्विश्वा तमांस्यहतं निदश्च॥ १॥

इन्द्रासोमा। महि। तत्। वाम्। महिऽत्वम्। युवम्। महानि। प्रथमानि। चक्रथुः।

युवम्। सूर्यम्। विविदथुः। युवम्। स्वः। विश्वा। तमांसि। अहतम्। निदः। च॥ १॥

इन्द्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह।

उप द्यां स्कम्भथुः स्कम्भनेनाप्रथतं पृथिवीं मातरं वि॥ २॥

इन्द्रासोमा। वासयथः। उषसम्। उत्। सूर्यम्। नयथः। ज्योतिषा। सह।

उप। द्याम्। स्कम्भथुः। स्कम्भनेन। अप्रथतम्। पृथिवीम्। मातरम्। वि॥ २॥

इन्द्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत।

प्रार्णांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि॥ ३॥

इन्द्रासोमौ। अहिम्। अपः। परिऽस्थाम्। हथः। वृत्रम्। अनु। वाम्। द्यौः। अमन्यत।

प्र। अर्णांसि। ऐरयतम्। नदीनाम्। आ। समुद्राणि। पप्रथुः। पुरूणि॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रासोमा पक्वमामास्वन्तर्नि गवामिद्दधथुर्वक्षणासु।

जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वन्तः॥ ४॥

इन्द्रासोमा। पक्वम्। आमासु। अन्तः। नि। गवाम्। इत्। दधथुः। वक्षणासु।

जगृभथुः। अनपिऽनद्धम्। आसु। रुशत्। चित्रासु। जगतीषु। अन्तरिति॥ ४॥

इन्द्रासोमा युवमङ्ग तरुत्रमपत्यसाचं श्रुत्यं रराथे।

युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा॥ ५॥ [१६]

इन्द्रासोमा। युवम्। अङ्ग। तरुत्रम्। अपत्यऽसाचम्। श्रुत्यम्। रराथे इति।

युवम्। शुष्मम्। नर्यम्। चर्षणिऽभ्यः। सम्। विव्यथुः। पृतनाऽसहम्। उग्रा॥ ५॥

[७३] [३ बार्हस्पत्यो भरद्वाजः। बृहस्पतिः। त्रिष्टुप्।]

यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान्।

द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति॥ १॥

यः। अद्रिऽभित्। प्रथमऽजाः। ऋतऽवा। बृहस्पतिः। आङ्गिरसः। हविष्मान्।

द्विबर्हऽज्मा। प्राघर्मऽसत्। पिता। नः। आ। रोदसी इति। वृषभः। रोरवीति॥ १॥

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार।

घ्नन्वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन्॥ २॥

जनाय। चित्। यः। ईवते। ऊँ इति। लोकम्। बृहस्पतिः। देवऽहूतौ। चकार।

घ्नन्। वृत्राणि। वि। पुरः। दर्दरीति। जयन्। शत्रून्। अमित्रान्। पृत्ऽसु। सहन्॥ २॥

बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः।

अपः सिषासन्त्स्व१रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः। [१७]

बृहस्पतिः। सम्। अजयत्। वसूनि। महः। व्रजान्। गोऽमतः। देवः। एषः।

अपः। सिसासन्। स्वः। अप्रतिऽइतः। बृहस्पतिः। हन्ति। अमित्रम्। अर्कैः॥ ३॥

[७४] [४ भरद्वाजो बार्हस्पत्यः। सोमारुद्रौ। त्रिष्टुप्।]

सोमारुद्रा धारयेथामसुर्य१ प्र वामिष्टयोऽरमश्नुवन्तु।

दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमारुद्रा। धारयेथाम्। असुर्यम्। प्र। वाम्। इष्टयः। अरम्। अश्नुवन्तु।
दमेऽदमे। सप्त। रत्ना। दधाना। शम्। नः। भूतम्। द्विऽपदे। शम्। चतुःऽपदे॥ १॥

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु॥ २॥

सोमारुद्रा। वि। वृहतम्। विषूचीम्। अमीवा। या। नः। गयम्। आऽविवेश।
आरे। बाधेथाम्। निःऽऋतिम्। पराचैः। अस्मे इति। भद्रा। सौश्रवसानि। सन्तु॥ २॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत्॥ ३॥

सोमारुद्रा। युवम्। एतानि। अस्मे इति। विश्वा। तनूषु। भेषजानि। धत्तम्।
अव। स्यतम्। मुञ्चतम्। यत्। नः। अस्ति। तनूषु। बद्धम्। कृतम्। एनः। अस्मत्॥ ३॥

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः।
प्र नो मुञ्चतं वरुणस्य पाशाद् गोपायतं नः सुमनस्यमाना॥ ४॥ [१८]

तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृळतम्। नः।
प्र। नः। मुञ्चतम्। वरुणस्य। पाशात्। गोपायतम्। नः। सुऽमनस्यमाना॥ ४॥

[७५] [१९ पायुर्भारद्वाजः। (संग्रामाशिषः) १ वर्म, २ धनुः, ३ ज्या, ४ आर्त्नी, ५ इषुधिः, ६ (पूर्वार्धः) सारथिः, ६ (उत्तरार्धः) रश्मयः, ७ अश्वाः, ८ रथः, ९ रथगोपाः, १० ब्राह्मण-पितृ-सोम-द्यावा-पृथिवी-पूषाणः; ११-१२, १५-१६ इषवः, १३ रथगोपाः, १३ प्रतोदः, १४ हस्तघ्नः, १७ युद्धभूमि-कवच-ब्रह्मणस्पत्यादयः, १८ वर्म-सोम-वरुणाः, १९ देवब्रह्माणि। त्रिष्टुप्; ६, १० जगत्यौ; १२, १३, १५, १६, १९ अनुष्टुभः, १७ पङ्क्तिः।]

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु॥ १॥

जीमूतस्यऽइव। भवति। प्रतीकम्। यत्। वर्मी। याति। सऽमदाम्। उपऽस्थे।
अनाविद्धया। तन्वा। जय। त्वम्। सः। त्वा। वर्मणः। महिमा। पिपर्तु॥ १॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम।
धनुः शत्रोरपकामं कृणोमि धन्वना सर्वाः प्रदिशो जयेम॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धन्वना। गाः। धन्वना। आजिम्। जयेम। धन्वना। तीव्राः। सम्ऽमदः। जयेम।

धनुः। शत्रोः। अपऽकामम्। कृणोमि। धन्वना। सर्वाः। प्रऽदिशः। जयेम॥ २॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना।

योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती॥ ३॥

वक्ष्यन्तीऽइव। इत्। आ। गनीगन्ति। कर्णम्। प्रियम्। सखायम्। परिऽसस्वजाना।

योषाऽइव। शिङ्क्ते। विऽतता। अधि। धन्वन्। ज्या। इयम्। समने। पारयन्ती॥ ३॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे।

अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान्॥ ४॥

ते इति। आचरन्ती इत्याऽचरन्ती। समनाऽइव। योषा। माताऽइव। पुत्रम्। बिभृताम्। उपऽस्थे।

अप। शत्रून्। विध्यताम्। संविदाने इति सम्ऽविदाने।

आर्त्नी इति। इमे इति। विस्फुरन्ती इति विऽस्फुरन्ती। अमित्रान्॥ ४॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य।

इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः॥ ५॥ [१९]

बह्वीनाम्। पिता। बहुः। अस्य। पुत्रः। चिश्चा। कृणोति। समना। अवऽगत्य।

इषुऽधिः। सङ्काः। पृतनाः। च। सर्वाः। पृष्ठे। निऽनद्धः। जयति। प्रऽसूतः॥ ५॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः।

अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥ ६॥

रथे। तिष्ठन्। नयति। वाजिनः। पुरः। यत्रऽयत्र। कामयते। सुऽसारथिः।

अभीशूनाम्। महिमानम्। पनायत। मनः। पश्चात्। अनु। यच्छन्ति। रश्मयः॥ ६॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः।

अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः॥ ७॥

तीव्रान्। घोषान्। कृण्वते। वृषऽपाणयः। अश्वाः। रथेभिः। सह। वाजयन्तः।

अवऽक्रामन्तः। प्रऽपदैः। अमित्रान्। क्षिणन्ति। शत्रून्। अनपऽव्ययन्तः॥ ७॥

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म।

तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रथ॰वाहनम्। हविः। अस्य। नाम। यत्र। आयुधम्। नि॰हितम्। अस्य। वर्म।
तत्र। रथम्। उप। शग्मम्। सदेम। विश्वाहा। वयम्। सु॰मनस्यमानाः॥ ८॥

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः॥ ९॥

स्वादु॰संसदः। पितरः। वयःऽधाः। कृच्छ्रे॰श्रितः। शक्ति॰वन्तः। गभीराः।
चित्र॰सेनाः। इषु॰बलाः। अमृध्राः। सतःऽवीराः। उरवः। व्रात॰सहाः॥ ९॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत॥ १०॥ [२०]

ब्राह्मणासः। पितरः। सोम्यासः। शिवे इति। नः। द्यावापृथिवी इति। अनेहसा।
पूषा। नः। पातु। दुःऽइतात्। ऋत॰वृधः। रक्ष। माकिः। नः। अघ॰शंसः। ईशत॥ १०॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन्॥ ११॥

सु॰पर्णम्। वस्ते। मृगः। अस्याः। दन्तः। गोभिः। सम्॰नद्धा। पतति। प्र॰सूता।
यत्र। नरः। सम्। च। वि। च। द्रवन्ति। तत्र। अस्मभ्यम्। इषवः। शर्म। यंसन्॥ ११॥

ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः। सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु॥ १२॥

ऋजीते। परि। वृङ्धि। नः। अश्मा। भवतु। नः। तनूः।
सोमः। अधि। ब्रवीतु। नः। अदितिः। शर्म। यच्छतु॥ १२॥

आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते। अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय॥ १३॥

आ। जङ्घन्ति। सानु। एषाम्। जघनान्। उप। जिघ्नते।
अश्व॰अजनि। प्र॰चेतसः। अश्वान्। समत्॰सु। चोदय॥ १३॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः॥ १४॥

अहिःऽइव। भोगैः। परि। एति। बाहुम्। ज्यायाः। हेतिम्। परि॰बाधमानः।
हस्त॰घ्नः। विश्वा। वयुनानि। विद्वान्। पुमान्। पुमांसम्। परि। पातु। विश्वतः॥ १४॥

आलाक्ता या रुरुशीर्ष्ण्यथो यस्या अयो मुखम्।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः॥ १५॥

[२१]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आलऽअक्ता। या। रुरुऽशीर्ष्णी। अथो इति। यस्याः। अयः। मुखम्।

इदम्। पर्जन्यऽरेतसे। इष्वै। देव्यै। बृहत्। नमः॥ १५॥

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते। गच्छामित्रान्प्र पद्यस्व ममीषां कं चनोच्छिषः॥ १६॥

अवऽसृष्टा। परा। पत। शरव्ये। ब्रह्मऽसंशिते।

गच्छ। अमित्रान्। प्र। पद्यस्व। मा। अमीषाम्। कम्। चन। उत्। शिषः। १६॥

यत्र बाणाः संपतन्ति कुमारा विशिखाइव।

तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु॥ १७॥

यत्र। बाणाः। सम्ऽपतन्ति। कुमाराः। विशिखाःऽइव।

तत्र। नः। ब्रह्मणः। पतिः। अदितिः। शर्म। यच्छतु। विश्वाहा। शर्म। यच्छतु॥ १७॥

मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम्।

उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु॥ १८॥

मर्माणि। ते। वर्मणा। च्छादयामि। सोमः। त्वा। राजा। अमृतेन। अनु। वस्ताम्।

उरोः। वरीयः। वरुणः। ते। कृणोतु। जयन्तम्। त्वा। अनु। देवाः। मदन्तु॥ १८॥

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति।

देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम्॥ १९॥ [२२] {६}

यः। नः। स्वः। अरणः। यः। च। निष्ट्यः। जिघांसति।

देवाः। तम्। सर्वे। धूर्वन्तु। ब्रह्म। वर्म। मम। अन्तरम्॥ १९॥

इत्याश्वलायन-संहितायां

षष्ठं मण्डलं

समाप्तम्॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्तमं मण्डलम्

॥ अथ पञ्चाष्टके प्रथमोऽध्यायः ॥

[१] [२५ मैत्रावरुणिर्वसिष्ठः। अग्निः। विराट्, १९-२५ त्रिष्टुभः।]

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम्। दूरेदृशं गृहपतिमथर्युम्॥ १॥

अग्निम्। नरः। दीधितिऽभिः। अरण्योः। हस्तऽच्युती। जनयन्त। प्रऽशस्तम्।

दूरेऽदृशम्। गृहऽपतिम्। अथर्युम्॥ १॥

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्यः॥ २॥

तम्। अग्निम्। अस्ते। वसवः। नि। ऋण्वन्। सुऽप्रतिचक्षम्। अवसे। कुतः। चित्।

दक्षाय्यः। यः। दमे। आस। नित्यः॥ २॥

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वां शश्वन्त उप यन्ति वाजाः॥ ३॥

प्रऽइद्धः। अग्ने। दीदिहि। पुरः। नः। अजस्रया। सूर्म्या। यविष्ठ।

त्वाम्। शश्वन्तः। उप। यन्ति। वाजाः॥ ३॥

प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः। यत्रा नरः समासते सुजाताः॥ ४॥

प्र। ते। अग्नयः। अग्निऽभ्यः। वरम्। निः। सुवीरासः। शोशुचन्त। द्युऽमन्तः।

यत्र। नरः। सम्ऽआसते। सुऽजाताः॥ ४॥

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम्। न यं यावा तरति यातुमावान्॥ ५॥

दाः। नः। अग्ने। धिया। रयिम्। सुऽवीरम्। सुऽअपत्यम्। सहस्य। प्रऽशस्तम्। [२३]

न। यम्। यावा। तरति। यातुऽमावान्॥ ५॥

उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची। उप स्वैनमरमतिर्वसूयुः॥ ६॥

उप। यम्। एति। युवतिः। सुऽदक्षम्। दोषा। वस्तोः। हविष्मती। घृताची।

उप। त्वा। एनम्। अरमतिः। वसुऽयुः॥ ६॥

विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथम्। प्र निस्वरं चातयस्वामीवाम्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वाः। अग्ने। अप। दुह। अरातीः। येभिः। तपःऽभिः। अदहः। जरूथम्।
प्र। निःऽस्वरम्। चातयस्व। अमीवाम्॥ ७।

आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक। उतो न एभिः स्तवथैरिह स्याः॥ ८॥

आ। यः। ते। अग्ने। इधते। अनीकम्। वसिष्ठ। शुक्र। दीदिऽवः। पावक।
उतो इति। नः। एभिः। स्तवथैः। इह। स्याः॥ ८॥

वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा। उतो न एभिः सुमना इह स्याः॥ ९॥

वि। ये। ते। अग्ने। भेजिरे। अनीकम्। मर्ताः। नरः। पित्र्यासः। पुरुऽत्रा।
उतो इति। नः। एभिः। सुऽमनाः। इह। स्याः॥ ९॥

इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः। ये मे धियं पनयन्त प्रशस्ताम्॥ १०॥

इमे। नरः। वृत्रऽहत्येषु। शूराः। विश्वाः। अदेवीः। अभि। सन्तु। मायाः। [२४]
ये। मे। धियम्। पनयन्त। प्रऽशस्ताम्॥ १०॥

मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा। प्रजावतीषु दुर्यासु दुर्य॥ ११॥

मा। शूने। अग्ने। नि। सदाम। नृणाम्। मा। अशेषसः। अवीरता। परि। त्वा।
प्रजाऽवतीषु। दुर्यासु। दुर्य॥ ११॥

यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः। स्वजन्मना शेषसा वावृधानम्॥ १२॥

यम्। अश्वी। नित्यम्। उपऽयाति। यज्ञम्। प्रजाऽवन्तम्। सुऽअपत्यम्। क्षयम्। नः।
स्वऽजन्मना। शेषसा। ववृधानम्॥ १२॥

पाहि नो अग्ने रक्षसो अजुष्टात्पाहि धूर्तेररुषो अघायोः। त्वा युजा पृतनायूँरभि ष्याम्॥ १३॥

पाहि। नः। अग्ने। रक्षसः। अजुष्टात्। पाहि। धूर्तेः। अररुषः। अघऽयोः।
त्वा। युजा। पृतनाऽयून्। अभि। स्याम्॥ १३॥

सेदग्निरग्नीँरत्यस्त्वन्यान्यत्र वाजी तनयो वीळुपाणिः। सहस्रपाथा अक्षरा समेति॥ १४॥

सः। इत्। अग्निः। अग्नीन्। अति। अस्तु। अन्यान्। यत्र। वाजी। तनयः। वीळुऽपाणिः।
सहस्रऽपाथाः। अक्षरा। सम्ऽएति॥ १४॥

सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात्। सुजातासः परि चरन्ति वीराः॥ १५॥ [२५]

सः। इत्। अग्निः। यः। वनुष्यतः। निऽपाति। सम्ऽएद्धारम्। अंहसः। उरुष्यात्।
सुऽजातासः। परि। चरन्ति। वीराः॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान्। परि यमेत्यध्वरेषु होता॥ १६॥

अयम्। सः। अग्निः। आऽहुतः। पुरुऽत्रा। यम्। ईशानः। सम्। इत्। इन्धे। हविष्मान्।

परि। यम्। एति। अध्वरेषु। होता॥ १६॥

त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या। उभा कृण्वन्तो वहतू मियेधे॥ १७॥

त्वे इति। अग्ने। आऽहवनानि। भूरि। ईशानासः। आ। जुहुयाम। नित्या।

उभा। कृण्वन्तः। वहतू इति। मियेधे॥ १७॥

इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ। प्रति न ईं सुरभीणि व्यन्तु॥ १८॥

इमो इति। अग्ने। वीतऽतमानि। हव्या। अजस्रः। वक्षि। देवऽतातिम्। अच्छ।

प्रति। नः। ईम्। सुरभीणि। व्यन्तु॥ १८॥

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै।

मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः॥ १९॥

मा। नः। अग्ने। अवीरते। परा। दाः। दुःऽवाससे। अमतये। मा। नः। अस्यै।

मा। नः। क्षुधे। मा। रक्षसे। ऋतऽवः। मा। नः। दमे। मा। वने। आ। जुहूर्थाः॥ १९॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः।

रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः॥ २०॥ [२६]

नु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वम्। देव। मघवत्ऽभ्यः। सुसूदः।

रातौ। स्याम। उभयासः। आ। ते। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ २०॥

त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि।

मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि दासीत्॥ २१॥

त्वम्। अग्ने। सुऽहवः। रण्वऽसंदृक्। सुऽदीती। सूनो इति। सहसः। दिदीहि।

मा। त्वे इति। सचा। तनये। नित्ये। आ। धक्। मा। वीरः। अस्मत्। नर्यः। वि। दासीत्॥ २१॥

मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः।

मा ते अस्मान्दुर्मतयो भृमाच्चिद्देवस्य सूनो सहसो नशन्त॥ २२॥

मा। नः। अग्ने। दुःऽभृतये। सचा। एषु। देवऽइद्धेषु। अग्निषु। प्र। वोचः।

मा। ते। अस्मान्। दुःऽमतयः। भृमात्। चित्। देवस्य। सूनो इति। सहसः। नशन्त॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यम्।

स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति॥ २३॥

सः। मर्तः। अग्ने। सुऽअनीक। रेवान्। अमर्त्ये। यः। आऽजुहोति। हव्यम्।

सः। देवता। वसुऽवनिम्। दधाति। यम्। सूरिः। अर्थी। पृच्छमानः। एति॥ २३॥

महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहन्तम्।

येन वयं सहसावन्मदेमाविक्षितास आयुषा सुवीराः॥ २४॥

महः। नः। अग्ने। सुवितस्य। विद्वान्। रयिम्। सूरिऽभ्यः। आ। वह। बृहन्तम्।

येन। वयम्। सहसाऽवन्। मदेम। अविऽक्षितासः। आयुषा। सुऽवीराः॥ २४॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः।

रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः॥ २५॥ [२७]

नु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वम्। देव। मघवत्ऽभ्यः। सुसूदः।

रातौ। स्याम। उभयासः। आ। ते। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ २५॥

इत्याश्वलायन-संहितायां

पञ्चमाष्टके

प्रथमोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके द्वितीयोऽध्यायः ॥

[२] [११ मैत्रावरुणिर्वसिष्ठः। आप्रीसूक्तं = (१ इध्मः समिद्धोऽग्निर्वा, २ नराशंसः, ३ इळः, ४ बर्हिः, ५ देवीर्द्वारः, ६ उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः। त्रिष्टुप्।]

जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन्।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य॥ १॥

जुषस्व। नः। सम्ऽइधम्। अग्ने। अद्य। शोच। बृहत्। यजतम्। धूमम्। ऋण्वन्।
उप। स्पृश। दिव्यम्। सानु। स्तूपैः। सम्। रश्मिऽभिः। ततनः। सूर्यस्य॥ १॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या॥ २॥

नराशंसस्य। महिमानम्। एषाम्। उप। स्तोषाम। यजतस्य। यज्ञैः।
ये। सुऽक्रतवः। शुचयः। धियम्ऽधाः। स्वदन्ति। देवाः। उभयानि। हव्या॥ २॥

ईळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचम्।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम॥ ३॥

ईळेन्यम्। वः। असुरम्। सुऽदक्षम्। अन्तः। दूतम्। रोदसी इति। सत्यऽवाचम्।
मनुष्वत्। अग्निम्। मनुना। सम्ऽइद्धम्। सम्। अध्वराय। सदम्। इत्। महेम॥ ३॥

सपर्यवो भरमाणा अभिज्ञु प्र वृञ्जते नमसा बर्हिरग्नौ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम्॥ ४॥

सपर्यवः। भरमाणाः। अभिऽज्ञु। प्र। वृञ्जते। नमसा। बर्हिः। अग्नौ।
आऽजुह्वानाः। घृतऽपृष्ठम्। पृषत्ऽवत्। अध्वर्यवः। हविषा। मर्जयध्वम्॥ ४॥

स्वाध्यो३ वि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता।
पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वञ्जन्॥ ५॥ [१]

सुऽआध्यः। वि। दुरः। देवऽयन्तः। अशिश्रयुः। रथऽयुः। देवऽताता।
पूर्वी इति। शिशुम्। न। मातरा। रिहाणे इति। सम्। अग्रुवः। न। समनेषु। अञ्जन्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः।

बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेताम्॥ ६॥

उत। योषणे इति। दिव्ये इति। मही इति। नः। उषसानक्ता। सुदुघाऽइव। धेनुः।

बर्हिःऽसदा। पुरुहूते इति पुरुऽहूते। मघोनी इति। आ। यज्ञिये इति। सुविताय। श्रयेताम्॥ ६॥

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै।

ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि॥ ७॥

विप्रा। यज्ञेषु। मानुषेषु। कारू इति। मन्ये। वाम्। जातऽवेदसा। यजध्यै।

ऊर्ध्वम्। नः। अध्वरम्। कृतम्। हवेषु। ता। देवेषु। वनथः। वार्याणि॥ ७॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः।

सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु॥ ८॥

आ। भारती। भारतीभिः। सऽजोषाः। इळा। देवैः। मनुष्येभिः। अग्निः।

सरस्वती। सारस्वतेभिः। अर्वाक्। तिस्रः। देवीः। बर्हिः। आ। इदम्। सदन्तु॥ ८॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व।

यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः॥ ९॥

तत्। नः। तुरीपम्। अध। पोषयित्नु। देव। त्वष्टः। वि। रराणः। स्यस्वेति स्यस्व।

यतः। वीरः। कर्मण्यः। सुऽदक्षः। युक्तऽग्रावा। जायते। देवऽकामः॥ ९॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति।

सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद॥ १०॥

वनस्पते। अव। सृज। उप। देवान्। अग्निः। हविः। शमिता। सूदयाति।

सः। इत्। ऊँ इति। होता। सत्यऽतरः। यजाति। यथा। देवानाम्। जनिमानि। वेद॥ १०॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः।

बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम्॥ ११॥ [२]

आ। याहि। अग्ने। सम्ऽइधानः। अर्वाङ्। इन्द्रेण। देवैः। सऽरथम्। तुरेभिः।

बर्हिः। नः। आस्ताम्। अदितिः। सुऽपुत्रा। स्वाहा। देवाः। अमृताः। मादयन्ताम्॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३] [१० मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम्।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः॥ १॥

अग्निम्। वः। देवम्। अग्निऽभिः। सऽजोषाः। यजिष्ठम्। दूतम्। अध्वरे। कृणुध्वम्।
यः। मर्त्येषु। निऽध्रुविः। ऋतऽवा। तपुःऽमूर्धा। घृतऽअन्नः। पावकः॥ १॥

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति॥ २॥

प्रोथत्। अश्वः। न। यवसे। अविष्यन्। यदा। महः। सम्ऽवरणात्। वि। अस्थात्।
आत्। अस्य। वातः। अनु। वाति। शोचिः। अध। स्म। ते। व्रजनम्। कृष्णम्। अस्ति॥ २॥

उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः।
अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान्॥ ३॥

उत्। यस्य। ते। नवऽजातस्य। वृष्णः। अग्ने। चरन्ति। अजराः। इधानाः।
अच्छ। द्याम्। अरुषः। धूमः। एति। सम्। दूतः। अग्ने। ईयसे। हि। देवान्॥ ३॥

वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जम्भैः।
सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि॥ ४॥

वि। यस्य। ते। पृथिव्याम्। पाजः। अश्रेत्। तृषु। यत्। अन्ना। सम्ऽअवृक्त। जम्भैः।
सेनाऽइव। सृष्टा। प्रऽसितिः। ते। एति। यवम्। न। दस्म। जुह्वा। विवेक्षि॥ ४॥

तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः।
निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृष्णः॥ ५॥ [३]

तम्। इत्। दोषा। तम्। उषसि। यविष्ठम्। अग्निम्। अत्यम्। न। मर्जयन्त। नरः।
निऽशिशानाः। अतिथिम्। अस्य। योनौ। दीदाय। शोचिः। आऽहुतस्य। वृष्णः॥ ५॥

सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुम्॥ ६॥

सुऽसंदृक्। ते। सुऽअनीक। प्रतीकम्। वि। यत्। रुक्मः। न। रोचसे। उपाके।
दिवः। न। ते। तन्यतुः। एति। शुष्मः। चित्रः। न। सूरः। प्रति। चक्षि। भानुम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि॥ ७॥

यथा। वः। स्वाहा। अग्नये। दाशेम। परि। इळाभिः। घृतवत्ऽभिः। च। हव्यैः।
तेभिः। नः। अग्ने। अमितैः। महःऽभिः। शतम्। पूःऽभिः। आयसीभिः। नि। पाहि॥ ७॥

या वा ते सन्ति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः।
ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः॥ ८॥

याः। वा। ते। सन्ति। दाशुषे। अधृष्टाः। गिरः। वा। याभिः। नृऽवतीः। उरुष्याः।
ताभिः। नः। सूनो इति। सहसः। नि। पाहि। स्मत्। सूरीन्। जरितॄन्। जातऽवेदः॥ ८॥

निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वया कृपा तन्वा३ रोचमानः।
आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः॥ ९॥

निः। यत्। पूताऽइव। स्वऽधितिः। शुचिः। गात्। स्वया। कृपा। तन्वा। रोचमानः।
आ। यः। मात्रोः। उशेन्यः। जनिष्ट। देवऽयज्याय। सुऽक्रतुः। पावकः॥ ९॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः॥ १०॥ [४]

एता। नः। अग्ने। सौभगा। दिदीहि। अपि। क्रतुम्। सुऽचेतसम्। वतेम।
विश्वा। स्तोतृऽभ्यः। गृणते। च। सन्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १०॥

[४] [१० मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम्।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति॥ १॥

प्र। वः। शुक्राय। भानवे। भरध्वम्। हव्यम्। मतिम्। च। अग्नये। सुऽपूतम्।
यः। दैव्यानि। मानुषा। जनूंषि। अन्तः। विश्वानि। विद्मना। जिगाति॥ १॥

स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः।
सं यो वना युवते शुचिदन्भूरि चिदन्ना समिदत्ति सद्यः॥ २॥

सः। गृत्सः। अग्निः। तरुणः। चित्। अस्तु। यतः। यविष्ठः। अजनिष्ट। मातुः।
सम्। यः। वना। युवते। शुचिऽदन्। भूरि। चित्। अन्ना। सम्। इत्। अत्ति। सद्यः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे।

नि यो गृभं पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच॥ ३॥

अस्य। देवस्य। सम्ऽसदि। अनीके। यम्। मर्तासः। श्येतम्। जगृभ्रे।

नि। यः। गृभम्। पौरुषेयीम्। उवोच। दुःऽओकम्। अग्निः। आयवे। शुशोच॥ ३॥

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि।

स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम॥ ४॥

अयम्। कविः। अकविषु। प्रऽचेताः। मर्तेषु। अग्निः। अमृतः। नि। धायि।

सः। मा। नः। अत्र। जुहुरः। सहस्वः। सदा। त्वे इति। सुऽमनसः। स्याम॥ ४॥

आ यो योनिं देवकृतं ससाद क्रत्वा ह्य१ग्निरमृताँ अतारीत्।

तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति॥ ५॥ [५]

आ। यः। योनिम्। देवऽकृतम्। ससाद। क्रत्वा। हि। अग्निः। अमृतान्। अतारीत्।

तम्। ओषधीः। च। वनिनः। च। गर्भम्। भूमिः। च। विश्वऽधायसम्। बिभर्ति॥ ५॥

ईशे ह्य१ग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः।

मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः॥ ६॥

ईशे। हि। अग्निः। अमृतस्य। भूरेः। ईशे। रायः। सुऽवीर्यस्य। दातोः।

मा। त्वा। वयम्। सहसाऽवन्। अवीराः। मा। अप्सवः। परि। सदाम। मा। अदुवः॥ ६॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम।

न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥ ७॥

परिऽसद्यम्। हि। अरणस्य। रेक्णः। नित्यस्य। रायः। पतयः। स्याम।

न। शेषः। अग्ने। अन्यऽजातम्। अस्ति। अचेतानस्य। मा। पथः। वि। दुक्षः॥ ७॥

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ।

अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः॥ ८॥

नहि। ग्रभाय। अरणः। सुऽशेवः। अन्यऽउदर्यः। मनसा। मन्तवै। ऊँ इति।

अध। चित्। ओकः। पुनः। इत्। सः। एति। आ। नः। वाजी। अभीषाट्। एतु। नव्यः॥ ८॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।

सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। अ॒ग्ने॒। व॒नु॒ष्य॒तः। नि। पा॒हि॒। त्वम्। ऊँ इति॑। न॒ः। स॒ह॒सा॒ऽव॒न्। अ॒व॒द्यात्।

सम्। त्वा॒। ध्व॒स्म॒न्ऽवत्। अ॒भि। ए॒तु॒। पाथ॑ः। सम्। र॒यिः। स्पृ॒ह॒याय्य॑ः। स॒ह॒स्री॥ ९॥

ए॒ता नो॑ अग्ने॒ सौभ॑गा दिदी॒ह्यपि॒ क्रतु॑ं सु॒चेत॑सं वतेम।

विश्वा॑ स्तो॒तृभ्यो॑ गृण॒ते च॑ सन्तु यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ १०॥ [६]

ए॒ता। न॒ः। अ॒ग्ने॒। सौभ॑गा। दि॒दी॒हि। अपि॑। क्रतु॑म्। सु॒ऽचेत॑सम्। व॒ते॒म॒।

विश्वा॑। स्तो॒तृ॒ऽभ्य॑ः। गृ॒ण॒ते। च॒। स॒न्तु॒। यू॒यम्। पा॒त॒। स्व॒स्ति॒ऽभि॑ः। सदा॑। न॒ः॥ १०॥

[५] [९ मैत्रावरुणिर्वसिष्ठः। वैश्वानरोऽग्निः। त्रिष्टुप्।]

प्राग्नये॑ त॒वसे॑ भरध्वं॒ गिर॑ं दि॒वो अ॑र॒तये॑ पृथि॒व्याः।

यो विश्वे॑षाम॒मृता॑नामु॒पस्थे॑ वैश्वान॒रो वा॑वृ॒धे जा॑गृ॒वद्भि॑ः॥ १॥

प्र। अ॒ग्नये॑। त॒वसे॑। भ॒र॒ध्व॒म्। गिर॑म्। दि॒वः। अ॒र॒तये॑। पृ॒थि॒व्याः।

यः। विश्वे॑षाम्। अ॒मृता॑नाम्। उ॒पऽस्थे॑। वै॒श्वा॒न॒रः। व॒वृ॒धे। जा॒गृ॒वत्ऽभि॑ः॥ १॥

पृ॒ष्टो दि॒वि धाय्य॒ग्निः पृ॑थि॒व्यां ने॒ता सिन्धू॑नां वृष॒भः स्तिया॑नाम्।

स मानु॑षीर॒भि वि॒शो॒ वि भा॑ति वैश्वान॒रो वा॑वृधा॒नो वरे॑ण॥ २॥

पृ॒ष्टः। दि॒वि। धायि॑। अ॒ग्निः। पृ॒थि॒व्याम्। ने॒ता। सिन्धू॑नाम्। वृ॒ष॒भः। स्तिया॑नाम्।

सः। मानु॑षीः। अ॒भि। विश॑ः। वि। भा॒ति॒। वै॒श्वा॒न॒रः। व॒वृ॒धा॒नः। वरे॑ण॥ २॥

त्वद्भि॒या विश॑ आय॒न्नसि॑क्नीरसम॒ना जह॑ती॒र्भोज॑नानि।

वैश्वा॑नर पू॒रवे॒ शोशु॑चान॒ः पुरो॒ यद॑ग्ने द॒रय॒न्नदी॑देः॥ ३॥

त्वत्। भि॒या। विश॑ः। आ॒य॒न्। असि॑क्नीः। अ॒स॒म॒नाः। जह॑तीः। भोज॑नानि।

वैश्वा॑नर। पू॒रवे॑। शोशु॑चानः। पुर॑ः। यत्। अ॒ग्ने॒। द॒रय॑न्। अदी॑देः॥ ३॥

तव॑ त्रि॒धातु॑ पृथि॒वी उ॒त द्यौर्वैश्वा॑नर व्र॒तम॑ग्ने सचन्त।

त्वं भा॒सा रोद॑सी॒ आ त॑त॒न्थाज॑स्रेण शो॒चिषा॒ शोशु॑चानः॥ ४॥

तव॑। त्रि॒ऽधातु॑। पृ॒थि॒वी। उ॒त। द्यौः। वैश्वा॑नर। व्र॒तम्। अ॒ग्ने॒। स॒च॒न्त॒।

त्वम्। भा॒सा। रोद॑सी॒ इति॑। आ। त॒त॒न्थ॒। अज॑स्रेण। शो॒चिषा॑। शोशु॑चानः॥ ४॥

त्वाम॑ग्ने ह॒रितो॑ वावशा॒ना गिर॑ः सचन्ते॒ धुन॑यो घृ॒ताचीः।

पति॑ं कृष्टी॒नां र॒थ्य॑ं र॒यी॒णां वैश्वान॒रमु॒षसा॑ं के॒तुमह्ना॑म्॥ ५॥ [७]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वाम्। अग्ने। हरितः। वावशानाः। गिरः। सचन्ते। धुनयः। घृताचीः।
पतिम्। कृष्टीनाम्। रथ्यम्। रयीणाम्। वैश्वानरम्। उषसाम्। केतुम्। अह्नाम्॥ ५॥

त्वे असुर्य१ंवसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषन्त।
त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय॥ ६॥

त्वे इति। असुर्यम्। वसवः। नि। ऋण्वन्। क्रतुम्। हि। ते। मित्र॰महः। जुषन्त।
त्वम्। दस्यून्। ओकसः। अग्ने। आजः। उरु। ज्योतिः। जनयन्। आर्याय॥ ६॥

स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः।
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन्॥ ७॥

सः। जायमानः। परमे। वि॰ओमन्। वायुः। न। पाथः। परि। पासि। सद्यः।
त्वम्। भुवना। जनयन्। अभि। क्रन्। अपत्याय। जात॰वेदः। दशस्यन्॥ ७॥

तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय॥ ८॥

ताम्। अग्ने। अस्मे इति। इषम्। आ। ईरयस्व। वैश्वानर। द्यु॰मतीम्। जात॰वेदः।
यया। राधः। पिन्वसि। विश्व॰वार। पृथु। श्रवः। दाशुषे। मर्त्याय॥ ८॥

तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः॥ ९॥ [८]

तम्। नः। अग्ने। मघवत्॰भ्यः। पुरु॰क्षुम्। रयिम्। नि। वाजम्। श्रुत्यम्। युवस्व।
वैश्वानर। महि। नः। शर्म। यच्छ। रुद्रेभिः। अग्ने। वसु॰भिः। स॰जोषाः॥ ९॥

[६] [७ मैत्रावरुणिर्वसिष्ठः। वैश्वानरोऽग्निः। त्रिष्टुप्।]

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य।
इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि॥ १॥

प्र। सम्॰राजः। असुरस्य। प्र॰शस्तिम्। पुंसः। कृष्टीनाम्। अनु॰माद्यस्य।
इन्द्रस्यऽइव। प्र। तवसः। कृतानि। वन्दे। दारुम्। वन्दमानः। विवक्मि॥ १॥

कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कविम्। केतुम्। धासिम्। भानुम्। अद्रेः। हिन्वन्ति। शम्। राज्यम्। रोदस्योः।
पुरम्ऽदरस्य। गीःऽभिः। आ। विवासे। अग्नेः। व्रतानि। पूर्व्या। महानि॥ २॥

न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान्।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून्॥ ३॥

नि। अक्रतून्। ग्रथिनः। मृध्रऽवाचः। पणीन्। अश्रद्धान्। अवृधान्। अयज्ञान्।
प्रऽप्र। तान्। दस्यून्। अग्निः। विवाय। पूर्वः। चकार। अपरान्। अयज्यून्॥ ३॥

यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून्॥ ४॥

यः। अपाचीने। तमसि। मदन्तीः। प्राचीः। चकार। नृऽतमः। शचीभिः।
तम्। ईशानम्। वस्वः। अग्निम्। गृणीषे। अनानतम्। दमयन्तम्। पृतन्यून्॥ ४॥

यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः॥ ५॥

यः। देह्यः। अनमयत्। वधऽस्नैः। यः। अर्यऽपत्नीः। उषसः। चकार।
सः। निऽरुध्य। नहुषः। यह्वः। अग्निः। विशः। चक्रे। बलिऽहृतः। सहःऽभिः॥ ५॥

यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम्॥ ६॥

यस्य। शर्मन्। उप। विश्वे। जनासः। एवैः। तस्थुः। सुऽमतिम्। भिक्षमाणाः।
वैश्वानरः। वरम्। आ। रोदस्योः। आ। अग्निः। ससाद। पित्रोः। उपऽस्थम्॥ ६॥

आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य।
आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः॥ ७॥ [९]

आ। देवः। ददे। बुध्न्या। वसूनि। वैश्वानरः। उत्ऽइता। सूर्यस्य।
आ। समुद्रात्। अवरात्। आ। परस्मात्। आ। अग्निः। ददे। दिवः। आ। पृथिव्याः॥ ७॥

[७] [७ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः।
भवा नो दूतो अध्वरस्य विद्वान्त्मना देवेषु विविदे मितद्रुः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र। वः। देवम्। चित्। सहसानम्। अग्निम्। अश्वम्। न। वाजिनम्। हिषे। नमःऽभिः।

भव। नः। दूतः। अध्वरस्य। विद्वान्। त्मना। देवेषु। विविदे। मितऽद्रुः॥ १॥

आ याह्यग्ने पथ्या३ अनु स्वा मन्द्रो देवानां सख्यं जुषाणः।

आ सानु शुष्मैर्नदयन्पृथिव्या जम्भेभिर्विश्वमुशधग्वनानि॥ २॥

आ। याहि। अग्ने। पथ्याः। अनु। स्वाः। मन्द्रः। देवानाम्। सख्यम्। जुषाणः।

आ। सानु। शुष्मैः। नदयन्। पृथिव्याः। जम्भेभिः। विश्वम्। उशधक्। वनानि॥ २॥

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता।

आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः॥ ३॥

प्राचीनः। यज्ञः। सुऽधितम्। हि। बर्हिः। प्रीणीते। अग्निः। ईळितः। न। होता।

आ। मातरा। विश्ववारे इति विश्वऽवारे। हुवानः। यतः। यविष्ठ। जज्ञिषे। सुऽशेवः॥ ३॥

सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम्।

विशामधायि विश्पतिर्दुरोणे३ग्निर्मन्द्रो मधुवचा ऋतावा॥ ४॥

सद्यः। अध्वरे। रथिरम्। जनन्त। मानुषासः। विऽचेतसः। यः। एषाम्।

विशाम्। अधायि। विश्पतिः। दुरोणे। अग्निः। मन्द्रः। मधुऽवचाः। ऋतऽवा॥ ४॥

असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता।

द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम्॥ ५॥

असादि। वृतः। वह्निः। आऽजगन्वान्। अग्निः। ब्रह्मा। नृऽसदने। विऽधर्ता।

द्यौः। च। यम्। पृथिवी। ववृधाते इति। आ। यम्। होता। यजति। विश्वऽवारम्॥ ५॥

एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन्।

प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य॥ ६॥

एते। द्युम्नेभिः। विश्वम्। आ। अतिरन्त। मन्त्रम्। ये। वा। अरम्। नर्याः। अतक्षन्।

प्र। ये। विशः। तिरन्त। श्रोषमाणाः। आ। ये। मे। अस्य। दीधयन्। ऋतस्य॥ ६॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम्।

इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [१०]

नु। त्वाम्। अग्ने। ईमहे। वसिष्ठाः। ईशानम्। सूनो इति। सहसः। वसूनाम्।

इषम्। स्तोतृऽभ्यः। मघवत्ऽभ्यः। आनट्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८] [७ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन।

नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि॥ १॥

इन्धे। राजा। सम्। अर्यः। नमःऽभिः। यस्य। प्रतीकम्। आऽहुतम्। घृतेन।

नरः। हव्येभिः। ईळते। सऽबाधः। आ। अग्निः। अग्रे। उषसाम्। अशोचि॥ १॥

अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः।

वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे॥ २॥

अयम्। ऊँ इति। स्यः। सुऽमहान्। अवेदि। होता। मन्द्रः। मनुषः। यह्वः। अग्निः।

वि। भाः। अकरित्यकः। ससृजानः। पृथिव्याम्। कृष्णऽपविः। ओषधीभिः। ववक्षे॥ २॥

कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः।

कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः॥ ३॥

कया। नः। अग्ने। वि। वसः। सुऽवृक्तिम्। काम्। ऊँ इति। स्वधाम्। ऋणवः। शस्यमानः।

कदा। भवेम। पतयः। सुऽदत्र। रायः। वन्तारः। दुस्तरस्य। साधोः॥ ३॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः।

अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच॥ ४॥

प्रऽप्र। अयम्। अग्निः। भरतस्य। शृण्वे। वि। यत्। सूर्यः। न। रोचते। बृहत्। भाः।

अभि। यः। पूरुम्। पृतनासु। तस्थौ। द्युतानः। दैव्यः। अतिथिः। शुशोच॥ ४॥

असन्नित्त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः।

स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात॥ ५॥

असन्। इत्। त्वे इति। आऽहवनानि। भूरि। भुवः। विश्वेभिः। सुऽमनाः। अनीकैः।

स्तुतः। चित्। अग्ने। शृण्विषे। गृणानः। स्वयम्। वर्धस्व। तन्वम्। सुऽजात॥ ५॥

इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः।

शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा॥ ६॥

इदम्। वचः। शतऽसाः। सम्ऽसहस्रम्। उत्। अग्नये। जनिषीष्ट। द्विऽबर्हाः।

शम्। यत्। स्तोतृऽभ्यः। आपये। भवाति। द्युऽमत्। अमीवऽचातनम्। रक्षःऽहा॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम्।
इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [११]

नु। त्वाम्। अग्ने। ईमहे। वसिष्ठाः। ईशानम्। सूनो इति। सहसः। वसूनाम्।
इषम्। स्तोतृऽभ्यः। मघवत्ऽभ्यः। आनट्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[९] [६ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः।
दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु॥ १॥

अबोधि। जारः। उषसाम्। उपऽस्थात्। होता। मन्द्रः। कविऽतमः। पावकः।
दधाति। केतुम्। उभयस्य। जन्तोः। हव्या। देवेषु। द्रविणम्। सुकृत्ऽसु॥ १॥

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः।
होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम्॥ २॥

सः। सुऽक्रतुः। यः। वि। दुरः। पणीनाम्। पुनानः। अर्कम्। पुरुऽभोजसम्। नः।
होता। मन्द्रः। विशाम्। दमूनाः। तिरः। तमः। ददृशे। राम्याणाम्॥ २॥

अमूरः कविरदितिर्विवस्वान्त्सुसंसन्मित्रो अतिथिः शिवो नः।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१आ विवेश॥ ३॥

अमूरः। कविः। अदितिः। विवस्वान्। सुऽसंसत्। मित्रः। अतिथिः। शिवः। नः।
चित्रऽभानुः। उषसाम्। भाति। अग्रे। अपाम्। गर्भः। प्रऽस्वः। आ। विवेश॥ ३॥

ईळेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधन्त॥ ४॥

ईळेन्यः। वः। मनुषः। युगेषु। समनऽगाः। अशुचत्। जातऽवेदाः।
सुऽसंदृशा। भानुना। यः। विऽभाति। प्रति। गावः। सम्ऽइधानम्। बुधन्त॥ ४॥

अग्ने याहि दूत्य१ मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन।
सरस्वतीं मरुतो अश्विनापो यक्षि देवान् रत्नधेयाय विश्वान्॥ ५॥

अग्ने। याहि। दूत्यम्। मा। रिषण्यः। देवान्। अच्छ। ब्रह्मऽकृता। गणेन।
सरस्वतीम्। मरुतः। अश्विना। अपः। यक्षि। देवान्। रत्नऽधेयाय। विश्वान्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वाम॑ग्ने समिधा॒नो वसि॑ष्ठो॒ जरू॑थं ह॒न्यक्षि॑ रा॒ये पुरं॑धिम्।

पु॒रु॒णी॒था जा॑तवेदो जरस्व यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः॥ ६॥ [१२]

त्वाम्। अ॒ग्ने॒। स॒म्ऽइ॒धा॒नः। वसि॑ष्ठः। जरू॑थम्। ह॒न्। यक्षि॑। रा॒ये। पुर॑म्ऽधिम्।

पु॒रु॒ऽनी॒था। जा॒त॒ऽवे॒दः॒। ज॒र॒स्व॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒॥ ६॥

[१०] [५ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

उ॒षो न जा॒रः पृ॒थु पाजो॑ अश्रे॒द्दवि॑द्युत॒द्दीद्य॒च्छोशु॑चानः।

वृषा॒ हरिः॒ शुचि॒रा भा॑ति भा॒स धियो॑ हिन्वा॒न उ॑श॒तीर॑जीगः॥ १॥

उ॒षः। न। जा॒रः। पृ॒थु। पाजः॑। अ॒श्रे॒त्। दवि॑द्युतत्। दीद्य॑त्। शोशु॑चानः।

वृषा॑। हरिः॑। शुचिः॑। आ। भा॒ति॒। भा॒सा। धियः॑। हि॒न्वा॒नः। उ॒श॒तीः। अ॒जी॒ग॒रि॒ति॑॥ १॥

स्व१॒॑र्ण वस्तो॑रु॒षसा॑मरोचि य॒ज्ञं त॑न्वा॒ना उ॒शिजो॒ न मन्म॑।

अ॒ग्निर्जन्मा॑नि दे॒व आ वि वि॒द्वान्द्र॒वद्दू॒तो दे॑व॒यावा॒ वनि॑ष्ठः॥ २॥

स्वः॑। न। वस्तोः॑। उ॒षसा॑म्। अ॒रो॒चि॒। य॒ज्ञम्। त॒न्वा॒नाः। उ॒शिजः॑। न। मन्म॑।

अ॒ग्निः। जन्मा॑नि। दे॒वः। आ। वि। वि॒द्वान्। द्र॒वत्। दू॒तः। दे॒व॒ऽयावा॑। वनि॑ष्ठः॥ २॥

अच्छा॒ गिरो॑ म॒तयो॑ देव॒यन्ती॑र॒ग्निं य॑न्ति॒ द्रवि॑णं॒ भिक्ष॑माणाः।

सु॒सं॒दृशं॑ सु॒प्रती॑कं॒ स्वञ्चं॑ हव्य॒वाह॑मर॒तिं मानु॑षाणाम्॥ ३॥

अच्छ॑। गिरः॑। म॒तयः॑। दे॒व॒ऽयन्तीः॑। अ॒ग्निम्। य॒न्ति॒। द्रवि॑णम्। भिक्ष॑माणाः।

सु॒ऽसं॒दृश॑म्। सु॒ऽप्रती॑कम्। सु॒ऽअञ्च॑म्। ह॒व्य॒ऽवाह॑म्। अ॒र॒तिम्। मानु॑षाणाम्॥ ३॥

इन्द्रं॑ नो अग्ने॒ वसु॑भिः स॒जोषा॑ रु॒द्रं रु॒द्रेभि॒रा व॑हा बृ॒हन्त॑म्।

आ॒दि॒त्येभि॒रदि॑तिं वि॒श्वज॑न्यां॒ बृह॒स्पति॒मृक्व॑भिर्वि॒श्ववा॑रम्॥ ४॥

इन्द्र॑म्। नः॒। अ॒ग्ने॒। वसु॑ऽभिः। स॒ऽजोषाः॑। रु॒द्रम्। रु॒द्रेभिः॑। आ। व॒ह॒। बृ॒हन्त॑म्।

आ॒दि॒त्येभिः॑। अदि॑तिम्। वि॒श्वऽज॑न्याम्। बृह॒स्पति॑म्। ऋक्व॑ऽभिः। वि॒श्वऽवा॑रम्॥ ४॥

म॒न्द्रं होता॑रमु॒शिजो॒ यवि॑ष्ठम॒ग्निं विश॑ ईळते अध्व॒रेषु॑।

स हि क्षपा॑वाँ॒ अभ॑वद्रयी॒णामत॑न्द्रो दू॒तो य॒जथा॑य दे॒वान्॥ ५॥ [१३]

म॒न्द्रम्। होता॑रम्। उ॒शिजः॑। यवि॑ष्ठम्। अ॒ग्निम्। विशः॑। ई॒ळ॒ते॒। अ॒ध्व॒रेषु॑।

सः। हि। क्षपा॑ऽवान्। अभ॑वत्। र॒यी॒णाम्। अत॑न्द्रः। दू॒तः। य॒जथा॑य। दे॒वान्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[११] [५ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह॥ १॥

महान्। असि। अध्वरस्य। प्रऽकेतः। न। ऋते। त्वत्। अमृताः। मादयन्ते।
आ। विश्वेभिः। सऽरथम्। याहि। देवैः। नि। अग्ने। होता। प्रथमः। सद। इह॥ १॥

त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति॥ २॥

त्वाम्। ईळते। अजिरम्। दूत्याय। हविष्मन्तः। सदम्। इत्। मानुषासः।
यस्य। देवैः। आ। असदः। बर्हिः। अग्ने। अहानि। अस्मै। सुऽदिना। भवन्ति॥ २॥

त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय।
मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा॥ ३॥

त्रिः। चित्। अक्तोः। प्र। चिकितुः। वसूनि। त्वे इति। अन्तः। दाशुषे। मर्त्याय।
मनुष्वत्। अग्ने। इह। यक्षि। देवान्। भव। नः। दूतः। अभिशस्तिऽपावा॥ ३॥

अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य।
क्रतुं ह्यस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम्॥ ४॥

अग्निः। ईशे। बृहतः। अध्वरस्य। अग्निः। विश्वस्य। हविषः। कृतस्य।
क्रतुम्। हि। अस्य। वसवः। जुषन्त। अथ। देवाः। दधिरे। हव्यऽवाहम्॥ ४॥

आग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम्।
इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१४]

आ। अग्ने। वह। हविःऽअद्याय। देवान्। इन्द्रऽज्येष्ठासः। इह। मादयन्ताम्।
इमम्। यज्ञम्। दिवि। देवेषु। धेहि। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[१२] [३ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्।]

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अगन्म। महा। नमसा। यविष्ठम्। यः। दीदाय। सम्ऽइद्धः। स्वे। दुरोणे।
चित्रऽभानुम्। रोदसी इति। अन्तः। उर्वी इति। सुऽआहुतम्। विश्वतः। प्रत्यञ्चम्॥ १॥

स मह्ना विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः।
स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः॥ २॥

सः। मह्ना। विश्वा। दुःऽइतानि। सह्वान्। अग्निः। स्तवे। दमे। आ। जातऽवेदाः।
सः। नः। रक्षिषत्। दुःऽइतात्। अवद्यात्। अस्मान्। गृणतः। उत। नः। मघोनः॥ २॥

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः॥ ३॥ [१५]

त्वम्। वरुणः। उत। मित्रः। अग्ने। त्वाम्। वर्धन्ति। मतिऽभिः। वसिष्ठाः।
त्वे इति। वसु। सुऽसननानि। सन्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

[१३] [३ मैत्रावरुणिर्वसिष्ठः। वैश्वानरोऽग्निः। त्रिष्टुप्।]

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम्।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम्॥ १॥

प्र। अग्नये। विश्वऽशुचे। धियम्ऽधे। असुरऽघ्ने। मन्म। धीतिम्। भरध्वम्।
भरे। हविः। न। बर्हिषि। प्रीणानः। वैश्वानराय। यतये। मतीनाम्॥ १॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः।
त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा॥ २॥

त्वम्। अग्ने। शोचिषा। शोशुचानः। आ। रोदसी इति। अपृणाः। जायमानः।
त्वम्। देवान्। अभिऽशस्तेः। अमुञ्चः। वैश्वानर। जातऽवेदः। महिऽत्वा॥ २॥

जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः॥ ३॥ [१६]

जातः। यत्। अग्ने। भुवना। वि। अख्यः। पशून्। न। गोपाः। इर्यः। परिऽज्मा।
वैश्वानर। ब्रह्मणे। विन्द। गातुम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१४] [३ मैत्रावरुणिर्वसिष्ठः। अग्निः। त्रिष्टुप्, १ बृहती।]

समिधा जातवेदसे देवाय देवहूतिभिः। हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये॥ १॥

सम्ऽइधा। जातऽवेदसे। देवाय। देवहूतिऽभिः।

हविःऽभिः। शुक्रऽशोचिषे। नमस्विनः। वयम्। दाशेम। अग्नये॥ १॥

वयं ते अग्ने समिधा विदेम वयं दाशेम सुष्टुती यजत्र।

वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे॥ २॥

वयम्। ते। अग्ने। सम्ऽइधा। विधेम। वयम्। दाशेम। सुऽस्तुती। यजत्र।

वयम्। घृतेन। अध्वरस्य। होतः। वयम्। देव। हविषा। भद्रऽशोचे॥ २॥

आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः।

तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः॥ ३॥ [१७]

आ। नः। देवेभिः। उप। देवऽहूतिम्। अग्ने। याहि। वषट्कृतिम्। जुषाणः।

तुभ्यम्। देवाय। दाशतः। स्याम। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

[१५] [१५ मैत्रावरुणिर्वसिष्ठः। अग्निः। गायत्री।]

उपसद्याय मीळ्हुष आस्ये जुहुता हविः। यो नो नेदिष्ठमाप्यम्॥ १॥

उपऽसद्याय। मीळ्हुषे। आस्ये। जुहुत। हविः। यः। नः। नेदिष्ठम्। आप्यम्॥ १॥

यः पञ्च चर्षणीरभि निषसाद दमेदमे। कविर्गृहपतिर्युवा॥ २॥

यः। पञ्च। चर्षणीः। अभि। निऽससाद। दमेऽदमे। कविः। गृहऽपतिः। युवा॥ २॥

स नो वेदो अमात्यमग्नी रक्षतु विश्वतः। उतास्मान् पात्वंहसः॥ ३॥

सः। नः। वेदः। अमात्यम्। अग्निः। रक्षतु। विश्वतः। उत। अस्मान्। पातु। अंहसः॥ ३॥

नवं नु स्तोममग्नये दिवः श्येनाय जीजनम्। वस्वः कुविद्वनाति नः॥ ४॥

नवम्। नु। स्तोमम्। अग्नये। दिवः। श्येनाय। जीजनम्। वस्वः। कुवित्। वनाति। नः॥ ४॥

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा। अग्ने यज्ञस्य शोचतः॥ ५॥ [१८]

स्पार्हाः। यस्य। श्रियः। दृशे। रयिः। वीरऽवतः। यथा। अग्ने। यज्ञस्य। शोचतः॥ ५॥

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः। यजिष्ठो हव्यवाहनः॥ ६॥

सः। इमाम्। वेतु। वषट्ऽकृतिम्। अग्निः। जुषत। नः। गिरः। यजिष्ठः। हव्यऽवाहनः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि। सुवीरमग्न आहुत॥ ७॥

नि। त्वा। नक्ष्य। विश्पते। द्युऽमन्तम्। देव। धीमहि। सुऽवीरम्। अग्ने। आऽहुत॥ ७॥

क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयम्। सुवीरस्त्वमस्मयुः॥ ८॥

क्षपः। उस्रः। च। दीदिहि। सुऽअग्नयः। त्वया। वयम्। सुऽवीरः। त्वम्। अस्मऽयुः॥ ८॥

उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः। उपाक्षरा सहस्रिणी॥ ९॥

उप। त्वा। सातये। नरः। विप्रासः। यन्ति। धीतिभिः। उप। अक्षरा। सहस्रिणी॥ ९॥

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः। शुचिः पावक ईड्यः॥ १०॥ [१९]

अग्निः। रक्षांसि। सेधति। शुक्रऽशोचिः। अमर्त्यः। शुचिः। पावकः। ईड्यः॥ १०॥

स नो राधांस्या भरेशानः सहसो यहो। भगश्च दातु वार्यम्॥ ११॥

सः। नः। राधांसि। आ। भर। ईशानः। सहसः। यहो इति। भगः। च। दातु। वार्यम्॥ ११॥

त्वमग्ने वीरवद्यशो देवश्च सविता भगः। दितिश्च दाति वार्यम्॥ १२॥

त्वम्। अग्ने। वीरऽवत्। यशः। देवः। च। सविता। भगः। दितिः। च। दाति। वार्यम्॥ १२॥

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः। तपिष्ठैरजरो दह॥ १३॥

अग्ने। रक्ष। नः। अंहसः। प्रति। स्म। देव। रिषतः। तपिष्ठैः। अजरः। दह॥ १३॥

अधा मही न आयस्यनाधृष्टो नृपीतये। पूर्भवा शतभुजिः॥ १४॥

अध। मही। नः। आयसी। अनाधृष्टः। नृऽपीतये। पूः। भव। शतऽभुजिः॥ १४॥

त्वं नः पाह्यंहसो दोषावस्तरघायतः। दिवा नक्तमदाभ्य॥ १५॥ [२०]

त्वम्। नः। पाहि। अंहसः। दोषाऽवस्तः। अघऽयतः। दिवा। नक्तम्। अदाभ्य॥ १५॥

[१६] [१२ मैत्रावरुणिर्वसिष्ठः। अग्निः। प्रगाथः (= अयुजो बृहत्यः, युजः सतोबृहत्यः)]

एना वो अग्निं नमसोर्जो नपातमा हुवे। प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्॥ १॥

एना। वः। अग्निम्। नमसा। ऊर्जः। नपातम्। आ। हुवे।

प्रियम्। चेतिष्ठम्। अरतिम्। सुऽअध्वरम्। विश्वस्य। दूतम्। अमृतम्॥ १॥

स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः।

सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। योजते। अरुषा। विश्वऽभोजसा। सः। दुद्रवत्। सुऽआहुतः।

सुऽब्रह्मा। यज्ञः। सुऽशमी। वसूनाम्। देवम्। राधः। जनानाम्॥ २॥

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः।

उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः॥ ३॥

उत्। अस्य। शोचिः। अस्थात्। आऽजुह्वानस्य। मीळ्हुषः।

उत्। धूमासः। अरुषासः। दिविऽस्पृशः। सम्। अग्निम्। इन्धते। नरः॥ ३॥

त्वं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह।

विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे॥ ४॥

तम्। त्वा। दूतम्। कृण्महे। यशःऽतमम्। देवान्। आ। वीतये। वह।

विश्वा। सूनो इति। सहसः। मर्तऽभोजना। रास्व। तत्। यत्। त्वा। ईमहे॥ ४॥

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे। त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम्॥ ५॥

त्वम्। अग्ने। गृहऽपतिः। त्वम्। होता। नः। अध्वरे।

त्वम्। पोता। विश्वऽवार। प्रऽचेताः। यक्षि। वेषि। च। वार्यम्॥ ५॥

कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि।

आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते॥ ६॥ [२१]

कृधि। रत्नम्। यजमानाय। सुक्रतो इति सुऽक्रतो। त्वम्। हि। रत्नऽधाः। असि।

आ। नः। ऋते। शिशीहि। विश्वम्। ऋत्विजम्। सुऽशंसः। यः। च। दक्षते॥ ६॥

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः। यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम्॥ ७॥

त्वे इति। अग्ने। सुऽआहुत। प्रियासः। सन्तु। सूरयः।

यन्तारः। ये। मघऽवानः। जनानाम्। ऊर्वान्। दयन्त। गोनाम्॥ ७॥

येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति।

ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत्॥ ८॥

येषाम्। इळा। घृतऽहस्ता। दुरोणे। आ। अपि। प्राता। निऽसीदति।

तान्। त्रायस्व। सहस्य। द्रुहः। निदः। यच्छ। नः। शर्म। दीर्घऽश्रुत्॥ ८॥

स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः।

अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। मन्द्रया। च। जिह्वया। वह्निः। आसा। विदुःऽतरः।

अग्ने। रयिम्। मघवत्ऽभ्यः। नः। आ। वह। हव्यऽदातिम्। च। सूदय॥ ९॥

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः।

ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य॥ १०॥

ये। राधांसि। ददति। अश्व्या। मघा। कामेन। श्रवसः। महः।

तान्। अंहसः। पिपृहि। पर्तृऽभिः। त्वम्। शतम्। पूःऽभिः। यविष्ठ्य॥ १०॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्।

उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते॥ ११॥

देवः। वः। द्रविणःऽदाः। पूर्णाम्। विवष्टि। आऽसिचम्।

उत्। वा। सिञ्चध्वम्। उप। वा। पृणध्वम्। आत्। इत्। वः। देवः। ओहते॥ ११॥

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत।

दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे॥ १२॥ **[२२]**

तम्। होतारम्। अध्वरस्य। प्रऽचेतसम्। वह्निम्। देवाः। अकृण्वत।

दधाति। रत्नम्। विधते। सुऽवीर्यम्। अग्निः। जनाय। दाशुषे॥ १२॥

[१७] [७ मैत्रावरुणिर्वसिष्ठः। अग्निः। द्विपदा त्रिष्टुप्।]

अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम्॥ १॥

अग्ने। भव। सुऽसमिधा। सम्ऽइद्धः। उत। बर्हिः। उर्विया। वि। स्तृणीताम्॥ १॥

उत द्वार उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह॥ २॥

उत। द्वारः। उशतीः। वि। श्रयन्ताम्। उत। देवान्। उशतः। आ। वह। इह॥ २॥

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः॥ ३॥

अग्ने। वीहि। हविषा। यक्षि। देवान्। सुऽअध्वरा। कृणुहि। जातऽवेदः॥ ३॥

स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयच्च॥ ४॥

सुऽअध्वरा। करति। जातऽवेदाः। यक्षत्। देवान्। अमृतान्। पिप्रयत्। च॥ ४॥

वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य॥ ५॥

वंस्व। विश्वा। वार्याणि। प्रचेत इति प्रऽचेतः। सत्याः। भवन्तु। आऽशिषः। नः। अद्य॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम्॥ ६॥

त्वाम्। ऊँ इति। ते। दधिरे। हव्यवाहम्। देवासः। अग्ने। ऊर्जः। आ। नपातम्॥ ६॥

ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः॥ ७॥ [२३] {१}

ते। ते। देवाय। दाशतः। स्याम। महः। नः। रत्ना। वि। दध। इयानः॥ ७॥

[१८] [२५ मैत्रावरुणिर्वसिष्ठः। इन्द्रः, २२-२५ सुदासः पैजवनस्य (दानस्तुतिः)। त्रिष्टुप्।]

त्वे ह यत्पितरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन्।

त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः॥ १॥

त्वे इति। ह। यत्। पितरः। चित्। नः। इन्द्र। विश्वा। वामा। जरितारः। असन्वन्।

त्वे इति। गावः। सुदुघाः। त्वे इति। हि। अश्वाः। त्वम्। वसु। देवऽयते। वनिष्ठः॥ १॥

राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन्।

पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान्॥ २॥

राजाऽइव। हि। जनिऽभिः। क्षेषि। एव। अव। द्युऽभिः। अभि। विदुः। कविः। सन्।

पिशा। गिरः। मघऽवन्। गोभिः। अश्वैः। त्वाऽयतः। शिशीहि। राये। अस्मान्॥ २॥

इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः।

अर्वाची ते पथ्या राय एतु स्याम ते सुमताविन्द्र शर्मन्॥ ३॥

इमाः। ऊँ इति। त्वा। पस्पृधानासः। अत्र। मन्द्राः। गिरः। देवऽयन्तीः। उप। स्थुः।

अर्वाची। ते। पथ्या। रायः। एतु। स्याम। ते। सुऽमतौ। इन्द्र। शर्मन्॥ ३॥

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः।

त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ॥ ४॥

धेनुम्। न। त्वा। सुऽयवसे। दुधुक्षन्। उप। ब्रह्माणि। ससृजे। वसिष्ठः।

त्वाम्। इत्। मे। गोऽपतिम्। विश्वः। आह। आ। नः। इन्द्रः। सुऽमतिम्। गन्तु। अच्छ॥ ४॥

अर्णांसि चित्पप्रथाना सुदास इन्द्रो गाधान्यकृणोत्सुपारा।

शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः॥ ५॥ [२४]

अर्णांसि। चित्। पप्रथाना। सुऽदासे। इन्द्रः। गाधानि। अकृणोत्। सुऽपारा।

शर्धन्तम्। शिम्युम्। उचथस्य। नव्यः। शापम्। सिन्धूनाम्। अकृणोत्। अशस्तीः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव।

श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः॥ ६॥

पुरोळाः। इत्। तुर्वशः। यक्षुः। आसीत्। राये। मत्स्यासः। नि॰शिताः। अपि॰इव।

श्रुष्टिम्। चक्रुः। भृगवः। द्रुह्यवः। च। सखा। सखायम्। अतरत्। विषूचोः॥ ६॥

आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः।

आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नॄन्॥ ७॥

आ। पक्थासः। भलानसः। भनन्त। आ। अलिनासः। विषाणिनः। शिवासः।

आ। यः। अनयत्। सध॰माः। आर्यस्य। गव्या। तृत्सु॰भ्यः। अजगन्। युधा। नॄन्॥ ७॥

दुराध्यो३ अदितिं स्रेवयन्तोऽचेतसो वि जगृभ्रे परुष्णीम्।

मह्नाविव्यक्पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः॥ ८॥

दुः२आध्यः। अदितिम्। स्रेवयन्तः। अचेतसः। वि। जगृभ्रे। परुष्णीम्।

मह्ना। अविव्यक्। पृथिवीम्। पत्यमानः। पशुः। कविः। अशयत्। चायमानः॥ ८॥

ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम।

सुदास इन्द्रः सुतुकाँ अमित्रानरन्धयन्मानुषे वध्रिवाचः॥ ९॥

ईयुः। अर्थम्। न। नि॰अर्थम्। परुष्णीम्। आशुः। चन। इत्। अभि॰पित्वम्। जगाम।

सु॰दासे। इन्द्रः। सु॰तुकान्। अमित्रान्। अरन्धयत्। मानुषे। वध्रि॰वाचः॥ ९॥

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः।

पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च॥ १०॥ [२५]

ईयुः। गावः। न। यवसात्। अगोपाः। यथा॰कृतम्। अभि। मित्रम्। चितासः।

पृश्नि॰गावः। पृश्नि॰निप्रेषितासः। श्रुष्टिम्। चक्रुः। नि॰युतः। रन्तयः। च॥ १०॥

एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः।

दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम्॥ ११॥

एकम्। च। यः। विंशतिम्। च। श्रवस्या। वैकर्णयोः। जनान्। राजा। नि। अस्तुरित्यस्तः।

दस्मः। न। सद्मन्। नि। शिशाति। बर्हिः। शूरः। सर्गम्। अकृणोत्। इन्द्रः। एषाम्॥ ११॥

अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः।

वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अर्ध। श्रुतम्। कुवर्षम्। वृद्धम्। अप्ऽसु। अनु। द्रुह्युम्। नि। वृणक्। वज्रऽबाहुः।
वृणानाः। अत्र। सख्याय। सख्यम्। त्वाऽयन्तः। ये। अमदन्। अनु। त्वा॥ १२॥

वि सद्यो विश्वा दृंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचम्॥ १३॥

वि। सद्यः। विश्वा। दृंहितानि। एषाम्। इन्द्रः। पुरः। सहसा। सप्त। दुर्दरिति दर्दः।
वि। आनवस्य। तृत्सवे। गयम्। भाक्। जेष्म। पूरुम्। विदथे। मृध्रऽवाचम्॥ १३॥

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा।
षष्टिर्वीरासो अधि षड् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि॥ १४॥

नि। गव्यवः। अनवः। द्रुह्यवः। च। षष्टिः। शता। सुसुपुः। षट्। सहस्रा।
षष्टिः। वीरासः। अधि। षट्। दुवःऽयु। विश्वा। इत्। इन्द्रस्य। वीर्या। कृतानि॥ १४॥

इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे॥ १५॥ [२६]

इन्द्रेण। एते। तृत्सवः। वेविषाणाः। आपः। न। सृष्टाः। अधवन्त। नीचीः।
दुःऽमित्रासः। प्रकलऽवित्। मिमानाः। जहुः। विश्वानि। भोजना। सुऽदासे॥ १५॥

अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अभि क्षाम्।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः॥ १६॥

अर्धम्। वीरस्य। शृतऽपाम्। अनिन्द्रम्। परा। शर्धन्तम्। नुनुदे। अभि। क्षाम्।
इन्द्रः। मन्युम्। मन्युऽम्यः। मिमाय। भेजे। पथः। वर्तनिम्। पत्यमानः॥ १६॥

आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान।
अव स्रक्तीर्वेश्यावृश्चदिन्द्रः प्रायच्छद्विश्वा भोजना सुदासे॥ १७॥

आध्रेण। चित्। तत्। ऊँ इति। एकम्। चकार। सिंह्यम्। चित्। पेत्वेन। जघान।
अव। स्रक्तीः। वेश्या। अवृश्चत्। इन्द्रः। प्र। अयच्छत्। विश्वा। भोजना। सुऽदासे॥ १७॥

शश्वन्तो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विन्द रन्धिम्।
मर्तां एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिन्द्र॥ १८॥

शश्वन्तः। हि। शत्रवः। ररधुः। ते। भेदस्य। चित्। शर्धतः। विन्द। रन्धिम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मर्तान्। एनः। स्तुवतः। यः। कृणोति। तिग्मम्। तस्मिन्। नि। जहि। वज्रम्। इन्द्र॥ १८॥

आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत्।

अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि॥ १९॥

आवत्। इन्द्रम्। यमुना। तृत्सवः। च। प्र। अत्र। भेदम्। सर्वऽताता। मुषायत्।

अजासः। च। शिग्रवः। यक्षवः। च। बलिम्। शीर्षाणि। जभ्रुः। अश्व्यानि॥ १९॥

न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः।

देवकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत्॥ २०॥ [२७]

न। ते। इन्द्र। सुऽमतयः। न। रायः। सम्ऽचक्षे। पूर्वाः। उषसः। न। नूत्नाः।

देवकम्। चित्। मान्यमानम्। जघन्थ। अव। त्मना। बृहतः। शम्बरम्। भेत्॥ २०॥

प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः।

न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान्॥ २१॥

प्र। ये। गृहात्। अममदुः। त्वाऽया। पराऽशरः। शतऽयातुः। वसिष्ठः।

न। ते। भोजस्य। सख्यम्। मृषन्त। अध। सूरिऽभ्यः। सुऽदिना। वि। उच्छान्॥ २१॥

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः।

अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन्॥ २२॥

द्वे इति। नप्तुः। देवऽवतः। शते इति। गोः। द्वा। रथा। वधूऽमन्ता। सुऽदासः।

अर्हन्। अग्ने। पैजऽवनस्य। दानम्। होताऽइव। सद्म। परि। एमि। रेभन्॥ २२॥

चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके।

ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति॥ २३॥

चत्वारः। मा। पैजऽवनस्य। दानाः। स्मत्ऽदिष्टयः। कृशनिनः। निरेके।

ऋज्रासः। मा। पृथिविऽस्थाः। सुऽदासः। तोकम्। तोकाय। श्रवसे। वहन्ति॥ २३॥

यस्य श्रवो रोदसी अन्तरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता।

सप्तेदिन्द्रं न स्रवतो गृणन्ति नि युध्यामधिमशिशादभीके॥ २४॥

यस्य। श्रवः। रोदसी इति। अन्तः। उर्वी इति। शीर्ष्णेऽशीर्ष्णे। विऽबभाज। विऽभक्ता।

सप्त। इत्। इन्द्रम्। न। स्रवतः। गृणन्ति। नि। युध्यामधिम्। अशिशात्। अभीके॥ २४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः।

अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु॥ २५॥ [२८]

इमम्। नरः। मरुतः। सश्चत। अनु। दिवः ऽदासम्। न। पितरम्। सुऽदासः।

अविष्टन। पैजऽवनस्य। केतम्। दुःऽनशम्। क्षत्रम्। अजरम्। दुवःऽयु॥ २५॥

[१९] [११ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः।

यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः॥ १॥

यः। तिग्मऽशृङ्गः। वृषभः। न। भीमः। एकः। कृष्टीः। च्यवयति। प्र। विश्वाः।

यः। शश्वतः। अदाशुषः। गयस्य। प्रऽयन्ता। असि। सुस्विऽतराय। वेदः॥ १॥

त्वं ह त्यदिन्द्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये।

दासं यच्छुष्णं कुयवं न्यस्मा अरन्धय आर्जुनेयाय शिक्षन्॥ २॥

त्वम्। ह। त्यत्। इन्द्र। कुत्सम्। आवः। शुश्रूषमाणः। तन्वा। सऽमर्ये।

दासम्। यत्। शुष्णम्। कुयवम्। नि। अस्मै। अरन्धयः। आर्जुनेयाय। शिक्षन्॥ २॥

त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासम्।

प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसातो वृत्रहत्येषु पूरुम्॥ ३॥

त्वम्। धृष्णो इति। धृषता। वीतऽहव्यम्। प्र। आवः। विश्वाभिः। ऊतिऽभिः। सुऽदासम्।

प्र। पौरुऽकुत्सिम्। त्रसदस्युम्। आवः। क्षेत्रऽसाता। वृत्रऽहत्येषु। पूरुम्॥ ३॥

त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि।

त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु॥ ४॥

त्वम्। नृऽभिः। नृऽमनः। देवऽवीतौ। भूरीणि। वृत्रा। हरिऽअश्व। हंसि।

त्वम्। नि। दस्युम्। चुमुरिम्। धुनिम्। च। अस्वापयः। दभीतये। सुऽहन्तु॥ ४॥

तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः।

निवेशने शततमाविवेषीरहञ्च वृत्रं नमुचिमुताहन्॥ ५॥ [२९]

तव। च्यौत्नानि। वज्रऽहस्त। तानि। नव। यत्। पुरः। नवतिम्। च। सद्यः।

निऽवेशने। शतऽतमा। अविवेषीः। अहन्। च। वृत्रम्। नमुचिम्। उत। अहन्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सना ता त इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे।

वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम्॥ ६॥

सना। ता। ते। इन्द्र। भोजनानि। रातऽहव्याय। दाशुषे। सुऽदासे।

वृष्णे। ते। हरी इति। वृषणा। युनज्मि। व्यन्तु। ब्रह्माणि। पुरुऽशाक। वाजम्॥ ६॥

मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै।

त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम॥ ७॥

मा। ते। अस्याम्। सहसाऽवन्। परिष्टौ। अघाय। भूम। हरिऽवः। पराऽदै।

त्रायस्व। नः। अवृकेभिः। वरूथैः। तव। प्रियासः। सूरिषु। स्याम॥ ७॥

प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः।

नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन्॥ ८॥

प्रियासः। इत्। ते। मघऽवन्। अभिष्टौ। नरः। मदेम। शरणे। सखायः।

नि। तुर्वशम्। नि। याद्वम्। शिशीहि। अतिथिऽग्वाय। शंस्यम्। करिष्यन्॥ ८॥

सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था।

ये ते हवेभिर्वि पणीँरदाशन्नस्मन्वृणीष्व युज्याय तस्मै॥ ९॥

सद्यः। चित्। नु। ते। मघऽवन्। अभिष्टौ। नरः। शंसन्ति। उक्थऽशसः। उक्था।

ये। ते। हवेभिः। वि। पणीन्। अदाशन्। अस्मान्। वृणीष्व। युज्याय। तस्मै॥ ९॥

एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यञ्चो ददतो मघानि।

तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम्॥ १०॥

एते। स्तोमाः। नराम्। नृऽतम। तुभ्यम्। अस्मद्र्यञ्चः। ददतः। मघानि।

तेषाम्। इन्द्र। वृत्रऽहत्ये। शिवः। भूः। सखा। च। शूरः। अविता। च। नृणाम्॥ १०॥

नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व।

उप नो वाजान्मिमीह्युप स्तीन्यूयं पात स्वस्तिभिः सदा नः॥ ११॥ [३०]

नु। इन्द्र। शूर। स्तवमानः। ऊती। ब्रह्मऽजूतः। तन्वा। ववृधस्व।

उप। नः। वाजान्। मिमीहि। उप। स्तीन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ११॥

इत्याश्वलायन-संहितायां पञ्चमाष्टके द्वितीयोऽध्यायः समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके तृतीयोऽध्यायः ॥

[२०] [१० मैत्रावरुणिर्वसिष्ठः । इन्द्रः । त्रिष्टुप्]

उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्करिष्यन्।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित्॥ १ ॥

उग्रः। जज्ञे। वीर्याय। स्वधाऽवान्। चक्रिः। अपः। नर्यः। यत्। करिष्यन्।
जग्मिः। युवा। नृऽसदनम्। अवःऽभिः। त्राता। नः। इन्द्रः। एनसः। महः। चित्॥ १ ॥

हन्ता वृत्रमिन्द्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती।
कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत्॥ २ ॥

हन्ता। वृत्रम्। इन्द्रः। शूशुवानः। प्र। आवीत्। नु। वीरः। जरितारम्। ऊती।
कर्ता। सुऽदासे। अह। वै। ऊँ इति। लोकम्। दाता। वसु। मुहुः। आ। दाशुषे। भूत्॥ २ ॥

युध्मो अनर्वा खजकृत्समद्वा शूरः सत्राषाड्जनुषेमषाळ्हः।
व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान॥ ३ ॥

युध्मः। अनर्वा। खजऽकृत्। समत्ऽवा। शूरः। सत्राषाट्। जनुषा। ईम्। अषाळ्हः।
वि। आसे। इन्द्रः। पृतनाः। सुऽओजाः। अध। विश्वम्। शत्रुऽयन्तम्। जघान॥ ३ ॥

उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः।
नि वज्रमिन्द्रो हरिवान्मिमिक्षन्त्समन्धसा मदेषु वा उवोच॥ ४॥

उभे इति। चित्। इन्द्र। रोदसी इति। महिऽत्वा। आ। पप्राथ। तविषीभिः। तुविष्मः।
नि। वज्रम्। इन्द्रः। हरिऽवान्। मिमिक्षन्। सम्। अन्धसा। मदेषु। वै। उवोच॥ ४॥

वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं ससूव।
प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः॥ ५॥ [१]

वृषा। जजान। वृषणम्। रणाय। तम्। ऊँ इति। चित्। नारी। नर्यम्। ससूव।
प्र। यः। सेनाऽनीः। अध। नृऽभ्यः। अस्ति। इनः। सत्वा। गोऽएषणः। सः। धृष्णुः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नू चित्स भ्रेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात्।

यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः॥ ६॥

नु। चित्। सः। भ्रेषते। जनः। न। रेषत्। मनः। यः। अस्य। घोरम्। आऽविवासात्।

यज्ञैः। यः। इन्द्रे। दधते। दुवांसि। क्षयत्। सः। राये। ऋतऽपाः। ऋतेऽजाः॥ ६॥

यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान्कनीयसो देष्णम्।

अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः॥ ७॥

यत्। इन्द्र। पूर्वः। अपराय। शिक्षन्। अयत्। ज्यायान्। कनीयसः। देष्णम्।

अमृतः। इत्। परि। आसीत। दूरम्। आ। चित्र। चित्र्यम्। भर। रयिम्। नः॥ ७॥

यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते।

वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ॥ ८॥

यः। ते। इन्द्र। प्रियः। जनः। ददाशत्। असत्। निरेके। अद्रिऽवः। सखा। ते।

वयम्। ते। अस्याम्। सुऽमतौ। चनिष्ठाः। स्याम। वरूथे। अघ्नतः। नृऽपीतौ॥ ८॥

एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट।

रायस्कामो जरितारं त आगन्त्वमङ्ग शक्र वस्व आ शको नः॥ ९॥

एषः। स्तोमः। अचिक्रदत्। वृषा। ते। उत। स्तामुः। मघऽवन्। अक्रपिष्ट।

रायः। कामः। जरितारम्। ते। आ। अगन्। त्वम्। अङ्ग। शक्र। वस्वः। आ। शकः। नः॥ ९॥

स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति।

वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥ १०॥ [२]

सः। नः। इन्द्र। त्वऽयतायै। इषे। धाः। त्मना। च। ये। मघऽवानः। जुनन्ति।

वस्वी। सु। ते। जरित्रे। अस्तु। शक्तिः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १०॥

[२१] [१० **मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।**]

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच।

बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममन्धसो मदेषु॥ १॥

असावि। देवम्। गोऽऋजीकम्। अन्धः। नि। अस्मिन्। इन्द्रः। जनुषा। ईम्। उवोच।

बोधामसि। त्वा। हरिऽअश्व। यज्ञैः। बोध। नः। स्तोमम्। अन्धसः। मदेषु॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः।

न्यु भ्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः॥ २॥

प्र। यन्ति। यज्ञम्। विपयन्ति। बर्हिः। सोमऽमादः। विदथे। दुध्रऽवाचः।

नि। ऊँ इति। भ्रियन्ते। यशसः। गृभात्। आ। दूरेऽउपब्दः। वृषणः। नृऽसाचः॥ २॥

त्वमिन्द्र स्रवितवा अपस्कः परिष्ठिता अहिना सूर पूर्वीः।

त्वद्वावक्रे रथ्यो३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा॥ ३॥

त्वम्। इन्द्र। स्रवितवै। अपः। करिति कः। परिऽस्थिताः। अहिना। शूर। पूर्वीः।

त्वत्। वावक्रे। रथ्यः। न। धेनाः। रेजन्ते। विश्वा। कृत्रिमाणि। भीषा॥ ३॥

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान्।

इन्द्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना जघान॥ ४॥

भीमः। विवेष। आयुधेभिः। एषाम्। अपांसि। विश्वा। नर्याणि। विद्वान्।

इन्द्रः। पुरः। जर्हृषाणः। वि। दूधोत्। वि। वज्रऽहस्तः। महिना। जघान॥ ४॥

न यातव इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः।

स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः॥ ५॥ [३]

न। यातवः। इन्द्र। जुजुवुः। नः। न। वन्दना। शविष्ठ। वेद्याभिः।

सः। शर्धत्। अर्यः। विषुणस्य। जन्तोः। मा। शिश्नऽदेवाः। अपि। गुः। ऋतम्। नः॥ ५॥

अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ् महिमानं रजांसि।

स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते॥ ६॥

अभि। क्रत्वा। इन्द्र। भूः। अध। ज्मन्। न। ते। विव्यक्। महिमानम्। रजांसि।

स्वेन। हि। वृत्रम्। शवसा। जघन्थ। न। शत्रुः। अन्तम्। विविदत्। युधा। ते॥ ६॥

देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि।

इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ॥ ७॥

देवाः। चित्। ते। असुर्याय। पूर्वे। अनु। क्षत्राय। ममिरे। सहांसि।

इन्द्रः। मघानि। दयते। विऽसह्य। इन्द्रम्। वाजस्य। जोहुवन्त। सातौ॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता॥ ८॥
कीरिः। चित्। हि। त्वाम्। अवसे। जुहाव। ईशानम्। इन्द्र। सौभगस्य। भूरेः।
अवः। बभूथ। शतम्ऽऊते। अस्मे इति। अभिऽक्षत्तुः। त्वाऽवतः। वरूता॥ ८॥
सखायस्त इन्द्र विश्वह स्याम नमोवृधासो महिना तरुत्र।
वन्वन्तु स्मा तेऽवसा समीके३भीतिमर्यो वनुषां शवांसि॥ ९॥
सखायः। ते। इन्द्र। विश्वह। स्याम। नमःऽवृधासः। महिना। तरुत्र।
वन्वन्तु। स्म। ते। अवसा। सम्ऽईके। अभिऽइतिम्। अर्यः। वनुषाम्। शवांसि॥ ९॥
स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥ १०॥ [४]
सः। नः। इन्द्र। त्वऽयतायै। इषे। धाः। त्मना। च। ये। मघऽवानः। जुनन्ति।
वस्वी। सु। ते। जरित्रे। अस्तु। शक्तिः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १०॥

[२२] [९ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। विराट्, ९ त्रिष्टुप्।]

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वा॥ १॥
पिब। सोमम्। इन्द्र। मन्दतु। त्वा। यम्। ते। सुसाव। हरिऽअश्व। अद्रिः।
सोतुः। बाहुऽभ्याम्। सुऽयतः। न। अर्वा॥ १॥
यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि। स त्वामिन्द्र प्रभूवसो ममत्तु॥ २॥
यः। ते। मदः। युज्यः। चारुः। अस्ति। येन। वृत्राणि। हरिऽअश्व। हंसि।
सः। त्वाम्। इन्द्र। प्रभुवसो इति प्रभुऽवसो। ममत्तु॥ २॥
बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम्। इमा ब्रह्म सधमादे जुषस्व॥ ३॥
बोध। सु। मे। मघऽवन्। वाचम्। आ। इमाम्। याम्। ते। वसिष्ठः। अर्चति। प्रऽशस्तिम्।
इमा। ब्रह्म। सधऽमादे। जुषस्व॥ ३॥
श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम्। कृष्वा दुवांस्यन्तमा सचेमा॥ ४॥
श्रुधि। हवम्। विऽपिपानस्य। अद्रेः। बोध। विप्रस्य। अर्चतः। मनीषाम्।
कृष्व। दुवांसि। अन्तमा। सचा। इमा॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्।

सदा ते नाम स्वयशो विवक्मि॥ ५॥ [५]

न। ते। गिरः। अपि। मृष्ये। तुरस्य। न। सुऽस्तुतिम्। असुर्यस्य। विद्वान्।

सदा। ते। नाम। स्वऽयशः। विवक्मि॥ ५॥

भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित्। मारे अस्मन्मघवञ्ज्योक्कः॥ ६॥

भूरि। हि। ते। सवना। मानुषेषु। भूरि। मनीषी। हवते। त्वाम्। इत्।

मा। आरे। अस्मत्। मघऽवन्। ज्योक्। करिति कः॥ ६॥

तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि। त्वं नृभिर्हव्यो विश्वधासि॥ ७॥

तुभ्य। इत्। इमा। सवना। शूर। विश्वा। तुभ्यम्। ब्रह्माणि। वर्धना। कृणोमि।

त्वम्। नृऽभिः। हव्यः। विश्वधा। असि॥ ७॥

नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र। न वीर्यमिन्द्र ते न राधः॥ ८॥

नु। चित्। नु। ते। मन्यमानस्य। दस्म। उत्। अश्नुवन्ति। महिमानम्। उग्र।

न। वीर्यम्। इन्द्र। ते। न। राधः॥ ८॥

ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः।

अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः॥ ९॥ [६]

ये। च। पूर्वे। ऋषयः। ये। च। नूत्नाः। इन्द्र। ब्रह्माणि। जनयन्त। विप्राः।

अस्मे इति। ते। सन्तु। सख्या। शिवानि। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ९॥

[२३] [६ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ।

आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि॥ १॥

उत्। ऊँ इति। ब्रह्माणि। ऐरत। श्रवस्या। इन्द्रम्। सऽमर्ये। महय। वसिष्ठ।

आ। यः। विश्वानि। शवसा। ततान। उपऽश्रोता। मे। ईवतः। वचांसि॥ १॥

अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि।

नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयामि। घोषः। इन्द्र। देवऽजामिः। इरज्यन्त। यत्। शुरुधः। विऽवाचि।
नहि। स्वम्। आयुः। चिकिते। जनेषु। तानि। इत्। अंहांसि। अति। पर्षि। अस्मान्॥ २॥

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान्॥ ३॥

युजे। रथम्। गोऽएषणम्। हरिऽभ्याम्। उप। ब्रह्माणि। जुजुषाणम्। अस्थुः।
वि। बाधिष्ट। स्यः। रोदसी इति। महिऽत्वा। इन्द्रः। वृत्राणि। अप्रति। जघन्वान्॥ ३॥

आपश्चित्पिप्युः स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इन्द्र।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान्॥ ४॥

आपः। चित्। पिप्युः। स्तर्यः। न। गावः। नक्षन्। ऋतम्। जरितारः। ते। इन्द्र।
याहि। वायुः। न। निऽयुतः। नः। अच्छ। त्वम्। हि। धीभिः। दयसे। वि। वाजान्॥ ४॥

ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे।
एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व॥ ५॥

ते। त्वा। मदाः। इन्द्र। मादयन्तु। शुष्मिणम्। तुविऽराधसम्। जरित्रे।
एकः। देवऽत्रा। दयसे। हि। मर्तान्। अस्मिन्। शूर। सवने। मादयस्व॥ ५॥

एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः।
स नः स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [७]

एव। इत्। इन्द्रम्। वृषणम्। वज्रऽबाहुम्। वसिष्ठासः। अभि। अर्चन्ति। अर्कैः।
सः। नः। स्तुतः। वीरऽवत्। धातु। गोऽमत्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[२४] [६ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि।
असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः॥ १॥

योनिः। ते। इन्द्र। सदने। अकारि। तम्। आ। नृऽभिः। पुरुऽहूत। प्र। याहि।
असः। यथा। नः। अविता। वृधे। च। ददः। वसूनि। ममदः। च। सोमैः॥ १॥

गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि।
विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गृभीतम्। ते। मनः। इन्द्र। द्वि॰बर्हाः। सुतः। सोमः। परि॰सिक्ता। मधूनि।
विसृष्ट॰धेना। भरते। सु॰वृक्तिः। इयम्। इन्द्रम्। जोहुवती। मनीषा॥ २॥

आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि।
वहन्तु त्वा हरयो मद्र्यञ्चमाङ्गूषमच्छा तवसं मदाय॥ ३॥

आ। नः। दिवः। आ। पृथिव्याः। ऋजीषिन्। इदम्। बर्हिः। सोम॰पेयाय। याहि।
वहन्तु। त्वा। हरयः। मद्र्यञ्चम्। आङ्गूषम्। अच्छ। तवसम्। मदाय॥ ३॥

आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि।
वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिन्द्र॥ ४॥

आ। नः। विश्वाभिः। ऊति॰भिः। स॰जोषाः। ब्रह्म। जुषाणः। हरि॰अश्व। याहि।
वरीवृजत्। स्थविरेभिः। सु॰शिप्र। अस्मे इति। दधत्। वृषणम्। शुष्मम्। इन्द्र॥ ४॥

एष स्तोमो मह उग्राय वाहे धुरी३वात्यो न वाजयन्नधायि।
इन्द्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः॥ ५॥

एषः। स्तोमः। महे। उग्राय। वाहे। धुरिऽइव। अत्यः। न। वाजयन्। अधायि।
इन्द्र। त्वा। अयम्। अर्कः। ईट्टे। वसूनाम्। दिविऽइव। द्याम्। अधि। नः। श्रोमतम्। धाः॥ ५॥

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [८]

एव। नः। इन्द्र। वार्यस्य। पूर्धि। प्र। ते। महीम्। सु॰मतिम्। वेविदाम।
इषम्। पिन्व। मघवत्॰भ्यः। सु॰वीराम्। यूयम्। पात। स्वस्ति॰भिः। सदा। नः॥ ६॥

[२५] [६ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः।
पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्य१ग्वि चारीत्॥ १॥

आ। ते। महः। इन्द्र। ऊती। उग्र। स॰मन्यवः। यत्। सम्॰अरन्त। सेनाः।
पताति। दिद्युत्। नर्यस्य। बाह्वोः। मा। ते। मनः। विष्वद्र्यक्। वि। चारीत्॥ १॥

नि दुर्ग इन्द्र श्नथिह्यमित्रानभि ये नो मर्तासो अमन्ति।
आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनाम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नि। दुःऽगे। इन्द्र। श्नथिहि। अमित्रान्। अभि। ये। नः। मर्तासः। अमन्ति।

आरे। तम्। शंसम्। कृणुहि। निनित्सोः। आ। नः। भर। सम्ऽभरणम्। वसूनाम्॥ २॥

शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु।

जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि॥ ३॥

शतम्। ते। शिप्रिन्। ऊतयः। सुऽदासे। सहस्रम्। शंसाः। उत। रातिः। अस्तु।

जहि। वधः। वनुषः। मर्त्यस्य। अस्मे इति। द्युम्नम्। अधि। रत्नम्। च। धेहि॥ ३॥

त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ।

विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः॥ ४॥

त्वाऽवतः। हि। इन्द्रः। क्रत्वे। अस्मि। त्वाऽवतः। अवितुः। शूर। रातौ।

विश्वा। इत्। अहानि। तविषीऽवः। उग्र। ओकः। कृणुष्व। हरिऽवः। न। मर्धीः॥ ४॥

कुत्सा एते हर्यश्वाय शूषमिन्द्रे सहो देवजूतमियानाः।

सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम्॥ ५॥

कुत्साः। एते। हरिऽअश्वाय। शूषम्। इन्द्रे। सहः। देवऽजूतम्। इयानाः।

सत्रा। कृधि। सुऽहना। शूर। वृत्रा। वयम्। तरुत्राः। सनुयाम। वाजम्॥ ५॥

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम।

इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [९]

एव। नः। इन्द्र। वार्यस्य। पूर्धि। प्र। ते। महीम्। सुऽमतिम्। वेविदाम।

इषम्। पिन्व। मघवत्ऽभ्यः। सुऽवीराम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[२६] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः।

तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः॥ १॥

न। सोमः। इन्द्रम्। असुतः। ममाद। न। अब्रह्माणः। मघऽवानम्। सुतासः।

तस्मै। उक्थम्। जनये। यत्। जुजोषत्। नृऽवत्। नवीयः। शृणवत्। यथा। नः॥ १॥

उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः।

यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उक्थेऽउक्थे। सोमः। इन्द्रम्। ममाद। नीथेऽनीथे। मघऽवानम्। सुतासः।
यत्। ईम्। सऽबाधः। पितरम्। न। पुत्राः। समानऽदक्षाः। अवसे। हवन्ते॥ २॥

चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः॥ ३॥

चकार। ता। कृणवत्। नूनम्। अन्या। यानि। ब्रुवन्ति। वेधसः। सुतेषु।
जनीःऽइव। पतिः। एकः। समानः। नि। ममृजे। पुरः। इन्द्रः। सु। सर्वाः॥ ३॥

एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्मघानाम्।
मिथस्तुर ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि॥ ४॥

एव। तम्। आहुः। उत। शृण्वे। इन्द्रः। एकः। विऽभक्ता। तरणिः। मघानाम्।
मिथःऽतुरः। ऊतयः। यस्य। पूर्वीः। अस्मे इति। भद्राणि। सश्चत। प्रियाणि॥ ४॥

एवा वसिष्ठ इन्द्रमूतये नॄन्कृष्टीनां वृषभं सुते गृणाति।
सहस्रिण उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१०]

एव। वसिष्ठः। इन्द्रम्। ऊतये। नॄन्। कृष्टीनाम्। वृषभम्। सुते। गृणाति।
सहस्रिणः। उप। नः। माहि। वाजान्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[२७] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः॥ १॥

इन्द्रम्। नरः। नेमऽधिता। हवन्ते। यत्। पार्याः। युनजते। धियः। ताः।
शूरः। नृऽसाता। शवसः। चकानः। आ। गोऽमति। व्रजे। भज। त्वम्। नः॥ १॥

य इन्द्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः।
त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः॥ २॥

यः। इन्द्र। शुष्मः। मघऽवन्। ते। अस्ति। शिक्ष। सखिऽभ्यः। पुरुऽहूत। नृऽभ्यः।
त्वम्। हि। दृळ्हा। मघऽवन्। विऽचेताः। अप। वृधि। परिऽवृतम्। न। राधः॥ २॥

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रः। राजा। जगतः। चर्षणीनाम्। अधि। क्षमि। विषुऽरूपम्। यत्। अस्ति।
ततः। ददाति। दाशुषे। वसूनि। चोदत्। राधः। उपऽस्तुतः। चित्। अर्वाक्॥ ३॥

नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः॥ ४॥

नु। चित्। नः। इन्द्रः। मघऽवा। सऽहूती। दानः। वाजम्। नि। यमते। नः। ऊती।
अनूना। यस्य। दक्षिणा। पीपाय। वामम्। नृऽभ्यः। अभिऽवीता। सखिऽभ्यः॥ ४॥

नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय।
गोमदश्वावद्रथवद्व्यन्तो यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [११]

नु। इन्द्र। राये। वरिवः। कृधि। नः। आ। ते। मनः। ववृत्याम। मघाय।
गोऽमत्। अश्वऽवत्। रथऽवत्। व्यन्तः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[२८] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

ब्रह्मा ण इन्द्रोप याहि विद्वानर्वाञ्चस्ते हरयः सन्तु युक्ताः।
विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व॥ १॥

ब्रह्म। नः। इन्द्र। उप। याहि। विद्वान्। अर्वाञ्चः। ते। हरयः। सन्तु। युक्ताः।
विश्वे। चित्। हि। त्वा। विऽहवन्त। मर्ताः। अस्माकम्। इत्। शृणुहि। विश्वम्ऽइन्व॥ १॥

हवं त इन्द्र महिमा व्यानड् ब्रह्म यत्पासि शवसिन्नृषीणाम्।
आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठा अषाळ्हः॥ २॥

हवम्। ते। इन्द्र। महिमा। वि। आनट्। ब्रह्म। यत्। पासि। शवसिन्। ऋषीणाम्।
आ। यत्। वज्रम्। दधिषे। हस्ते। उग्र। घोरः। सन्। क्रत्वा। जनिष्ठाः। अषाळ्हः॥ २॥

तव प्रणीतीन्द्र जोहुवानान्त्सं यन्नॄन्न रोदसी निनेथ।
महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत्॥ ३॥

तव। प्रऽनीती। इन्द्र। जोहुवानान्। सम्। यत्। नॄन्। न। रोदसी इति। निनेथ।
महे। क्षत्राय। शवसे। हि। जज्ञे। अतूतुजिम्। चित्। तूतुजिः। अशिश्नत्॥ ३॥

एभिर्न इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवन्ते।
प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एभिः। नः। इन्द्र। अहंऽभिः। दशस्य। दुःऽमित्रासः। हि। क्षितयः। पवन्ते।

प्रति। यत्। चष्टे। अनृतम्। अनेनाः। अव। द्विता। वरुणः। मायी। नः। सात्॥ ४॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः।

यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१२]

वोचेम। इत्। इन्द्रम्। मघऽवानम्। एनम्। महः। रायः। राधसः। यत्। ददत्। नः।

यः। अर्चतः। ब्रह्मऽकृतिम्। अविष्ठः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[२९] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः।

पिबा त्व१स्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः॥ १॥

अयम्। सोमः। इन्द्र। तुभ्यम्। सुन्वे। आ। तु। प्र। याहि। हरिऽवः। तत्ऽओकाः।

पिब। तु। अस्य। सुऽसुतस्य। चारोः। ददः। मघानि। मघऽवन्। इयानः॥ १॥

ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम्।

अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः॥ २॥

ब्रह्मन्। वीर। ब्रह्मऽकृतिम्। जुषाणः। अर्वाचीनः। हरिऽभिः। याहि। तूयम्।

अस्मिन्। ऊँ इति। सु। सवने। मादयस्व। उप। ब्रह्माणि। शृणवः। इमा। नः॥ २॥

का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम।

विश्वा मतीरा ततने त्वायाधा म इन्द्र शृणवो हवेमा॥ ३॥

का। ते। अस्ति। अरम्ऽकृतिः। सुऽउक्तैः। कदा। नूनम्। ते। मघऽवन्। दाशेम।

विश्वाः। मतीः। आ। ततने। त्वाऽया। अध। मे। इन्द्र। शृणवः। हवा। इमा॥ ३॥

उतो घा ते पुरुष्या३ इदासन्येषां पूर्वेषामशृणोर्ऋषीणाम्।

अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव॥ ४॥

उतो इति। घ। ते। पुरुष्याः। इत्। आसन्। येषाम्। पूर्वेषाम्। अशृणोः। ऋषीणाम्।

अध। अहम्। त्वा। मघऽवन्। जोहवीमि। त्वम्। नः। इन्द्र। असि। प्रऽमतिः। पिताऽइव॥ ४॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः।

यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१३]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वोचेम। इत्। इन्द्रम्। मघऽवानम्। एनम्। महः। रायः। राधसः। यत्। ददत्। नः।
यः। अर्चत्। ब्रह्मऽकृतिम्। अविष्ठः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[३०] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। त्रिष्टुप्।]

आ नो देव शवसा याहि शुष्मिन्भवा वृध इन्द्र रायः अस्य।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर॥ १॥

आ। नः। देव। शवसा। याहि। शुष्मिन्। भव। वृधः। इन्द्र। रायः। अस्य।
महे। नृम्णाय। नृऽपते। सुऽवज्र। महि। क्षत्राय। पौंस्याय। शूर॥ १॥

हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु॥ २॥

हवन्ते। ऊँ इति। त्वा। हव्यम्। विऽवाचि। तनूषु। शूराः। सूर्यस्य। सातौ।
त्वम्। विश्वेषु। सेन्यः। जनेषु। त्वम्। वृत्राणि। रन्धय। सुऽहन्तु॥ २॥

अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु।
न्य१ग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान्॥ ३॥

अहा। यत्। इन्द्र। सुऽदिना। विऽउच्छान्। दधः। यत्। केतुम्। उपऽमम्। समत्ऽसु।
नि। अग्निः। सीदत्। असुरः। न। होता। हुवानः। अत्र। सुऽभगाय। देवान्॥ ३॥

वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवन्त॥ ४॥

वयम्। ते। ते। इन्द्र। ये। च। देव। स्तवन्त। शूर। ददतः। मघानि।
यच्छ। सूरिऽभ्यः। उपऽमम्। वरूथम्। सुऽआभुवः। जरणाम्। अश्नवन्त॥ ४॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१४]

वोचेम। इत्। इन्द्रम्। मघऽवानम्। एनम्। महः। रायः। राधसः। यत्। ददत्। नः।
यः। अर्चतः। ब्रह्मऽकृतिम्। अविष्ठः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३१] [१२ मैत्रावरुणिर्वसिष्ठः। इन्द्रः। गायत्री, १०-१२ विराजः।]

प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव्ने॥ १॥

प्र। वः। इन्द्राय। मादनम्। हरिऽअश्वाय। गायत। सखायः। सोमऽपाव्ने॥ १॥

शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। चकृमा सत्यराधसे॥ २॥

शंस। इत्। उक्थम्। सुदानवे। उत। द्युक्षम्। यथा। नरः। चकृम। सत्यऽराधसे॥ २॥

त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो॥ ३॥

त्वम्। नः। इन्द्र। वाजऽयुः। त्वम्। गव्युः। शतक्रतो इति शतऽक्रतो।

त्वम्। हिरण्यऽयुः। वसो इति॥ ३॥

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन्। विद्धी त्व१स्य नो वसो॥ ४॥

वयम्। इन्द्र। त्वाऽयवः। अभि। प्र। नोनुमः। वृषन्। विद्धि। तु। अस्य। नः। वसो इति॥ ४॥

मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे। त्वे अपि क्रतुर्मम॥ ५॥

मा। नः। निदे। च। वक्तवे। अर्यः। रन्धीः। अराव्णे। त्वे इति। अपि। क्रतुः। मम॥ ५॥

त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन्। त्वया प्रति ब्रुवे युजा॥ ६॥ [१५]

त्वम्। वर्म। असि। सऽप्रथः। पुरःऽयोधः। च। वृत्रऽहन्। त्वया। प्रति। ब्रुवे। युजा॥ ६॥

महाँ उतासि यस्य तेऽनु स्वधावरी सहः। मम्नाते इन्द्र रोदसी॥ ७॥

महान्। उत। असि। यस्य। ते। अनु। स्वधावरी इति स्वधाऽवरी। सहः।

मम्नाते इति। इन्द्र। रोदसी इति॥ ७॥

तं त्वा मरुत्वती परि भुवद्वाणी सयावरी। नक्षमाणा सह द्युभिः॥ ८॥

तम्। त्वा। मरुत्वती। परि। भुवत्। वाणी। सऽयावरी। नक्षमाणा। सह। द्युऽभिः॥ ८॥

ऊर्ध्वासस्त्वान्विन्दवो भुवन्दस्ममुप द्यवि। सं ते नमन्त कृष्टयः॥ ९॥

ऊर्ध्वासः। त्वा। अनु। इन्दवः। भुवन्। दस्मम्। उप। द्यवि। सम्। ते। नमन्त। कृष्टयः॥ ९॥

प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्।

विशः पूर्वीः प्र चरा चर्षणिप्राः॥ १०॥

प्र। वः। महे। महिऽवृधे। भरध्वम्। प्रऽचेतसे। प्र। सुऽमतिम्। कृणुध्वम्।

विशः। पूर्वीः। प्र। चर। चर्षणिऽप्राः॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः। तस्य व्रतानि न मिनन्ति धीराः॥ ११॥

उरुऽव्यचसे। महिने। सुऽवृक्तिम्। इन्द्राय। ब्रह्म। जनयन्त। विप्राः।

तस्य। व्रतानि। न। मिनन्ति। धीराः॥ ११।

इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै। हर्यश्वाय बर्हया समापीन्॥ १२॥ [१६]

इन्द्रम्। वाणीः। अनुत्तऽमन्युम्। एव। सत्रा। राजानम्। दधिरे। सहध्यै।

हरिऽअश्वाय। बर्हय। सम्। आपीन्॥ १२॥

[३२] [२७ (१-२५) मैत्रावरुणिर्वसिष्ठः, २६ पूर्वार्धर्चस्य शक्तिर्वासिष्ठो वा (शाट्यायने ब्राह्मणे), २६-२७ शक्तिर्वासिष्ठो वा (ताण्डके ब्राह्मणे)। इन्द्रः। प्रगाथः-(अयुजो बृहत्यः, युजः सतोबृहत्य), ३ द्विपदा विराट्।]

मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन्।

आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि॥ १॥

मो इति। सु। त्वा। वाघतः। चन। आरे। अस्मत्। नि। रीरमन्।

आरात्तात्। चित्। सधऽमादम्। नः। आ। गहि। इह। वा। सन्। उप। श्रुधि॥ १॥

इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते।

इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः॥ २॥

इमे। हि। ते। ब्रह्मऽकृतः। सुते। सचा। मधौ। न। मक्षः। आसते।

इन्द्रे। कामम्। जरितारः। वसुऽयवः। रथे। न। पादम्। आ। दधुः॥ २॥

रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे॥ ३॥

रायःऽकामः। वज्रऽहस्तम्। सुऽदक्षिणम्। पुत्रः। न। पितरम्। हुवे॥ ३॥

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः।

ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ॥ ४॥

इमे। इन्द्राय। सुन्विरे। सोमासः। दधिऽआशिरः।

तान्। आ। मदाय। वज्रऽहस्त। पीतये। हरिऽभ्याम्। याहि। ओकः। आ॥ ४॥

श्रवच्छुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद्गिरः।

सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत्॥ ५॥ [१७]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रवत्। श्रुत्ऽकर्णः। ईयते। वसूनाम्। नु। चित्। नः। मर्धिषत्। गिरः।

सद्यः। चित्। यः। सहस्राणि। शता। ददत्। नकिः। दित्सन्तम्। आ। मिनत्॥ ५॥

स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः। यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति॥ ६॥

सः। वीरः। अप्रतिऽस्कुतः। इन्द्रेण। शूशुवे। नृऽभिः।

यः। ते। गभीरा। सवनानि। वृत्रऽहन्। सुनोति। आ। च। धावति॥ ६॥

भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः।

वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयम्॥ ७॥

भव। वरूथम्। मघऽवन्। मघोनाम्। यत्। सम्ऽअजासि। शर्धतः।

वि। त्वाऽहतस्य। वेदनम्। भजेमहि। आ। दुःऽनशः। भर। गयम्॥ ७॥

सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे। पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः॥ ८॥

सुनोत। सोमऽपाव्ने। सोमम्। इन्द्राय। वज्रिणे।

पचत। पक्तीः। अवसे। कृणुध्वम्। इत्। पृणन्। इत्। पृणते। मयः॥ ८॥

मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे।

तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे॥ ९॥

मा। स्रेधत। सोमिनः। दक्षत। महे। कृणुध्वम्। राये। आऽतुजे।

तरणिः। इत्। जयति। क्षेति। पुष्यति। न। देवासः। कवत्नवे॥ ९॥

नकिः सुदासो रथं पर्यास न रीरमत्। इन्द्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे॥ १०॥

नकिः। सुऽदासः। रथम्। परि। आस। न। रीरमत्। [१८]

इन्द्रः। यस्य। अविता। यस्य। मरुतः। गमत्। सः। गोऽमति। व्रजे॥ १०॥

गमद्वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः।

अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम्॥ ११॥

गमत्। वाजम्। वाजयन्। इन्द्र। मर्त्यः। यस्य। त्वम्। अविता। भुवः।

अस्माकम्। बोधि। अविता। रथानाम्। अस्माकम्। शूर। नृणाम्॥ ११॥

उदिन्वस्य रिच्यतेंऽशो धनं न जिग्युषः।

य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्। इत्। नु। अस्य। रिच्यते। अंशः। धनम्। न। जिग्युषः।

यः। इन्द्रः। हरिऽवान्। न। दभन्ति। तम्। रिपः। दक्षम्। दधाति। सोमिनि॥ १२॥

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा।

पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत्॥ १३॥

मन्त्रम्। अखर्वम्। सुऽधितम्। सुऽपेशसम्। दधात। यज्ञियेषु। आ।

पूर्वीः। चन। प्रऽसितयः। तरन्ति। तम्। यः। इन्द्रे। कर्मणा। भुवत्॥ १३॥

कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति।

श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति॥ १४॥

कः। तम्। इन्द्र। त्वाऽवसुम्। आ। मर्त्यः। दधर्षति।

श्रद्धा। इत्। ते। मघऽवन्। पार्ये। दिवि। वाजी। वाजम्। सिसासति॥ १४॥

मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु।

तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता॥ १५॥ [१९]

मघोनः। स्म। वृत्रऽहत्येषु। चोदय। ये। ददति। प्रिया। वसु।

तव। प्रऽनीती। हरिऽअश्व। सूरिऽभिः। विश्वा। तरेम। दुःऽइता॥ १५॥

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम्।

सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते॥ १६॥

तव। इत्। इन्द्र। अवमम्। वसु। त्वम्। पुष्यसि। मध्यमम्।

सत्रा। विश्वस्य। परमस्य। राजसि। नकिः। त्वा। गोषु। वृण्वते॥ १६॥

त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजयः।

तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते॥ १७॥

त्वम्। विश्वस्य। धनऽदाः। असि। श्रुतः। ये। ईम्। भवन्ति। आजयः।

तव। अयम्। विश्वः। पुरुऽहूत। पार्थिवः। अवस्युः। नाम। भिक्षते॥ १७॥

यदिन्द्र यावतस्त्वमेतावदहमीशीय। स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय॥ १८॥

यत्। इन्द्र। यावतः। त्वम्। एतावत्। अहम्। ईशीय।

स्तोतारम्। इत्। दिधिषेय। रदवसो इति रदऽवसो। न। पापऽत्वाय। रासीय॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन॥ १९॥
शिक्षेयम्। इत्। महऽयते। दिवेऽदिवे। रायः। आ। कुहचित्ऽविदे।
नहि। त्वत्। अन्यत्। मघऽवन्। नः। आप्यम्। वस्यः। अस्ति। पिता। चन॥ १९॥
तरणिरित्सिषासति वाजं पुरंध्या युजा।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम्॥ २०॥ [२०]
तरणिः। इत्। सिसासति। वाजम्। पुरम्ऽध्या। युजा।
आ। वः। इन्द्रम्। पुरुऽहूतम्। नमे। गिरा। नेमिम्। तष्टाऽइव। सुऽद्र्वम्॥ २०॥
न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत्।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत्पार्ये दिवि॥ २१॥
न। दुःऽस्तुती। मर्त्यः। विन्दते। वसु। न। स्रेधन्तम्। रयिः। नशत्।
सुऽशक्तिः। इत्। मघऽवन्। तुभ्यम्। माऽवते। देष्णम्। यत्। पार्ये। दिवि॥ २१॥
अभि त्वा शूर नोनुमोऽदुग्धाइव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥ २२॥
अभि। त्वा। शूर। नोनुमः। अदुग्धाःऽइव। धेनवः।
ईशानम्। अस्य। जगतः। स्वःऽदृशम्। ईशानम्। इन्द्र। तस्थुषः॥ २२॥
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥ २३॥
न। त्वाऽवान्। अन्यः। दिव्यः। न। पार्थिवः। न। जातः। न। जनिष्यते।
अश्वऽयन्तः। मघऽवन्। इन्द्र। वाजिनः। गव्यन्तः। त्वा। हवामहे॥ २३॥
अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः॥ २४॥
अभि। सतः। तत्। आ। भर। इन्द्र। ज्यायः। कनीयसः।
पुरुऽवसुः। हि। मघऽवन्। सनात्। असि। भरेऽभरे। च। हव्यः॥ २४॥
परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम्॥ २५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परा। नुदस्व। मघऽवन्। अमित्रान्। सुऽवेदा। नः। वसु। कृधि।
अस्माकम्। बोधि। अविता। महाऽधने। भव। वृधः। सखीनाम्॥ २५॥
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि॥ २६॥
इन्द्र। क्रतुम्। नः। आ। भर। पिता। पुत्रेभ्यः। यथा।
शिक्ष। नः। अस्मिन्। पुरुऽहूत। यामनि। जीवाः। ज्योतिः। अशीमहि॥ २६॥
मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि॥ २७॥ [२१]
मा। नः। अज्ञाताः। वृजनाः। दुःऽआध्यः। मा। अशिवासः। अव। क्रमुः।
त्वया। वयम्। प्रऽवतः। शश्वतीः। अपः। अति। शूर। तरामसि॥ २७॥

[३३] [१४ (१-९) मैत्रावरुणिर्वसिष्ठः; १०-१४ वसिष्ठपुत्राः।
१-९ वसिष्ठपुत्राः इन्द्रो वा; १०-१४ वसिष्ठः। त्रिष्टुप्।]

श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः।
उत्तिष्ठन्वोचे परि बर्हिषो नृन्न मे दूरादवितवे वसिष्ठाः॥ १॥
श्वित्यञ्चः। मा। दक्षिणतःऽकपर्दाः। धियम्ऽजिन्वासः। अभि। हि। प्रऽमन्दुः।
उत्ऽतिष्ठन्। वोचे। परि। बर्हिषः। नृन्। न। मे। दूरात्। अवितवे। वसिष्ठाः॥ १॥
दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम्।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान्॥ २॥
दूरात्। इन्द्रम्। अनयन्। आ। सुतेन। तिरः। वैशन्तम्। अति। पान्तम्। उग्रम्।
पाशऽद्युम्नस्य। वायतस्य। सोमात्। सुतात्। इन्द्रः। अवृणीत। वसिष्ठान्॥ २॥
एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः॥ ३॥
एव। इत्। नु। कम्। सिन्धुम्। एभिः। ततार। एव। इत्। नु। कम्। भेदम्। एभिः। जघान।
एव। इत्। नु। कम्। दाशऽराज्ञे। सुऽदासम्। प्र। आवत्। इन्द्रः। ब्रह्मणा। वः। वसिष्ठाः॥ ३॥
जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जुष्टी। नरः। ब्रह्मणा। वः। पितृणाम्। अक्षम्। अव्ययम्। न। किल। रिषाथ।

यत्। शक्वरीषु। बृहता। रवेण। इन्द्रे। शुष्मम्। अदधात्। वसिष्ठाः॥ ४॥

उद्द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः।

वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो लोकम्॥ ५॥ [२२]

उत्। द्याम्ऽइव। इत्। तृष्णऽजः। नाथितासः। अदीधयुः। दाशऽराज्ञे। वृतासः।

वसिष्ठस्य। स्तुवतः। इन्द्रः। अश्रोत्। उरुम्। तृत्सुऽभ्यः। अकृणोत्। ॐ इति। लोकम्॥ ५॥

दण्डाइवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः।

अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त॥ ६॥

दण्डाःऽइव। इत्। गोऽअजनासः। आसन्। परिऽछिन्नाः। भरताः। अर्भकासः।

अभवत्। च। पुरःऽएता। वसिष्ठः। आत्। इत्। तृत्सूनाम्। विशः। अप्रथन्त॥ ६॥

त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः।

त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः॥ ७॥

त्रयः। कृण्वन्ति। भुवनेषु। रेतः। तिस्रः। प्रऽजाः। आर्याः। ज्योतिःऽअग्राः।

त्रयः। घर्मासः। उषसम्। सचन्ते। सर्वान्। इत्। तान्। अनु। विदुः। वसिष्ठाः॥ ७॥

सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः।

वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥ ८॥

सूर्यस्यऽइव। वक्षथः। ज्योतिः। एषाम्। समुद्रस्यऽइव। महिमा। गभीरः।

वातस्यऽइव। प्रऽजवः। न। अन्येन। स्तोमः। वसिष्ठाः। अनुऽएतवे। वः॥ ८॥

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति।

यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः॥ ९॥

ते। इत्। निण्यम्। हृदयस्य। प्रऽकेतैः। सहस्रऽवल्शम्। अभि। सम्। चरन्ति।

यमेन। ततम्। परिऽधिम्। वयन्तः। अप्सरसः। उप। सेदुः। वसिष्ठाः॥ ९॥

विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा।

तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार॥ १०॥ [२३]

विऽद्युतः। ज्योतिः। परि। सम्ऽजिहानम्। मित्रावरुणा। यत्। अपश्यताम्। त्वा।

तत्। ते। जन्म। उत। एकम्। वसिष्ठ। अगस्त्यः। यत्। त्वा। विशः। आऽजभार॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः।

द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त॥ ११॥

उत। असि। मैत्रावरुणः। वसिष्ठ। उर्वश्याः। ब्रह्मन्। मनसः। अधि। जातः।

द्रप्सम्। स्कन्नम्। ब्रह्मणा। दैव्येन। विश्वे। देवाः। पुष्करे। त्वा। अददन्त॥ ११॥

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः।

यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः॥ १२॥

सः। प्र॰केतः। उभयस्य। प्र॰विद्वान्। सहस्र॰दानः। उत। वा। स॰दानः।

यमेन। ततम्। परि॰धिम्। वयिष्यन्। अप्सरसः। परि। जज्ञे। वसिष्ठः॥ १२॥

सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम्।

ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम्॥ १३॥

सत्रे। ह। जातौ। इषिता। नमः॰ऽभिः। कुम्भे। रेतः। सिसिचतुः। समानम्।

ततः। ह। मानः। उत्। इयाय। मध्यात्। ततः। जातम्। ऋषिम्। आहुः। वसिष्ठम्॥ १३॥

उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्र वदात्यग्रे।

उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः॥ १४॥ [२४] {२}

उक्थ॰भृतम्। साम॰भृतम्। बिभर्ति। ग्रावाणम्। बिभ्रत्। प्र। वदाति। अग्रे।

उप। एनम्। आध्वम्। सु॰मनस्यमानाः। आ। वः। गच्छाति। प्र॰तृदः। वसिष्ठः॥ १४॥

[३४] [२५ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः, १६ अहिः, १७ अहिर्बुध्न्यः।
द्विपदा विराट्, २२-२५ त्रिष्टुभः।]

प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी॥ १॥

प्र। शुक्रा। एतु। देवी। मनीषा। अस्मत्। सु॰तष्टः। रथः। न। वाजी॥ १॥

विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः॥ २॥

विदुः। पृथिव्याः। दिवः। जनित्रम्। शृण्वन्ति। आपः। अध। क्षरन्तीः॥ २॥

आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः॥ ३॥

आपः। चित्। अस्मै। पिन्वन्त। पृथ्वीः। वृत्रेषु। शूराः। मंसन्ते। उग्राः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः॥ ४॥

आ। धूःऽसु। अस्मै। दधात। अश्वान्। इन्द्रः। न। वज्री। हिरण्यऽबाहुः॥ ४॥

अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत॥ ५॥

अभि। प्र। स्थात। अहऽइव। यज्ञम्। याताऽइव। पत्मन्। त्मना। हिनोत॥ ५॥

त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम्॥ ६॥

त्मना। समत्ऽसु। हिनोत। यज्ञम्। दधात। केतुम्। जनाय। वीरम्॥ ६॥

उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम॥ ७॥

उत्। अस्य। शुष्मात्। भानुः। न। आर्त। बिभर्ति। भारम्। पृथिवी। न। भूम॥ ७॥

ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि॥ ८॥

ह्वयामि। देवान्। अयातुः। अग्ने। साधन्। ऋतेन। धियम्। दधामि॥ ८॥

अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम्॥ ९॥

अभि। वः। देवीम्। धियम्। दधिध्वम्। प्र। वः। देवऽत्रा। वाचम्। कृणुध्वम्॥ ९॥

आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः॥ १०॥ [२५]

आ। चष्टे। आसाम्। पाथः। नदीनाम्। वरुणः। उग्रः। सहस्रऽचक्षाः॥ १०॥

राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु॥ ११॥

राजा। राष्ट्रानाम्। पेशः। नदीनाम्। अनुत्तम्। अस्मै। क्षत्रम्। विश्वऽआयु॥ ११॥

अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः॥ १२॥

अविष्टो इति। अस्मान्। विश्वासु। विक्षु। अद्युम्। कृणोत। शंसम्। निनित्सोः॥ १२॥

व्येतु दिद्युद्द्विषामशेवा युयोत विष्वग्रपस्तनूनाम्॥ १३॥

वि। एतु। दिद्युत्। द्विषाम्। अशेवा। युयोत। विष्वक्। रपः। तनूनाम्॥ १३॥

अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः॥ १४॥

अवीत्। नः। अग्निः। हव्यऽअत्। नमःऽभिः। प्रेष्ठः। अस्मै। अधायि। स्तोमः॥ १४॥

सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु॥ १५॥

सऽजूः। देवेभिः। अपाम्। नपातम्। सखायम्। कृध्वम्। शिवः। नः। अस्तु॥ १५॥

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन्॥ १६॥

अप्ऽजाम्। उक्थैः। अहिम्। गृणीषे। बुध्ने। नदीनाम्। रजःऽसु। सीदन्॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्त्रिधदृतायोः॥ १७॥

मा। नः। अहिः। बुध्न्यः। रिषे। धात्। मा। यज्ञः। अस्य। स्त्रिधत्। ऋतऽयोः॥ १७॥

उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः॥ १८॥

उत। नः। एषु। नृषु। श्रवः। धुः। प्र। राये। यन्तु। शर्धन्तः। अर्यः॥ १८॥

तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम्॥ १९॥

तपन्ति। शत्रुम्। स्वः। न। भूम। महाऽसेनासः। अमेभिः। एषाम्॥ १९॥

आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान्॥ २०॥ [२६]

आ। यत्। नः। पत्नीः। गमन्ति। अच्छ। त्वष्टा। सुऽपाणिः। दधातु। वीरान्॥ २०॥

प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः॥ २१॥

प्रति। नः। स्तोमम्। त्वष्टा। जुषेत। स्यात्। अस्मे इति। अरमतिः। वसुऽयुः॥ २१॥

ता नो रासन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः॥ २२॥

ता। नः। रासन्। रातिऽसाचः। वसूनि। आ। रोदसी इति। वरुणानी। शृणोतु।
वरूत्रीभिः। सुऽशरणः। नः। अस्तु। त्वष्टा। सुऽदत्रः। वि। दधातु। रायः॥ २२॥

तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः॥ २३॥

तत्। नः। रायः। पर्वताः। तत्। नः। आपः। तत्। रातिऽसाचः। ओषधीः। उत। द्यौः।
वनस्पतिऽभिः। पृथिवी। सऽजोषाः। उभे इति। रोदसी इति। परि। पासतः। नः॥ २३॥

अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा।
अनु विश्वे मरुतो य सहासो रायः स्याम धरुणं धियध्यै॥ २४॥

अनु। तत्। उर्वी इति। रोदसी इति। जिहाताम्। अनु। द्युक्षः। वरुणः। इन्द्रऽसखा।
अनु। विश्वे। मरुतः। ये। सहासः। रायः। स्याम। धरुणम्। धियध्यै॥ २४॥

तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः॥ २५॥ [२७]

तत्। नः। इन्द्रः। वरुणः। मित्रः। अग्निः। आपः। ओषधीः। वनिनः। जुषन्त।
शर्मन्। स्याम। मरुताम्। उपऽस्थे। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ २५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३५] [१५ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

शं न॑ इन्द्रा॒ग्नी भ॑वता॒मवो॑भिः॒ शं न॒ इन्द्रा॒वरु॑णा रा॒तह॑व्या।

शमिन्द्रा॒सोमा॑ सुवि॒ताय॒ शं योः शं न॒ इन्द्रा॑पू॒षणा॒ वाज॑सातौ॥ १॥

शम्। नः॒। इ॒न्द्रा॒ग्नी इति॑। भ॒व॒ता॒म्। अवः॑ऽभिः। शम्। नः॒। इ॒न्द्रा॒वरु॑णा। रा॒तऽह॑व्या।

शम्। इ॒न्द्रा॒सोमा॑। सु॒वि॒ताय॑। शम्। योः। शम्। नः॒। इन्द्रा॑पू॒षणा॑। वाज॑ऽसातौ॥ १॥

शं नो॒ भगः॒ शमु॑ नः॒ शंसो॑ अस्तु॒ शं नः॒ पुरं॑धिः॒ शमु॑ सन्तु॒ रायः॑।

शं नः॑ स॒त्यस्य॑ सु॒यम॑स्य॒ शंसः॒ शं नो॑ अर्य॒मा पु॑रुजा॒तो अ॑स्तु॥ २॥

शम्। नः॒। भगः॑। शम्। ऊँ इति॑। नः॒। शंसः॑। अ॒स्तु॒। शम्। नः॒। पुर॑म्ऽधिः। शम्। ऊँ इति॑। स॒न्तु॒।

रायः॑॥ शम्। नः॒। स॒त्यस्य॑। सु॒ऽयम॑स्य। शंसः॑। शम्। नः॒। अ॒र्य॒मा। पु॒रु॒ऽजा॒तः। अ॒स्तु॒॥ २॥

शं नो॑ धा॒ता शमु॑ ध॒र्ता नो॑ अस्तु॒ शं न॑ उरू॒ची भ॑वतु स्व॒धाभिः॑।

शं रोद॑सी बृह॒ती शं नो॒ अद्रिः॒ शं नो॑ दे॒वानां॑ सु॒हवा॑नि सन्तु॥ ३॥

शम्। नः॒। धा॒ता। शम्। ऊँ इति॑। ध॒र्ता। नः॒। अ॒स्तु॒। शम्। नः॒। उ॒रू॒ची। भ॒व॒तु॒। स्व॒धाभिः॑।

शम्। रोद॑सी॒ इति॑। बृ॒ह॒ती इति॑। शम्। नः॒। अद्रिः॑। शम्। नः॒। दे॒वाना॑म्। सु॒ऽहवा॑नि। स॒न्तु॒॥ ३॥

शं नो॒ अ॒ग्निर्ज्योति॑रनीको अस्तु॒ शं नो॑ मि॒त्रावरु॑णाव॒श्विना॒ शम्।

शं नः॑ सु॒कृतां॑ सुकृ॒तानि॑ सन्तु॒ शं न॑ इषि॒रो अ॒भि वा॑तु॒ वातः॑॥ ४॥

शम्। नः॒। अ॒ग्निः। ज्योतिः॑ऽअनीकः। अ॒स्तु॒। शम्। नः॒। मि॒त्रावरु॑णौ। अ॒श्विना॑। शम्।

शम्। नः॒। सु॒ऽकृता॑म्। सु॒ऽकृ॒तानि॑। स॒न्तु॒। शम्। नः॒। इ॒षि॒रः। अ॒भि। वा॒तु॒। वातः॑॥ ४॥

शं नो॒ द्यावा॑पृथि॒वी पू॒र्वहू॑तौ॒ शम॒न्तरि॑क्षं दृ॒शये॑ नो अस्तु।

शं न ओष॑धीर्व॒निनो॑ भवन्तु॒ शं नो॒ रज॑सस्पति॑रस्तु जि॒ष्णुः॥ ५॥ [२८]

शम्। नः॒। द्यावा॑पृथि॒वी इति॑। पूर्व॑ऽहूतौ। शम्। अ॒न्तरि॑क्षम्। दृ॒शये॑। नः॒। अ॒स्तु॒।

शम्। नः॒। ओष॑धीः। व॒निनः॑। भ॒व॒न्तु॒। शम्। नः॒। रज॑सः। पतिः॑। अ॒स्तु॒। जि॒ष्णुः॥ ५॥

शं न॒ इन्द्रो॒ वसु॑भिर्दे॒वो अ॑स्तु॒ शमा॑दि॒त्येभि॒र्वरु॑णः सु॒शंसः॑।

शं नो॑ रु॒द्रो रु॒द्रेभि॒र्जला॑षः॒ शं न॒स्त्वष्टा॒ ग्नाभि॑रि॒ह शृ॑णोतु॥ ६॥

शम्। नः॒। इन्द्रः॑। वसु॑ऽभिः। दे॒वः। अ॒स्तु॒। शम्। आ॒दि॒त्येभिः॑। वरु॑णः। सु॒ऽशंसः॑।

शम्। नः॒। रु॒द्रः। रु॒द्रेभिः॑। जला॑षः। शम्। नः॒। त्वष्टा॑। ग्नाभिः॑। इ॒ह। शृ॒णो॒तु॒॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्व१ः शम्वस्तु वेदिः॥ ७॥

शम्। नः। सोमः। भवतु। ब्रह्म। शम्। नः। शम्। नः। ग्रावाणः। शम्। ऊँ इति। सन्तु। यज्ञाः।
शम्। नः। स्वरूणाम्। मितयः। भवन्तु। शम्। नः। प्रऽस्वः। शम्। ऊँ इति। अस्तु। वेदिः॥ ७॥

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः॥ ८॥

शम्। नः। सूर्यः। उरुऽचक्षाः। उत्। एतु। शम्। नः। चतस्रः। प्रऽदिशः। भवन्तु।
शम्। नः। पर्वताः। ध्रुवयः। भवन्तु। शम्। नः। सिन्धवः। शम्। ऊँ इति। सन्तु। आपः॥ ८॥

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः।
शं नो विष्णु : शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः॥ ९॥

शम्। नः। अदितिः। भवतु। व्रतेभिः। शम्। नः। भवन्तु। मरुतः। सुऽअर्काः॥ शम्। नः। विष्णुः।
शम्। ऊँ इति। पूषा। नः। अस्तु। शम्। नः। भवित्रम्। शम्। ऊँ इति। अस्तु। वायुः॥ ९॥

शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः॥ १०॥ [२९]

शम्। नः। देवाः। सविता। त्रायमाणः। शम्। नः। भवन्तु। उषसः। विऽभातीः।
शम्। नः। पर्जन्यः। भवतु। प्रऽजाभ्यः। शम्। नः। क्षेत्रस्य। पतिः। अस्तु। शम्ऽभुः॥ १०॥

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः॥ ११॥

शम्। नः। देवाः। विश्वऽदेवाः। भवन्तु। शम्। सरस्वती। सह। धीभिः। अस्तु॥ शम्। अभिऽसाचः।
शम्। ऊँ इति। रातिऽसाचः। शम्। नः। दिव्याः। पार्थिवाः। शम्। नः। अप्याः॥ ११॥

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु॥ १२॥

शम्। नः। सत्यस्य। पतयः। भवन्तु। शम्। नः। अर्वन्तः। शम्। ऊँ इति। सन्तु। गावः।
शम्। नः। ऋभवः। सुऽकृतः। सुऽहस्ताः। शम्। नः। भवन्तु। पितरः। हवेषु॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्य१: शं समुद्रः।

शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा॥ १३॥

शम्। नः। अजः। एक॰पात्। देवः। अस्तु। शम्। नः। अहिः। बुध्न्यः। शम्। समुद्रः।

शम्। नः। अपाम्। नपात्। पेरुः। अस्तु। शम्। नः। पृश्निः। भवतु। देव॰गोपा॥ १३॥

आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः।

शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः॥ १४॥

आदित्याः। रुद्राः। वसवः। जुषन्त। इदम्। ब्रह्म। क्रियमाणम्। नवीयः।

शृण्वन्तु। नः। दिव्याः। पार्थिवासः। गो॰जाताः। उत। ये। यज्ञियासः॥ १४॥

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः।

ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः॥ १५॥ [३०]

ये। देवानाम्। यज्ञियाः। यज्ञियानाम्। मनोः। यजत्राः। अमृताः। ऋत॰ज्ञाः।

ते। नः। रासन्ताम्। उरु॰गायम्। अद्य। यूयम्। पात। स्वस्ति॰भिः। सदा। नः॥ १५॥

इत्याश्वलायन-संहितायां

पञ्चमाष्टके

तृतीयोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके चतुर्थोऽध्यायः ॥

[३६] [९ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः।

वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः॥ १॥

प्र। ब्रह्म। एतु। सदनात्। ऋतस्य। वि। रश्मिऽभिः। ससृजे। सूर्यः। गाः।

वि। सानुना। पृथिवी। सस्रे। उर्वी। पृथु। प्रतीकम्। अधि। आ। ईधे। अग्निः॥ १॥

इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः।

इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः॥ २॥

इमाम्। वाम्। मित्रावरुणा। सुऽवृक्तिम्। इषम्। न। कृण्वे। असुरा। नवीयः।

इनः। वाम्। अन्यः। पदऽवीः। अदब्धः। जनम्। च। मित्रः। यतति। ब्रुवाणः॥ २॥

आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः।

महो दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन्॥ ३॥

आ। वातस्य। ध्रजतः। रन्ते। इत्या। अपीपयन्त। धेनवः। न। सूदाः।

महः। दिवः। सदने। जायमानः। अचिक्रदत्। वृषभः। सस्मिन्। ऊधन्॥ ३॥

गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू।

प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम्॥ ४॥

गिरा। यः। एता। युनजत्। हरी इति। ते। इन्द्र। प्रिया। सुऽरथा। शूर। धायू इति।

प्र। यः। मन्युम्। रिरिक्षतः। मिनाति। आ। सुऽक्रतुम्। अर्यमणम्। ववृत्याम्॥ ४॥

यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन्।

वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम्॥ ५॥ [१]

यजन्ते। अस्य। सख्यम्। वयः। च। नमस्विनः। स्वे। ऋतस्य। धामन्।

वि। पृक्षः। बाबधे। नृऽभिः। स्तवानः। इदम्। नमः। रुद्राय। प्रेष्ठम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता।

याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः॥ ६॥

आ। यत्। साकम्। यशसः। वावशानाः। सरस्वती। सप्तथी। सिन्धुऽमाता।

याः। सुस्वयन्त। सुऽदुघाः। सुऽधाराः। अभि। स्वेन। पयसा। पीप्यानाः॥ ६॥

उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु।

मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः॥ ७॥

उत। त्ये। नः। मरुतः। मन्दसानाः। धियम्। तोकम्। च। वाजिनः। अवन्तु।

मा। नः। परि। ख्यत्। अक्षरा। चरन्ती। अवीवृधन्। युज्यम्। ते। रयिम्। नः॥ ७॥

प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं१ न वीरम्।

भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिम्॥ ८॥

प्र। वः। महीम्। अरमतिम्। कृणुध्वम्। प्र। पूषणम्। विदथ्यम्। न। वीरम्।

भगम्। धियः। अवितारम्। नः। अस्याः। सातौ। वाजम्। रातिऽसाचम्। पुरम्ऽधिम्॥ ८॥

अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः।

उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः॥ ९॥ [२]

अच्छ। अयम्। वः। मरुतः। श्लोकः। एतु। अच्छ। विष्णुम्। निसिक्तऽपाम्। अवःऽभिः।

उत। प्रऽजायै। गृणते। वयः। धुः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ९॥

[३७] [८ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः।

अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम्॥ १॥

आ। वः। वाहिष्ठः। वहतु। स्तवध्यै। रथः। वाजाः। ऋभुक्षणः। अमृक्तः।

अभि। त्रिऽपृष्ठैः। सवनेषु। सोमैः। मदे। सुऽशिप्राः। महःऽभिः। पृणध्वम्॥ १॥

यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम्।

सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम्॥ २॥

यूयम्। ह। रत्नम्। मघवत्ऽसु। धत्थ। स्वःऽदृशः। ऋभुक्षणः। अमृक्तम्।

सम्। यज्ञेषु। स्वधाऽवन्तः। पिबध्वम्। वि। नः। राधांसि। मतिऽभिः। दयध्वम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे।

उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या॥ ३॥

उवोचिथ। हि। मघऽवन्। देष्णम्। महः। अर्भस्य। वसुनः। विऽभागे।

उभा। ते। पूर्णा। वसुना। गभस्ती इति। न। सूनृता। नि। यमते। वसव्या॥ ३॥

त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा।

वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः॥ ४॥

त्वम्। इन्द्र। स्वऽयशाः। ऋभुक्षाः। वाजः। न। साधुः। अस्तम्। एषि। ऋक्वा।

वयम्। नु। ते। दाश्वांसः। स्याम। ब्रह्म। कृण्वन्तः। हरिऽवः। वसिष्ठाः॥ ४॥

सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः।

ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः॥ ५॥ [३]

सनिता। असि। प्रऽवतः। दाशुषे। चित्। याभिः। विवेषः। हरिऽअश्व। धीभिः।

ववन्म। नु। ते। युज्याभिः। ऊती। कदा। नः। इन्द्र। रायः। आ। दशस्येः॥ ५॥

वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः।

अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी॥ ६॥

वासयसिऽइव। वेधसः। त्वम्। नः। कदा। नः। इन्द्र। वचसः। बुबोधः।

अस्तम्। तात्या। धिया। रयिम्। सुऽवीरम्। पृक्षः। नः। अर्वा। नि। उहीत। वाजी॥ ६॥

अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः।

उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं य कृणवन्त मर्ताः॥ ७॥

अभि। यम्। देवी। निःऽऋतिः। चित्। ईशे। नक्षन्ते। इन्द्रम्। शरदः। सुऽपृक्षः।

उप। त्रिऽबन्धुः। जरत्ऽअष्टिम्। एति। अस्वऽवेशम्। यम्। कृणवन्त। मर्ताः॥ ७॥

आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ।

सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः॥ ८॥ [४]

आ। नः। राधांसि। सवितरिति। स्तवध्यै। आ। रायः। यन्तु। पर्वतस्य। रातौ।

सदा। नः। दिव्यः। पायुः। सिसक्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३८] [८ मैत्रावरुणिर्वसिष्ठः। १-६ सविता, ६ उत्तरार्धस्य भगो वा, ७-८ वाजिनः। त्रिष्टुप्।]

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत्।

नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति॥ १॥

उत्। ऊँ इति। स्यः। देवः। सविता। ययाम। हिरण्ययीम्। अमतिम्। याम्। अशिश्रेत्।

नूनम्। भगः। हव्यः। मानुषेभिः। वि। यः। रत्ना। पुरुऽवसुः। दधाति॥ १॥

उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य।

व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः॥ २॥

उत्। ऊँ इति। तिष्ठ। सवितरिति। श्रुधि। अस्य। हिरण्यऽपाणे। प्रऽभृतौ। ऋतस्य।

वि। उर्वीम्। पृथ्वीम्। अमतिम्। सृजानः। आ। नृऽभ्यः। मर्तऽभोजनम्। सुवानः॥ २॥

अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति।

स नः स्तोमान्नमस्य१श्चनो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन्॥ ३॥

अपि। स्तुतः। सविता। देवः। अस्तु। यम्। आ। चित्। विश्वे। वसवः। गृणन्ति।

सः। नः। स्तोमान्। नमस्यः। चनः। धात्। विश्वेभिः। पातु। पायुऽभिः। नि। सूरीन्॥ ३॥

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा।

अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः॥ ४॥

अभि। यम्। देवी। अदितिः। गृणाति। सवम्। देवस्य। सवितुः। जुषाणा।

अभि। सम्ऽराजः। वरुणः। गृणन्ति। अभि। मित्रासः। अर्यमा। सऽजोषाः॥ ४॥

अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः।

अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु॥ ५॥

अभि। ये। मिथः। वनुषः। सपन्ते। रातिम्। दिवः। रातिऽसाचः। पृथिव्याः।

अहिः। बुध्न्यः। उत। नः। शृणोतु। वरूत्री। एकधेनुऽभिः। नि। पातु॥ ५॥

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः।

भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम्॥ ६॥

अनु। तत्। नः। जाःपतिः। मंसीष्ट। रत्नम्। देवस्य। सवितुः। इयानः।

भगम्। उग्रः। अवसे। जोहवीति। भगम्। अनुग्रः। अध। याति। रत्नम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शं नो॑ भवन्तु वा॒जिनो॒ हवे॑षु दे॒वता॑ता मि॒तद्र॑वः स्व॒र्काः।

ज॒म्भय॒न्तोऽहिं॒ वृकं॒ रक्षां॑सि॒ सने॑म्य॒स्मद्यु॑यव॒न्नमी॑वाः॥ ७॥

शम्। नः॒। भ॒वन्तु॒। वा॒जिनः॑। हवे॑षु। दे॒वऽता॑ता। मि॒तऽद्र॑वः। सु॒ऽअ॒र्काः।

ज॒म्भय॑न्तः। अहि॑म्। वृक॑म्। सने॑मि। अ॒स्मत्। यु॒य॒व॒न्। अमी॑वाः॥ ७॥

वाजे॑वाजेऽवत वाजिनो नो॒ धने॑षु विप्रा अमृता ऋतज्ञाः।

अ॒स्य मध्वः॑ पिबत मा॒दय॑ध्वं तृ॒प्ता या॑त प॒थिभि॑र्देव॒यानैः॑॥ ८॥ [५]

वाजे॑ऽवाजे। अ॒व॒त॒। वा॒जि॒नः॒। नः॒। धने॑षु। वि॒प्राः॒। अ॒मृ॒ताः॒। ऋ॒त॒ऽज्ञाः॒।

अ॒स्य। मध्वः॑। पि॒ब॒त॒। मा॒दय॑ध्वम्। तृ॒प्ताः। या॒त॒। प॒थिऽभिः॑। दे॒व॒ऽयानैः॑॥ ८॥

[३९] [७ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

ऊ॒र्ध्वो अ॒ग्निः सु॑म॒तिं वस्वो॑ अश्रेत्प्रती॒ची जू॒र्णिर्दे॒वता॑तिमेति।

भे॒जाते॒ अद्री॑ र॒थ्ये॑व॒ पन्था॑मृ॒तं होता॑ न इषि॒तो य॑जाति॥ १॥

ऊ॒र्ध्वः। अ॒ग्निः। सु॒ऽम॒तिम्। वस्वः॑। अ॒श्रे॒त्। प्र॒ती॒ची। जू॒र्णिः। दे॒वऽता॑तिम्। ए॒ति॒।

भे॒जा॒ते॒ इति॑। अद्री॒ इति॑। र॒थ्या॑ऽइव। पन्था॑म्। ऋ॒तम्। होता॑। नः॒। इ॒षि॒तः। य॒जा॒ति॒॥ १॥

प्र वा॑वृजे सुप्र॒या ब॒र्हिरे॑षा॒मा वि॒श्पती॑व॒ बीरि॑ट इयाते।

वि॒शाम॒क्तोरु॒षसः॑ पू॒र्वहू॑तौ वा॒युः पू॒षा स्व॒स्तये॑ नि॒युत्वा॑न्॥ २॥

प्र। व॒वृ॒जे॒। सु॒ऽप्र॒याः। ब॒र्हिः। ए॒षा॒म्। आ। वि॒श्पती॑ इ॒वेति॑ वि॒श्पती॑ऽइव। बीरि॑टे। इ॒या॒ते॒ इति॑।

वि॒शाम्। अ॒क्तोः। उ॒षसः॑। पू॒र्वऽहू॑तौ। वा॒युः। पू॒षा। स्व॒स्तये॑। नि॒युत्वा॑न्॥ २॥

ज्म॒या अत्र॒ वस॑वो रन्त दे॒वा उ॒राव॒न्तरि॑क्षे मर्जयन्त शु॒भ्राः।

अ॒र्वाक्प॒थ उ॑रुज्रयः कृणु॒ध्वं श्रोता॑ दू॒तस्य॑ ज॒ग्मुषो॑ नो अ॒स्य॥ ३॥

ज्म॒याः। अत्र॑। वस॑वः। र॒न्त॒। दे॒वाः। उ॒रौ। अ॒न्तरि॑क्षे। म॒र्ज॒य॒न्त॒। शु॒भ्राः।

अ॒र्वाक्। प॒थः। उ॒रु॒ऽज्र॒यः॒। कृ॒णु॒ध्व॒म्। श्रोत॑। दू॒तस्य॑। ज॒ग्मुषः॑। नः॒। अ॒स्य॥ ३॥

ते हि य॒ज्ञेषु॑ य॒ज्ञिया॑स॒ ऊमाः॑ स॒धस्थं॒ विश्वे॑ अ॒भि सन्ति॑ दे॒वाः।

ताँ अ॑ध्व॒र उ॑श॒तो य॑क्ष्यग्ने श्रु॒ष्टी भगं॒ नास॑त्या॒ पुरं॑धिम्॥ ४॥

ते। हि। य॒ज्ञेषु॑। य॒ज्ञिया॑सः। ऊमाः॑। स॒धऽस्थ॑म्। विश्वे॑। अ॒भि। सन्ति॑। दे॒वाः।

तान्। अ॒ध्व॒रे। उ॒श॒तः। य॒क्षि॒। अ॒ग्ने॒। श्रु॒ष्टी। भग॑म्। नास॑त्या। पुर॑म्ऽधिम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम्।

आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम्॥ ५॥

आ। अग्ने। गिरः। दिवः। आ। पृथिव्याः। मित्रम्। वह। वरुणम्। इन्द्रम्। अग्निम्।

आ। अर्यमणम्। अदितिम्। विष्णुम्। एषाम्। सरस्वती। मरुतः। मादयन्ताम्॥ ५॥

रुरे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन्।

धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः॥ ६॥

ररे। हव्यम्। मतिऽभिः। यज्ञियानाम्। नक्षत्। कामम्। मर्त्यानाम्। असिन्वन्।

धात। रयिम्। अविऽदस्यम्। सदाऽसाम्। सक्षीमहि। युज्येभिः। नु। देवैः॥ ६॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः।

यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [६]

नु। रोदसी इति। अभिस्तुते इत्यभिऽस्तुते। वसिष्ठैः। ऋतऽवानः। वरुणः। मित्रः। अग्निः।

यच्छन्तु। चन्द्राः। उपऽमम्। नः। अर्कम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[४०] [७ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम्।

यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे॥ १॥

ओ इति। श्रुष्टिः। विदथ्या। सम्। एतु। प्रति। स्तोमम्। दधीमहि। तुराणाम्।

यत्। अद्य। देवः। सविता। सुवाति। स्याम। अस्य। रत्निनः। विऽभागे॥ १॥

मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु।

दिदेष्टु देव्यदिती रेक्णो वायुश्च यन्नियुवैते भगश्च॥ २॥

मित्रः। तत्। नः। वरुणः। रोदसी इति। च। द्युऽभक्तम्। इन्द्रः। अर्यमा। ददातु।

दिदेष्टु। देवी। अदितिः। रेक्णः। वायुः। च। यत्। निऽयुवैते इति निऽयुवैते। भगः। च॥ २॥

सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ।

उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति॥ ३॥

सः। इत्। उग्रः। अस्तु। मरुतः। सः। शुष्मी। यम्। मर्त्यम्। पृषत्ऽअश्वाः। अवाथ।

उत। ईम्। अग्निः। सरस्वती। जुनन्ति। न। तस्य। रायः। परिऽएता। अस्ति॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः।

सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान्॥ ४॥

अयम्। हि। नेता। वरुणः। ऋतस्य। मित्रः। राजानः। अर्यमा। अपः। धुरिति धुः।

सुऽहवा। देवी। अदितिः। अनर्वा। ते। नः। अंहः। अति। पर्षन्। अरिष्टान्॥ ४॥

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः।

विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्॥ ५॥

अस्य। देवस्य। मीळ्हुषः। वयाः। विष्णोः। एषस्य। प्रऽभृथे। हविःऽभिः।

विदे। हि। रुद्रः। रुद्रियम्। महिऽत्वम्। यासिष्टम्। वर्तिः। अश्विनौ। इराऽवत्॥ ५॥

मात्र पूषन्नाघृण इरस्यो वरूत्री यद्रातिषाचश्च रासन्।

मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु॥ ६॥

मा। अत्र। पूषन्। आघृणे। इरस्यः। वरूत्री। यत्। रातिऽसाचः। च। रासन्।

मयःऽभुवः। नः। अर्वन्तः। नि। पान्तु। वृष्टिम्। परिऽज्मा। वातः। ददातु॥ ६॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः।

यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [७]

नु। रोदसी इति। अभिस्तुते इत्यभिऽस्तुते। वसिष्ठैः। ऋतऽवानः। वरुणः। मित्रः। अग्निः।

यच्छन्तु। चन्द्राः। उपऽमम्। नः। अर्कम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[४१] [७ मैत्रावरुणिर्वसिष्ठः। १ अग्नीन्द्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्राः, २-६ भगः, ७ उषसः। त्रिष्टुप्, १ जगती।]

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।

प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम॥ १॥

प्रातः। अग्निम्। प्रातः। इन्द्रम्। हवामहे। प्रातः। मित्रावरुणा। प्रातः। अश्विना।

प्रातः। भगम्। पूषणम्। ब्रह्मणः। पतिम्। प्रातरिति। सोमम्। उत। रुद्रम्। हुवेम॥ १॥

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता।

आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रातःऽजितम्। भगम्। उग्रम्। हुवेम। वयम्। पुत्रम्। अदितेः। यः। विऽधर्ता।

आध्रः। चित्। यम्। मन्यमानः। तुरः। चित्। राजा। चित्। यम्। भगम्। भक्षि। इति। आह॥ २॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः।

भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम॥ ३॥

भगः। प्रनेतरिति प्रऽनेतः। भग। सत्यऽराधः। भग। इमाम्। धियम्। उत्। अव। ददत्। नः।

भग। प्र। नः। जनय। गोभिः। अश्वैः। भग। प्र। नृऽभिः। नृऽवन्तः। स्याम॥ ३॥

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्।

उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम॥ ४॥

उत। इदानीम्। भगऽवन्तः। स्याम। उत। प्रऽपित्वे। उत। मध्ये। अह्नाम्।

उत। उत्ऽइता। मघऽवन्। सूर्यस्य। वयम्। देवानाम्। सुऽमतौ। स्याम॥ ४॥

भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम।

तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह॥ ५॥

भगः। एव। भगऽवान्। अस्तु। देवाः। तेन। वयम्। भगऽवन्तः। स्याम।

तम्। त्वा। भग। सर्वः। इत्। जोहवीति। सः। नः। भग। पुरःऽएता। भव। इह॥ ५॥

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय।

अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु॥ ६॥

सम्। अध्वराय। उषसः। नमन्त। दधिक्रावाऽइव। शुचये। पदाय।

अर्वाचीनम्। वसुऽविदम्। भगम्। नः। रथम्ऽइव। अश्वाः। वाजिनः। आ। वहन्तु॥ ६॥

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः।

घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [८]

अश्वऽवतीः। गोऽमतीः। नः। उषसः। वीरऽवतीः। सदम्। उच्छन्तु। भद्राः।

घृतम्। दुहानाः। विश्वतः। प्रऽपीताः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[४२] [६ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

प्र ब्रह्माणो अङ्गिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु।

प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र। ब्रह्माणः। अङ्गिरसः। नक्षन्त। प्र। क्रन्दनुः। नभन्यस्य। वेतु।

प्र। धेनवः। उदऽप्रुतः। नवन्त। युज्याताम्। अद्री इति। अध्वरस्य। पेशः॥ १॥

सुगस्ते अग्ने सनवित्तो अध्वा युक्ष्वा सुते हरितो रोहितश्च।

ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः॥ २॥

सुऽगः। ते। अग्ने। सनऽवित्तः। अध्वा। युक्ष्व। सुते। हरितः। रोहितः। च।

ये। वा। सद्मन्। अरुषाः। वीरऽवाहः। हुवे। देवानाम्। जनिमानि। सत्तः॥ २॥

समु वो यज्ञं महयन्नमोभिः प्र होता मन्द्रो रिरिच उपाके।

यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः॥ ३॥

सम्। ऊँ इति। वः। यज्ञम्। महयन्। नमःऽभिः। प्र। होता। मन्द्रः। रिरिचे। उपाके।

यजस्व। सु। पुरुऽअनीक। देवान्। आ। यज्ञियाम्। अरमतिम्। ववृत्याः॥ ३॥

यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत्।

सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै॥ ४॥

यदा। वीरस्य। रेवतः। दुरोणे। स्योनऽशीः। अतिथिः। आऽचिकेतत्।

सुऽप्रीतः। अग्निः। सुऽधितः। दमे। आ। सः। विशे। दाति। वार्यम्। इयत्यै॥ ४॥

इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः।

आ नक्ता बर्हिः संदतामुषासोशन्ता मित्रावरुणा यजेह॥ ५॥

इमम्। नः। अग्ने। अध्वरम्। जुषस्व। मरुत्ऽसु। इन्द्रे। यशसम्। कृधि। नः।

आ। नक्ता। बर्हिः। सदताम्। उषसा। उशन्ता। मित्रावरुणा। यज। इह॥ ५॥

एवाग्निं सहस्यं १वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत्।

इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [९]

एव। अग्निम्। सहस्यम्। वसिष्ठः। रायःऽकामः। विश्वऽप्स्न्यस्य। स्तौत्।

इषम्। रयिम्। पप्रथत्। वाजम्। अस्मे इति। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[४३] [५ मैत्रावरुणिर्वसिष्ठः। विश्वे देवाः। त्रिष्टुप्।]

प्र वो यज्ञेषु देवयन्तो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै।

येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र। वः। यज्ञेषु। देवऽयन्तः। अर्चन्। द्यावा। नमःऽभिः। पृथिवी इति। इषध्यै।

येषाम्। ब्रह्माणि। असमानि। विप्राः। विष्वक्। विऽयन्ति। वनिनः। न। शाखाः॥ १॥

प्र यज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः।

स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः॥ २॥

प्र। यज्ञः। एतु। हेत्वः। न। सप्तिः। उत्। यच्छध्वम्। सऽमनसः। घृताचीः।

स्तृणीत। बर्हिः। अध्वराय। साधु। ऊर्ध्वा। शोचींषि। देवऽयूनि। अस्थुः॥ २॥

आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु।

आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः॥ ३॥

आ। पुत्रासः। न। मातरम्। विऽभृत्राः। सानौ। देवासः। बर्हिषः। सदन्तु।

आ। विश्वाची। विदथ्याम्। अनक्तु। अग्ने। मा। नः। देवऽताता। मृधः। करिति कः॥ ३॥

ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः।

ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ॥ ४॥

ते। सीषपन्त। जोषम्। आ। यजत्राः। ऋतस्य। धाराः। सुऽदुघाः। दुहानाः।

ज्येष्ठम्। वः। अद्य। महः। आ। वसूनाम्। आ। गन्तन। सऽमनसः। यति। स्थ॥ ४॥

एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः।

राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१०]

एव। नः। अग्ने। विक्षु। आ। दशस्य। त्वया। वयम्। सहसाऽवन्। आस्क्राः।

राया। युजा। सधऽमादः। अरिष्टाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[४४] [५ मैत्रावरुणिर्वसिष्ठः। दधिक्राः, १ दधिक्राश्व्युषोऽग्निभगेन्द्रविष्णुपूषन्ब्रह्मणस्पत्यादित्य-द्यावापृथिव्यापस्वः। त्रिष्टुप्, १ जगती।]

दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे।

इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः॥ १॥

दधिऽक्राम्। वः। प्रथमम्। अश्विना। उषसम्। अग्निम्। सम्ऽइद्धम्। भगम्। ऊतये। हुवे॥ इन्द्रम्।

विष्णुम्। पूषणम्। ब्रह्मणः। पतिम्। आदित्यान्। द्यावापृथिवी इति। अपः। स्व१रिति स्वः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः।

इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम॥ २॥

दधिऽक्राम्। ॐ इति। नमसा। बोधयन्तः। उत्ऽईराणाः। यज्ञम्। उपऽप्रयन्तः।

इळाम्। देवीम्। बर्हिषि। सादयन्तः। अश्विना। विप्रा। सुऽहवा। हुवेम॥ २॥

दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम्।

ब्रध्नं मँश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद्दुरिता यावयन्तु॥ ३॥

दधिऽक्रावाणम्। बुबुधानः। अग्निम्। उप। ब्रुवे। उषसम्। सूर्यम्। गाम्।

ब्रध्नम्। मँश्चतोः। वरुणस्य। बभ्रुम्। ते। विश्वा। अस्मत्। दुःऽइता। यवयन्तु॥ ३॥

दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन्।

संविदान उषसा सूर्येणादित्येभिर्वसुभिरङ्गिरोभिः॥ ४॥

दधिऽक्रावा। प्रथमः। वाजी। अर्वा। अग्रे। रथानाम्। भवति। प्रऽजानन्।

सम्ऽविदानः। उषसा। सूर्येण। आदित्येभिः। वसुऽभिः। अङ्गिरःऽभिः॥ ४॥

आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ।

शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः॥ ५॥ [११]

आ। नः। दधिऽक्राः। पथ्याम्। अनक्तु। ऋतस्य। पन्थाम्। अनुऽएतवै। ॐ इति।

शृणोतु। नः। दैव्यम्। शर्धः। अग्निः। शृण्वन्तु। विश्वे। महिषाः। अमूराः॥ ५॥

[४५] [४ मैत्रावरुणिर्वसिष्ठः। सविता। त्रिष्टुप्।]

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः।

हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम॥ १॥

आ। देवः। यातु। सविता। सुऽरत्नः। अन्तरिक्षऽप्राः। वहमानः। अश्वैः।

हस्ते। दधानः। नर्या। पुरूणि। निऽवेशयन्। च। प्रऽसुवन्। च। भूम॥ १॥

उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम्।

नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम्॥ २॥

उत्। अस्य। बाहू इति। शिथिरा। बृहन्ता। हिरण्यया। दिवः। अन्तान्। अनष्टाम्।

नूनम्। सः। अस्य। महिमा। पनिष्ट। सूरः। चित्। अस्मै। अनु। दात्। अपस्याम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि।

विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः॥ ३॥

सः। घ। नः। देवः। सविता। सहऽवा। आ। साविषत्। वसुऽपतिः। वसूनि।

विऽश्रयमाणः। अमतिम्। उरूचीम्। मर्तऽभोजनम्। अध। रासते। नः॥ ३॥

इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम्।

चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः॥ ४॥ [१२]

इमाः। गिरः। सवितारम्। सुऽजिह्वम्। पूर्णऽगभस्तिम्। ईळते। सुऽपाणिम्।

चित्रम्। वयः। बृहत्। अस्मे इति। दधातु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ४॥

[४६] [४ मैत्रावरुणिर्वसिष्ठः। रुद्रः। जगती, ४ त्रिष्टुप्।]

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने।

अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः॥ १॥

इमाः। रुद्राय। स्थिरऽधन्वने। गिरः। क्षिप्रऽइषवे। देवाय। स्वधाऽव्ने।

अषाळ्हाय। सहमानाय। वेधसे। तिग्मऽआयुधाय। भरत। शृणोतु। नः॥ १॥

स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति।

अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव॥ २॥

सः। हि। क्षयेण। क्षम्यस्य। जन्मनः। साम्ऽराज्येन। दिव्यस्य। चेतति।

अवन्। अवन्तीः। उप। नः। दुरः। चर। अनमीवः। रुद्र। जासु। नः। भव॥ २॥

या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः।

सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः॥ ३॥

या। ते। दिद्युत्। अवऽसृष्टा। दिवः। परि। क्ष्मया। चरति। परि। सा। वृणक्तु। नः।

सहस्रम्। ते। सुऽअपिवात। भेषजा। मा। नः। तोकेषु। तनयेषु। रिरिषः॥ ३॥

मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य।

आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः॥ ४॥ [१३]

मा। नः। वधीः। रुद्र। मा। परा। दाः। मा। ते। भूम। प्रऽसितौ। हीळितस्य।

आ। नः। भज। बर्हिषि। जीवऽशंसे। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[४७] [४ मैत्रावरुणिर्वसिष्ठः। आपः। त्रिष्टुप्।]

आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः।
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम॥ १॥

आपः। यम्। वः। प्रथमम्। देवऽयन्तः। इन्द्रऽपानम्। ऊर्मिम्। अकृण्वत। इळः।
तम्। वः। वयम्। शुचिम्। अरिप्रम्। अद्य। घृतऽप्रुषम्। मधुऽमन्तम्। वनेम॥ १॥

तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा।
यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्याम देवयन्तो वो अद्य॥ २॥

तम्। ऊर्मिम्। आपः। मधुमत्ऽतमम्। वः। अपाम्। नपात्। अवतु। आशुऽहेमा।
यस्मिन्। इन्द्रः। वसुऽभिः। मादयाते। तम्। अश्याम। देवऽयन्तः। वः। अद्य॥ २॥

शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत॥ ३॥

शतऽपवित्राः। स्वधया। मदन्तीः। देवीः। देवानाम्। अपि। यन्ति। पाथः।
ताः। इन्द्रस्य। न। मिनन्ति। व्रतानि। सिन्धुऽभ्यः। हव्यम्। घृतऽवत्। जुहोत॥ ३॥

याः सूर्यो रश्मिभिराततान याभ्य इन्द्रो अरदद्गातमूर्मिम्।
ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः॥ ४॥ [१४]

याः। सूर्यः। रश्मिऽभिः। आऽततान। याभ्यः। इन्द्रः। अरदत्। गातुम्। ऊर्मिम्।
ते। सिन्धवः। वरिवः। धातन। नः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ४॥

[४८] [४ मैत्रावरुणिर्वसिष्ठः। ऋभवः, ४ विश्वे देवा वा। त्रिष्टुप्।]

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु॥ १॥

ऋभुक्षणः। वाजाः। मादयध्वम्। अस्मे इति। नरः। मघऽवानः। सुतस्य।
आ। वः। अर्वाचः। क्रतवः। न। याताम्। विऽभ्वः। रथम्। नर्यम्। वर्तयन्तु॥ १॥

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि।
वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋभुः। ऋभुऽभिः। अभि। वः। स्याम। विऽभ्वः। विभुऽभिः। शवसा। शवांसि।
वाजः। अस्मान्। अवतु। वाजऽसातौ। इन्द्रेण। युजा। तरुषेम। वृत्रम्॥ २॥

ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन्।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि नृम्णम्॥ ३॥

ते। चित्। हि। पूर्वीः। अभि। सन्ति। शासा। विश्वान्। अर्यः। उपरऽताति। वन्वन्।
इन्द्रः। विऽभ्वा। ऋभुक्षाः। वाजः। अर्यः। शत्रोः। मिथत्या। कृणवन्। वि। नृम्णम्॥ ३॥

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः।
समस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः॥ ४॥ [१५]

नु। देवासः। वरिवः। कर्तन। नः। भूत। नः। विश्वे। अवसे। सऽजोषाः।
सम्। अस्मे इति। इषम्। वसवः। ददीरन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ४॥

[४९] [४ मैत्रावरुणिर्वसिष्ठः। आपः। त्रिष्टुप्।]

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः।
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु॥ १॥

समुद्रऽज्येष्ठाः। सलिलस्य। मध्यात्। पुनानाः। यन्ति। अनिऽविशमानाः।
इन्द्रः। याः। वज्री। वृषभः। रराद। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ १॥

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु॥ २॥

याः। आपः। दिव्याः। उत। वा। स्रवन्ति। खनित्रिमाः। उत। वा। याः। स्वयम्ऽजाः।
समुद्रऽअर्थाः। याः। शुचयः। पावकाः। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ २॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।
मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु॥ ३॥

यासाम्। राजा। वरुणः। याति। मध्ये। सत्यानृते इति। अवऽपश्यन्। जनानाम्।
मधुऽश्चुतः। शुचयः। याः। पावकाः। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ ३॥

यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदन्ति।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु॥ ४॥ [१६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यासु। राजा। वरुणः। यासु। सोमः। विश्वे। देवाः। यासु। ऊर्जम्। मदन्ति।

वैश्वानरः। यासु। अग्निः। प्रऽविष्टः। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ ४॥

[५०] [४ मैत्रावरुणिर्वसिष्ठः। १ मित्रावरुणौ, २ अग्निः, ३ विश्वे देवाः, ४ नद्यः। जगती, ४ अतिजगती शक्वरी वा।]

आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा न आ गन्।

अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रपसा विदत्त्सरुः॥ १॥

आ। माम्। मित्रावरुणा। इह। रक्षतम्। कुलाययत्। विऽश्वयत्। मा। नः। आ। गन्।

अजकाऽवम्। दुःऽदृशीकम्। तिरः। दधे। मा। माम्। पद्येन। रपसा। विदत्। त्सरुः॥ १॥

यद्विजामन्परुषि वन्दनं भुवदष्ठीवन्तौ परि कुल्फौ च देहत्।

अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा विदत्त्सरुः॥ २॥

यत्। विऽजामन्। परुषि। वन्दनम्। भुवत्। अष्ठीवन्तौ। परि। कुल्फौ। च। देहत्।

अग्निः। तत्। शोचन्। अप। बाधताम्। इतः। मा। माम्। पद्येन। रपसा। विदत्। त्सरुः॥ २॥

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम्।

विश्वे देवा निरितस्तत्सुवन्तु मा मां पद्येन रपसा विदत्त्सरुः॥ ३॥

यत्। शल्मलौ। भवति। यत्। नदीषु। यत्। ओषधीभ्यः। परि। जायते। विषम्।

विश्वे। देवाः। निः। इतः। तत्। सुवन्तु। मा। माम्। पद्येन। रपसा। विदत्। त्सरुः॥ ३॥

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः।

ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु

सर्वा नद्यो अशिमिदा भवन्तु॥ ४॥ [१७]

यः। प्रऽवतः। निऽवतः। उत्ऽवतः। उदन्ऽवतीः। अनुदकाः। च। याः॥ ताः। अस्मभ्यम्। पयसा।

पिन्वमानाः। शिवाः। देवीः। अशिपदाः। भवन्तु। सर्वाः। नद्यः। अशिमिदाः। भवन्तु॥ ४॥

[५१] [३ मैत्रावरुणिर्वसिष्ठः। आदित्याः। त्रिष्टुप्।]

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन।

अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आदित्यानाम्। अवसा। नूतनेन। सक्षीमहि। शर्मणा। शम्ऽतमेन।

अनागाःऽत्वे। अदितिऽत्वे। तुरासः। इमम्। यज्ञम्। दधतु। श्रोषमाणाः॥ १॥

आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः।

अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य॥ २॥

आदित्यासः। अदितिः। मादयन्ताम्। मित्रः। अर्यमा। वरुणः। रजिष्ठाः।

अस्माकम्। सन्तु। भुवनस्य। गोपाः। पिबन्तु। सोमम्। अवसे। नः। अद्य॥ २॥

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे।

इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः॥ ३॥ [१८]

आदित्याः। विश्वे। मरुतः। च। विश्वे। देवाः। च। विश्वे। ऋभवः। च। विश्वे।

इन्द्रः। अग्निः। अश्विना। तुस्तुवानाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

[५२] [३ मैत्रावरुणिर्वसिष्ठः। आदित्याः। त्रिष्टुप्।]

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा।

सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः॥ १॥

आदित्यासः। अदितयः। स्याम। पूः। देवऽत्रा। वसवः। मर्त्यऽत्रा।

सनेम। मित्रावरुणा। सनन्तः। भवेम। द्यावापृथिवी इति। भवन्तः॥ १॥

मित्रस्तन्नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः।

मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे॥ २॥

मित्रः। तत्। नः। वरुणः। ममहन्त। शर्म। तोकाय। तनयाय। गोपाः।

मा। वः। भुजेम। अन्यऽजातम्। एनः। मा। तत्। कर्म। वसवः। यत्। चयध्वे॥ २॥

तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः।

पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषन्त॥ ३॥ [१९]

तुरण्यवः। अङ्गिरसः। नक्षन्त। रत्नम्। देवस्य। सवितुः। इयानाः।

पिता। च। तत्। नः। महान्। यजत्रः। विश्वे। देवाः। सऽमनसः। जुषन्त॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[५३] [३ मैत्रावरुणिर्वसिष्ठः। द्यावापृथिवी। त्रिष्टुप्।]

प्र द्यावा॑ य॒ज्ञैः पृ॑थि॒वी नमो॑भिः स॒बाध॑ ईळे बृह॒ती यज॑त्रे।
ते चि॒द्धि पूर्वे॑ क॒वयो॑ गृ॒णन्तः॑ पु॒रो म॒ही द॑धि॒रे दे॒वपु॑त्रे॥ १॥

प्र। द्यावा॑। य॒ज्ञैः। पृ॒थि॒वी इति॑। नमः॑ऽभिः। स॒ऽबाधः॑। ई॒ळे॒। बृ॒ह॒ती इति॑। यज॑त्रे इति॑।
ते इति॑। चि॒त्। हि। पूर्वे॑। क॒वयः॑। गृ॒णन्तः॑। पु॒रः। म॒ही इति॑। द॒धि॒रे। दे॒वपु॑त्रे इति॑ दे॒वऽपु॑त्रे॥ १॥

प्र पू॑र्व॒जे पि॒तरा॒ नव्य॑सीभिर्गी॒र्भिः कृ॑णुध्वं॒ सद॑ने ऋ॒तस्य॑।
आ नो॑ द्यावापृथिवी॒ दैव्ये॑न॒ जने॑न यातं॒ महि॑ वां॒ वरू॑थम्॥ २॥

प्र। पू॒र्व॒जे इति॑ पू॒र्व॒ऽजे। पि॒तरा॑। नव्य॑सीभिः। गी॒ःऽभिः। कृ॒णु॒ध्व॒म्। सद॑ने॒ इति॑। ऋ॒तस्य॑।
आ। न॒ः। द्या॒वा॒पृ॒थि॒वी॒ इति॑। दैव्ये॑न। जने॑न। या॒त॒म्। महि॑। वा॒म्। वरू॑थम्॥ २॥

उ॒तो हि वां॑ र॒त्न॒धेया॑नि॒ सन्ति॑ पु॒रूणि॑ द्यावापृथिवी सु॒दासे॑।
अ॒स्मे ध॑त्तं॒ यद॒स॒दस्कृ॑धोयु यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः॥ ३॥ [२०]

उ॒तो इति॑। हि। वा॒म्। र॒त्न॒ऽधेया॑नि। सन्ति॑। पु॒रूणि॑। द्या॒वा॒पृ॒थि॒वी॒ इति॑। सु॒ऽदासे॑।
अ॒स्मे इति॑। ध॒त्त॒म्। यत्। अस॑त्। अस्कृ॑धोयु। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। न॒ः॥ ३॥

[५४] [३ मैत्रावरुणिर्वसिष्ठः। वास्तोष्पतिः। त्रिष्टुप्।]

वास्तो॑ष्पते॒ प्रति॑ जानीह्य॒स्मान्त्स्वा॑वे॒शो अ॑नमी॒वो भ॑वा नः।
यत्त्वेम॑हे॒ प्रति॒ तन्नो॑ जुषस्व॒ शं नो॑ भव द्वि॒पदे॒ शं चतु॑ष्पदे॥ १॥

वास्तोः॑। प॒ते॒। प्रति॑। जा॒नी॒हि॒। अ॒स्मान्। सु॒ऽआ॒वे॒शः। अ॒न॒मी॒वः। भ॒व॒। न॒ः।
यत्। त्वा॒। ईम॑हे। प्रति॑। तत्। न॒ः। जु॒ष॒स्व॒। शम्। न॒ः। भ॒व॒। द्वि॒ऽपदे॑। शम्। चतुः॑ऽपदे॥ १॥

वास्तो॑ष्पते प्र॒तर॑णो न एधि गय॒स्फानो॒ गोभि॒रश्वे॑भिरिन्दो।
अ॒जरा॑सस्ते स॒ख्ये स्या॑म पि॒तेव॑ पु॒त्रान्प्रति॑ नो जुषस्व॥ २॥

वास्तोः॑। प॒ते॒। प्र॒ऽतर॑णः। न॒ः। ए॒धि॒। ग॒य॒ऽस्फानः॑। गोभिः॑। अश्वे॑भिः। इ॒न्दो॒ इति॑।
अ॒जरा॑सः। ते॒। स॒ख्ये। स्या॒म॒। पि॒ताऽइ॑व। पु॒त्रान्। प्रति॑। न॒ः। जु॒ष॒स्व॒॥ २॥

वास्तो॑ष्पते श॒ग्मया॑ सं॒सदा॑ ते सक्षी॒महि॑ र॒ण्वया॑ गातु॒मत्या॑।
पा॒हि क्षेम॑ उ॒त योगे॒ वरं॑ नो यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः॥ ३॥ [२१]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वास्तोः। पते। शग्मया। सम्ऽसदा। ते। सक्षीमहि। रण्वया। गातुऽमत्या।

पाहि। क्षेमे। उत। योगे। वरम्। नः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

[५५] [३ मैत्रावरुणिर्वसिष्ठः। वास्तोष्पतिः। प्रस्वापिन्युपनिषत्; १ गायत्री, २-४ उपरिष्टाद् बृहत्यः, ५-८ अनुष्टुभः]

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः॥ १॥

अमीवऽहा। वास्तोः। पते। विश्वा। रूपाणि। आऽविशन्। सखा। सुऽशेवः। एधि। नः॥ १॥

यदर्जुन सारमेय दतः पिशङ्ग यच्छसे। वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप॥ २॥

यत्। अर्जुन। सारमेय। दतः। पिशङ्ग। यच्छसे।

विऽइव। भ्राजन्ते। ऋष्टयः। उप। स्रक्वेषु। बप्सतः। नि। सु। स्वप॥ २॥

स्तेनं राय सारमेय तस्करं वा पुनःसर।

स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप॥ ३॥

स्तेनम्। राय। सारमेय। तस्करम्। वा। पुनःऽसर।

स्तोतॄन्। इन्द्रस्य। रायसि। किम्। अस्मान्। दुच्छुनऽयसे। नि। सु। स्वप॥ ३॥

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः।

स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप॥ ४॥

त्वम्। सूकरस्य। दर्दृहि। तव। दर्दर्तु। सूकरः।

स्तोतॄन्। इन्द्रस्य। रायसि। किम्। अस्मान्। दुच्छुनऽयसे। नि। सु। स्वप॥ ४॥

सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।

ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः॥ ५॥

सस्तु। माता। सस्तु। पिता। सस्तु। श्वा। सस्तु। विश्पतिः।

ससन्तु। सर्वे। ज्ञातयः। सस्तु। अयम्। अभितः। जनः॥ ५॥

य आस्ते यश्च चरति यश्च पश्यति नो जनः। तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा॥ ६॥

यः। आस्ते। यः। च। चरति। यः। च। पश्यति। नः। जनः।

तेषाम्। सम्। हन्मः। अक्षाणि। यथा। इदम्। हर्म्यम्। तथा॥ ६॥

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत्। तेना सहस्येना वयं नि जनान्त्स्वापयामसि॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सहस्र॑ऽशृङ्गः। वृष॒भः। यः। स॒मु॒द्रात्। उत्ऽआच॑रत्।

तेन॑। स॒ह॒स्ये॑न। व॒यम्। नि। जना॑न्। स्वा॒प॒या॒म॒सि॒॥ ७॥

प्रो॒ष्ठे॒श॒या व॑ह्येश॒या नारी॒र्यास्त॑ल्प॒शीव॑रीः। स्त्रियो॒ या: पुण्य॑गन्धा॒स्ता: सर्वा॑: स्वापयामसि॥ ८॥

प्रो॒ष्ठे॒ऽश॒याः। व॒ह्ये॒ऽश॒याः। नारी॑ः। याः। त॒ल्प॒ऽशीव॑रीः। [२२]

स्त्रिय॑ः। याः। पुण्य॑ऽगन्धाः। ताः। सर्वा॑ः। स्वा॒प॒या॒म॒सि॒॥ ८॥

***[५६] [८ मैत्रावरुणिर्वसिष्ठः, १ स्वप्नः, २-८ सर्पभयबाधः। अनुष्टुप्, ६-७ त्रिष्टुभौ]**

स्वप्न॑ स्वप्नाधि॒कर॑णे सर्व॒ं नि ष्वा॑पया॒ जन॑म्।

आ॒सू॒र्यम॒न्यान्त्स्वा॑पय ह्व॒द्य१॒हं जा॑गृयामि॒ह॥ १॥*

स्वप्न॑। स्व॒प्न॒ऽअ॒धि॒कर॑णे। सर्वम्। नि। स्वा॒प॒य॒। जन॑म्।

आ॒ऽसूर्यम्। अ॒न्यान्। स्वा॒प॒य॒। ह्व॒दि। अ॒हम्। जा॒गृ॒या॒म्। इ॒ह॥ १॥

अ॒ज॒ग॒रो नाम॑ स॒र्पः सर्पि॑रवि॒षो म॒हान्। तस्मि॒न्हि स॒र्पः सुधि॑त॒स्तेन॑ त्वा स्वापयामसि॥ २॥*

अ॒ज॒ग॒रः। नाम॑। स॒र्पः। स॒र्पिः। अ॒वि॒षः। म॒हान्।

तस्मि॑न्। हि। स॒र्पः। सुऽधि॑तः। तेन॑। त्वा॒। स्वा॒प॒या॒म॒सि॒॥ २॥

स॒र्पः स॒र्पो अ॑जग॒रः स॒र्पि॑रवि॒षो म॒हान्। तस्य॑ शु॒ष्कात्सिन्ध॑व॒स्तस्य॑ गा॒धम॑शीमहि॥ ३॥*

स॒र्पः। स॒र्पः। अ॒ज॒ग॒रः। स॒र्पिः। अ॒वि॒षः। म॒हान्।

तस्य॑। शु॒ष्कात्। सिन्ध॑वः। तस्य॑। गा॒धम्। अ॒शी॒म॒हि॒॥ ३॥

का॒लि॒को नाम॑ स॒र्पो नव॑नागस॒हस्र॑बलः। य॒मु॒न॒ह्व॒दे ह॒ सो जा॑तो॒ ३॒॑ऽसौ ना॑रायण॒वाह॑नः॥ ४॥*

का॒लि॒कः। नाम॑। स॒र्पः। नव॑नागस॒हस्र॑ऽबलः।

य॒मु॒न॒ऽह्व॒दे। ह॒। सो इति॑। जा॒तः। अ॒सौ। ना॒रा॒य॒ण॒वाह॑नः॥ ४॥

यदि॑ कालिकदू॒तस्य॒ यदि॑ काःकालि॒काद्भ॒यम्।

ज॒न्म॒भू॒मिं परि॑क्रान्तो॒ निर्वि॑षो याति कालि॒कः॥ ५॥*

यदि॑। का॒लि॒क॒ऽदू॒तस्य॑। यदि॑। का॒ःका॒लि॒कात्। भ॒यम्।

ज॒न्म॒ऽभू॒मिम्। परि॑ऽक्रान्तः। निः॒ऽवि॑षः। या॒ति॒। का॒लि॒कः॥ ५॥

आ या॑हीन्द्र प॒थिभि॑रीळि॒तेभि॑र्य॒ज्ञमि॒मं नो॑ भाग॒धेय॑ जुषस्व।

तृ॒प्तां ज॑हु॒र्मा॑तु॒लस्ये॑व॒ योषा॑ भा॒गस्ते॑ पैतृष्व॒से॒यी व॒पामि॑व॥ ६॥*

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। याहि। इन्द्र। पथिऽभिः। ईळितेभिः। यज्ञम्। इमम्। नः। भागऽधेयम्। जुषस्व।

तृप्ताम्। जुहुः। मातुलस्यऽइव। योषा। भागः। ते। पैतृष्वसेयी। वपाम्ऽइव॥ ६॥

यशस्करं बलवन्तं प्रभुत्वं तमेव राजाधिपतिर्बभूव।

संकीर्णनागाश्वपतिर्नराणां सुमङ्गल्यं सततं दीर्घमायुः॥ ७॥ ★

यशःऽकरम्। बलऽवन्तम्। प्रभुऽत्वम्। तम्। एव। राजऽअधिपतिः। बभूव।

संकीर्णऽनागाश्वपतिः। नराणाम्। सुऽमङ्गल्यम्। सऽततम्। दीर्घम्। आयुः॥ ७॥

कर्कोटको नाम सर्पो यो दृष्टीविष उच्यते। तस्य सर्पस्य सर्पत्वं तस्मै सर्प नमोऽस्तु ते॥ ८॥ ★

कर्कोटकः। नाम। सर्पः। यः। दृष्टीऽविषः। उच्यते। [२३] {३}

तस्य। सर्पस्य। सर्पऽत्वम्। तस्मै। सर्प। नमः। अस्तु। ते॥ ८॥

[५७ (५६)] [२५ मैत्रावरुणिर्वसिष्ठः। मरुतः। त्रिष्टुप्, १-११ द्विपदा विराजः।]

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः॥ १॥

के। ईम्। विऽअक्ताः। नरः। सऽनीळाः। रुद्रस्य। मर्याः। अध। सुऽअश्वाः॥ १॥

नकिर्ह्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम्॥ २॥

नकिः। हि। एषाम्। जनूंषि। वेद। ते। अङ्ग। विद्रे। मिथः। जनित्रम्॥ २॥

अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन्॥ ३॥

अभि। स्वऽपूभिः। मिथः। वपन्त। वातऽस्वनसः। श्येनाः। अस्पृध्रन्॥ ३॥

एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार॥ ४॥

एतानि। धीरः। निण्या। चिकेत। पृश्निः। यत्। ऊधः। मही। जभार॥ ४॥

सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम्॥ ५॥ [२४ (२३)]

सा। विट्। सुऽवीरा। मरुत्ऽभिः। अस्तु। सनात्। सहन्ती। पुष्यन्ती। नृम्णम्॥ ५॥

यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः॥ ६॥

यामम्। येष्ठाः। शुभा। शोभिष्ठाः। श्रिया। सम्ऽमिश्लाः। ओजःऽभिः। उग्राः॥ ६॥

उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान्॥ ७॥

उग्रम्। वः। ओजः। स्थिरा। शवांसि। अध। मरुत्ऽभिः। गणः। तुविष्मान्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः॥ ८॥

शुभ्रः। वः। शुष्मः। क्रुध्मी। मनांसि। धुनिः। मुनिःऽइव। शर्धस्य। धृष्णोः॥ ८॥

सनेम्यस्मद्युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ् नः॥ ९॥

सनेमि। अस्मत्। युयोत। दिद्युम्। मा। वः। दुःऽमतिः। इह। प्रणक्। नः॥ ९॥

प्रिया वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः॥ १०॥

प्रिया। वः। नाम। हुवे। तुराणाम्। आ। यत्। तृपत्। मरुतः। वावशानाः॥ १०॥

स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्व१ः शुम्भमानाः॥ ११॥

सु°आयुधासः। इष्मिणः। सु°निष्काः। उत। स्वयम्। तन्वः। शुम्भमानाः॥ ११॥

शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः।

ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः॥ १२॥

शुची। वः। हव्या। मरुतः। शुचीनाम्। शुचिम्। हिनोमि। अध्वरम्। शुचि°भ्यः।

ऋतेन। सत्यम्। ऋत°सापः। आयन्। शुचि°जन्मानः। शुचयः। पावकाः॥ १२॥

अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः।

वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः॥ १३॥ [२५ (२४)]

अंसेषु। आ। मरुतः। खादयः। वः। वक्षःऽसु। रुक्माः। उप°शिश्रियाणाः।

वि। वि°द्युतः। न। वृष्टि°भिः। रुचानाः। अनु। स्वधाम्। आयुधैः। यच्छमानाः॥ १३॥

प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम्।

सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम्॥ १४॥

प्र। बुध्न्याः। वः। ईरते। महांसि। प्र। नामानि। प्र°यज्यवः। तिरध्वम्।

सहस्रियम्। दम्यम्। भागम्। एतम्। गृह°मेधीयम्। मरुतः। जुषध्वम्॥ १४॥

यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन्।

मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभदरावा॥ १५॥

यदि। स्तुतस्य। मरुतः। अधि°इथ। इत्था। विप्रस्य। वाजिनः। हवीमन्।

मक्षु। रायः। सु°वीर्यस्य। दात। नु। चित्। यम्। अन्यः। आ°दभत्। अरावा॥ १५॥

अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः।

ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्यासः। न। ये। मुरुतः। सु॒ऽअञ्चः। यु॒क्ष॒ऽदृशः। न। शु॒भयन्त। मर्याः।

ते। हु॒र्म्ये॒ऽस्थाः। शिशवः। न। शु॒भ्राः। वु॒त्सासः। न। प्र॒ऽक्री॒ळिनः। प॒यः॒ऽधाः॥ १६॥

द॒श॒स्यन्तो नो म॒रुतो मृळन्तु वरि॒व॒स्यन्तो॒ रोद॑सी सु॒मेके।

आ॒रे गो॒हा नृ॒हा व॒धो वो अस्तु सु॒म्नेभि॑र॒स्मे वसवो नमध्वम्॥ १७॥

द॒श॒स्यन्तः। न॒ः। म॒रुतः। मृ॒ळन्तु। व॒रि॒व॒स्यन्तः। रोद॑सी॒ इति॑। सु॒मेके॒ इति॑ सु॒ऽमेके।

आ॒रे। गो॒ऽहा। नृ॒ऽहा। व॒धः। व॒ः। अ॒स्तु। सु॒म्नेभिः। अ॒स्मे इति॑। व॒स॒व॒ः। न॒म॒ध्व॒म्॥ १७॥

आ वो॒ होता॑ जोहवीति स॒त्तः स॒त्राचीं रा॒तिं मरुतो गृणा॒नः।

य ईव॑तो वृषणो॒ अस्ति॒ गो॒पाः सो अद्व॑यावी हवते व उ॒क्थैः॥ १८॥

आ। व॒ः। होता॑। जो॒ह॒वी॒ति॒। स॒त्तः। स॒त्राचीम्। रा॒तिम्। म॒रु॒त॒ः। गृ॒णा॒नः।

यः। ईव॑तः। वृ॒ष॒ण॒ः। अस्ति॒। गो॒पाः। सः। अद्व॑यावी। ह॒व॒ते॒। व॒ः। उ॒क्थैः॥ १८॥

इ॒मे तु॒रं म॒रुतो रामयन्ती॒मे सह॒ः सह॑स॒ आ नमन्ति।

इ॒मे शंसं॑ वनुष्य॒तो नि पान्ति गुरु द्वेषो॒ अर॑रुषे दधन्ति॥ १९॥

इ॒मे। तु॒रम्। म॒रुतः। र॒म॒य॒न्ति॒। इ॒मे। सहः। सह॑सः। आ। न॒म॒न्ति॒।

इ॒मे। शंस॑म्। व॒नु॒ष्य॒तः। नि। पा॒न्ति॒। गु॒रु। द्वेषः। अर॑रुषे। द॒ध॒न्ति॒॥ १९॥

इ॒मे र॒ध्रं चिन्म॒रुतो जुनन्ति॒ भृमिं चि॒द्यथा॒ वस॑वो जुषन्त।

अप॑ बाधध्वं वृषण॒स्तमांसि ध॒त्त विश्वं॒ तन॑यं तो॒कम॒स्मे॥ २०॥ [२६ (२५)]

इ॒मे। र॒ध्रम्। चि॒त्। म॒रुतः। जु॒न॒न्ति॒। भृमि॑म्। चि॒त्। यथा॑। वस॑वः। जु॒षन्त॑।

अप॑। बा॒ध॒ध्व॒म्। वृ॒ष॒ण॒ः। तमा॑सि। ध॒त्त। विश्व॑म्। तन॑यम्। तो॒कम्। अ॒स्मे इति॑॥ २०॥

मा वो दा॒त्रान्म॑रुतो॒ निर॑रा॒म मा प॒श्चाद्द॑घ्म रथ्यो विभा॒गे।

आ न॒ः स्पा॒र्हे भ॑जतना वस॒व्ये३ यदीं सुजा॒तं वृ॑षणो वो॒ अस्ति॑॥ २१॥

मा। व॒ः। दा॒त्रात्। म॒रु॒त॒ः। निः। अ॒रा॒म॒। मा। प॒श्चात्। द॒घ्म॒। र॒थ्य॒ः। वि॒ऽभा॒गे।

आ। न॒ः। स्पा॒र्हे। भ॒ज॒त॒न॒। व॒स॒व्ये। यत्। ईम्। सु॒ऽजा॒तम्। वृ॒ष॒ण॒ः। व॒ः। अस्ति॑॥ २१॥

सं यद्धन॑न्त म॒न्युभि॒र्जना॑स॒ः शूरा॑ य॒ह्वीष्वोष॑धीषु वि॒क्षु।

अध॑ स्म नो मरुतो रुद्रियासस्त्रा॒तारो॑ भूत पृत॑नास्व॒र्यः॥ २२॥

सम्। यत्। हन॑न्त। म॒न्यु॒ऽभिः। जना॑सः। शूराः। य॒ह्वीषु। ओष॑धीषु। वि॒क्षु।

अध॑। स्म॒। न॒ः। म॒रु॒त॒ः। रु॒द्रि॒या॒स॒ः। त्रा॒तार॑ः। भू॒त॒। पृत॑नासु। अ॒र्यः॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित्।

मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा॥ २३॥

भूरि। चक्र। मरुतः। पित्र्याणि। उक्थानि। या। वः। शस्यन्ते। पुरा। चित्।

मरुत्ऽभिः। उग्रः। पृतनासु। साळ्हा। मरुत्ऽभिः। इत्। सनिता। वाजम्। अर्वा॥ २३॥

अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता।

अपो येन सुक्षितये तरेमाध स्वमोको अभि वः स्याम॥ २४॥

अस्मे इति। वीरः। मरुतः। शुष्मी। अस्तु। जनानाम्। यः। असुरः। विऽधर्ता।

अपः। येन। सुऽक्षितये। तरेम। अध। स्वम्। ओकः। अभि। वः। स्याम॥ २४॥

तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त।

शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः॥ २५॥ [२७ (२६)]

तत्। नः। इन्द्रः। वरुणः। मित्रः। अग्निः। आपः। ओषधीः। वनिनः। जुषन्त।

शर्मन्। स्याम। मरुताम्। उपऽस्थे। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ २५॥

[५८ (५७)] [७ मैत्रावरुणिर्वसिष्ठः। मरुतः। त्रिष्टुप्]

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति।

ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः॥ १॥

मध्वः। वः। नाम। मारुतम्। यजत्राः। प्र। यज्ञेषु। शवसा। मदन्ति।

ये। रेजयन्ति। रोदसी इति। चित्। उर्वी इति। पिन्वन्ति। उत्सम्। यत्। अयासुः। उग्राः॥ १॥

निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म।

अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः॥ २॥

निऽचेतारः। हि। मरुतः। गृणन्तम्। प्रऽनेतारः। यजमानस्य। मन्म।

अस्माकम्। अद्य। विदथेषु। बर्हिः। आ। वीतये। सदत। पिप्रियाणाः॥ २॥

नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः।

आ रोदसी विश्वपिशः पिशानाः समानमञ्ज्यञ्जते शुभे कम्॥ ३॥

न। एतावत्। अन्ये। मरुतः। यथा। इमे। भ्राजन्ते। रुक्मैः। आयुधैः। तनूभिः।

आ। रोदसी इति। विश्वऽपिशः। पिशानाः। समानम्। अञ्जि। अञ्जते। शुभे। कम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम।

मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा॥ ४॥

ऋधक्। सा। वः। मरुतः। दिद्युत्। अस्तु। यत्। वः। आगः। पुरुषता। कराम।

मा। वः। तस्याम्। अपि। भूम। यजत्राः। अस्मे इति। वः। अस्तु। सुऽमतिः। चनिष्ठा॥ ४॥

कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः।

प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः॥ ५॥

कृते। चित्। अत्र। मरुतः। रणन्त। अनवद्यासः। शुचयः। पावकाः।

प्र। नः। अवत। सुमतिऽभिः। यजत्राः। प्र। वाजेभिः। तिरत। पुष्यसे। नः॥ ५॥

उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि।

ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि॥ ६॥

उत। स्तुतासः। मरुतः। व्यन्तु। विश्वेभिः। नामऽभिः। नरः। हवींषि।

ददात। नः। अमृतस्य। प्रऽजायै। जिगृत। रायः। सूनृता। मघानि॥ ६॥

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात।

ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [२८ (२७)]

आ। स्तुतासः। मरुतः। विश्वे। ऊती। अच्छ। सूरीन्। सर्वऽताता। जिगात।

ये। नः। त्मना। शतिनः। वर्धयन्ति। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[५९ (५८)] [६ मैत्रावरुणिर्वसिष्ठः। मरुतः। त्रिष्टुप्।]

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान्।

उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात्॥ १॥

प्र। साकम्ऽउक्षे। अर्चत। गणाय। यः। दैव्यस्य। धाम्नः। तुविष्मान्।

उत। क्षोदन्ति। रोदसी इति। महिऽत्वा। नक्षन्ते। नाकम्। निःऽऋतेः। अवंशात्॥ १॥

जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः।

प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन्भयते स्वर्दृक्॥ २॥

जनूः। चित्। वः। मरुतः। त्वेष्येण। भीमासः। तुविऽमन्यवः। अयासः।

प्र। ये। महःऽभिः। ओजसा। उत। सन्ति। विश्वः। वः। यामन्। भयते। स्वःऽदृक्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बृहद्वयो मघवद्भ्य दधात जुजोषन्निन्मरुतः सुष्टुतिं नः।

गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत॥ ३॥

बृहत्। वयः। मघवत्ऽभ्यः। दधात। जुजोषन्। इत्। मरुतः। सुऽस्तुतिम्। नः।

गतः। न। अध्वा। वि। तिराति। जन्तुम्। प्र। नः। स्पार्हाभिः। ऊतिऽभिः। तिरेत॥ ३॥

युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री।

युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम्॥ ४॥

युष्माऽऊतः। विप्रः। मरुतः। शतस्वी। युष्माऽऊतः। अर्वा। सहुरिः। सहस्री।

युष्माऽऊतः। सम्ऽराट्। उत। हन्ति। वृत्रम्। प्र। तत्। वः। अस्तु। धूतयः। देष्णम्॥ ४॥

ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः।

यत्सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम्॥ ५॥

तान्। आ। रुद्रस्य। मीळ्हुषः। विवासे। कुवित्। नंसन्ते। मरुतः। पुनः। नः।

यत्। सस्वर्ता। जिहीळिरे। यत्। आविः। अव। तत्। एनः। ईमहे। तुराणाम्॥ ५॥

प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त।

आराच्चिद् द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [२९ (२८)]

प्र। सा। वाचि। सुऽस्तुतिः। मघोनाम्। इदम्। सुऽउक्तम्। मरुतः। जुषन्त।

आरात्। चित्। द्वेषः। वृषणः। युयोत। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[६० (५९)] [१२ मैत्रावरुणिर्वसिष्ठः। १-११ मरुतः; १२ रुद्रः (मृत्युविमोचनी ऋक्)। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः); ७-८ त्रिष्टुभौ, ९-११ गायत्र्यः, १२ अनुष्टुप्।]

यं त्रायध्व इदमिदं देवासो यं च नयथ। तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत॥ १॥

यम्। त्रायध्वे। इदम्ऽइदम्। देवासः। यम्। च। नयथ।

तस्मै। अग्ने। वरुण। मित्र। अर्यमन्। मरुतः। शर्म। यच्छत॥ १॥

युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः।

प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति॥ २॥

युष्माकम्। देवाः। अवसा। अहनि। प्रिये। ईजानः। तरति। द्विषः।

प्र। सः। क्षयम्। तिरते। वि। महीः। इषः। यः। वः। वराय। दाशति॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नहि वंश्चरमं चन वसिंष्ठः परिमंसंते।

अस्माकंमद्य मंरुतः सुते सचा विश्वें पिबत कामिनः॥ ३॥

नहि। वः। चरमम्। चन। वसिंष्ठः। परिंमंसंते।

अस्माकंम्। अद्य। मरुतः। सुते। सचां। विश्वें। पिबत। कामिनः॥ ३॥

नहि वं ऊतिः पृतंनासु मर्धति यस्मा अरांध्वं नरः।

अभि व आवंर्त्सुमतिर्नवींयसी तूयं यात पिपीषवः॥ ४॥

नहि। वः। ऊतिः। पृतंनासु। मर्धति। यस्मै। अरांध्वम्। नरः।

अभि। वः। आ। अवर्त्। सुमतिः। नवींयसी। तूयंम्। यात। पिपीषवः॥ ४॥

ओ षु धृष्विराधसो यातनान्धांसि पीतयें।

इमा वो हव्या मंरुतो ररे हि कं मो ष्वं१न्यत्र गन्तन॥ ५॥ [३० (२९)]

ओ इतिं। सु। घृष्विंराधसः। यातनं। अन्धांसि। पीतयें।

इमा। वः। हव्या। मरुतः। ररे। हि। कम्। मो इतिं। सु। अन्यत्रं। गन्तन॥ ५॥

आ चं नो बर्हिः सदंताविता चं नः स्पार्हाणि दातंवे वसुं।

अस्रेंधन्तो मरुतः सोम्ये मधौ स्वाहेह मांदयाध्वै॥ ६॥

आ। च। नः। बर्हिः। सदंत। अवित। च। नः। स्पार्हाणिं। दातंवे। वसुं।

अस्रेंधन्तः। मरुतः। सोम्ये। मधौं। स्वाहां। इह। मादयाध्वै॥ ६॥

सस्वश्चिद्धि तन्वं१ः शुम्भंमाना आ हंसासो नीलंपृष्ठा अपप्तन्।

विश्वं शर्धों अभितों मा नि षेंद नरो न रण्वाः सवंने मदंन्तः॥ ७॥

सस्वरितिं। चित्। हि। तन्वंः। शुम्भंमानाः। आ। हंसासंः। नीलंपृष्ठाः। अपप्तन्।

विश्वंम्। शर्धः। अभितंः। मा। नि। सेद। नरंः। न। रण्वाः। सवंने। मदंन्तः॥ ७॥

यो नों मरुतो अभि दुर्हृणायुस्तिरश्चित्तानिं वसवो जिघांसति।

द्रुहः पाशान्प्रति स मुंचीष्ट तपिंष्ठेन हन्मंना हन्तना तम्॥ ८॥

यः। नः। मरुतः। अभि। दुःहृणायुः। तिरः। चित्तानिं। वसवः। जिघांसति।

द्रुहः। पाशान्। प्रतिं। सः। मुचीष्ट। तपिंष्ठेन। हन्मंना। हन्तन। तम्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन। युष्माकोती रिशादसः॥ ९॥

साम्ऽतपनाः। इदम्। हविः। मरुतः। तत्। जुजुष्टन। युष्माक। ऊती। रिशादसः॥ ९॥

गृहमेधास आ गत मरुतो माप भूतन। युष्माकोती सुदानवः॥ १०॥

गृहऽमेधासः। आ। गत। मरुतः। मा। अप। भूतन। युष्माक। ऊती। सुऽदानवः॥ १०॥

इहेह वः स्वतवसः कवयः सूर्यत्वचः। यज्ञं मरुत आ वृणे॥ ११॥

इहऽइह। वः। स्वऽतवसः। कवयः। सूर्यऽत्वचः। यज्ञम्। मरुतः। आ। वृणे॥ ११॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ १२॥ [३१ (३०)]

त्रिऽअम्बकम्। यजामहे। सुऽगन्धिम्। पुष्टिऽवर्धनम्।

उर्वारुकम्ऽइव। बन्धनात्। मृत्योः। मुक्षीय। मा। अमृतात्॥ १२॥

इत्याश्वलायन-संहितायां

पञ्चमाष्टके

चतुर्थोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके पंचमोऽध्यायः ॥

[६१ (६०)] [१२ मैत्रावरुणिर्वसिष्ठः। १ सूर्यः, २-१२ मित्रावरुणौ। त्रिष्टुप्।]

यदद्य सूर्य ब्रवोऽनागा उद्यन्मित्राय वरुणाय सत्यम्।
वयं देवत्रादिते स्याम तव प्रियासो अर्यमन्गृणन्तः॥ १॥

यत्। अद्य। सूर्य। ब्रवः। अनागाः। उत्ऽयन्। मित्राय। वरुणाय। सत्यम्।
वयम्। देवऽत्रा। अदिते। स्याम। तव। प्रियासः। अर्यमन्। गृणन्तः॥ १॥

एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन्।
विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन्॥ २॥

एषः। स्यः। मित्रावरुणा। नृऽचक्षाः। उभे इति। उत्। एति। सूर्यः। अभि। ज्मन्।
विश्वस्य। स्थातुः। जगतः। च। गोपाः। ऋजु। मर्तेषु। वृजिना। च। पश्यन्॥ २॥

अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः।
धामानि मित्रावरुणा युवाकुः सं यो यूथेव जनिमानि चष्टे॥ ३॥

अयुक्त। सप्त। हरितः। सधऽस्थात्। याः। ईम्। वहन्ति। सूर्यम्। घृताचीः।
धामानि। मित्रावरुणा। युवाकुः। सम्। यः। यूथाऽइव। जनिमानि। चष्टे॥ ३॥

उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः।
यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः॥ ४॥

उत्। वाम्। पृक्षासः। मधुऽमन्तः। अस्थुः। आ। सूर्यः। अरुहत्। शुक्रम्। अर्णः।
यस्मै। आदित्याः। अध्वनः। रदन्ति। मित्रः। अर्यमा। वरुणः। सऽजोषाः॥ ४॥

इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति।
इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः॥ ५॥

इमे। चेतारः। अनृतस्य। भूरेः। मित्रः। अर्यमा। वरुणः। हि। सन्ति।
इमे। ऋतस्य। ववृधुः। दुरोणे। शग्मासः। पुत्राः। अदितेः। अदब्धाः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः।
अपि क्रतुं सुचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति॥ ६॥ [१]
इमे। मित्रः। वरुणः। दुःऽदभासः। अचेतसम्। चित्। चितयन्ति। दक्षैः।
अपि। क्रतुम्। सुऽचेतसम्। वतन्तः। तिरः। चित्। अंहः। सुऽपथा। नयन्ति॥ ६॥

इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति।
प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन्॥ ७॥
इमे। दिवः। अनिऽमिषा। पृथिव्याः। चिकित्वांसः। अचेतसम्। नयन्ति।
प्रऽव्राजे। चित्। नद्यः। गाधम्। अस्ति। पारम्। नः। अस्य। विष्पितस्य। पर्षन्॥ ७॥

यद्गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे।
तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः॥ ८॥
यत्। गोपावत्। अदितिः। शर्म। भद्रम्। मित्रः। यच्छन्ति। वरुणः। सुऽदासे।
तस्मिन्। आ। तोकम्। तनयम्। दधानाः। मा। कर्म। देवऽहेळनम्। तुरासः॥ ७॥

अव वेदिं होत्राभिर्यजेत रिपः काश्चिद्वरुणध्रुतः सः।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम्॥ ९॥
अव। वेदिम्। होत्राभिः। यजेत। रिपः। काः। चित्। वरुणऽध्रुतः। सः।
परि। द्वेषःऽभिः। अर्यमा। वृणक्तु। उरुम्। सुऽदासे। वृषणौ। ऊँ इति। लोकम्॥ ९॥

सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहन्ते।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः॥ १०॥
सस्वरिति। चित्। हि। सम्ऽऋतिः। त्वेषी। एषाम्। अपीच्येन। सहसा। सहन्ते।
युष्मत्। भिया। वृषणः। रेजमानाः। दक्षस्य। चित्। महिना। मृळत। नः॥ १०॥

यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु॥ ११॥
यः। ब्रह्मणे। सुऽमतिम्। आऽयजाते। वाजस्य। सातौ। परमस्य। रायः।
सीक्षन्त। मन्युम्। मघऽवानः। अर्यः। उरु। क्षयाय। चक्रिरे। सुऽधातु॥ ११॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः॥ १२॥ [२]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इयम्। देवा। पुरःऽहितिः। युवऽभ्याम्। यज्ञेषु। मित्रावरुणौ। अकारि।

विश्वानि। दुःऽगा। पिपृतम्। तिरः। नः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १२॥

[६२ (६१)] [७ मैत्रावरुणिर्वसिष्ठः। मित्रावरुणौ। त्रिष्टुप्।]

उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान्।

अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत॥ १॥

उत्। वाम्। चक्षुः। वरुणा। सुऽप्रतीकम्। देवयोः। एति। सूर्यः। ततन्वान्।

अभि। यः। विश्वा। भुवनानि। चष्टे। सः। मन्युम्। मर्त्येषु। आ। चिकेत॥ १॥

प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति।

यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे॥ २॥

प्र। वाम्। सः। मित्रावरुणौ। ऋतऽवा। विप्रः। मन्मानि। दीर्घऽश्रुत्। इयर्ति।

यस्य। ब्रह्माणि। सुक्रतू इति सुऽक्रतू। अवाथः। आ। यत्। क्रत्वा। न। शरदः। पृणैथे इति॥ २॥

प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानु।

स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा॥ ३॥

प्र। उरोः। मित्रावरुणा। पृथिव्याः। प्र। दिवः। ऋष्वात्। बृहतः। सुदानू इति सुऽदानू।

स्पशः। दधाथे इति। ओषधीषु। विक्षु। ऋधक्। यतः। अनिऽमिषम्। रक्षमाणा॥ ३॥

शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा।

अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते॥ ४॥

शंस। मित्रस्य। वरुणस्य। धाम। शुष्मः। रोदसी इति। बद्बधे। महिऽत्वा।

अयन्। मासाः। अयज्वनाम्। अवीराः। प्र। यज्ञऽमन्मा। वृजनम्। तिराते॥ ४॥

अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम्।

द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन्॥ ५॥

अमूरा। विश्वा। वृषणौ। इमाः। वाम्। न। यासु। चित्रम्। ददृशे। न। यक्षम्।

द्रुहः। सचन्ते। अनृता। जनानाम्। न। वाम्। निण्यानि। अचिते। अभूवन्॥ ५॥

समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः।

प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्। ॐ इति॑। वाम्। य॒ज्ञम्। म॒हय॑म्। नम॑ःऽभिः। हु॒वे। वा॒म्। मि॒त्रा॒व॒रु॒णा॒। स॒ऽबाध॑ः।

प्र। वा॒म्। मन्मा॑नि। ऋ॒चसे॑। नवा॑नि। कृ॒तानि॑। ब्रह्म॑। जु॒जु॒ष॒न्। इ॒मानि॑॥ ६॥

इ॒यं दे॑व पु॒रोहि॑तिर्यु॒वभ्यां॑ य॒ज्ञेषु॑ मित्रावरुणावकारि।

विश्वा॑नि दु॒र्गा पि॑पृतं ति॒रो नो॑ यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ ७॥ [३]

इ॒यम्। दे॒वा॒। पु॒रःऽहि॑तिः। यु॒वऽभ्या॑म्। य॒ज्ञेषु॑। मि॒त्रा॒व॒रु॒णौ॒। अ॒का॒रि॒।

विश्वा॑नि। दु॒ःऽगा। पि॒पृ॒त॒म्। ति॒रः। नः। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑ः। सदा॑। न॒ः॥ ७॥

[६३ (६२)] [६ मैत्रावरुणिर्वसिष्ठः। १-३ सूर्यः; ४-६ मित्रावरुणौ। त्रिष्टुप्।]

उत्सूर्यो॑ बृ॒हद॒र्चींष्य॑श्रेत्पु॒रु विश्वा॒ जनि॑म॒ मानु॑षाणाम्।

स॒मो दि॒वा द॑दृशे॒ रोच॑मान॒ः क्रत्वा॑ कृ॒तः सु॒कृ॑तः क॒र्तृभि॑र्भू॒त्॥ १॥

उत्। सूर्य॑ः। बृ॒हत्। अ॒र्चींषि॑। अ॒श्रे॒त्। पु॒रु। विश्वा॑। जनि॑म। मानु॑षाणाम्।

स॒मः। दि॒वा। द॒दृ॒शे॒। रोच॑मानः। क्रत्वा॑। कृ॒तः। सु॒ऽकृ॑तः। क॒र्तृऽभि॑ः। भू॒त्॥ १॥

स सूर्य॒ प्रति॑ पु॒रो न॒ उद्गा॑ ए॒भिः स्तोमे॑भिरेत॒शेभि॒रेवै॑ः।

प्र नो॑ मि॒त्राय॒ वरु॑णाय वो॒चोऽना॑गसो अर्य॒म्णे अ॒ग्नये॑ च॥ २॥

सः। सू॒र्य॒। प्रति॑। पु॒रः। न॒ः। उत्। गा॒ः। ए॒भिः। स्तोमे॑भिः। ए॒त॒शेभि॑ः। एवै॑ः।

प्र। न॒ः। मि॒त्राय॑। वरु॑णाय। वो॒च॒ः। अना॑गसः। अ॒र्य॒म्णे। अ॒ग्नये॑। च॒॥ २॥

वि न॑ः स॒हस्रं॑ शु॒रुधो॑ रदन्त्वृ॒ताावा॑नो॒ वरु॑णो मि॒त्रो अ॒ग्निः।

यच्छ॑न्तु च॒न्द्रा उ॑प॒मं नो॑ अ॒र्कमा न॒ः काम॑ं पूपुरन्तु॒ स्तवा॑नाः॥ ३॥

वि। न॒ः। स॒हस्र॑म्। शु॒रुध॑ः। र॒द॒न्तु॒। ऋ॒तऽवा॑नः। वरु॑णः। मि॒त्रः। अ॒ग्निः।

यच्छ॑न्तु। च॒न्द्राः। उ॒प॒ऽमम्। न॒ः। अ॒र्कम्। आ। न॒ः। काम॑म्। पू॒पु॒र॒न्तु॒। स्तवा॑नाः॥ ३॥

द्यावा॑भूमी अदिते॒ त्रासी॑थां नो॒ ये वां॑ ज॒ज्ञुः सु॒जनि॑मान ऋष्वे।

मा हेळे॑ भूम॒ वरु॑णस्य वा॒योर्मा मि॒त्रस्य॑ प्रि॒यत॑मस्य नृ॒णाम्॥ ४॥

द्यावा॑भूमी॒ इति॑। अ॒दि॒ते॒। त्रासी॑थाम्। न॒ः। ये। वा॒म्। ज॒ज्ञुः। सु॒ऽजनि॑मानः। ऋ॒ष्वे॒ इति॑।

मा। हेळे॑। भू॒म॒। वरु॑णस्य। वा॒योः। मा। मि॒त्रस्य॑। प्रि॒यऽत॑मस्य। नृ॒णाम्॥ ४॥

प्र बा॒हवा॑ सिसृतं जी॒वसे॑ न॒ आ नो॒ गव्यू॑तिमुक्षतं घृ॒तेन॑।

आ नो॒ जने॑ श्रवयतं युवाना श्रु॒तं मे॑ मित्रावरुणा॒ हवे॒मा॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । बाहवा । सिसृतम् । जीवसे । नः । आ । नः । गव्यूतिम् । उक्षतम् । घृतेन ।
आ । नः । जने । श्रवयतम् । युवाना । श्रुतम् । मे । मित्रावरुणा । हवा । इमा ॥ ५ ॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा। नः॥ ६॥ [४]
नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु ।
सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

[६४ (६३)] [६ मैत्रावरुणिर्वसिष्ठः। १-४ सूर्यः, ५-सूर्य-मित्रावरुणौः, ६ मित्रावरुणौ अर्यमा च। त्रिष्टुप्।]

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम्।
चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि॥ १॥
उत् । ऊँ इति । एति । सुऽभगः । विश्वऽचक्षाः । साधारणः । सूर्यः । मानुषाणाम् ।
चक्षुः । मित्रस्य । वरुणस्य । देवः । चर्मऽइव । यः । सम्ऽअविव्यक् । तमांसि ॥ १ ॥

उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य।
समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षु युक्तः॥ २॥
उत् । ऊँ इति । एति । प्रऽसविता । जनानाम् । महान् । केतुः । अर्णवः । सूर्यस्य ।
समानम् । चक्रम् । परिऽआविवृत्सन् । यत् । एतशः । वहति । धूःऽसु । युक्तः ॥ २ ॥

विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम॥ ३॥
विऽभ्राजमानः । उषसाम् । उपऽस्थात् । रेभैः । उत् । एति । अनुऽमद्यमानः ।
एषः । मे । देवः । सविता । चच्छन्द । यः । समानम् । न । प्रऽमिनाति । धाम ॥ ३ ॥

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि॥ ४॥
दिवः । रुक्मः । उरुऽचक्षाः । उत् । एति । दूरेऽअर्थः । तरणिः । भ्राजमानः ।
नूनम् । जनाः । सूर्येण । प्रऽसूताः । अयन् । अर्थानि । कृणवन् । अपांसि ॥ ४ ॥

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्र । चक्रुः । अमृताः । गातुम् । अस्मै । श्येनः । न । दीयन् । अनु । एति । पाथः ।

प्रति । वाम् । सूरे । उत्ऽइते । विधेम । नमःऽभिः । मित्रावरुणा । उत । हव्यैः ॥ ५ ॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।

सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ [५]

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु ।

सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

[६५ (६४)] [५ मैत्रावरुणिर्वसिष्ठः । मित्रावरुणौ । त्रिष्टुप् ।]

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।

हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥ १ ॥

दिवि । क्षयन्ता । रजसः । पृथिव्याम् । प्र । वाम् । घृतस्य । निःऽनिजः । ददीरन् ।

हव्यम् । नः । मित्रः । अर्यमा । सुऽजातः । राजा । सुऽक्षत्रः । वरुणः । जुषन्त ॥ १ ॥

आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।

इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ॥ २ ॥

आ । राजाना । महः । ऋतस्य । गोपा । सिन्धुपती इति सिन्धुऽपती । क्षत्रिया । यातम् । अर्वाक् ।

इळाम् । नः । मित्रावरुणा । उत । वृष्टिम् । अव । दिवः । इन्वतम् । जीरदानू इति जीरऽदानू ॥ २ ॥

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु ।

ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ॥ ३ ॥

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः । पथिऽभिः । नयन्तु ।

ब्रवत् । यथा । नः । आत् । अरिः । सुऽदासे । इषा । मदेम । सह । देवऽगोपाः ॥ ३ ॥

यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।

उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥ ४ ॥

यः । वाम् । गर्तम् । मनसा । तक्षत् । एतम् । ऊर्ध्वाम् । धीतिम् । कृणवत् । धारयत् । च ।

उक्षेथाम् । मित्रावरुणा । घृतेन । ता । राजाना । सुऽक्षितीः । तर्पयेथाम् ॥ ४ ॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।

अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ [६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एषः। स्तोमः। वरुण। मित्र। तुभ्यम्। सोमः। शुक्रः। न। वायवे। अयामि।

अविष्टम्। धियः। जिगृतम्। पुरम्ऽधीः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[६६ (६५)] [५ मैत्रावरुणिर्वसिष्ठः। मित्रावरुणौ। त्रिष्टुप्।]

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम्।

ययोरसुर्य१मक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु॥ १॥

प्रति। वाम्। सूरे। उत्ऽइते। सुऽउक्तैः। मित्रम्। हुवे। वरुणम्। पूतऽदक्षम्।

ययोः। असुर्यम्। अक्षितम्। ज्येष्ठम्। विश्वस्य। यामन्। आऽचिता। जिगत्नु॥ १॥

ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः।

अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च॥ २॥

ता। हि। देवानाम्। असुरा। तौ। अर्या। ता। नः। क्षितीः। करतम्। ऊर्जयन्तीः।

अश्याम। मित्रावरुणा। वयम्। वाम्। द्यावा। च। यत्र। पीपयन्। अहा। च॥ २॥

ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय।

ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम॥ ३॥

ता। भूरिऽपाशौ। अनृतस्य। सेतू इति। दुरत्येतू इति दुःऽअत्येतू। रिपवे। मर्त्याय।

ऋतस्य। मित्रावरुणा। पथा। वाम्। अपः। न। नावा। दुःऽइता। तरेम॥ ३॥

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः।

प्रति वामत्र वरमा जनाय पृणीतमुद्गो दिव्यस्य चारोः॥ ४॥

आ। नः। मित्रावरुणा। हव्यऽजुष्टिम्। घृतैः। गव्यूतिम्। उक्षतम्। इळाभिः।

प्रति। वाम्। अत्र। वरम्। आ। जनाय। पृणीतम्। उद्नः। दिव्यस्य। चारोः॥ ४॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि।

अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [७]

एषः। स्तोमः। वरुण। मित्र। तुभ्यम्। सोमः। शुक्रः। न। वायवे। अयामि।

अविष्टम्। धियः। जिगृतम्। पुरम्ऽधीः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६७ (६६)] [१९ मैत्रावरुणिर्वसिष्ठः। मित्रावरुणौ, ४-१३ आदित्याः, १४-१६ सूर्यः। गायत्री; १०-१५ प्रगाथः = (युजो बृहत्यः, अयुजः सतोबृहत्यः), १६ पुरउष्णिक्।]

प्र मि॒त्रयो॒र्वरु॑णयो॒ः स्तोमो॑ न एतु शू॒ष्य॑ः। नम॑स्वान्तुविजा॒तयो॑ः॥ १॥

प्र। मि॒त्रयो॑ः। वरु॑णयोः। स्तोम॑ः। न॒ः। ए॒तु। शू॒ष्य॑ः। नम॑स्वान्। तु॒वि॒ऽजा॒तयो॑ः॥ १॥

या धा॒रय॑न्त दे॒वाः सु॒दक्षा॒ दक्ष॑पितरा। अ॒सु॒र्या॑य॒ प्रम॑हसा॥ २॥

या। धा॒रय॑न्त। दे॒वाः। सु॒ऽदक्षा॑। दक्ष॑ऽपितरा। अ॒सु॒र्या॑य। प्रऽम॑हसा॥ २॥

ता न॑ः स्ति॒पा त॑नू॒पा वरु॑ण जरितॄ॒णाम्। मित्र॑ सा॒धय॑तं॒ धिय॑ः॥ ३॥

ता। न॒ः। स्ति॒ऽपा। त॒नू॒ऽपा। वरु॑ण। ज॒रि॒तॄ॒णाम्। मि॒त्र। सा॒धय॑तम्। धिय॑ः॥ ३॥

यद॒द्य सूर॒ उदि॑तेऽना॑गा मि॒त्रो अ॑र्य॒मा। सु॒वाति॑ सवि॒ता भग॑ः॥ ४॥

यत्। अ॒द्य। सूरे॑। उत्ऽइ॑ते। अना॑गाः। मि॒त्रः। अ॒र्य॒मा। सु॒वाति॑। स॒वि॒ता। भग॑ः॥ ४॥

सु॒प्रा॒वीर॑स्तु॒ स क्षय॒ः प्र नु याम॑न्त्सुदानवः। ये नो॒ अंहो॑ऽति॒पिप्र॑ति॥ ५॥ [८]

सु॒प्र॒ऽअ॒वीः। अ॒स्तु॒। सः। क्षय॑ः। प्र। नु। याम॑न्। सु॒ऽदा॒न॒व॒ः। ये। न॒ः। अंह॑ः। अ॒ति॒ऽपिप्र॑ति॥ ५॥

उ॒त स्व॒राजो॒ अदि॑ति॒रद॑ब्धस्य व्र॒तस्य॒ ये। म॒हो राजा॑न ईशते॥ ६॥

उ॒त। स्व॒ऽराज॑ः। अदि॑तिः। अद॑ब्धस्य। व्र॒तस्य॑। ये। म॒हः। राजा॑नः। ईश॒ते॒॥ ६॥

प्रति॑ वां॒ सूर॒ उदि॑ते मि॒त्रं गृ॑णीषे॒ वरु॑णम्। अ॒र्य॒मणं॑ रि॒शाद॑सम्॥ ७॥

प्रति॑। वा॒म्। सूरे॑। उत्ऽइ॑ते। मि॒त्रम्। गृ॒णी॒षे॒। वरु॑णम्। अ॒र्य॒मण॑म्। रि॒शाद॑सम्॥ ७॥

रा॒या हि॑रण्य॒या म॒तिरि॒यम॑वृ॒काय॒ शव॑से। इ॒यं विप्रा॑ मे॒धसा॑तये॥ ८॥

रा॒या। हि॒र॒ण्य॒ऽया। म॒तिः। इ॒यम्। अ॒वृ॒काय॑। शव॑से। इ॒यम्। विप्रा॑। मे॒धऽसा॑तये॥ ८॥

ते स्या॑म देव वरुण॒ ते मि॑त्र सू॒रिभि॑ः स॒ह। इषं॒ स्व॑श्च धीमहि॥ ९॥

ते। स्या॒म॒। दे॒व॒। व॒रु॒ण॒। ते। मि॒त्र॒। सू॒रिऽभि॑ः। स॒ह। इष॑म्। स्व१॒॑रिति॑ स्व॑ः। च॒। धी॒म॒हि॒॥ ९॥

ब॒हव॒ः सूर॑चक्षसोऽग्निजि॒ह्वा ऋ॑ता॒वृध॑ः। [९]

त्रीणि॒ ये ये॒मुर्वि॒दथा॑नि धी॒तिभि॒र्विश्वा॑नि॒ परि॑भूतिभिः॥ १०॥

ब॒हव॑ः। सूर॑ऽचक्षसः। अ॒ग्नि॒ऽजि॒ह्वाः। ऋ॒त॒ऽवृध॑ः।

त्रीणि॑। ये। ये॒मुः। वि॒दथा॑नि। धी॒तिऽभि॑ः। विश्वा॑नि। परि॑भूतिऽभिः॥ १०॥

वि ये द॒धुः श॒रदं॒ मास॒मादह॑र्य॒ज्ञम॒क्तुं चादृच॑म्।

अ॒नाप्यं॒ वरु॑णो मि॒त्रो अ॑र्य॒मा क्ष॒त्रं राजा॑न आशत॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि। ये। दुधुः। शुरदम्। मासम्। आत्। अहः। युज्ञम्। अक्तुम्। च। आत्। ऋचम्।
अनाप्यम्। वरुणः। मित्रः। अर्यमा। क्षत्रम्। राजानः। आशत॥ ११॥

तद्वो अद्य मनामहे सूक्तैः सूर उदिते। यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः॥ १२॥

तत्। वः। अद्य। मनामहे। सुऽउक्तैः। सूरे। उत्ऽइते।
यत्। ओहते। वरुणः। मित्रः। अर्यमा। यूयम्। ऋतस्य। रथ्यः॥ १२॥

ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः।
तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः॥ १३॥

ऋतऽवानः। ऋतऽजाताः। ऋतऽवृधः। घोरासः। अनृतऽद्विषः।
तेषाम्। वः। सुम्ने। सुच्छर्दिःऽतमे। नरः। स्याम। ये। च। सूरयः॥ १३॥

उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे। यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम्॥ १४॥

उत्। ऊँ इति। त्यत्। दर्शतम्। वपुः। दिवः। एति। प्रतिऽह्वरे।
यत्। ईम्। आशुः। वहति। देवः। एतशः। विश्वस्मै। चक्षसे। अरम्॥ १४॥

शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे॥ १५॥ [१०]

शीर्ष्णःऽशीर्ष्णः। जगतः। तस्थुषः। पतिम्। समया। विश्वम्। आ। रजः।
सप्त। स्वसारः। सुविताय। सूर्यम्। वहन्ति। हरितः। रथे॥ १५॥

तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतम्॥ १६॥

तत्। चक्षुः। देवऽहितम्। शुक्रम्। उत्ऽचरत्॥
पश्येम। शरदः। शतम्। जीवेम। शरदः। शतम्॥ १६॥

काव्येभिरदाभ्या यातं वरुण द्युमत्। मित्रश्च सोमपीतये॥ १७॥

काव्येभिः। अदाभ्या। आ। यातम्। वरुण। द्युऽमत्। मित्रः। च। सोमऽपीतये॥ १७॥

दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा। पिबतं सोममातुजी॥ १८॥

दिवः। धामऽभिः। वरुण। मित्रः। च। आ। यातम्। अद्रुहा।
पिबतम्। सोमम्। आतुजी इत्याऽतुजी॥ १८॥

आ यातं मित्रावरुणा जुषाणावाहुतिं नरा। पातं सोममृतावृधा॥ १९॥ [११]

आ। यातम्। मित्रावरुणा। जुषाणौ। आऽहुतिम्। नरा। पातम्। सोमम्। ऋतऽवृधा॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६८ (६७)] [१० मैत्रावरुणिर्वसिष्ठः। अश्विनौ। त्रिष्टुप्।]

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन।
यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा विवक्मि॥ १॥

प्रति। वाम्। रथम्। नृपती इति नृपती। जरध्यै। हविष्मता। मनसा। यज्ञियेन।
यः। वाम्। दूतः। न। धिष्ण्यौ। अजीगः। अच्छ। सूनुः। न। पितरा। विवक्मि॥ १॥

अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन्तमसश्चिदन्ताः।
अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः॥ २॥

अशोचि। अग्निः। सम्ऽइधानः। अस्मे इति। उपो इति। अदृश्रन्। तमसः। चित्। अन्ताः।
अचेति। केतुः। उषसः। पुरस्तात्। श्रिये। दिवः। दुहितुः। जायमानः॥ २॥

अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान्।
पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन॥ ३॥

अभि। वाम्। नूनम्। अश्विना। सुऽहोता। स्तोमैः। सिसक्ति। नासत्या। विवक्वान्।
पूर्वीभिः। यातम्। पथ्याभिः। अर्वाक्। स्वःऽविदा। वसुऽमता। रथेन॥ ३॥

अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः।
आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि॥ ४॥

अवोः। वाम्। नूनम्। अश्विना। युवाकुः। हुवे। यत्। वाम्। सुते। माध्वी इति। वसुऽयुः।
आ। वाम्। वहन्तु। स्थविरासः। अश्वाः। पिबाथः। अस्मे इति। सुऽसुता। मधूनि॥ ४॥

प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम्।
विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः॥ ५॥ [१२]

प्राचीम्। ऊँ इति। देवा। अश्विना। धियम्। मे। अमृध्राम्। सातये। कृतम्। वसुऽयुम्॥ विश्वाः।
अविष्टम्। वाजे। आ। पुरम्ऽधीः। ता। नः। शक्तम्। शचीपती इति शचीऽपती। शचीभि॥ ५॥

अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम॥ ६॥

अविष्टम्। धीषु। अश्विना। नः। आसु। प्रजाऽवत्। रेतः। अह्रयम्। नः। अस्तु।
आ। वाम्। तोके। तनये। तूतुजानाः। सुऽरत्नासः। देवऽवीतिम्। गमेम॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे।

अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु॥ ७॥

एषः। स्यः। वाम्। पूर्वगत्वाऽइव। सख्ये। निऽधिः। हितः। माध्वी इति। रातः। अस्मे इति।

अहेळता। मनसा। आ। यातम्। अर्वाक्। अश्नन्ता। हव्यम्। मानुषीषु। विक्षु॥ ७॥

एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात्।

न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति॥ ८॥

एकस्मिन्। योगे। भुरणा। समाने। परि। वाम्। सप्त। स्रवतः। रथः। गात्।

न। वायन्ति। सुऽभ्वः। देवऽयुक्ताः। ये। वाम्। धूःऽसु। तरणयः। वहन्ति॥ ८॥

असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति।

प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि॥ ९॥

असश्चता। मघवत्ऽभ्यः। हि। भूतम्। ये। राया। मघऽदेयम्। जुनन्ति।

प्र। ये। बन्धुम्। सूनृताभिः। तिरन्ते। गव्या। पृञ्चन्तः। अश्व्या। मघानि॥ ९॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्।

धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः॥ १०॥ [१३]

नु। मे। हवम्। आ। शृणुतम्। युवाना। यासिष्टम्। वर्तिः। अश्विनौ। इराऽवत्।

धत्तम्। रत्नानि। जरतम्। च। सूरीन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १०॥

[६९ (६८)] [९ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। विराट्; ८-९ त्रिष्टुभौ।]

आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः।

हव्यानि च प्रतिभृता वीतं नः॥ १॥

आ। शुभ्रा। यातम्। अश्विना। सुऽअश्वा। गिरः। दस्रा। जुजुषाणा। युवाकोः।

हव्यानि। च। प्रतिऽभृता। वीतम्। नः॥ १॥

प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे। तिरो अर्यो हवनानि श्रुतं नः॥ २॥

प्र। वाम्। अन्धांसि। मद्यानि। अस्थुः। अरम्। गन्तम्। हविषः। वीतये। मे।

तिरः। अर्यः। हवनानि। श्रुतम्। नः॥ २॥

प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः। अस्मभ्यं सूर्यावसू इयानः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र। वाम्। रथः। मनः२जवाः। इयर्ति। तिरः। रजांसि। अश्विना। शतऊतिः।
अस्मभ्यम्। सूर्यावसू इति। इयानः॥ ३॥

अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्याम्। आ वल्गू विप्रो ववृतीत हव्यैः॥ ४॥

अयम्। ह। यत्। वाम्। देवऽयाः। ऊँ इति। अद्रिः। ऊर्ध्वः। विवक्ति। सोमऽसुत्। युवऽभ्याम्।
आ। वल्गू इति। विप्रः। ववृतीत। हव्यैः॥ ४॥

चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम्। यो वामोमानं दधते प्रियः सन्॥ ५॥

चित्रम्। ह। यत्। वाम्। भोजनम्। नु। अस्ति। नि। अत्रये। महिष्वन्तम्। युयोतम्। [१४]
यः। वाम्। ओमानम्। दधते। प्रियः। सन्॥ ५॥

उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे। अधि यद्वर्प इतऊति धत्थः॥ ६॥

उत। त्यत्। वाम्। जुरते। अश्विना। भूत्। च्यवानाय। प्रतीत्यम्। हविः२दे।
अधि। यत्। वर्पः। इतः२ऊति। धत्थः॥ ६॥

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे। निरीं पर्षदरावा यो युवाकुः॥ ७॥

उत। त्यम्। भुज्युम्। अश्विना। सखायः। मध्ये। जहुः। दुः२एवासः। समुद्रे।
निः। ईम्। पर्षत्। अरावा। यः। युवाकुः॥ ७॥

वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना।
यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः॥ ८॥

वृकाय। चित्। जसमानाय। शक्तम्। उत। श्रुतम्। शयवे। हूयमाना।
यौ। अघ्न्याम्। अपिन्वतम्। अपः। न। स्तर्यम्। चित्। शक्ती। अश्विना। शचीभिः॥ ८॥

एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा।
इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः॥ ९॥ [१५]

एषः। स्यः। कारुः। जरते। सुऽउक्तैः। अग्रे। बुधानः। उषसाम्। सुऽमन्मा।
एषा। तम्। वर्धत्। अघ्न्या। पयः२भिः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ९॥

[७० (६९)] [८ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। त्रिष्टुप्।]

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। वाम्। रथः। रोदसी इति। बद्बधानः। हिरण्ययः। वृषऽभिः। यातु। अश्वैः।
घृतऽवर्तनिः। पविऽभिः। रुचानः। इषाम्। वोळ्हा। नृऽपतिः। वाजिनीऽवान्॥ १॥

स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद्याममश्विना दधाना॥ २॥

सः। पप्रथानः। अभि। पञ्च। भूम। त्रिऽवन्धुरः। मनसा। आ। यातु। युक्तः।
विशः। येन। गच्छथः। देवऽयन्तीः। कुत्र। चित्। यामम्। अश्विना। दधाना॥ २॥

स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः।
वि वां रथो वध्वा३ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम्॥ ३॥

सुऽअश्वा। यशसा। आ। यातम्। अर्वाक्। दस्रा। निऽधिम्। मधुऽमन्तम्। पिबाथः।
वि। वाम्। रथः। वध्वा। यादमानः। अन्तान्। दिवः। बाधते। वर्तनिऽभ्याम्॥ ३॥

युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम्।
यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात्॥ ४॥

युवोः। श्रियम्। परि। योषा। अवृणीत। सूरः। दुहिता। परिऽतक्म्यायाम्।
यत्। देवऽयन्तम्। अवथः। शचीभिः। परि। घ्रंसम्। ओमना। वाम्। वयः। गात्॥ ४॥

यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः।
तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन्॥ ५॥

यः। ह। स्यः। वाम्। रथिरा। वस्ते। उस्राः। रथः। युजानः। परिऽयाति। वर्तिः।
तेन। नः। शम्। योः। उषसः। विऽउष्टौ। नि। अश्विना। वहतम्। यज्ञे। अस्मिन्॥ ५॥

नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातम्।
पुरुत्रा हि वां मतिभिर्हवन्ते मा वामन्ये नि यमन्देवयन्तः॥ ६॥

नरा। गौराऽइव। विऽद्युतम्। तृषाणा। अस्माकम्। अद्य। सवना। उप। यातम्।
पुरुऽत्रा। हि। वाम्। मतिऽभिः। हवन्ते। मा। वाम्। अन्ये। नि। यमन्। देवऽयन्तः॥ ६॥

युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः।
पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता॥ ७॥

युवम्। भुज्युम्। अवऽविद्धम्। समुद्रे। उत्। ऊहथुः। अर्णसः। अस्रिधानैः।
पतत्रिऽभिः। अश्रमैः। अव्यथिऽभिः। दंसनाभिः। अश्विना। पारयन्ता॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्।

धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः॥ ८॥ [१६]

नु। मे। हवम्। आ। शृणुतम्। युवाना। यासिष्टम्। वर्तिः। अश्विनौ। इराऽवत्।

धत्तम्। रत्नानि। जरतम्। च। सूरीन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥

[७१ (७०)] [७ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। त्रिष्टुप्।]

आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्याम्।

अश्वो न वाजी शुनपृष्ठो अस्थादा यत्सेदथुर्ध्रुवसे न योनिम्॥ १॥

आ। विश्वऽवारा। अश्विना। गतम्। नः। प्र। तत्। स्थानम्। अवाचि। वाम्। पृथिव्याम्।

अश्वः। न। वाजी। शुनऽपृष्ठः। अस्थात्। आ। यत्। सेदथुः। ध्रुवसे। न। योनिम्॥ १॥

सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे।

यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः॥ २॥

सिसक्ति। सा। वाम्। सुऽमतिः। चनिष्ठा। अतापि। घर्मः। मनुषः। दुरोणे।

यः। वाम्। समुद्रान्। सरितः। पिपर्ति। एतऽग्वा। चित्। न। सुऽयुजा। युजानः॥ २॥

यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु।

नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता॥ ३॥

यानि। स्थानानि। अश्विना। दधाथे इति। दिवः। यह्वीषु। ओषधीषु। विक्षु।

नि। पर्वतस्य। मूर्धनि। सदन्ता। इषम्। जनाय। दाशुषे। वहन्ता॥ ३॥

चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम्।

पुरूणि रत्ना दधतौ न्य१स्मे अनु पूर्वाणि चख्यथुर्युगानि॥ ४॥

चनिष्टम्। देवौ। ओषधीषु। अप्ऽसु। यत्। योग्याः। अश्नवैथे इति। ऋषीणाम्।

पुरूणि। रत्ना। दधतौ। नि। अस्मे इति। अनु। पूर्वाणि। चख्यथुः। युगानि॥ ४॥

शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम्।

प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा॥ ५॥

शुश्रुऽवांसा। चित्। अश्विना। पुरूणि। अभि। ब्रह्माणि। चक्षाथे इति। ऋषीणाम्।

प्रति। प्र। यातम्। वरम्। आ। जनाय। अस्मे इति। वाम्। अस्तु। सुऽमतिः। चनिष्ठा॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समर्यो३ भवाति।

उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम्॥ ६ ॥

यः। वाम्। यज्ञः। नासत्या। हविष्मान्। कृत॰ब्रह्मा। स॰मर्यः। भवाति।

उप। प्र। यातम्। वरम्। आ। वसिष्ठम्। इमा। ब्रह्माणि। ऋच्यन्ते। युव॰भ्याम्॥ ६ ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम्।

इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [१७] {४}

इयम्। मनीषा। इयम्। अश्विना। गीः। इमाम्। सु॰वृक्तिम्। वृषणा। जुषेथाम्।

इमा। ब्रह्माणि। युव॰यूनि। अग्मन्। यूयम्। पात। स्वस्ति॰भिः। सदा। नः॥ ७॥

[७२ (७१)] [६ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। त्रिष्टुप्।]

अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम्।

अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतम्॥ १ ॥

अप। स्वसुः। उषसः। नक्। जिहीते। रिणक्ति। कृष्णीः। अरुषाय। पन्थाम्।

अश्व॰मघा। गो॰मघा। वाम्। हुवेम। दिवा। नक्तम्। शरुम्। अस्मत्। युयोतम्॥ १ ॥

उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता।

युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः॥ २॥

उप॰आयातम्। दाशुषे। मर्त्याय। रथेन। वामम्। अश्विना। वहन्ता।

युयुतम्। अस्मत्। अनिराम्। अमीवाम्। दिवा। नक्तम्। माध्वी इति। त्रासीथाम्। नः॥ २॥

आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु।

स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम्॥ ३॥

आ। वाम्। रथम्। अवमस्याम्। वि॰उष्टौ। सुम्न॰यवः। वृषणः। वर्तयन्तु।

स्यूम॰गभस्तिम्। ऋतयुक्॰भिः। अश्वैः। आ। अश्विना। वसु॰मन्तम्। वहेथाम्॥ ३॥

यो वां रथो नपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उस्रयामा।

आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति॥ ४॥

यः। वाम्। रथः। नृपती इति नृ॰पती। अस्ति। वोळ्हा। त्रि॰वन्धुरः। वसु॰मान्। उस्र॰यामा।

आ। नः। एना। नासत्या। उप। यातम्। अभि। यत्। वाम्। विश्व॰प्स्न्यः। जिगाति॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युवं च्यवानं जरसोऽमुमुक्तं नि पेदवं ऊहथुराशुमश्वम्।
निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः॥ ५॥
युवम्। च्यवानम्। जरसः। अमुमुक्तम्। नि। पेदवे। ऊहथुः। आशुम्। अश्वम्।
निः। अंहसः। तमसः। स्पर्तम्। अत्रिम्। नि। जाहुषम्। शिथिरे। धातम्। अन्तरिति॥ ५॥
इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम्।
इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [१८]
इयम्। मनीषा। इयम्। अश्विना। गीः। इमाम्। सुऽवृक्तिम्। वृषणा। जुषेथाम्।
इमा। ब्रह्माणि। युवऽयूनि। अग्मन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[७३ (७२)] [५ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। त्रिष्टुप्।]

आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम्।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना॥ १॥
आ। गोऽमता। नासत्या। रथेन। अश्वऽवता। पुरुऽचन्द्रेण। यातम्।
अभि। वाम्। विश्वाः। निऽयुतः। सचन्ते। स्पार्हया। श्रिया। तन्वा। शुभाना॥ १॥
आ नो देवेभिरुप यातमर्वाक्सजोषसा नासत्या रथेन।
युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम्॥ २॥
आ। नः। देवेभिः। उप। यातम्। अर्वाक्। सऽजोषसा। नासत्या। रथेन।
युवोः। हि। नः। सख्या। पित्र्याणि। समानः। बन्धुः। उत। तस्य। वित्तम्॥ २॥
उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः।
आविवासन्रोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति॥ ३॥
उत्। ऊँ इति। स्तोमासः। अश्विनोः। अबुध्रन्। जामि। ब्रह्माणि। उषसः। च। देवीः।
आऽविवासन्। रोदसी इति। धिष्ण्ये इति। इमे इति। अच्छ। विप्रः। नासत्या। विवक्ति॥ ३॥
वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते।
ऊर्ध्वं भानुं सविता देवो अश्रेद्बृहदग्नयः समिधा जरन्ते॥ ४॥
वि। च। इत्। उच्छन्ति। अश्विनौ। उषसः। प्र। वाम्। ब्रह्माणि। कारवः। भरन्ते।
ऊर्ध्वम्। भानुम्। सविता। देवः। अश्रेत्। बृहत्। अग्नयः। सम्ऽइधा। जरन्ते॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात्।

आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [१९]

आ। पश्चातात्। नासत्या। आ। पुरस्तात्। आ। अश्विना। यातम्। अधरात्। उदक्तात्।

आ। विश्वतः। पाञ्चऽजन्येन। राया। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[७४ (७३)] [५ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। त्रिष्टुप्।]

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः।

पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः॥ १॥

अतारिष्म। तमसः। पारम्। अस्य। प्रति। स्तोमम्। देवऽयन्तः। दधानाः।

पुरुऽदंसा। पुरुऽतमा। पुराऽजा। अमर्त्या। हवते। अश्विना। गीः॥ १॥

न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च।

अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान्॥ २॥

नि। ऊँ इति। प्रियः। मनुषः। सादि। होता। नासत्या। यः। यजते। वन्दते। च।

अश्नीतम्। मध्वः। अश्विनौ। उपाके। आ। वाम्। वोचे। विदथेषु। प्रयस्वान्॥ २॥

अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम्।

श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः॥ ३॥

अहेम। यज्ञम्। पथाम्। उराणाः। इमाम्। सुऽवृक्तिम्। वृषणा। जुषेथाम्।

श्रुष्टीवाऽइव। प्रऽइषितः। वाम्। अबोधि। प्रति। स्तोमैः। जरमाणः। वसिष्ठः॥ ३॥

उप त्या वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी।

समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन॥ ४॥

उप। त्या। वह्नी इति। गमतः। विशम्। नः। रक्षःऽहना। सम्ऽभृता। वीळुपाणी इति वीळुऽपाणी।

सम्। अन्धांसि। अग्मत। मत्सराणि। मा। नः। मर्धिष्टम्। आ। गतम्। शिवेन॥ ४॥

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात्।

आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [२०]

आ। पश्चातात्। नासत्या। आ। पुरस्तात्। आ। अश्विना। यातम्। अधरात्। उदक्तात्।

आ। विश्वतः। पाञ्चऽजन्येन। राया। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७५ (७४)] [६ मैत्रावरुणिर्वसिष्ठः। अश्विनौ। प्रगाथः=(अयुजो बृहत्यः, युजः सतोबृहत्य)]

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना।

अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः॥ १॥

इमाः। ऊँ इति। वाम्। दिविष्टयः। उस्रा। हवन्ते। अश्विना।

अयम्। वाम्। अह्वे। अवसे। शचीवसू इति शचीऽवसू। विशम्ऽविशम्। हि। गच्छथः॥ १॥

युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते।

अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु॥ २॥

युवम्। चित्रम्। ददथुः। भोजनम्। नरा। चोदेथाम्। सूनृताऽवते।

अर्वाक्। रथम्। सऽमनसा। नि। यच्छतम्। पिबतम्। सोम्यम्। मधु॥ २॥

आ यातमुप भूषतं मध्वः पिबतमश्विना।

दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम्॥ ३॥

आ। यातम्। उप। भूषतम्। मध्वः। पिबतम्। अश्विना।

दुग्धम्। पयः। वृषणा। जेन्यावसू इति। मा। नः। मर्धिष्टम्। आ। गतम्॥ ३॥

अश्वासो ये वामुप दाशुषो युवां दीयन्ति बिभ्रतः।

मक्षूयुभिर्नरा हयेभिरश्विना देवा यातमस्मयू॥ ४॥

अश्वासः। ये। वाम्। उप। दाशुषः। गृहम्। युवाम्। दीयन्ति। बिभ्रतः।

मक्षुयुऽभिः। नरा। हयेभिः। अश्विना। आ। देवा। यातम्। अस्मयू इत्यस्मऽयू॥ ४॥

अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः।

ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या॥ ५॥

अध। ह। यन्तः। अश्विना। पृक्षः। सचन्त। सूरयः।

ता। यंसतः। मघवत्ऽभ्यः। ध्रुवम्। यशः। छर्दिः। अस्मभ्यम्। नासत्या॥ ५॥

प्र ये ययुरवृकासो रथाइव नृपातारो जनानाम्।

उत स्वेन शवसा शूशुवुर्नर उत क्षियन्ति सुक्षितिम्॥ ६॥ [२१]

प्र। ये। ययुः। अवृकासः। रथाःऽइव। नृऽपातारः। जनानाम्।

उत। स्वेन। शवसा। शूशुवुः। नरः। उत। क्षियन्ति। सुऽक्षितिम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७६ (७५)] [८ मैत्रावरुणिर्वसिष्ठः। उषसः। त्रिष्टुप्।]

व्यु१षसा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानमागात्।
अप द्रुहस्तम आवरजुष्टमङ्गिरस्तमा पथ्या अजीगः॥ १॥

वि। उषाः। आवः। दिविऽजाः। ऋतेन। आविःऽकृण्वाना। महिमानम्। आ। अगात्।
अप। द्रुहः। तमः। आवः। अजुष्टम्। अङ्गिरःऽतमा। पथ्याः। अजीगरिति॥ १॥

महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम्॥ २॥

महे। नः। अद्य। सुविताय। बोधि। उषः। महे। सौभगाय। प्र। यन्धि।
चित्रम्। रयिम्। यशसम्। धेहि। अस्मे इति। देवि। मर्तेषु। मानुषि। श्रवस्युम्॥ २॥

एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः।
जनयन्तो दैव्यानि व्रतान्यापृणन्तो अन्तरिक्षा व्यस्थुः॥ ३॥

एते। त्ये। भानवः। दर्शतायाः। चित्राः। उषसः। अमृतासः। आ। अगुः।
जनयन्तः। दैव्यानि। व्रतानि। आऽपृणन्तः। अन्तरिक्षा। वि। अस्थुः॥ ३॥

एषा स्या युजाना पराकात्पञ्च क्षितीः परि सद्यो जिगाति।
अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी॥ ४॥

एषा। स्या। युजाना। पराकात्। पञ्च। क्षितीः। परि। सद्यः। जिगाति।
अभिऽपश्यन्ती। वयुना। जनानाम्। दिवः। दुहिता। भुवनस्य। पत्नी॥ ४॥

वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम्।
ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना॥ ५॥

वाजिनीऽवती। सूर्यस्य। योषा। चित्रऽमघा। रायः। ईशे। वसूनाम्।
ऋषिऽस्तुता। जरयन्ती। मघोनी। उषाः। उच्छति। वह्निऽभिः। गृणाना॥ ५॥

प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय॥ ६॥

प्रति। द्युतानाम्। अरुषासः। अश्वाः। चित्राः। अदृश्रन्। उषसम्। वहन्तः।
याति। शुभ्रा। विश्वऽपिशा। रथेन। दधाति। रत्नम्। विधते। जनाय॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः।

रुजद्दृळ्हानि दददुस्त्रियाणां प्रति गाव उषसं वावशन्त॥ ७॥

सत्या। सत्येभिः। महती। महत्ऽभिः। देवी। देवेभिः। यजता। यजत्रैः।

रुजत्। दृळ्हानि। ददत्। उस्त्रियाणाम्। प्रति। गावः। उषसम्। वावशन्त॥ ७॥

नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे।

मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्वस्तिभिः सदा नः॥ ८॥

नु। नः। गोऽमत्। वीरऽवत्। धेहि। रत्नम्। उषः। अश्वऽवत्। पुरुऽभोजः। अस्मे इति।

मा। नः। बर्हिः। पुरुषता। निदे। कः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥ [२२]

[७७ (७६)] [७ मैत्रावरुणिर्वसिष्ठः। उषसः। त्रिष्टुप्।]

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्।

क्रत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः॥ १॥

उत्। ऊँ इति। ज्योतिः। अमृतम्। विश्वऽजन्यम्। विश्वानरः। सविता। देवः। अश्रेत्।

क्रत्वा। देवानाम्। अजनिष्ट। चक्षुः। आविः। अकः। भुवनम्। विश्वम्। उषाः॥ १॥

प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः।

अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागादधि हर्म्येभ्यः॥ २॥

प्र। मे। पन्थाः। देवऽयानाः। अदृश्रन्। अमर्धन्तः। वसुऽभिः। इष्कृतासः।

अभूत्। ऊँ इति। केतुः। उषसः। पुरस्तात्। प्रतीची। आ। अगात्। अधि। हर्म्येभ्यः॥ २॥

तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य।

यतः परि जारइवाचरन्त्युषो ददृक्षे न पुनर्यतीव॥ ३॥

तानि। इत्। अहानि। बहुलानि। आसन्। आ। प्राचीनम्। उत्ऽइता। सूर्यस्य।

यतः। परि। जारःऽइव। आऽचरन्ती। उषः। ददृक्षे। न। पुनः। यतीऽइव॥ ३॥

त इद्देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः।

गूळ्हं ज्योतिः पितरो अन्वविन्दन्त्सत्यमन्त्रा अजनयन्नुषासम्॥ ४॥

ते। इत्। देवानाम्। सधऽमादः। आसन्। ऋतऽवानः। कवयः। पूर्व्यासः।

गूळ्हम्। ज्योतिः। पितरः। अनु। अविन्दन्। सत्यऽमन्त्राः। अजनयन्। उषसम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समान ऊर्वे अधि संगतासः सं जानते न यतन्ते मिथस्ते।

ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुभिर्यादमानाः॥ ५॥

समाने। ऊर्वे। अधि। सम्ऽगतासः। सम्। जानते। न। यतन्ते। मिथः। ते।

ते। देवानाम्। न। मिनन्ति। व्रतानि। अमर्धन्तः। वसुऽभिः। यादमानाः॥ ५॥

प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः।

गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व॥ ६॥

प्रति। त्वा। स्तोमैः। ईळते। वसिष्ठाः। उषःऽबुधः। सुऽभगे। तुस्तुऽवांसः।

गवाम्। नेत्री। वाजऽपत्नी। नः। उच्छ। उषः। सुऽजाते। प्रथमा। जरस्व॥ ६॥

एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः।

दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [२३]

एषा। नेत्री। राधसः। सूनृतानाम्। उषाः। उच्छन्ती। रिभ्यते। वसिष्ठैः।

दीर्घऽश्रुतम्। रयिम्। अस्मे इति। दधाना। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[७८ (७७)] [६ मैत्रावरुणिर्वसिष्ठः। उषसः। त्रिष्टुप्।]

उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै।

अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि॥ १॥

उपो इति। रुरुचे। युवतिः। न। योषा। विश्वम्। जीवम्। प्रऽसुवन्ती। चरायै।

अभूत्। अग्निः। सम्ऽइधे। मानुषाणाम्। अकः। ज्योतिः। बाधमाना। तमांसि॥ १॥

विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत्।

हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि॥ २॥

विश्वम्। प्रतीची। सऽप्रथाः। उत्। अस्थात्। रुशत्। वासः। बिभ्रती। शुक्रम्। अश्वैत्।

हिरण्यऽवर्णा। सुदृशीकऽसंदृक्। गवाम्। माता। नेत्री। अह्नाम्। अरोचि॥ २॥

देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम्।

उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता॥ ३॥

देवानाम्। चक्षुः। सुऽभगा। वहन्ती। श्वेतम्। नयन्ती। सुऽदृशीकम्। अश्वम्।

उषाः। अदर्शि। रश्मिऽभिः। विऽअक्ता। चित्रऽमघा। विश्वम्। अनु। प्रऽभूता॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः।

यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि॥ ४॥

अन्तिऽवामा। दूरे। अमित्रम्। उच्छ। उर्वीम्। गव्यूतिम्। अभयम्। कृधि। नः।

यवय। द्वेषः। आ। भर। वसूनि। चोदय। राधः। गृणते। मघोनि॥ ४॥

अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः।

इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः॥ ५॥

अस्मे इति। श्रेष्ठेभिः। भानुऽभिः। वि। भाहि। उषः। देवि। प्रऽतिरन्ती। नः। आयुः।

इषम्। च। नः। दधती। विश्वऽवारे। गोऽमत्। अश्वऽवत्। रथऽवत्। च। राधः॥ ५॥

यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः।

सास्मासु धा रयिमृष्वं बृहन्तं यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [२४]

याम्। त्वा। दिवः। दुहितः। वर्धयन्ति। उषः। सुऽजाते। मतिऽभिः। वसिष्ठाः।

सा। अस्मासु। धाः। रयिम्। ऋष्वम्। बृहन्तम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[७९ (७८)] [५ मैत्रावरुणिर्वसिष्ठः। उषसः। त्रिष्टुप्।]

प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते।

उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि॥ १॥

प्रति। केतवः। प्रथमाः। अदृश्रन्। ऊर्ध्वाः। अस्याः। अञ्जयः। वि। श्रयन्ते।

उषः। अर्वाचा। बृहता। रथेन। ज्योतिष्मता। वामम्। अस्मभ्यम्। वक्षि॥ १॥

प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः।

उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी॥ २॥

प्रति। सीम्। अग्निः। जरते। सम्ऽइद्धः। प्रति। विप्रासः। मतिऽभिः। गृणन्तः।

उषाः। याति। ज्योतिषा। बाधमाना। विश्वा। तमांसि। दुःऽइता। अप। देवी॥ २॥

एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छन्तीरुषसो विभातीः।

अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम्॥ ३॥

एताः। ऊँ इति। त्याः। प्रति। अदृश्रन्। पुरस्तात्। ज्योतिः। यच्छन्तीः। उषसः। विऽभातीः।

अजीजनन्। सूर्यम्। यज्ञम्। अग्निम्। अपाचीनम्। तमः। अगात्। अजुष्टम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं विभातीम्।

आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति॥ ४॥

अचेति। दिवः। दुहिता। मघोनी। विश्वे। पश्यन्ति। उषसम्। विऽभातीम्।

आ। अस्थात्। रथम्। स्वधया। युज्यमानम्। आ। यम्। अश्वासः। सुऽयुजः। वहन्ति॥ ४॥

प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च।

तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [२५]

प्रति। त्वा। अद्य। सुऽमनसः। बुधन्त। अस्माकासः। मघऽवानः। वयम्। च।

तिल्विलायध्वम्। उषसः। विऽभातीः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[८० (७९)] [५ मैत्रावरुणिर्वसिष्ठः। उषसः। त्रिष्टुप्।]

व्युषा आवः पथ्या३ जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती।

सुसंदृग्भिरुक्षभिर्भानुमश्रेद्वि सूर्यो रोदसी चक्षसावः॥ १॥

वि। उषाः। आवः। पथ्या। जनानाम्। पञ्च। क्षितीः। मानुषीः। बोधयन्ती।

सुसंदृक्ऽभिः। उक्षऽभिः। भानुम्। अश्रेत्। वि। सूर्यः। रोदसी इति। चक्षसा। आवरित्यावः॥ १॥

व्यञ्जते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते।

सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू॥ २॥

वि। अञ्जते। दिवः। अन्तेषु। अक्तून्। विशः। न। युक्ताः। उषसः। यतन्ते।

सम्। ते। गावः। तमः। आ। वर्तयन्ति। ज्योतिः। यच्छन्ति। सविताऽइव। बाहू इति॥ २॥

अभूदुषा इन्द्रतमा मघोन्यजीजनत्सुविताय श्रवांसि।

वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि॥ ३॥

अभूत्। उषाः। इन्द्रऽतमा। मघोनी। अजीजनत्। सुविताय। श्रवांसि।

वि। दिवः। देवी। दुहिता। दधाति। अङ्गिरःऽतमा। सुऽकृते। वसूनि॥ ३॥

तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना।

यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः॥ ४॥

तावत्। उषः। राधः। अस्मभ्यम्। रास्व। यावत्। स्तोतृऽभ्यः। अरदः। गृणाना।

याम्। त्वा। जज्ञुः। वृषभस्य। रवेण। वि। दृळ्हस्य। दुरः। अद्रेः। और्णोः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवंदेवं राधसे चोदयन्त्यस्मद्र्यक्सूनृता ईरयन्ती।

व्युच्छन्ती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [२६]

देवम्ऽदेवम्। राधसे। चोदयन्ती। अस्मद्र्यक्। सूनृताः। ईरयन्ती।

विऽउच्छन्ती। नः। सनये। धियः। धाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[८१ (८०)] [३ मैत्रावरुणिर्वसिष्ठः। उषसः। त्रिष्टुप्।]

प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन्।

विवर्तयन्तीं रजसी समन्ते आविष्कृण्वतीं भुवनानि विश्वा॥ १॥

प्रति। स्तोमेभिः। उषसम्। वसिष्ठाः। गीःऽभिः। विप्रासः। प्रथमाः। अबुध्रन्।

विऽवर्तयन्तीम्। रजसी इति। समन्ते इति सम्ऽअन्ते। आविःऽकृण्वतीम्। भुवनानि। विश्वा॥ १॥

एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अबोधि।

अग्र एति युवतिरह्रयाणा प्राचिकितत्सूर्यं यज्ञमग्निम्॥ २॥

एषा। स्या। नव्यम्। आयुः। दधाना। गूढ्वी। तमः। ज्योतिषा। उषाः। अबोधि।

अग्रे। एति। युवतिः। अह्रयाणा। प्र। अचिकितत्। सूर्यम्। यज्ञम्। अग्निम्॥ २॥

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः।

घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः॥ ३॥ [२७]

अश्वऽवतीः। गोऽमतीः। नः। उषसः। वीरऽवतीः। सदम्। उच्छन्तु। भद्राः।

घृतम्। दुहानाः। विश्वतः। प्रऽपीताः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

इत्याश्वलायन-संहितायां

पञ्चमाष्टके

पञ्चमोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके षष्ठोऽध्यायः ॥

[८२ (८१)] [६ मैत्रावरुणिर्वसिष्ठः। उषसः। प्रगाथ = (अयुजो बृहत्यः, युज सतोबृहत्यः)।]

प्रत्यु अदर्श्यायत्यु१च्छन्ती दुहिता दिवः।
अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी॥ १॥

प्रति। ऊँ इति। अदर्शि। आऽयती। उच्छन्ती। दुहिता। दिवः।
अपो इति। महि। व्ययति। चक्षसे। तमः। ज्योतिः। कृणोति। सूनरी॥ १॥

उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत्।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि॥ २॥

उत्। उस्रियाः। सृजते। सूर्यः। सचा। उत्ऽयत्। नक्षत्रम्। अर्चिऽवत्।
तव। इत्। उषः। विऽउषि। सूर्यस्य। च। सम्। भक्तेन। गमेमहि॥ २॥

प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि।
या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः॥ ३॥

प्रति। त्वा। दुहितः। दिवः। उषः। जीराः। अभुत्स्महि।
या। वहसि। पुरु। स्पार्हम्। वनन्ऽवति। रत्नम्। न। दाशुषे। मयः॥ ३॥

उच्छन्ती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे।
तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः॥ ४॥

उच्छन्ती। या। कृणोषि। मंहना। महि। प्रऽख्यै। देवि। स्वः। दृशे।
तस्याः। ते। रत्नऽभाजः। ईमहे। वयम्। स्याम। मातुः। न। सूनवः॥ ४॥

तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमम्। यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै॥ ५॥

तत्। चित्रम्। राधः। आ। भर। उषः। यत्। दीर्घश्रुत्ऽतमम्।
यत्। ते। दिवः। दुहितः। मर्तऽभोजनम्। तत्। रास्व। भुनजामहै॥ ५॥

श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः।
चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्त्रिधः॥ ६॥ [१]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रवः। सूरिऽभ्यः। अमृतम्। वसुऽत्वनम्। वाजान्। अस्मभ्यम्। गोऽमतः।
चोदयित्री। मघोनः। सूनृताऽवती। उषाः। उच्छत्। अप। स्रिधः॥ ६॥

[८३ (८२)] [१० मैत्रावरुणिर्वसिष्ठः। इन्द्रावरुणौ। जगती।]

इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम्।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः॥ १॥

इन्द्रावरुणा। युवम्। अध्वराय। नः। विशे। जनाय। महि। शर्म। यच्छतम्।
दीर्घऽप्रयज्युम्। अति। यः। वनुष्यति। वयम्। जयेम। पृतनासु। दुःऽध्यः॥ १॥

सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः॥ २॥

सम्ऽराट्। अन्यः। स्वऽराट्। अन्यः। उच्यते। वाम्। महान्तौ। इन्द्रावरुणा। महावसू इति महाऽवसू।
विश्वे। देवासः। परमे। विऽओमनि। सम्। वाम्। ओजः। वृषणा। सम्। बलम्। दधुः॥ २॥

अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम्।
इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः॥ ३॥

अनु। अपाम्। खानि। अतृन्तम्। ओजसा। आ। सूर्यम्। ऐरयतम्। दिवि। प्रऽभुम्।
इन्द्रावरुणा। मदे। अस्य। मायिनः। अपिन्वतम्। अपितः। पिन्वतम्। धियः॥ ३॥

युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे॥ ४॥

युवाम्। इत्। युत्ऽसु। पृतनासु। वह्नयः। युवाम्। क्षेमस्य। प्रऽसवे। मितऽज्ञवः।
ईशाना। वस्वः। उभयस्य। कारवः। इन्द्रावरुणा। सुऽहवा। हवामहे॥ ४॥

इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते॥ ५॥ [२]

इन्द्रावरुणा। यत्। इमानि। चक्रथुः। विश्वा। जातानि। भुवनस्य। मज्मना।
क्षेमेण। मित्रः। वरुणम्। दुवस्यति। मरुत्ऽभिः। उग्रः। शुभम्। अन्यः। ईयते॥ ५॥

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम्।
अजामिमन्यः श्नथयन्तमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मुहे। शुल्काय। वरुणस्य। नु। त्विषे। ओजः। मिमाते इति। ध्रुवम्। अस्य। यत्। स्वम्।
अजामिम्। अन्यः। श्नथयन्तम्। आ। अतिरत्। दभ्रेभिः। अन्यः। प्र। वृणोति। भूयसः॥ ६॥

न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः॥ ७॥

न। तम्। अंहः। न। दुःऽइतानि। मर्त्यम्। इन्द्रावरुणा। न। तपः। कुतः। चन।
यस्य। देवा। गच्छथः। वीथः। अध्वरम्। न। तम्। मर्तस्य। नशते। परिऽह्वृतिः॥ ७॥

अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम्॥ ८॥

अर्वाक्। नरा। दैव्येन। अवसा। आ। गतम्। शृणुतम्। हवम्। यदि। मे। जुजोषथः।
युवोः। हि। सख्यम्। उत। वा। यत्। आप्यम्। मार्डीकम्। इन्द्रावरुणा। नि। यच्छतम्॥ ८॥

अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा।
यद्वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु॥ ९॥

अस्माकम्। इन्द्रावरुणा। भरेऽभरे। पुरःऽयोधा। भवतम्। कृष्टिऽओजसा।
यत्। वाम्। हवन्ते। उभये। अध। स्पृधि। नरः। तोकस्य। तनयस्य। सातिषु॥ ९॥

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे॥ १०॥ [३]

अस्मे इति। इन्द्रः। वरुणः। मित्रः। अर्यमा। द्युम्नम्। यच्छन्तु। महि। शर्म। सऽप्रथः।
अवध्रम्। ज्योतिः। अदितेः। ऋतऽवृधः। देवस्य। श्लोकम्। सवितुः। मनामहे॥ १०॥

[८४ (८३)] [१० मैत्रावरुणिर्वसिष्ठः। इन्द्रावरुणौ। जगती।]

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम्॥ १॥

युवाम्। नरा। पश्यमानासः। आप्यम्। प्राचा। गव्यन्तः। पृथुऽपर्शवः। ययुः।
दासा। च। वृत्रा। हतम्। आर्याणि। च। सुऽदासम्। इन्द्रावरुणा। अवसा। अवतम्॥ १॥

यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम्।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्र। नरः। सम्ऽअयन्ते। कृतऽध्वजः। यस्मिन्। आजा। भवति। किम्। चन। प्रियम्।
यत्र। भयन्ते। भुवना। स्वःऽदृशः। तत्र। नः। इन्द्रावरुणा। अधि। वोचतम्॥ २॥

सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत्।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम्॥ ३॥

सम्। भूम्याः। अन्ताः। ध्वसिराः। अदृक्षत। इन्द्रावरुणा। दिवि। घोषः। आ। अरुहत्।
अस्थुः। जनानाम्। उप। माम्। अरातयः। अर्वाक्। अवसा। हवनऽश्रुता। आ। गतम्॥ ३॥

इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम्।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः॥ ४॥

इन्द्रावरुणा। वधनाभिः। अप्रति। भेदम्। वन्वन्ता। प्र। सुऽदासम्। आवतम्।
ब्रह्माणि। एषाम्। शृणुतम्। हवीमनि। सत्या। तृत्सूनाम्। अभवत्। पुरःऽहितिः॥ ४॥

इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि॥ ५॥ [४]

इन्द्रावरुणौ। अभि। आ। तपन्ति। मा। अघानि। अर्यः। वनुषाम्। अरातयः।
युवम्। हि। वस्वः। उभयस्य। राजथः। अध। स्म। नः। अवतम्। पार्ये। दिवि॥ ५॥

युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह॥ ६॥

युवाम्। हवन्ते। उभयासः। आजिषु। इन्द्रम्। च। वस्वः। वरुणम्। च। सातये।
यत्र। राजऽभिः। दशऽभिः। निऽबाधितम्। प्र। सुऽदासम्। आवतम्। तृत्सुऽभिः। सह॥ ६॥

दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु॥ ७॥

दश। राजानः। सम्ऽइताः। अयज्यवः। सुऽदासम्। इन्द्रावरुणा। न। युयुधुः।
सत्या। नृणाम्। अद्मऽसदाम्। उपऽस्तुतिः। देवाः। एषाम्। अभवन्। देवऽहूतिषु॥ ७॥

दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम्।
श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः॥ ८॥

दाशऽराज्ञे। परिऽयत्ताय। विश्वतः। सुऽदासे। इन्द्रावरुणौ। अशिक्षतम्।
श्वित्यञ्चः। यत्र। नमसा। कपर्दिनः। धिया। धीऽवन्तः। असपन्त। तृत्सवः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा।

हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम्॥ ९॥

वृत्राणि। अन्यः। सम्ऽइथेषु। जिघ्नते। व्रतानि। अन्यः। अभि। रक्षते। सदा।

हवामहे। वाम्। वृषणा। सुवृक्तिऽभिः। अस्मे इति। इन्द्रावरुणा। शर्म। यच्छतम्॥ ९॥

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः।

अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे॥ १०॥ [५]

अस्मे इति। इन्द्रः। वरुणः। मित्रः। अर्यमा। द्युम्नम्। यच्छन्तु। महि। शर्म। सऽप्रथः।

अवध्रम्। ज्योतिः। अदितेः। ऋतऽवृधः। देवस्य। श्लोकम्। सवितुः। मनामहे॥ १०॥

[८५ (८४)] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रावरुणौ। त्रिष्टुप्।]

आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः।

प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति॥ १॥

आ। वाम्। राजानौ। अध्वरे। ववृत्याम्। हव्येभिः। इन्द्रावरुणा। नमःऽभिः।

प्र। वाम्। घृताची। बाह्वोः। दधाना। परि। त्मना। विषुऽरूपा। जिगाति॥ १॥

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः।

परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम्॥ २॥

युवोः। राष्ट्रम्। बृहत्। इन्वति। द्यौः। यौ। सेतृऽभिः। अरज्जुऽभिः। सिनीथः।

परि। नः। हेळः। वरुणस्य। वृज्याः। उरुम्। नः। इन्द्रः। कृणवत्। ऊँ इति। लोकम्॥ २॥

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता।

उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम्॥ ३॥

कृतम्। नः। यज्ञम्। विदथेषु। चारुम्। कृतम्। ब्रह्माणि। सूरिषु। प्रऽशस्ता।

उपो इति। रयिः। देवऽजूतः। नः। एतु। प्र। नः। स्पार्हाभिः। ऊतिऽभिः। तिरेतम्॥ ३॥

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम्।

प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि॥ ४॥

अस्मे इति। इन्द्रावरुणा। विश्वऽवारम्। रयिम्। धत्तम्। वसुऽमन्तम्। पुरुऽक्षुम्।

प्र। यः। आदित्यः। अनृता। मिनाति। अमिता। शूरः। दयते। वसूनि॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [६]
इयम्। इन्द्रम्। वरुणम्। अष्ट। मे। गीः। प्र। आवत्। तोके। तनये। तूतुजाना।
सुऽरत्नासः। देवऽवीतिम्। गमेम। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[८६ (८५)] [५ मैत्रावरुणिर्वसिष्ठः। इन्द्रावरुणौ। त्रिष्टुप्।]

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत्।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके॥ १॥
पुनीषे। वाम्। अरक्षसम्। मनीषाम्। सोमम्। इन्द्राय। वरुणाय। जुह्वत्।
घृतऽप्रतीकाम्। उषसम्। न। देवीम्। ता। नः। यामन्। उरुष्यताम्। अभीके॥ १॥
स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति।
युवं ताँ इन्द्रवरुणावमित्रान्हतं पराचः शर्वा विषूचः॥ २॥
स्पर्धन्ते। वै। ऊँ इति। देवऽहूये। अत्र। येषु। ध्वजेषु। दिद्यवः। पतन्ति।
युवम्। तान्। इन्द्रावरुणौ। अमित्रान्। हतम्। पराचः। शर्वा। विषूचः॥ २॥
आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति॥ ३॥
आपः। चित्। हि। स्वऽयशसः। सदःऽसु। देवीः। इन्द्रम्। वरुणम्। देवता। धुरिति धुः।
कृष्टीः। अन्यः। धारयति। प्रऽविक्ताः। वृत्राणि। अन्यः। अप्रतीनि। हन्ति॥ ३॥
स सुक्रतुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान्।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान्॥ ४॥
सः। सुऽक्रतुः। ऋतऽचित्। अस्तु। होता। यः। आदित्या। शवसा। वाम्। नमस्वान्।
आऽववर्तत्। अवसे। वाम्। हविष्मान्। असत्। इत्। सः। सुविताय। प्रयस्वान्॥ ४॥
इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः॥ ५॥ [७]
इयम्। इन्द्रम्। वरुणम्। अष्ट। मे। गीः। प्र। आवत्। तोके। तनये। तूतुजाना।
सुऽरत्नासः। देवऽवीतिम्। गमेम। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८७ (८६)] [८ मैत्रावरुणिर्वसिष्ठः। वरुणः। त्रिष्टुप्।]

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी।

प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम॥ १॥

धीरा। तु। अस्य। महिना। जनूंषि। वि। यः। तस्तम्भ। रोदसी इति। चित्। उर्वी इति।

प्र। नाकम्। ऋष्वम्। नुनुदे। बृहन्तम्। द्विता। नक्षत्रम्। पप्रथत्। च। भूम॥ १॥

उत स्वया तन्वा३ सं वदे तत्कदा न्व१न्तर्वरुणे भुवानि।

किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम्॥ २॥

उत। स्वया। तन्वा। सम्। वदे। तत्। कदा। नु। अन्तः। वरुणे। भुवानि।

किम्। मे। हव्यम्। अहृणानः। जुषेत। कदा। मृळीकम्। सुऽमनाः। अभि। ख्यम्॥ २॥

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम्।

समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते॥ ३॥

पृच्छे। तत्। एनः। वरुण। दिदृक्षु। उपो इति। एमि। चिकितुषः। विऽपृच्छम्।

समानम्। इत्। मे। कवयः। चित्। आहुः। अयम्। ह। तुभ्यम्। वरुणः। हृणीते॥ ३॥

किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायम्।

प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम्॥ ४॥

किम्। आगः। आस। वरुण। ज्येष्ठम्। यत्। स्तोतारम्। जिघांससि। सखायम्।

प्र। तत्। मे। वोचः। दुःऽदभ। स्वधाऽवः। अव। त्वा। अनेनाः। नमसा। तुरः। इयाम्॥ ४॥

अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः।

अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम्॥ ५॥

अव। द्रुग्धानि। पित्र्या। सृज। नः। अव। या। वयम्। चकृम। तनूभिः।

अव। राजन्। पशुऽतृपम्। न। तायुम्। सृज। वत्सम्। न। दाम्नः। वसिष्ठम्॥ ५॥

न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः।

अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता॥ ६॥

न। सः। स्वः। दक्षः। वरुण। ध्रुतिः। सा। सुरा। मन्युः। विऽभीदकः। अचित्तिः।

अस्ति। ज्यायान्। कनीयसः। उपऽअरे। स्वप्नः। चन। इत्। अनृतस्य। प्रऽयोता॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः।

अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति॥ ७॥

अरम्। दासः। न। मीळ्हुषे। कराणि। अहम्। देवाय। भूर्णये। अनागाः।

अचेतयत्। अचितः। देवः। अर्यः। गृत्सम्। राये। कविऽतरः। जुनाति॥ ७॥

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु।

शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः॥ ८॥ [८]

अयम्। सु। तुभ्यम्। वरुण। स्वधाऽवः। हृदि। स्तोमः। उपऽश्रितः। चित्। अस्तु।

शम्। नः। क्षेमे। शम्। ऊँ इति। योगे। नः। अस्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥

[८८ (८७)] [७ मैत्रावरुणिर्वसिष्ठः। वरुणः। त्रिष्टुप्।]

रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनाम्।

सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः॥ १॥

रदत्। पथः। वरुणः। सूर्याय। प्र। अर्णांसि। समुद्रियाः। नदीनाम्।

सर्गः। न। सृष्टः। अर्वतीः। ऋतऽयन्। चकार। महीः। अवनीः। अहऽभ्यः॥ १॥

आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान्।

अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि॥ २॥

आत्मा। ते। वातः। रजः। आ। नवीनोत्। पशुः। न। भूर्णिः यवसे। ससऽवान्।

अन्तः। मही इति। बृहती इति। रोदसी इति। इमे इति। विश्वा। ते। धाम। वरुण। प्रियाणि॥ २॥

परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके।

ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त मन्म॥ ३॥

परि। स्पशः। वरुणस्य। स्मत्ऽइष्टाः। उभे इति। पश्यन्ति। रोदसी इति। सुमेके इति सुऽमेके।

ऋतऽवानः। कवयः। यज्ञऽधीराः। प्रऽचेतसः। ये। इषयन्त। मन्म॥ ३॥

उवाच मे वरुणो मेधिराय त्रिः सप्तनामाघ्न्या बिभर्ति।

विद्वान्पदस्य गुह्या नो वोचद्युगाय विप्र उपराय शिक्षन्॥ ४॥

उवाच। मे। वरुणः। मेधिराय। त्रिः। सप्त। नाम। अघ्न्या। बिभर्ति।

विद्वान्। पदस्य। गुह्या। न। वोचत्। युगाय। विप्रः। उपराय। शिक्षन्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम्॥ ५॥
तिस्रः। द्यावः। निऽहिताः। अन्तः। अस्मिन्। तिस्रः। भूमीः। उपराः। षट्ऽविधानाः।
गृत्सः। राजा। वरुणः। चक्रे। एतम्। दिवि। प्रऽईङ्खम्। हिरण्ययम्। शुभे। कम्॥ ५॥
अव सिन्धुं वरुणो द्यौरिव स्थाद्द्रप्सो न श्वेतो मृगस्तुविष्मान्।
गम्भीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा॥ ६॥
अव। सिन्धुम्। वरुणः। द्यौःऽइव। स्थात्। द्रप्सः। न। श्वेतः। मृगः। तुविष्मन्।
गम्भीरऽशंसः। रजसः। विऽमानः। सुपारऽक्षत्रः। सतः। अस्य। राजा॥ ६॥
यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः।
अनु व्रतान्यदितेर्ऋधन्तो यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [९]
यः। मृळयाति। चक्रुषे। चित्। आगः। वयम्। स्याम। वरुणे। अनागाः।
अनु। व्रतानि। अदितेः। ऋधन्तः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[८९ (८८)] [७ मैत्रावरुणिर्वसिष्ठः। वरुणः, (७ पाशविमोचनी)। त्रिष्टुप्।]

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व।
य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम्॥ १॥
प्र। शुन्ध्युवम्। वरुणाय। प्रेष्ठाम्। मतिम्। वसिष्ठ। मीळ्हुषे। भरस्व।
यः। ईम्। अर्वाञ्चम्। करते। यजत्रम्। सहस्रऽमघम्। वृषणम्। बृहन्तम्॥ १॥
अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि।
स्व१र्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात्॥ २॥
अध। नु। सम्ऽदृशम्। जगन्वान्। अग्नेः। अनीकम्। वरुणस्य। मंसि।
स्वः। यत्। अश्मन्। अधिऽपाः। ऊँ इति। अन्धः। अभि। मा। वपुः। दृशये। निनीयात्॥ २॥
आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम्।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम्॥ ३॥
आ। यत्। रुहाव। वरुणः। च। नावम्। प्र। यत्। समुद्रम्। ईरयाव। मध्यम्।
अधि। यत्। अपाम्। स्नुऽभिः। चराव। प्र। प्रऽईङ्खे। ईङ्खयावहै। शुभे। कम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः॥ ४॥
वसिष्ठम्। ह। वरुणः। नावि। आ। अधात्। ऋषिम्। चकार। सुऽअपाः। महिःऽभिः।
स्तोतारम्। विप्रः। सुदिनऽत्वे। अह्नाम्। यात्। नु। द्यावः। ततनन्। यात्। उषसः॥ ४॥
क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित्।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते॥ ५॥
क्व। त्यानि। नौ। सख्या। बभूवुः। सचावहे इति। यत्। अवृकम्। पुरा। चित्।
बृहन्तम्। मानम्। वरुण। स्वधाऽवः। सहस्रऽद्वारम्। जगम। गृहम्। ते॥ ५॥
य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते।
मा त एनस्वन्तो यक्षिन्भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम्॥ ६॥
यः। आपिः। नित्यः। वरुण। प्रियः। सन्। त्वाम्। आगांसि। कृणवत्। सखा। ते।
मा। ते। एनस्वन्तः। यक्षिन्। भुजेम। यन्धि। स्म। विप्रः। स्तुवते। वरूथम्॥ ६॥
ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य१स्मत्पाशं वरुणो मुमोचत्।
अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [१०]
ध्रुवासु। त्वा। आसु। क्षितिषु। क्षियन्तः। वि। अस्मत्। पाशम्। वरुणः। मुमोचत्।
अवः। वन्वानाः। अदितेः। उपऽस्थात्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[९० (८९)] [५ मैत्रावरुणिर्वसिष्ठः। वरुणः। गायत्री, ५ जगती।]

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम्। मृळा सुक्षत्र मृळय॥ १॥
मो इति। सु। वरुण। मृत्ऽमयम्। गृहम्। राजन्। अहम्। गमम्। मृळ। सुऽक्षत्र। मृळय॥ १॥
यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय॥ २॥
यत्। एमि। प्रस्फुरन्ऽइव। दृतिः। न। ध्मातः। अद्रिऽवः। मृळ। सुऽक्षत्र। मृळय॥ २॥
क्रत्वः समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय॥ ३॥
क्रत्वः। समह। दीनता। प्रतिऽईपम्। जगम। शुचे। मृळ। सुऽक्षत्र। मृळय॥ ३॥
अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम्। मृळा सुक्षत्र मृळय॥ ४॥
अपाम्। मध्ये। तस्थिऽवांसम्। तृष्णा। अविदत्। जरितारम्। मृळ। सुऽक्षत्र। मृळय॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरामसि।

अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः॥ ५॥ [११] {५}

यत्। किम्। च। इदम्। वरुण। दैव्ये। जने। अभिऽद्रोहम्। मनुष्याः। चरामसि।

अचित्ती। यत्। तव। धर्म। युयोपिम। मा। नः। तस्मात्। एनसः। देव। रिरिषः॥ ५॥

[९१ (९०)] [७ मैत्रावरुणिर्वसिष्ठः। वायुः, ५-७ इन्द्रवाय। त्रिष्टुप्।]

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः।

वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय॥ १॥

प्र। वीरऽया। शुचयः। दद्रिरे। वाम्। अध्वर्युऽभिः। मधुऽमन्तः। सुतासः।

वह। वायो इति। निऽयुतः। याहि। अच्छ। पिब। सुतस्य। अन्धसः। मदाय॥ १॥

ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो।

कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य॥ २॥

ईशानाय। प्रऽहुतिम्। यः। ते। आनट्। शुचिम्। सोमम्। शुचिऽपाः। तुभ्यम्। वायो इति।

कृणोषि। तम्। मर्त्येषु। प्रऽशस्तम्। जातःऽजातः। जायते। वाजी। अस्य॥ २॥

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम्।

अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके॥ ३॥

राये। नु। यम्। जज्ञतुः। रोदसी इति। इमे इति। राये। देवी। धिषणा। धाति। देवम्।

अध। वायुम्। निऽयुतः। सश्चत। स्वाः। उत। श्वेतम्। वसुऽधितिम्। निरेके॥ ३॥

उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः।

गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः॥ ४॥

उच्छन्। उषसः। सुऽदिनाः। अरिप्राः। उरु। ज्योतिः। विविदुः। दीध्यानाः।

गव्यम्। चित्। ऊर्वम्। उशिजः। वि। वव्रुः। तेषाम्। अनु। प्रऽदिवः। सस्रुः। आपः॥ ४॥

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति।

इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते॥ ५॥

ते। सत्येन। मनसा। दीध्यानाः। स्वेन। युक्तासः। क्रतुना। वहन्ति।

इन्द्रवायू इति। वीरऽवाहम्। रथम्। वाम्। ईशानयोः। अभि। पृक्षः। सचन्ते॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः।

इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः॥ ६॥

ईशानासः। ये। दधते। स्वः। नः। गोभिः। अश्वेभिः। वसुऽभिः। हिरण्यैः।

इन्द्रवायू इति। सूरयः। विश्वम्। आयुः। अर्वत्ऽभिः। वीरैः। पृतनासु। सह्युः॥ ६॥

अर्वन्तो न श्रवसः भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः।

वाजयन्त स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [१२]

अर्वन्तः। न। श्रवस। भिक्षमाणाः। इन्द्रवायू इति। सुस्तुतिऽभिः। वसिष्ठाः।

वाजऽयन्तः। सु। अवसे। हुवेम। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[९२ (९१)] [७ मैत्रावरुणिर्वसिष्ठः। १, ३ वायुः; २, ४-७ इन्द्रवायू। त्रिष्टुप्।]

कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन्।

ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण॥ १॥

कुवित्। अङ्ग। नमसा। ये। वृधासः। पुरा। देवाः। अनवद्यासः। आसन्।

ते। वायवे। मनवे। बाधिताय। अवासयन्। उषसम्। सूर्येण॥ १॥

उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः।

इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम्॥ २॥

उशन्ता। दूता। न। दभाय। गोपा। मासः। च। पाथः। शरदः। च। पूर्वीः।

इन्द्रवायू इति। सुऽस्तुतिः। वाम्। इयाना। मार्डीकम्। ईट्टे। सुवितम्। च। नव्यम्॥ २॥

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः।

ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः॥ ३॥

पीवः२अन्नान्। रयिऽवृधः। सुऽमेधाः। श्वेतः। सिसक्ति। निऽयुताम्। अभिऽश्रीः।

ते। वायवे। सऽमनसः। वि। तस्थुः। विश्वा। इत्। नरः। सुऽअपत्यानि। चक्रुः॥ ३॥

यावत्तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः।

शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम्॥ ४॥

यावत्। तरः। तन्वः। यावत्। ओजः। यावत्। नरः। चक्षसा। दीध्यानाः।

शुचिम्। सोमम्। शुचिऽपा। पातम्। अस्मे इति। इन्द्रवायू इति। सदतम्। बर्हिः। आ। इदम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नियुवाना नियुतः स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक्।
इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे॥ ५॥

नि॰युवाना। नि॰युतः। स्पार्ह॰वीराः। इन्द्रवायू इति। स॰रथम्। यातम्। अर्वाक्।
इदम्। हि। वाम्। प्र॰भृतम्। मध्वः। अग्रम्। अध। प्रीणाना। वि। मुमुक्तम्। अस्मे इति॥ ५॥

या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते।
आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः॥ ६॥

याः। वाम्। शतम्। नि॰युतः। याः। सहस्रम्। इन्द्रवायू इति। विश्व॰वाराः। सचन्ते।
आ। आभिः। यातम्। सु॰विदत्राभिः। अर्वाक्। पातम्। नरा। प्रति॰भृतस्य। मध्वः॥ ६॥

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [१३]

अर्वन्तः। न। श्रवसः। भिक्षमाणाः। इन्द्रवायू इति। सुस्तुति॰भिः। वसिष्ठाः।
वाज॰यन्तः। सु। अवसे। हुवेम। यूयम्। पात। स्वस्ति॰भिः। सदा। नः॥ ७॥

[९३ (९२)] [५ मैत्रावरुणिर्वसिष्ठः। वायुः, २, ४ इन्द्रवायू। त्रिष्टुप्।]

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥ १॥

आ। वायो इति। भूष। शुचि॰पाः। उप। नः। सहस्रम्। ते। नि॰युतः। विश्व॰वार।
उपो इति। ते। अन्धः। मद्यम्। अयामि। यस्य। देव। दधिषे। पूर्व॰पेयम्॥ १॥

प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै।
प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः॥ २॥

प्र। सोता। जीरः। अध्वरेषु। अस्थात्। सोमम्। इन्द्राय। वायवे। पिबध्यै।
प्र। यत्। वाम्। मध्वः। अग्रियम्। भरन्ति। अध्वर्यवः। देव॰यन्तः। शचीभिः॥ २॥

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः॥ ३॥

प्र। याभिः। यासि। दाश्वांसम्। अच्छ। नियुत्॰भिः। वायो इति। इष्टये। दुरोणे।
नि। नः। रयिम्। सु॰भोजसम्। युवस्व। नि। वीरम्। गव्यम्। अश्व्यम्। च। राधः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ये वायवं इन्द्रमादंनास आदेवासो नितोशंनासो अर्यः।

घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान्॥ ४॥

ये। वायवे। इन्द्रऽमादनासः। आऽदेवासः। निऽतोशनासः। अर्यः।

घ्नन्तः। वृत्राणि। सूरिऽभिः। स्याम। ससह्वांसः। युधा। नृऽभिः। अमित्रान्॥ ४॥

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुपं याहि यज्ञम्।

वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदां नः॥ ५॥ [१४]

आ। नः। नियुत्ऽभिः। शतिनीभिः। अध्वरम्। सहस्रिणीभिः। उप। याहि। यज्ञम्।

वायो इति। अस्मिन्। सवने। मादयस्व। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

[९४ (९३)] [८ मैत्रावरुणिर्वसिष्ठः। इन्द्राग्नी। त्रिष्टुप्।]

शुचिं नु स्तोमं नवंजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम्।

उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा॥ १॥

शुचिम्। नु। स्तोमम्। नवऽजातम्। अद्य। इन्द्राग्नी इति। वृत्रऽहना। जुषेथाम्।

उभा। हि। वाम्। सुऽहवा। जोहवीमि। ता। वाजम्। सद्यः। उशते। धेष्ठा॥ १॥

ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा।

क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः॥ २॥

ता। सानसी इति। शवसाना। हि। भूतम्। साकम्ऽवृधा। शवसा। शूशुऽवांसा।

क्षयन्तौ। रायः। यवसस्य। भूरेः। पृङ्क्तम्। वाजस्य। स्थविरस्य। घृष्वेः॥ २॥

उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः।

अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते॥ ३॥

उपो इति। ह। यत्। विदथम्। वाजिनः। गुः। धीभिः। विप्राः। प्रऽमतिम्। इच्छमानाः।

अर्वन्तः। न। काष्ठाम्। नक्षमाणाः। इन्द्राग्नी इति। जोहुवतः। नरः। ते॥ ३॥

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम्।

इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः॥ ४॥

गीःऽभिः। विप्रः। प्रऽमतिम्। इच्छमानः। ईट्टे। रयिम्। यशसम्। पूर्वऽभाजम्।

इन्द्राग्नी इति। वृत्रऽहना। सुऽवज्रा। प्र। नः। नव्येभिः। तिरतम्। देष्णैः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन॥ ५॥ [१५]

सम्। यत्। मही इति। मिथती इति। स्पर्धमाने इति। तनूऽरुचा। शूरऽसाता। यतैते इति।
अदेवऽयुम्। विदथे। देवयुऽभिः। सत्रा। हतम्। सोमऽसुता। जनेन॥ ५॥

इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम्।
नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः॥ ६॥

इमाम्। ऊँ इति। सु। सोमऽसुतिम्। उप। नः। आ। इन्द्राग्नी इति। सौमनसाय। यातम्॥ नु। चित्।
हि। परिमम्नाथे इति परिऽमम्नाथे। अस्मान्। आ। वाम्। शश्वत्ऽभिः। ववृतीय। वाजैः॥ ६॥

सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः।
यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथन्तु॥ ७॥

सः। अग्ने। एना। नमसा। सम्ऽइद्धः। अच्छ। मित्रम्। वरुणम्। इन्द्रम्। वोचेः।
यत्। सीम्। आगः। चकृम। तत्। सु। मृळ। तत्। अर्यमा। अदितिः। शिश्रथन्तु॥ ७॥

एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान्।
मेन्द्रो नो विष्णुर्मरुतः परि ख्यन्यूयं पात स्वस्तिभिः सदा नः॥ ८॥ [१६]

एताः। अग्ने। आशुषाणासः। इष्टीः। युवोः। सचा। अभि। अश्याम। वाजान्।
मा। इन्द्रः। नः। विष्णुः। मरुतः। परि। ख्यन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥

[९५ (९४)] [१२ मैत्रावरुणिर्वसिष्ठः। इन्द्राग्नी। गायत्री, १२ अनुष्टुप्।]

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि॥ १॥

इयम्। वाम्। अस्य। मन्मनः। इन्द्राग्नी इति। पूर्व्यऽस्तुतिः। अभ्रात्। वृष्टिःऽइव। अजनि॥ १॥

शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः। ईशाना पिप्यतं धियः॥ २॥

शृणुतम्। जरितुः। हवम्। इन्द्राग्नी इति। वनतम्। गिरः। ईशाना। पिप्यतम्। धियः॥ २॥

मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये। मा नो रीरधतं निदे॥ ३॥

मा। पापऽत्वाय। नः। नरा। इन्द्राग्नी इति। मा। अभिऽशस्तये। मा। नः। रीरधतम्। निदे॥ ३॥

इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे। धिया धेना अवस्यवः॥ ४॥

इन्द्रे। अग्ना। नमः। बृहत्। सुऽवृक्तिम्। आ। ईरयामहे। धिया। धेनाः। अवस्यवः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता हि शश्वन्त ईळत इत्था विप्रास ऊतये। सबाधो वाजसातये॥ ५॥

ता। हि। शश्वन्तः। ईळते। इत्था। विप्रासः। ऊतये। सऽबाधः। वाजऽसातये। ५॥

ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः॥ ६॥ [१७]

ता। वाम्। गीःऽभिः। विपन्यवः। प्रयस्वन्तः। हवामहे। मेधऽसाता। सनिष्यवः॥ ६॥

इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा। मा नो दुःशंस ईशत॥ ७॥

इन्द्राग्नी इति। अवसा। आ। गतम्। अस्मभ्यम्। चर्षणिऽसहा। मा। नः। दुःऽशंसः। ईशत॥ ७॥

मा कस्य नो अररुषो धूर्तिः प्रणङ् मर्त्यस्य। इन्द्राग्नी शर्म यच्छतम्॥ ८॥

आ। कस्य। नः। अररुषः। धूर्तिः। प्रणक्। मर्त्यस्य। इन्द्राग्नी। शर्म। यच्छतम्॥ ८॥

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे। इन्द्राग्नी तद्वनेमहि॥ ९॥

गोऽमत्। हिरण्यऽवत्। वसु। यत्। वाम्। अश्वऽवत्। ईमहे। इन्द्राग्नी इति। तत्। वनेमहि॥ ९॥

यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः। सप्तीवन्ता सपर्यवः॥ १०॥

यत्। सोमे। आ। सुते। नरः। इन्द्राग्नी इति। अजोहवुः। सप्तिऽवन्ता। सपर्यवः॥ १०॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा। आङ्गूषैराविवासतः॥ ११॥

उक्थेभिः। वृत्रहन्ऽतमा। आ। मन्दाना। चित्। आ। गिरा। आङ्गूषैः। आऽविवासतः॥ ११॥

ताविदुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम्। आभोगं हन्मना हतमुदधिं हन्मना हतम्॥ १२॥ [१८]

तौ। इत्। दुःऽशंसम्। मर्त्यम्। दुःऽविद्वांसम्। रक्षस्विनम्॥ आऽभोगम्। हन्मना। हतम्।
उदऽधिम्। हन्मना। हतम्॥ १२॥

[९६ (९५)] [६ मैत्रावरुणिर्वसिष्ठः। सरस्वती, ३ सरस्वान्। त्रिष्टुप्।]

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः॥ १॥

प्र। क्षोदसा। धायसा। सस्रे। एषा। सरस्वती। धरुणम्। आयसी। पूः।
प्रऽबाबधाना। रथ्याऽइव। याति। विश्वाः। अपः। महिना। सिन्धुः। अन्याः॥ १॥

एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एका। अचेतत्। सरस्वती। नदीनाम्। शुचिः। यती। गिरिऽभ्यः। आ। समुद्रात्।
रायः। चेतन्ती। भुवनस्य। भूरेः। घृतम्। पयः। दुदुहे। नाहुषाय॥ २॥

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत॥ ३॥

सः। ववृधे। नर्यः। योषणासु। वृषा। शिशुः। वृषभः। यज्ञियासु।
सः। वाजिनम्। मघवत्ऽभ्यः। दधाति। वि। सातये। तन्वम्। ममृजीत॥ ३॥

उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन्।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः॥ ४॥

उत। स्या। नः। सरस्वती। जुषाणा। उप। श्रवत्। सुऽभगा। यज्ञे। अस्मिन्।
मितज्ञुऽभिः। नमस्यैः। इयाना। राया। युजा। चित्। उत्ऽतरा। सखिऽभ्यः॥ ४॥

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व।
तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम्॥ ५॥

इमा। जुह्वानाः। युष्मत्। आ। नमःऽभिः। प्रति। स्तोमम्। सरस्वति। जुषस्व।
तव। शर्मन्। प्रियऽतमे। दधानाः। उप। स्थेयाम। शरणम्। न। वृक्षम्॥ ५॥

अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः।
वर्ध शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [१९]

अयम्। ऊँ इति। ते। सरस्वति। वसिष्ठः। द्वारौ। ऋतस्य। सुऽभगे। वि। आवरित्यावः।
वर्ध। शुभ्रे। स्तुवते। रासि। वाजान्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

[९७ (९६)] [६मैत्रावरुणिर्वसिष्ठः। सरस्वती, ४-६ सरस्वान्। १-२ प्रगाथः = (१ बृहती, २ सतो बृहती), ३ प्रस्तारपङ्क्तिः, ४-६ गायत्री, ७ त्रिष्टुप्।]

बृहदु गायिषे वचोऽसुर्या नदीनाम्। सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी॥ १॥

बृहत्। ऊँ इति। गायिषे। वचः। असुर्या। नदीनाम्।
सरस्वतीम्। इत्। महय। सुवृक्तिऽभिः। स्तोमैः। वसिष्ठ। रोदसी इति॥ १॥

उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः।
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उभे इति । यत् । ते । महिना । शुभ्रे । अन्धसी इति । अधिऽक्षियन्ति । पूरवः ।
सा । नः । बोधि । अवित्री । मरुत्ऽसखा । चोद । राधः । मघोनाम् ॥ २ ॥

भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥ ३ ॥

भद्रम् । इत् । भद्रा । कृणवत् । सरस्वती । अकवऽअरी । चेतति । वाजिनीऽवती ।
गृणाना । जमदग्निऽवत् । स्तुवाना । च । वसिष्ठऽवत् ॥ ३ ॥

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः । सरस्वन्तं हवामहे ॥ ४ ॥

जनिऽयन्तः । नु । अग्रवः । पुत्रिऽयन्तः । सुऽदानवः । सरस्वन्तम् । हवामहे ॥ ४ ॥

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेभिर्नोऽविता भव ॥ ५ ॥

ये । ते । सरस्वः । ऊर्मयः । मधुऽमन्तः । घृतऽश्चुतः । तेभिः । नः । अविता । भव ॥ ५ ॥

पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः । भक्षीमहि प्रजामिषम् ॥ ६ ॥ (२०)

पीपिऽवांसम् । सरस्वतः । स्तनम् । यः । विश्वऽदर्शतः । भक्षीमहि । प्रऽजाम् । इषम् ॥ ६ ॥

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः ।
यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे हुवेम ॥ ७ ॥ ★ [२०]

यस्य । व्रतम् । पशवः । यन्ति । सर्वे । यस्य । व्रतम् । उपऽतिष्ठन्ते । आपः ।
यस्य । व्रते । पुष्टिऽपतिः । निऽविष्टः । तम् । सरस्वन्तम् । अवसे । हुवेम ॥ ७ ॥

[९८ (९७)] [१० मैत्रावरुणिर्वसिष्ठः । १ इन्द्रः, २, ४-८ बृहस्पतिः, ३, ९ इन्द्राब्रह्मणस्पती, १० इन्द्राबृहस्पती । त्रिष्टुप् ।]

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥ १ ॥

यज्ञे । दिवः । नृऽसदने । पृथिव्याः । नरः । यत्र । देवऽयवः । मदन्ति ।
इन्द्राय । यत्र । सवनानि । सुन्वे । गमत् । मदाय । प्रथमम् । वयः । च ॥ १ ॥

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। दैव्या॑। वृ॒णी॒म॒हे॒। अवां॑सि। बृह॒स्पतिः॑। न॒ः। म॒हे। आ। स॒खा॒य॒ः।

यथा॑। भवे॑म। मी॒ळ्हुषे॑। अना॑गाः। यः। न॒ः। दा॒ता। प॒रा॒ऽवतः॑। पि॒ताऽइ॑व॥ २॥

तमु॒ ज्येष्ठं॒ नम॑सा ह॒विर्भिः॑ सु॒शेवं॒ ब्रह्म॑ण॒स्पतिं॑ गृणीषे।

इन्द्रं॒ श्लोको॒ महि॒ दैव्यः॑ सिषक्तु॒ यो ब्रह्म॑णो दे॒वकृ॑तस्य॒ राजा॑॥ ३॥

तम्। ॐ इति॑। ज्येष्ठ॑म्। नम॑सा। ह॒विःऽभिः॑। सु॒ऽशेव॑म्। ब्रह्म॑णः। पति॑म्। गृ॒णी॒षे॒।

इन्द्र॑म्। श्लोक॑ः। महि॑। दैव्यः॑। सि॒स॒क्तु॒। यः। ब्रह्म॑णः। दे॒वऽकृ॑तस्य। राजा॑॥ ३॥

स आ नो॒ योनिं॑ सदतु॒ प्रेष्ठो॒ बृह॒स्पति॑र्वि॒श्ववा॑रो॒ यो अस्ति॑।

कामो॑ रा॒यः सु॒वीर्य॑स्य॒ तं दा॒त्पर्ष॑न्नो॒ अति॑ स॒श्चतो॒ अरि॑ष्टान्॥ ४॥

सः। आ। न॒ः। योनि॑म्। स॒द॒तु॒। प्रेष्ठः॑। बृह॒स्पतिः॑। वि॒श्वऽवा॑रः। यः। अस्ति॑।

काम॑ः। रा॒यः। सु॒ऽवीर्य॑स्य। तम्। दा॒त्। पर्ष॑त्। न॒ः। अति॑। स॒श्चत॑ः। अरि॑ष्टान्॥ ४॥

तमा नो॑ अ॒र्कम॒मृता॑य जुष्ट॑मि॒मे धा॑सुर॒मृता॑सः पुरा॒जाः।

शुचि॑क्रन्दं यज॒तं प॒स्त्या॑नां॒ बृह॒स्पति॑मन॒र्वाणं॑ हुवेम॥ ५॥ [२१]

तम्। आ। न॒ः। अ॒र्कम्। अ॒मृता॑य। जुष्ट॑म्। इ॒मे। धा॒सु॒ः। अ॒मृता॑सः। पु॒रा॒ऽजाः।

शुचि॑ऽक्रन्दम्। य॒ज॒तम्। प॒स्त्या॑नाम्। बृह॒स्पति॑म्। अ॒न॒र्वाण॑म्। हु॒वे॒म॒॥ ५॥

तं श॒ग्मासो॑ अरु॒षासो॒ अश्वा॒ बृह॒स्पतिं॑ सह॒वाहो॑ वहन्ति।

सह॑श्चि॒द्यस्य॒ नील॑वत्स॒धस्थं॒ नभो॒ न रू॒पम॑रु॒षं वसा॑नाः॥ ६॥

तम्। श॒ग्मास॑ः। अ॒रु॒षास॑ः। अश्वा॑ः। बृह॒स्पति॑म्। स॒ह॒ऽवाह॑ः। व॒ह॒न्ति॒।

सह॑ः। चि॒त्। यस्य॑। नील॑ऽवत्। स॒धऽस्थ॑म्। नभ॑ः। न। रू॒पम्। अ॒रु॒षम्। वसा॑नाः॥ ६॥

स हि शुचि॑ः श॒तप॑त्रः स शु॒न्ध्युर्हिर॑ण्यवाशीरिषि॒रः स्व॒र्षाः।

बृह॒स्पति॒ः स स्वा॑वे॒श ऋ॒ष्वः पु॒रू सखि॑भ्य आसु॒तिं करि॑ष्ठः॥ ७॥

सः। हि। शुचि॑ः। श॒तऽप॑त्रः। सः। शु॒न्ध्युः। हिर॑ण्यऽवाशीः। इ॒षि॒रः। स्वः॒ऽसाः।

बृह॒स्पति॑ः। सः। सु॒ऽआ॒वे॒शः। ऋ॒ष्वः। पु॒रु। सखि॑ऽभ्यः। आ॒ऽसु॒ति॒म्। करि॑ष्ठः॥ ७॥

दे॒वी दे॒वस्य॒ रोद॑सी॒ जनि॑त्री॒ बृह॒स्पतिं॑ वावृधतुर्महि॒त्वा।

द॒क्षाय्या॑य द॒क्षता सखाय॒ः कर॒द्ब्रह्म॑णे सु॒तरा॑ सुगा॒धा॥ ८॥

दे॒वी इति॑। दे॒वस्य॑। रोद॑सी॒ इति॑। जनि॑त्री॒ इति॑। बृह॒स्पति॑म्। व॒वृ॒ध॒तु॒ः। म॒हि॒ऽत्वा।

द॒क्षाय्या॑य। द॒क्ष॒त॒। स॒खा॒य॒ः। कर॑त्। ब्रह्म॑णे। सु॒ऽतरा॑। सु॒ऽगा॒धा॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेन्द्राय वज्रिणे अकारि।

अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः॥ ९॥

इयम्। वाम्। ब्रह्मणः। पते। सुऽवृक्तिः। ब्रह्म। इन्द्राय। वज्रिणे। अकारि।

अविष्टम्। धियः। जिगृतम्। पुरम्ऽधीः। जजस्तम्। अर्यः। वनुषाम्। अरातीः॥ ९॥

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य।

धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः॥ १०॥ [२२]

बृहस्पते। युवम्। इन्द्रः। च। वस्वः। दिव्यस्य। ईशाथे इति। उत। पार्थिवस्य।

धत्तम्। रयिम्। स्तुवते। कीरये। चित्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १०॥

[९९ (९८)] [७ मैत्रावरुणिर्वसिष्ठः। इन्द्रः, ७ इन्द्राबृहस्पती। त्रिष्टुप्।]

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम्।

गौराद्वेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन्॥ १॥

अध्वर्यवः। अरुणम्। दुग्धम्। अंशुम्। जुहोतन। वृषभाय। क्षितीनाम्।

गौरात्। वेदीयान्। अवऽपानम्। इन्द्रः। विश्वाहा। इत्। याति। सुतऽसोमम्। इच्छन्॥ १॥

यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि।

उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान्पाहि सोमान्॥ २॥

यत्। दधिषे। प्रऽदिवि। चारु। अन्नम्। दिवेऽदिवे। पीतिम्। इत्। अस्य। वक्षि।

उत। हृदा। उत। मनसा। जुषाणः। उशन्। इन्द्र। प्रऽस्थितान्। पाहि। सोमान्॥ २॥

जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच।

एन्द्र पप्राथोर्व१न्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ॥ ३॥

जज्ञानः। सोमम्। सहसे। पपाथ। प्र। ते। माता। महिमानम्। उवाच।

आ। इन्द्र। पप्राथ। उरु। अन्तरिक्षम्। युधा। देवेभ्यः। वरिवः। चकर्थ॥ ३॥

यद्योधया महतो मन्यमानान्त्साक्षाम तान्बाहुभिः शाशदानान्।

यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम॥ ४॥

यत्। योधयाः। महतः। मन्यमानान्। साक्षाम। तान्। बाहुऽभिः। शाशदानान्।

यत्। वा। नृऽभिः। वृतः। इन्द्र। अभिऽयुध्याः। तम्। त्वया। आजिम्। सौश्रवसम्। जयेम॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार।

यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य॥ ५॥

प्र। इन्द्रस्य। वोचम्। प्रथमा। कृतानि। प्र। नूतना। मघऽवा। या। चकार।

यदा। इत्। अदेवीः। असहिष्ट। मायाः। अथ। अभवत्। केवलः। सोमः। अस्य॥ ५॥

तवेदं विश्वमभितः पशव्यं यत्पश्यसि चक्षसा सूर्यस्य।

गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः॥ ६॥

तव। इदम्। विश्वम्। अभितः। पशव्यम्। यत्। पश्यसि। चक्षसा। सूर्यस्य।

गवाम्। असि। गोऽपतिः। एकः। इन्द्र। भक्षीमहि। ते। प्रऽयतस्य। वस्वः॥ ६॥

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य।

धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [२३]

बृहस्पते। युवम्। इन्द्रः। च। वस्वः। दिव्यस्य। ईशाथे इति। उत। पार्थिवस्य।

धत्तम्। रयिम्। स्तुवते। कीरये। चित्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[१०० (९९)] [७ मैत्रावरुणिर्वसिष्ठः। विष्णुः, ४-६ इन्द्राविष्णू। त्रिष्टुप्।]

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति।

उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से॥ १॥

परः। मात्रया। तन्वा। वृधान। न। ते। महिऽत्वम्। अनु। अश्नुवन्ति।

उभे इति। ते। विद्म। रजसी इति। पृथिव्याः। विष्णो इति। देव। त्वम्। परमस्य। वित्से॥ १॥

न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप।

उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः॥ २॥

न। ते। विष्णो इति। जायमानः। न। जातः। देव। महिम्नः। परम्। अन्तम्। आप।

उत्। अस्तभ्नाः। नाकम्। ऋष्वम्। बृहन्तम्। दाधर्थ। प्राचीम्। ककुभम्। पृथिव्याः॥ २॥

इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या।

व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥ ३॥

इरावती इतीराऽवती। धेनुमती इति धेनुऽमती। हि। भूतम्। सुयवसिनी इति सुऽयवसिनी। मनुषे। दशस्या।

वि। अस्तभ्नाः। रोदसी इति। विष्णो इति। एते इति। दाधर्थ। पृथिवीम्। अभितः। मयूखैः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम्।
दासस्य चिद् वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु॥ ४॥

उरुम्। यज्ञाय। चक्रथुः। ऊँ इति। लोकम्। जनयन्ता। सूर्यम्। उषसम्। अग्निम्।
दासस्य। चित्। वृषऽशिप्रस्य। मायाः। जघ्नथुः। नरा। पृतनाज्येषु॥ ४॥

इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥ ५॥

इन्द्राविष्णू इति। दृंहिताः। शम्बरस्य। नव। पुरः। नवतिम्। च। श्नथिष्टम्।
शतम्। वर्चिनः। सहस्रम्। च। साकम्। हथः। अप्रति। असुरस्य। वीरान्॥ ५॥

इयं मनीषा बृहती बृहन्तोरुक्रमा तवसा वर्धयन्ती।
ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र॥ ६॥

इयम्। मनीषा। बृहती। बृहन्ता। उरुऽक्रमा। तवसा। वर्धयन्ती।
ररे। वाम्। स्तोमम्। विदथेषु। विष्णो इति। पिन्वतम्। इषः। वृजनेषु। इन्द्र॥ ६॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [२४]

वषट्। ते। विष्णो इति। आसः। आ। कृणोमि। तत्। मे। जुषस्व। शिपिऽविष्ट। हव्यम्।
वर्धन्तु। त्वा। सुऽस्तुतयः। गिरः। मे। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[१०१ (१००)] [७ मैत्रावरुणिर्वसिष्ठः। विष्णुः। त्रिष्टुप्।]

नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत्।
प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात्॥ १॥

नु। मर्तः। दयते। सनिष्यन्। यः। विष्णवे। उरुऽगायाय। दाशत्।
प्र। यः। सत्राचा। मनसा। यजाते। एतावन्तम्। नर्यम्। आऽविवासात्॥ १॥

त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः॥ २॥

त्वम्। विष्णो इति। सुऽमतिम्। विश्वऽजन्याम्। अप्रऽयुताम्। एवऽयावः। मतिम्। दाः।
पर्चः। यथा। नः। सुवितस्य। भूरेः। अश्वऽवतः। पुरुऽचन्द्रस्य। रायः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा।

प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम॥ ३॥

त्रिः। देवः। पृथिवीम्। एषः। एताम्। वि। चक्रमे। शत॰अर्चसम्। महि॰त्वा।

प्र। विष्णुः। अस्तु। तवसः। तवीयान्। त्वेषम्। हि। अस्य। स्थविरस्य। नाम॥ ३॥

वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन्।

ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार॥ ४॥

वि। चक्रमे। पृथिवीम्। एषः। एताम्। क्षेत्राय। विष्णुः। मनुषे। दशस्यन्।

ध्रुवासः। अस्य। कीरयः। जनासः। उरु॰क्षितिम्। सु॰जनिमा। चकार॥ ४॥

प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्।

तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके॥ ५॥

प्र। तत्। ते। अद्य। शिपि॰विष्ट। नाम। अर्यः। शंसामि। वयुनानि। विद्वान्।

तम्। त्वा। गृणामि। तवसम्। अतव्यान्। क्षयन्तम्। अस्य। रजसः। पराके॥ ५॥

किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि।

मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ॥ ६॥

किम्। इत्। ते। विष्णो इति। परि॰चक्ष्यम्। भूत्। प्र। यत्। ववक्षे। शिपि॰विष्टः। अस्मि।

मा। वर्पः। अस्मत्। अप। गूहः। एतत्। यत्। अन्य॰रूपः। सम्॰इथे। बभूथ॥ ६॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।

वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥ ७॥ [२५]

वषट्। ते। विष्णो इति। आसः। आ। कृणोमि। तत्। मे। जुषस्व। शिपि॰विष्ट। हव्यम्।

वर्धन्तु। त्वा। सु॰स्तुतयः। गिरः। मे। यूयम्। पात। स्वस्ति॰भिः। सदा। नः॥ ७॥

इत्याश्वलायन-संहितायां

पञ्चमाष्टके षष्ठोऽध्यायः समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टके सप्तमोऽध्यायः ॥

[१०२ (१०१)] [६ मैत्रावरुणिर्वसिष्ठः (वृष्टिकामः), कुमार आग्नेयो वा। पर्जन्यः। त्रिष्टुप्।]

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघमूधः।

स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति॥ १॥

तिस्रः। वाचः। प्र। वद। ज्योतिःऽअग्राः। याः। एतत्। दुह्रे। मधुऽदोघम्। ऊधः।

सः। वत्सम्। कृण्वन्। गर्भम्। ओषधीनाम्। सद्यः। जातः। वृषभः। रोरवीति॥ १॥

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे।

स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्ट्य१स्मे॥ २॥

यः। वर्धनः। ओषधीनाम्। यः। अपाम्। यः। विश्वस्य। जगतः। देवः। ईशे।

सः। त्रिधातु। शरणम्। शर्म। यंसत्। त्रिऽवर्तु। ज्योतिः। सुऽअभिष्टि। अस्मे इति॥ २॥

स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः।

पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः॥ ३॥

स्तरीः। ऊँ इति। त्वत्। भवति। सूते। ऊँ इति। त्वत्। यथाऽवशम्। तन्वम्। चक्रे। एषः।

पितुः। पयः। प्रति। गृभ्णाति। माता। तेन। पिता। वर्धते। तेन। पुत्रः॥ ३॥

यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः।

त्रयः कोशास उपसेचनासो मध्वः श्चोतन्त्यभितो विरप्शम्॥ ४॥

यस्मिन्। विश्वानि। भुवनानि। तस्थुः। तिस्रः। द्यावः। त्रेधा। सस्रुः। आपः।

त्रयः। कोशासः। उपऽसेचनासः। मध्वः। श्चोतन्ति। अभितः। विऽरप्शम्॥ ४॥

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत्।

मयोभुवो वृष्टयः सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः॥ ५॥

इदम्। वचः। पर्जन्याय। स्वऽराजे। हृदः। अस्तु। अन्तरम्। तत्। जुजोषत्।

मयःऽभुवः। वृष्टयः। सन्तु। अस्मे इति। सुऽपिप्पलाः। ओषधीः। देवऽगोपाः॥ ५॥

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च।

तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [१]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। रेतः॰धाः। वृषभः। शश्वतीनाम्। तस्मिन्। आत्मा। जगतः। तस्थुषः। च॥

तत्। मा। ऋतम्। पातु। शत॰शारदाय। यूयम्। पात। स्वस्ति॰भिः। सदा। नः॥ ६॥

[१०३ (१०२)] [३ मैत्रावरुणिर्वसिष्ठः (वृष्टिकामः), कुमार आग्नेयो वा। पर्जन्यः। गायत्री]

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे। स नो यवसमिच्छतु॥ १॥

पर्जन्याय। प्र। गायत। दिवः। पुत्राय। मीळ्हुषे। सः। नः। यवसम्। इच्छतु॥ १॥

यो गर्भमोषधीनां गवां कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाम्॥ २॥

यः। गर्भम्। ओषधीनाम्। गवाम्। कृणोति। अर्वताम्। पर्जन्यः। पुरुषीणाम्॥ २॥

तस्मा इदास्ये हविर्जुहोता मधुमत्तमम्। इळां नः संयतं करत्॥ ३॥ [२]

तस्मै। इत्। आस्ये। हविः। जुहोत। मधुमत्॰तमम्। इळाम्। नः। सम्॰यतम्। करत्॥ ३॥

[१०४ (१०३)] [११ मैत्रावरुणिर्वसिष्ठः। मण्डूकाः (पर्जन्यः)। त्रिष्टुप्, १, ११, अनुष्टुभौ।]

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः॥ १॥

संवत्सरम्। शशयानाः। ब्राह्मणाः। व्रत॰चारिणः।

वाचम्। पर्जन्य॰जिन्विताम्। प्र। मण्डूकाः। अवादिषुः॥ १॥

दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम्।

गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति॥ २॥

दिव्याः। आपः। अभि। यत्। एनम्। आयन्। दृतिम्। न। शुष्कम्। सरसी इति। शयानम्।

गवाम्। अह। न। मायुः। वत्सिनीनाम्। मण्डूकानाम्। वग्नुः। अत्र। सम्। एति॥ २॥

यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम्।

अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति॥ ३॥

यत्। ईम्। एनाम्। उशतः। अभि। अवर्षीत्। तृष्या॰वतः। प्रावृषि। आ॰गतायाम्।

अख्खलीकृत्य। पितरम्। न। पुत्रः। अन्यम्। उप। वदन्तम्। एति॥ ३॥

अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम्।

मण्डूको यदभिवृष्टः कनिष्कन्पृश्निः संपृङ्क्ते हरितेन वाचम्॥ ४॥

अन्यः। अन्यम्। अनु। गृभ्णाति। एनोः। अपाम्। प्र॰सर्गे। यत्। अमन्दिषाताम्।

मण्डूकः। यत्। अभि॰वृष्टः। कनिस्कन्। पृश्निः। सम्॰पृङ्क्ते। हरितेन। वाचम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः।
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु॥ ५॥ [३]
यत्। एषाम्। अन्यः। अन्यस्य। वाचम्। शाक्तस्यऽइव। वदति। शिक्षमाणः।
सर्वम्। तत्। एषाम्। समृधाऽइव। पर्व। यत्। सु॰वाचः। वदथन। अधि। अप्॰सु॥ ५॥

गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम्।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः॥ ६॥
गो॰मायुः। एकः। अज॰मायुः। एकः। पृश्निः। एकः। हरितः। एकः। एषाम्।
समानम्। नाम। बिभ्रतः। वि॰रूपाः। पुरु॰त्रा। वाचम्। पिपिशुः। वदन्तः॥ ६॥

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव॥ ७॥
ब्राह्मणासः। अति॰रात्रे। न। सोमे। सरः। न। पूर्णम्। अभितः। वदन्तः।
संवत्सरस्य। तत्। अहरिति। परि। स्थ। यत्। मण्डूकाः। प्रावृषीणम्। बभूव॥ ७॥

ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्।
अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न के चित्॥ ८॥
ब्राह्मणासः। सोमिनः। वाचम्। अक्रत। ब्रह्म। कृण्वन्तः। परिवत्सरीणम्।
अध्वर्यवः। घर्मिणः। सिस्विदानाः। आविः। भवन्ति। गुह्याः। न। के। चित्॥ ८॥

देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम्॥ ९॥
देव॰हितिम्। जुगुपुः। द्वादशस्य। ऋतुम्। नरः। न। प्र। मिनन्ति। एते।
संवत्सरे। प्रावृषि। आ॰गतायाम्। तप्ताः। घर्माः। अश्नुवते। वि॰सर्गम्॥ ९॥

गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः॥ १०॥ (४)
गो॰मायुः। अदात्। अज॰मायुः। अदात्। पृश्निः। अदात्। हरितः। नः। वसूनि।
गवाम्। मण्डूकाः। ददतः। शतानि। सहस्र॰सावे। प्र। तिरन्ते। आयुः॥ १०॥

उपप्रवद मण्डूकि वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः॥ ११॥ ★ [४]
उप॰प्रवद। मण्डुकि। वर्षम्। आ। वद। तादुरि। मध्ये। ह्रदस्य। प्लवस्व। वि॰गृह्य। चतुरः। पदः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१०५ (१०४)] [२४ मैत्रावरुणिर्वसिष्ठः। इन्द्रासोमौ; ८, १६, १९-२२, इन्द्रः; ९, १२-१३ सोमः; १०, १४ अग्निः, ११ देवाः, १७, ग्रावाणः, १८ मरुतः, २३ (पूर्वार्धस्य) वसिष्ठाशीः, (उत्तरार्धस्य) पृथिव्यन्तरिक्षे। (राक्षोघ्नं सूक्तम्) त्रिष्टुप्; १-६, १८, २१-२३ जगती; ७ जगती त्रिष्टुब्वा; २५ अनुष्टुप्।]

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः।
परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः॥ १॥

इन्द्रासोमा। तपतम्। रक्षः। उब्जतम्। नि। अर्पयतम्। वृषणा। तमः२वृधः।
परा। शृणीतम्। अचितः। नि। ओषतम्। हतम्। नुदेथाम्। नि। शिशीतम्। अत्रिणः॥ १॥

इन्द्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँइव।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने॥ २॥

इन्द्रासोमा। सम्। अघ॰शंसम्। अभि। अघम्। तपुः। ययस्तु। चरुः। अग्निवान्ऽइव।
ब्रह्म॰द्विषे। क्रव्य॰अदे। घोर॰चक्षसे। द्वेषः। धत्तम्। अनवायम्। किमीदिने॥ २॥

इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम्।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः॥ ३॥

इन्द्रासोमा। दुः२कृतः। वव्रे। अन्तः। अनारम्भणे। तमसि। प्र। विध्यतम्।
यथा। न। अतः। पुनः। एकः। चन। उत्॰अयत्। तम्। वाम्। अस्तु। सहसे। मन्यु॰मत्। शवः॥ ३॥

इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम्।
उत्तक्षतं स्वर्य१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः॥ ४॥

इन्द्रासोमा। वर्तयतम्। दिवः। वधम्। सम्। पृथिव्याः। अघ॰शंसाय। तर्हणम्।
उत्। तक्षतम्। स्वर्यम्। पर्वतेभ्यः। येन। रक्षः। ववृधानम्। नि॰जूर्वथः॥ ४॥

इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम्॥ ५॥ [५]

इन्द्रासोमा। वर्तयतम्। दिवः। परि। अग्नि॰तप्तेभिः। युवम्। अश्महन्म॰भिः।
तपुः२वधेभिः। अजरेभिः। अत्रिणः। नि। पर्शाने। विध्यतम्। यन्तु। निः॰स्वरम्॥ ५॥

इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना।
यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम्॥ ६॥

इन्द्रासोमा। परि। वाम्। भूतु। विश्वतः। इयम्। मतिः। कक्ष्या। अश्वाऽइव। वाजिना॥ याम्।
वाम्। होत्राम्। परि॰हिनोमि। मेधया। इमा। ब्रह्माणि। नृपती इवेति नृपतीऽइव। जिन्वतम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः।

इन्द्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा॥ ७॥

प्रति। स्मरेथाम्। तुजयत्ऽभिः। एवैः। हतम्। द्रुहः। रक्षसः। भङ्गुरऽवतः।

इन्द्रासोमा। दुःऽकृते। मा। सुऽगम्। भूत्। यः। नः। कदा। चित्। अभिऽदासति। द्रुहा॥ ७॥

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः।

आपइव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता॥ ८॥

यः। मा। पाकेन। मनसा। चरन्तम्। अभिऽचष्टे। अनृतेभिः। वचःऽभिः।

आपःऽइव। काशिना। सम्ऽगृभीताः। असन्। अस्तु। असतः। इन्द्र। वक्ता॥ ८॥

ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः।

अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे॥ ९॥

ये। पाकऽशंसम्। विऽहरन्ते। एवैः। ये। वा। भद्रम्। दूषयन्ति। स्वधाभिः।

अहये। वा। तान्। प्रऽददातु। सोमः। आ। वा। दधातु। निःऽऋतेः। उपऽस्थे॥ ९॥

यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम्।

रिपुः स्तेनः स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा३ तना च॥ १०॥ [६]

यः। नः। रसम्। दिप्सति। पित्वः। अग्ने। यः। अश्वानाम्। यः। गवाम्। यः। तनूनाम्।

रिपुः। स्तेनः। स्तेयऽकृत्। दभ्रम्। एतु। नि। सः। हीयताम्। तन्वा। तना। च॥ १०॥

परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वाः।

प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम्॥ ११॥

परः। सः। अस्तु। तन्वा। तना। च। तिस्रः। पृथिवीः। अधः। अस्तु। विश्वाः।

प्रति। शुष्यतु। यशः। अस्य। देवाः। यः। नः। दिवा। दिप्सति। यः। च। नक्तम्॥ ११॥

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते।

तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत्॥ १२॥

सुऽविज्ञानम्। चिकितुषे। जनाय। सत्। च। असत्। च। वचसी इति। पस्पृधाते इति।

तयोः। यत्। सत्यम्। यतरत्। ऋजीयः। तत्। इत्। सोमः। अवति। हन्ति। असत्॥ १२॥

न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम्।

हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न। वै। ॐ इति॑। सोम॑ः। वृ॒जि॒नम्। हि॒नो॒ति॒। न। क्ष॒त्रिय॑म्। मि॒थु॒या। धा॒रय॑न्तम्।
हन्ति॑। रक्ष॑ः। हन्ति॑। अस॑त्। वद॑न्तम्। उ॒भौ। इन्द्र॑स्य। प्र॒ऽसि॑तौ। श॒या॒ते॒ इति॑॥ १३॥

यदि॑ वा॒हमनृ॑तदेव॒ आस॒ मोघं॑ वा दे॒वाँ अ॑प्यू॒हे अ॑ग्ने।
किम॒स्मभ्यं॑ जातवेदो हृणीषे द्रोघ॒वाच॑स्ते निर्ऋ॒थं स॑चन्ताम्॥ १४॥

यदि॑। वा॒। अ॒हम्। अनृ॑तऽदेवः। आस॑। मोघ॑म्। वा॒। दे॒वान्। अ॒पि॒ऽऊ॒हे। अ॒ग्ने॒।
किम्। अ॒स्मभ्य॑म्। जा॒त॒ऽवे॒दः॒। हृ॒णी॒षे॒। द्रो॒घ॒ऽवाच॑ः। ते॒। नि॒ःऽऋ॒थम्। स॒च॒न्ता॒म्॥ १४॥

अ॒द्या मु॑रीय॒ यदि॑ यातु॒धानो॒ अस्मि॒ यदि॒ वायु॑स्त॒तप॒ पूरु॑षस्य।
अधा॒ स वी॒रैर्द॒शभि॒र्वि यू॑या॒ यो मा॒ मोघं॒ यातु॑धा॒नेत्याह॑॥ १५॥ [७]

अ॒द्य। मु॒री॒य॒। यदि॑। या॒तु॒ऽधान॑ः। अस्मि॑। यदि॑। वा॒। आयु॑ः। त॒तप॑। पुरु॑षस्य।
अध॑। सः। वी॒रैः। द॒शऽभि॑ः। वि। यू॒या॒ः। यः। मा॒। मोघ॑म्। यातु॑ऽधान। इति॑। आह॑॥ १५॥

यो मायां॑तु यातु॑धा॒नेत्याह॒ यो वा॑ र॒क्षाः शुचि॑र॒स्मीत्याह॑।
इन्द्र॒स्तं ह॑न्तु मह॒ता व॒धेन॒ विश्व॑स्य ज॒न्तोर॑ध॒मस्प॑दीष्ट॥ १६॥

यः। मा॒। अया॑तुम्। यातु॑ऽधान। इति॑। आह॑। यः। वा॒। र॒क्षाः। शुचि॑ः। अ॒स्मि॒। इति॑। आह॑।
इन्द्र॑ः। तम्। ह॒न्तु॒। म॒हता। व॒धेन॑। विश्व॑स्य। ज॒न्तोः। अ॒ध॒मः। प॒दी॒ष्ट॒॥ १६॥

प्र या जिगा॑ति ख॒र्गले॑व॒ नक्त॒मप॑ द्रु॒हा त॒न्वं॑१ गूह॑माना।
व॒व्राँ अ॑न॒न्ताँ अव॒ सा प॑दीष्ट॒ ग्रावा॑णो घ्नन्तु र॒क्षस॑ उप॒ब्दैः॥ १७॥

प्र। या। जिगा॑ति। ख॒र्गला॑ऽइव। नक्त॑म्। अप॑। द्रु॒हा। त॒न्व॑म्। गूह॑माना।
व॒व्रान्। अ॒न॒न्तान्। अव॑। सा। प॒दी॒ष्ट॒। ग्रावा॑णः। घ्न॒न्तु॒। र॒क्षस॑ः। उ॒प॒ब्दैः॥ १७॥

वि ति॑ष्ठध्वं मरुतो वि॒क्ष्वि१॒च्छत॑ गृभा॒यत॑ र॒क्षस॒ः सं पि॑नष्टन।
वयो॒ ये भू॒त्वी प॒तय॑न्ति न॒क्तभि॒र्ये वा॒ रिपो॑ दधि॒रे दे॒वे अ॑ध्व॒रे॥ १८॥

वि। ति॒ष्ठ॒ध्व॒म्। म॒रु॒तः॒। वि॒क्षु। इ॒च्छत॑। गृ॒भा॒यत॑। र॒क्षस॑ः। सम्। पि॒न॒ष्ट॒न॒।
वय॑ः। ये। भू॒त्वी। प॒तय॑न्ति। न॒क्तऽभि॑ः। ये। वा॒। रिप॑ः। द॒धि॒रे। दे॒वे। अ॒ध्व॒रे॥ १८॥

प्र व॑र्तय दि॒वो अश्मा॑नमिन्द्र॒ सोम॑शितं मघव॒न्त्सं शि॑शाधि।
प्राक्ता॒दपा॑क्तादध॒रादुद॑क्तादभि ज॑हि र॒क्षस॒ः पर्व॑तेन॥ १९॥

प्र। व॒र्त॒य॒। दि॒वः। अश्मा॑नम्। इ॒न्द्र॒। सोम॑ऽशितम्। म॒घ॒ऽव॒न्। सम्। शि॒शा॒धि॒।
प्राक्ता॑त्। अपा॑क्तात्। अ॒ध॒रात्। उद॑क्तात्। अ॒भि। ज॒हि॒। र॒क्षस॑ः। पर्व॑तेन॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम्।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः॥ २०॥ [८]

एते। ऊँ इति। त्ये। पतयन्ति। श्वऽयातवः। इन्द्रम्। दिप्सन्ति। दिप्सवः। अदाभ्यम्।
शिशीते। शक्रः। पिशुनेभ्यः। वधम्। नूनम्। सृजत्। अशनिम्। यातुमत्ऽभ्यः॥ २०॥

इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्या३विवासताम्।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः॥ २१॥

इन्द्रः। यातूनाम्। अभवत्। पराऽशरः। हविःऽमथीनाम्। अभि। आऽविवासताम्।
अभि। इत्। ऊँ इति। शक्रः। परशुः। यथा। वनम्। पात्राऽइव। भिन्दन्। सतः। एति। रक्षसः॥ २१॥

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम्।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र॥ २२॥

उलूकऽयातुम्। शुशुलूकऽयातुम्। जहि। श्वऽयातुम्। उत। कोकऽयातुम्।
सुपर्णऽयातुम्। उत। गृध्रऽयातुम्। दृषदाऽइव। प्र। मृण। रक्षः। इन्द्र॥ २२॥

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान्॥ २३॥

मा। नः। रक्षः। अभि। नट्। यातुऽमावताम्। अप। उच्छतु। मिथुना। या। किमीदिना।
पृथिवी। नः। पार्थिवात्। पातु। अंहसः। अन्तरिक्षम्। दिव्यात्। पातु। अस्मान्॥ २३॥

इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम्।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम्॥ २४॥

इन्द्र। जहि। पुमांसम्। यातुऽधानम्। उत। स्त्रियम्। मायया। शाशदानाम्।
विऽग्रीवासः। मूरऽदेवाः। ऋदन्तु। मा। ते। दृशन्। सूर्यम्। उत्ऽचरन्तम्॥ २४॥

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम्।
रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः॥ २५॥ [९] {६}

प्रति। चक्ष्व। वि। चक्ष्व। इन्द्रः। च। सोम। जागृतम्।
रक्षःऽभ्यः। वधम्। अस्यतम्। अशनिम्। यातुमत्ऽभ्यः॥ २५॥

इत्याश्वलायन-संहितायां सप्तमं मण्डलं समाप्तम्॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अष्टमं मण्डलम्

॥ अथ पञ्चाष्टके सप्तमोऽध्यायः ॥

[१] [१-२ प्रगाथो (घौरः) काण्वः, ३-२९ मेधातिथि-मेध्यातिथी काण्वौ, ३०-३३ प्लायोगिरासङ्गः, ३४ आङ्गिरसी शाश्वती ऋषिका। इन्द्रः, ३०-३४ आसङ्गः। १-४ प्रगाथः = (अयुजौ बृहत्यौ, युजः सतोबृहत्यौ), ५-३२ बृहती, ३३-३४ त्रिष्टुप्।]

मा चिद॒न्यद्वि शं॑सत॒ सखा॑यो॒ मा रि॑षण्यत।

इन्द्र॒मित्स्तो॑ता॒ वृष॑णं॒ सचा॑ सु॒ते मुहु॑रु॒क्था च॑ शंसत॥ १॥

मा। चि॒त्। अ॒न्यत्। वि। शं॒स॒त॒। सखा॑यः। मा। रि॒ष॒ण्य॒त॒।

इन्द्र॑म्। इत्। स्तो॒त॒। वृष॑णम्। सचा॑। सु॒ते। मुहुः॑। उ॒क्था। च॒। शं॒स॒त॒॥ १॥

अ॒व॒क्र॒क्षिणं॑ वृष॒भं य॑था॒जुरं॒ गां न च॑र्षणी॒सह॑म्।

वि॒द्वेष॑णं सं॒वन॑नोभयंक॒रं मंहि॑ष्ठमुभया॒विन॑म्॥ २॥

अ॒व॒ऽक्र॒क्षिण॑म्। वृ॒ष॒भम्। य॒था॒। अ॒जुर॑म्। गाम्। न। च॒र्ष॒णि॒ऽसह॑म्।

वि॒ऽद्वेष॑णम्। स॒म्ऽवन॑ना। उ॒भ॒य॒म्ऽक॒रम्। मंहि॑ष्ठम्। उ॒भ॒या॒विन॑म्॥ २॥

यच्चि॒द्धि त्वा जना॑ इ॒मे नाना॒ हव॑न्त ऊ॒तये॑।

अ॒स्माकं॒ ब्रह्मे॒दमि॑न्द्र भूतु॒ तेऽहा विश्वा॑ च॒ वर्धन॑म्॥ ३॥

यत्। चि॒त्। हि। त्वा॒। जनाः॑। इ॒मे। नाना॑। हव॑न्ते। ऊ॒तये॑।

अ॒स्माक॑म्। ब्रह्म॑। इ॒दम्। इ॒न्द्र॒। भू॒तु॒। ते॒। अहा॑। विश्वा॑। च॒। वर्धन॑म्॥ ३॥

वि त॑र्तूर्यन्ते मघवन्विप॒श्चितो॒ऽर्यो विपो॒ जना॑नाम्।

उप॑ क्रमस्व पुरु॒रूप॒मा भ॑र॒ वाजं॒ नेदि॑ष्ठमू॒तये॑॥ ४॥

वि। त॒र्तू॒र्य॒न्ते॒। म॒घ॒ऽव॒न्। वि॒पः॒ऽचितः॑। अ॒र्यः। विपः॑। जना॑नाम्।

उप॑। क्र॒म॒स्व॒। पु॒रु॒ऽरूप॑म्। आ। भ॒र॒। वाज॑म्। नेदि॑ष्ठम्। ऊ॒तये॑॥ ४॥

म॒हे च॒न त्वाम॑द्रिवः॒ परा॑ शु॒ल्काय॑ देयाम्।

न स॒हस्रा॑य॒ नायुता॑य वज्रिवो॒ न श॒ताय॑ शतामघ॥ ५॥ [१०]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महे। चन। त्वाम्। अद्रिऽवः। परा। शुल्काय। देयाम्।

न। सहस्राय। न। अयुताय। वज्रिऽवः। न। शताय। शतऽमघ ॥ ५ ॥

वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः।

माता च मे च्छदयथः समा वसो वसुत्वनाय राधसे ॥ ६ ॥

वस्यान्। इन्द्र। असि। मे। पितुः। उत। भ्रातुः। अभुञ्जतः।

माता। च। मे। छदयथः। समा। वसो इति। वसुऽत्वनाय। राधसे ॥ ६ ॥

क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः।

अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः ॥ ७ ॥

क्व। इयथ। क्व। इत्। असि। पुरुऽत्रा। चित्। हि। ते। मनः।

अलर्षि। युध्म। खजऽकृत्। पुरम्ऽदर। प्र। गायत्राः। अगासिषुः ॥ ७ ॥

प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः। याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥ ८ ॥

प्र। अस्मै। गायत्रम्। अर्चत। ववातुः। यः। पुरम्ऽदरः।

याभिः। काण्वस्य। उप। बर्हिः। आऽसदम्। यासत्। वज्री। भिनत्। पुरः ॥ ८ ॥

ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः।

अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥ ९ ॥

ये। ते। सन्ति। दशऽग्विनः। शतिनः ये। सहस्रिणः।

अश्वासः। ये। ते। वृषणः। रघुऽद्रुवः। तेभिः। नः। तूयम्। आ। गहि ॥ ९ ॥

आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम्। इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥ १० ॥ [११]

आ। तु। अद्य। सबःऽदुघाम्। हुवे। गायत्रऽवेपसम्।

इन्द्रम्। धेनुम्। सुऽदुघाम्। अन्याम्। इषम्। उरुऽधाराम्। अरम्ऽकृतम् ॥ १० ॥

यत्तुदत्सूर एतशं वङ्कू वातस्य पर्णिना। वहत्कुत्समार्जुनेयं शतक्रतुः त्सरद्गन्धर्वमस्तृतम् ॥ ११ ॥

यत्। तुदत्। सूरः। एतशम्। वङ्कू इति। वातस्य। पर्णिना।

वहत्। कुत्सम्। आर्जुनेयम्। शतऽक्रतुः। त्सरत्। गन्धर्वम्। अस्तृतम् ॥ ११ ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः।

संधाता संधिं मघवा पुरूवसुरिष्कर्ता विहुतं पुनः ॥ १२ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। ऋते। चित्। अभिऽश्रिषः। पुरा। जत्रुऽभ्यः। आऽतृदः।

सम्ऽधाता। सम्ऽधिम्। मघऽवा। पुरुऽवसुः। इष्कर्ता। विऽह्रुतम्। पुनरिति ॥ १२ ॥

मा भूम निष्ट्याइवेन्द्र त्वदरणाइव। वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥ १३ ॥

मा। भूम। निष्ट्याःऽइव। इन्द्र। त्वत्। अरणाःऽइव।

वनानि। न। प्रऽजहितानि। अद्रिऽवः। दुरोषासः। अमन्महि ॥ १३ ॥

अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन्। सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥ १४ ॥

अमन्महि। इत्। अनाशवः। अनुग्रासः। च। वृत्रऽहन्।

सकृत्। सु। ते। महता। शूर। राधसा। अनु। स्तोमम्। मुदीमहि ॥ १४ ॥

यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः।

तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः ॥ १५ ॥ [१२]

यदि। स्तोमम्। मम। श्रवत्। अस्माकम्। इन्द्रम्। इन्दवः।

तिरः। पवित्रम्। ससृऽवांसः। आशवः। मन्दन्तु। तुग्र्यऽवृधः ॥ १५ ॥

आ त्वद्य सधस्तुतिं वावातुः सख्युरा गहि।

उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥ १६ ॥

आ। तु। अद्य। सधऽस्तुतिम्। ववातुः। सख्युः। आ। गहि।

उपऽस्तुतिः। मघोनाम्। प्र। त्वा। अवतु। अध। ते। वश्मि। सुऽस्तुतिम् ॥ १६ ॥

सोता हि सोममद्रिभिरेमेनमप्सु धावत। गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥ १७ ॥

सोत। हि। सोमम्। अद्रिऽभिः। आ। ईम्। एनम्। अप्ऽसु। धावत।

गव्या। वस्त्राऽइव। वासयन्तः। इत्। नरः। निः। धुक्षन्। वक्षणाभ्यः ॥ १७ ॥

अध ज्मो अध वा दिवो बृहतो रोचनादधि।

अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ १८ ॥

अध। ज्मः। अध। वा। दिवः। बृहतः। रोचनात्। अधि।

अया। वर्धस्व। तन्वा। गिरा। मम। आ। जाता। सुक्रतो इति सुऽक्रतो। पृण ॥ १८ ॥

इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम्।

शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुम् ॥ १९ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्राय। सु। मदिन्ऽतमम्। सोमम्। सोत। वरेण्यम्।

शक्रः। एनम्। पीपयत्। विश्वया। धिया। हिन्वानम्। न। वाजऽयुम्॥ १९॥

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा।

भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्॥ २०॥ [१३]

मा। त्वा। सोमस्य। गल्दया। सदा। याचन्। अहम्। गिरा।

भूर्णिम्। मृगम्। न। सवनेषु। चुक्रुधम्। कः। ईशानम्। न। याचिषत्॥ २०॥

मदेनेषितं मदमुग्रमुग्रेण शवसा। विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः॥ २१॥

मदेन। इषितम्। मदम्। उग्रम्। उग्रेण। शवसा।

विश्वेषाम्। तरुतारम्। मदऽच्युतम्। मदे। हि। स्म। ददाति। नः॥ २१॥

शेवारे वार्या पुरु देवो मर्ताय दाशुषे। स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः॥ २२॥

शेवारे। वार्या। पुरु। देवः। मर्ताय। दाशुषे।

सः। सुन्वते। च। स्तुवते। च। रासते। विश्वऽगूर्तः। अरिऽस्तुतः॥ २२॥

एन्द्र याहि मत्स्व चित्रेण देव राधसा।

सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम्॥ २३॥

आ। इन्द्र। याहि। मत्स्व। चित्रेण। देव। राधसा।

सरः। न। प्रासि। उदरम्। सपीतिऽभिः। आ। सोमेभिः। उरु। स्फिरम्॥ २३॥

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये।

ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये॥ २४॥

आ। त्वा। सहस्रम्। आ। शतम्। युक्ताः। रथे। हिरण्यये।

ब्रह्मऽयुजः। हरयः। इन्द्र। केशिनः। वहन्तु। सोमऽपीतये॥ २४॥

आ त्वा रथे हिरण्यये हरी मयूरशेप्या।

शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये॥ २५॥ [१४]

आ। त्वा। रथे। हिरण्यये। हरी इति। मयूरऽशेप्या।

शितिऽपृष्ठा। वहताम्। मध्वः। अन्धसः। विवक्षणस्य। पीतये॥ २५॥

पिबा त्व१स्य गिर्वणः सुतस्य पूर्वपाइव।

परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते॥ २६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पिब । तु । अस्य । गिर्वणः । सुतस्य । पूर्वपाःऽइव ।

परिऽकृतस्य । रसिनः । इयम् । आऽसुतिः । चारुः । मदाय । पत्यते ॥ २६ ॥

य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।

गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥ २७ ॥

यः । एकः । अस्ति । दंसना । महान् । उग्रः । अभि । व्रतैः ।

गमत् । सः । शिप्री । न । सः । योषत् । आ । गमत् । हवम् । न । परि । वर्जति ॥ २७ ॥

त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।

त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥ २८ ॥

त्वम् । पुरम् । चरिष्ण्वम् । वधैः । शुष्णस्य । सम् । पिणक् ।

त्वम् । भाः । अनु । चरः । अध । द्विता । यत् । इन्द्र । हव्यः । भुवः ॥ २८ ॥

मम त्वा सूर उदिते मम मध्यंदिने दिवः ।

मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥ २९ ॥

मम । त्वा । सूरे । उत्ऽइते । मम । मध्यंदिने । दिवः ।

मम । प्रऽपित्वे । अपिऽशर्वरे । वसो इति । आ । स्तोमासः । अवृत्सत ॥ २९ ॥

स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनाम् ।

निन्दिताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥ ३० ॥ [१५]

स्तुहि । स्तुहि । इत् । एते । घ । ते । मंहिष्ठासः । मघोनाम् ।

निन्दितऽअश्वः । प्रऽपथी । परमऽज्याः । मघस्य । मेध्यऽअतिथे ॥ ३० ॥

आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहम् ।

उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥ ३१ ॥

आ । यत् । अश्वान् । वनन्ऽवतः । श्रद्धया । अहम् । रथे । रुहम् ।

उत । वामस्य । वसुनः । चिकेतति । यः । अस्ति । याद्वः । पशुः ॥ ३१ ॥

य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया ।

एष विश्वान्यभ्यस्तु सौभगासङ्गस्य स्वनद्रथः ॥ ३२ ॥

यः । ऋज्रा । मह्यम् । ममहे । सह । त्वचा । हिरण्यया ।

एषः । विश्वानि । अभि । अस्तु । सौभगा । आऽसङ्गस्य । स्वनत्ऽरथः ॥ ३२ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध प्लायोगिरति दासदन्यानासङ्गो अग्ने दशभिः सहस्रैः।

अधोक्षणो दश मह्यं रुशन्तो नळाइव सरसो निरतिष्ठन्॥ ३३॥

अध। प्लायोगिः। अति। दासत्। अन्यान्। आऽसङ्गः। अग्ने। दशऽभिः। सहस्रैः।

अध। उक्षणः। दश। मह्यम्। रुशन्तः। नळाःऽइव। सरसः। निः। अतिष्ठन्॥ ३३॥

अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः।

शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि॥ ३४॥ [१६]

अनु। अस्य। स्थूरम्। ददृशे। पुरस्तात्। अनस्थः। ऊरुः। अवऽरम्बमाणः।

शश्वती। नारी। अभिऽचक्ष्य। आह। सुऽभद्रम्। अर्य। भोजनम्। बिभर्षि॥ ३४॥

[२] [१-४० मेधातिथिः काण्वो, आङ्गिरसः प्रियमेधश्च, ४१-४२ मेधातिथिः काण्वः। इन्द्रः। ४१-४२ विभिन्दोर्दानम्। गायत्री, २८ अनुष्टुप्।]

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन्ररिमा ते॥ १॥

इदम्। वसो इति। सुतम्। अन्धः। पिब। सुऽपूर्णम्। उदरम्। अनाभयिन्। ररिम। ते॥ १॥

नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः। अश्वो न निक्तो नदीषु॥ २॥

नृऽभिः। धूतः। सुतः। अश्नैः। अव्यः। वारैः। परिऽपूतः। अश्वः। न। निक्तः। नदीषु॥ २॥

तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः। इन्द्र त्वास्मिन्त्सधमादे॥ ३॥

तम्। ते। यवम्। यथा। गोभिः। स्वादुम्। अकर्म। श्रीणन्तः।

इन्द्र। त्वा। अस्मिन्। सधऽमादे॥ ३॥

इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः। अन्तर्देवान्मर्त्यांश्च॥ ४॥

इन्द्रः। इत्। सोमऽपाः। एकः। इन्द्रः। सुतऽपाः। विश्वऽआयुः।

अन्तः। देवान्। मर्त्यान्। च॥ ४॥

न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम्। अपस्पृण्वते सुहार्दम्॥ ५॥ [१७]

न। यम्। शुक्रः। दुःऽआशीः। न। तृप्राः। उरुऽव्यचसम्।

अपऽस्पृण्वते। सुऽहार्दम्॥ ५॥

गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयन्ते। अभित्सरन्ति धेनुभिः॥ ६॥

गोभिः। यत्। ईम्। अन्ये। अस्मत्। मृगम्। न। व्राः। मृगयन्ते। अभिऽत्सरन्ति। धेनुऽभिः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य। स्वे क्षये सुतपाव्नः॥ ७॥

त्रयः। इन्द्रस्य। सोमाः। सुतासः। सन्तु। देवस्य। स्वे। क्षये। सुतऽपाव्नः॥ ७॥

त्रयः कोशासः श्चोतन्ति तिस्रश्चम्व१ः सुपूर्णाः। समाने अधि भार्मन्॥ ८॥

त्रयः। कोशासः। श्चोतन्ति। तिस्रः। चम्वः। सुऽपूर्णाः। समाने। अधि। भार्मन्॥ ८॥

शुचिरसि पुरुनिःष्ठाः क्षीरैर्मध्यत आशीर्तः। दध्ना मन्दिष्ठः शूरस्य॥ ९॥

शुचिः। असि। पुरुनिःऽस्थाः। क्षीरैः। मध्यतः। आऽशीर्तः। दध्ना। मन्दिष्ठः। शूरस्य॥ ९॥

इमे त इन्द्र सोमास्तीव्रा अस्मे सुतासः। शुक्रा आशिरं याचन्ते॥ १०॥ [१८]

इमे। ते। इन्द्र। सोमाः। तीव्राः। अस्मे इति। सुतासः। शुक्राः। आऽशिरम्। याचन्ते॥ १०॥

ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि। रेवन्तं हि त्वा शृणोमि॥ ११॥

तान्। आऽशिरम्। पुरोळाशम्। इन्द्र। इमम्। सोमम्। श्रीणीहि। रेवन्तम्। हि। त्वा। शृणोमि॥ ११॥

हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम्। ऊधर्न नग्ना जरन्ते॥ १२॥

हृत्ऽसु। पीतासः। युध्यन्ते। दुःऽमदासः। न। सुरायाम्। ऊधः। न। नग्नाः। जरन्ते॥ १२॥

रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः। प्रेदु हरिवः श्रुतस्य॥ १३॥

रेवान्। इत्। रेवतः। स्तोता। स्यात्। त्वाऽवतः। मघोनः। प्र। इत्। ऊँ इति। हरिऽवः। श्रुतस्य॥ १३॥

उक्थं चन शस्यमानमगोररिरा चिकेत। न गायत्रं गीयमानम्॥ १४॥

उक्थम्। चन। शस्यमानम्। अगोः। अरिः। आ। चिकेत। न। गायत्रम्। गीयमानम्॥ १४॥

मा न इन्द्र पीयत्नवे मा शर्धते परा दाः। शिक्षा शचीवः शचीभिः॥ १५॥ [१९]

मा। नः। इन्द्र। पीयत्नवे। मा। शर्धते। परा। दाः। शिक्ष। शचीऽवः। शचीभिः॥ १५॥

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते॥ १६॥

वयम्। ऊँ इति। त्वा। तदित्ऽअर्थाः। इन्द्र। त्वाऽयन्तः। सखायः। कण्वाः। उक्थेभिः। जरन्ते॥ १६॥

न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ। तवेदु स्तोमं चिकेत॥ १७॥

न। घ। ईम्। अन्यत्। आ। पपन। वज्रिन्। अपसः। नविष्टौ। तव। इत्। ऊँ इति। स्तोमम्। चिकेत॥ १७॥

इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः॥ १८॥

इच्छन्ति। देवाः। सुन्वन्तम्। न। स्वप्नाय। स्पृहयन्ति। यन्ति। प्रऽमादम्। अतन्द्राः॥ १८॥

ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्य१स्मान्। महाँइव युवजानिः॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ओ इति । सु । प्र । याहि । वाजेभिः । मा । हृणीथाः । अभि । अस्मान् । महान्ऽइव । युवऽजानिः ॥ १९ ॥

मो ष्व१द्य दुर्हणावान्त्सायं करदारे अस्मत् । अश्रीरइव जामाता ॥ २० ॥ [२०]

मो इति । सु । अद्य । दुःऽहनावान् । सायम् । करत् । आरे । अस्मत् । अश्रीरःऽइव । जामाता ॥ २० ॥

विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम् । त्रिषु जातस्य मनांसि ॥ २१ ॥

विद्म । हि । अस्य । वीरस्य । भूरिऽदावरीम् । सुऽमतिम् । त्रिषु । जातस्य । मनांसि ॥ २१ ॥

आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् । यशस्तरं शतमूतेः ॥ २२ ॥

आ । तु । सिञ्च । कण्वऽमन्तम् । न । घ । विद्म । शवसानात् । यशःऽतरम् । शतम्ऽऊतेः ॥ २२ ॥

ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय । भरा पिबन्नर्याय ॥ २३ ॥

ज्येष्ठेन । सोतः । इन्द्राय । सोमम् । वीराय । शक्राय । भर । पिबत् । नर्याय ॥ २३ ॥

यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः । वाजं स्तोतृभ्यो गोमन्तम् ॥ २४ ॥

यः । वेदिष्ठः । अव्यथिषु । अश्वऽवन्तम् । जरितृऽभ्यः । वाजम् । स्तोतृऽभ्यः । गोऽमन्तम् ॥ २४ ॥

पन्यंपन्यमित्सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥ २५ ॥ [२१]

पन्यम्ऽपन्यम् । इत् । सोतारः । आ । धावत । मद्याय । सोमम् । वीराय । शूराय ॥ २५ ॥

पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् । नि यमते शतमूतिः ॥ २६ ॥

पाता । वृत्रऽहा । सुतम् । आ । घ । गमत् । न । आरे । अस्मत् । नि । यमते । शतम्ऽऊतिः ॥ २६ ॥

एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् । गीर्भिः श्रुतं गिर्वणसम् ॥ २७ ॥

आ । इह । हरी इति । ब्रह्मऽयुजा । शग्मा । वक्षतः । सखायम् । गीःऽभिः । श्रुतम् । गिर्वणसम् ॥ २७ ॥

स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।

शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् ॥ २८ ॥

स्वादवः । सोमाः । आ । याहि । श्रीताः । सोमाः । आ । याहि ।

शिप्रिन् । ऋषिऽवः । शचीऽवः । न । अयम् । अच्छ । सधऽमादम् ॥ २८ ॥

स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय । इन्द्र कारिणं वृधन्तः ॥ २९ ॥

स्तुतः । च । याः । त्वा । वर्धन्ति । महे । राधसे । नृम्णाय । इन्द्र । कारिणम् । वृधन्तः ॥ २९ ॥

गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि । सत्रा दधिरे शवांसि ॥ ३० ॥ [२२]

गिरः । च । याः । ते । गिर्वाहः । उक्था । च । तुभ्यम् । तानि । सत्रा । दधिरे । शवांसि ॥ ३० ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः। सनादमृक्तो दयते॥ ३१॥

एव। इत्। एषः। तुविऽकूर्मिः। वाजान्। एकः। वज्रऽहस्तः। सनात्। अमृक्तः। दयते॥ ३१॥

हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः॥ ३२॥

हन्ता। वृत्रम्। दक्षिणेन। इन्द्रः। पुरु। पुरुऽहूतः। महान्। महीभिः। शचीभिः॥ ३२॥

यस्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च। अनु घेन्मन्दी मघोनः॥ ३३॥

यस्मिन्। विश्वाः। चर्षणयः। उत। च्यौत्ना। ज्रयांसि। च। अनु। घ। इत्। मन्दी। मघोनः॥ ३३॥

एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे। वाजदावा मघोनाम्॥ ३४॥

एषः। एतानि। चकार। इन्द्रः। विश्वा। यः। अति। शृण्वे। वाजऽदावा। मघोनाम्॥ ३४॥

प्रभर्ता रथं गव्यन्तमपाकाच्चिद्यमवति। इनो वसु स हि वोळ्हा॥ ३५॥ [२३]

प्रऽभर्ता। रथम्। गव्यन्तम्। अपाकात्। चित्। यम्। अवति। इनः। वसु। सः। हि। वोळ्हा॥ ३५॥

सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः। सत्योऽविता विधन्तम्॥ ३६॥

सनिता। विप्रः। अर्वत्ऽभिः। हन्ता। वृत्रम्। नृऽभिः। शूरः। सत्यः। अविता। विधन्तम्॥ ३६॥

यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा। यो भूत्सोमैः सत्यमद्वा॥ ३७॥

यजध्व। एनम्। प्रियऽमेधाः। इन्द्रम्। सत्राचा। मनसा। यः। भूत्। सोमैः। सत्यऽमद्वा॥ ३७॥

गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम्। कण्वासो गात वाजिनम्॥ ३८॥

गाथऽश्रवसम्। सत्ऽपतिम्। श्रवः२कामम्। पुरुऽत्मानम्। कण्वासः। गात। वाजिनम्॥ ३८॥

य ऋते चिद्गास्पदेभ्यो दात्सखा नृभ्यः शचीवान्। ये अस्मिन्काममश्रियन्॥ ३९॥

यः। ऋते। चित्। गाः। पदेभ्यः। दात्। सखा। नृऽभ्यः। शचीऽवान्।

ये। अस्मिन्। कामम्। अश्रियन्॥ ३९॥

इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम्। मेषो भूतो३ऽभि यन्नयः॥ ४०॥

इत्था। धीऽवन्तम्। अद्रिऽवः। काण्वम्। मेध्यऽअतिथिम्। मेषः। भूतः। अभि। यन्। अयः॥ ४०॥

शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत्। अष्टा परः सहस्रा॥ ४१॥

शिक्ष। विभिन्दो इति विऽभिन्दो। अस्मै। चत्वारि। अयुता। ददत्। अष्ट। परः। सहस्रा॥ ४१॥

उत सु त्ये पयोवृधा माकी रणस्य नप्त्या। जनित्वनाय मामहे॥ ४२॥ [२४]

उत। सु। त्ये इति। पयः२वृधा। माकी इति। रणस्य। नप्त्या। जनिऽत्वनाय। ममहे॥ ४२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३] [२४ मेध्यातिथिः काण्वः। इन्द्रः, २१-२४ कौरयाणः पाकस्यामा। प्रगाथाः = (अयुजौ बृहत्यौ, युजौ सतोबृहत्यौ), २१ अनुष्टुप्, २२-२३ गायत्र्यौ, २४ बृहत्।]

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः।

आपिर्नो बोधि सधमाद्यो वृधे३ऽस्माँ अवन्तु ते धियः॥ १॥

पिब। सुतस्य। रसिनः। मत्स्व। नः। इन्द्र। गोऽमतः।

आपिः। नः। बोधि। सधऽमाद्यः। वृधे। अस्मान्। अवन्तु। ते। धियः॥ १॥

भूयाम ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये।

अस्माञ्चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय॥ २॥

भूयाम। ते। सुऽमतौ। वाजिनः। वयम्। मा। नः। स्तः। अभिऽमातये।

अस्मान्। चित्राभिः। अवतात्। अभिष्टिऽभिः। आ। नः। सुम्नेषु। यमय॥ २॥

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम।

पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत॥ ३॥

इमाः। ऊँ इति। त्वा। पुरुवसो इति पुरुऽवसो। गिरः। वर्धन्तु। याः। मम।

पावकऽवर्णाः। शुचयः। विपःऽचितः। अभि। स्तोमैः। अनूषत॥ ३॥

अयं सहस्रमृषिभिः सहस्कृतः समुद्रइव पप्रथे।

सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये॥ ४॥

अयम्। सहस्रम्। ऋषिऽभिः। सहःऽकृतः। समुद्रःऽइव। पप्रथे।

सत्यः। सः। अस्य। महिमा। गृणे। शवः। यज्ञेषु। विप्रऽराज्ये॥ ४॥

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे। इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये॥ ५॥ [२५]

इन्द्रम्। इत्। देवऽतातये। इन्द्रम्। प्रऽयति। अध्वरे।

इन्द्रम्। सम्ऽईके। वनिनः। हवामहे। इन्द्रम्। धनस्य। सातये॥ ५॥

इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत्।

इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः॥ ६॥

इन्द्रः। मह्ना। रोदसी इति। पप्रथत्। शवः। इन्द्रः। सूर्यम्। अरोचयत्।

इन्द्रे। ह। विश्वा। भुवनानि। येमिरे। इन्द्रे। सुवानासः। इन्दवः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः।

समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम्॥ ७॥

अभि। त्वा। पूर्वऽपीतये। इन्द्र। स्तोमेभिः। आयवः।

सम्ऽईचीनासः। ऋभवः। सम्। अस्वरन्। रुद्राः। गृणन्त। पूर्व्यम्॥ ७॥

अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि।

अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा॥ ८॥

अस्य। इत्। इन्द्रः। ववृधे। वृष्ण्यम्। शवः। मदे। सुतस्य। विष्णवि।

अद्य। तम्। अस्य। महिमानम्। आयवः। अनु। स्तुवन्ति। पूर्वऽथा॥ ८॥

तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये।

येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ॥ ९॥

तत्। त्वा। यामि। सुऽवीर्यम्। तत्। ब्रह्म। पूर्वऽचित्तये।

येन। यतिऽभ्यः। भृगवे। धने। हिते। येन। प्रस्कण्वम्। आविथ॥ ९॥

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः।

सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे॥ १०॥ [२६]

येन। समुद्रम्। असृजः। महीः। अपः। तत्। इन्द्र। वृष्णि। ते। शवः।

सद्यः। सः। अस्य। महिमा। न। सम्ऽनशे। यम्। क्षोणीः। अनुऽचक्रदे॥ १०॥

शग्धी न इन्द्र यत्त्वा रयिं यामि सुवीर्यम्।

शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य॥ ११॥

शग्धि। नः। इन्द्र। यत्। त्वा। रयिम्। यामि। सुऽवीर्यम्।

शग्धि। वाजाय। प्रथमम्। सिसासते। शग्धि। स्तोमाय। पूर्व्य॥ ११॥

शग्धी नो अस्य यद्ध पौरमाविथ धियं इन्द्र सिषासतः।

शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम्॥ १२॥

शग्धि। नः। अस्य। यत्। ह। पौरम्। आविथ। धियः। इन्द्र। सिसासतः।

शग्धि। यथा। रुशमम्। श्यावकम्। कृपम्। इन्द्र। प्र। आवः। स्वःऽनरम्॥ १२॥

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः। नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कत्। नव्यः। अतसीनाम्। तुरः। गृणीत। मर्त्यः।

नहि। नु। अस्य। महिमानम्। इन्द्रियम्। स्वः। गृणन्तः। आनशुः॥ १३॥

कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते।

कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः॥ १४॥

कत्। ऊँ इति। स्तुवन्तः। ऋतऽयन्त। देवता। ऋषिः। कः। विप्रः। ओहते।

कदा। हवम्। मघऽवन्। इन्द्र। सुन्वतः। कत्। ऊँ इति। स्तुवतः। आ। गमः॥ १४॥

उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते।

सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथाइव॥ १५॥ [२७]

उत्। ऊँ इति। त्ये। मधुमत्ऽतमाः। गिरः। स्तोमासः। ईरते।

सत्राऽजितः। धनऽसाः। अक्षितऽऊतयः। वाजऽयन्तः। रथाःऽइव॥ १५॥

कण्वाइव भृगवः सूर्याइव विश्वमिद्धीतमानशुः।

इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन्॥ १६॥

कण्वाःऽइव। भृगवः। सूर्याःऽइव। विश्वम्। इत्। धीतम्। आनशुः।

इन्द्रम्। स्तोमेभिः। महयन्तः। आयवः। प्रियऽमेधासः। अस्वरन्॥ १६॥

युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः।

अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि॥ १७॥

युक्ष्व। हि। वृत्रहन्ऽतम। हरी इति। इन्द्र। पराऽवतः।

अर्वाचीनः। मघऽवन्। सोमऽपीतये। उग्रः। ऋष्वेभिः। आ। गहि॥ १७॥

इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये।

स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम्॥ १८॥

इमे। हि। ते। कारवः। वावशुः। धिया। विप्रासः। मेधऽसातये।

सः। त्वम्। नः। मघऽवन्। इन्द्र। गिर्वणः। वेनः। न। शृणुधि। हवम्॥ १८॥

निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः।

निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः॥ १९॥

निः। इन्द्र। बृहतीभ्यः। वृत्रम्। धनुऽभ्यः। अस्फुरः।

निः। अर्बुदस्य। मृगयस्य। मायिनः। निः। पर्वतस्य। गाः। आजः॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः।

निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम्॥ २०॥

निः। अग्नयः। रुरुचुः। निः। ऊँ इति। सूर्यः। निः। सोमः। इन्द्रियः। रसः।

निः। अन्तरिक्षात्। अधमः। महाम्। अहिम्। कृषे। तत्। इन्द्र। पौंस्यम्॥ २०॥

यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः।

विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम्॥ २१॥ [२८]

यम्। मे। दुः। इन्द्रः। मरुतः। पाकऽस्थामा। कौरयाणाः।

विश्वेषाम्। त्मना। शोभिष्ठम्। उपऽइव। दिवि। धावमानम्॥ २२॥

रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम्। अदाद्रायो विबोधनम्॥ २२॥

रोहितम्। मे। पाकऽस्थामा। सुऽधुरम्। कक्ष्यऽप्राम्। अदात्। रायः। विऽबोधनम्॥ २२॥

यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः। अस्तं वयो न तुग्र्यम्॥ २३॥

यस्मै। अन्ये। दश। प्रति। धुरम्। वहन्ति। वह्नयः। अस्तम्। वयः। न। तुग्र्यम्॥ २३॥

आत्मा पितुस्तनूर्वास ओजोदा अभ्यञ्जनम्।

तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम्॥ २४॥ [२९]

आत्मा। पितुः। तनूः। वासः। ओजःऽदाः। अभिऽअञ्जनम्।

तुरीयम्। इत्। रोहितस्य। पाकऽस्थामानम्। भोजम्। दातारम्। अब्रवम्॥ २४॥

[४] [२१ देवातिथिः काण्वः। इन्द्रः, १५-१८ पूषा वा, १९-२१ कुरुङ्गः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः), २१ पुरउष्णिक्।]

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः। सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे॥ १॥

यत्। इन्द्र। प्राक्। अपाक्। उदक्। न्यक्। वा। हूयसे। नृऽभिः।

सिम। पुरु। नृऽसूतः। असि। आनवे। असि। प्रऽशर्ध। तुर्वशे॥ १॥

यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा।

कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि॥ २॥

यत्। वा। रुमे। रुशमे। श्यावके। कृपे। इन्द्र। मादयसे। सचा।

कण्वासः। त्वा। ब्रह्मऽभिः। स्तोमऽवाहसः। इन्द्र। आ। यच्छन्ति। आ। गहि॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम्।

आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब॥ ३॥

यथा। गौरः। अपा। कृतम्। तृष्यन्। एति। अव। इरिणम्।

आऽपित्वे। नः। प्रऽपित्वे। तूयम्। आ। गहि। कण्वेषु। सु। सचा। पिब॥ ३॥

मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते।

आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः॥ ४॥

मन्दन्तु। त्वा। मघऽवन्। इन्द्र। इन्दवः। राधःऽदेयाय। सुन्वते।

आऽमुष्य। सोमम्। अपिबः। चमू इति। सुतम्। ज्येष्ठम्। तत्। दधिषे। सहः॥ ४॥

प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा।

विश्वे त इन्द्र पृतनायवो यहो नि वृक्षाइव येमिरे॥ ५॥ [३०]

प्र। चक्रे। सहसा। सहः। बभञ्ज। मन्युम्। ओजसा।

विश्वे। ते। इन्द्र। पृतनाऽयवः। यहो इति। नि। वृक्षाःऽइव। येमिरे॥ ५॥

सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम्।

पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः॥ ६॥

सहस्रेणऽइव। सचते। यविऽयुधा। यः। ते। आनट्। उपऽस्तुतिम्।

पुत्रम्। प्रावर्गम्। कृणुते। सुऽवीर्ये। दाश्नोति। नमउक्तिऽभिः॥ ६॥

मा भेम मा श्रमिष्मोग्रस्य सख्ये तव। महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम्॥ ७॥

मा। भेम। मा। श्रमिष्म। उग्रस्य। सख्ये। तव।

महत्। ते। वृष्णः। अभिऽचक्ष्यम्। कृतम्। पश्येम। तुर्वशम्। यदुम्॥ ७॥

सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति।

मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब॥ ८॥

सव्याम्। अनु। स्फिग्यम्। ववसे। वृषा। न। दानः। अस्य। रोषति।

मध्वा। सम्ऽपृक्ताः। सारघेण। धेनवः। तूयम्। आ। इहि। द्रव। पिब॥ ८॥

अश्वी रथी सुरूप इद्गोमाँ इदिन्द्र ते सखा।

श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अ॒श्वी । र॒थी । सु॒ऽरू॒पः । इत् । गोऽमा॑न् । इत् । इ॒न्द्र॒ । ते॒ । सखा॑ ।

श्वा॒त्रऽभा॑जा । वय॑सा । स॒च॒ते॒ । सदा॑ । च॒न्द्रः । या॒ति॒ । स॒भाम् । उप॑ ॥ ९ ॥

ऋश्यो॒ न तृष्य॑न्नव॒पान॒मा ग॑हि॒ पिबा॒ सोमं॒ वशाँ॒ अनु॑ ।

नि॒मेघ॑मानो मघवन्दि॒वेदि॑व॒ ओजि॑ष्ठं दधिषे॒ सहः॑ ॥ १० ॥ [३१]

ऋश्यः॑ । न । तृष्य॑न् । अ॒व॒ऽपान॑म् । आ । ग॒हि॒ । पिब॑ । सोम॑म् । वशा॑न् । अनु॑ ।

नि॒ऽमेघ॑मानः । म॒घ॒ऽव॒न् । दि॒वेऽदि॑वे । ओजि॑ष्ठम् । द॒धि॒षे॒ । सहः॑ ॥ १० ॥

अध्व॑र्यो॒ द्रावया॒ त्वं सोम॒मिन्द्रः॑ पिपासति ।

उप॑ नूनं युयुजे॒ वृष॑णा॒ हरी॒ आ च॑ जगाम वृत्र॒हा ॥ ११ ॥

अध्व॑र्यो॒ इति॑ । द्र॒वय॑ । त्वम् । सोम॑म् । इन्द्रः॑ । पि॒पा॒स॒ति॒ ।

उप॑ । नूनम् । यु॒यु॒जे॒ । वृष॑णा । हरी॒ इति॑ । आ । च॒ । ज॒गा॒म॒ । वृ॒त्र॒ऽहा ॥ ११ ॥

स्व॒यं चि॒त्स मन्य॑ते॒ दाशु॑रि॒र्जनो॒ यत्रा॒ सोम॑स्य तृ॒म्पसि॑ ।

इ॒दं ते॒ अन्नं॒ युज्यं॒ समु॑क्षितं॒ तस्येहि॒ प्र द्र॑वा॒ पिब॑ ॥ १२ ॥

स्व॒यम् । चि॒त् । सः । म॒न्य॒ते॒ । दाशु॑रिः । जनः॑ । यत्र॑ । सोम॑स्य । तृ॒म्पसि॑ ।

इ॒दम् । ते॒ । अन्न॑म् । युज्य॑म् । सम्ऽउ॑क्षितम् । तस्य॑ । आ । इ॒हि॒ । प्र । द्र॒व॒ । पिब॑ ॥ १२ ॥

र॒थे॒ष्ठायाध्व॑र्यव॒ः सोम॒मिन्द्रा॑य सोतन । अधि॑ ब्र॒ध्नस्याद्र॑यो॒ वि च॑क्षते सु॒न्वन्तो॑ दा॒श्व॑ध्वरम् ॥ १३ ॥

र॒थे॒ऽस्थाय॑ । अ॒ध्व॒र्य॒वः॒ । सोम॑म् । इन्द्रा॑य । सो॒त॒न॒ ।

अधि॑ । ब्र॒ध्नस्य॑ । अद्र॑यः । वि । च॒क्ष॒ते॒ । सु॒न्वन्तः॑ । दा॒शुऽअ॑ध्वरम् ॥ १३ ॥

उप॑ ब्र॒ध्नं वा॒वाता॒ वृष॑णा॒ हरी॒ इन्द्र॑म॒पसु॑ वक्षतः ।

अ॒र्वाञ्चं॑ त्वा॒ सप्त॑योऽध्वर॒श्रियो॒ वह॑न्तु सव॒नेदुप॑ ॥ १४ ॥

उप॑ । ब्र॒ध्नम् । व॒वाता॑ । वृष॑णा । हरी॒ इति॑ । इन्द्र॑म् । अ॒पऽसु॑ । व॒क्ष॒तः॒ ।

अ॒र्वाञ्च॑म् । त्वा॒ । सप्त॑यः । अ॒ध्व॒र॒ऽश्रिय॑ः । वह॑न्तु । सव॑ना । इत् । उप॑ ॥ १४ ॥

प्र पू॒षणं॑ वृणीमहे॒ युज्या॑य पुरू॒वसु॑म् ।

स श॑क्र शिक्ष पुरुहूत नो धि॒या तुजे॑ रा॒ये वि॑मोचन ॥ १५ ॥ [३२]

प्र । पू॒षण॑म् । वृ॒णी॒म॒हे॒ । युज्या॑य । पु॒रु॒ऽवसु॑म् ।

सः । श॒क्र॒ । शि॒क्ष॒ । पु॒रु॒ऽहू॒त॒ । नः॒ । धि॒या । तुजे॑ । रा॒ये । वि॒ऽमो॒च॒न॒ ॥ १५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सं न॑ः शिशीहि भु॒रिजो॑रिव क्षु॒रं रास्व॑ रा॒यो वि॑मोचन।

त्वे तन्न॑ः सु॒वेद॑मु॒स्रियं॒ वसु॑ यं त्वं हि॒नोषि॑ मर्त्य॑म्॥ १६॥

सम्। नः॒। शि॒शी॒हि॒। भु॒रिजोः॑ऽइव। क्षुरम्। रास्व॑। रा॒यः। वि॒॰मो॒च॒न॒।

त्वे इति॑। तत्। नः॒। सु॒॰वेद॑म्। उ॒स्रिय॑म्। वसु॑। यम्। त्वम्। हि॒नोषि॑। मर्त्य॑म्॥ १६॥

वेमि॑ त्वा पूषन्नृ॒ञ्जसे॒ वेमि॒ स्तोत॑व आघृणे। न तस्य॑ वे॒म्यर॑णं॒ हि तद्व॑सो स्तु॒षे प॒ज्राय॒ साम्ने॑॥ १७॥

वेमि॑। त्वा॒। पू॒ष॒न्। ऋ॒ञ्जसे॑। वेमि॑। स्तोत॑वे। आ॒घृ॒णे॒।

न। तस्य॑। वे॒मि॒। अर॑णम्। हि। तत्। व॒सो॒ इति॑। स्तु॒षे। प॒ज्राय॑। साम्ने॑॥ १७॥

परा॑ गावो॒ यव॑सं॒ कच्चि॑दाघृणे॒ नित्यं॒ रेक्णो॑ अमर्त्य।

अ॒स्माकं॑ पूषन्नवि॒ता शिवो भ॑व॒ मंहि॑ष्ठो॒ वाज॑सातये॥ १८॥

परा॑। गाव॑ः। यव॑सम्। कत्। चि॒त्। आ॒घृ॒णे॒। नित्य॑म्। रेक्ण॑ः। अ॒म॒र्त्य॒।

अ॒स्माक॑म्। पू॒ष॒न्। अ॒वि॒ता। शि॒वः। भ॒व॒। मंहि॑ष्ठः। वाज॑॰सातये॥ १८॥

स्थू॒रं राध॑ः श॒ताश्वं॑ कु॒रु॒ङ्गस्य॒ दिवि॑ष्टिषु। राज्ञ॑स्त्वे॒षस्य॑ सु॒भग॑स्य रा॒तिषु॑ तु॒र्वशे॑ष्वमन्महि॥ १९॥

स्थू॒रम्। राध॑ः। श॒त॰अ॑श्वम्। कु॒रु॒ङ्गस्य॑। दिवि॑ष्टिषु।

राज्ञ॑ः। त्वे॒षस्य॑। सु॒॰भग॑स्य। रा॒तिषु॑। तु॒र्वशे॑षु। अ॒म॒न्म॒हि॒॥ १९॥

धी॒भिः सा॒तानि॑ का॒ण्वस्य॑ वा॒जिन॑ः प्रि॒यमे॑धैर॒भिद्यु॑भिः।

ष॒ष्टिं स॒हस्रानु॒ निर्म॑जामजे॒ निर्यू॑थानि॒ गवा॒मृषि॑ः॥ २०॥

धी॒भिः। सा॒तानि॑। का॒ण्वस्य॑। वा॒जिन॑ः। प्रि॒य॰मे॑धैः। अ॒भिद्यु॑॰भिः।

ष॒ष्टिम्। स॒हस्रा॑। अनु॑। निः॰म॑जाम्। अ॒जे॒। निः। यू॒थानि॑। गवा॑म्। ऋषि॑ः॥ २०॥

वृ॒क्षाश्चि॑न्मे अभिपि॒त्वे। अ॑रारणुः। गां भ॑जन्त मे॒हनाश्वं॑ भजन्त मे॒हना॑॥ २१॥ [३३]

वृ॒क्षाः। चि॒त्। मे॒। अ॒भि॒॰पित्वे। अ॒र॒र॒णुः। गाम्। भ॒ज॒न्त॒। मे॒हना॑। अश्व॑म्। भ॒ज॒न्त॒। मे॒हना॑॥ २१॥

इत्याश्वलायन-संहितायां पञ्चमाष्टके सप्तमोऽध्याय समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ पञ्चमाष्टकेऽष्टमोऽध्यायः ॥

[५] [३९ ब्रह्मातिथिः काण्वः। अश्विनौ, ३७ (उत्तरार्धः)-३९ चैद्यस्य कशोर्दानस्तुतिः। गायत्री, ३७-३८ बृहती, ३९ अनुष्टुप्।]

दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत्। वि भानुं विश्वधातनत्॥ १॥

दूरात्। इहऽइव। यत्। सती। अरुणऽप्सुः। अशिश्वितत्। वि। भानुम्। विश्वधा। अतनत्॥ १॥

नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा। सचेथे अश्विनोषसम्॥ २॥

नृऽवत्। दस्रा। मनःऽयुजा। रथेन। पृथुऽपाजसा। सचेथे इति। अश्विना। उषसम्॥ २॥

युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत। वाचं दूतो यथोहिषे॥ ३॥

युवाभ्याम्। वाजिनीवसू इति वाजिनीऽवसू। प्रति। स्तोमाः। अदृक्षत।

वाचम्। दूतः। यथा। ओहिषे॥ ३॥

पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू। स्तुषे कण्वासो अश्विना॥ ४॥

पुरुऽप्रिया। नः। ऊतये। पुरुऽमन्द्रा। पुरुवसू इति पुरुऽवसू। स्तुषे। कण्वासः। अश्विना॥ ४॥

मंहिष्ठा वाजसातमेषयन्ता शुभस्पती। गन्तारा दाशुषो गृहम्॥ ५॥ [१]

मंहिष्ठा। वाजऽसातमा। इषयन्ता। शुभः। पती इति। गन्तारा। दाशुषः। गृहम्॥ ५॥

ता सुदेवाय दाशुषे सुमेधामवितारिणीम्। घृतैर्गव्यूतिमुक्षतम्॥ ६॥

ता। सुऽदेवाय। दाशुषे। सुऽमेधाम्। अविऽतारिणीम्। घृतैः। गव्यूतिम्। उक्षतम्॥ ६॥

आ नः स्तोममुप द्रवत्तूयं श्येनेभिराशुभिः। यातमश्वेभिरश्विना॥ ७॥

आ। नः। स्तोमम्। उप। द्रवत्। तूयम्। श्येनेभिः। आशुऽभिः। यातम्। अश्वेभिः। अश्विना॥ ७॥

येभिस्तिस्रः परावतो दिवो विश्वानि रोचना। त्रीँरक्तून्परिदीयथः॥ ८॥

येभिः। तिस्रः। पराऽवतः। दिवः। विश्वानि। रोचना। त्रीन्। अक्तून्। परिऽदीयथः॥ ८॥

उत नो गोमतीरिष उत सातीरहर्विदा। वि पथः सातये सितम्॥ ९॥

उत। नः। गोऽमतीः। इषः। उत। सातीः। अहःऽविदा। वि। पथः। सातये। सितम्॥ ९॥

आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम्। वोळ्हमश्वावतीरिषः॥ १०॥ [२]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। गोऽमन्तम्। अश्विना। सुऽवीरम्। सुऽरथम्। रयिम्। वोळ्हम्। अश्वऽवतीः। इषः॥ १०॥

वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी। पिबतं सोम्यं मधु॥ ११॥

ववृधाना। शुभः। पती इति। दस्रा। हिरण्यवर्तनी इति हिरण्यऽवर्तनी। पिबतम्। सोम्यम्। मधु॥ ११॥

अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः। छर्दिर्यन्तमदाभ्यम्॥ १२॥

अस्मभ्यम्। वाजिनीवसू इति वाजिनीऽवसू। मघवत्ऽभ्यः। च। सऽप्रथः।

छर्दिः। यन्तम्। अदाभ्यम्॥ १२॥

नि षु ब्रह्म जनानां याविष्टं तूयमा गतम्। मो ष्व१न्याँ उपारतम्॥ १३॥

नि। सु। ब्रह्म। जनानाम्। या। अविष्टम्। तूयम्। आ। गतम्।

मो इति। सु। अन्यान्। उप। अरतम्॥ १३॥

अस्य पिबतमश्विना युवं मदस्य चारुणः। मध्वो रातस्य धिष्ण्या॥ १४॥

अस्य। पिबतम्। अश्विना। युवम्। मदस्य। चारुणः। मध्वः। रातस्य। धिष्ण्या॥ १४॥

अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम्। पुरुक्षुं विश्वधायसम्॥ १५॥ [३]

अस्मे इति। आ। वहतम्। रयिम्। शतऽवन्तम्। सहस्रिणम्। पुरुऽक्षुम्। विश्वऽधायसम्॥ १५॥

पुरुत्रा चिद्धि वां विह्वयन्ते मनीषिणः। वाघद्भिरश्विना गतम्॥ १६॥

पुरुऽत्रा। चित्। हि। वाम्। नरा। विऽह्वयन्ते। मनीषिणः। वाघत्ऽभिः। अश्विना। आ। गतम्॥ १६॥

जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः। युवां हवन्ते अश्विना॥ १७॥

जनासः। वृक्तऽबर्हिषः। हविष्मन्तः। अरम्ऽकृतः। युवाम्। हवन्ते। अश्विना॥ १७॥

अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः। युवाभ्यां भूत्वश्विना॥ १८॥

अस्माकम्। अद्य। वाम्। अयम्। स्तोमः। वाहिष्ठः। अन्तमः। युवाभ्याम्। भूतु। अश्विना। १८॥

यो ह वां मधुनो दृतिराहितो रथचर्षणे। ततः पिबतमश्विना॥ १९॥

यः। ह। वाम्। मधुनः। दृतिः। आऽहितः। रथऽचर्षणे। ततः। पिबतम्। अश्विना॥ १९॥

तेन नो वाजिनीवसू पश्वे तोकाय शं गवे। वहतं पीवरीरिषः॥ २०॥ [४]

तेन। नः। वाजिनीवसू इति वाजिनीऽवसू। पश्वे। तोकाय। शम्। गवे। वहतम्। पीवरीः। इषः॥ २०॥

उत नो दिव्या इष उत सिन्धूँरहर्विदा। अप द्वारेव वर्षथः॥ २१॥

उत। नः। दिव्याः। इषः। उत। सिन्धून्। अहःऽविदा। अप। द्वाराऽइव। वर्षथः॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुदा वां तौग्र्यो विधत्समुद्रे जहितो नरा। यद्वां रथो विभिष्पतात्॥ २२॥

कुदा। वाम्। तौग्र्यः। विधुत्। सुमुद्रे। जुहितः। नुरा। यत्। वाम्। रथः। विऽभिः। पतात्॥ २२॥

युवं कण्वाय नासुत्यापिरिप्ताय हुर्म्ये। शश्वदूतीर्दशस्यथः॥ २३॥

युवम्। कण्वाय। नासुत्या। अपिऽरिप्ताय। हुर्म्ये। शश्वत्। ऊतीः। दुशुस्यथः॥ २३॥

ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः। यद्वां वृषण्वसू हुवे॥ २४॥

ताभिः। आ। यातम्। ऊतिऽभिः। नव्यसीभिः। सुशुस्तिऽभिः।

यत्। वाम्। वृषण्वसू इति वृषण्ऽवसू। हुवे॥ २४॥

यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम्। अत्रिं शिञ्जारमश्विना॥ २५॥ [५]

यथा। चित्। कण्वम्। आवतम्। प्रियऽमेधम्। उपऽस्तुतम्। अत्रिम्। शिञ्जारम्। अश्विना॥ २५॥

यथोत कृत्व्ये धनेऽशुं गोष्वगस्त्यम्। यथा वाजेषु सोभरिम्॥ २६॥

यथा। उत। कृत्व्ये। धने। अंशुम्। गोषु। अगस्त्यम्। यथा। वाजेषु। सोभरिम्॥ २६॥

एतावद्वां वृषण्वसू अतो वा भूयो अश्विना। गृणन्तः सुम्नमीमहे॥ २७॥

एतावत्। वाम्। वृषण्वसू इति वृषण्ऽवसू। अतः। वा। भूयः। अश्विना।

गृणन्तः। सुम्नम्। ईमहे॥ २७॥

रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना। आ हि स्थाथो दिविस्पृशम्॥ २८॥

रथम्। हिरण्यऽवन्धुरम्। हिरण्यऽअभीशुम्। अश्विना। आ। हि। स्थाथः। दिविऽस्पृशम्॥ २८॥

हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः। उभा चक्रा हिरण्यया॥ २९॥

हिरण्ययी। वाम्। रभिः। ईषा। अक्षः। हिरण्ययः। उभा। चक्रा। हिरण्यया॥ २९॥

तेन नो वाजिनीवसू परावतश्चिदा गतम्। उपेमां सुष्टुतिं मम॥ ३०॥ [६]

तेन। नः। वाजिनीवसू इति वाजिनीऽवसू। पराऽवतः। चित्। आ। गतम्।

उप। इमाम्। सुऽस्तुतिम्। मम॥ ३०॥

आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना। इषो दासीरमर्त्या॥ ३१॥

आ। वहेथे इति। पराकात्। पूर्वीः। अश्नन्तौ। अश्विना। इषः। दासीः। अमर्त्या॥ २१॥

आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना। पुरुश्चन्द्रा नासत्या॥ ३२॥

आ। नः। द्युम्नैः। आ। श्रवःऽभिः। आ। राया। यातम्। अश्विना। पुरुऽचन्द्रा। नासत्या॥ ३२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः। अच्छा स्वध्वरं जनम्॥ ३३॥

आ। इह। वाम्। प्रुषितऽप्सवः। वयः। वहन्तु। पर्णिनः। अच्छ। सुऽअध्वरम्। जनम्॥ ३३॥

रथं वामनुगायसं य इषा वर्तते सह। न चक्रमभि बाधते॥ ३४॥

रथम्। वाम्। अनुऽगायसम्। यः। इषा। वर्तते। सह। न। चक्रम्। अभि। बाधते॥ ३४॥

हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः। धीजवना नासत्या॥ ३५॥ [७]

हिरण्ययेन। रथेन। द्रवत्पाणिऽभिः। अश्वैः। धीऽजवना। नासत्या॥ ३५॥

युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू। ता नः पृङ्क्तमिषा रयिम्॥ ३६॥

युवम्। मृगम्। जागृऽवांसम्। स्वदथः। वा। वृषण्वसू इति वृषण्ऽवसू।

ता। नः। पृङ्क्तम्। इषा। रयिम्॥ ३६॥

ता मे अश्विना सनीनां विद्यातं नवानाम्।

यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम्॥ ३७॥

ता। मे। अश्विना। सनीनाम्। विद्यातम्। नवानाम्।

यथा। चित्। चैद्यः। कशुः। शतम्। उष्ट्रानाम्। ददत्। सहस्रा। दश। गोनाम्॥ ३७॥

यो मे हिरण्यसंदृशो दश राज्ञो अमंहत।

अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः॥ ३८॥

यः। मे। हिरण्यऽसंदृशः। दश। राज्ञः। अमंहत।

अधःऽपदाः। इत्। चैद्यस्य। कृष्टयः। चर्मऽम्नाः। अभितः। जनाः॥ ३८॥

माकिरेना पथा गाद्येनेमे यन्ति चेदयः। अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः॥ ३९॥ [८] {१}

माकिः। एना। पथा। गात्। येन। इमे। यन्ति। चेदयः।

अन्यः। न। इत्। सूरिः। ओहते। भूरिदावत्ऽतरः। जनः॥ ३९॥

[६] [४८ वत्सः काण्वः। इन्द्रः, ४६-४८ तिरिन्दिरस्य पारशव्यस्य दानस्तुतिः। गायत्री।]

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँइव। स्तोमैर्वत्सस्य वावृधे॥ १॥

महान्। इन्द्रः। यः। ओजसा। पर्जन्यः। वृष्टिमान्ऽइव। स्तोमैः। वत्सस्य। ववृधे॥ १॥

प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः। विप्रा ऋतस्य वाहसा॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र॒ऽजाम्। ऋ॒तस्य॑। पिप्र॑तः। प्र। यत्। भर॑न्त। वह्न॑यः। विप्राः॑। ऋ॒तस्य॑। वाह॑सा। २॥

कण्वा॒ इन्द्रं॒ यदक्र॑त॒ स्तोमै॑र्य॒ज्ञस्य॒ साध॑नम्। जा॒मि ब्रु॑वत॒ आयु॑धम्॥ ३॥

कण्वाः॑। इन्द्र॑म्। यत्। अक्र॑त। स्तोमैः॑। य॒ज्ञस्य॑। साध॑नम्। जा॒मि। ब्रु॒व॒ते। आयु॑धम्॥ ३॥

सम॑स्य म॒न्यवे॒ विशो॒ विश्वा॑ नमन्त कृ॒ष्टयः॑। स॒मु॒द्राये॑व॒ सिन्ध॑वः॥ ४॥

सम्। अ॒स्य॒। म॒न्यवे॑। विशः॑। विश्वाः॑। न॒म॒न्त॒। कृ॒ष्टयः॑। स॒मु॒द्राय॑ऽइव। सिन्ध॑वः॥ ४॥

ओज॒स्तद॑स्य तित्विष उ॒भे यत्स॒मव॑र्तयत्। इन्द्र॒श्चर्मे॑व॒ रोद॑सी॥ ५॥ [९]

ओजः॑। तत्। अ॒स्य॒। ति॒त्वि॒षे॒। उ॒भे इति॑। यत्। स॒म्ऽअव॑र्तयत्। इन्द्रः॑। चर्म॑ऽइव। रोद॑सी॒ इति॑॥ ५॥

वि चि॑द्वृ॒त्रस्य॒ दोध॑तो॒ वज्रे॑ण श॒तप॑र्वणा। शिरो॑ बिभेद वृ॒ष्णिना॑॥ ६॥

वि। चि॒त्। वृ॒त्रस्य॑। दोध॑तः। वज्रे॑ण। श॒तऽप॑र्वणा। शिरः॑। बि॒भे॒द॒। वृ॒ष्णिना॑॥ ६॥

इ॒मा अ॒भि प्र णो॑नुमो वि॒पामग्रे॑षु धी॒तयः॑। अ॒ग्नेः शो॒चिर्न दि॒द्युतः॑॥ ७॥

इ॒माः। अ॒भि। प्र। नो॒नु॒मः॒। वि॒पाम्। अग्रे॑षु। धी॒तयः॑। अ॒ग्नेः। शो॒चिः। न। दि॒द्युतः॑॥ ७॥

गुहा॑ स॒तीरुप॒ त्मना॒ प्र यच्छोच॑न्त धी॒तयः॑। कण्वा॑ ऋ॒तस्य॒ धार॑या॥ ८॥

गुहा॑। स॒तीः। उप॑। त्मना॑। प्र। यत्। शोच॑न्त। धी॒तयः॑। कण्वाः॑। ऋ॒तस्य॑। धार॑या॥ ८॥

प्र तमि॑न्द्र नशीमहि र॒यिं गोम॑न्तम॒श्विन॑म्। प्र ब्रह्म॑ पू॒र्वचि॑त्तये॥ ९॥

प्र। तम्। इ॒न्द्र॒। न॒शी॒म॒हि॒। र॒यिम्। गोऽम॑न्तम्। अ॒श्विन॑म्। प्र। ब्रह्म॑। पू॒र्वऽचि॑त्तये॥ ९॥

अ॒हमिद्धि पि॒तुष्परि॑ मे॒धामृ॒तस्य॑ ज॒ग्रभ॑। अ॒हं सूर्य॑इवाजनि॥ १०॥ [१०]

अ॒हम्। इत्। हि। पि॒तुः। परि॑। मे॒धाम्। ऋ॒तस्य॑। ज॒ग्रभ॑। अ॒हम्। सूर्यः॑ऽइव। अ॒ज॒नि॒॥ १०॥

अ॒हं प्र॒त्नेन॒ मन्म॑ना॒ गिरः॑ शुम्भामि कण्व॒वत्। येनेन्द्रः॒ शुष्म॒मिद्द॒धे॥ ११॥

अ॒हम्। प्र॒त्नेन॑। मन्म॑ना। गिरः॑। शु॒म्भा॒मि॒। क॒ण्व॒ऽवत्। येन॑। इन्द्रः॑। शुष्म॑म्। इत्। द॒धे॥ ११॥

ये त्वामि॑न्द्र॒ न तु॑ष्टु॒वुर्ऋष॑यो॒ ये च॑ तुष्टु॒वुः। ममेद्व॑र्धस्व॒ सुष्टु॑तः॥ १२॥

ये। त्वाम्। इ॒न्द्र॒। न। तु॒स्तु॒वुः। ऋष॑यः। ये। च॒। तु॒स्तु॒वुः। मम॑। इत्। व॒र्ध॒स्व॒। सुऽस्तु॑तः॥ १२॥

यद॑स्य म॒न्युरध्व॑नी॒द्वि वृ॒त्रं प॑र्व॒शो रु॒जन्। अ॒पः स॑मु॒द्रमैर॑यत्॥ १३॥

यत्। अ॒स्य॒। म॒न्युः। अध्व॑नीत्। वि। वृ॒त्रम्। प॒र्व॒ऽशः। रु॒जन्। अ॒पः। स॒मु॒द्रम्। ऐर॑यत्॥ १३॥

नि शुष्णं॑ इन्द्र ध॒र्ण॒सिं वज्रं॑ जघन्थ॒ दस्य॑वि। वृषा॒ ह्यु॑ग्र शृण्वि॒षे॥ १४॥

नि। शुष्णे॑। इ॒न्द्र॒। ध॒र्ण॒सिम्। वज्र॑म्। ज॒घ॒न्थ॒। दस्य॑वि। वृषा॑। हि। उ॒ग्र॒। शृ॒ण्वि॒षे॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम्। न विव्यचन्त भूमयः॥ १५॥ [११]

न। द्यावः। इन्द्रम्। ओजसा। न। अन्तरिक्षाणि। वज्रिणम्। न। विव्यचन्त। भूमयः॥ १५॥

यस्त इन्द्र महीरपः स्तभूयमान आशयत्। नि तं पद्यासु शिश्नथः॥ १६॥

यः। ते। इन्द्र। महीः। अपः। स्तभुऽयमानः। आ। अशयत्। नि। तम्। पद्यासु। शिश्नथः॥ १६॥

य इमे रोदसी मही समीची समजग्रभीत्। तमोभिरिन्द्र तं गुहः॥ १७॥

यः। इमे इति। रोदसी इति। मही इति। समीची इति समऽईची। समऽअजग्रभीत्।

तमःऽभिः। इन्द्र। तम्। गुहः॥ १७॥

य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः। ममेदुग्र श्रुधी हवम्॥ १८॥

ये। इन्द्र। यतयः। त्वा। भृगवः। ये। च। तुस्तुवुः। मम। इत्। उग्र। श्रुधि। हवम्॥ १८॥

इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम्। एनामृतस्य पिप्युषीः॥ १९॥

इमाः। ते। इन्द्र। पृश्नयः। घृतम्। दुहते। आऽशिरम्। एनाम्। ऋतस्य। पिप्युषीः॥ १९॥

या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन्। परि धर्मेव सूर्यम्॥ २०॥ [१२]

याः। इन्द्र। प्रऽस्वः। त्वा। आसा। गर्भम्। अचक्रिरन्। परि। धर्मऽइव। सूर्यम्॥ २०॥

त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः। त्वां सुतास इन्दवः॥ २१॥

त्वाम्। इत्। शवसः। पते। कण्वाः। उक्थेन। ववृधुः। त्वाम्। सुतासः। इन्दवः। २१॥

तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः। यज्ञो वितन्तसाय्यः॥ २२॥

तव। इत्। इन्द्र। प्रऽनीतिषु। उत। प्रऽशस्तिः। अद्रिऽवः। यज्ञः। वितन्तसाय्यः॥ २२॥

आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीम्। उत प्रजां सुवीर्यम्॥ २३॥

आ। नः। इन्द्र। महीम्। इषम्। पुरम्। न। दर्षि। गोऽमतीम्। उत। प्रऽजाम्। सुऽवीर्यम्॥ २३॥

उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा। अग्रे विक्षु प्रदीदयत्॥ २४॥

उत। त्यत्। आशुऽअश्व्यम्। यत्। इन्द्र। नाहुषीषु। आ। अग्रे। विक्षु। प्रऽदीदयत्॥ २४॥

अभि व्रजं न तत्निषे सूर उपाकचक्षसम्। यदिन्द्र मृळयासि नः॥ २५॥ [१३]

अभि। व्रजम्। न। तत्निषे। सूरः। उपाकऽचक्षसम्। यत्। इन्द्र। मृळयासि। नः॥ २५॥

यदङ्ग तविषीयस इन्द्र प्रराजसि क्षितीः। महाँ अपार ओजसा॥ २६॥

यत्। अङ्ग। तविषीऽयसे। इन्द्र। प्रऽराजसि। क्षितीः। महान्। अपारः। ओजसा॥ २६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये। उरुज्रयसमिन्दुभिः॥ २७॥

तम्। त्वा। हविष्मतीः। विशः। उप। ब्रुवते। ऊतये। उरुऽज्रयसम्। इन्दुऽभिः॥ २७॥

उपह्वरे गिरीणां संगथे च नदीनाम्। धिया विप्रो अजायत॥ २८॥

उपऽह्वरे। गिरीणाम्। सम्ऽगथे। च। नदीनाम्। धिया। विप्रः। अजायत॥ २८॥

अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति। यतो विपान एजति॥ २९॥

अतः। समुद्रम्। उत्ऽवतः। चिकित्वान्। अव। पश्यति। यतः। विपानः। एजति॥ २९॥

आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम्। परो यदिध्यते दिवा॥ ३०॥ [१४]

आत्। इत्। प्रत्नस्य। रेतसः। ज्योतिः। पश्यन्ति। वासरम्। परः। यत्। इध्यते। दिवा॥ ३०॥

कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम्। उतो शविष्ठ वृष्ण्यम्॥ ३१॥

कण्वासः। इन्द्र। ते। मतिम्। विश्वे। वर्धन्ति। पौंस्यम्। उतो इति। शविष्ठ। वृष्ण्यम्॥ ३१॥

इमां म इन्द्र सुष्टुतिं जुषस्व प्र सु मामव। उत प्र वर्धया मतिम्॥ ३२॥

इमाम्। मे। इन्द्र। सुऽस्तुतिम्। जुषस्व। प्र। सु। माम्। अव। उत। प्र। वर्धय। मतिम्॥ ३२॥

उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः। विप्रा अतक्ष्म जीवसे॥ ३३॥

उत। ब्रह्मण्या। वयम्। तुभ्यम्। प्रऽवृद्ध। वज्रिऽवः। विप्राः। अतक्ष्म। जीवसे॥ ३३॥

अभि कण्वा अनूषतापो न प्रवता यतीः। इन्द्रं वनन्वती मतिः॥ ३४॥

अभि। कण्वाः। अनूषत। आपः। न। प्रऽवता। यतीः। इन्द्रम्। वनन्ऽवती। मतिः॥ ३४॥

इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः। अनुत्तमन्युमजरम्॥ ३५॥ [१५]

इन्द्रम्। उक्थानि। ववृधुः। समुद्रम्ऽइव। सिन्धवः। अनुत्तऽमन्युम्। अजरम्॥ ३५॥

आ नो याहि परावतो हरिभ्यां हर्यताभ्याम्। इममिन्द्र सुतं पिब॥ ३६॥

आ। नः। याहि। पराऽवतः। हरिऽभ्याम्। हर्यताभ्याम्। इमम्। इन्द्र। सुतम्। पिब॥ ३६॥

त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः। हवन्ते वाजसातये॥ ३७॥

त्वाम्। इत्। वृत्रहन्ऽतम। जनासः। वृक्तऽबर्हिषः। हवन्ते। वाजऽसातये॥ ३७॥

अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम्। अनु सुवानास इन्दवः॥ ३८॥

अनु। त्वा। रोदसी इति। उभे इति। चक्रम्। न। वर्ति। एतशम्। अनु। सुवानासः। इन्दवः॥ ३८॥

मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति। मत्स्वा विवस्वतो मती॥ ३९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मन्दस्व । सु । स्वः॑ऽनरे । उत । इन्द्र । शर्य॑णाऽवति । मत्स्व॑ । विव॑स्वतः । मती ॥ ३९ ॥

वावृधान उप द्यवि वृषा वज्र्यरोरवीत् । वृत्रहा सोमपातमः ॥ ४० ॥ [१६]

ववृधानः । उप॑ । द्यवि॑ । वृषा॑ । वज्री । अरोरवीत् । वृत्र॒ऽहा । सोम॒ऽपात॑मः ॥ ४० ॥

ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा । इन्द्र चोष्कूयसे वसु ॥ ४१ ॥

ऋषिः । हि । पूर्व॒ऽजाः । असि॑ । एकः॑ । ईशा॑नः । ओज॑सा । इन्द्र॑ । चोष्कूयसे॑ । वसु॑ ॥ ४१ ॥

अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः । शतं वहन्तु हरयः ॥ ४२ ॥

अस्माक॑म् । त्वा । सुतान् । उप॑ । वीत॒ऽपृष्ठाः । अभि । प्रयः॑ । शतम् । वहन्तु । हर॑यः ॥ ४२ ॥

इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम् । कण्वा उक्थेन वावृधुः ॥ ४३ ॥

इमाम् । सु । पूर्व्याम् । धिय॑म् । मधोः॑ । घृतस्य॑ । पिप्युषी॑म् । कण्वाः॑ । उक्थेन॑ । ववृधुः ॥ ४३ ॥

इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः । इन्द्रं सनिष्युरूतये ॥ ४४ ॥

इन्द्र॑म् । इत् । वि॒ऽम॑हीनाम् । मेधे॑ । वृणीत । मर्त्यः॑ । इन्द्र॑म् । सनिष्युः । ऊतये॑ ॥ ४४ ॥

अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥ ४५ ॥

अर्वाञ्च॑म् । त्वा । पुरु॒ऽस्तुत । प्रियमे॑ध॒ऽस्तुता । हरी इति॑ । सोम॒ऽपेया॑य । वक्षतः ॥ ४५ ॥

शतमहं तिरिन्दिरे सहस्रं पर्शावा ददे । राधांसि याद्वानाम् ॥ ४६ ॥

शतम् । अहम् । तिरिन्दिरे । सहस्र॑म् । पर्शौ॑ । आ । ददे । राधांसि याद्वानाम् ॥ ४६ ॥

त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् । ददुष्पज्राय साम्ने ॥ ४७ ॥

त्रीणि॑ । शतानि॑ । अर्व॑ताम् । सहस्रा॑ । दश॑ । गोना॑म् । ददुः । पज्राय॑ । साम्ने॑ ॥ ४७ ॥

उदानट्ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत् । श्रवसा याद्वं जनम् ॥ ४८ ॥ [१७]

उत् । आनट् । ककुहः । दिव॑म् । उष्ट्रान् । चतुः॑ऽयुजः॑ । दद॑त् । श्रव॑सा । याद्व॑म् । जन॑म् ॥ ४८ ॥

[७] [३६ पुनर्वत्सः काण्वः । मरुतः । गायत्री ।]

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥ १ ॥

प्र । यत् । वः । त्रि॒ऽस्तुभ॑म् । इष॑म् । मरु॑तः । विप्रः॑ । अक्ष॑रत् । वि । पर्व॑तेषु । राजथ ॥ १ ॥

यदङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् । नि पर्वता अहासत ॥ २ ॥

यत् । अङ्ग । तविषी॒ऽयवः । याम॑म् । शुभ्राः॑ । अचि॑ध्वम् । नि । पर्व॑ताः । अहासत ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः। धुक्षन्त पिप्युषीमिषम्॥ ३॥

उत्। ईरयन्त। वायुऽभिः। वाश्रासः। पृश्निऽमातरः। धुक्षन्त। पिप्युषीम्। इषम्॥ ३॥

वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान्। यद्यामं यान्ति वायुभिः॥ ४॥

वपन्ति। मरुतः। मिहम्। प्र। वेपयन्ति। पर्वतान्। यत्। यामम्। यान्ति। वायुऽभिः॥ ४॥

नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे। महे शुष्माय येमिरे॥ ५॥ [१८]

नि। यत्। यामाय। वः। गिरिः। नि। सिन्धवः। विऽधर्मणे। महे। शुष्माय। येमिरे॥ ५॥

युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे। युष्मान्प्रयत्यध्वरे॥ ६॥

युष्मान्। ऊँ इति। नक्तम्। ऊतये। युष्मान्। दिवा। हवामहे। युष्मान्। प्रऽयति। अध्वरे॥ ६॥

उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते। वाश्रा अधि ष्णुना दिवः॥ ७॥

उत्। ऊँ इति। त्ये। अरुणऽप्सवः। चित्राः। यामेभिः। ईरते। वाश्राः। अधि। स्नुना। दिवः॥ ७॥

सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे। ते भानुभिर्वि तस्थिरे॥ ८॥

सृजन्ति। रश्मिम्। ओजसा। पन्थाम्। सूर्याय। यातवे। ते। भानुऽभिः। वि। तस्थिरे॥ ८॥

इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः। इमं मे वनता हवम्॥ ९॥

इमाम्। मे। मरुतः। गिरम्। इमम्। स्तोमम्। ऋभुक्षणः। इमम्। मे। वनत। हवम्॥ ९॥

त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु। उत्सं कवन्धमुद्रिणम्॥ १०॥ [१९]

त्रीणि। सरांसि। पृश्नयः। दुदुह्रे। वज्रिणे। मधु। उत्सम्। कवन्धम्। उद्रिणम्॥ १०॥

मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे। आ तू न उप गन्तन॥ ११॥

मरुतः। यत्। ह। वः। दिवः। सुम्नऽयन्तः। हवामहे। आ। तु। नः। उप। गन्तन॥ ११॥

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे। उत प्रचेतसो मदे॥ १२॥

यूयम्। हि। स्थ। सुऽदानवः। रुद्राः। ऋभुक्षणः। दमे। उत। प्रऽचेतसः। मदे॥ १२॥

आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम्। इयर्ता मरुतो दिवः॥ १३॥

आ। नः। रयिम्। मदऽच्युतम्। पुरुऽक्षुम्। विश्वऽधायसम्। इयर्त। मरुतः। दिवः॥ १३॥

अधीव यद्गिरीणां यामं शुभ्रा अचिध्वम्। सुवानैर्मन्दध्व इन्दुभिः॥ १४॥

अधिऽइव। यत्। गिरीणाम्। यामम्। शुभ्राः। अचिध्वम्। सुवानैः। मन्दध्वे। इन्दुऽभिः॥ १४॥

एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः। अदाभ्यस्य मन्मभिः॥ १५॥ [२०]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एताव॑तः। चि॒त्। ए॒षा॒म्। सु॒म्नम्। भि॒क्षे॒त॒। मर्त्यः॑। अदा॑भ्यस्य। मन्म॑ऽभिः॥ १५॥

ये द्र॒प्साइ॑व॒ रोद॑सी॒ धम॒न्त्यनु॑ वृ॒ष्टिभिः॑। उत्सं॑ दु॒हन्तो॒ अक्षि॑तम्॥ १६॥

ये। द्र॒प्साःऽइ॑व। रोद॑सी॒ इति॑। धम॑न्ति। अनु॑। वृ॒ष्टिऽभिः॑। उत्स॑म्। दु॒हन्तः॑। अक्षि॑तम्॥ १६॥

उदु॑ स्वा॒नेभि॑रीरत॒ उद्रथै॑रु॒दु वा॒युभिः॑। उत्स्तोमैः॒ पृश्नि॑मातरः॥ १७॥

उत्। ऊँ॒ इति॑। स्वा॒नेभिः॑। ई॒र॒ते॒। उत्। रथैः॑। ऊँ॒ इति॑। वा॒यु॒ऽभिः॑। उत्। स्तोमैः॑। पृश्नि॑ऽमातरः॥ १७॥

येना॒व तु॒र्वशं॒ यदुं॒ येन॒ कण्वं॑ धन॒स्पृत॑म्। रा॒ये सु तस्य॑ धीमहि॥ १८॥

येन॑। आ॒व। तु॒र्वश॑म्। यदु॑म्। येन॑। कण्व॑म्। ध॒न॒ऽस्पृत॑म्। रा॒ये। सु। तस्य॑। धी॒म॒हि॒॥ १८॥

इ॒मा उ॑ वः सुदानवो घृ॒तं न पि॒प्युषी॒रिषः॑। वर्धा॑न्का॒ण्वस्य॒ मन्म॑भिः॥ १९॥

इ॒माः। ऊँ॒ इति॑। व॒ः। सु॒ऽदा॒न॒वः॒। घृ॒तम्। न। पि॒प्युषीः॑। इषः॑। वर्धा॑न्। का॒ण्वस्य॑। मन्म॑ऽभिः॥ १९॥

क्व॑ नू॒नं सु॑दानवो॒ मद॑था वृक्तबर्हिषः। ब्र॒ह्मा को वः॑ सपर्यति॥ २०॥ [२१]

क्व॑। नू॒नम्। सु॒ऽदा॒न॒वः॒। मद॑थ। वृ॒क्त॒ऽब॒र्हि॒षः॒। ब्र॒ह्मा। कः। व॒ः। स॒प॒र्य॒ति॒॥ २०॥

न॒हि ष्म यद्ध॑ वः पुरा स्तोमे॑भिर्वृक्तबर्हिषः। शर्धाँ॑ ऋ॒तस्य॒ जिन्व॑थ॥ २१॥

न॒हि। स्म॒। यत्। ह॒। व॒ः। पु॒रा। स्तोमे॑भिः। वृ॒क्त॒ऽब॒र्हि॒षः॒। शर्धा॑न्। ऋ॒तस्य॑। जिन्व॑थ॥ २१॥

समु॒ त्ये म॑ह॒तीर॒पः सं क्षो॒णी समु॒ सूर्य॑म्। सं वज्रं॑ पर्व॒शो द॑धुः॥ २२॥

सम्। ऊँ॒ इति॑। त्ये। म॒ह॒तीः। अ॒पः। सम्। क्षो॒णी इति॑। सम्। ऊँ॒ इति॑। सूर्य॑म्।

सम्। वज्र॑म्। प॒र्व॒ऽशः। द॒धुः॥ २२॥

वि वृ॒त्रं प॑र्व॒शो य॑यु॒र्वि पर्व॑ताँ अरा॒जिनः॑। च॒क्रा॒णा वृष्णि॒ पौंस्य॑म्॥ २३॥

वि। वृ॒त्रम्। प॒र्व॒ऽशः। य॒युः॒। वि। पर्व॑तान्। अ॒रा॒जिनः॑। च॒क्रा॒णाः। वृष्णि॑। पौंस्य॑म्॥ २३॥

अनु॑ त्रि॒तस्य॒ युध्य॑तः॒ शुष्म॑मावन्नु॒त क्रतु॑म्। अन्विन्द्रं॑ वृत्र॒तूर्ये॑॥ २४॥

अनु॑। त्रि॒तस्य॑। युध्य॑तः। शुष्म॑म्। आ॒व॒न्। उ॒त। क्रतु॑म्। अनु॑। इन्द्र॑म्। वृ॒त्र॒ऽतूर्ये॑॥ २४॥

वि॒द्युद्ध॑स्ता अ॒भिद्य॑वः॒ शिप्राः॑ शी॒र्षन्हि॑र॒ण्ययीः॑। शु॒भ्रा व्य॑ञ्जत श्रि॒ये॥ २५॥ [२२]

वि॒द्युत्ऽह॑स्ताः। अ॒भिऽद्य॑वः। शिप्राः॑। शी॒र्षन्। हि॒र॒ण्ययीः॑। शु॒भ्राः। वि। अ॒ञ्ज॒त॒। श्रि॒ये॥ २५॥

उ॒शना॒ यत्प॑रा॒वत॑ उ॒क्ष्णो रन्ध्र॒मया॑तन। द्यौर्न च॑क्रदद्भि॒या॥ २६॥

उ॒शना॑। यत्। प॒रा॒ऽवतः॑। उ॒क्ष्णः। रन्ध्र॑म्। अया॑तन। द्यौः। न। च॒क्र॒द॒त्। भि॒या॥ २६॥

आ नो॑ म॒खस्य॑ दा॒वनेऽश्वै॒र्हिर॑ण्यपाणिभिः। देवा॑स॒ उप॑ गन्तन॥ २७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। मखस्य। दावने। अश्वैः। हिरण्यपाणिऽभिः। देवासः। उप। गन्तन॥ २७॥

यदेषां पृषती रथे प्रष्टिर्वहति रोहितः। यान्ति शुभ्रा रिणन्नपः॥ २८॥

यत्। एषाम्। पृषतीः। रथे। प्रष्टिः। वहति। रोहितः। यान्ति। शुभ्राः। रिणन्। अपः॥ २८॥

सुषोमे शर्यणावत्यार्जीके पस्त्यावति। ययुर्निचक्रया नरः॥ २९॥

सुऽसोमे। शर्यणाऽवति। आर्जीके। पस्त्यऽवति। ययुः। निऽचक्रया। नरः॥ २९॥

कदा गच्छाथ मरुत इत्था विप्रं हवमानम्। मार्डीकेभिर्नाधमानम्॥ ३०॥ [२३]

कदा। गच्छाथ। मरुतः। इत्था। विप्रम्। हवमानम्। मार्डीकेभिः। नाधमानम्॥ ३०॥

कद्ध नूनं कधप्रियो यदिन्द्रमजहातन। को वः सखित्व ओहते॥ ३१॥

कत्। ह। नूनम्। कधऽप्रियः। यत्। इन्द्रम्। अजहातन। कः। वः। सखिऽत्वे। ओहते॥ ३१॥

सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः। स्तुषे हिरण्यवाशीभिः॥ ३२॥

सहो इति। सु। नः। वज्रऽहस्तैः। कण्वासः। अग्निम्। मरुत्ऽभिः। स्तुषे। हिरण्यऽवाशीभिः॥ ३२।

ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय। ववृत्यां चित्रवाजान्॥ ३३॥

ओ इति। सु। वृष्णः। प्रऽयज्यून्। आ। नव्यसे। सुविताय। ववृत्याम्। चित्रऽवाजान्॥ ३३॥

गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः। पर्वताश्चिन्नि येमिरे॥ ३४॥

गिरयः। चित्। नि। जिहते। पर्शानासः। मन्यमानाः। पर्वताः। चित्। नि। येमिरे॥ ३४॥

आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः। धातारः स्तुवते वयः॥ ३५॥

आ। अक्ष्णऽयावानः। वहन्ति। अन्तरिक्षेण। पततः। धातारः। स्तुवते। वयः॥ ३५॥

अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा। ते भानुभिर्वि तस्थिरे॥ ३६॥ [२४]

अग्निः। हि। जनि। पूर्व्यः। छन्दः। न। सूरः। अर्चिषा। ते। भानुऽभिः। वि। तस्थिरे॥ ३६॥

[८] [२३ सध्वंसः काण्वः। अश्विनौ; अनुष्टुप्।]

आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम्। दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु॥ १॥

आ। नः। विश्वाभिः। ऊतिऽभिः। अश्विना। गच्छतम्। युवम्।

दस्रा। हिरण्यवर्तनी इति हिरण्यवर्तनी। पिबतम्। सोम्यम्। मधु॥ १॥

आ नूनं यातमश्विना रथेन सूर्यत्वचा। भुजी हिरण्यपेशसा कवी गम्भीरचेतसा॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नूनम्। यातम्। अश्विना। रथेन। सूर्यऽत्वचा।

भुजी इति। हिरण्यऽपेशसा। कवी इति। गम्भीरऽचेतसा॥ २॥

आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः। पिबाथो अश्विना मधु कण्वानां सवने सुतम्॥ ३॥

आ। यातम्। नहुषः। परि। आ। अन्तरिक्षात्। सुऽवृक्तिऽभिः।

पिबाथः। अश्विना। मधु। कण्वानाम्। सवने। सुतम्॥ ३॥

आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया। पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु॥ ४॥

आ। नः। यातम्। दिवः। परि। आ। अन्तरिक्षात्। अधऽप्रिया।

पुत्रः। कण्वस्य। वाम्। इह। सुसाव। सोम्यम्। मधु॥ ४॥

आ नो यातमुपश्रुत्यश्विना सोमपीतये। स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा॥ ५॥ [२५]

आ। नः। यातम्। उपऽश्रुति। अश्विना। सोमऽपीतये।

स्वाहा। स्तोमस्य। वर्धना। प्र। कवी इति। धीतिऽभिः। नरा॥ ५॥

यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा। आ यातमश्विना गतमुपेमां सुष्टुतिं मम॥ ६॥

यत्। चित्। हि। वाम्। पुरा। ऋषयः। जुहूरे। अवसे। नरा।

आ। यातम्। अश्विना। आ। गतम्। उप। इमाम्। सुऽस्तुतिम्। मम॥ ६॥

दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा। धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता॥ ७॥

दिवः। चित्। रोचनात्। अधि। आ। नः। गन्तम्। स्वःऽविदा।

धीभिः। वत्सऽप्रचेतसा। स्तोमेभिः। हवनऽश्रुता॥ ७॥

किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना। पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत्॥ ८॥

किम्। अन्ये। परि। आसते। अस्मत्। स्तोमेभिः। अश्विना।

पुत्रः। कण्वस्य। वाम्। ऋषिः। गीःऽभिः। वत्सः। अवीवृधत्॥ ८॥।

आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना। अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा॥ ९॥

आ। वाम्। विप्रः। इह। अवसे। अह्वत्। स्तोमेभिः। अश्विना।

अरिप्रा। वृत्रहन्ऽतमा। ता। नः। भूतम्। मयःऽभुवा॥ ९॥

आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू। विश्वान्यश्विना युवं प्र धीतान्यगच्छतम्॥ १०॥ [२६]

आ। यत्। वाम्। योषणा। रथम्। अतिष्ठम्। वाजिनीवसू इति वाजिनीऽवसू।

विश्वानि। अश्विना। युवम्। प्र। धीतानि। अगच्छतम्॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतः सहस्रनिर्णिजा रथेना यातमश्विना। वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः॥ ११॥

अतः। सहस्रऽनिर्निजा। रथेन। आ। यातम्। अश्विना।

वत्सः। वाम्। मधुऽमत्। वचः। अशंसीत्। काव्यः। कविः॥ ११॥

पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम्। स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम्॥ १२॥

पुरुऽमन्द्रा। पुरुवसू इति पुरुऽवसू। मनोतरा। रयीणाम्।

स्तोमम्। मे। अश्विनौ। इमम्। अभि। वह्नी इति। अनूषाताम्॥ १२॥

आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया। कृतं न ऋत्वियावतो मा नो रीरधतं निदे॥ १३॥

आ। नः। विश्वानि। अश्विना। धत्तम्। राधांसि। अह्रया।

कृतम्। नः। ऋत्वियऽवतः। मा। नः। रीरधतम्। निदे॥ १३॥

यन्नासत्या परावति यद्वा स्थो अध्यम्बरे। अतः सहस्रनिर्णिजा रथेन यातमश्विना॥ १४॥

यत्। नासत्या। पराऽवति। यत्। वा। स्थः। अधि। अम्बरे।

अतः। सहस्रऽनिर्निजा। रथेन। आ। यातम्। अश्विना॥ १४॥

यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत्। तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम्॥ १५॥ [२७]

यः। वाम्। नासत्यौ। ऋषिः। गीःऽभिः। वत्सः। अवीवृधत्।

तस्मै। सहस्रऽनिर्निजम्। इषम्। धत्तम्। घृतऽश्चुतम्।॥ १५॥

प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम्। यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती॥ १६॥

प्र। अस्मै। ऊर्जम्। घृतऽश्चुतम्। अश्विना। यच्छतम्। युवम्।

यः। वाम्। सुम्नाय। तुस्तवत्। वसुऽयात्। दानुनः। पती इति॥ १६॥

आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा। कृतं नः सुश्रियो नरेमा दातमभिष्टये॥ १७॥

आ। नः। गन्तम्। रिशादसा। इमम्। स्तोमम्। पुरुऽभुजा।

कृतम्। नः। सुऽश्रियः। नरा। इमा। दातम्। अभिष्टये॥ १७॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत। राजन्तावध्वराणामश्विना यामहूतिषु॥ १८॥

आ। वाम्। विश्वाभिः। ऊतिऽभिः। प्रियऽमेधाः। अहूषत।

राजन्तौ। अध्वराणाम्। अश्विना। यामऽहूतिषु॥ १८

आ नो गन्तं मयोभुवाश्विना शंभुवा युवम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत्॥ १९॥

आ। नः। गन्तम्। मयःऽभुवा। अश्विना। शम्ऽभुवा। युवम्।

यः। वाम्। विपन्यू इति। धीतिऽभिः। गीःऽभिः। वत्सः। अवीवृधत्॥ १९॥

याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम्। याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा॥ २०॥ [२८]

याभिः। कण्वम्। मेधऽअतिथिम्। याभिः। वशम्। दशऽव्रजम्।

याभिः। गोऽशर्यम्। आवतम्। ताभिः। नः। अवतम्। नरा॥ २०॥

याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने। ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये॥ २१॥

याभिः। नरा। त्रसदस्युम्। आवतम्। कृत्व्ये। धने।

ताभिः। सु। अस्मान्। अश्विना। प्र। अवतम्। वाजऽसातये॥ २१॥

प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना। पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा॥ २२॥

प्र। वाम्। स्तोमाः। सुऽवृक्तयः। गिरः। वर्धन्तु। अश्विना।

पुरुऽत्रा। वृत्रहन्ऽतमा। ता। नः। भूतम्। पुरुऽस्पृहा॥ २२॥

त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः। कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि॥ २३॥ [२९]

त्रीणि। पदानि। अश्विनोः। आविः। सन्ति। गुहा। परः।

कवी इति। ऋतस्य। पत्मऽभिः। अर्वाक्। जीवेभ्यः। परि॥ २३॥

[९] [२१ शशकर्णः काण्वः। अश्विनौ। अनुष्टुप्, २-३, २०-२१ गायत्र्यः; १, ४, ६, १४, १५ बृहत्यः, ५ ककुबुष्णिक्, १० त्रिष्टुप्, ११ विराट्।]

आ नूनमश्विना युवं वत्सस्य गन्तमवसे।

प्रास्मै यच्छतमवृकं पृथु छर्दिर्युयुतं या अरातयः॥ १॥

आ। नूनम्। अश्विना। युवम्। वत्सस्य। गन्तम्। अवसे।

प्र। अस्मै। यच्छतम्। अवृकम्। पृथु। छर्दिः। युयुतम्। याः। अरातयः॥ १॥

यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु। नृम्णं तद्धत्तमश्विना॥ २॥

यत्। अन्तरिक्षे। यत्। दिवि। यत्। पञ्च। मानुषान्। अनु। नृम्णम्। तत्। धत्तम्। अश्विना॥ २॥

ये वां दंसांस्यश्विना विप्रासः परिमामृशुः। एवेत्काण्वस्य बोधतम्॥ ३॥

ये। वाम्। दंसांसि। अश्विना। विप्रासः। परिऽममृशुः। एव। इत्। काण्वस्य। बोधतम्॥ ३॥

CC-0 Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अ॒यं वां॑ घ॒र्मो अ॑श्विना॒ स्तोमे॑न॒ परि॑ षिच्यते।

अ॒यं सोमो॒ मधु॑मान्वाजिनीवसू॒ येन॑ वृ॒त्रं चिके॑तथः॥ ४॥

अ॒यम्। वा॒म्। घ॒र्मः। अ॒श्वि॒ना॒। स्तोमे॑न। परि॑। सि॒च्य॒ते॒।

अ॒यम्। सोमः॑। मधु॑ऽमान्। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू। येन॑। वृ॒त्रम्। चिके॑तथः॥ ४॥

यद॒प्सु यद्वन॒स्पतौ॒ यदोष॑धीषु पुरुदंससा कृतम्। तेन॑ माविष्टमश्विना॥ ५॥ [३०]

यत्। अ॒प्ऽसु। यत्। व॒न॒स्पतौ॑। यत्। ओष॑धीषु। पु॒रु॒ऽदं॒स॒सा॒। कृ॒तम्।

तेन॑। मा॒। अ॒वि॒ष्टम्। अ॒श्वि॒ना॒॥ ५॥

यन्ना॑सत्या भुर॒ण्यथो॒ यद्वा॑ देव भिष॒ज्यथः॑।

अ॒यं वां॑ व॒त्सो म॒तिभि॒र्न वि॑न्धते ह॒विष्म॑न्तं॒ हि गच्छ॑थः॥ ६॥

यत्। ना॒स॒त्या॒। भु॒र॒ण्यथः॑। यत्। वा॒। दे॒वा॒। भि॒ष॒ज्यथः॑।

अ॒यम्। वा॒म्। व॒त्सः। म॒तिऽभिः॑। न। वि॒न्ध॒ते॒। ह॒विष्म॑न्तम्। हि। गच्छ॑थः॥ ६॥

आ नू॒नम॒श्विनो॒र्ऋषिः॒ स्तोमं॑ चिकेत वा॒मया॑। आ सोमं॒ मधु॑मत्तमं घर्मं सि॑ञ्चा॒दथ॑र्वणि॥ ७॥

आ। नू॒नम्। अ॒श्विनोः॑। ऋषिः॑। स्तोम॑म्। चि॒के॒त॒। वा॒मया॑।

आ। सोम॑म्। मधु॑मत्ऽतमम्। घ॒र्मम्। सि॒ञ्चा॒त्। अथ॑र्वणि॥ ७॥

आ नू॒नं र॒घुव॑र्तनिं॒ रथं॑ तिष्ठाथो अश्विना। आ वां॒ स्तोमा॑ इ॒मे मम॒ नभो॒ न चु॑च्यवीरत॥ ८॥

आ। नू॒नम्। र॒घुऽव॑र्तनिम्। रथ॑म्। ति॒ष्ठा॒थः॒। अ॒श्वि॒ना॒।

आ। वा॒म्। स्तोमाः॑। इ॒मे। मम॑। नभः॑। न। चु॒च्य॒वी॒र॒त॒॥ ८॥

यद॒द्य वां॑ नासत्यो॒क्थैरा॑चुच्युवी॒महि॑। यद्वा॒ वाणी॑भिरश्विने॒वेत्का॒ण्वस्य॑ बोधतम्॥ ९॥

यत्। अ॒द्य। वा॒म्। ना॒स॒त्या॒। उ॒क्थैः। आ॒ऽचु॒च्यु॒वी॒महि॑।

यत्। वा॒। वाणी॑भिः। अ॒श्वि॒ना॒। ए॒व। इत्। का॒ण्वस्य॑। बो॒ध॒त॒म्॥ ९॥

यद्वां॑ क॒क्षीवाँ॑ उ॒त यद्व्य॑श्व॒ ऋषि॒र्यद्वां॑ दी॒र्घत॑मा जु॒हाव॑।

पृथी॒ यद्वां॑ वै॒न्यः साद॑नेष्वे॒वेदतो॑ अश्विना चेतयेथाम्॥ १०॥ [३१]

यत्। वा॒म्। क॒क्षीवा॑न्। उ॒त। यत्। वि॒ऽअ॑श्वः। ऋषिः॑। यत्। वा॒म्। दी॒र्घऽत॑माः। जु॒हाव॑।

पृथी॑। यत्। वा॒म्। वै॒न्यः। सद॑नेषु। ए॒व। इत्। अतः॑। अ॒श्वि॒ना॒। चे॒त॒ये॒था॒म्॥ १०॥

या॒तं छ॒र्दि॒ष्पा उ॒त नः॑ पर॒स्पा भू॒तं ज॑ग॒त्पा उ॒त न॑स्तनू॒पा। व॒र्तिस्तो॒काय॒ तन॑याय यातम्॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यातम्। छर्दिः२पौ। उत। नः। पुरः२पा। भूतम्। जगत्ऽपौ। उत। नः। तनूऽपा।
वर्तिः। तोकाय। तनयाय। यातम्॥ ११॥

यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा।
यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः॥ १२॥

यत्। इन्द्रेण। सऽरथम्। याथः। अश्विना। यत्। वा। वायुना। भवथः। सम्ऽओकसा।
यत्। आदित्येभिः। ऋभुऽभिः। सऽजोषसा। यत्। वा। विष्णोः। विऽक्रमणेषु। तिष्ठथः॥ १२॥

यदद्याश्विनावहं हुवेय वाजसातये। यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः॥ १३॥

यत्। अद्य। अश्विनौ। अहम्। हुवेय। वाजऽसातये।
यत्। पृत्ऽसु। तुर्वणे। सहः। तत्। श्रेष्ठम्। अश्विनोः। अवः॥ १३॥

आ नूनं यातमश्विनेमा हव्यानि वां हिता।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ॥ १४॥

आ। नूनम्। यातम्। अश्विना। इमा। हव्यानि। वाम्। हिता।
इमे। सोमासः। अधि। तुर्वशे। यदौ। इमे। कण्वेषु। वाम्। अथ॥ १४॥

यन्नासत्या पराके अर्वाके अस्ति भेषजम्।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम्॥ १५॥ [३२]

यत्। नासत्या। पराके। अर्वाके। अस्ति। भेषजम्।
तेन। नूनम्। विऽमदाय। प्रऽचेतसा। छर्दिः। वत्साय। यच्छतम्॥ १५॥

अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः। व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः॥ १६॥

अभुत्सि। ऊँ इति। प्र। देव्या। साकम्। वाचा। अहम्। अश्विनोः।
वि। आवः। देवि। आ। मतिम्। वि। रातिम्। मर्त्येभ्यः॥ १६॥

प्र बोधयोषो अश्विना प्र देवि सूनृते महि। प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत्॥ १७॥

प्र। बोधय। उषः। अश्विना। प्र। देवि। सूनृते। महि।
प्र। यज्ञऽहोतः। आनुषक्। प्र। मदाय। श्रवः। बृहत्॥ १७॥

यदुषो यासि भानुना सं सूर्येण रोचसे। आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम्॥ १८॥

यत्। उषः। यासि। भानुना। सम्। सूर्येण। रोचसे।
आ। ह। अयम्। अश्विनोः। रथः। वर्तिः। याति। नृऽपाय्यम्॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदापीतासो अंशवो गावो न दुह्र ऊधभिः। यद्वा वाणीरनूषत प्र देवयन्तो अश्विना॥ १९॥

यत्। आऽपीतासः। अंशवः। गावः। न। दुह्रे। ऊधऽभिः।

यत्। वा। वाणीः। अनूषत। प्र। देवऽयन्तः। अश्विना॥ १९॥

प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे। प्र दक्षाय प्रचेतसा॥ २०॥

प्र। द्युम्नाय। प्र। शवसे। प्र। नृऽसह्याय। शर्मणे। प्र। दक्षाय। प्रऽचेतसा॥ २०॥

यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद्वा सुम्नेभिरुक्थ्या॥ २१॥ [३३]

यत्। नूनम्। धीभिः। अश्विना। पितुः। योना। निऽसीदथः। यत्। वा। सुम्नेभिः। उक्थ्या॥ २१॥

[१०] [६ प्रगाथः काण्वः। अश्विनौ। १, ५ बृहत्यौ, २ मध्ये ज्योतिस्त्रिष्टुप्, ३ अनुष्टुप्, ४ आस्तारपङ्क्तिः, ६ सतोबृहती]

यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना॥ १॥

यत्। स्थः। दीर्घऽप्रसद्मनि। यत्। वा। अदः। रोचने। दिवः।

यत्। वा। समुद्रे। अधि। आऽकृते। गृहे। अतः। आ। यातम्। अश्विना॥ १॥

यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतम्।
बृहस्पतिं विश्वान्देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा॥ २॥

यत्। वा। यज्ञम्। मनवे। सम्ऽमिमिक्षथुः। एव। इत्। काण्वस्य। बोधतम्।

बृहस्पतिम्। विश्वान्। देवान्। अहम्। हुवे। इन्द्राविष्णू इति। अश्विनौ। आशुऽहेषसा॥ २॥

त्या न्व१श्विना हुवे सुदंससा गृभे कृता। ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम्॥ ३॥

त्या। नु। अश्विना। हुवे। सुऽदंससा। गृभे। कृता।

ययोः। अस्ति। प्र। नः। सख्यम्। देवेषु। अधि। आप्यम्॥ ३॥

ययोरधि प्र यज्ञा असूरे सन्ति सूरयः।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु॥ ४॥

ययोः। अधि। प्र। यज्ञाः। असूरे। सन्ति। सूरयः।

ता। यज्ञस्य। अध्वरस्य। प्रऽचेतसा। स्वधाभिः। या। पिबतः। सोम्यम्। मधु॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यद्द्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू।

यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम्॥ ५॥

यत्। अद्य। अश्विनौ। अपाक्। यत्। प्राक्। स्थः। वाजिनीवसू इति वाजिनी॰वसू।

यत्। द्रुह्यवि। अनवि। तुर्वशे। यदौ। हुवे। वाम्। अथ। मा। आ। गतम्॥ ५॥

यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु।

यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना॥ ६॥ [३४]

यत्। अन्तरिक्षे। पतथः। पुरु॰भुजा। यत्। वा। इमे इति। रोदसी इति। अनु।

यत्। वा। स्वधाभिः। अधि॰तिष्ठथः। रथम्। अतः। आ। यातम्। अश्विना॥ ६॥

[११] [१० वत्सः काण्वः। अग्निः। गायत्री, १० त्रिष्टुप्।]

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः॥ १॥

त्वम्। अग्ने। व्रत॰पाः। असि। देवः। आ। मर्त्येषु। आ। त्वम्। यज्ञेषु। ईड्यः॥ १॥

त्वमसि प्रशस्यो विदथेषु सहन्त्य। अग्ने रथीरध्वराणाम्॥ २॥

त्वम्। असि। प्र॰शस्यः। विदथेषु। सहन्त्य। अग्ने। रथीः। अध्वराणाम्॥ २॥

स त्वमस्मदप द्विषो युयोधि जातवेदः। अदेवीरग्ने अरातीः॥ ३॥

सः। त्वम्। अस्मत्। अप। द्विषः। युयोधि। जात॰वेदः। अदेवीः। अग्ने। अरातीः॥ ३॥

अन्ति चित्सन्तमह यज्ञं मर्तस्य रिपोः। नोप वेषि जातवेदः॥ ४॥

अन्ति। चित्। सन्तम्। अह। यज्ञम्। मर्तस्य। रिपोः। न। उप। वेषि। जात॰वेदः॥ ४॥

मर्ता अमर्त्यस्य ते भूरि नाम मनामहे। विप्रासो जातवेदसः॥ ५॥ [३५]

मर्ताः। अमर्त्यस्य। ते। भूरि। नाम। मनामहे। विप्रासः। जात॰वेदसः॥ ५॥

विप्रं विप्रासोऽवसे देवं मर्तास ऊतये। अग्निं गीर्भिर्हवामहे॥ ६॥

विप्रम्। विप्रासः। अवसे। देवम्। मर्तासः। ऊतये। अग्निम्। गीःऽभिः। हवामहे॥ ६॥

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वांकामया गिरा॥ ७॥

आ। ते। वत्सः। मनः। यमत्। परमात्। चित्। सध॰स्थात्। अग्ने। त्वाम्॰कामया। गिरा॥ ७॥

पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरु॒ऽत्रा । हि । स॒म्ऽदृङ् । असि॑ । विशः॑ । विश्वाः॑ । अनु॑ । प्र॒ऽभुः । स॒मत्ऽसु॑ । त्वा॒ । ह॒वा॒म॒हे॒ ॥ ८ ॥

स॒मत्स्व॒ग्निमव॑से वाज॒यन्तो॑ हवामहे । वाजे॑षु चि॒त्रराधसम् ॥ ९ ॥

स॒मत्ऽसु॑ । अ॒ग्निम् । अव॑से । वा॒ज॒ऽयन्तः॑ । ह॒वा॒म॒हे॒ । वाजे॑षु । चि॒त्रऽरा॑धसम् ॥ ९ ॥

प्र॒त्नो हि क॒मीड्यो॑ अध्व॒रेषु॑ स॒नाच्च॒ होता॒ नव्य॑श्च॒ सत्सि॑ ।

स्वां चा॑ग्ने त॒न्वं॑ पि॒प्रय॑स्वा॒स्मभ्यं॑ च॒ सौभ॑ग॒मा य॑जस्व ॥ १० ॥ [३६]

प्र॒त्नः । हि । क॒म् । ईड्यः॑ । अ॒ध्व॒रेषु॑ । स॒नात् । च॒ । होता॑ । नव्यः॑ । च॒ । सत्सि॑ ।

त्वाम् । च॒ । अ॒ग्ने॒ । त॒न्व॑म् । पि॒प्रय॑स्व । अ॒स्मभ्य॑म् । च । सौभ॑गम् । आ । यजस्व ॥ १० ॥

इत्याश्वलायन-संहितायां
पञ्चमाष्टके
अष्टमोऽध्यायः समाप्तः
समाप्तं च पञ्चमाष्टकम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके प्रथमोऽध्यायः॥

[१२] [३३ पर्वतः काण्वः। इन्द्रः। उष्णिक्, ३३ शंकुमती (पिंगलमतेन)।]

य इन्द्र सोमपातमो मदः शविष्ठ चेतति। येना हंसि न्य१त्रिणं तमीमहे॥ १॥

यः। इन्द्र। सोमऽपातमः। मदः। शविष्ठः। चेतति। येन। हंसि। नि। अत्रिणम्। तम्। ईमहे॥ १॥

येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम्। येना समुद्रमाविथा तमीमहे॥ २॥

येन। दशऽग्वम्। अध्रिऽगुम्। वेपयन्तम्। स्वःऽनरम्। येन। समुद्रम्। आविथ। तम्। ईमहे॥ २॥

येन सिन्धुं महीरपो रथाँइव प्रचोदयः। पन्थामृतस्य यातवे तमीमहे॥ ३॥

येन। सिन्धुम्। महीः। अपः। रथान्ऽइव। प्रऽचोदयः। पन्थाम्। ऋतस्य। यातवे। तम्। ईमहे॥ ३॥

इमं स्तोममभिष्टये घृतं न पूतमद्रिवः। येना नु सद्य ओजसा ववक्षिथ॥ ४॥

इमम्। स्तोमम्। अभिष्टये। घृतम्। न। पूतम्। अद्रिऽवः। येन। नु। सद्यः। ओजसा। ववक्षिथ॥ ४॥

इमं जुषस्व गिर्वणः समुद्रइव पिन्वते। इन्द्र विश्वाभिरूतिभिर्ववक्षिथ॥ ५॥ [१]

इमम्। जुषस्व। गिर्वणः। समुद्रःऽइव। पिन्वते। इन्द्र। विश्वाभिः। ऊतिऽभिः। ववक्षिथ॥ ५॥

यो नो देवः परावतः सखित्वनाय मामहे। दिवो न वृष्टिं प्रथयन्ववक्षिथ॥ ६॥

यः। नः। देवः। पराऽवतः। सखिऽत्वनाय। ममहे। दिवः। न। वृष्टिम्। प्रथयन्। ववक्षिथ॥ ६॥

ववक्षुरस्य केतवं उत वज्रो गभस्त्योः। यत्सूर्यो न रोदसी अवर्धयत्॥ ७॥

ववक्षुः। अस्य। केतवः। उत। वज्रः। गभस्त्योः। यत्। सूर्यः। न। रोदसी इति। अवर्धयत्॥ ७॥

यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः। आदित्त इन्द्रियं महि प्र वावृधे॥ ८॥

यदि। प्रऽवृद्ध। सत्ऽपते। सहस्रम्। महिषान्। अघः। आत्। इत्। ते। इन्द्रियम्। महि। प्र। ववृधे॥ ८॥

इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति। अग्निर्वनेव सासहिः प्र वावृधे॥ ९॥

इन्द्रः। सूर्यस्य। रश्मिऽभिः। नि। अर्शसानम्। ओषति। अग्निः। वनाऽइव। ससहिः। प्र। ववृधे॥ ९॥

इयं त ऋत्वियावती धीतिरेति नवीयसी। सपर्यन्ती पुरुप्रिया मिमीत इत्॥ १०॥ [२]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इयम् । ते । ऋत्विय॑ऽवती । धीतिः । एति । नवीयसी । सपर्यन्ती । पुरुऽप्रिया । मिमीते । इत् ॥ १० ॥

गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक् । स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥ ११ ॥

गर्भः । यज्ञस्य । देवऽयुः । क्रतुम् । पुनीते । आनुषक् । स्तोमैः । इन्द्रस्य । ववृधे । मिमीते । इत् ॥ ११ ॥

सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये । प्राची वाशीव सुन्वते मिमीत इत् ॥ १२ ॥

सनिः । मित्रस्य । पप्रथे । इन्द्रः । सोमस्य । पीतये । प्राची । वाशीऽइव । सुन्वते । मिमीते । इत् ॥ १२ ॥

यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः । घृतं न पिप्य आसन्यृतस्य यत् ॥ १३ ॥

यम् । विप्राः । उक्थऽवाहसः । अभिऽप्रमन्दुः । आयवः ।

घृतम् । न । पिप्ये । आसनि । ऋतस्य । यत् ॥ १३ ॥

उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत् । पुरुप्रशस्तमूतय ऋतस्य यत् ॥ १४ ॥

उत । स्वऽराजे । अदितिः । स्तोमम् । इन्द्राय । जीजनत् । पुरुऽप्रशस्तम् । ऊतये । ऋतस्य । यत् ॥ १४ ॥

अभि वह्नय ऊतयेऽनूषत प्रशस्तये । न देव विव्रता हरी ऋतस्य यत् ॥ १५ ॥ [३]

अभि । वह्नयः । ऊतये । अनूषत । प्रऽशस्तये । न । देव । विऽव्रता । हरी इति । ऋतस्य । यत् ॥ १५ ॥

यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये । यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥ १६ ॥

यत् । सोमम् । इन्द्र । विष्णवि । यत् । वा । घ । त्रिते । आप्त्ये ।

यत् । वा । मरुत्ऽसु । मन्दसे । सम् । इन्दुऽभिः ॥ १६ ॥

यद्वा शक्र परावति समुद्रे अधि मन्दसे । अस्माकमित्सुते रणा समिन्दुभिः ॥ १७ ॥

यत् । वा । शक्र । पराऽवति । समुद्रे । अधि । मन्दसे । अस्माकम् । इत् । सुते । रण । सम् । इन्दुऽभिः ॥ १७ ॥

यद्वासि सुन्वतो वृधो यजमानस्य सत्पते । उक्थे वा यस्य रण्यसि समिन्दुभिः ॥ १८ ॥

यत् । वा । असि । सुन्वतः । वृधः । यजमानस्य । सत्ऽपते ।

उक्थे । वा । यस्य । रण्यसि । सम् । इन्दुऽभिः ॥ १८ ॥

देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि । अधा यज्ञाय तुर्वणे व्यानशुः ॥ १९ ॥

देवम्ऽदेवम् । वः । अवसे । इन्द्रम्ऽइन्द्रम् । गृणीषणि । अध । यज्ञाय । तुर्वणे । वि । आनशुः ॥ १९ ॥

यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम् । होत्राभिरिन्द्रं वावृधुर्व्यानशुः ॥ २० ॥ [४]

यज्ञेभिः । यज्ञऽवाहसम् । सोमेभिः । सोमऽपातमम् । होत्राभिः । इन्द्रम् । ववृधुः । वि । आनशुः ॥ २० ॥

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । विश्वा वसूनि दाशुषे व्यानशुः ॥ २१ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मुहीः। अस्य। प्रऽनीतयः। पूर्वीः। उत। प्रऽशस्तयः। विश्वा। वसूनि। दाशुषे। वि। आनशुः॥ २१॥

इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः। इन्द्रं वाणीरनूषता समोजसे॥ २२॥

इन्द्रम्। वृत्राय। हन्तवे। देवासः। दधिरे। पुरः। इन्द्रम्। वाणीः। अनूषत। सम्। ओजसे॥ २२॥

महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम्। अर्कैरभि प्र णोनुमः समोजसे॥ २३॥

महान्तम्। महिना। वयम्। स्तोमेभिः। हवनऽश्रुतम्। अर्कैः। अभि। प्र। नोनुमः। सम्। ओजसे॥ २३॥

न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम्। अमादिदस्य तित्विषे समोजसः॥ २४॥

न। यम्। विविक्तः। रोदसी इति। न। अन्तरिक्षाणि। वज्रिणम्।

अमात्। इत्। अस्य। तित्विषे। सम्। ओजसः॥ २४॥

यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः। आदित्ते हर्यता हरी ववक्षतुः॥ २५॥ [५]

यत्। इन्द्र। पृतनाज्ये। देवाः। त्वा। दधिरे। पुरः। आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः॥ २५॥

यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः। आदित्ते हर्यता हरी ववक्षतुः॥ २६॥

यदा। वृत्रम्। नदीऽवृतम्। शवसा। वज्रिन्। अवधीः। आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः॥ २६॥

यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे। आदित्ते हर्यता हरी ववक्षतुः॥ २७॥

यदा। ते। विष्णुः। ओजसा। त्रीणि। पदा। विऽचक्रमे।

आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः॥ २७॥

यदा ते हर्यता हरी वावृधाते दिवेदिवे। आदित्ते विश्वा भुवनानि येमिरे॥ २८॥

यदा। ते। हर्यता। हरी इति। ववृधाते इति। दिवेऽदिवे। आत्। इत्। ते। विश्वा। भुवनानि। येमिरे॥ २८॥

यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे। आदित्ते विश्वा भुवनानि येमिरे॥ २९॥

यदा। ते। मारुतीः। विशः। तुभ्यम्। इन्द्र। निऽयेमिरे। आत्। इत्। ते। विश्वा। भुवनानि। येमिरे॥ २९॥

यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः। आदित्ते विश्वा भुवनानि येमिरे॥ ३०॥

यदा। सूर्यम्। अमुम्। दिवि। शुक्रम्। ज्योतिः। अधारयः।

आत्। इत्। ते। विश्वा। भुवनानि। येमिरे॥ ३०॥

इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः। जामिं पदेव पिप्रतीं प्राध्वरे॥ ३१॥

इमाम्। ते। इन्द्र। सुऽस्तुतिम्। विप्रः। इयर्ति। धीतिऽभिः।

जामिम्। पदाऽइव। पिप्रतीम्। प्र। अध्वरे॥ ३१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदस्य धामनि प्रिये समीचीनासो अस्वरन्। नाभा यज्ञस्य दोहना प्राध्वरे॥ ३२॥

यत्। अस्य। धामनि। प्रिये। सम्ऽईचीनासः। अस्वरन्। नाभा। यज्ञस्य। दोहना। प्र। अध्वरे॥ ३२॥

सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः। होतेव पूर्वचित्तये प्राध्वरे॥ ३३॥ [६] {२}

सुऽवीर्यम्। सुऽअश्व्यम्। सुऽगव्यम्। इन्द्र। दद्धि। नः होताऽइव। पूर्वऽचित्तये। प्र। अध्वरे॥ ३३॥

[१३] [२३ नारदः काण्वः। इन्द्रः। उष्णिक्।]

इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम्। विदे वृधस्य दक्षसो महान्हि षः॥ १॥

इन्द्रः। सुतेषु। सोमेषु। क्रतुम्। पुनीते। उक्थ्यम्। विदे। वृधस्य। दक्षसः। महान्। हि। सः॥ १॥

स प्रथमे व्योमनि देवानां सदने वृधः। सुपारः सुश्रवस्तमः समप्सुजित्॥ २॥

सः। प्रथमे। विऽओमनि। देवानाम्। सदने। वृधः। सुऽपारः। सुश्रवःऽतमः। सम्। अप्सुऽजित्॥ २॥

तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम्। भवा नः सुम्ने अन्तमः सखा वृधे॥ ३॥

तम्। अह्वे। वाजऽसातये। इन्द्रम्। भराय। शुष्मिणम्। भव। नः। सुम्ने। अन्तमः। सखा। वृधे॥ ३॥

इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः। मन्दानो अस्य बर्हिषो वि राजसि॥ ४॥

इयम्। ते। इन्द्र। गिर्वणः। रातिः। क्षरति। सुन्वतः। मन्दानः। अस्य। बर्हिषः। वि। राजसि॥ ४॥

नूनं तदिन्द्र दद्धि नो यत्त्वा सुन्वन्त ईमहे। रयिं नश्चित्रमा भरा स्वर्विदम्॥ ५॥ [७]

नूनम्। तत्। इन्द्र। दद्धि। नः। यत्। त्वा। सुन्वन्तः। ईमहे।

रयिम्। नः। चित्रम्। आ। भर। स्वःऽविदम्॥ ५॥

स्तोता यत्ते विचर्षणिरतिप्रशर्धयद्गिरः। वयाइवानु रोहते जुषन्त यत्॥ ६॥

स्तोता। यत्। ते। विऽचर्षणिः। अतिऽप्रशर्धयत्। गिरः। वयाःऽइव। अनु। रोहते। जुषन्त। यत्॥ ६॥

प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम्। मदेमदे ववक्षिथा सुकृत्वने॥ ७॥

प्रत्नऽवत्। जनय। गिरः। शृणुधि। जरितुः। हवम्। मदेऽमदे। ववक्षिथ। सुऽकृत्वने॥ ७॥

क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः। अया धिया य उच्यते पतिर्दिवः॥ ८॥

क्रीळन्ति। अस्य। सूनृताः। आपः। न। प्रऽवता। यतीः।

अया। धिया। यः। उच्यते। पतिः। दिवः॥ ८॥

उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी। नमोवृधैरवस्युभिः सुते रण॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उतो इति । पतिः । यः । उच्यते । कृष्टीनाम् । एकः । इत् । वशी ।
नमःऽवृधैः । अवस्युऽभिः । सुते । रण ॥ ९ ॥

स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा । गन्तारा दाशुषो गृहं नमस्विनः ॥ १० ॥ [८]
स्तुहि । श्रुतम् । विपःऽचितम् । हरी इति । यस्य । प्रऽसक्षिणा ।
गन्तारा । दाशुषः । गृहम् । नमस्विनः ॥ १० ॥

तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः । आ याहि यज्ञमाशुभिः शमिद्धि ते ॥ ११ ॥
तूतुजानः । महेऽमते । अश्वेभिः । प्रुषितप्सुऽभिः ।
आ । याहि । यज्ञम् । आशुऽभिः । शम् । इत् । हि । ते ॥ ११ ॥

इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय । श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥ १२ ॥
इन्द्र । शविष्ठ । सत्ऽपते । रयिम् । गृणत्ऽसु । धारय ।
श्रवः । सूरिऽभ्यः । अमृतम् । वसुऽत्वनम् ॥ १२ ॥

हवे त्वा सूर उदिते हवे मध्यंदिने दिवः । जुषाण इन्द्र सप्तिभिर्न आ गहि ॥ १३ ॥
हवे । त्वा । सूरे । उत्ऽइते । हवे । मध्यंदिने । दिवः । जुषाणः । इन्द्र । सप्तिऽभिः । नः । आ । गहि ॥ १३ ॥

आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः । तन्तुं तनुष्व पूर्व्यं यथा विदे ॥ १४ ॥
आ । तु । गहि । प्र । तु । द्रव । मत्स्व । सुतस्य । गोऽमतः ।
तन्तुम् । तनुष्व । पूर्व्यम् । यथा । विदे ॥ १४ ॥

यच्छक्रासि परावति यदर्वावति वृत्रहन् । यद्वा समुद्रे अन्धसोऽवितेदसि ॥ १५ ॥ [९]
यत् । शक्र । असि । पराऽवति । यत् । अर्वाऽवति । वृत्रऽहन् ।
यत् । वा । समुद्रे । अन्धसः । अविता । इत् । असि ॥ १५ ॥

इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः । इन्द्रे हविष्मतीर्विशो अराणिषुः ॥ १६ ॥
इन्द्रम् । वर्धन्तु । नः । गिरः । इन्द्रम् । सुतासः । इन्दवः । इन्द्रे । हविष्मतीः । विशः । अराणिषुः ॥ १६ ॥

तमिद्विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः । इन्द्रं क्षोणीरवर्धयन्वयाइव ॥ १७ ॥
तम् । इत् । विप्राः । अवस्यवः । प्रवत्वतीभिः । ऊतिऽभिः ।
इन्द्रम् । क्षोणीः । अवर्धयन् । वयाःऽइव ॥ १७ ॥

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः सदावृधम् ॥ १८ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रि॑ऽकद्रुकेषु। चेत॑नम्। दे॒वासः॑। य॒ज्ञम्। अ॒त्न॒त॒। तम्। इत्। व॒र्ध॒न्तु॒। नः॒। गिरः॑। स॒दाऽवृ॑धम्॥ १८॥

स्तो॒ता यत्ते॒ अनु॑व्रत उ॒क्थान्यृ॑तु॒था द॒धे। शुचिः॑ पाव॒क उ॑च्यते॒ सो अद्भु॑तः॥ १९॥

स्तो॒ता। यत्। ते॒। अनु॑ऽव्रतः। उ॒क्थानि॑। ऋ॒तु॒ऽथा। द॒धे। शुचिः॑। पा॒व॒कः। उ॒च्य॒ते॒। सः। अद्भु॑तः॥ १९॥

तदिद्रु॒द्रस्य॑ चेतति य॒ह्वं प्र॒त्नेषु॒ धाम॑सु। मनो॒ यत्रा॒ वि तद्द॒धुर्विचे॑तसः॥ २०॥ [१०]

तत्। इत्। रु॒द्रस्य॑। चे॒त॒ति॒। य॒ह्वम्। प्र॒त्नेषु॑। धाम॑ऽसु। मनः॑। यत्र॑। वि। तत्। द॒धुः। विऽचे॑तसः॥ २०॥

यदि॑ मे स॒ख्यमा॒वर॑ इ॒मस्य॑ पा॒ह्यन्ध॑सः। येन॒ विश्वा॒ अति॒ द्विषो॒ अता॑रिम॥ २१॥

यदि॑। मे॒। स॒ख्यम्। आ॒ऽवरः॑। इ॒मस्य॑। पा॒हि॒। अन्ध॑सः। येन॑। विश्वाः॑। अति॑। द्विषः॑। अता॑रिम॥ २१॥

क॒दा त॑ इन्द्र गिर्वणः स्तो॒ता भ॑वाति॒ शंत॑मः। क॒दा नो॒ गव्ये॒ अश्व्ये॒ वसौ॑ दधः॥ २२॥

क॒दा। ते॒। इ॒न्द्र॒। गि॒र्व॒णः॒। स्तो॒ता। भ॒वा॒ति॒। शम्ऽत॑मः। क॒दा। नः॒। गव्ये॑। अश्व्ये॑। वसौ॑। द॒धः॒॥ २२॥

उ॒त ते॒ सुष्टु॑ता॒ हरी॒ वृष॑णा वहतो॒ रथ॑म्। अ॒जु॒र्यस्य॑ म॒दिन्त॑मं॒ यमी॑महे॥ २३॥

उ॒त। ते॒। सु॒ऽस्तु॑ता। हरी॒ इति॑। वृष॑णा। व॒ह॒तः॒। रथ॑म्। अ॒जु॒र्यस्य॑। म॒दिन्ऽत॑मम्। यम्। ईम॑हे॥ २३॥

तमी॑महे पु॑रुष्टु॒तं य॒ह्वं प्र॒त्नाभि॑रू॒तिभिः॑। नि ब॒र्हिषि॑ प्रि॒ये स॑दद॒ध॑ द्वि॒ता॥ २४॥

तम्। ई॒म॒हे॒। पु॒रु॒ऽस्तु॒तम्। य॒ह्वम्। प्र॒त्नाभिः॑। ऊ॒तिऽभिः॑।

नि। ब॒र्हिषि॑। प्रि॒ये। स॒द॒त्। अध॑। द्वि॒ता॥ २४॥

वर्ध॑स्वा॒ सु पु॑रुष्टुत॒ ऋषि॑ष्टुताभिरू॒तिभिः॑। धु॒क्षस्व॑ पि॒प्यु॒षी॒मिष॒मवा॑ च नः॥ २५॥ [११]

वर्ध॑स्व। सु। पु॒रु॒ऽस्तु॒त॒। ऋषि॑ऽस्तुताभिः। ऊ॒तिऽभिः॑।

धु॒क्षस्व॑। पि॒प्यु॒षीम्। इष॑म्। अव॑। च॒। नः॒॥ २५॥

इन्द्र॒ त्वम॑वि॒तेद॑सी॒त्था स्तु॑व॒तो अ॑द्रिवः। ऋ॒तादि॑यर्मि ते॒ धियं॑ मनो॒युज॑म्॥ २६॥

इन्द्र॑। त्वम्। अ॒वि॒ता। इत्। अ॒सि॒। इ॒त्था। स्तु॒व॒तः। अ॒द्रि॒ऽवः॒।

ऋ॒तात्। इ॒य॒र्मि॒। ते॒। धिय॑म्। म॒नः॒ऽयुज॑म्॥ २६॥

इ॒ह त्या स॑ध॒माद्या॑ युजा॒नः सोम॑पीतये। हरी॑ इन्द्र प्र॒तद्व॑सू अ॒भि स्व॑र॥ २७॥

इ॒ह। त्या। स॒ध॒ऽमाद्या॑। यु॒जा॒नः। सोम॑ऽपीतये।

हरी॒ इति॑। इ॒न्द्र॒। प्र॒तद्व॑सू इति॑ प्र॒तत्ऽव॑सू। अ॒भि। स्व॒र॒॥ २७॥

अ॒भि स्व॑रन्तु॒ ये तव॑ रु॒द्रासः॑ सक्षत॒ श्रिय॑म्। उ॒तो म॒रुत्व॑ती॒र्विशो॑ अ॒भि प्रयः॑॥ २८॥

अ॒भि। स्व॒र॒न्तु॒। ये। तव॑। रु॒द्रासः॑। स॒क्ष॒त॒। श्रिय॑म्। उ॒तो इति॑। म॒रुत्व॑तीः। विशः॑। अ॒भि। प्रयः॑॥ २७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमा अस्य प्रतूर्तयः पदं जुषन्त यद्दिवि। नाभा यज्ञस्य सं दधुर्यथा विदे॥ २९॥

इमाः। अस्य। प्रऽतूर्तयः। पदम्। जुषन्त। यत्। दिवि।

नाभा। यज्ञस्य। सम्। दधुः। यथा। विदे॥ २९॥

अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे। मिमीते यज्ञमानुषग्विचक्ष्य॥ ३०॥ [१२]

अयम्। दीर्घाय। चक्षसे। प्राचि। प्रऽयति। अध्वरे। मिमीते। यज्ञम्। आनुषक्। विऽचक्ष्य॥ ३०॥

वृषायमिन्द्र ते रथं उतो ते वृषणा हरी। वृषा त्वं शतक्रतो वृषा हवः॥ ३१॥

वृषा। अयम्। इन्द्र। ते। रथः। उतो इति। ते। वृषणा। हरी इति।

वृषा। त्वम्। शतक्रतो इति शतऽक्रतो। वृषा। हवः॥ ३१॥

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः। वृषा यज्ञो यमिन्वसि वृषा हवः॥ ३२॥

वृषा। ग्रावा। वृषा। मदः। वृषा। सोमः। अयम्। सुतः। वृषा। यज्ञः। यम्। इन्वसि। वृषा। हवः॥ ३२॥

वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः। वावन्थ हि प्रतिष्टुतिं वृषा हवः॥ ३३॥ [१३]

वृषा। त्वा। वृषणम्। हुवे। वज्रिन्। चित्राभिः। ऊतिऽभिः।

ववन्थ। हि। प्रतिऽस्तुतिम्। वृषा। हवः॥ ३३॥

[१४] [१५ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ। इन्द्रः। गायत्री।]

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे गोषखा स्यात्॥ १॥

यत्। इन्द्र। अहम्। यथा। त्वम्। ईशीय। वस्वः। एकः। इत्। स्तोता। मे। गोऽसखा। स्यात्॥ १॥

शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे। यदहं गोपतिः स्याम्॥ २॥

शिक्षेयम्। अस्मै। दित्सेयम्। शचीऽपते। मनीषिणे। यत्। अहम्। गोऽपतिः। स्याम्॥ २॥

धेनुष्टं इन्द्र सूनृता यजमानाय सुन्वते। गामश्वं पिप्युषी दुहे॥ ३॥

धेनुः। ते। इन्द्र। सूनृता। यजमानाय। सुन्वते। गाम्। अश्वम्। पिप्युषी। दुहे॥ ३॥

न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः। यद्दित्ससि स्तुतो मघम्॥ ४॥

न। ते। वर्ता। अस्ति। राधसः। इन्द्र। देवः। न। मर्त्यः। यत्। दित्ससि। स्तुतः। मघम्॥ ४॥

यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि॥ ५॥ [१४]

यज्ञः। इन्द्रम्। अवर्धयत्। यत्। भूमिम्। वि। अवर्तयत्। चक्राणः। ओपशम्। दिवि॥ ५॥

वावृधानस्य ते वयं विश्वा धनानि जिग्युषः। ऊतिमिन्द्रा वृणीमहे॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृवृधानस्य । ते । वयम् । विश्वा । धनानि । जिग्युषः । ऊतिम् । इन्द्र । आ । वृणीमहे ॥ ६ ॥

व्यं१न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद्वलम् ॥ ७ ॥

वि । अन्तरिक्षम् । अतिरत् । मदे । सोमस्य । रोचना । इन्द्रः । यत् । अभिनत् । वलम् ॥ ७ ॥

उद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः । अर्वाञ्चं नुनुदे वलम् ॥ ८ ॥

उत् । गाः । आजत् । अङ्गिरःऽभ्यः । आविः । कृण्वन् । गुहा । सतीः । अर्वाञ्चम् । नुनुदे । वलम् ॥ ८ ॥

इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च । स्थिराणि न पराणुदे ॥ ९ ॥

इन्द्रेण । रोचना । दिवः । दृळ्हानि । दृंहितानि । च । स्थिराणि । न । पराऽनुदे ॥ ९ ॥

अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते । वि ते मदा अराजिषुः ॥ १० ॥ [१५]

अपाम् । ऊर्मिः । मदन्ऽइव । स्तोमः । इन्द्र । अजिरऽयते । वि । ते । मदाः । अराजिषुः ॥ १० ॥

त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः । स्तोतॄणामुत भद्रकृत् ॥ ११ ॥

त्वम् । हि । स्तोमऽवर्धनः । इन्द्र । असि । उक्थऽवर्धनः । स्तोतॄणाम् । उत । भद्रऽकृत् ॥ ११ ॥

इन्द्रमित्केशिना हरी सोमपेयाय वक्षतः । उप यज्ञं सुराधसम् ॥ १२ ॥

इन्द्रम् । इत् । केशिना । हरी इति । सोमऽपेयाय । वक्षतः । उप । यज्ञम् । सुऽराधसम् ॥ १२ ॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजयः स्पृधः ॥ १३ ॥

अपाम् । फेनेन । नमुचेः । शिरः । इन्द्र । उत् । अवर्तयः । विश्वाः । यत् । अजयः । स्पृधः ॥ १३ ॥

मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः ॥ १४ ॥

मायाभिः । उत्ऽसिसृप्सतः । इन्द्र । द्याम् । आऽरुरुक्षतः । अव । दस्यून् । अधूनुथाः ॥ १४ ॥

असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् ॥ १५ ॥ [१६]

असुन्वाम् । इन्द्र । सम्ऽसदम् । विषूचीम् । वि । अनाशयः । सोमऽपाः । उत्ऽतरः । भवन् ॥ १५ ॥

[१५] [१३ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ । इन्द्रः । उष्णिक् ।]

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतं । इन्द्रं गीर्भिस्तविषमा विवासत ॥ १ ॥

तम् । ऊँ इति । अभि । प्र । गायत । पुरुऽहूतम् । पुरुऽस्तुतम् ।

इन्द्रम् । गीःऽभिः । तविषम् । आ । विवासत ॥ १ ॥

यस्य द्विबर्हसो बृहत्सहो दाधार रोदसी । गिरीँरज्राँ अपः स्वर्वृषत्वना ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्य॑ । द्वि॒ऽबर्ह॑सः । बृ॒हत् । सहः॑ । दा॒धार॑ । रोद॑सी॒ इति॑ । गि॒रीन् । अज्रा॑न् । अ॒पः । स्वः॑ । वृ॒ष॒ऽत्व॒ना ॥ २ ॥

स रा॑जसि पुरुष्टुतँ॒ एको॑ वृ॒त्राणि॑ जिघ्नसे । इन्द्र॒ जैत्रा॑ श्रव॒स्या॑ च॒ यन्त॑वे ॥ ३ ॥

सः । रा॒ज॒सि॒ । पु॒रु॒ऽस्तु॒त॒ । एकः॑ । वृ॒त्राणि॑ । जि॒घ्न॒से॒ । इन्द्र॑ । जैत्रा॑ । श्र॒व॒स्या॑ । च॒ । यन्त॑वे ॥ ३ ॥

तं ते॒ मदं॑ गृणीमसि॒ वृष॑णं पृ॒त्सु सा॑स॒हिम् । उ॒ लो॒क॒कृ॒त्नुम॑द्रिवो हरि॒श्रिय॑म् ॥ ४ ॥

तम् । ते॒ । मद॑म् । गृ॒णी॒म॒सि॒ । वृष॑णम् । पृ॒त्ऽसु । स॒स॒हिम् ।

ऊँ इति॑ । लो॒क॒ऽकृ॒त्नुम् । अ॒द्रि॒ऽवः॒ । ह॒रि॒ऽश्रिय॑म् ॥ ४ ॥

येन॒ ज्योतीं॑ष्या॒यवे॒ मन॑वे च वि॒वेदि॑थ । म॒न्दा॒नो अ॒स्य ब॒र्हिषो॒ वि रा॑जसि ॥ ५ ॥ [१७]

येन॑ । ज्योतीं॑षि । आ॒यवे॑ । मन॑वे । च॒ । वि॒वेदि॑थ । म॒न्दा॒नः । अ॒स्य । ब॒र्हिषः॑ । वि । रा॒ज॒सि॒ ॥ ५ ॥

तद॒द्या चि॑त्त उ॒क्थिनोऽनु॑ ष्टुवन्ति पू॒र्वथा॑ । वृष॑पत्नीर॒पो ज॑या दि॒वेदि॑वे ॥ ६ ॥

तत् । अ॒द्य । चि॒त् । ते॒ । उ॒क्थिनः॑ । अनु॑ । स्तु॒व॒न्ति॒ । पू॒र्वऽथा॑ । वृष॑ऽपत्नीः । अ॒पः । ज॒य॒ । दि॒वेऽदि॑वे ॥ ६ ॥

तव॒ त्यदि॑न्द्रि॒यं बृ॒हत्तव॒ शुष्म॑मु॒त क्रतु॑म् । वज्रं॑ शिशाति धि॒षणा॒ वरे॑ण्यम् ॥ ७ ॥

तव॑ । त्यत् । इ॒न्द्रि॒यम् । बृ॒हत् । तव॑ । शुष्म॑म् । उ॒त । क्रतु॑म् । वज्र॑म् । शि॒शा॒ति॒ । धि॒षणा॑ । वरे॑ण्यम् ॥ ७ ॥

तव॒ द्यौरि॑न्द्र॒ पौंस्यं॑ पृथि॒वी व॑र्धति॒ श्रवः॑ । त्वामापः॒ पर्व॑तासश्च हिन्विरे ॥ ८ ॥

तव॑ । द्यौः । इ॒न्द्र॒ । पौंस्य॑म् । पृ॒थि॒वी । व॒र्ध॒ति॒ । श्रवः॑ । त्वाम् । आपः॑ । पर्व॑तासः । च॒ । हि॒न्वि॒रे॒ ॥ ८ ॥

त्वां विष्णु॑र्बृ॒हन्क्षयो॑ मि॒त्रो गृ॑णाति॒ वरु॑णः । त्वां शर्धो॑ मद॒त्यनु॒ मारु॑तम् ॥ ९ ॥

त्वाम् । विष्णुः॑ । बृ॒हन् । क्षयः॑ । मि॒त्रः । गृ॒णा॒ति॒ । वरु॑णः । त्वाम् । शर्धः॑ । म॒द॒ति॒ । अनु॑ । मारु॑तम् ॥ ९ ॥

त्वं वृषा॒ जना॑नां॒ मंहि॑ष्ठ इन्द्र जज्ञिषे । स॒त्रा विश्वा॑ स्वप॒त्यानि॑ दधिषे ॥ १० ॥ [१८]

त्वम् । वृषा॑ । जना॑नाम् । मंहि॑ष्ठः । इ॒न्द्र॒ । ज॒ज्ञि॒षे॒ । स॒त्रा । विश्वा॑ । सु॒ऽअ॒प॒त्यानि॑ । द॒धि॒षे॒ ॥ १० ॥

स॒त्रा त्वं पु॑रुष्टुतँ॒ एको॑ वृ॒त्राणि॑ तोशसे । नान्य इन्द्रा॒त्कर॑णं॒ भूय॑ इन्वति ॥ ११ ॥

स॒त्रा । त्वम् । पु॒रु॒ऽस्तु॒त॒ । एकः॑ । वृ॒त्राणि॑ । तो॒श॒से॒ । न । अ॒न्यः । इन्द्रा॑त् । कर॑णम् । भूयः॑ । इ॒न्व॒ति॒ ॥ ११ ॥

यदि॑न्द्र मन्म॒शस्त्वा॒ नाना॒ हव॑न्त ऊ॒तये॑ । अ॒स्माके॑भि॒र्नृभि॒रत्रा॒ स्व॑र्जय ॥ १२ ॥

यत् । इ॒न्द्र॒ । म॒न्म॒ऽशः । त्वा॒ । नाना॑ । हव॑न्ते । ऊ॒तये॑ । अ॒स्माके॑भिः । नृऽभिः॑ । अत्र॑ । स्वः॑ । ज॒य॒ ॥ १२ ॥

अरं॒ क्षया॑य नो म॒हे विश्वा॑ रू॒पाण्या॑वि॒शन् । इन्द्रं॒ जैत्रा॑य हर्षया शची॒पति॑म् ॥ १३ ॥ [१९]

अर॑म् । क्षया॑य । नः॒ । म॒हे । विश्वा॑ । रू॒पाणि॑ । आ॒ऽवि॒शन् । इन्द्र॑म् । जैत्रा॑य । ह॒र्ष॒य॒ । श॒ची॒३ऽपति॑म् ॥ १३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१६] [१२ इरिम्बिठिः काण्वः । इन्द्रः । गायत्री ।]

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः । नरं नृषाहं मंहिष्ठम् ॥ १ ॥

प्र । सम्ऽराजम् । चर्षणीनाम् । इन्द्रम् । स्तोत । नव्यम् । गीःऽभिः । नरम् । नृऽसहम् । मंहिष्ठम् ॥ १ ॥

यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या । अपामवो न समुद्रे ॥ २ ॥

यस्मिन् । उक्थानि । रण्यन्ति । विश्वानि । च । श्रवस्या । अपाम् । अवः । न । समुद्रे ॥ २ ॥

तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् । महो वाजिनं सनिभ्यः ॥ ३ ॥

तम् । सुऽस्तुत्या । आ । विवासे । ज्येष्ठऽराजम् । भरे । कृत्नुम् । महः । वाजिनम् । सनिऽभ्यः ॥ ३ ॥

यस्यानूना गभीरा मदा उरवस्तरुत्राः । हर्षुमन्तः शूरसातौ ॥ ४ ॥

यस्य । अनूनाः । गभीराः । मदाः । उरवः । तरुत्राः । हर्षुऽमन्तः । शूरऽसातौ ॥ ४ ॥

तमिद्धनेषु हितेष्वधिवाकाय हवन्ते । येषामिन्द्रस्ते जयन्ति ॥ ५ ॥

तम् । इत् । धनेषु । हितेषु । अधिऽवाकाय । हवन्ते । येषाम् । इन्द्रः । ते । जयन्ति ॥ ५ ॥

तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः । एष इन्द्रो वरिवस्कृत् ॥ ६ ॥ [२०]

तम् । इत् । च्यौत्नैः । आर्यन्ति । तम् । कृतेभिः । चर्षणयः । एषः । इन्द्रः । वरिवःऽकृत् ॥ ६ ॥

इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः । महान्महीभिः शचीभिः ॥ ७ ॥

इन्द्रः । ब्रह्मा । इन्द्रः । ऋषिः । इन्द्रः । पुरु । पुरुऽहूतः । महान् । महीभिः । शचीभिः ॥ ७ ॥

स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः । एकश्चित्सन्नभिभूतिः ॥ ८ ॥

सः । स्तोम्यः । सः । हव्यः । सत्यः । सत्वा । तुविऽकूर्मिः । एकः । चित् । सन् । अभिऽभूतिः ॥ ८ ॥

तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः । इन्द्रं वर्धन्ति क्षितयः ॥ ९ ॥

तम् । अर्केभिः । तम् । सामऽभिः । तम् । गायत्रैः । चर्षणयः । इन्द्रम् । वर्धन्ति । क्षितयः ॥ ९ ॥

प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु । सासह्वांसं युधामित्रान् ॥ १० ॥

प्रऽनेतारम् । वस्यः । अच्छ । कर्तारम् । ज्योतिः । समत्ऽसु । ससह्वांसम् । युधा । अमित्रान् ॥ १० ॥

स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ॥ ११ ॥

सः । नः । पप्रिः । पारयाति । स्वस्ति । नावा । पुरुऽहूतः । इन्द्रः । विश्वाः । अति । द्विषः ॥ ११ ॥

स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि ॥ १२ ॥ [२१]

सः । त्वम् । नः । इन्द्र । वाजेभिः । दशस्य । च । गातुऽय । च । अच्छ । च । नः । सुम्नम् । नेषि ॥ १२ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१७] [१५ इरिम्बिठिः काण्वः । इन्द्रः; १४ वास्तोष्पतिर्वा ।
गायत्री, प्रगाथः = (१४ बृहती, १५ सतोबृहती)।]

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिः सदो मम॥ १॥

आ। याहि। सुसुम। हि। ते। इन्द्र। सोमम्। पिब। इमम्। आ। इदम्। बर्हिः। सदः। मम॥ १॥

आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नः शृणु॥ २॥

आ। त्वा। ब्रह्मऽयुजा। हरी इति। वहताम्। इन्द्र। केशिना। उप। ब्रह्माणि। नः। शृणु॥ २॥

ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे॥ ३॥

ब्रह्माणः। त्वा। वयम्। युजा। सोमऽपाम्। इन्द्र। सोमिनः। सुतऽवन्तः। हवामहे॥ ३॥

आ नो याहि सुतावतोऽस्माकं सुष्टुतीरुप। पिबा सु शिप्रिन्नन्धसः॥ ४॥

आ। नः। याहि। सुतऽवतः। अस्माकम्। सुऽस्तुतीः। उप। पिब। सु। शिप्रिन्। अन्धसः॥ ४॥

आ ते सिञ्चामि कुक्ष्योरनु गात्रा वि धावतु। गृभाय जिह्वया मधु॥ ५॥ [२२]

आ। ते। सिञ्चामि। कुक्ष्योः। अनु। गात्रा। वि। धावतु। गृभाय। जिह्वया। मधु॥ ५॥

स्वादुष्टे अस्तु संसुदे मधुमान्तन्वे३ तव। सोमः शमस्तु ते हृदे॥ ६॥

स्वादुः। ते। अस्तु। सम्ऽसुदे। मधुऽमान्। तन्वे। तव। सोमः। शम्। अस्तु। ते। हृदे॥ ६॥

अयमु त्वा विचर्षणे जनीरिवाभि संवृतः। प्र सोम इन्द्र सर्पतु॥ ७॥

अयम्। ऊँ इति। त्वा। विऽचर्षणे। जनीःऽइव। अभि। सम्ऽवृतः। प्र। सोमः। इन्द्र। सर्पतु॥ ७॥

तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते॥ ८॥

तुविऽग्रीवः। वपाऽउदरः। सुऽबाहुः। अन्धसः। मदे। इन्द्रः। वृत्राणि। जिघ्नते॥ ८॥

इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा। वृत्राणि वृत्रहञ्जहि॥ ९॥

इन्द्र। प्र। इहि। पुरः। त्वम्। विश्वस्य। ईशानः। ओजसा। वृत्राणि। वृत्रऽहन्। जहि॥ ९॥

दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि। यजमानाय सुन्वते॥ १०॥ [२३]

दीर्घः। ते। अस्तु। अङ्कुशः। येन। वसु। प्रऽयच्छसि। यजमानाय। सुन्वते॥ १०॥

अयं त इन्द्र सोमो निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब॥ ११॥

अयम्। ते। इन्द्र। सोमः। निऽपूतः। अधि। बर्हिषि। आ। इहि। ईम्। अस्य। द्रव। पिब॥ ११॥

शाचिगो शाचिपूजनायं रणाय ते सुतः। आखण्डल प्र हूयसे॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शाचिंगो इति शाचिंऽगो। शाचिंऽपूजन। अयम्। रणाय। ते। सुतः। आखण्डल। प्र। हूयसे॥ १२॥

यस्ते शृङ्गवृषो नपात्प्रणपात्कुण्डपाय्यः। न्यस्मिन्दध्र आ मनः॥ १३॥

यः। ते। शृङ्गऽवृषः। नपात्। प्रनपादिति प्रऽनपात्। कुण्डऽपाय्यः।

नि। अस्मिन्। दध्रे। आ। मनः॥ १३॥

वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्यानाम्। द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा॥ १४॥

वास्तोः। पते। ध्रुवा। स्थूणा। अंसत्रम्। सोम्यानाम्।

द्रप्सः। भेत्ता। पुराम्। शश्वतीनाम्। इन्द्रः। मुनीनाम्। सखा॥ १४॥

पृदाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः।

भूर्णिमश्वं नयत्तुजा पुरो गृभेन्द्रं सोमस्य पीतये॥ १५॥ [२४]

पृदाकुऽसानुः। यजतः। गोऽएषणः। एकः। सन्। अभि। भूयसः।

भूर्णिम्। अश्वम्। नयत्। तुजा। पुरः। गृभा। इन्द्रम्। सोमस्य। पीतये॥ १५॥

[१८] [२२ इरिम्बिठिः काण्वः। आदित्याः; ४, ६, ७ अदितिः; ८ अश्विनौ; ९ अग्निसूर्यानिलाः। उष्णिक्।]

इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः। आदित्यानामपूर्व्यं सवीमनि॥ १॥

इदम्। ह। नूनम्। एषाम्। सुम्नम्। भिक्षेत। मर्त्यः। आदित्यानाम्। अपूर्व्यम्। सवीमनि॥ १॥

अनर्वाणो ह्येषां पन्था आदित्यानाम्। अदब्धाः सन्ति पायवः सुगेवृधः॥ २॥

अनर्वाणः। हि। एषाम्। पन्थाः। आदित्यानाम्। अदब्धाः। सन्ति। पायवः। सुगेऽवृधः॥ २॥

तत्सु नः सविता भगो वरुणो मित्रो अर्यमा। शर्म यच्छन्तु सप्रथो यदीमहे॥ ३॥

तत्। सु। नः। सविता। भगः। वरुणः। मित्रः। अर्यमा। शर्म। यच्छन्तु। सऽप्रथः। यत्। ईमहे॥ ३॥

देवेभिर्देव्यदितेऽरिष्टभर्मन्ना गहि। स्मत्सूरिभिः पुरुप्रिये सुशर्मभिः॥ ४॥

देवेभिः। देवि। अदिते। अरिष्टऽभर्मन्। आ। गहि। स्मत्। सूरिऽभिः। पुरुऽप्रिये। सुशर्मऽभिः॥ ४॥

ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे। अंहोश्चिदुरुचक्रयोऽनेहसः॥ ५॥ [२५]

ते। हि। पुत्रासः। अदितेः। विदुः। द्वेषांसि। योतवे। अंहोः। चित्। उरुऽचक्रयः। अनेहसः॥ ५॥

अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः। अदितिः पात्वंहसः सदावृधा॥ ६॥

अदितिः। नः। दिवा। पशुम्। अदितिः। नक्तम्। अद्वयाः। अदितिः। पातु। अंहसः। सदाऽवृधा॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत स्या नो दिवा मतिरदितिरूत्या गमत्। सा शंताति मयस्करदप स्रिधः ॥ ७॥

उत। स्या। नः। दिवा। मतिः। अदितिः। ऊत्या। आ। गमत्।

सा। शम्ऽताति। मयः। करत्। अप। स्रिधः॥ ७॥

उत त्या दैव्या भिषजा शं नः करतो अश्विना। युयुयातामितो रपो अप स्रिधः॥ ८॥

उत। त्या। दैव्या। भिषजा। शम्। नः। करतः। अश्विना। युयुयाताम्। इतः। रपः। अप। स्रिधः॥ ८॥

शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः। शं वातो वात्वरपा अप स्रिधः॥ ९॥

शम्। अग्निः। अग्निऽभिः। करत्। शम्। नः। तपतु। सूर्यः।

शम्। वातः। वातु। अरपाः। अप। स्रिधः॥ ९।

अपामीवामप स्रिधमप सेधत दुर्मतिम्। आदित्यासो युयोतना नो अंहसः॥ १०॥ [२६]

अप। अमीवाम्। अप। स्रिधम्। अप। सेधत। दुःऽमतिम्। आदित्यासः। युयोतन। नः। अंहसः॥ १०॥

युयोता शरुमस्मदाँ आदित्यास उतामतिम्। ऋधग्द्वेषः कृणुत विश्ववेदसः॥ ११॥

युयोत। शरुम्। अस्मत्। आ। आदित्यासः। उत। अमतिम्।

ऋधक्। द्वेषः। कृणुत। विश्वऽवेदसः॥ ११॥

तत्सु नः शर्म यच्छतादित्या यन्मुमोचति। एनस्वन्तं चिदेनसः सुदानवः॥ १२॥

तत्। सु। नः। शर्म। यच्छत। आदित्याः। यत्। मुमोचति।

एनस्वन्तम्। चित्। एनसः। सुऽदानवः॥ १२॥

यो नः कश्चिद्रिरिक्षति रक्षस्त्वेन मर्त्यः। स्वैः ष एवै रिरिषीष्ट युर्जनः॥ १३॥

यः। नः। कः। चित्। रिरिक्षति। रक्षःऽत्वेन। मर्त्यः। स्वैः। सः। एवैः। रिरिषीष्ट। युः। जनः॥ १३॥

समित्तमघमश्नवद्दुःशंसं मर्त्यं रिपुम्। यो अस्मत्रा दुर्हणावाँ उप द्वयुः॥ १४॥

सम्। इत्। तम्। अघम्। अश्नवत्। दुःऽशंसम्। मर्त्यम्। रिपुम्।

यः। अस्मऽत्रा। दुःऽहनावान्। उप। द्वयुः॥ १४॥

पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम्। उप द्वयुं चाद्वयुं च वसवः॥ १५॥ [२७]

पाकऽत्रा। स्थन। देवाः। हृत्ऽसु। जानीथ। मर्त्यम्। उप। द्वयुम्। च। अद्वयुम्। च। वसवः॥ १५॥

आ शर्म पर्वतानामोतापां वृणीमहे। द्यावाक्षामारे अस्मद्रपस्कृतम्॥ १६॥

आ। शर्म। पर्वतानाम्। आ। उत। अपाम्। वृणीमहे। द्यावाक्षामा। आरे। अस्मत्। रपः। कृतम्॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ते नो भद्रेण शर्मणा युष्माकं नावा वसवः। अति विश्वानि दुरिता पिपर्तन॥ १७॥

ते। नः। भद्रेण। शर्मणा। युष्माकम्। नावा। वसवः। अति। विश्वानि। दुःऽइता। पिपर्तन॥ १७॥

तुचे तनाय तत्सु नो द्राघीय आयुर्जीवसे। आदित्यासः सुमहसः कृणोतन॥ १८॥

तुचे। तनाय। तत्। सु। नः। द्राघीयः। आयुः। जीवसे। आदित्यासः। सुऽमहसः। कृणोतन॥ १८॥

यज्ञो हीळो वो अन्तर आदित्या अस्ति मृळत। युष्मे इद्वो अपि ष्मसि सजात्ये॥ १९॥

यज्ञः। हीळः। वः। अन्तरः। आदित्याः। अस्ति। मृळत।

युष्मे इति। इत्। वः। अपि। स्मसि। सऽजात्ये॥ १९॥

बृहद्वरूथं मरुतां देवं त्रातारमश्विना। मित्रमीमहे वरुणं स्वस्तये॥ २०॥

बृहत्। वरूथम्। मरुताम्। देवम्। त्रातारम्। अश्विना। मित्रम्। ईमहे। वरुणम्। स्वस्तये॥ २०॥

अनेहो मित्रार्यमन्नृवद्वरुण शंस्यम्। त्रिवरूथं मरुतो यन्त नश्छर्दिः॥ २१॥

अनेहः। मित्र। अर्यमन्। नृऽवत्। वरुण। शंस्यम्। त्रिऽवरूथम्। मरुतः। यन्त। नः। छर्दिः॥ २१॥

ये चिद्धि मृत्युबन्धव आदित्या मनवः स्मसि। प्र सू न आयुर्जीवसे तिरेतन॥ २२॥ [२८]

ये। चित्। हि। मृत्युऽबन्धवः। आदित्याः। मनवः। स्मसि।

प्र। सु। नः। आयुः। जीवसे। तिरेतन॥ २२॥

[१९] [३७ सोभरिः काण्वः। अग्निः, ३४-३५ आदित्याः; ३६-३७ त्रसदस्योर्दानस्तुतिः। १-२६ प्रगाथः = (अयुजः ककुभः, युजः सतोबृहत्यः), २७ द्विपदा विराट्, २८-३३ प्रगाथः = (युजः ककुभः, अयुजः सतोबृहत्यः), ३४ उष्णिक्, ३५ सतोबृहती, ३६ ककुप्; ३७ पङ्क्तिः।]

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा हव्यमोहिरे॥ १॥

तम्। गूर्धय। स्वःऽनरम्। देवासः। देवम्। अरतिम्। दधन्विरे। देवऽत्रा। हव्यम्। आ। ऊहिरे॥ १॥

विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यन्तुरम्।

अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम्॥ २॥

विभूतऽरातिम्। विप्र। चित्रऽशोचिषम्। अग्निम्। ईळिष्व। यन्तुरम्।

अस्य। मेधस्य। सोम्यस्य। सोभरे। प्र। ईम्। अध्वराय। पूर्व्यम्॥ २॥

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम्। अस्य यज्ञस्य सुक्रतुम्॥ ३॥

यजिष्ठम्। त्वा। ववृमहे। देवम्। देवऽत्रा। होतारम्। अमर्त्यम्। अस्य। यज्ञस्य। सुऽक्रतुम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषम्।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि॥ ४॥

ऊर्जः। नपातम्। सुऽभगम्। सुऽदीदितिम्। अग्निम्। श्रेष्ठऽशोचिषम्।
सः। नः। मित्रस्य। वरुणस्य। सः। अपाम्। आ। सुम्नम्। यक्षते। दिवि॥ ४॥

यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये। यो नमसा स्वध्वरः॥ ५॥ [२९]

य। सम्ऽइधा। यः। आऽहुती। यः। वेदेन। ददाश। मर्तः। अग्नये। यः। नमसा। सुऽअध्वरः॥ ५॥

तस्येदर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः।
न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत्॥ ६॥

तस्य। इत्। अर्वन्तः। रंहयन्ते। आशवः। तस्य। द्युम्निऽतमम्। यशः।
न। तम्। अंहः। देवऽकृतम्। कुतः। चन। न। मर्त्यऽकृतम्। नशत्॥ ६॥

स्वग्नयो वो अग्निभिः स्याम सूनो सहस उर्जां पते। सुवीरस्त्वमस्मयुः॥ ७॥

सुऽअग्नयः। वः। अग्निऽभिः। स्याम। सूनो इति। सहसः। ऊर्जाम्। पते।
सुऽवीरः। त्वम्। अस्मऽयुः॥ ७॥

प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः।
त्वे क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम्॥ ८॥

प्रऽशंसमानः। अतिथिः। न। मित्रियः। अग्निः। रथः। न। वेद्यः।
त्वे इति। क्षेमासः। अपि। सन्ति। साधवः। त्वम्। राजा। रयीणाम्॥ ८॥

सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः। स धीभिरस्तु सनिता॥ ९॥

सः। अद्धा। दाशुऽअध्वरः। अग्ने। मर्तः। सुऽभग। सः। प्रऽशंस्यः।
सः। धीभिः। अस्तु। सनिता॥ ९॥

यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते।
सो अर्वद्भिः सनिता सः विपन्युभिः स शूरैः सनिता कृतम्॥ १०॥ [३०]

यस्य। त्वम्। ऊर्ध्वः। अध्वराय। तिष्ठसि। क्षयत्ऽवीरः। सः। साधते।
सः। अर्वत्ऽभिः। सनिता। सः। विपन्युऽभिः। सः। शूरैः। सनिता। कृतम्॥ १०॥

यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः। हव्या वा वेविषद्विषः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्य। अग्निः। वपुः। गृहे। स्तोमम्। चनः। दधीत। विश्वऽवार्यः। हव्या। वा। वेविषत्। विषः॥ ११॥

विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु।

अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः॥ १२॥

विप्रस्य। वा। स्तुवतः। सहसः। यहो इति। मक्षुऽतमस्य। रातिषु।

अवःऽदेवम्। उपरिऽमर्त्यम्। कृधि। वसो इति। विविदुषः। वचः॥ १२॥

यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति। गिरा वाजिरशोचिषम्॥ १३॥

यः। अग्निम्। हव्यदातिऽभिः। नमःऽभिः। वा। सुऽदक्षम्। आऽविवासति।

गिरा। वा। अजिरऽशोचिषम्॥ १३॥

समिधा यो निशिती दाशददितिं धामभिरस्य मर्त्यः।

विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्नइव तारिषत्॥ १४॥

सम्ऽइधा। यः। निऽशिती। दाशत्। अदितिम्। धामऽभिः। अस्य। मर्त्यः।

विश्वा। इत्। सः। धीभिः। सुऽभगः। जनान्। अति। द्युम्नैः। उद्नःऽइव। तारिषत्॥ १४॥

तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणम्। मन्युं जनस्य दूढ्यः॥ १५॥ [३१]

तत्। अग्ने। द्युम्नम्। आ। भर। यत्। ससहत्। सदने। कम्। चित्। अत्रिणम्।

मन्युम्। जनस्य। दुःऽध्यः॥ १५॥

येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः।

वयं तत्ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि॥ १६॥

येन। चष्टे। वरुणः। मित्रः। अर्यमा। येन। नासत्या। भगः।

वयम्। तत्। ते। शवसा। गातुवित्ऽतमाः। इन्द्रत्वाऽऊताः। विधेमहि॥ १६॥

ते घेदग्ने स्वाध्यो३ ये त्वा विप्र निदधिरे नृचक्षसम्। विप्रासो देव सुक्रतुम्॥ १७॥

ते। घ। इत्। अग्ने। सुऽआध्यः। ये। त्वा। विप्र। निऽदधिरे। नृऽचक्षसम्।

विप्रासः। देव। सुऽक्रतुम्॥ १७॥

त इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि।

त इद्वाजेभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे॥ १८॥

ते। इत्। वेदिम्। सुऽभग। ते। आऽहुतिम्। ते। सोतुम्। चक्रिरे। दिवि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ते। इत्। वाजेभिः। जिग्युः। महत्। धनम्। ये। त्वे इति। कामम्। नि॒ऽए॒रि॒रे॥ १८॥

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तयः॥ १९॥

भद्रः। नः। अग्निः। आऽहुतः। भद्रा। रातिः। सुऽभग। भद्र। अध्वरः। भद्राः। उत। प्रऽशस्तयः॥ १९॥

भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः।

अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः॥ २०॥ [३२]

भद्रम्। मनः। कृणुष्व। वृत्रऽतूर्ये। येन। समत्ऽसु। ससहः।

अव। स्थिरा। तनुहि। भूरि। शर्धताम्। वनेम। ते। अभिष्टिऽभिः॥ २०॥

ईळे गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे। यजिष्ठं हव्यवाहनम्॥ २१॥

ईळे। गिरा। मनुःऽहितम्। यम्। देवाः। दूतम्। अरतिम्। निऽएरिरे। यजिष्ठम्। हव्यऽवाहनम्॥ २१॥

तिग्मजम्भाय तरुणाय राजते प्रयो गायस्यग्नये।

यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः॥ २२॥

तिग्मऽजम्भाय। तरुणाय। राजते। प्रयः। गायसि। अग्नये।

यः। पिंशते। सूनृताभिः। सुऽवीर्यम्। अग्निः। घृतेभिः। आऽहुतः॥ २२॥

यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चाव च। असुरइव निर्णिजम्॥ २३॥

यदि। घृतेभिः। आऽहुतः। वाशीम्। अग्निः। भरते। उत्। च। अव। च।

असुरःऽइव। निःऽनिजम्॥ २३॥

यो हव्यान्यैरयता मनुर्हितो देव आसा सुगन्धिना।

विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः॥ २४॥

यः। हव्यानि। ऐरयत। मनुःऽहितः। देवः। आसा। सुऽगन्धिना।

विवासते। वार्याणि। सुऽअध्वरः। होता। देवः। अमर्त्यः॥ २४॥

यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः। सहसः सूनवाहुत॥ २५॥ [३३]

यत्। अग्ने। मर्त्यः। त्वम्। स्याम्। अहम्। मित्रऽमहः। अमर्त्यः।

सहसः। सूनो इति। आऽहुत॥ २५॥

न त्वा रासीयाभिशस्तये वसो न पापत्वाय सन्त्य।

न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया॥ २६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न। त्वा। रासीय। अभिऽशस्तये। वसो इति। न। पापऽत्वाय। सन्त्य।

न। मे। स्तोता। अमतिऽवा। न। दुःऽहितः। स्यात्। अग्ने। न। पापया॥ २६॥

पितुर्न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः॥ २७॥

पितुः। नः। पुत्रः। सुऽभृतः। दुरोणे। आ। देवान्। एतु। प्र। नः। हविः॥ २७॥

तवाहमग्न ऊतिभिर्नेदिष्ठाभिः सचेय जोषमा वसो। सदा देवस्य मर्त्यः॥ २८॥

तव। अहम्। अग्ने। ऊतिऽभिः। नेदिष्ठाभिः। सचेय। जोषम्। आ। वसो इति।

सदा। देवस्य। मर्त्यः॥ २८॥

तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः।

त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे॥ २९॥

तव। क्रत्वा। सनेयम्। तव। रातिऽभिः। अग्ने। तव। प्रशस्तिऽभिः।

त्वाम्। इत्। आहुः। प्रऽमतिम्। वसो इति। मम। अग्ने। हर्षस्व। दातवे॥ २९॥

प्र सो अग्ने तवोतिभिः सुवीराभिस्तिरते वाजभर्मभिः। यस्य त्वं सख्यमावरः॥ ३०॥ [३४]

प्र। सः। अग्ने। तव। ऊतिऽभिः। सुऽवीराभिः। तिरते। वाजभर्मऽभिः।

यस्य। त्वम्। सख्यम्। आऽवरः॥ ३०॥

तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे।

त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि॥ ३१॥

तव। द्रप्सः। नीलऽवान्। वाशः। ऋत्वियः। इन्धानः। सिष्णो इति। आ। ददे।

त्वम्। महीनाम्। उषसाम्। असि। प्रियः। क्षपः। वस्तुषु। राजसि॥ ३१॥

तमागन्म सोभरयः सहस्रमुष्कं स्वभिष्टिमवसे। सम्राजं त्रासदस्यवम्॥ ३२॥

तम्। आ। अगन्म। सोभरयः। सहस्रऽमुष्कम्। सुऽअभिष्टिम्। अवसे।

सम्ऽराजम्। त्रासदस्यवम्॥ ३२॥

यस्य ते अग्ने अन्ये अग्नय उपक्षितो वयाइव।

विपो न द्युम्ना नि युवे जनानां तव क्षत्राणि वर्धयन्॥ ३३॥

यस्य। ते। अग्ने। अन्ये। अग्नयः। उपऽक्षितः। वयाःऽइव।

विपः। न। द्युम्ना। नि। युवे। जनानाम्। तव। क्षत्राणि। वर्धयन्॥ ३३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यमादित्यासो अद्रुहः पारं नयथ मर्त्यम्। मघोनां विश्वेषां सुदानवः॥ ३४।

यम्। आदित्यासः। अद्रुहः। पारम्। नयथ। मर्त्यम्। मघोनाम्। विश्वेषाम्। सुऽदानवः॥ ३४॥

यूयं राजानः कं चिच्चर्षणीसहः क्षयन्तं मानुषाँ अनु।

वयं ते वो वरुण मित्रार्यमन्त्स्यामेदृतस्य रथ्यः॥ ३५॥

यूयम्। राजानः। कम्। चित्। चर्षणिऽसहः। क्षयन्तम्। मानुषान्। अनु।

वयम्। ते। वः। वरुण। मित्र। अर्यमन्। स्याम। इत्। ऋतस्य। रथ्यः॥ ३५॥

अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम्। मंहिष्ठो अर्यः सत्पतिः॥ ३६॥

अदात्। मे। पौरुऽकुत्स्यः। पञ्चाशतम्। त्रसदस्युः। वधूनाम्। मंहिष्ठः। अर्यः। सत्ऽपतिः॥ ३६॥

उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि।

तिसृणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः॥ ३७॥ [३५]

उत। मे। प्रयियोः। वयियोः। सुऽवास्त्वाः। अधि। तुग्वनि।

तिसृणाम्। सप्ततीनाम्। श्यावः। प्रऽनेता। भुवत्। वसुः। दियानाम्। पतिः॥ ३७॥

[२०] [२६ सोभरिः काण्वः। मरुतः। प्रगाथः = (अयुजः ककुभः, युजः सतोबृहत्यः); १४ सतो विराट्।]

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थाता समन्यवः। स्थिरा चिन्नमयिष्णवः॥ १॥

आ। गन्त। मा। रिषण्यत। प्रऽस्थावानः। मा। अप। स्थात। सऽमन्यवः।

स्थिरा। चित्। नमयिष्णवः॥ १॥

वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः।

इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः॥ २॥

वीळुपविऽभिः। मरुतः। ऋभुक्षणः। आ। रुद्रासः। सुदीतिऽभिः।

इषा। नः। अद्य। आ। गत। पुरुऽस्पृहः। यज्ञम्। आ। सोभरीऽयवः॥ २॥

विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम्। विष्णोरेषस्य मीळ्हुषाम्॥ ३॥

विद्म। हि। रुद्रियाणाम्। शुष्मम्। उग्रम्। मरुताम्। शिमीऽवताम्। विष्णोः। एषस्य। मीळ्हुषाम्॥ ३॥

वि द्वीपानि पापतन्तिष्ठद्दुच्छुनोभे युजन्त रोदसी।

प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि। द्वीपानि। पापतन्। तिष्ठत्। दुच्छुना। उभे इति। युजन्त। रोदसी इति।
प्र। धन्वानि। ऐरत। शुभ्रऽखादयः। यत्। एजथ। स्वऽभानवः॥ ४॥

अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजती॥ ५॥ [३६]

अच्युता। चित्। वः। अज्मन्। आ। नानदति। पर्वतासः। वनस्पतिः। भूमिः। यामेषु। रेजते॥ ५॥

अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत्।
यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः॥ ६॥

अमाय। वः। मरुतः। यातवे। द्यौः। जिहीते। उत्ऽतरा। बृहत्।
यत्र। नरः। देदिशते। तनूषु। आ। त्वक्षांसि। बाहुऽओजसः॥ ६॥

स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृषप्सवः। वहन्ते अह्रुतप्सवः॥ ७॥

स्वधाम्। अनु। श्रियम्। नरः। महि। त्वेषाः। अमऽवन्तः। वृषऽप्सवः। वहन्ते। अह्रुतऽप्सवः॥ ७॥

गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये।
गोबन्धवः सुजातास इषे भुजे महान्तो नः स्परसे नु॥ ८॥

गोभिः। वाणः। अज्यते। सोभरीणाम्। रथे। कोशे। हिरण्यये।
गोऽबन्धवः। सुऽजातासः। इषे। भुजे। महान्तः। नः। स्परसे। नु॥ ८॥

प्रति वो वृषदञ्जयो वृष्णे शर्धाय मारुताय भरध्वम्। हव्या वृषप्रयाव्णे॥ ९॥

प्रति। वः। वृषत्ऽअञ्जयः। वृष्णे। शर्धाय। मारुताय। भरध्वम्। हव्या। वृषऽप्रयाव्ने॥ ९॥

वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना।
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत॥ १०॥ [३७]

वृषणश्वेन। मरुतः। वृषऽप्सुना। रथेन। वृषऽनाभिना।
आ। श्येनासः। न। पक्षिणः। वृथा। नरः। हव्या। नः। वीतये। गत॥ १०॥

समानमञ्ज्येषां वि भ्राजन्ते रुक्मासो अधि बाहुषु। दविद्युतत्यृष्टयः॥ ११॥

समानम्। अञ्जि। एषाम्। वि। भ्राजन्ते। रुक्मासः। अधि। बाहुषु। दविद्युतति। ऋष्टयः॥ ११।

त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः॥ १२॥

ते। उग्रासः। वृषणः। उग्रऽबाहवः। नकिः। तनूषु। येतिरे।
स्थिरा। धन्वानि। आयुधा। रथेषु। वः। अनीकेषु। अधि। श्रियः॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे। वयो न पित्र्यं सहः॥ १३॥

येषाम्। अर्णः। न। सऽप्रथः। नाम। त्वेषम्। शश्वताम्। एकम्। इत्। भुजे।

वयः। न। पित्र्यम्। सहः॥ १३॥

तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम्।

अराणां न चरमस्तदेषां दाना मह्ना तदेषाम्॥ १४॥

तान्। वन्दस्व। मरुतः। तान्। उप। स्तुहि। तेषाम्। हि। धुनीनाम्।

अराणाम्। न। चरमः। तत्। एषाम्। दाना। मह्ना। तत्। एषाम्॥ १४॥

सुभगः स व ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु। यो वा नूनमुतासति॥ १५॥ [३८]

सुऽभगः। सः। वः। ऊतिषु। आस। पूर्वासु। मरुतः। विऽउष्टिषु। यः। वा। नूनम्। उत। असति॥ १५॥

यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये गथ।

अभि षु द्युम्नैरुत वाजसातिभिः सुम्ना वो धूतयो नशत्॥ १६॥

यस्य। वा। यूयम्। प्रति। वाजिनः। नरः। आ। हव्या। वीतये। गथ।

अभि। सः। द्युम्नैः। उत। वाजसातिऽभिः। सुम्ना। वः। धूतयः। नशत्॥ १६॥

यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः। युवानस्तथेदसत्॥ १७॥

यथा। रुद्रस्य। सूनवः। दिवः। वशन्ति। असुरस्य। वेधसः। युवानः। तथा। इत्। असत्॥ १७॥

ये चार्हन्ति मरुतः सुदानवः स्मन्मीळ्हुषश्चरन्ति ये।

अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम्॥ १८॥

ये। च। अर्हन्ति। मरुतः। सुऽदानवः। स्मत्। मीळ्हुषः। चरन्ति। ये।

अतः। चित्। आ। नः। उप। वस्यसा। हृदा। युवानः। आ। ववृध्वम्॥ १८॥

यून ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा। गाय गाइव चर्कृषत्॥ १९॥

यूनः। ऊँ इति। सु। नविष्ठया। वृष्णः। पावकान्। अभि। सोभरे। गिरा।

गाय। गाःऽइव। चर्कृषत्॥ १९॥

साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु।

वृष्णश्चन्द्रान्न सुश्रवस्तमान् गिरा वन्दस्व मरुतो अह॥ २०॥ [३९]

सहाः। ये। सन्ति। मुष्टिहाऽइव। हव्यः। विश्वासु। पृत्ऽसु। होतृषु।

वृष्णः। चन्द्रान्। न। सुश्रवःऽतमान्। गिरा। वन्दस्व। मरुतः। अह॥ २०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गावश्चिद्घा समन्यवः सजात्येन मरुतः सबन्धवः। रिहते ककुभो मिथः॥ २१॥

गावः। चित्। घ। स॰मन्यवः। स॰जात्येन। मरुतः। स॰बन्धवः। रिहते। ककुभः। मिथः॥ २१॥

मर्तश्चिद्वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति।

अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि॥ २२॥

मर्तः। चित्। वः। नृतवः। रुक्म॰वक्षसः। उप। भ्रातृ॰त्वम्। आ। अयति।

अधि। नः। गात। मरुतः। सदा। हि। वः। आपि॰त्वम्। अस्ति। नि॰ध्रुवि॥ २२॥

मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः। यूयं सखायः सप्तयः॥ २३॥

मरुतः। मारुतस्य। नः। आ। भेषजस्य। वहत। सु॰दानवः। यूयम्। सखायः। सप्तयः॥ २३॥

याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम्।

मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः॥ २४॥

याभिः। सिन्धुम्। अवथ। याभिः। तूर्वथ। याभिः। दशस्यथ। क्रिविम्।

मयः। नः। भूत। ऊति॰भिः। मयः॰भुवः। शिवाभिः। असच॰द्विषः॥ २४॥

यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः। यत्पर्वतेषु भेषजम्॥ २५॥

यत्। सिन्धौ। यत्। असिक्न्याम्। यत्। समुद्रेषु। मरुतः। सु॰बर्हिषः। यत्। पर्वतेषु। भेषजम्॥ २५॥

विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत।

क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः॥ २६॥ [४०] {३}

विश्वम्। पश्यन्तः। बिभृथ। तनूषु। आ। तेन। नः। अधि। वोचत।

क्षमा। रपः। मरुतः। आतुरस्य। नः। इष्कर्त। वि॰ह्रुतम्। पुनरिति॥ २६॥

इत्याश्वलायन-संहितायां

षष्ठाष्टके

प्रथमोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके द्वितीयोऽध्यायः ॥

[२१] [१८ सोभरिः काण्वः। इन्द्रः, १७-१८ चित्रस्य दानस्तुतिः। प्रगाथः = (अयुजः ककुभः, युजः सतोबृहत्यः)।]

वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः। वाजे चित्रं हवामहे ॥ १ ॥

वयम्। ऊँ इति। त्वाम्। अपूर्व्य। स्थूरम्। न। कत्। चित्। भरन्तः। अवस्यवः।
वाजे। चित्रम्। हवामहे ॥ १ ॥

उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत्।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ २ ॥

उप। त्वा। कर्मन्। ऊतये। सः। नः। युवा। उग्रः। चक्राम। यः। धृषत्।
त्वाम्। इत्। हि। अवितारम्। ववृमहे। सखायः। इन्द्र। सानसिम् ॥ २ ॥

या याहीम इन्दवोऽश्वपते गोपत उर्वरापते। सोमं सोमपते पिब ॥ ३ ॥

आ। याहि। इमे। इन्दवः। अश्वऽपते। गोऽपते। उर्वराऽपते। सोमम्। सोमऽपते। पिब ॥ ३ ॥

वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम।
या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ॥ ४ ॥

वयम्। हि। त्वा। बन्धुऽमन्तम्। अबन्धवः। विप्रासः। इन्द्र। येमिम।
या। ते। धामानि। वृषभ। तेभिः। आ। गहि। विश्वेभिः। सोमऽपीतये ॥ ४ ॥

सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे। अभि त्वामिन्द्र नोनुमः ॥ ५ ॥ [१]

सीदन्तः। ते। वयः। यथा। गोऽश्रीते। मधौ। मदिरे। विवक्षणे। अभि। त्वाम्। इन्द्र। नोनुमः ॥ ५ ॥

अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद्वि दीधयः।
सन्ति कामासो हरिवो ददिष्ट्वं स्मो वयं सन्ति नो धियः ॥ ६ ॥

अच्छ। च। त्वा। एना। नमसा। वदामसि। किम्। मुहुः। चित्। वि। दीधयः।
सन्ति। कामासः। हरिऽवः। ददिः। त्वम्। स्मः। वयम्। सन्ति। नः। धियः ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः। विद्मा पुरा परीणसः॥ ७॥

नूत्नाः। इत्। इन्द्र। ते। वयम्। ऊती। अभूम। नहि। नु। ते। अद्रिऽवः। विद्म। पुरा। परीणसः॥ ७॥

विद्मा सखित्वमुत शूर भोज्य१मा ते ता वज्रिन्नीमहे।

उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति॥ ८॥

विद्म। सखिऽत्वम्। उत। शूर। भोज्यम्। आ। ते। ता। वज्रिन्। ईमहे।

उतो इति। समस्मिन्। आ। शिशीहि। नः। वसो इति। वाजे। सुऽशिप्र। गोऽमति॥ ८॥

यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे। सखाय इन्द्रमूतये॥ ९॥

यः। नः। इदम्ऽइदम्। पुरा। प्र। वस्यः। आऽनिनाय। तम्। ऊँ इति। वः। स्तुषे।

सखायः। इन्द्रम्। ऊतये॥ ९॥

हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत।

आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम्॥ १०॥ [२]

हरिऽअश्वम्। सत्ऽपतिम्। चर्षणिऽसहम्। सः। हि। स्म। यः। अमन्दत।

आ। तु। नः। सः। वयति। गव्यम्। अश्व्यम्। स्तोतृऽभ्यः। मघऽवा। शतम्॥ १०॥

त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि। संस्थे जनस्य गोमतः॥ ११॥

त्वया। ह। स्वित्। युजा। वयम्। प्रति। श्वसन्तम्। वृषभ। ब्रुवीमहि।

सम्ऽस्थे। जनस्य। गोऽमतः॥ ११॥

जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः।

नृभिर्वृत्रं हन्याम शूशुयाम चावेरिन्द्र प्र णो धियः॥ १२॥

जयेम। कारे। पुरुऽहूत। कारिणः। अभि। तिष्ठेम। दुःऽध्यः।

नृऽभिः। वृत्रम्। हन्याम। शूशुयाम। च। अवेः। इन्द्र। प्र। नः। धियः॥ १२॥

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि। युधेदापित्वमिच्छसे॥ १३॥

अभ्रातृव्यः। अना। त्वम्। अनापिः। इन्द्र। जनुषा। सनात्। असि।

युधा। इत्। आपिऽत्वम्। इच्छसे॥ १३॥

नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः।

यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नकि॑ः । रे॒वन्त॑म् । स॒ख्याय॑ । वि॒न्दसे॑ । पीय॑न्ति । ते॒ । सु॒रा॒श्व॑ः ।

य॒दा । कृ॒णोषि॑ । न॒द॒नुम् । सम् । ऊ॒ह॒सि॒ । आत् । इत् । पि॒ताऽइ॑व । हू॒य॒से॒ ॥ १४ ॥

मा ते॑ अमा॒जुरो॑ यथा मू॒रास॑ इन्द्र स॒ख्ये त्वाव॑तः । नि ष॑दाम॒ सचा॑ सु॒ते ॥ १५ ॥ [३]

मा । ते॒ । अ॒मा॒ऽजुर॑ः । य॒था॒ । मू॒रास॑ः । इ॒न्द्र॒ । स॒ख्ये । त्वाऽव॑तः । नि । स॒दा॒म॒ । सचा॑ । सु॒ते ॥ १५ ॥

मा ते॑ गोदत्र॒ निर॑राम॒ राध॑स॒ इन्द्र॒ मा ते॑ गृहामहि ।

दृ॒ळ्हा चि॑द॒र्यः प्र मृ॑शा॒भ्या भ॑र॒ न ते॑ दा॒मान॑ आ॒दभे॑ ॥ १६ ॥

मा । ते॒ । गो॒ऽद॒त्र॒ । निः । अ॒रा॒म॒ । राध॑सः । इन्द्र॑ । मा । ते॒ । गृ॒हा॒म॒हि॒ ।

दृ॒ळ्हा । चि॒त् । अ॒र्यः । प्र । मृ॒श॒ । अ॒भि । आ । भ॒र॒ । न । ते॒ । दा॒मान॑ः । आ॒ऽदभे॑ ॥ १६ ॥

इन्द्रो॑ वा॒ घेदिय॑न्म॒घं सर॑स्वती वा सु॒भगा॑ द॒दिर्वसु॑ । त्वं वा॑ चित्र दा॒शुषे॑ ॥ १७ ॥

इन्द्र॑ः । वा॒ । घ॒ । इय॑त् । म॒घम् । सर॑स्वती । वा॒ । सु॒ऽभगा॑ । द॒दिः । वसु॑ । त्वम् । वा॒ । चि॒त्र॒ । दा॒शुषे॑ ॥ १७ ॥

चित्र॒ इद्राजा॑ राज॒का इद॑न्य॒के य॒के सर॑स्वती॒मनु॑ ।

प॒र्जन्य॑इव त॒तन॒द्धि वृ॒ष्ट्या स॒हस्र॑म॒युता॒ दद॑त् ॥ १८ ॥ [४]

चित्र॑ः । इत् । राजा॑ । रा॒ज॒काः । इत् । अ॒न्य॒के । य॒के । सर॑स्वतीम् । अनु॑ ।

प॒र्जन्य॑ःऽइव । त॒तन॑त् । हि । वृ॒ष्ट्या । स॒हस्र॑म् । अ॒युता॑ । दद॑त् ॥ १८ ॥

[२२] [१८ सोभरिः काण्वः । अश्विनौ । १-६ प्रगाथ = (अयुजो बृहत्यः, युजः सतोबृहत्यः), ७ बृहती, ८ अनुष्टुप्, ११ ककुप्, १२ मध्येज्योतिः, प्रगाथः = (९, १३, १५, १७ ककुभ; १०, १४, १६, १८ सतोबृहत्यः) ।]

ओ त्यम॑ह्व॒ आ रथ॑म॒द्या दंसि॑ष्ठमू॒तये॑ । यम॑श्विना सुहवा रुद्रवर्तनी॒ आ सू॒र्यायै॑ त॒स्थथु॑ः ॥ १ ॥

ओ इति॑ । त्यम् । अ॒ह्वे॒ । आ । रथ॑म् । अ॒द्य । दंसि॑ष्ठम् । ऊ॒तये॑ ।

यम् । अ॒श्वि॒ना॒ । सु॒ऽह॒वा॒ । रु॒द्र॒व॒र्त॒नी॒ इति॑ रुद्र॒ऽवर्तनी । आ । सू॒र्यायै॑ । त॒स्थथु॑ः ॥ १ ॥

पू॒र्वा॒पुषं॑ सु॒हवं॑ पुरु॒स्पृहं॑ भु॒ज्युं वाजे॑षु॒ पूर्व्य॑म् ।

स॒च॒नाव॑न्तं सु॒म॒तिभि॑ः सोभ॒रे॒ विद्वे॑षसम॒ने॒हस॑म् ॥ २ ॥

पू॒र्व॒ऽआ॒पुष॑म् । सु॒ऽह॒व॑म् । पु॒रु॒ऽस्पृह॑म् । भु॒ज्युम् । वाजे॑षु । पूर्व्य॑म् ।

स॒च॒नाऽव॑न्तम् । सु॒म॒तिऽभि॑ः । सो॒भ॒रे॒ । वि॒ऽद्वे॑षसम् । अ॒ने॒हस॑म् ॥ २ ॥

इ॒ह त्या पु॑रु॒भूत॑मा दे॒वा नमो॑भिर॒श्विना॑ । अ॒र्वा॒ची॒ना स्वव॑से करामहे॒ गन्ता॑रा दा॒शुषो॑ गृ॒हम् ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इह। त्या। पुरुभूतमा। देवा। नमःऽभिः। अश्विना।

अर्वाचीना। सु। अवसे। करामहे। गन्तारा। दाशुषः। गृहम्॥ ३॥

युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति।

अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु॥ ४॥

युवोः। रथस्य। परि। चक्रम्। ईयते। ईर्मा। अन्यत्। वाम्। इषण्यति।

अस्मान्। अच्छ। सुऽमतिः। वाम्। शुभः। पती इति। आ। धेनुःऽइव। धावतु॥ ४॥

रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना।

परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम्॥ ५॥ [५]

रथः। यः। वाम्। त्रिऽवन्धुरः। हिरण्यऽअभीशुः। अश्विना।

परि। द्यावापृथिवी इति। भूषति। श्रुतः। तेन। नासत्या। आ। गतम्॥ ५॥

दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः।

ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि॥ ६॥

दशस्यन्ता। मनवे। पूर्व्यम्। दिवि। यवम्। वृकेण। कर्षथः।

ता। वाम्। अद्य। सुमतिऽभिः। शुभः। पती इति। अश्विना। प्र। स्तुवीमहि॥ ६॥

उप नो वाजिनीवसू यातमृतस्य पथिभिः।

येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः॥ ७॥

उप। नः। वाजिनीवसू इति वाजिनीऽवसू। यातम्। ऋतस्य। पथिऽभिः।

येभिः। तृक्षिम्। वृषणा। त्रासदस्यवम्। महे। क्षत्राय। जिन्वथः॥ ७॥

अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू। आ यातं सोमपीतये पिबतं दाशुषो गृहे॥ ८॥

अयम्। वाम्। अद्रिऽभिः। सुतः। सोमः। नरा। वृषण्वसू इति वृषण्ऽवसू।

आ। यातम्। सोमऽपीतये। पिबतम्। दाशुषः। गृहे॥ ८॥

आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू। युञ्जाथां पीवरीरिषः॥ ९॥

आ। हि। रुहतम्। अश्विना। रथे। कोशे। हिरण्यये। वृषण्वसू इति वृषण्ऽवसू।

युञ्जाथाम्। पीवरीः। इषः॥ ९॥

याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम्।

ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम्॥ १०॥ [६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

याभिः। पुक्थम्। अवथः। याभिः। अध्रिऽगुम्। याभिः। बभ्रुम्। विऽजोषसम्।
ताभिः। नः। मक्षु। तूयम्। अश्विना। आ। गतम्। भिषज्यतम्। यत्। आतुरम्॥ १०॥
यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे। वयं गीर्भिर्विपन्यवः॥ ११॥
यत्। अध्रिऽगावः। अध्रिगू इत्यध्रिऽगू। इदा। चित्। अह्नः। अश्विना। हवामहे।
वयम्। गीःऽभिः। विपन्यवः॥ ११॥
ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम्।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम्॥ १२॥
ताभिः। आ। यातम्। वृषणा। उप। मे। हवम्। विश्वऽप्सुम्। विश्वऽवार्यम्।
इषा। मंहिष्ठा। पुरुऽभूतमा। नरा। याभिः। क्रिविम्। ववृधुः। ताभिः। आ। गतम्॥ १२॥
ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे। ता ऊ नमोभिरीमहे॥ १३॥
तौ। इदा। चित्। अहानाम्। तौ। अश्विना। वन्दमानः। उप। ब्रुवे।
तौ। ऊँ इति। नमःऽभिः। ईमहे॥ १३॥
ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी।
मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम्॥ १४॥
तौ। इत्। दोषा। तौ। उषसि। शुभः। पती इति। ता। यामन्। रुद्रवर्तनी इति रुद्रऽवर्तनी।
मा। नः। मर्ताय। रिपवे। वाजिनीवसू इति वाजिनीऽवसू। परः। रुद्रौ। अति। ख्यतम्॥ १४॥
आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी। हुवे पितेव सोभरी॥ १५॥ [७]
आ। सुग्म्याय। सुग्म्यम्। प्रातरिति। रथेन। अश्विना। वा। सक्षणी इति।
हुवे। पिताऽइव। सोभरी॥ १५॥
मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः।
आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा॥ १६॥
मनःऽजवसा। वृषणा। मदऽच्युता। मक्षुम्ऽगमाभिः। ऊतिऽभिः।
आरात्तात्। चित्। भूतम्। अस्मे इति। अवसे। पूर्वीभिः। पुरुऽभोजसा॥ १६॥
आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा। गोमद्दस्रा हिरण्यवत्॥ १७॥
आ। नः। अश्वऽवत्। अश्विना। वर्तिः। यासिष्टम्। मधुऽपातमा। नरा।
गोऽमत्। दस्रा। हिरण्यऽवत्॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना।

अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि॥ १८॥ [८]

सुऽप्रावर्गम्। सुऽवीर्यम्। सुष्ठु। वार्यम्। अनाधृष्टम्। रक्षस्विना।

अस्मिन्। आ। वाम्। आऽयाने। वाजिनीवसू इति वाजिनीऽवसू। विश्वा। वामानि। धीमहि॥। १८॥

[२३] [३० विश्वमना वैयश्वः। अग्निः। उष्णिक्।]

ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसम्। चरिष्णुधूममगृभीतशोचिषम्॥ १॥

ईळिष्व। हि। प्रतीव्यम्। यजस्व। जातऽवेदसम्। चरिष्णुऽधूमम्। अगृभीतऽशोचिषम्॥ १॥

दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा। उत स्तुषे विष्पर्धसो रथानाम्॥ २॥

दामानम्। विश्वऽचर्षणे। अग्निम्। विश्वऽमनः। गिरा। उत। स्तुषे। विऽस्पर्धसः। रथानाम्॥ २॥

येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे। उपविदा वह्निर्विन्दते वसु॥ ३॥

येषाम्। आऽबाधः। ऋग्मियः। इषः। पृक्षः। च। निऽग्रभे। उपऽविदा। वह्निः। विन्दते। वसु॥ ३॥

उदस्य शोचिरस्थाद्दीदियुषो व्य१जरम्। तपुर्जम्भस्य सुद्युतो गणश्रियः॥ ४॥

उत्। अस्य। शोचिः। अस्थात्। दीदियुषः। वि। अजरम्। तपुःऽजम्भस्य। सुऽद्युतः। गणऽश्रियः॥ ४॥

उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा। अभिख्या भासा बृहता शुशुक्वनि॥ ५॥ [९]

उत्। ऊँ इति। तिष्ठ। सुऽअध्वर। स्तवानः। देव्या। कृपा।

अभिऽख्या। भासा। बृहता। शुशुक्वनिः॥ ५॥

अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक्। यथा दूतो बभूथ हव्यवाहनः॥ ६॥

अग्ने। याहि। सुशस्तिऽभिः। हव्या। जुह्वानः। आनुषक्। यथा। दूतः। बभूथ। हव्यवाहनः॥ ६॥

अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम्। तमया वाचा गृणे तमु वः स्तुषे॥ ७॥

अग्निम्। वः। पूर्व्यम्। हुवे। होतारम्। चर्षणीनाम्।

तम्। अया। वाचा। गृणे। तम्। ऊँ इति। वः। स्तुषे॥ ७॥

यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत्। मित्रं न जने सुधितमृतावनि॥ ८॥

यज्ञेभिः। अद्भुतऽक्रतुम्। यम्। कृपा। सूदयन्ते। इत्।

मित्रम्। न। जने। सुऽधितम्। ऋतऽवनि॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋतावानमृतायवो यज्ञस्य साधनं गिरा। उपो एनं जुजुषुर्नमसस्पदे॥ ९॥

ऋत॰वानम्। ऋत॰यवः। यज्ञस्य। साधनम्। गिरा। उपो इति। एनम्। जुजुषुः। नमसः। पदे॥ ९॥

अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः। होता यो अस्ति विक्ष्वा यशस्तमः॥ १०॥ [१०]

अच्छ। नः। अङ्गिरःऽतमम्। यज्ञासः। यन्तु। सम्॰यतः।

होता। यः। अस्ति। विक्षु। आ। यशःऽतमः॥ १०॥

अग्ने तव त्ये अजरेन्धानासो बृहद्भाः। अश्वाइव वृषणस्तविषीयवः॥ ११॥

अग्ने। तव। त्ये। अजर। इन्धानासः। बृहत्। भाः। अश्वाःऽइव। वृषणः। तविषी॰यवः॥ ११॥

स त्वं न ऊर्जां पते रयिं रास्व सुवीर्यम्। प्राव नस्तोके तनये समत्स्वा॥ १२॥

सः। त्वम्। नः। ऊर्जाम्। पते। रयिम्। रास्व। सु॰वीर्यम्।

प्र। अव। नः। तोके। तनये। समत्॰सु। आ॥ १२॥

यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि। विश्वेदग्निः प्रति रक्षांसि सेधति॥ १३॥

यत्। वै। ऊँ इति। विश्पतिः। शितः। सु॰प्रीतः। मनुषः। विशि।

विश्वा। इत्। अग्निः। प्रति। रक्षांसि। सेधति॥ १३॥

श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते। नि मायिनस्तपुषा रक्षसो दह॥ १४॥

श्रुष्टी। अग्ने। नवस्य। मे। स्तोमस्य। वीर। विश्पते। नि। मायिनः। तपुषा। रक्षसः। दह॥ १४॥

न तस्य मायया चन रिपुरीशीत मर्त्यः। यो अग्नये ददाश हव्यदातिभिः॥ १५॥ [११]

न। तस्य। मायया। चन। रिपुः। ईशीत। मर्त्यः। यः। अग्नये। ददाश। हव्यदाति॰भिः॥ १५॥

व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः। महो राये तमु त्वा समिधीमहि॥ १६॥

वि॰अश्वः। त्वा। वसु॰विदम्। उक्षण्युः। अप्रीणात्। ऋषिः।

महः। राये। तम्। ऊँ इति। त्वा। सम्। इधीमहि॥ १६॥

उशना काव्यस्त्वा नि होतारमसादयत्। आयजिं त्वा मनवे जातवेदसम्॥ १७॥

उशना। काव्यः। त्वा। नि। होतारम्। असादयत्। आ॰यजिम्। त्वा। मनवे। जात॰वेदसम्॥ १७॥

विश्वे हि त्वा सजोषसो देवासो दूतमक्रत। श्रुष्टी देव प्रथमो यज्ञियो भुवः॥ १८॥

विश्वे। हि। त्वा। स॰जोषसः। देवासः। दूतम्। अक्रत। श्रुष्टी। देव। प्रथमः। यज्ञियः। भुवः॥ १८॥

इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः। पावकं कृष्णवर्तनिं विहायसम्॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमम्। घ। वीरः। अमृतम्। दूतम्। कृण्वीत। मर्त्यः। पावकम्। कृष्णऽवर्तनिम्। विऽहायसम्॥ १९॥

तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम्। विशामग्निमजरं प्रत्नमीड्यम्॥ २०॥ [१२]

तम्। हुवेम। यतऽस्रुचः। सुऽभासम्। शुक्रऽशोचिषम्।

विशाम्। अग्निम्। अजरम्। प्रत्नम्। ईड्यम्॥ २०॥

यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत्। भूरि पोषं स धत्ते वीरवद्यशः॥ २१॥

यः। अस्मै। हव्यदातिऽभिः। आऽहुतिम्। मर्तः। अविधत्।

भूरि। पोषम्। सः। धत्ते। वीरऽवत्। यशः॥ २१॥

प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम्। प्रति स्रुगेति नमसा हविष्मती॥ २२॥

प्रथमम्। जातऽवेदसम्। अग्निम्। यज्ञेषु। पूर्व्यम्। प्रति। स्रुक्। एति। नमसा। हविष्मती॥ २२॥

आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत्। मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे॥ २३॥

आभिः। विधेम। अग्नये। ज्येष्ठाभिः। व्यश्वऽवत्। मंहिष्ठाभिः। मतिऽभिः। शुक्रऽशोचिषे॥ २३॥

नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत्। ऋषे वैयश्व दम्यायाग्नये॥ २४॥

नूनम्। अर्च। विऽहायसे। स्तोमेभिः। स्थूरयूपऽवत्। ऋषे। वैयश्व। दम्याय। अग्नये॥ २४॥

अतिथिं मानुषाणां सूनुं वनस्पतीनाम्। विप्रा अग्निमवसे प्रत्नमीळते॥ २५॥ [१३]

अतिथिम्। मानुषाणाम्। सूनुम्। वनस्पतीनाम्। विप्राः। अग्निम्। अवसे। प्रत्नम्। ईळते॥ २५॥

महो विश्वाँ अभिषतो३भि हव्यानि मानुषा। अग्ने नि षत्सि नमसाधि बर्हिषि॥ २६॥

महः। विश्वान्। अभि। सतः। अभि। हव्यानि। मानुषा।

अग्ने। नि। सत्सि। नमसा। अधि। बर्हिषि॥ २६॥

वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः। सुवीर्यस्य प्रजावतो यशस्वतः॥ २७॥

वंस्व। नः। वार्या। पुरु। वंस्व। रायः। पुरुऽस्पृहः। सुऽवीर्यस्य। प्रजाऽवतः। यशस्वतः॥ २७॥

त्वं वरो सुषाम्णेऽग्ने जनाय चोदय। सदा वसो रातिं यविष्ठ शश्वते॥ २८॥

त्वम्। वरो इति। सुऽसाम्ने। अग्ने। जनाय। चोदय। सदा। वसो इति। रातिम्। यविष्ठ। शश्वते॥ २८॥

त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः। महो रायः सातिमग्ने अपा वृधि॥ २९॥

त्वम्। हि। सुऽप्रतूः। असि। त्वम्। नः। गोऽमतीः। इषः।

महः। रायः। सातिम्। अग्ने। अप। वृधि॥ २९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्ने त्वं यशा अस्या मित्रावरुणा वह। ऋतावाना सम्राजा पूतदक्षसा॥ ३०॥ [१४]

अग्ने। त्वम्। यशाः। असि। आ। मित्रावरुणा। वह। ऋतऽवाना। सम्ऽराजा। पूतऽदक्षसा॥ ३०॥

[२४][३० विश्वमना वैयश्वः। इन्द्रः, २८-३० वरोः सौषाम्णस्य दानस्तुतिः। उष्णिक्, ३० अनुष्टुप्।]

सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे। स्तुष ऊ षु वो नृतमाय धृष्णवे॥ १॥

सखायः। आ। शिषामहि। ब्रह्म। इन्द्राय। वज्रिणे। स्तुषे। ऊँ इति। सु। वः। नृऽतमाय। धृष्णवे॥ १॥

शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा। मघैर्मघोनो अति शूर दाशसि॥ २॥

शवसा। हि। असि। श्रुतः। वृत्रऽहत्येन। वृत्रऽहा। मघैः। मघोनः। अति। शूर। दाशसि॥ २॥

स नः स्तवान आ भर रयिं चित्रश्रवस्तमम्। निरेके चिद्यो हरिवो वसुर्ददिः॥ ३॥

सः। नः। स्तवानः। आ। भर। रयिम्। चित्रश्रवःऽतमम्।

निरेके। चित्। यः। हरिऽवः। वसुः। ददिः॥ ३॥

आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम्। धृषता धृष्णो स्तवमान आ भर॥ ४॥

आ। निरेकम्। उत। प्रियम्। इन्द्र। दर्षि। जनानाम्। धृषता। धृष्णो इति। स्तवमानः। आ। भर॥ ४॥

न ते सव्यं न दक्षिणं हस्तं वरन्त आमुरः। न परिबाधो हरिवो गविष्टिषु॥ ५॥ [१५]

न। ते। सव्यम्। न। दक्षिणम्। हस्तम्। वरन्ते। आऽमुरः।

न। परिऽबाधः। हरिऽवः। गोऽइष्टिषु॥ ५॥

आ त्वा गोभिरिव व्रजं गीर्भिर्ऋणोम्यद्रिवः। आ स्मा कामं जरितुरा मनः पृण॥ ६॥

आ। त्वा। गोभिःऽइव। व्रजम्। गीःऽभिः। ऋणोमि। अद्रिऽवः।

आ। स्म। कामम्। जरितुः। आ। मनः। पृण॥ ६॥

विश्वानि विश्वमनसो धिया नो वृत्रहन्तम। उग्र प्रणेतरधि षू वसो गहि॥७॥

विश्वानि। विश्वऽमनसः। धिया। नः। वृत्रहन्ऽतम।

उग्र। प्रनेतरिति प्रऽनेतः। अधि। सु। वसो इति। गहि॥७॥

वयं ते अस्य वृत्रहन्विद्याम शूर नव्यसः। वसोः स्पार्हस्य पुरुहूत राधसः॥ ८॥

वयम्। ते। अस्य। वृत्रऽहन्। विद्याम। शूर। नव्यसः। वसोः। स्पार्हस्य। पुरुऽहूत। राधसः॥ ८॥

इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः। अमृक्ता रातिः पुरुहूत दाशुषे॥ ९॥

इन्द्र। यथा। हि। अस्ति। ते। अपरिऽइतम्। नृतो इति। शवः। अमृक्ता। रातिः। पुरुऽहूत। दाशुषे॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ वृषस्व महामह महे नृतम राधसे। दृळ्हश्चिद् दृह्य मघवन्मघत्तये॥ १०॥ [१६]

आ। वृषस्व। महाऽमह। महे। नृऽतम। राधसे। दृळ्हः। चित्। दृह्य। मघऽवन्। मघत्तये॥ १०॥

नू अन्यत्रा चिदद्रिवस्त्वन्नो जग्मुराशसः। मघवञ्छग्धि तव तन्न ऊतिभिः॥ ११॥

नु। अन्यत्र। चित्। अद्रिऽवः। त्वत्। नः। जग्मुः। आऽशसः।

मघऽवन्। शग्धि। तव। तत्। नः। ऊतिऽभिः॥ ११॥

नह्य१ङ्ग नृतो त्वदन्यं विन्दामि राधसे। राये द्युम्नाय शवसे च गिर्वणः॥ १२॥

नहि। अङ्ग। नृतो इति। त्वत्। अन्यम्। विन्दामि। राधसे। राये। द्युम्नाय। शवसे। च। गिर्वणः॥ १२॥

एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु। प्र राधसा चोदयाते महित्वना॥ १३॥

आ। इन्दुम्। इन्द्राय। सिञ्चत। पिबाति। सोम्यम्। मधु। प्र। राधसा। चोदयाते। महिऽत्वना॥ १३॥

उपो हरीणां पतिं दक्षं पृञ्चन्तमब्रवम्। नूनं श्रुधि स्तुवतो अश्व्यस्य॥ १४॥

उपो इति। हरीणाम्। पतिम्। दक्षम्। पृञ्चन्तम्। अब्रवम्। नूनम्। श्रुधि। स्तुवतः। अश्व्यस्य॥ १४॥

नह्य१ङ्ग पुरा चन जज्ञे वीरतरस्त्वत्। नकी राया नैवथा न भन्दना॥ १५॥ [१७]

नहि। अङ्ग। पुरा। चन। जज्ञे। वीरऽतरः। त्वत्। नकिः। राया। न। एवऽथा। न। भन्दना॥ १५॥

एदु मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः। एवा हि वीरः स्तवते सदावृधः॥ १६॥

आ। इत्। ऊँ इति। मध्वः। मदिन्ऽतरम्। सिञ्च। वा। अध्वर्यो इति। अन्धसः।

एव हि। वीरः स्तवते। सदाऽवृधः॥ १६॥

इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना॥ १७॥

इन्द्र। स्थातः। हरीणाम्। नकिः। ते। पूर्व्यऽस्तुतिम्। उत्। आनंश। शवसा। न। भन्दना॥ १७॥

तं वो वाजानां पतिमहूमहि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यम्॥ १८॥

तम्। वः। वाजानाम्। पतिम्। अहूमहि। श्रवस्यवः। अप्रायुऽभिः। यज्ञेभिः। ववृधेन्यम्॥ १८॥

एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम्। कृष्टीर्यो विश्वा अभ्यस्त्येक इत्॥ १९॥

एतो इति। नु। इन्द्रम्। स्तवाम। सखायः। स्तोम्यम्। नरम्।

कृष्टीः। यः। विश्वाः। अभि। अस्ति। एकः। इत्॥ १९॥

अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः। घृतात्स्वादीयो मधुनश्च वोचत॥ २०॥ [१८]

अगोऽरुधाय। गोऽइषे। द्युक्षाय। दस्म्यम्। वचः। घृतात्। स्वादीयः। मधुनः। च। वोचत॥ २०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्यामितानि वीर्या३ न राधः पर्येतवे। ज्योतिर्न विश्वमभ्यस्ति दक्षिणा॥ २१॥

यस्य। अमितानि। वीर्या। न। राधः। परिऽएतवे। ज्योतिः। न। विश्वम्। अभि। अस्ति। दक्षिणा॥ २१॥

स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम्। अर्यो गयं मंहमानं वि दाशुषे॥ २२॥

स्तुहि। इन्द्रम्। व्यश्वऽवत्। अनूर्मिम्। वाजिनम्। यमम्। अर्यः। गयम्। मंहमानम्। वि। दाशुषे॥ २२॥

एवा नूनमुप स्तुहि वैयश्व दशमं नवम्। सुविद्वांसं चर्कृत्यं चरणीनाम्॥ २३॥

एव। नूनम्। उप। स्तुहि। वैयश्व। दशमम्। नवम्। सुऽविद्वांसम्। चर्कृत्यम्। चरणीनाम्॥ २३॥

वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम्। अहरहः शुन्ध्युः परिपदामिव॥ २४॥

वेत्थ। हि। निःऽऋतीनाम्। वज्रऽहस्त। परिऽवृजम्। अहःऽअहः। शुन्ध्युः। परिपदाम्ऽइव॥ २४॥

तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने। द्विता कुत्साय शिश्नथो नि चोदय॥ २५॥ [१९]

तत्। इन्द्र। अवः। आ। भर। येन। दंसिष्ठ। कृत्वने। द्विता। कुत्साय। शिश्नथः। नि। चोदय॥ २५॥

तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे। स त्वं नो विश्वा अभिमातीः सक्षणिः॥ २६॥

तम्। ऊँ इति। त्वा। नूनम्। ईमहे। नव्यम्। दंसिष्ठ। सन्यसे।

सः। त्वम्। नः। विश्वाः। अभिऽमातीः। सक्षणिः॥ २६॥

य ऋक्षादंहसो मुचद्यो वार्यात्सप्त सिन्धुषु। वधर्दासस्य तुविनृम्ण नीनमः॥ २७॥

यः। ऋक्षात्। अंहसः। मुचत्। यः। वा। आर्यात्। सप्त। सिन्धुषु।

वधः। दासस्य। तुविऽनृम्ण। नीनमः॥ २७॥

यथा वरो सुषाम्णे सनिभ्य आवहो रयिम्। व्यश्वेभ्यः सुभगे वाजिनीवति॥ २८॥

यथा। वरो इति। सुऽसाम्ने। सनिऽभ्यः। आ। अवहः। रयिम्।

विऽअश्वेभ्यः। सुऽभगे। वाजिनीऽवति॥ २८॥

आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः। स्थूरं च राधः शतवत्सहस्रवत्॥ २९॥

आ। नार्यस्य। दक्षिणा। विऽअश्वान्। एतु। सोमिनः।

स्थूरम्। च। राधः। शतऽवत्। सहस्रऽवत्॥ २९॥

यत्त्वा पृच्छादीजानः कुहया कुहयाकृते। एषो अपश्रितो वलो गोमतीमव तिष्ठति॥ ३०॥ [२०]

यत्। त्वा। पृच्छात्। ईजानः। कुहया। कुहयाऽकृते।

एषः। अपऽश्रितः। वलः। गोऽमतीम्। अव। तिष्ठति॥ ३०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[२५] [२४ विश्वमना वैयश्वः। मित्रावरुणौ, १०-१२ विश्वे देवाः। उष्णिक्, २३ उष्णिग्गर्भा।]

ता वां॒ विश्व॑स्य गो॒पा दे॒वा दे॒वेषु॑ य॒ज्ञिया॑। ऋ॒तावा॑ना यजसे पू॒तद॑क्षसा॥ १॥

ता। वा॒म्। विश्व॑स्य। गो॒पा। दे॒वा। दे॒वेषु॑। य॒ज्ञिया॑। ऋ॒त॒ऽवा॑ना। य॒ज॒से॒। पू॒त॒ऽद॑क्षसा॥ १॥

मि॒त्रा तना॑ न र॒थ्या॒३॑ वरु॑णो॒ यश्च॑ सु॒क्रतुः॑। स॒नात्सु॑जा॒ता तन॑या धृ॒तव्र॑ता॥ २॥

मि॒त्रा। तना॑। न। र॒थ्या॑। वरु॑णः। यः। च॒। सु॒ऽक्रतुः॑। स॒नात्। सु॒ऽजा॒ता। तन॑या। धृ॒त॒ऽव्र॑ता॥ २॥

ता मा॒ता वि॒श्ववे॑दसासु॒र्या॑य प्रम॑हसा। म॒ही ज॑जा॒नादि॑तिर्ऋ॒ताव॑री॥ ३॥

ता। मा॒ता। वि॒श्व॒ऽवे॑दसा। अ॒सु॒र्या॑य। प्र॒ऽम॑हसा। म॒ही। ज॒जा॒न॒। अदि॑तिः। ऋ॒त॒ऽव॑री॥ ३॥

म॒हान्ता॑ मि॒त्रावरु॑णा स॒म्राजा॑ दे॒वावसु॑रा। ऋ॒तावा॑नावृ॒तमा घो॑षतो बृ॒हत्॥ ४॥

म॒हान्ता॑। मि॒त्रावरु॑णा। स॒म्ऽराजा॑। दे॒वौ। असु॑रा। ऋ॒त॒ऽवा॑नौ। ऋ॒तम्। आ। घो॒ष॒तः॒। बृ॒ह॒त्॥ ४॥

नपा॑ता॒ शव॑सो म॒हः सू॒नू दक्ष॑स्य सु॒क्रतू॑। सृ॒प्रदा॑नू इ॒षो वास्त्वधि॑ क्षितः॥ ५॥ [२१]

नपा॑ता। शव॑सः। म॒हः। सू॒नू इति॑। दक्ष॑स्य। सु॒क्रतू इति॑ सु॒ऽक्रतू॑।

सृ॒प्रदा॑नू इति सृ॒ऽप्रदा॑नू। इ॒षः। वास्तु॑। अधि॑। क्षि॒तः॒॥ ५॥

सं या दानू॑नि ये॒मथु॑र्दि॒व्याः पार्थि॑वी॒रिषः॑। नभ॑स्वती॒रा वां॑ चरन्तु वृ॒ष्टयः॑॥ ६॥

सम्। या। दानू॑नि। ये॒मथुः॑। दि॒व्याः। पार्थि॑वीः। इषः॑। नभ॑स्वतीः। आ। वा॒म्। च॒र॒न्तु॒। वृ॒ष्टयः॑॥ ६॥

अधि॒ या बृ॑ह॒तो दि॒वो॒३॑भि यू॒थेव॒ पश्य॑तः। ऋ॒तावा॑ना स॒म्राजा॒ नम॑से हि॒ता॥ ७॥

अधि॑। या। बृ॒ह॒तः। दि॒वः। अ॒भि। यू॒थाऽइ॑व। पश्य॑तः। ऋ॒त॒ऽवा॑ना। स॒म्ऽराजा॑। नम॑से। हि॒ता॥ ७॥

ऋ॒तावा॑ना॒ नि षे॑दतुः साम्रा॑ज्याय सु॒क्रतू॑। धृ॒तव्र॑ता क्ष॒त्रिया॑ क्ष॒त्रमा॑शतुः॥ ८॥

ऋ॒त॒ऽवा॑ना। नि। से॒द॒तुः॒। साम्ऽरा॑ज्याय। सु॒क्रतू इति॑ सु॒ऽक्रतू॑।

धृ॒त॒ऽव्र॑ता। क्ष॒त्रिया॑। क्ष॒त्रम्। आ॒श॒तुः॒॥ ८॥

अ॒क्ष्णश्चि॑द्गातु॒वित्त॑रानुल्ब॒णेन॒ चक्ष॑सा। नि चि॑न्मि॒षन्ता॑ निचि॒रा नि चि॑क्यतुः॥ ९॥

अ॒क्ष्णः। चि॒त्। गा॒तु॒वित्ऽत॑रा। अ॒नु॒ल्ब॒णेन॑। चक्ष॑सा।

नि। चि॒त्। मि॒षन्ता॑। नि॒ऽचि॒रा। नि। चि॒क्य॒तुः॒॥ ९॥

उ॒त नो॑ दे॒व्यदि॑तिरुरु॒ष्यतां॒ नास॑त्या। उ॒रु॒ष्यन्तु॑ म॒रुतो॑ वृ॒द्धश॑वसः॥ १०॥ [२२]

उ॒त। नः॒। दे॒वी। अदि॑तिः। उ॒रु॒ष्यता॑म्। नास॑त्या। उ॒रु॒ष्यन्तु॑। म॒रुतः॑। वृ॒द्ध॒ऽश॑वसः॥ १०॥

ते नो॑ ना॒वमु॑रुष्यत॒ दिवा॒ नक्तं॑ सुदानवः। अरि॑ष्यन्तो॒ नि पा॒युभिः॑ सचेमहि॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ते। नः। नावम्। उरुष्यत। दिवा। नक्तम्। सुऽदानवः। अरिष्यन्तः। नि। पायुऽभिः। सचेमहि॥ ११॥

अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे। श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये॥ १२॥

अघ्नते। विष्णवे। वयम्। अरिष्यन्तः। सुऽदानवे। श्रुधि। स्वऽयावन्। सिन्धो इति। पूर्वऽचित्तये॥ १२॥

तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम्। मित्रो यत्पान्ति वरुणो यदर्यमा॥ १३॥

तत्। वार्यम्। वृणीमहे। वरिष्ठम्। गोपयत्यम्। मित्रः। यत्। पान्ति। वरुणः। यत्। अर्यमा॥ १३॥

उत नः सिन्धुरपां तन्मरुतस्तदश्विना। इन्द्रो विष्णुर्मीढ्वांसः सजोषसः॥ १४॥

उत। नः। सिन्धुः। अपाम्। तत्। मरुतः। तत्। अश्विना।

इन्द्रः। विष्णुः। मीढ्वांसः। सऽजोषसः॥ १४॥

ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित्। तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः॥ १५॥ [२३]

ते। हि। स्म। वनुषः। नरः। अभिऽमातिम्। कयस्य। चित्।

तिग्मम्। न। क्षोदः। प्रतिऽघ्नन्ति। भूर्णयः॥ १५॥

अयमेक इत्था पुरूरु चष्टे वि विश्पतिः। तस्य व्रतान्यनु वश्चरामसि॥ १६॥

अयम्। एकः। इत्था। पुरु। उरु। चष्टे। वि। विश्पतिः। तस्य। व्रतानि। अनु। वः। चरामसि॥ १६॥

अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम। मित्रस्य व्रता वरुणस्य दीर्घश्रुत्॥ १७॥

अनु। पूर्वाणि। ओक्या। साम्ऽराज्यस्य। सश्चिम। मित्रस्य। व्रता। वरुणस्य। दीर्घऽश्रुत्॥ १७॥

परि यो रश्मिना दिवोऽन्तान्ममे पृथिव्याः। उभे आ पप्रौ रोदसी महित्वा॥ १८॥

परि। यः। रश्मिना। दिवः। अन्तान्। ममे। पृथिव्याः।

उभे इति। आ। पप्रौ। रोदसी इति। महिऽत्वा॥ १८॥

उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः। अग्निर्न शुक्रः समिधान आहुतः॥ १९॥

उत्। ऊँ इति। स्यः। शरणे। दिवः। ज्योतिः। अयंस्त। सूर्यः।

अग्निः। न। शुक्रः। सम्ऽइधानः। आऽहुतः॥ १९॥

वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः। ईशे हि पित्वोऽविषस्य दावने॥ २०॥ [२४]

वचः। दीर्घऽप्रसद्मनि। ईशे। वाजस्य। गोऽमतः। ईशे। हि। पित्वः। अविषस्य। दावने॥ २०॥

तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे। भोजेष्वस्माँ अभ्युच्चरा सदा॥ २१॥

तत्। सूर्यम्। रोदसी इति। उभे इति। दोषा। वस्तोः। उप। ब्रुवे।

भोजेषु। अस्मान्। अभि। उत्। चर। सदा॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋज्रमुक्षण्यायने रजतं हरयाणे। रथं युक्तमसनाम सुषामणि॥ २२॥

ऋज्रम्। उक्षण्यायने। रजतम्। हरयाणे। रथम्। युक्तम्। असनाम। सुऽसामनि॥ २२॥

ता मे अश्वयानां हरीणां नितोशना। उतो नु कृत्व्यानां नृवाहसा॥ २३॥

ता। मे। अश्व्यानाम्। हरीणाम्। निऽतोशना। उतो इति। नु। कृत्व्यानाम्। नृऽवाहसा॥ २३॥

स्मदभीशू कशावन्ता विप्रा नविष्ठया मती। महो वाजिनावर्वन्ता सचासनम्॥ २४॥ [२५]

स्मदभीशू इति स्मत्ऽअभीशू। कशाऽवन्ता। विप्रा। नविष्ठया। मती।

महः। वाजिनौ। अर्वन्ता। सचा। असनम्॥ २४॥

[२६] [२५ विश्वमना वैयश्वः, व्यश्वो वाङ्गिरसः। अश्विनौ, २०-२५ वायुः। उष्णिक् १६-१९, २१, २५ गायत्र्यः; २० अनुष्टुप्]

युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु। अतूर्तदक्षा वृषणा वृषण्वसू॥ १॥

युवोः। ऊँ इति। सु। रथम्। हुवे। सधऽस्तुत्याय। सूरिषु।

अतूर्तऽदक्षा। वृषणा। वृषण्वसू इति वृषण्ऽवसू॥ १॥

युवं वरो सुषाम्णे महे तने नासत्या। अवोभिर्याथो वृषणा वृषण्वसू॥ २॥

युवम्। वरो इति। सुऽसाम्ने। महे। तने। नासत्या।

अवःऽभिः। याथः। वृषणा। वृषण्वसू इति वृषण्ऽवसू॥ २॥

ता वामद्य हवामहे हव्येभिर्वाजिनीवसू। पूर्वीरिष इषयन्तावति क्षपः॥ ३॥

ता। वाम्। अद्य। हवामहे। हव्येभिः। वाजिनीवसू इति वाजिनीऽवसू।

पूर्वीः। इषः। इषयन्तौ। अति। क्षपः॥ ३॥

आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा। उप स्तोमान्तुरस्य दर्शथः श्रिये॥ ४॥

आ। वाम्। वाहिष्ठः। अश्विना। रथः। यातु। श्रुतः। नरा। उप। स्तोमान्। तुरस्य। दर्शथः। श्रिये॥ ४॥

जुहुराणा चिदश्विना मन्येथां वृषण्वसू। युवं हि रुद्रा पर्षथो अति द्विषः॥ ५॥ [२६]

जुहुराणा। चित्। अश्विना। आ। मन्येथाम्। वृषण्वसू इति वृषण्ऽवसू।

युवम्। हि। रुद्रा। पर्षथः। अति। द्विषः॥ ५॥

दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः। धियंजिन्वा मधुवर्णा शुभस्पती॥ ६॥

दस्रा। हि। विश्वम्। आनुषक्। मक्षुऽभिः। परिऽदीयथः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धि॒य॒म्ऽजि॒न्वा । मधु॑ऽवर्णा । शु॒भः । पती॒ इति॑ ॥ ६ ॥

उप॑ नो यातमश्विना रा॒या वि॒श्वपु॑षा स॒ह । म॒घवा॑ना सुवीरा॒वन॑पच्युता ॥ ७ ॥

उप॑ । नः॒ । या॒त॒म् । अ॒श्वि॒ना॒ । रा॒या । वि॒श्व॒ऽपु॑षा । स॒ह । म॒घ॒ऽवा॑ना । सु॒ऽवी॒रौ॑ । अन॑पऽच्युता ॥ ७ ॥

आ मे॑ अ॒स्य प्र॑ती॒व्य॑१मिन्द्र॑नासत्या गतम् । दे॒वा दे॒वेभि॑र॒द्य स॒चन॑स्तमा ॥ ८ ॥

आ । मे॒ । अ॒स्य । प्र॒ती॒व्य॑म् । इन्द्र॑नासत्या । ग॒त॒म् । दे॒वा । दे॒वेभि॑ः । अ॒द्य । स॒चन॑ःऽतमा ॥ ८ ॥

व॒यं हि वा॒ं हवा॑मह उक्ष॒ण्यन्तो॑ व्यश्व॒वत् । सु॒म॒तिभि॒रुप॑ विप्रावि॒हा ग॑तम् ॥ ९ ॥

व॒यम् । हि । वा॒म् । हवा॑महे । उ॒क्ष॒ण्यन्त॑ः । व्य॒श्व॒ऽवत् ।

सु॒म॒ति॒ऽभि॑ः । उप॑ । वि॒प्रौ॒ । इ॒ह । आ । ग॒त॒म् ॥ ९ ॥

अ॒श्विना॒ स्वृ॑षे स्तुहि कु॒वित्ते॒ श्रव॑तो॒ हव॑म् । नेदी॑यसः कूळयातः प॒णीँरु॒त ॥ १० ॥ [२७]

अ॒श्विना॑ । सु । ऋ॒षे॒ । स्तु॒हि॒ । कु॒वित् । ते॒ । श्रव॑तः । हव॑म् । नेदी॑यसः । कू॒ळ॒या॒त॒ः । प॒णीन् । उ॒त ॥ १० ॥

वै॒य॒श्वस्य॑ श्रुतं नरो॒तो मे॑ अ॒स्य वे॑दथः । स॒जोष॑सा॒ वरु॑णो मि॒त्रो अ॑र्य॒मा ॥ ११ ॥

वै॒य॒श्वस्य॑ । श्रु॒त॒म् । न॒रा॒ । उ॒तो इति॑ । मे॒ । अ॒स्य । वे॒द॒थ॒ः । स॒ऽजोष॑सा । वरु॑णः । मि॒त्रः । अ॒र्य॒मा ॥ ११ ॥

यु॒वाद॑त्तस्य धिष्ण्या यु॒वानी॑तस्य सू॒रिभि॑ः । अह॑रहर्वृषणा॒ मह्यं॑ शिक्षतम् ॥ १२ ॥

यु॒वाऽद॑त्तस्य । धि॒ष्ण्या॒ । यु॒वाऽनी॑तस्य । सू॒रिऽभि॑ः । अह॑ःऽअहः । वृ॒ष॒णा॒ । मह्य॑म् । शि॒क्ष॒त॒म् ॥ १२ ॥

यो वा॑ं य॒ज्ञेभि॒रावृ॒तोऽधि॑वस्त्रा व॒धूरि॑व । स॒प॒र्यन्ता॑ शु॒भे च॑क्राते अ॒श्विना॑ ॥ १३ ॥

यः । वा॒म् । य॒ज्ञेभि॑ः । आऽवृ॑तः । अधि॑ऽवस्त्रा । व॒धूःऽइ॑व ।

स॒प॒र्यन्ता॑ । शु॒भे । च॒क्रा॒ते॒ इति॑ । अ॒श्विना॑ ॥ १३ ॥

यो वा॑मुरु॒व्यच॑स्तम॒ं चिके॑तति नृ॒पाय्य॑म् । व॒र्तिर॑श्विना॒ परि॑ यातमस्म॒यू ॥ १४ ॥

यः । वा॒म् । उ॒रु॒व्यच॑ःऽतमम् । चिके॑तति । नृ॒ऽपाय्य॑म् ।

व॒र्तिः । अ॒श्वि॒ना॒ । परि॑ । या॒त॒म् । अ॒स्म॒यू इत्य॑स्म॒ऽयू ॥ १४ ॥

अ॒स्मभ्य॑ं सु वृ॑षणवसू या॒तं व॒र्तिर्नृ॒पाय्य॑म् । वि॒षु॒द्रुहे॑व य॒ज्ञमू॑हथु॒र्गि॒रा ॥ १५ ॥ [२८]

अ॒स्मभ्य॑म् । सु । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू । या॒त॒म् । व॒र्तिः । नृ॒ऽपाय्य॑म् ।

वि॒षु॒द्रुहा॑ऽइव । य॒ज्ञम् । ऊ॒ह॒थु॒ः । गि॒रा ॥ १५ ॥

वहि॑ष्ठो वा॒ं हवा॑ना॒ं स्तोमो॑ दू॒ता हु॑वन्नरा । यु॒वाभ्या॑ं भूत्वश्विना ॥ १६ ॥

वहि॑ष्ठः । वा॒म् । हवा॑नाम् । स्तोम॑ः । दू॒तः । हु॒व॒त् । न॒रा॒ । यु॒वाभ्या॑म् । भू॒तु॒ । अ॒श्वि॒ना॒ ॥ १६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

य॒द॒दो दि॒वो अ॑र्ण॒व इ॒षो वा॒ मद॑थो गृ॒हे। श्रु॒तमिन्मे॑ अमर्त्या॥ १७॥

यत्। अ॒दः। दि॒वः। अ॒र्ण॒वे। इ॒षः। वा॒। मद॑थः। गृ॒हे। श्रु॒तम्। इत्। मे॒। अ॒म॒र्त्या॒॥ १७॥

उ॒त स्या श्वे॒तया॑वरी॒ वाहि॑ष्ठा वां न॒दीना॑म्। सिन्धु॒र्हिर॑ण्यवर्तनि॥ १८॥

उ॒त। स्या। श्वे॒त॑ऽयावरी। वाहि॑ष्ठा। वा॒म्। न॒दीना॑म्। सिन्धुः॑। हिर॑ण्यऽवर्तनिः॥ १८॥

स्मदे॒तया॑ सुकी॒र्त्याश्वि॑ना श्वे॒तया॑ धि॒या। वहे॑थे शुभ्रयावाना॥ १९॥

स्मत्। ए॒तया॑। सु॒ऽकी॒र्त्या। अश्वि॑ना। श्वे॒तया॑। धि॒या। वहे॑थे॒ इति॑। शु॒भ्र॒ऽया॒वा॒ना॒॥ १९॥

यु॒क्ष्वा हि त्वं र॑थासहा॑ यु॒वस्व॒ पोष्या॑ वसो। आन्नो॑ वायो॒ मधु॑ पिबा॒स्माकं॒ सव॒ना ग॑हि॥ २०॥

यु॒क्ष्व। हि। त्वम्। र॒थ॒ऽस॒हा॑। यु॒वस्व॑। पोष्या॑। व॒सो॒ इति॑। [२९]

आत्। नः॒। वा॒यो॒ इति॑। मधु॑। पि॒ब। अ॒स्माक॑म्। सव॑ना। आ। ग॒हि॒॥ २०॥

तव॑ वायवृतस्पते॒ त्वष्टु॑र्जामातरद्भुत। अवां॒स्या वृ॑णीमहे॥ २१॥

तव॑। वा॒यो॒ इति॑। ऋ॒त॒ऽप॒ते॒। त्वष्टुः॑। जा॒मा॒तः॒। अ॒द्भु॒त॒। अवां॑सि। आ। वृ॒णी॒म॒हे॒॥ २१॥

त्वष्टु॒र्जामा॑तरं व॒यमीशा॑नं रा॒य ईमहे। सु॒तावन्तो वा॒युं द्यु॒म्ना जना॑सः॥ २२॥

त्वष्टुः॑। जामा॑तरम्। व॒यम्। ईशा॑नम्। रा॒यः। ई॒म॒हे॒। सु॒तऽव॑न्तः। वा॒युम्। द्यु॒म्ना। जना॑सः॥ २२॥

वायो॑ या॒हि शि॒वा दि॒वो वह॑स्वा॒ सु स्वश्व्य॑म्। वह॑स्व म॒हः पृ॑थुपक्ष॑सा॒ रथे॑॥ २३॥

वायो॒ इति॑। या॒हि। शि॒व॒। आ। दि॒वः। वह॑स्व। सु। सु॒ऽअश्व्य॑म्।

वह॑स्व। म॒हः। पृ॒थु॒ऽपक्ष॑सा। रथे॑॥ २३॥

त्वां हि सु॒प्सर॑स्तमं नृ॒षद॑नेषु हू॒महे॑। ग्रावा॑णं॒ नाश्व॑पृष्ठं मं॒हना॑॥ २४॥

त्वाम्। हि। सु॒प्सरः॑ऽतमम्। नृ॒ऽसद॑नेषु। हू॒महे॑। ग्रावा॑णम्। न। अश्व॑ऽपृष्ठम्। मं॒हना॑॥ २४॥

स त्वं नो॑ देव॒ मन॑सा॒ वायो॑ मन्दा॒नो अ॑ग्रियः। कृ॒धि वाजाँ॑ अ॒पो धियः॑॥ २५॥ [३०]

सः। त्वम्। नः॒। दे॒व॒। मन॑सा। वायो॒ इति॑। म॒न्दा॒नः। अ॒ग्रियः॑। कृ॒धि। वाजा॑न्। अ॒पः। धियः॑॥ २५॥

[२७] [२२ मनुर्वैवस्वतः। विश्वे देवाः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

अ॒ग्निरु॒क्थे पु॒रोहि॑तो॒ ग्रावा॑णो ब॒र्हिर॑ध्व॒रे।

ऋ॒चा या॑मि म॒रुतो॒ ब्रह्म॑ण॒स्पतिं॑ दे॒वाँ अवो॒ वरे॑ण्यम्॥ १॥

अ॒ग्निः। उ॒क्थे। पु॒रःऽहि॑तः। ग्रावा॑णः। ब॒र्हिः। अ॒ध्व॒रे।

ऋ॒चा। या॒मि॒। म॒रुतः॑। ब्रह्म॑णः। पति॑म्। दे॒वान्। अवः॑। वरे॑ण्यम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ पशुं गासि पृथिवीं वनस्पतींनुषासा नक्तमोषधीः।

विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः॥ २॥

आ। पशुम्। गासि। पृथिवीम्। वनस्पतीन्। उषसा। नक्तम्। ओषधीः।

विश्वे। च। नः। वसवः। विश्वऽवेदसः। धीनाम्। भूत। प्रऽअवितारः॥ २॥

प्र सू न एत्वध्वरो३ऽग्ना देवेषु पूर्व्यः। आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु॥ ३॥

प्र। सु। नः। एतु। अध्वरः। अग्ना। देवेषु। पूर्व्यः।

आदित्येषु। प्र। वरुणे। धृतऽव्रते। मरुत्ऽसु। विश्वऽभानुषु॥ ३॥

विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः।

अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः॥ ४॥

विश्वे। हि। स्म। मनवे। विश्वऽवेदसः। भुवन्। वृधे। रिशादसः।

अरिष्टेभिः। पायुऽभिः। विश्वऽवेदसः। यन्त। नः। अवृकम्। छर्दिः॥ ४॥

आ नो अद्य समनसो गन्ता विश्वे सजोषसः।

ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि॥ ५॥ [३१]

आ। नः। अद्य। सऽमनसः। गन्त। विश्वे। सऽजोषसः।

ऋचा। गिरा। मरुतः। देवि। अदिते। सदने। पस्त्ये। महि॥ ५॥

अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन।

आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः॥ ६॥

अभि। प्रिया। मरुतः। या। वः। अश्व्या। हव्या। मित्र। प्रऽयाथन।

आ। बर्हिः। इन्द्रः। वरुणः। तुराः। नरः। आदित्यासः। सदन्तु। नः॥ ६॥

वयं वो वृक्तबर्हिषो हितप्रयस आनुषक्। सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः॥ ७॥

वयम्। वः। वृक्तऽबर्हिषः। हितऽप्रयसः। आनुषक्।

सुतऽसोमासः। वरुण। हवामहे। मनुष्वत्। इद्धऽअग्नयः॥ ७॥

आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया।

इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे॥ ८॥

आ। प्र। यात। मरुतः। विष्णो इति। अश्विना। पूषन्। माकीनया। धिया।

इन्द्रः। आ। यातु। प्रथमः। सनिष्युऽभिः। वृषा। यः। वृत्रऽहा। गृणे॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि नों देवासो अद्रुहोऽच्छिंद्रं शर्म यच्छत। न यद्दूराद्वसवो नू चिदन्तितो वरूथमादुधर्षति॥ ९॥

वि। नः। देवासः। अद्रुहः। अच्छिंद्रम्। शर्म। यच्छत।

न। यत्। दूरात्। वसवः। नु। चित्। अन्तितः। वरूथम्। आ॰दुधर्षति॥ ९॥

अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम्।

प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे॥ १०॥ [३२]

अस्ति। हि। वः। स॰जात्यम्। रिशादसः। देवासः। अस्ति। आप्यम्।

प्र। नः। पूर्वस्मै। सुविताय। वोचत। मक्षु। सुम्नाय। नव्यसे॥ १०॥

इदा हि व उपस्तुतिमिदा वामस्य भक्तये। उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव॥ ११॥

इदा। हि। वः। उप॰स्तुतिम्। इदा। वामस्य। भक्तये।

उप। वः। विश्व॰वेदसः। नमस्युः। आ। असृक्षि। अन्याम्ऽइव॥ ११॥

उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः।

नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः॥ १२॥

उत्। ऊँ इति। स्यः। वः। सविता। सु॰प्रनीतयः। अस्थात्। ऊर्ध्वः। वरेण्यः।

नि। द्वि॰पादः। चतुः॰पादः। अर्थिनः। अविश्रन्। पतयिष्णवः॥ १२॥

देवंदेवं वोऽवसे देवंदेवमभिष्टये। देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया॥ १३॥

देवम्॰देवम्। वः। अवसे। देवम्॰देवम्। अभिष्टये।

देवम्॰देवम्। हुवेम। वाज॰सातये। गृणन्तः। देव्या। धिया॥ १३॥

देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः।

ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः॥ १४॥

देवासः। हि। स्म। मनवे। स॰मन्यवः। विश्वे। साकम्। स॰रातयः।

ते। नः। अद्य। ते। अपरम्। तुचे। तु। नः। भवन्तु। वरिवः॰विदः॥ १४॥

प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम्।

न तं धूर्तिर्वरुण मित्र मर्त्यं यो वा धामभ्योऽविधत्॥ १५॥

प्र। वः। शंसामि। अद्रुहः। सम्॰स्थे। उप॰स्तुतीनाम्।

न। तम्। धूर्तिः। वरुण। मित्र। मर्त्यम्। यः। वः। धाम॰भ्यः। अविधत्॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति।
प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते॥ १६॥ [३३]
प्र। सः। क्षयम्। तिरते। वि। महीः। इषः। यः। वः। वराय। दाशति।
प्र। प्रऽजाभिः। जायते। धर्मणः। परि। अरिष्टः। सर्वः। एधते॥ १६॥
ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः।
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः॥ १७॥
ऋते। सः। विन्दते। युधः। सुऽगेभिः। याति। अध्वनः।
अर्यमा। मित्रः। वरुणः। सऽरातयः। यम्। त्रायन्ते। सऽजोषसः॥ १७॥
अज्रे चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम्।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु॥ १८॥
अज्रे। चित्। अस्मै। कृणुथ। निऽअञ्चनम्। दुःऽगे। चित्। आ। सुऽसरणम्।
एषा। चित्। अस्मात्। अशनिः। परः। नु। सा। अस्रेधन्ती। वि। नश्यतु॥ १८॥
यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः॥ १९॥
यत्। अद्य। सूर्ये। उत्ऽयति। प्रियऽक्षत्राः। ऋतम्। दध।
यत्। निऽम्रुचि। प्रऽबुधि। विश्वऽवेदसः। यत्। वा। मध्यंदिने। दिवः॥ १९॥
यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे।
वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ॥ २०॥
यत्। वा। अभिऽपित्वे। असुराः। ऋतम्। यते। छर्दिः। येम। वि। दाशुषे।
वयम्। तत्। वः। वसवः। विश्वऽवेदसः। उप। स्थेयाम। मध्ये। आ॥ २०॥
यदद्य सूर उदिते यन्मध्यंदिन आतुचि। वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे॥ २१॥
यत्। अद्य। सूरे। उत्ऽइते। यत्। मध्यंदिने। आऽतुचि।
वामम्। धत्थ। मनवे। विश्वऽवेदसः। जुह्वानाय। प्रऽचेतसे॥ २१॥
वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम्।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै॥ २२॥ [३४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वयम्। तत्। वः। सम्ऽराजः। आ। वृणीमहे। पुत्रः। न। बहुऽपाय्यम्।
अश्याम। तत्। आदित्याः। जुह्वतः। हविः। येन। वस्यः। अनशामहै॥ २२॥

[२८] [५ मनुर्वैवस्वतः। विश्वे देवाः। गायत्री, ४ पुर उष्णिक्।]

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन्। विदन्नह द्वितासनन्॥ १॥
ये। त्रिंशति। त्रयः। परः। देवासः। बर्हिः। आ। असदन्। विदन्। अह। द्विता। असनन्॥ १॥
वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः। पत्नीवन्तो वषट्कृताः॥ २॥
वरुणः। मित्रः। अर्यमा। स्मद्रातिऽसाचः। अग्नयः। पत्नीऽवन्तः। वषट्ऽकृताः॥ २॥
ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक्। पुरस्तात्सर्वया विशा॥ ३॥
ते। नः। गोपाः। अपाच्याः। ते। उदक्। ते। इत्था। न्यक्। पुरस्तात्। सर्वया। विशा॥ ३॥
यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत्। अरावा चन मर्त्यः॥ ४॥
यथा। वशन्ति। देवाः। तथा। इत्। असत्। तत्। एषाम्। नकिः। आ। मिनत्। अरावा। चन। मर्त्यः॥ ४॥
सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम्। सप्तो अधि श्रियो धिरे॥ ५॥ [३५]
सप्तानाम्। सप्त। ऋष्टयः। सप्त। द्युम्नानि। एषाम्। सप्तो इति। अधि। श्रियः। धिरे॥ ५॥

[२९] [१० मनुर्वैवस्वतः, कश्यपो वा मारीचः। विश्वे देवाः। द्विपदा विराट्।]

बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम्॥ १॥
बभ्रुः। एकः। विषुणः। सूनरः। युवा। अञ्जि। अङ्क्ते। हिरण्ययम्॥ १॥
योनिमेक आससाद द्योतनोऽन्तर्देवेषु मेधिरः॥ २॥
योनिम्। एकः। आ। ससाद। द्योतनः। अन्तः। देवेषु। मेधिरः॥ २॥
वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः॥ ३॥
वाशीम्। एकः। बिभर्ति। हस्ते। आयसीम्। अन्तः। देवेषु। निऽध्रुविः॥ ३॥
वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते॥ ४॥
वज्रम्। एकः। बिभर्ति। हस्ते। आऽहितम्। तेन। वृत्राणि। जिघ्नते॥ ४॥
तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः॥ ५॥
तिग्मम्। एकः। बिभर्ति। हस्ते। आयुधम्। शुचिः। उग्रः। जलाषऽभेषजः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम्॥ ६॥

पथः। एकः। पीपाय। तस्करः। यथा। एषः। वेद। निऽधीनाम्॥ ६॥

त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति॥ ७॥

त्रीणि। एकः। उरुऽगायः। वि। चक्रमे। यत्र। देवासः। मदन्ति॥ ७॥

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः॥ ८॥

विऽभिः। द्वा। चरतः। एकया। सह। प्र। प्रवासाऽइव। वसतः॥ ८॥

सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती॥ ९॥

सदः। द्वा। चक्राते इति। उपऽमा। दिवि। सम्ऽराजा। सर्पिरासुती इति सर्पिःऽआसुती॥ ९॥

अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन्॥ १०॥ [३६]

अर्चन्तः। एके। महि। साम। मन्वत। तेन। सूर्यम्। अरोचयन्॥ १०॥

[३०] [४ मनुर्वैवस्वतः। विश्वे देवाः। १ गायत्री, २ पुरउष्णिक्, ३ बृहती, ४ अनुष्टुप्]

नहि वो अस्त्यर्भको देवासो न कुमारकः। विश्वे सतोमहान्त इत्। १॥

नहि। वः। अस्ति। अर्भकः। देवासः। न। कुमारकः। विश्वे। सतःऽमहान्तः। इत्॥ १॥

इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च। मनोर्देवा यज्ञियासः॥ २॥

इति। स्तुतासः। असथ। रिशादसः। ये। स्थ। त्रयः। च। त्रिंशत्। च।

मनोः। देवाः। यज्ञियासः॥ २॥

ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत।

मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः॥ ३॥

ते। नः। त्राध्वम्। ते। अवत। ते। ऊँ इति। नः। अधि। वोचत।

मा। नः। पथः। पित्र्यात्। मानवात्। अधि। दूरम्। नैष्ट। पराऽवतः॥ ३॥

ये देवास इह स्थन विश्वे वैश्वानरा उत।

अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत॥ ४॥ [३७] {४}

ये। देवासः। इह। स्थन। विश्वे। वैश्वानराः। उत।

अस्मभ्यम्। शर्म। सऽप्रथः। गवे। अश्वाय। यच्छत॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३१] [१८ मनुर्वैवस्वतः। १-४ यज्ञो यजमानश्च, ५-९ दंपती, १०-१८ दंपत्योराशिषः। गायत्री; ९, १४ अनुष्टुभौ, १० पादनिचृत्, १५-१८ पङ्क्तयः]

यो यजाति यजात इत्सुनवच्च पचाति च। ब्रह्मेदिन्द्रस्य चाकनत्॥ १॥

यः। यजाति। यजाते। इत्। सुनवत्। च। पचाति। च। ब्रह्मा। इत्। इन्द्रस्य। चाकनत्॥ १॥

पुरोळाशं यो अस्मै सोमं ररत आशिरम्। पादित्तं शक्रो अंहसः॥ २॥

पुरोळाशम्। यः। अस्मै। सोमम्। ररते। आऽशिरम्। पात्। इत्। तम्। शक्रः। अंहसः॥ २॥

तस्य द्युमाँ असद्रथो देवजूतः स शूशुवत्। विश्वा वन्वन्नमित्रिया॥ ३॥

तस्य। द्युऽमान्। असत्। रथः। देवऽजूतः। सः। शूशुवत्। विश्वा। वन्वन्। अमित्रिया॥ ३॥

अस्य प्रजावती गृहेऽसश्चन्ती दिवेदिवे। इळा धेनुमती दुहे॥ ४॥

अस्य। प्रजाऽवती। गृहे। असश्चन्ती। दिवेऽदिवे। इळा। धेनुऽमती। दुहे॥ ४॥

या दंपती समनसा सुनुत आ च धावतः। देवासो नित्ययाशिरा॥ ५॥ [३८]

या। दंपती इति दम्ऽपती। सऽमनसा। सुनुतः। आ। च। धावतः। देवासः। नित्यया। आऽशिरा॥ ५॥

प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिराशाते। न ता वाजेषु वायतः॥ ६॥

प्रति। प्राशव्यान्। इतः। सम्यञ्चा। बर्हिः। आशाते इति। न। ता। वाजेषु। वायतः॥ ६॥

न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः। श्रवो बृहद्विवासतः॥ ७॥

न। देवानाम्। अपि। ह्नुतः। सुऽमतिम्। न। जुगुक्षतः। श्रवः। बृहत्। विवासतः॥ ७॥

पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः। उभा हिरण्यपेशसा॥ ८॥

पुत्रिणा। ता। कुमारिणा। विश्वम्। आयुः। वि। अश्नुतः। उभा। हिरण्यऽपेशसा॥ ८॥

वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम्। समूधो रोमशं हतो देवेषु कृणुतो दुवः॥ ९॥

वीतिऽहोत्रा। कृतद्वसू इति कृतत्ऽवसू। दशस्यन्ता। अमृताय। कम्।

सम्। ऊधः। रोमशम्। हतः। देवेषु। कृणुतः। दुवः॥ ९॥

आ शर्म पर्वतानां वृणीमहे नदीनाम्। आ विष्णोः सचाभुवः॥ १०॥ [३९]

आ। शर्म। पर्वतानाम्। वृणीमहे। नदीनाम्। आ। विष्णोः। सचाऽभुवः॥ १०॥

ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः। उरुरध्वा स्वस्तये॥ ११॥

आ। एतु। पूषा। रयिः। भगः। स्वस्ति। सर्वऽधातमः। उरुः। अध्वा। स्वस्तये॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अरमतिरनर्वणो विश्वो देवस्य मनसा। आदित्यानामनेह इत्॥ १२॥

अरमतिः। अनर्वणः। विश्वः। देवस्य। मनसा। आदित्यानाम्। अनेहः। इत्॥ १२॥

यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः। सुगा ऋतस्य पन्थाः॥ १३॥

यथा। नः। मित्रः। अर्यमा। वरुणः। सन्ति। गोपाः। सुऽगाः। ऋतस्य। पन्थाः॥ १३॥

अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम्। सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम्॥ १४॥

अग्निम्। वः। पूर्व्यम्। गिरा। देवम्। ईळे। वसूनाम्।

सपर्यन्तः। पुरुऽप्रियम्। मित्रम्। न। क्षेत्रऽसाधसम्॥ १४॥

मक्षू देववतो रथः शूरो वा पृत्सु कासु चित्।

देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥ १५॥

मक्षु। देवऽवतः। रथः। शूरः। वा। पृत्ऽसु। कासु। चित्।

देवानाम्। यः। इत्। मनः। यजमानः। इयक्षति। अभि। इत्। अयज्वनः। भुवत्॥ १५॥

न यजमान रिष्यसि न सुन्वान न देवयो।

देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥ १६॥

न। यजमान। रिष्यसि। न। सुन्वान। न। देवयो इति देवऽयो।

देवानाम्। यः। इत्। मनः। यजमानः। इयक्षति। अभि। इत्। अयज्वनः। भुवत्॥ १६॥

नकिष्टं कर्मणा नशन्न प्र योषन्न योषति।

देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥ १७॥

नकिः। तम्। कर्मणा। नशत्। न। प्र। योषत्। न। योषति।

देवानाम्। यः। इत्। मनः। यजमानः। इयक्षति। अभि। इत्। अयज्वनः। भुवत्॥ १७॥

असदत्र सुवीर्यमुत त्यदाश्वश्व्यम्। देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥ १८॥

असत्। अत्र। सुऽवीर्यम्। उत। त्यत्। आशुऽअश्व्यम्। [४०]

देवानाम्। यः। इत्। मनः। यजमानः। इयक्षति। अभि। इत्। अयज्वनः। भुवत्॥ १८॥

इत्याश्वलायन-संहितायां षष्ठाष्टके द्वितीयोऽध्याय समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके तृतीयोऽध्यायः ॥

[३२] [३० मेधातिथिः काण्वः । इन्द्रः । गायत्री ।]

प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया । मदे सोमस्य वोचत ॥ १ ॥

प्र । कृतानि । ऋजीषिणः । कण्वाः । इन्द्रस्य । गाथया । मदे । सोमस्य । वोचत ॥ १ ॥

यः सृबिन्दमनर्शनिं पिप्रुं दासमहीशुवम् । वधीदुग्रो रिणन्नपः ॥ २ ॥

यः । सृबिन्दम् । अनर्शनिम् । पिप्रुम् । दासम् । अहीशुवम् । वधीत् । उग्रः । रिणन् । अपः ॥ २ ॥

न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर । कृषे तदिन्द्र पौंस्यम् ॥ ३ ॥

नि । अर्बुदस्य । विष्टपम् । वर्ष्माणम् । बृहतः । तिर । कृषे । तत् । इन्द्र । पौंस्यम् ॥ ३ ॥

प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि । हुवे सुशिप्रमूतये ॥ ४ ॥

प्रति । श्रुताय । वः । धृषत् । तूर्णाशम् । न । गिरेः । अधि । हुवे । सुऽशिप्रम् । ऊतये ॥ ४ ॥

स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः । पुरं न शूर दर्षसि ॥ ५ ॥ [१]

सः । गोः । अश्वस्य । वि । व्रजम् । मन्दानः । सोम्येभ्यः । पुरम् । न । शूर । दर्षसि ॥ ५ ॥

यदि मे रारणः सुत उक्थे वा दधसे चनः । आरादुप स्वधा गहि ॥ ६ ॥

यदि । मे । ररणः । सुते । उक्थे । वा । दधसे । चनः । आरात् । उप । स्वधा । आ । गहि ॥ ६ ॥

वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ॥ ७ ॥

वयम् । घ । ते । अपि । स्मसि । स्तोतारः । इन्द्र । गिर्वणः । त्वम् । नः । जिन्व । सोमऽपाः ॥ ७ ॥

उत नः पितुमा भर संरराणो अविक्षितम् । मघवन्भूरि ते वसु ॥ ८ ॥

उत । नः । पितुम् । आ । भर । सम्ऽरराणः । अविऽक्षितम् । मघऽवन् । भूरि । ते । वसु ॥ ८ ॥

उत नो गोमतस्कृधि हिरण्यवतो अश्विनः । इळाभिः सं रभेमहि ॥ ९ ॥

उत । नः । गोऽमतः । कृधि । हिरण्यऽवतः । अश्विनः । इळाभिः । सम् । रभेमहि ॥ ९ ॥

बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे ॥ १० ॥ [२]

बृबत्ऽउक्थम् । हवामहे । सृप्रऽकरस्नम् । ऊतये । साधु । कृण्वन्तम् । अवसे ॥ १० ॥

यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा । जरितृभ्यः पुरूवसुः ॥ ११ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। सम्ऽस्थे। चित्। शतऽक्रतुः। आत्। ईम्। कृणोति। वृत्रहा। जरितृऽभ्यः। पुरुऽवसुः॥ ११॥

स नः शक्रश्चिदा शकद्दानवाँ अन्तराभरः। इन्द्रो विश्वाभिरूतिभिः॥ १२॥

सः। नः। शक्रः। चित्। आ। शकत्। दानऽवान्। अन्तरऽआभरः। इन्द्रः। विश्वाभिः। ऊतिऽभिः॥ १२॥

यो रायो३ऽवनिर्महान्त्सुपारः सुन्वतः सखा। तमिन्द्रमभि गायत॥ १३॥

यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः। सखा। तम्। इन्द्रम्। अभि। गायत॥ १३॥

आयन्तारं महि स्थिरं पृतनासु श्रवोजितम्। भूरेरीशानमोजसा॥ १४॥

आऽयन्तारम्। महि। स्थिरम्। पृतनासु। श्रवःऽजितम्। भूरेः। ईशानम्। ओजसा॥ १४॥

नकिरस्य शचीनां नियन्ता सूनृतानाम्। नकिर्वक्ता न दादिति॥ १५॥ [३]

नकिः। अस्य। शचीनाम्। निऽयन्ता। सूनृतानाम्। नकिः। वक्ता। न। दात्। इति॥ १५॥

न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम्। न सोमो अप्रता पपे॥ १६॥

न। नूनम्। ब्रह्मणाम्। ऋणम्। प्राशूनाम्। अस्ति। सुन्वताम्। न। सोमः। अप्रता। पपे॥ १६॥

पन्य इदुप गायत पन्य उक्थानि शंसत। ब्रह्मा कृणोत पन्य इत्॥ १७॥

पन्ये। इत्। उप। गायत। पन्ये। उक्थानि। शंसत। ब्रह्म। कृणोत। पन्ये। इत्॥ १७॥

पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः। इन्द्रो यो यज्वनो वृधः॥ १८॥

पन्यः। आ। दर्दिरत्। शता। सहस्रा। वाजी। अवृतः। इन्द्रः। यः। यज्वनः। वृधः॥ १८॥

वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः। इन्द्र पिब सुतानाम्॥ १९॥

वि। सु। चर। स्वधा। अनु। कृष्टीनाम्। अनु। आऽहुवः। इन्द्र। पिब। सुतानाम्॥ १९॥

पिब स्वधैनवानामुत यस्तुग्र्ये सचा। उतायमिन्द्र यस्तव॥ २०॥ [४]

पिब। स्वऽधैनवानाम्। उत। यः। तुग्र्ये। सचा। उत। अयम्। इन्द्र। यः। तव॥ २०॥

अतीहि मन्युषाविणं सुषुवांसमुपारणे। इमं रातं सुतं पिब॥ २१॥

अति। इहि। मन्युऽसाविनम्। सुसुऽवांसम्। उपऽअरणे। इमम्। रातम्। सुतम्। पिब॥ २१॥

इहि तिस्रः परावत इहि पञ्च जनाँ अति। धेना इन्द्रावचाकशत्॥ २२॥

इहि। तिस्रः। पराऽवतः। इहि। पञ्च। जनान्। अति। धेनाः। इन्द्र। अवऽचाकशत्॥ २२॥

सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः। निम्नमापो न सध्र्यक्॥ २३॥

सूर्यः। रश्मिम्। यथा। सृज। आ। त्वा। यच्छन्तु। मे। गिरः। निम्नम्। आपः। न। सध्र्यक्॥ २३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे। भरा सुतस्य पीतये॥ २४॥

अध्वर्यो इति। आ। तु। हि। सिञ्च। सोमम्। वीराय। शिप्रिणे। भर। सुतस्य। पीतये॥ २४॥

य उद्नः फलिगं भिनन्न्य१क्सिन्धूँरवासृजत्। यो गोषु पक्वं धारयत्॥ २५॥ [५]

यः। उद्नः। फलिऽगम्। भिनत्। न्यक्। सिन्धून्। अवऽअसृजत्। यः। गोषु। पक्वम्। धारयत्॥ २५॥

अहन्वृत्रमृचीषम और्णवाभमहीशुवम्। हिमेनाविध्यदर्बुदम्॥ २६॥

अहन्। वृत्रम्। ऋचीषमः। और्णऽवाभम्। अहीशुवम्। हिमेन। अविध्यत्। अर्बुदम्॥ २६॥

प्र व उग्राय निष्टुरेऽषाळ्हाय प्रसक्षिणे। देवत्तं ब्रह्म गायत॥ २७॥

प्र। वः। उग्राय। निःऽतुरे। अषाळ्हाय। प्रऽसक्षिणे। देवत्तम्। ब्रह्म। गायत॥ २७॥

यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः। इन्द्रो देवेषु चेतति॥ २८॥

यः। विश्वानि। अभि। व्रता। सोमस्य। मदे। अन्धसः। इन्द्रः। देवेषु। चेतति॥ २८॥

इह त्या सधमाद्या हरी हिरण्यकेश्या। वोळ्हामभि प्रयो हितम्॥ २९॥

इह। त्या। सधऽमाद्या। हरी इति। हिरण्यऽकेश्या। वोळ्हाम्। अभि। प्रयः। हितम्॥ २९॥

अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी। सोमपेयाय वक्षतः॥ ३०॥ [६]

अर्वाञ्चम्। त्वा। पुरुऽस्तुत। प्रियमेधऽस्तुता। हरी इति। सोमऽपेयाय। वक्षतः॥ ३०॥

[३३] [१९ मेध्यातिथिः काण्वः। इन्द्रः। बृहती, १६-१८ गायत्र्यः, १९ अनुष्टुप्।]

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः। पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते॥ १॥

वयम्। घ। त्वा। सुतऽवन्तः। आपः। न। वृक्तऽबर्हिषः।

पवित्रस्य। प्रऽस्रवणेषु। वृत्रऽहन्। परि। स्तोतारः। आसते॥ १॥

स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः।

कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः॥ २॥

स्वरन्ति। त्वा। सुते। नरः। वसो इति। निरेके। उक्थिनः।

कदा। सुतम्। तृषाणः। ओकः। आ। गमः। इन्द्र। स्वब्दीऽइव। वंसगः॥ २॥

कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम्। पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे॥ ३॥

कण्वेभिः। धृष्णो इति। आ। धृषत्। वाजम्। दर्षि। सहस्रिणम्।

पिशङ्गऽरूपम्। मघऽवन्। विऽचर्षणे। मक्षु। गोऽमन्तम्। ईमहे॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पाहि गायान्धसो मद इन्द्राय मेध्यातिथे।

यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः॥ ४॥

पाहि। गाय। अन्धसः। मदे। इन्द्राय। मेध्य॰अतिथे।

यः। सम्॰मिश्लः। हर्योः। यः। सुते। सचा। वज्री। रथः। हिरण्ययः॥ ४॥

यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे।

य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः॥ ५॥ [७]

यः। सु॰सव्यः। सु॰दक्षिणः। इनः। यः। सु॰क्रतुः। गृणे।

यः। आ॰करः। सहस्रा। यः। शत॰मघः। इन्द्रः। यः। पूः॰भित्। आरितः॥ ५॥

यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः।

विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः॥ ६॥

यः। धृषितः। यः। अवृतः। यः। अस्ति। श्मश्रुषु। श्रितः।

विभूत॰द्युम्नः। च्यवनः। पुरु॰स्तुतः। क्रत्वा। गौःऽइव। शाकिनः॥ ६॥

क ईं वेद सुते सचा पिबन्तं कद्वयो दधे।

अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्रयन्धसः॥ ७॥

कः। ईम्। वेद। सुते। सचा। पिबन्तम्। कत्। वयः। दधे।

अयम्। यः। पुरः। वि॰भिनत्ति। ओजसा। मन्दानः। शिप्री। अन्धसः॥ ७॥

दाना मृगो न वारणः पुरुत्रा चरथं दधे। नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा॥ ८॥

दाना। मृगः। न। वारणः। पुरु॰त्रा। चरथम्। दधे।

नकिः। त्वा। नि। यमत्। आ। सुते। गमः। महान्। चरसि। ओजसा॥ ८॥

य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः।

यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत्॥ ९॥

यः। उग्रः। सन्। अनिः॰स्तृतः। स्थिरः। रणाय। संस्कृतः।

यदि। स्तोतुः। मघ॰वा। शृणवत्। हवम्। न। इन्द्रः। योषति। आ। गमत्॥ ९॥

सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः।

वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः॥ १०॥ [८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सत्यम्। इत्था। वृषा। इत्। असि। वृष॑ऽजूतिः। नः। अवृतः।

वृषा। हि। उग्र। शृण्विषे। पराऽवति। वृषो इति। अर्वाऽवति। श्रुतः॥ १०॥

वृषणस्ते अभीशवो वृषा कशा हिरण्ययी।

वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो॥ ११॥

वृषणः। ते। अभीशवः। वृषा। कशा। हिरण्ययी।

वृषा। रथः। मघऽवन्। वृषणा। हरी इति। वृषा। त्वम्। शतक्रतो इति शतऽक्रतो॥ ११॥

वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर।

वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम्॥ १२॥

वृषा। सोता। सुनोतु। ते। वृषन्। ऋजीपिन्। आ। भर।

वृषा। दधन्वे। वृषणम्। नदीषु। आ। तुभ्यम्। स्थातः। हरीणाम्॥ १२॥

एन्द्र याहि पीतये मधु शविष्ठ सोम्यम्।

नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च सुक्रतुः॥ १३॥

आ। इन्द्र। याहि। पीतये। मधु। शविष्ठ। सोम्यम्।

न। अयम्। अच्छ। मघऽवा। शृणवत्। गिरः। ब्रह्म। उक्था। च। सुऽक्रतुः॥ १३॥

वहन्तु त्वा रथेष्ठामा हरयो रथयुजः। तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो॥ १४॥

वहन्तु। त्वा। रथेऽस्थाम्। आ। हरयः। रथऽयुजः।

तिरः। चित्। अर्यम्। सवनानि। वृत्रऽहन्। अन्येषाम्। या। शतक्रतो इति शतऽक्रतो॥ १४॥

अस्माकमद्यान्तमं स्तोमं धिष्व महामह।

अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः॥ १५॥ [९]

अस्माकम्। अद्य। अन्तमम्। स्तोमम्। धिष्व। महाऽमह।

अस्माकम्। ते। सवना। सन्तु। शम्ऽतमा। मदाय। द्युक्ष। सोमऽपाः॥ १५॥

नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति। यो अस्मान्वीर आनयत्॥ १६॥

नहि। सः। तव। नो इति। मम। शास्त्रे। अन्यस्य। रण्यति। यः। अस्मान्। वीरः। आ। अनयत्॥ १६॥

इन्द्रश्चिद्घा तदब्रवीत्स्त्रिया अशास्यं मनः। उतो अह क्रतुं रघुम्॥ १७॥

इन्द्रः। चित्। घ। तत्। अब्रवीत्। स्त्रियाः। अशास्यम्। मनः। उतो इति। अह। क्रतुम्। रघुम्॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्ती चिद्धा मदच्युता मिथुना वहतो रथम्। एवेद्धूर्वृष्ण उत्तरा॥ १८॥

सप्ती इति। चित्। घ। मदऽच्युता। मिथुना। वहतः। रथम्। एव। इत्। धूः। वृष्णः। उत्ऽतरा॥ १८॥

अधः पश्यस्व मोपरि संतरां पादकौ हर। मा ते कशप्लकौ दृशन्त्स्त्री हि ब्रह्मा बभूविथ॥ १९॥

अधः। पश्यस्व। मा। उपरि। सम्ऽतराम्। पादकौ। हर। [१०]

मा। ते। कशऽप्लकौ। दृशन्। स्त्री। हि। ब्रह्मा। बभूविथ॥ १९॥

[३४] [१८ : १-१५ नीपातिथिः काण्वः, १६-१८ सहस्रं वसुरोचिशोऽङ्गिरसः। इन्द्रः। अनुष्टुप्, १६-१८ गायत्र्यः।]

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम्। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ १॥

आ। इन्द्र। याहि। हरिऽभिः। उप। कण्वस्य। सुऽस्तुतिम्।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ १॥

आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ २॥

आ। त्वा। ग्रावा। वदन्। इह। सोमी। घोषेण। यच्छतु।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ २॥

अत्रा वि नेमिरेषामुरां न धूनुते वृकः। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ३॥

अत्र। वि। नेमिः। एषाम्। उराम्। न। धूनुते। वृकः।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ ३॥

आ त्वा कण्वा इहावसे हवन्ते वाजसातये। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ४॥

आ। त्वा। कण्वाः। इह। अवसे। हवन्ते। वाजऽसातये।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ ४॥

दधामि ते सुतानां वृष्णे न पूर्वपाय्यम्। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ५॥ [११]

दधामि। ते। सुतानाम्। वृष्णे। न। पूर्वऽपाय्यम्।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ ५॥

स्मत्पुरंधिर्न आ गहि विश्वतोधीर्न ऊतये। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ६॥

स्मत्ऽपुरंधिः। नः। आ। गहि। विश्वतःऽधीः। नः। ऊतये।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ नो याहि महेमते सहस्त्रोते शतामघ। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ७॥

आ। नः। याहि। महे॰मते। सहस्त्र॰ऊते। शत॰मघ।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ ७॥

आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ८॥

आ। त्वा। होता। मनुः॰हितः। देव॰त्रा। वक्षत्। ईड्यः।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ ८॥

आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ९॥

आ। त्वा। मद॰च्युता। हरी इति। श्येनम्। पक्षा॰इव। वक्षतः।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ ९॥

आ याह्यर्य आ परि स्वाहा सोमस्य पीतये। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ १०॥

आ। याहि। अर्यः। आ। परि। स्वाहा। सोमस्य। पीतये। [१२]

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ १०॥

आ नो याह्युपश्रुत्युक्थेषु रणया इह। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ ११॥

आ। नः। याहि। उप॰श्रुति। उक्थेषु। रणय। इह।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ ११॥

सरूपैरा सु नो गहि संभृतैः संभृताश्वः। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ १२॥

स॰रूपैः। आ। सु। नः। गहि। सम्॰भृतैः। संभृत॰अश्वः।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ १२॥

आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ १३॥

आ। याहि। पर्वतेभ्यः। समुद्रस्य। अधि। विष्टपः।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ १३॥

आ नो गव्यान्यश्व्या सहस्त्रा शूर दर्दृहि। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ १४॥

आ। नः। गव्यानि। अश्व्या। सहस्त्रा। शूर। दर्दृहि।

दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवा॰वसो॥ १४॥

आ नः सहस्त्रशो भरायुतानि शतानि च। दिवो अमुष्य शासतो दिवं यय दिवावसो॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। सहस्रऽशः। भर। अयुतानि। शतानि। च।
दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो ॥ १५ ॥

आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः। ओजिष्ठमश्व्यं पशुम्॥ १६॥

आ। यत्। इन्द्रः। च। दद्वहे इति। सहस्रम्। वसुऽरोचिषः। ओजिष्ठम्। अश्व्यम्। पशुम्॥ १६॥

य ऋज्रा वातरंहसोऽरुषासो रघुष्यदः। भ्राजन्ते सूर्याइव॥ १७॥

ये। ऋज्राः। वातऽरंहसः। अरुषासः। रघुऽस्यदः। भ्राजन्ते। सूर्याःऽइव॥ १७॥

पारावतस्य रातिषु द्रवच्चक्रेष्वाशुषु। तिष्ठं वनस्य मध्य आ॥ १८॥ [१३]

पारावतस्य। रातिषु। द्रवत्ऽचक्रेषु। आशुषु। तिष्ठम्। वनस्य। मध्ये। आ॥ १८॥

[३५] [२४ श्यावाश्व आत्रेयः। अश्विनौ। उपरिष्टाज्ज्योतिः (त्रिष्टुप्),
२२, २४ पङ्क्तिः, २३ महाबृहती।]

अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना॥ १॥

अग्निना। इन्द्रेण। वरुणेन। विष्णुना। आदित्यैः। रुद्रैः। वसुऽभिः। सचाऽभुवा।
सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। पिबतम्। अश्विना॥ १॥

विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना॥ २॥

विश्वाभिः। धीभिः। भुवनेन। वाजिना। दिवा। पृथिव्या। अद्रिऽभिः। सचाऽभुवा।
सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। पिबतम्। अश्विना॥ २॥

विश्वैर्देवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना॥ ३॥

विश्वैः। देवैः। त्रिऽभिः। एकादशैः। इह। अत्ऽभिः। मरुत्ऽभिः। भृगुऽभिः। सचाऽभुवा।
सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। पिबतम्। अश्विना॥ ३॥

जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनाव गच्छतम्।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जुषेथाम्। यज्ञम्। बोधतम्। हवस्य। मे। विश्वा। इह। देवौ। सवना। अव। गच्छतम्।
सऽजोषसौ। उषसा। सूर्येण। च। आ। इषम्। नः। वोळ्हम्। अश्विना॥ ४॥

स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव गच्छतम्।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना॥ ५॥

स्तोमम्। जुषेथाम्। युवशाऽइव। कन्यनाम्। विश्वा। इह। देवौ। सवना। अव। गच्छतम्।
सऽजोषसौ। उषसा। सूर्येण। च। आ। इषम्। नः। वोळ्हम्। अश्विना॥ ५॥

गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनाव गच्छतम्।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना॥ ६॥ [१४]

गिरः। जुषेथाम्। अध्वरम्। जुषेथाम्। विश्वा। इह। देवौ। सवना। अव। गच्छतम्।
सऽजोषसौ। उषसा। सूर्येण। च। आ। इषम्। नः। वोळ्हम्। अश्विना॥ ६॥

हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवाव गच्छथः।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना॥ ७॥

हारिद्रवाऽइव। पतथः। वना। इत्। उप। सोमम्। सुतम्। महिषाऽइव। अव। गच्छथः।
सऽजोषसौ। उषसा। सूर्येण। च। त्रिः। वर्तिः। यातम्। अश्विना॥ ७॥

हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना॥ ८॥

हंसौऽइव। पतथः। अध्वगौऽइव। सोमम्। सुतम्। महिषाऽइव। अव। गच्छथः।
सऽजोषसौ। उषसा। सूर्येण। च। त्रिः। वर्तिः। यातम्। अश्विना॥ ८॥

श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना॥ ९॥

श्येनौऽइव। पतथः। हव्यऽदातये। सोमम्। सुतम्। महिषाऽइव। अव। गच्छथः।
सऽजोषसौ। उषसा। सूर्येण। च। त्रिः। वर्तिः। यातम्। अश्विना॥ ९॥

पिबतं च तृप्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम्।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना॥ १०॥

पिबतम्। च। तृप्णुतम्। च। आ। च। गच्छतम्। प्रऽजाम्। च। धत्तम्। द्रविणम्। च। धत्तम्।
सऽजोषसौ। उषसा। सूर्येण। च। ऊर्जम्। नः। धत्तम्। अश्विना॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तम्।

सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना॥ ११॥

जयतम्। च। प्र। स्तुतम्। च। प्र। च। अवतम्। प्रऽजाम्। च। धत्तम्। द्रविणम्। च। धत्तम्।

सऽजोषसौ। उषसा। सूर्येण। च। ऊर्जम्। नः। धत्तम्। अश्विना॥ ११॥

हतं च शत्रून्यततं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तम्।

सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना॥ १२॥ [१५]

हतम्। च। शत्रून्। यततम्। च। मित्रिणः। प्रऽजाम्। च। धत्तम्। द्रविणम्। च। धत्तम्।

सऽजोषसौ। उषसा। सूर्येण। च। ऊर्जम्। नः। धत्तम्। अश्विना॥ १२॥

मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम्।

सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना॥ १३॥

मित्रावरुणऽवन्तौ। उत। धर्मऽवन्ता। मरुत्वन्ता। जरितुः। गच्छथः। हवम्।

सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना॥ १३॥

अङ्गिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम्।

सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना॥ १४॥

अङ्गिरस्वन्तौ। उत। विष्णुऽवन्ता। मरुत्वन्ता। जरितुः। गच्छथः। हवम्।

सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना॥ १४॥

ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम्।

सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना॥ १५॥

ऋभुऽमन्ता। वृषणा। वाजऽवन्ता। मरुत्वन्ता। जरितुः। गच्छथः। हवम्।

सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना॥ १५॥

ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः।

सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना॥ १६॥

ब्रह्म। जिन्वतम्। उत। जिन्वतम्। धियः। हतम्। रक्षांसि। सेधतम्। अमीवाः।

सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। सुन्वतः। अश्विना॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्ष॒त्रं जि॑न्वतमु॒त जि॑न्वत॒ं नॄन्ह॒तं रक्षां॑सि॒ सेध॑त॒ममी॑वाः।

स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ सुन्व॒तो अ॑श्विना॥ १७॥

क्ष॒त्रम्। जि॒न्व॒त॒म्। उ॒त। जि॒न्व॒त॒म्। नॄन्। ह॒तम्। रक्षां॑सि। सेध॑तम्। अमी॑वाः।

स॒ऽजोष॑सौ। उ॒षसा॑। सूर्ये॑ण। च॒। सोम॑म्। सु॒न्व॒तः। अ॒श्वि॒ना॥ १७॥

धे॒नूर्जि॑न्वतमु॒त जि॑न्वत॒ं विशो॑ ह॒तं रक्षां॑सि॒ सेध॑त॒ममी॑वाः।

स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ सुन्व॒तो अ॑श्विना॥ १८॥ [१६]

धे॒नूः। जि॒न्व॒त॒म्। उ॒त। जि॒न्व॒त॒म्। विशः॑। ह॒तम्। रक्षां॑सि। सेध॑तम्। अमी॑वाः।

स॒ऽजोष॑सौ। उ॒षसा॑। सूर्ये॑ण। च॒। सोम॑म्। सु॒न्व॒तः। अ॒श्वि॒ना॥ १८॥

अत्रे॑रिव शृणुतं पू॒र्व्यस्तु॑तिं श्या॒वाश्व॑स्य सुन्व॒तो म॑दच्युता।

स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चाश्वि॑ना ति॒रोअ॑ह्न्यम्॥ १९॥

अत्रेः॑ऽइव। शृ॒णु॒त॒म्। पू॒र्व्य॑ऽस्तु॑तिम्। श्या॒व॑ऽअ॑श्वस्य। सु॒न्व॒तः। म॒द॒ऽच्यु॒ता।

स॒ऽजोषसौ। उ॒षसा॑। सूर्ये॑ण। च॒। अश्वि॑ना। ति॒रः॒ऽअ॑ह्न्यम्॥ १९॥

सर्गाँ॑ऽइव सृजतं सुष्टु॒तीरुप॑ श्या॒वाश्व॑स्य सुन्व॒तो म॑दच्युता।

स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चाश्वि॑ना ति॒रोअ॑ह्न्यम्॥ २०॥

सर्गा॑न्ऽइव। सृ॒ज॒त॒म्। सु॒ऽस्तु॒तीः। उप॑। श्या॒व॑ऽअ॑श्वस्य। सु॒न्व॒तः। म॒द॒ऽच्यु॒ता।

स॒ऽजोष॑सौ। उ॒षसा॑। सूर्ये॑ण। च॒। अश्वि॑ना। ति॒रः॒ऽअ॑ह्न्यम्॥ २०॥

र॒श्मीँरि॑व यच्छतमध्व॒राँ उप॑ श्या॒वाश्व॑स्य सुन्व॒तो म॑दच्युता।

स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चाश्वि॑ना ति॒रोअ॑ह्न्यम्॥ २१॥

र॒श्मीन्ऽइ॑व। य॒च्छ॒त॒म्। अ॒ध्व॒रान्। उप॑। श्या॒व॑ऽअ॑श्वस्य। सु॒न्व॒तः। म॒द॒ऽच्यु॒ता।

स॒ऽजोष॑सौ। उ॒षसा॑। सूर्ये॑ण। च॒। अश्वि॑ना। ति॒रः॒ऽअ॑ह्न्यम्॥ २१॥

अ॒र्वाग्रथं॒ नि य॑च्छतं॒ पिब॑तं सो॒म्यं मधु॑।

आ या॑तमश्वि॒ना ग॑तमव॒स्युर्वा॑मह॒ं हु॑वे ध॒त्तं रत्ना॑नि दा॒शुषे॑॥ २२॥

अ॒र्वाक्। रथ॑म्। नि। य॒च्छ॒त॒म्। पिब॑तम्। सो॒म्यम्। मधु॑॥ आ। या॒त॒म्। अ॒श्वि॒ना।

आ। ग॒त॒म्। अ॒व॒स्युः। वा॒म्। अ॒हम्। हु॒वे॒। ध॒त्तम्। रत्ना॑नि। दा॒शुषे॑॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये।

आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे॥ २३॥

नमः॰वाके। प्र॰स्थिते। अध्वरे। नरा। विवक्षणस्य। पीतये॥ आ। यातम्। अश्विना।

आ। गतम्। अवस्युः। वाम्। अहम्। हुवे। धत्तम्। रत्नानि। दाशुषे॥ २३॥

स्वाहाकृतस्य तृम्पतं सुतस्य देवावन्धसः।

आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे॥ २४॥ [१७]

स्वाहा॰कृतस्य। तृम्पतम्। सुतस्य। देवौ। अन्धसः॥ आ। यातम्। अश्विना।

आ। गतम्। अवस्युः। वाम्। अहम्। हुवे। धत्तम्। रत्नानि। दाशुषे॥ २४॥

[३६] [७ श्यावाश्व आत्रेयः। इन्द्रः। शक्वरी, ७ महापङ्क्तिः।]

अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो।

यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते॥ १॥

अविता। असि। सुन्वतः। वृक्त॰बर्हिषः। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शत॰क्रतो।

यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः।

सम्। अप्सु॰जित्। मरुत्वान्। इन्द्र। सत्॰पते॥ १॥

प्राव स्तोतारं मघवन्नव त्वां पिबा सोमं मदाय कं शतक्रतो।

यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते॥ २॥

प्र। अव। स्तोतारम्। मघ॰वन्। अव। त्वाम्। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शत॰क्रतो।

यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः।

सम्। अप्सु॰जित्। मरुत्वान्। इन्द्र। सत्॰पते॥ २॥

ऊर्जा देवाँ अवस्योजसा त्वां पिबा सोमं मदाय कं शतक्रतो।

यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते॥ ३॥

ऊर्जा। देवान्। अवसि। ओजसा। त्वाम्। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शत॰क्रतो।

यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः।

सम्। अप्सु॰जित्। मरुत्वान्। इन्द्र। सत्॰पते॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ४ ॥

जनिता। दिवः। जनिता। पृथिव्याः। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शतऽक्रतो।
यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः।
सम्। अप्सुऽजित्। मरुत्वान्। इन्द्र। सत्ऽपते ॥ ४ ॥

जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ५ ॥

जनिता। अश्वानाम्। जनिता। गवाम्। असि। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शतक्रतो।
यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः।
सम्। अप्सुऽजित्। मरुत्वान्। इन्द्र। सत्ऽपते ॥ ५ ॥

अत्रीणां स्तोममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ६ ॥

अत्रीणाम्। स्तोमम्। अद्रिऽवः। महः। कृधि। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शतक्रतो।
यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः।
सम्। अप्सुऽजित्। मरुत्वान्। इन्द्र। सत्ऽपते ॥ ६ ॥

श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥ ७ ॥ [१८]

श्यावऽअश्वस्य। सुन्वतः। तथा। शृणु। यथा। अशृणोः। अत्रेः। कर्माणि। कृण्वतः।
प्र। त्रसदस्युम्। आविथ। त्वम्। एकः। इत्। नृऽसह्ये। इन्द्र। ब्रह्माणि। वर्धयन् ॥ ७ ॥

[३७] [७ श्यावाश्व आत्रेयः। इन्द्रः। महापङ्क्तिः, १ अतिजगती।]

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इन्द्र विश्वाभिरूतिभिः।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ १ ॥

प्र। इदम्। ब्रह्म। वृत्रतूर्येषु। आविथ। प्र। सुन्वतः। शचीऽपते। इन्द्र। विश्वाभिः। ऊतिऽभिः।
माध्यंदिनस्य। सवनस्य। वृत्रऽहन्। अनेद्य। पिब। सोमस्य। वज्रिऽवः ॥ १ ॥

सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वाभिरूतिभिः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ २ ॥

सेहानः । उग्र । पृतनाः । अभि । द्रुहः । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।

माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ २ ॥

एकराळस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिरूतिभिः ।

माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ३ ॥

एकऽराट् । अस्य । भुवनस्य । राजसि । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।

माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ३ ॥

सस्थावाना यवयसि त्वमेक इच्छचीपत इन्द्र विश्वाभिरूतिभिः ।

माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ४ ॥

सऽस्थावाना । यवयसि । त्वम् । एकः । इत् । इन्द्र । विश्वाभिः । ऊतिऽभिः ।

माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ४ ॥

क्षेमस्य च प्रयुजश्च त्वमीशिषे शचीपत इन्द्र विश्वाभिरूतिभिः ।

माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ५ ॥

क्षेमस्य । च । प्रऽयुजः । च । त्वम् । ईशिषे । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।

माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ५ ॥

क्षत्राय त्वमवसि न त्वमाविथ शचीपत इन्द्र विश्वाभिरूतिभिः ।

माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ६ ॥

क्षत्राय । त्वम् । अवसि । न । त्वम् । आविथ । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।

माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ६ ॥

श्यावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।

प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥ ७ ॥ [१९]

श्यावऽअश्वस्य । रेभतः । तथा । शृणु । यथा । अशृणोः । अत्रेः । कर्माणि । कृण्वतः ।

प्र । त्रसदस्युम् । आविथ । त्वम् । एकः । इत् । नृऽसह्ये । इन्द्र । क्षत्राणि । वर्धयन् ॥ ७ ॥

[३८] [१० श्यावाश्व आत्रेयः । इन्द्राग्नी । गायत्री ।]

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इन्द्राग्नी तस्य बोधतम् ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यज्ञस्य । हि । स्थः । ऋत्विजा । सस्नी इति । वाजेषु । कर्मऽसु । इन्द्राग्नी इति । तस्य । बोधतम् ॥ १ ॥

तोशासा रथयावाना वृत्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥ २ ॥

तोशासा । रथऽयावाना । वृत्रऽहना । अपराऽजिता । इन्द्राग्नी इति । तस्य । बोधतम् ॥ २ ॥

इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः । इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥

इदम् । वाम् । मदिरम् । मधु । अधुक्षन् । अद्रिऽभिः । नरः । इन्द्राग्नी इति । तस्य । बोधतम् ॥ ३ ॥

जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती । इन्द्राग्नी आ गतं नरा ॥ ४ ॥

जुषेथाम् । यज्ञम् । इष्टये । सुतम् । सोमम् । सधस्तुती इति सधऽस्तुती ।

इन्द्राग्नी इति । आ । गतम् । नरा ॥ ४ ॥

इमां जुषेथां सवना येभिर्हव्यान्यूहथुः । इन्द्राग्नी आ गतं नरा ॥ ५ ॥ [२०]

इमा । जुषेथाम् । सवना । येभिः । हव्यानि । ऊहथुः । इन्द्राग्नी इति । आ । गतम् । नरा ॥ ५ ॥

इमा गायत्रवर्तनिं जुषेथां सुष्टुतिं मम । इन्द्राग्नी आ गतं नरा ॥ ६ ॥

इमाम् । गायत्रऽवर्तनिम् । जुषेथाम् । सुऽस्तुतिम् । मम । इन्द्राग्नी इति । आ । गतम् । नरा ॥ ६ ॥

प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू । इन्द्राग्नी सोमपीतये ॥ ७ ॥

प्रातर्यावऽभिः । आ । गतम् । देवेभिः । जेन्यावसू इति । इन्द्राग्नी इति । सोमऽपीतये ॥ ७ ॥

श्यावाश्वस्य सुन्वतोऽत्रीणां शृणुतं हवम् । इन्द्राग्नी सोमपीतये ॥ ८ ॥

श्यावऽअश्वस्य । सुन्वतः । अत्रीणाम् । शृणुतम् । हवम् । इन्द्राग्नी इति । सोमऽपीतये ॥ ८ ॥

एवा वामह्व ऊतये यथाहुवन्त मेधिराः । इन्द्राग्नी सोमपीतये ॥ ९ ॥

एव । वाम् । अह्वे । ऊतये । यथा । अहुवन्त । मेधिराः । इन्द्राग्नी इति । सोमऽपीतये ॥ ९ ॥

आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे । याभ्यां गायत्रमृच्यते ॥ १० ॥ [२१]

आ । अहम् । सरस्वतीऽवतोः । इन्द्राग्न्योः । अवः । वृणे । याभ्याम् । गायत्रम् । ऋच्यते ॥ १० ॥

[३९] [१० नाभाकः काण्वः । अग्निः । महापङ्क्तिः ।]

अग्निमस्तोष्यृग्मियमग्निमीळा यजध्यै ।

अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरन्तश्चरति दूत्यं१ नभन्तामन्यके समे ॥ १ ॥

अग्निम् । अस्तोषि । ऋग्मियम् । अग्निम् । ईळा । यजध्यै ॥ अग्निः । देवान् । अनक्तु । नः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उभे इति । हि । विदथे इति । कविः । अन्तरिति । चरति । दूत्यम् । नभन्ताम् । अन्यके । समे ॥ १ ॥

न्यग्ने नव्यसा वचस्तनूषु शंसमेषाम् ।
न्यराती रराव्णां विश्वा अर्यो अरातीरितो युच्छन्त्वामुरो नभन्तामन्यके समे ॥ २ ॥

नि । अग्ने । नव्यसा । वचः । तनूषु । शंसम् । एषाम् ॥ नि । अरातीः । रराव्णाम् ।
विश्वाः । अर्यः । अरातीः । इतः । युच्छन्तु । आऽमुरः । नभन्ताम् । अन्यके । समे ॥ २ ॥

अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि ।
स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभन्तामन्यके समे ॥ ३ ॥

अग्ने । मन्मानि । तुभ्यम् । कम् । घृतम् । न । जुह्वे । आसनि ॥ सः । देवेषु । प्र । चिकिद्धि ।
त्वम् । हि । असि । पूर्व्यः । शिवः । दूतः । विवस्वतः । नभन्ताम् । अन्यके । समे ॥ ३ ॥

तत्तदग्निर्वयो दधे यथायथा कृपण्यति ।
ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्यै देवहूत्यै नभन्तामन्यके समे ॥ ४ ॥

तत्ऽतत् । अग्निः । वयः । दधे । यथाऽयथा । कृपण्यति ॥ ऊर्जाऽआहुतिः । वसूनाम् ।
शम् । च । योः । च । मयः । दधे । विश्वस्यै । देवऽहूत्यै । नभन्ताम् । अन्यके । समे ॥ ४ ॥

स चिकेत सहीयसाग्निश्चित्रेण कर्मणा ।
स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं१ नभन्तामन्यके समे ॥ ५ ॥ [२२]

सः । चिकेत । सहीयसा । अग्निः । चित्रेण । कर्मणा ॥ सः । होता । शश्वतीनाम् ।
दक्षिणाभिः । अभिऽवृतः । इनोति । च । प्रतीव्यम् । नभन्ताम् । अन्यके । समे ॥ ५ ॥

अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यम् ।
अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभन्तामन्यके समे ॥ ६ ॥

अग्निः । जाता । देवानाम् । अग्निः । वेद । मर्तानाम् । अपीच्यम् ॥ अग्निः । सः । द्रविणःऽदाः ।
अग्निः । द्वारा । वि । ऊर्णुते । सुऽआहुतः । नवीयसा । नभन्ताम् । अन्यके । समे ॥ ६ ॥

अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा ।
स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभन्तामन्यके समे ॥ ७ ॥

अग्निः । देवेषु । सम्ऽवसुः । सः । विक्षु । यज्ञियासु । आ ॥ सः । मुदा । काव्या । पुरु ।
विश्वम् । भूमऽइव । पुष्यति । देवः । देवेषु । यज्ञियः । नभन्ताम् । अन्यके । समे ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु।

तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यज्ञेषु पूर्व्यं नभन्तामन्यके समे॥ ८॥

यः। अग्निः। सप्तऽमानुषः। श्रितः। विश्वेषु। सिन्धुषु॥ तम्। आ। अगन्म। त्रिऽपस्त्यम्।

मन्धातुः। दस्युहन्ऽतमम्। अग्निम्। यज्ञेषु। पूर्व्यम्। नभन्ताम्। अन्यके। समे॥ ८॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः।

स त्रीँरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभन्तामन्यके समे॥ ९॥

अग्निः। त्रीणि। त्रिऽधातूनि। आ। क्षेति। विदथा। कविः॥ सः। त्रीन्। एकादशान्। इह।

यक्षत्। च। पिप्रयत्। च। नः। विप्रः। दूतः। परिऽकृत्। नभन्ताम्। अन्यके। समे॥ ९॥

त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरज्यसि।

त्वामापः परिस्रुतः परि यन्ति स्वसेतवो नभन्तामन्यके समे॥ १०॥ [२३]

त्वम्। नः। अग्ने। आयुषु। त्वम्। देवेषु। पूर्व्य। वस्वः। एकः। इरज्यसि।

त्वाम्। आपः। परिऽस्रुतः। परि। यन्ति। स्वऽसेतवः। नभन्ताम्। अन्यके। समे॥ १०॥

[४०] [१२ नाभाकः काण्वः। इन्द्राग्नी। महापंक्तिः, २ शक्वरी, १२ त्रिष्टुप।]

इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम्।

येन दृळ्हा समत्स्वा वीळु चित्साहिषीमह्यग्निर्वनेव वात इन्नभन्तामन्यके समे॥ १॥

इन्द्राग्नी इति। युवम्। सु। नः। सहन्ता। दासथः। रयिम्॥ येन। दृळ्हा। समत्ऽसु। आ।

वीळु। चित्। सहिषीमहि। अग्निः। वनाऽइव। वाते। इत्। नभन्ताम्। अन्यके। समे॥ १॥

नहि वां वव्रयामहेऽथेन्द्रमिद्यजामहे शविष्ठं नृणां नरम्।

स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे॥ २॥

नहि। वाम्। वव्रयामहे। अथ। इन्द्रम्। इत्। यजामहे। शविष्ठम्। नृणाम्। नरम्॥ सः। नः। कदा।

चित्। अर्वता। गतम्। आ। वाजऽसातये। गमत्। आ। मेधऽसातये। नभन्ताम्। अन्यके। समे॥ २॥

ता हि मध्यं भराणामिन्द्राग्नी अधिक्षितः।

ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभन्तामन्यके समे॥ ३॥

ता। हि। मध्यम्। भराणाम्। इन्द्राग्नी इति। अधिऽक्षितः॥ तौ। ऊँ इति। कविऽत्वना।

कवी इति। पृच्छ्यमाना। सखिऽयते। सम्। धीतम्। अश्नुतम्। नरा। नभन्ताम्। अन्यके। समे॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभ्यर्च नभाकवदिन्द्राग्नी यजसा गिरा।

ययोर्विश्वमिदं जगदियं द्यौः पृथिवी मह्यु१पस्थे बिभृतो वसु नभन्तामन्यके समे॥ ४॥

अभि। अर्च। नभाक॰वत्। इन्द्राग्नी इति। यजसा। गिरा॥ ययोः। विश्वम्। इदम्। जगत्।

इयम्। द्यौः। पृथिवी। मही। उप॰स्थे। बिभृतः। वसु। नभन्ताम्। अन्यके। समे॥ ४॥

प्र ब्रह्माणि नभाकवदिन्द्राग्निभ्यामिरज्यत।

या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इन्द्र ईशान ओजसा नभन्तामन्यके समे॥ ५॥

प्र। ब्रह्माणि। नभाक॰वत्। इन्द्राग्नि॰भ्याम्। इरज्यत॥ या। सप्त॰बुध्नम्। अर्णवम्।

जिह्म॰बारम्। अप॰ऊर्णुतः। इन्द्रः। ईशानः। ओजसा। नभन्ताम्। अन्यके। समे॥ ५॥

अपि वृश्च पुराणवद्व्रततेरिव गुष्पितमोजो दासस्य दम्भय।

वयं तदस्य संभृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे॥ ६॥ [२४]

अपि। वृश्च। पुराण॰वत्। व्रततेःऽइव। गुष्पितम्। ओजः। दासस्य। दम्भय।

वयम्। तत्। अस्य। सम्॰भृतम्। वसु। इन्द्रेण। वि। भजेमहि। नभन्ताम्। अन्यके। समे॥ ६॥

यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा।

अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे॥ ७॥

यत्। इन्द्राग्नी इति। जनाः। इमे। वि॰ह्वयन्ते। तना। गिरा॥ अस्माकेभिः। नृ॰भिः।

वयम्। ससह्याम। पृतन्यतः। वनुयाम। वनुष्यतः। नभन्ताम्। अन्यके। समे॥ ७॥

या नु श्वेताववो दिव उच्चरात उप द्युभिः।

इन्द्राग्न्योरनु व्रतमुहाना यन्ति सिन्धवो यान्त्सीं बन्धादमुञ्चतां नभन्तामन्यके समे॥ ८॥

या। नु। श्वेतौ। अवः। दिवः। उत्॰चरातः। उप। द्यु॰भिः॥ इन्द्राग्न्योः। अनु। व्रतम्।

उहानाः। यन्ति। सिन्धवः। यान्। सीम्। बन्धात्। अमुञ्चताम्। नभन्ताम्। अन्यके। समे॥ ८॥

पूर्वीष्ट इन्द्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः।

वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे॥ ९॥

पूर्वीः। ते। इन्द्र। उप॰मातयः। पूर्वीः। उत। प्र॰शस्तयः। सूनो इति। हिन्वस्य। हरि॰वः।

वस्वः। वीरस्य। आ॰पृचः। याः। नु। साधन्त। नः। धियः। नभन्ताम्। अन्यके। समे॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं शिंशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम्।

उतो नु चिद्य ओजसा शुष्णस्याण्डानि भेदति जेषत्स्वर्वतीरपो नभन्तामन्यके समे॥ १०॥

तम्। शिशीत। सुवृक्तिऽभिः। त्वेषम्। सत्वानम्। ऋग्मियम्॥ उतो इति। नु। चित्। यः। ओजसा।

शुष्णस्य। आण्डानि। भेदति। जेषत्। स्वः२वतीः। अपः। नभन्ताम्। अन्यके। समे॥ १०॥

तं शिंशीता स्वध्वरं सत्यं सत्वानमृत्वियम्।

उतो नु चिद्य ओहत आण्डा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभन्तामन्यके समे॥ ११॥

तम्। शिशीत। सुऽअध्वरम्। सत्यम्। सत्वानम्। ऋत्वियम्॥ उतो इति। नु। चित्। यः।

ओहते। आण्डा। शुष्णस्य। भेदति। अजैः। स्वः२वतीः। अपः। नभन्ताम्। अन्यके। समे॥ ११॥

एवेन्द्राग्निभ्यां पितृवन्नवीयो मन्धातृवदङ्गिरस्वदवाचि।

त्रिधातुना शर्मणा पातमस्मान्वयं स्याम पतयो रयीणाम्॥ १२॥ [२५]

एव। इन्द्राग्निऽभ्याम्। पितृऽवत्। नवीयः। मन्धातृऽवत्। अङ्गिरस्वत्। अवाचि।

त्रिऽधातुना। शर्मणा। पातम्। अस्मान्। वयम्। स्याम। पतयः। रयीणाम्॥ १२॥

[४१] [१० नाभाकः काण्वः। वरुणः। महापङ्क्तिः]

अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः।

यो धीता मानुषाणां पश्वो गाइव रक्षति नभन्तामन्यके समे॥ १॥

अस्मै। ऊँ इति। सु। प्रऽभूतये। वरुणाय। मरुत्ऽभ्यः। अर्च। विदुः२तरेभ्यः।

यः। धीता। मानुषाणाम्। पश्वः। गाःऽइव। रक्षति। नभन्ताम्। अन्यके। समे॥ १॥

तमू षु समना गिरा पितॄणां च मन्मभिः।

नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे॥ २॥

तम्। ऊँ इति। सु। समना। गिरा। पितॄणाम्। च। मन्मऽभिः। नाभाकस्य। प्रशस्तिऽभिः।

यः। सिन्धूनाम्। उप। उत्ऽअये। सप्तऽस्वसा। सः। मध्यमः। नभन्ताम्। अन्यके। समे॥ २॥

स क्षपः परि षस्वजे न्यु१स्रो मायया दधे स विश्वं परि दर्शतः।

तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन्नभन्तामन्यके समे॥ ३॥

सः। क्षपः। परि। सस्वजे। नि। उस्रः। मायया। दधे। सः। विश्वम्। परि। दर्शतः।

तस्य। वेनीः। अनु। व्रतम्। उषः। तिस्रः। अवर्धयन्। नभन्ताम्। अन्यके। समे॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः कुकुभो निधारयः पृथिव्यामधि दर्शतः।

स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि गोपाइवेर्यो नभन्तामन्यके समे॥ ४॥

यः। कुकुभः। निऽधारयः। पृथिव्याम्। अधि। दर्शतः॥ सः। माता। पूर्व्यम्। पदम्।

तत्। वरुणस्य। सप्त्यम्। सः। हि। गोपाःऽइव। इर्यः। नभन्ताम्। अन्यके। समे॥ ४॥

यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या।

स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे॥ ५॥ [२६]

यः। धर्ता। भुवनानाम्। यः। उस्राणाम्। अपीच्या। वेद। नामानि। गुह्या।

सः। कविः। काव्या। पुरु। रूपम्। द्यौःऽइव। पुष्यति। नभन्ताम्। अन्यके। समे॥ ५॥

यस्मिन्विश्वानि काव्या चक्रे नाभिरिव श्रिता।

त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वाँ अयुक्षत नभन्तामन्यके समे॥ ६॥

यस्मिन्। विश्वानि। काव्या। चक्रे। नाभिःऽइव। श्रिता॥ त्रितम्। जूती। सपर्यत।

व्रजे। गावः। न। सम्ऽयुजे। युजे। अश्वान्। अयुक्षत। नभन्ताम्। अन्यके। समे॥ ६॥

य आस्वत्क आशये विश्वा जातान्येषाम्।

परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे॥ ७॥

यः। आसु। अत्कः। आऽशये। विश्वा। जातानि। एषाम्॥ परि। धामानि। मर्मृशत्।

वरुणस्य। पुरः। गये। विश्वे। देवाः। अनु। व्रतम्। नभन्ताम्। अन्यके। समे॥ ७॥

स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे।

स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे॥ ८॥

सः। समुद्रः। अपीच्यः। तुरः। द्याम्ऽइव। रोहति। नि। यत्। आसु। यजुः। दधे।

सः। मायाः। अर्चिना। पदा। अस्तृणात्। नाकम्। आ। अरुहत्। नभन्ताम्। अन्यके। समे॥ ८॥

यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः।

त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे॥ ९॥

यस्य। श्वेता। विऽचक्षणा। तिस्रः। भूमीः। अधिऽक्षितः॥ त्रिः। उत्ऽतराणि। पप्रतुः।

वरुणस्य। ध्रुवम्। सदः। सः। सप्तानाम्। इरज्यति। नभन्ताम्। अन्यके। समे॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः श्वे॒तॉं अधि॑निर्णिजश्च॒क्रे कृ॒ष्णाँ अनु॑ व्र॒ता।

स धाम॑ पू॒र्व्यं म॑मे॒ यः स्क॒म्भेन॒ वि रोद॑सी अ॒जो न द्यामधा॑रय॒न्नभ॑न्तामन्य॒के स॑मे॥ १०॥ [२७]

यः। श्वे॒तान्। अधि॑ऽनिर्निजः। च॒क्रे। कृ॒ष्णान्। अनु॑। व्र॒ता॥ सः। धाम॑। पू॒र्व्यम्। म॒मे॒।

यः। स्क॒म्भेन॑। वि। रोदसी॒ इति॑। अ॒जः। न। द्याम्। अधा॑रयत्। नभ॑न्ताम्। अ॒न्य॒के। स॒मे॒॥ १०॥

[४२] [६ नाभाकः काण्वः, अर्चनाना आत्रेयो वा। १-३ वरुणः, ४-६ अश्विनौ।
१-३ त्रिष्टुप्। ४-६ अनुष्टुप्।]

अस्त॑भ्ना॒द् द्यामसु॑रो वि॒श्ववे॑दा॒ अमि॑मीत व॒रि॒माणं॑ पृथि॒व्याः।

आसी॑द॒द्विश्वा॒ भुव॑नानि स॒म्राड्विश्वेत्तानि॒ वरु॑णस्य व्र॒तानि॑॥ १॥

अस्त॑भ्नात्। द्याम्। असु॑रः। वि॒श्वऽवे॑दाः। अमि॑मीत। व॒रि॒माण॑म्। पृ॒थि॒व्याः।

आ। अ॒सी॒द॒त्। विश्वा॑। भुव॑नानि। स॒म्ऽराट्। विश्वा॑। इत्। तानि॑। वरु॑णस्य। व्र॒तानि॑॥ १॥

ए॒वा व॑न्दस्व॒ वरु॑णं बृ॒हन्तं॑ न॒मस्या धीर॑म॒मृत॑स्य गो॒पाम्।

स नः॒ शर्म॑ त्रि॒वरू॑थं॒ वि यं॑सत्पा॒तं नो॑ द्यावापृथिवी उ॒पस्थे॑॥ २॥

ए॒व। व॒न्द॒स्व॒। वरु॑णम्। बृ॒हन्त॑म्। न॒म॒स्य। धीर॑म्। अ॒मृत॑स्य। गो॒पाम्।

सः। नः॒। शर्म॑। त्रि॒ऽवरू॑थम्। वि। यं॒स॒त्। पा॒तम्। नः। द्या॒वा॒पृ॒थि॒वी॒ इति॑। उ॒पऽस्थे॑॥ २॥

इ॒मां धिय॒ं शिक्ष॑माणस्य देव॒ क्रतु॒ं दक्ष॑ं वरुण॒ सं शि॑शाधि।

ययाति॒ विश्वा॑ दुरि॒ता तरे॑म सु॒तर्मा॑ण॒मधि॒ नाव॑ं रुहेम॥ ३॥

इ॒माम्। धिय॑म्। शिक्ष॑माणस्य। दे॒व॒। क्रतु॑म्। दक्ष॑म्। व॒रु॒ण॒। सम्। शि॒शा॒धि॒।

यया॑। अति॑। विश्वा॑। दुः॒ऽइ॒ता। तरे॑म। सु॒ऽतर्मा॑णम्। अधि॑। नाव॑म्। रु॒हे॒म॒॥ ३॥

आ वां॒ ग्रावा॑णो अ॒श्विना धी॒भिर्विप्रा॑ अचुच्यवुः। नास॑त्या॒ सोम॑पीतये नभ॑न्तामन्य॒के स॑मे॥ ४॥

आ। वा॒म्। ग्रावा॑णः। अ॒श्वि॒ना॒। धी॒भिः। विप्राः॑। अ॒चु॒च्य॒वुः।

नास॑त्या। सोम॑ऽपीतये। नभ॑न्ताम्। अ॒न्य॒के। स॒मे॒॥ ४॥

यथा॑ वा॒मत्रि॑रश्विना गी॒र्भिर्विप्रो॑ अजो॑हवीत्। नास॑त्या॒ सोम॑पीतये॒ नभ॑न्तामन्य॒के स॑मे॥ ५॥

यथा॑। वा॒म्। अत्रिः॑। अ॒श्वि॒ना॒। गी॒ःऽभिः। विप्रः॑। अजो॑हवीत्।

नास॑त्या। सोम॑ऽपीतये। नभ॑न्ताम्। अ॒न्य॒के। स॒मे॒॥ ५॥

ए॒वा वा॑मह्व ऊ॒तये॒ यथाहु॑वन्त॒ मेधि॑राः। नास॑त्या॒ सोम॑पीतये॒ नभ॑न्तामन्य॒के स॑मे॥ ६॥ [२८] {५}

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एव। वाम्। अह्वे। ऊतये। यथा। अहुवन्त। मेधिराः।
नासत्या। सोमऽपीतये। नभन्ताम्। अन्यके। समे॥ ६॥

[४३] [३३ विरूप आङ्गिरसः। अग्निः। गायत्री।]

इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः। गिरः स्तोमास ईरते॥ १॥

इमे। विप्रस्य। वेधसः। अग्नेः। अस्तृतऽयज्वनः। गिरः। स्तोमासः। ईरते॥ १॥

अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्॥ २॥

अस्मै। ते। प्रतिऽहर्यते। जातऽवेदः। विऽचर्षणे। अग्ने। जनामि। सुऽस्तुतिम्॥ २॥

आरोकाइव घेदह तिग्मा अग्ने तव त्विषः। दद्भिर्वनानि बप्सति॥ ३॥

आरोकाःऽइव। घ। इत्। अह। तिग्माः। अग्ने। तव। त्विषः। दत्ऽभिः। वनानि। बप्सति॥ ३॥

हरयो धूमकेतवो वातजूता उप द्यवि। यतन्ते वृथगग्नयः॥ ४॥

हरयः। धूमऽकेतवः। वातऽजूताः। उप। द्यवि। यतन्ते। वृथक्। अग्नयः॥ ४॥

एते त्ये वृथगग्नय इद्धासः समदृक्षत। उषसामिव केतवः॥ ५॥ [२९]

एते। त्ये। वृथक्। अग्नयः। इद्धासः। सम्। अदृक्षत। उषसाम्ऽइव। केतवः॥ ५॥

कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः। अग्निर्यद्रोधति क्षमि॥ ६॥

कृष्णा। रजांसि। पत्सुतः। प्रऽयाने। जातऽवेदसः। अग्निः। यत्। रोधति। क्षमि॥ ६॥

धासिं कृण्वान ओषधीर्बप्सदग्निर्न वायति। पुनर्यन्तरुणीरपि॥ ७॥

धासिम्। कृण्वानः। ओषधीः। बप्सत्। अग्निः। न। वायति। पुनः। यन्। तरुणीः। अपि॥ ७॥

जिह्वाभिरह नन्नमदर्चिषा जञ्जणाभवन्। अग्निर्वनेषु रोचते॥ ८॥

जिह्वाभिः। अह। नन्नमत्। अर्चिषा। जञ्जणाऽभवन्। अग्निः। वनेषु। रोचते॥ ८॥

अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे। गर्भे सञ्जायसे पुनः॥ ९॥

अप्ऽसु। अग्ने। सधिः। तव। सः। ओषधीः। अनु। रुध्यसे। गर्भे। सन्। जायसे। पुनरिति॥ ९॥

उदग्ने तव तद्घृतादर्ची रोचत आहुतम्। निंसानं जुह्वो३ मुखे॥ १०॥ [३०]

उत्। अग्ने। तव। तत्। घृतात्। अर्चिः। रोचते। आऽहुतम्। निंसानम्। जुह्वः। मुखे॥ १०॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उ॒क्ष॰अ॑न्नाय । व॒शा॰अ॑न्नाय । सोम॑॰पृष्ठाय । वे॒धसे॑ । स्तोमैः॑ । वि॒धे॒म॒ । अ॒ग्नये॑ ॥ ११ ॥

उ॒त त्वा॒ नम॑सा व॒यं होत॒र्वरे॑ण्यक्रतो । अग्ने॑ स॒मिद्भि॑रीमहे ॥ १२ ॥

उ॒त । त्वा॒ । नम॑सा । व॒यम् । होत॑: । वरे॑ण्यक्रतो॒ इति॒ वरे॑ण्य॰क्रतो । अग्ने॑ । स॒मित्॰भि॑: । ई॒म॒हे॒ ॥ १२ ॥

उ॒त त्वा॑ भृगु॒वच्छु॑चे मनु॒ष्वद॑ग्न आहुत । अ॒ङ्गि॒र॒स्वद्ध॑वामहे ॥ १३ ॥

उ॒त । त्वा॒ । भृ॒गु॒॰वत् । शु॒चे॒ । म॒नु॒ष्वत् । अ॒ग्ने॒ । आ॒॰हु॒त॒ । अ॒ङ्गि॒र॒स्वत् । ह॒वा॒म॒हे॒ ॥ १३ ॥

त्वं ह्य॑ग्ने अ॒ग्निना॒ विप्रो॒ विप्रे॑ण॒ सन्त्स॒ता । सखा॒ सख्या॑ समि॒ध्यसे॑ ॥ १४ ॥

त्वम् । हि । अ॒ग्ने॒ । अ॒ग्निना॑ । विप्र॑: । विप्रे॑ण । सन् । स॒ता । सखा॑ । सख्या॑ । स॒म्॰इ॒ध्यसे॑ ॥ १४ ॥

स त्वं विप्रा॑य दा॒शुषे॑ र॒यिं दे॑हि स॒ह॒स्रिण॑म् । अग्ने॑ वी॒रव॑ती॒मिष॑म् ॥ १५ ॥ [३१]

स: । त्वम् । विप्रा॑य । दा॒शुषे॑ । र॒यिम् । दे॒हि॒ । स॒ह॒स्रिण॑म् । अग्ने॑ । वी॒र॰व॑तीम् । इष॑म् ॥ १५ ॥

अग्ने॒ भ्रात॒: सह॑स्कृत॒ रोहि॑दश्व॒ शुचि॑व्रत । इ॒मं स्तोमं॑ जुषस्व मे ॥ १६ ॥

अग्ने॑ । भ्रात॒रिति॑ । सह॑:ऽकृत । रोहि॑त्॰अश्व । शुचि॑॰व्रत । इ॒मम् । स्तोम॑म् । जु॒ष॒स्व॒ । मे॒ ॥ १६ ॥

उ॒त त्वा॑ग्ने॒ मम॒ स्तुतो॑ वा॒श्राय॑ प्रति॒हर्य॑ते । गो॒ष्ठं गाव॑इवाशत ॥ १७ ॥

उ॒त । त्वा॒ । अ॒ग्ने॒ । मम॑ । स्तुत॑: । वा॒श्राय॑ । प्र॒ति॒॰हर्य॑ते । गो॒॰स्थम् । गाव॑:ऽइव । आ॒श॒त॒ ॥ १७ ॥

तुभ्यं॒ ता अ॑ङ्गिरस्तम॒ विश्वा॑: सुक्षि॒तय॒: पृथ॑क् । अग्ने॒ कामा॑य येमिरे ॥ १८ ॥

तुभ्य॑म् । ता: । अ॒ङ्गि॒र॒:ऽत॒म॒ । विश्वा॑: । सु॒॰क्षि॒तय॑: । पृथ॑क् । अग्ने॑ । कामा॑य । ये॒मि॒रे॒ ॥ १८ ॥

अ॒ग्निं धी॒भिर्म॑नी॒षिणो॒ मेधि॑रासो विप॒श्चित॑: । अ॒द्म॒सद्या॑य हिन्विरे ॥ १९ ॥

अ॒ग्निम् । धी॒भि: । म॒नी॒षिण॑: । मेधि॑रास: । वि॒प॒:ऽचित॑: । अ॒द्म॒॰सद्या॑य । हि॒न्वि॒रे॒ ॥ १९ ॥

तं त्वाम॒ज्मे॑षु वा॒जिनं॑ तन्वा॒ना अ॑ग्ने अध्व॒रम् । वह्निं॒ होता॑रमीळते ॥ २० ॥ [३२]

तम् । त्वाम् । अ॒ज्मे॑षु । वा॒जिन॑म् । त॒न्वा॒ना: । अ॒ग्ने॒ । अ॒ध्व॒रम् । वह्नि॑म् । होता॑रम् । ई॒ळ॒ते॒ ॥ २० ॥

पु॒रु॒त्रा हि स॒दृङ्ङसि॒ विशो॒ विश्वा॒ अनु॑ प्र॒भुः । स॒मत्सु॑ त्वा हवामहे ॥ २१ ॥

पु॒रु॒॰त्रा । हि । स॒॰दृङ् । असि॑ । विश॑: । विश्वा॑: । अनु॑ । प्र॒॰भुः । स॒मत्॰सु॑ । त्वा॒ । ह॒वा॒म॒हे॒ ॥ २१ ॥

तमी॑ळिष्व॒ य आहु॑तो॒ऽग्निर्वि॒भ्राज॑ते घृ॒तैः । इ॒मं न॑: शृणव॒द्धव॑म् ॥ २२ ॥

तम् । ई॒ळि॒ष्व॒ । य: । आ॒॰हु॑त: । अ॒ग्नि: । वि॒॰भ्राज॑ते । घृ॒तैः । इ॒मम् । न॒: । शृ॒ण॒व॒त् । हव॑म् ॥ २२ ॥

तं त्वा॑ व॒यं ह॑वामहे शृ॒ण्वन्तं॑ जा॒तवे॑दसम् । अग्ने॒ घ्नन्त॒मप॒ द्विष॑: ॥ २३ ॥

तम् । त्वा॒ । व॒यम् । ह॒वा॒म॒हे॒ । शृ॒ण्वन्त॑म् । जा॒त॰वे॑दसम् । अग्ने॑ । घ्नन्त॑म् । अप॑ । द्विष॑: ॥ २३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विशां राजानमद्भुतमध्यक्षं धर्मणामिमम्। अग्निमीळे स उ श्रवत्॥ २४॥

विशाम्। राजानम्। अद्भुतम्। अधिऽअक्षम्। धर्मणाम्। इमम्।

अग्निम्। ईळे। सः। ऊँ इति। श्रवत्॥ २४॥

अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितम्। सप्तिं न वाजयामसि॥ २५॥ [३३]

अग्निम्। विश्वायुऽवेपसम्। मर्यम्। न। वाजिनम्। हितम्। सप्तिम्। न। वाजयामसि॥ २५॥

घ्नन्मृध्राण्यप द्विषो दहन्रक्षांसि विश्वहा। अग्ने तिग्मेन दीदिहि॥ २६॥

घ्नन्। मृध्राणि। अप। द्विषः। दहन्। रक्षांसि। विश्वहा। अग्ने। तिग्मेन। दीदिहि॥ २६॥

यं त्वा जनास इन्धते मनुष्वदङ्गिरस्तम। अग्ने स बोधि मे वचः॥ २७॥

यम्। त्वा। जनासः। इधते। मनुष्वत्। अङ्गिरःऽतम। अग्ने। सः। बोधि। मे। वचः॥ २७॥

यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत। तं त्वा गीर्भिर्हवामहे॥ २८॥

यत्। अग्ने। दिविऽजाः। असि। अप्सुऽजाः। वा। सहःऽकृत। तम्। त्वा। गीःऽभिः। हवामहे॥ २८॥

तुभ्यं घेत्ते जना इमे विश्वाः सुक्षितयः पृथक्। धासिं हिन्वन्त्यत्तवे॥ २९॥

तुभ्यम्। घ। इत्। ते। जनाः। इमे। विश्वाः। सुऽक्षितयः। पृथक्। धासिम्। हिन्वन्ति। अत्तवे॥ २९॥

ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः। तरन्तः स्याम दुर्गहा॥ ३०॥ [३४]

ते। घ। इत्। अग्ने। सुऽआध्यः। अहा। विश्वा। नृऽचक्षसः। तरन्तः। स्याम। दुःऽगहा॥ ३०॥

अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम्। हृद्भिर्मन्द्रेभिरीमहे॥ ३१॥

अग्निम्। मन्द्रम्। पुरुऽप्रियम्। शीरम्। पावकऽशोचिषम्। हृत्ऽभिः। मन्द्रेभिः। ईमहे॥ ३१॥

स त्वमग्ने विभावसुः सृजन्त्सूर्यो न रश्मिभिः। शर्धन्तमांसि जिघ्नसे॥ ३२॥

सः। त्वम्। अग्ने। विभाऽवसुः। सृजन्। सूर्यः। न। रश्मिऽभिः। शर्धन्। तमांसि। जिघ्नसे॥ ३२॥

तत्ते सहस्व ईमहे दात्रं यन्नोपदस्यति। त्वदग्ने वार्यं वसु॥ ३३॥ [३५]

तत्। ते। सहस्वः। ईमहे। दात्रम्। यत्। न। उपऽदस्यति। त्वत्। अग्ने। वार्यम्। वसु॥ ३॥

[४४] [३० विरूप आङ्गिरसः। अग्निः। गायत्री।]

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन्हव्या जुहोतन॥ १॥

सम्ऽइधा। अग्निम्। दुवस्यत। घृतैः। बोधयत। अतिथिम्। आ। अस्मिन्। हव्या। जुहोतन॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना। प्रति सूक्तानि हर्य नः॥ २॥

अग्ने। स्तोमम्। जुषस्व। मे। वर्धस्व। अनेन। मन्मना। प्रति। सु॰उक्तानि। हर्य। नः॥ २॥

अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादिह॥ ३॥

अग्निम्। दूतम्। पुरः। दधे। हव्य॰वाहम्। उप। ब्रुवे। देवान्। आ। सादयात्। इह॥ ३॥

उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः। अग्ने शुक्रास ईरते॥ ४॥

उत्। ते। बृहन्तः। अर्चयः। सम्॰इधानस्य। दीदि॰वः। अग्ने। शुक्रासः। ईरते॥ ४॥

उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत। अग्ने हव्या जुषस्व नः॥ ५॥ [३६]

उप। त्वा। जुह्वः। मम। घृताचीः। यन्तु। हर्यत। अग्ने। हव्या। जुषस्व। नः॥ ५॥

मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम्। अग्निमीळे स उ श्रवत्॥ ६॥

मन्द्रम्। होतारम्। ऋत्विजम्। चित्र॰भानुम्। विभा॰वसुम्। अग्निम्। ईळे। सः। ऊँ इति। श्रवत्॥ ६॥

प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुम्। अध्वराणामभिश्रियम्॥ ७॥

प्रत्नम्। होतारम्। ईड्यम्। जुष्टम्। अग्निम्। कवि॰क्रतुम्। अध्वराणाम्। अभि॰श्रियम्॥ ७॥

जुषाणो अङ्गिरस्तमेमा हव्यान्यानुषक्। अग्ने यज्ञं नय ऋतुथा॥ ८॥

जुषाणः। अङ्गिरःऽतम। इमा। हव्यानि। आनुषक्। अग्ने। यज्ञम्। नय। ऋतु॰था॥ ८॥

समिधान उ सन्त्य शुक्रशोच इहा वह। चिकित्वान्दैव्यं जनम्॥ ९॥

सम्॰इधानः। ऊँ इति। सन्त्य। शुक्र॰शोचे। इह। आ। वह। चिकित्वान्। दैव्यम्। जनम्॥ ९॥

विप्रं होतारमद्रुहं धूमकेतुं विभावसुम्। यज्ञानां केतुमीमहे॥ १०॥ [३७]

विप्रम्। होतारम्। अद्रुहम्। धूम॰केतुम्। विभा॰वसुम्। यज्ञानाम्। केतुम्। ईमहे॥ १०॥

अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः। भिन्धि द्वेषः सहस्कृत॥ ११॥

अग्ने। नि। पाहि। नः। त्वम्। प्रति। स्म। देव। रिषतः। भिन्धि। द्वेषः। सहःऽकृत॥ ११॥

अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं१ स्वाम्। कविर्विप्रेण वावृधे॥ १२॥

अग्निः। प्रत्नेन। मन्मना। शुम्भानः। तन्वम्। स्वाम्। कविः। विप्रेण। ववृधे॥ १२॥

ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम्। अस्मिन्यज्ञे स्वध्वरे॥ १३॥

ऊर्जः। नपातम्। आ। हुवे। अग्निम्। पावक॰शोचिषम्। अस्मिन्। यज्ञे। सु॰अध्वरे॥ १३॥

स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा। देवैरा सत्सि बर्हिषि॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। नः। मित्र॒ऽमहः। त्वम्। अग्ने। शुक्रेण। शोचिषा। देवैः। आ। सत्सि। बर्हिषि॥ १४॥

यो अग्निं तन्वो३ दमे देवं मर्तः सपर्यति। तस्मा इद्दीदयद्वसु॥ १५॥ [३८]

यः। अग्निम्। तन्वः। दमे। देवम्। मर्तः। सपर्यति। तस्मै। इत्। दीदयत्। वसु॥ १५॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति॥ १६॥

अग्निः। मूर्धा। दिवः। ककुत्। पतिः। पृथिव्याः। अयम्। अपाम्। रेतांसि। जिन्वति॥ १६॥

उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतींष्यर्चयः॥ १७॥

उत्। अग्ने। शुचयः। तव। शुक्राः। भ्राजन्तः। ईरते। तव। ज्योतींषि। अर्चयः॥ १७॥

ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः। स्तोता स्यां तव शर्मणि॥ १८॥

ईशिषे। वार्यस्य। हि। दात्रस्य। अग्ने। स्वः२पतिः। स्तोता। स्याम्। तव। शर्मणि॥ १८॥

त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः। त्वां वर्धन्तु नो गिरः॥ १९॥

त्वाम्। अग्ने। मनीषिणः। त्वाम्। हिन्वन्ति। चित्तिऽभिः। त्वाम्। वर्धन्तु। नः। गिरः॥ १९॥

अदब्धस्य स्वधावतो दूतस्य रेभतः सदा। अग्नेः सख्यं वृणीमहे॥ २०॥ [३९]

अदब्धस्य। स्वधाऽवतः। दूतस्य। रेभतः। सदा। अग्नेः। सख्यम्। वृणीमहे॥ २०॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुची रोचत आहुतः॥ २१॥

अग्निः। शुचिव्रतऽतमः। शुचिः। विप्रः। शुचिः। कविः। शुचिः। रोचते। आऽहुतः॥ २१॥

उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा। अग्ने सख्यस्य बोधि नः॥ २२॥

उत। त्वा। धीतयः। मम। गिरः। वर्धन्तु। विश्वहा। अग्ने। सख्यस्य। बोधि। नः॥ २२॥

यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम्। स्युष्टे सत्या इहाशिषः॥ २३॥

यत्। अग्ने। स्याम्। अहम्। त्वम्। त्वम्। वा। घ। स्याः। अहम्।

स्युः। ते। सत्याः। इह। आऽशिषः॥ २३॥

वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः। स्याम ते सुमतावपि॥ २४॥

वसुः। वसुऽपतिः। हि। कम्। असि। अग्ने। विभाऽवसुः। स्याम। ते। सुऽमतौ। अपि॥ २४॥

अग्ने धृतव्रताय ते समुद्रायेव सिन्धवः। गिरो वाश्रास ईरते॥ २५॥ [४०]

अग्ने। धृतऽव्रताय। ते। समुद्रायऽइव। सिन्धवः। गिरः। वाश्रासः। ईरते॥ २५॥

युवानं विश्पतिं कविं विश्वादं पुरुवेपसम्। अग्निं शुम्भामि मन्मभिः॥ २६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युवानम् । विश्पतिम् । कविम् । विश्वऽअदम् । पुरुऽवेपसम् । अग्निम् । शुम्भामि । मन्मऽभिः ॥ २६ ॥

यज्ञानां रथ्ये वयं तिग्मजम्भाय वीळवे । स्तोमैरिषेमाग्नये ॥ २७ ॥

यज्ञानाम् । रथ्ये । वयम् । तिग्मऽजम्भाय । वीळवे । स्तोमैः । इषेम । अग्नये ॥ २७ ॥

अयमग्ने त्वे अपि जरिता भूतु सन्त्य । तस्मै पावक मृळय ॥ २८ ॥

अयम् । अग्ने । त्वे इति । अपि । जरिता । भूतु । सन्त्य । तस्मै । पावक । मृळय ॥ २८ ॥

धीरो ह्यस्यद्मसद्विप्रो न जागृविः सदा । अग्ने दीदयसि द्यवि ॥ २९ ॥

धीरः । हि । असि । अद्मऽसत् । विप्रः । न । जागृविः । सदा । अग्ने । दीदयसि । द्यवि ॥ २९ ॥

पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे । प्र ण आयुर्वसो तिर ॥ ३० ॥ [४१]

पुरा । अग्ने । दुःऽइतेभ्यः । पुरा । मृध्रेभ्यः । कवे । प्र । नः । आयुः । वसो इति । तिर ॥ ३२ ॥

[४५] [४२ त्रिशोकः काण्वः । इन्द्रः; १ अग्निश्चेन्द्रश्च । गायत्री ।]

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥ १ ॥

आ । घ । ये । अग्निम् । इन्धते । स्तृणन्ति । बर्हिः । आनुषक् । येषाम् । इन्द्रः । युवा । सखा ॥ १ ॥

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥ २ ॥

बृहन् । इत् । इध्मः । एषाम् । भूरि । शस्तम् । पृथुः । स्वरुः । येषाम् । इन्द्रः । युवा । सखा ॥ २ ॥

अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः । येषामिन्द्रो युवा सखा ॥ ३ ॥

अयुद्धः । इत् । युधा । वृतम् । शूरः । आ । अजति । सत्वऽभिः । येषाम् । इन्द्रः । युवा । सखा ॥ ३ ॥

आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम् । क उग्राः के ह शृण्विरे ॥ ४ ॥

आ । बुन्दम् । वृत्रऽहा । ददे । जातः । पृच्छत् । वि । मातरम् । के । उग्राः । के । ह । शृण्विरे ॥ ४ ॥

प्रति त्वा शवसी वदद्गिरावप्सो न योधिषत् । यस्ते शत्रुत्वमाचके ॥ ५ ॥ [४२]

प्रति । त्वा । शवसी । वदत् । गिरौ । अप्सः । न । योधिषत् । यः । ते । शत्रुऽत्वम् । आऽचके ॥ ५ ॥

उत त्वं मघवञ्छृणु यस्ते वष्टि ववक्षि तत् । यद्वीळयासि वीळु तत् ॥ ६ ॥

उत । त्वम् । मघऽवन् । शृणु । यः । ते । वष्टि । ववक्षि । तत् । यत् । वीळयासि । वीळु । तत् ॥ ६ ॥

यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुप । रथीतमो रथीनाम् ॥ ७ ॥

यत् । आजिम् । याति । आजिऽकृत् । इन्द्रः । स्वश्वऽयुः । उप । रथिऽतमः । रथिनाम् ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि षु विश्वा अभियुजो वज्रिन्विष्वग्यथा वृह। भवा नः सुश्रवस्तमः॥ ८॥

वि। सु। विश्वाः। अभिऽयुजः। वज्रिन्। विष्वक्। यथा। वृह। भव। नः। सुश्रवःऽतमः॥ ८॥

अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये। न यं धूर्वन्ति धूर्तयः॥ ९।

अस्माकम्। सु। रथम्। पुरः। इन्द्रः। कृणोतु। सातये। न। यम्। धूर्वन्ति। धूर्तयः॥ ९॥

वृज्याम ते परि द्विषोऽरं ते शक्र दावने। गमेमेदिन्द्र गोमतः॥ १०॥ [४३]

वृज्याम। ते। परि। द्विषः। अरम्। ते। शक्र। दावने। गमेम। इत्। इन्द्र। गोऽमतः॥ १०॥

शनैश्चिद्यन्तो अद्रिवोऽश्वावन्तः शतग्विनः। विवक्षणा अनेहसः॥ ११॥

शनैः। चित्। यन्तः। अद्रिऽवः। अश्वऽवन्तः। शतऽग्विनः। विवक्षणाः। अनेहसः॥ ११॥

ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता। जरितृभ्यो विमंहते॥ १२॥

ऊर्ध्वा। हि। ते। दिवेऽदिवे। सहस्रा। सूनृता। शता। जरितृऽभ्यः। विऽमंहते॥ १२॥

विद्मा हि त्वा धनंजयमिन्द्र दृळ्हा चिदारुजम्। आदारिणं यथा गयम्॥ १३॥

विद्म। हि। त्वा। धनम्ऽजयम्। इन्द्र। दृळ्हा। चित्। आऽरुजम्। आऽदारिणम्। यथा। गयम्॥ १३॥

ककुहं चित्त्वा कवे मन्दन्तु धृष्णविन्दवः। आ त्वा पणिं यदीमहे॥ १४॥

ककुहम्। चित्। त्वा। कवे। मन्दन्तु। धृष्णो इति। इन्दवः। आ। त्वा। पणिम्। यत्। ईमहे॥ १४॥

यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये। तस्य नो वेद आ भर॥ १५॥ [४४]

यः। ते। रेवान्। अदाशुरिः। प्रऽममर्ष। मघत्तये। तस्य। नः। वेदः। आ। भर॥ १५॥

इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः। पुष्टावन्तो यथा पशुम्॥ १६॥

इमे। ऊँ इति। त्वा। वि। चक्षते। सखायः। इन्द्र। सोमिनः। पुष्टऽवन्तः। यथा। पशुम्॥ १६॥

उत त्वाबधिरं वयं श्रुत्कर्णं सन्तमूतये। दूरादिह हवामहे॥ १७॥

उत। त्वा। अबधिरम्। वयम्। श्रुत्ऽकर्णम्। सन्तम्। ऊतये। दूरात्। इह। हवामहे॥ १७॥

यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत। भवेरापिर्नो अन्तमः॥ १८॥

यत्। शुश्रुयाः। इमम्। हवम्। दुःऽमर्षम्। चक्रियाः। उत। भवेः। आपिः। नः। अन्तमः॥ १८॥

यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि। गोदा इदिन्द्र बोधि नः॥ १९॥

यत्। चित्। हि। ते। अपि। व्यथिः। जगन्वांसः। अमन्महि। गोऽदाः। इत्। इन्द्र। बोधि। नः॥ १९॥

आ त्वा रम्भं न जिव्रयो ररभ्मा शवसस्पते। उश्मसि त्वा सधस्थ आ॥ २०॥ [४५]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। त्वा। रम्भम्। न। जिव्रयः। ररभ्म। शवसः। पते। उश्मसि। त्वा। सधस्थे। आ॥ २०॥

स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने। नकिर्यं वृण्वते युधि॥ २१॥

स्तोत्रम्। इन्द्राय। गायत। पुरुनृम्णाय। सत्वने। नकिः। यम्। वृण्वते। युधि॥ २१॥

अभि त्वा वृषभा सुते सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम्॥ २२॥

अभि। त्वा। वृषभ। सुते। सुतम्। सृजामि। पीतये। तृम्प। वि। अश्नुहि। मदम्॥ २२॥

मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन्। माकीं ब्रह्मद्विषो वनः॥ २३॥

मा। त्वा। मूराः। अविष्यवः। मा। उपहस्वानः। आ। दभन्। माकीम्। ब्रह्मद्विषः। वनः॥ २३॥

इह त्वा गोपरीणसा महे मन्दन्तु राधसे। सरो गौरो यथा पिब॥ २४॥

इह। त्वा। गोपरीणसा। महे। मन्दन्तु। राधसे। सरः। गौरः। यथा। पिब॥ २४॥

या वृत्रहा परावति सना नवा च चुच्युवे। ता संसत्सु प्र वोचत॥ २५॥ [४६]

या। वृत्रहा। पराऽवति। सना। नवा। च। चुच्युवे। ता। संसत्ऽसु। प्र। वोचत॥ २५॥

अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे। अत्रादेदिष्ट पौंस्यम्॥ २६॥

अपिबत्। कद्रुवः। सुतम्। इन्द्रः। सहस्रऽबाह्वे। अत्र। अदेदिष्ट। पौंस्यम्॥ २६॥

सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यम्। व्यानट् तुर्वणे शमि॥ २७॥

सत्यम्। तत्। तुर्वशे। यदौ। विदानः। अह्नवाय्यम्। वि। आनट्। तुर्वणे। शमि॥ २७॥

तरणिं वो जनानां त्रदं वाजस्य गोमतः। समानमु प्र शंसिषम्॥ २८॥

तरणिम्। वः। जनानाम्। त्रदम्। वाजस्य। गोऽमतः। समानम्। ऊँ इति। प्र। शंसिषम्॥ २८॥

ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम्। इन्द्रं सोमे सचा सुते॥ २९॥

ऋभुक्षणम्। न। वर्तवे। उक्थेषु। तुग्र्यऽवृधम्। इन्द्रम्। सोमे। सचा। सुते॥ २९॥

यः कृन्तदिद्वि योन्यं त्रिशोकाय गिरिं पृथुम्। गोभ्यो गातुं निरेतवे॥ ३०॥ [४७]

यः। कृन्तत्। इत्। वि। योन्यम्। त्रिऽशोकाय। गिरिम्। पृथुम्। गोभ्यः। गातुम्। निःऽएतवे॥ ३०॥

यद्दधिषे मनस्यसि मन्दानः प्रेदियक्षसि। मा तत्करिन्द्र मृळय॥ ३१॥

यत्। दधिषे। मनस्यसि। मन्दानः। प्र। इत्। इयक्षसि। मा। तत्। कः। इन्द्र। मृळय॥ ३१॥

दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि। जिगात्विन्द्र ते मनः॥ ३२॥

दभ्रम्। चित्। हि। त्वाऽवतः। कृतम्। शृण्वे। अधि। क्षमि। जिगातु। इन्द्र। ते। मनः॥ ३२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तवेदु ताः सुकीर्तयोऽसन्नुत प्रशस्तयः। यदिन्द्र मृळयासि नः॥ ३३॥

तव। इत्। ऊँ इति। ताः। सुऽकीर्तयः। असन्। उत। प्रऽशस्तयः। यत्। इन्द्र। मृळयासि। नः॥ ३३॥

मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु। वधीर्मा शूर भूरिषु॥ ३४॥

मा। नः। एकस्मिन्। आगसि। मा। द्वयोः। उत। त्रिषु। वधीः। मा। शूर। भूरिषु॥ ३४॥

बिभया हि त्वावत उग्रादभिप्रभङ्गिणः। दस्मादहमृतीषहः॥ ३५॥ [४८]

बिभय। हि। त्वाऽवतः। उग्रात्। अभिऽप्रभङ्गिनः। दस्मात्। अहम्। ऋतिऽसहः॥ ३५॥

मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो। आवृत्वद्भूतु ते मनः॥ ३६॥

मा। सख्युः। शूनम्। आ। विदे। मा। पुत्रस्य। प्रभुवसो इति प्रभुऽवसो।

आऽवृत्वत्। भूतु। ते। मनः॥ ३६॥

को नु मर्या अमिथितः सखा सखायमब्रवीत्। जहा को अस्मदीषते॥ ३७॥

कः। नु। मर्याः। अमिथितः। सखा। सखायम्। अब्रवीत्। जहा। कः। अस्मत्। ईषते॥ ३७॥

एवारे वृषभा सुतेऽसिन्वन्भूर्यावयः। श्वघ्नीव निवता चरन्॥ ३८॥

एवारे। वृषभ। सुते। असिन्वन्। भूरि। आवयः। श्वघ्नीऽइव। निऽवता। चरन्॥ ३८॥

आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा। यदीं ब्रह्मभ्य इद्ददः॥ ३९॥

आ। ते। एता। वचःऽयुजा। हरी इति। गृभ्णे। सुमत्ऽरथा। यत्। ईम्। ब्रह्मऽभ्यः। इत्। ददः॥ ३९॥

भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः। वसु स्पार्हं तदा भर॥ ४०॥

भिन्धि। विश्वाः। अप। द्विषः। परि। बाधः। जहि। मृधः। वसु। स्पार्हम्। तत्। आ। भर॥ ४०॥

यद्वीळाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम्। वसु स्पार्हं तदा भर॥ ४१॥

यत्। वीळौ। इन्द्र। यत्। स्थिरे। यत्। पर्शाने। पराऽभृतम्। वसु। स्पार्हम्। तत्। आ। भर॥ ४१॥

यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्हं तदा भर॥ ४२॥ [४९]

यस्य। ते। विश्वऽमानुषः। भूरेः। दत्तस्य। वेदति। वसु। स्पार्हम्। तत्। आ। भर॥ ४२॥

इत्याश्वलायन-संहितायां षष्ठाष्टके तृतीयोऽध्याय समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके चतुर्थोऽध्यायः ॥

[४६] [३३ वशोऽश्व्यः। इन्द्रः, २१-२४ कानीतस्य पृथुश्रवसो दानस्तुतिः; २५-२८, ३२ वायुः। गायत्री, १ पादनिचृत्; ५ ककुप्, ७ बृहती, ८ अनुष्टुप्, ९ सतोबृहती, ११-१२ विपरीतोत्तरः प्रगाथः = (बृहती, विपरीता), १३ द्विपदा जगती, १४ बृहती पिपीलिकमध्या, १५ ककुम्न्यंकुशिरा, १६ विराट्, १७ जगती, १८ उपरिष्टाद् बृहती, १९ बृहती, २० विषमपदा बृहती; २१-२४ पङ्क्तिः; १२ संस्तारपङ्क्तिः, २५-२८ प्रगाथः= (बृहती, सतोबृहती), ३० द्विपदा विराट्, ३१ उष्णिक्, ३२ पङ्क्तिः।]

त्वाव॑तः पुरूवसो व॒यमि॑न्द्र प्रणेतः। स्मसि॑ स्थातर्हरीणाम्॥ १॥

त्वाऽव॑तः। पु॒रु॒व॒सो॒ इति॑ पुरुऽवसो। व॒यम्। इ॒न्द्र॒। प्र॒ने॒त॒रिति॑ प्रऽनेतः। स्मसि॑। स्था॒त॒रः। ह॒रि॒णा॒म्॥ १॥

त्वां हि स॒त्यम॑द्रिवो वि॒द्म दा॒तार॑मि॒षाम्। वि॒द्म दा॒तार॑ं र॒यी॒णाम्

त्वाम्। हि। स॒त्यम्। अ॒द्रि॒ऽव॒ः। वि॒द्म। दा॒तार॑म्। इ॒षाम्। वि॒द्म। दा॒तार॑म्। र॒यी॒णाम्॥ २॥

आ यस्य॑ ते महि॒मान॒ं शत॑मूते शत॑क्रतो। गी॒र्भिर्गृ॒णन्ति॑ का॒रव॑ः॥ ३॥

आ। यस्य॑। ते॒। म॒हि॒मान॑म्। शत॑म्ऽऊते। शत॑क्रतो॒ इति॑ शत॑ऽक्रतो। गी॒ःऽभिः। गृ॒णन्ति॑। का॒रव॑ः॥ ३॥

सु॒नी॒थो घा॒ स मर्त्यो॒ यं म॒रुतो॒ यम॑र्य॒मा। मि॒त्रः पान्त्य॒द्रुह॑ः॥ ४॥

सु॒ऽनी॒थः। घ॒। सः। मर्त्य॑ः। यम्। म॒रुत॑ः। यम्। अ॒र्य॒मा। मि॒त्रः। पान्ति॑। अ॒द्रुह॑ः॥ ४॥

दधा॑नो॒ गोम॒दश्व॑वत्सुवीर्यमादि॒त्यजू॑त एधते। सदा॑ रा॒या पु॑रु॒स्पृहा॑॥ ५॥ [१]

दधा॑नः। गोऽम॑त्। अश्व॑ऽवत्। सु॒ऽवीर्य॑म्। आ॒दि॒त्य॑ऽजू॑तः। ए॒ध॒ते॒। सदा॑। रा॒या। पु॒रु॒ऽस्पृहा॑॥ ५॥

तमिन्द्र॒ं दान॑मीमहे शवसा॒नमभी॑र्वम्। ईशा॑नं रा॒य ईमहे॥ ६॥

तम्। इन्द्र॑म्। दान॑म्। ई॒म॒हे॒। श॒व॒सा॒नम्। अभी॑र्वम्। ईशा॑नम्। रा॒यः। ई॒म॒हे॒॥ ६॥

तस्मि॒न्हि सन्त्यू॒तयो॒ विश्वा॒ अभी॑रव॒ः सचा॑।

तमा व॑हन्तु सप्त॑यः पुरू॒वसु॑ं मदा॑य॒ हर॑यः सुतम्॥ ७॥

तस्मि॑न्। हि। सन्ति॑। ऊ॒तय॑ः। विश्वा॑ः। अभी॑रवः। सचा॑।

तम्। आ। व॒ह॒न्तु॒। सप्त॑यः। पु॒रु॒ऽवसु॑म्। मदा॑य। हर॑यः। सु॒तम्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः। य आददिः स्वर्नृभिर्यः पृतनासु दुष्टरः॥ ८॥

यः। ते। मदः। वरेण्यः। यः। इन्द्र। वृत्रहन्ऽतमः।

यः। आऽददिः। स्वः। नृऽभिः। यः। पृतनासु। दुस्तरः॥ ८॥

यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता।

स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे॥ ९॥

यः। दुस्तरः। विश्वऽवार। श्रवाय्यः। वाजेषु। अस्ति। तरुता।

सः। नः। शविष्ठ। सवना। आ। वसो इति। गहि। गमेम। गोऽमति। व्रजे॥ ९॥

गव्यो षु णो यथा पुराश्वयोत रथया। वरिवस्य महामह॥ १०॥ [२]

गव्यो इति। सु। नः। यथा। पुरा। अश्वऽया। उत। रथऽया। वरिवस्य। महाऽमह॥ १०॥

नहि ते शूर राधसोऽन्तं विन्दामि सत्रा।

दशस्य नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ॥ ११॥

नहि। ते। शूर। राधसः। अन्तम्। विन्दामि। सत्रा।

दशस्य। नः। मघऽवन्। नु। चित्। अद्रिऽवः। धियः। वाजेभिः। आविथ॥ ११॥

यः ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः।

तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः॥ १२॥

यः। ऋष्वः। श्रवयत्ऽसखा। विश्वा। इत्। सः। वेद। जनिम। पुरुऽस्तुतः।

तम्। विश्वे। मानुषा। युगा। इन्द्रम्। हवन्ते। तविषम्। यतऽस्रुचः॥ १२॥

स नो वाजेष्वविता पुरूवसुः पुरःस्थाता मघवा वृत्रहा भुवत्॥ १३॥

सः। नः। वाजेषु। अविता। पुरुऽवसुः। पुरःऽस्थाता। मघऽवा। वृत्रऽहा। भुवत्॥ १३॥

अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम्।

इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा॥ १४॥

अभि। वः। वीरम्। अन्धसः। मदेषु। गाय। गिरा। महा। विऽचेतसम्।

इन्द्रम्। नाम। श्रुत्यम्। शाकिनम्। वचः। यथा॥ १४॥

ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनम्। नूनमथ॥ १५॥ [३]

ददिः। रेक्णः। तन्वे। ददिः। वसु। ददिः। वाजेषु। पुरुऽहूत। वाजिनम्। नूनम्। अथ॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वैषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः। कृपयतो नूनमत्यथ॥ १६॥

विश्वैषाम्। इरज्यन्तम्। वसूनाम्। ससह्वांसम्। चित्। अस्य। वर्पसः।

कृप॒ऽयतः। नूनम्। अति। अथ॥ १६॥

महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये।

यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा॥ १७॥

महः। सु। वः। अरम्। इषे। स्तवामहे। मीळ्हुषे। अरम्ऽगमाय। जग्मये।

यज्ञेभिः। गीःऽभिः। विश्वऽमनुषाम्। मरुताम्। इयक्षसि। गाये। त्वा। नमसा। गिरा॥ १७॥

ये पातयन्ते अज्मभिर्गिरीणां स्नुभिरेषाम्। यज्ञं महिष्वणीनां सुम्नं तुविष्वणीनां प्राध्वरे॥ १८॥

ये। पातयन्ते। अज्मऽभिः। गिरीणाम्। स्नुऽभिः। एषाम्।

यज्ञम्। महिऽस्वनीनाम्। सुम्नम्। तुविऽस्वनीनाम्। प्र। अध्वरे॥ १८॥

प्रभङ्गं दुर्मतीनामिन्द्र शविष्ठा भर। रयिमस्मभ्यं युज्यं चोदयन्ते ज्येष्ठं चोदयन्मते॥ १९॥

प्रऽभङ्गम्। दुःऽमतीनाम्। इन्द्र। शविष्ठ। आ। भर।

रयिम्। अस्मभ्यम्। युज्यम्। चोदयत्ऽमते। ज्येष्ठम्। चोदयत्ऽमते॥ १९॥

सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत।

प्रासहा सम्राट् सहुरिं सहन्तं भुज्युं वाजेषु पूर्व्यम्॥ २०॥ [४]

सनितरिति। सुऽसनितः। उग्र। चित्र। चेतिष्ठ। सूनृत।

प्रऽसहा। सम्ऽराट्। सहुरिम्। सहन्तम्। भुज्युम्। वाजेषु। पूर्व्यम्॥ २०॥

आ स एतु य ईवदाँ अदेवः पूर्तमाददे।

यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीतेऽस्या व्युष्याददे॥ २१॥

आ। सः। एतु। यः। ईवत्। आ। अदेवः। पूर्तम्। आऽददे।

यथा। चित्। वशः। अश्व्यः। पृथुऽश्रवसि। कानीते। अस्याः। विऽउषि। आऽददे॥ २१॥

षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्रानां विंशतिं शता।

दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा॥ २२॥

षष्टिम्। सहस्रा। अश्व्यस्य। अयुता। असनम्। उष्ट्रानाम्। विंशतिम्। शता।

दश। श्यावीनाम्। शता। दश। त्रिऽअरुषीणाम्। दश। गवाम्। सहस्रा॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दश श्यावा ऋधद्रयो वीतवारास आशवः। मथ्रा नेमिं नि वावृतुः॥ २३॥

दश। श्यावाः। ऋधत्ऽरयः। वीतऽवारासः। आशवः। मथ्राः। नेमिम्। नि। ववृतुः॥ २३॥

दानासः पृथुश्रवसः कानीतस्य सुराधसः।

रथं हिरण्ययं ददन्मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः॥ २४॥

दानासः। पृथुऽश्रवसः। कानीतस्य। सुऽराधसः।

रथम्। हिरण्ययम्। ददत्। मंहिष्ठः। सूरिः। अभूत्। वर्षिष्ठम्। अकृत। श्रवः॥ २४॥

आ नो वायो महे तने याहि मखाय पाजसे।

वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने॥ २५॥ [५]

आ। नः। वायो इति। महे। तने। याहि। मखाय। पाजसे।

वयम्। हि। ते। चकृम। भूरि। दावने। सद्यः। चित्। महि। दावने॥ २५॥

यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्ततीनाम्।

एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः॥ २६॥

यः। अश्वेभिः। वहते। वस्ते। उस्राः। त्रिः। सप्त। सप्ततीनाम्।

एभिः। सोमेभिः। सोमसुत्ऽभिः। सोमऽपाः। दानाय। शुक्रपूतऽपाः॥ २६॥

यो म इमं चिदु त्मनामन्दच्चित्रं दावने। अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः॥ २७॥

यः। मे। इमम्। चित्। ऊँ इति। त्मना। अमन्दत्। चित्रम्। दावने।

अरट्वे। अक्षे। नहुषे। सुऽकृत्वनि। सुकृत्ऽतराय। सुऽक्रतुः॥ २७॥

उचथ्ये३ वपुषि यः स्वराळुत वायो घृतस्नाः।

अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत्॥ २८॥

उचथ्ये। वपुषि। यः। स्वऽराट्। उत। वायो इति। घृतऽस्नाः।

अश्वऽइषितम्। रजःऽइषितम्। शुनाऽइषितम्। प्र। अज्म। तत्। इदम्। नु। तत्॥ २८॥

अध प्रियमिषिराय षष्टिं सहस्रासनम्। अश्वानामिन्न वृष्णाम्॥ २९॥

अध। प्रियम्। इषिराय। षष्टिम्। सहस्रा। असनम्। अश्वानाम्। इत्। न। वृष्णाम्॥ २९॥

गावो न यूथमुप यन्ति वध्रय उप मा यन्ति वध्रयः॥ ३०॥

गावः। न। यूथम्। उप। यन्ति। वध्रयः। उप। मा। आ। यन्ति। वध्रयः॥ ३०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत्। अध शिवत्नेषु विंशतिं शता॥ ३१॥

अध। यत्। चारथे। गणे। शतम्। उष्ट्रान्। अचिक्रदत्। अध। शिवत्नेषु। विंशतिम्। शता॥ ३१॥

शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे।

ते ते वायविमे जना मदन्तीन्द्रगोपा मदन्ति देवगोपाः॥ ३२॥

शतम्। दासे। बल्बूथे। विप्रः। तरुक्षे। आ। ददे।

ते। ते। वायो इति। इमे। जनाः। मदन्ति। इन्द्र॰गोपाः। मदन्ति। देव॰गोपाः॥ ३२॥

अध स्या योषणा मही प्रतीची वशमश्व्यम्। अधिरुक्मा वि नीयते॥ ३३॥ [६]

अध। स्या। योषणा। मही। प्रतीची। वशम्। अश्व्यम्। अधि॰रुक्मा। वि। नीयते॥ ३३॥

[४७] [१८ त्रित आप्त्यः। आदित्याः, १४-१८ आदित्योषसः (दुःस्वप्नघ्नं)। महापङ्क्ति)।]

महि वो महतामवो वरुण मित्र दाशुषे।

यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः॥ १॥

महि। वः। महताम्। अवः। वरुण। मित्र। दाशुषे॥ यम्। आदित्याः। अभि। द्रुहः।

रक्षथ। न। ईम्। अघम्। नशत्। अनेहसः। वः। ऊतयः। सु॰ऊतयः। वः। ऊतयः॥ १॥

विदा देवा अघानामादित्यासो अपाकृतिम्।

पक्षा वयो यथोपरि व्य१स्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः॥ २॥

विद। देवाः। अघानाम्। आदित्यासः। अप॰आकृतिम्॥ पक्षा। वयः। यथा। उपरि।

वि। अस्मे इति। शर्म। यच्छत। अनेहसः। वः। ऊतयः। सु॰ऊतयः। वः। ऊतयः॥ २॥

व्य१स्मे अधि शर्म तत्पक्षा वयो न यन्तन।

विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः॥ ३॥

वि। अस्मे इति। अधि। शर्म। तत्। पक्षा। वयः। न। यन्तन॥ विश्वानि। विश्व॰वेदसः।

वरूथ्या। मनामहे। अनेहसः। वः। ऊतयः। सु॰ऊतयः। वः। ऊतयः॥ ३॥

यस्मा अरासत क्षयं जीवातुं च प्रचेतसः।

मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः॥ ४॥

यस्मै। अरासत। क्षयम्। जीवातुम्। च। प्र॰चेतसः॥ मनोः। विश्वस्य। घ। इत्। इमे।

आदित्याः। रायः। ईशते। अनेहसः। वः। ऊतयः। सु॰ऊतयः। वः। ऊतयः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा।

स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥ ५॥ [७]

परि। नः। वृणजन्। अघा। दुःऽगानि। रथ्यः। यथा॥ स्याम। इत्। इन्द्रस्य। शर्मणि।

आदित्यानाम्। उत। अवसि। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ५॥

परिह्वृतेदना जनो युष्मादत्तस्य वायति।

देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः॥ ६॥

परिऽह्वृता। इत्। अना। जनः। युष्माऽदत्तस्य। वायति॥ देवाः। अदभ्रम्। आश। वः।

यम्। आदित्याः। अहेतन। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ६॥

न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु।

यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुऊतयो व ऊतयः॥ ७॥

न। तम्। तिग्मम्। चन। त्यजः। न। द्रासत्। अभि। तम्। गुरु॥ यस्मै। ऊँ इति। शर्म। सऽप्रथः।

आदित्यासः। अराध्वम्। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ७॥

युष्मे देवा अपि ष्मसि युध्यन्तइव वर्मसु।

यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः॥ ८॥

युष्मे इति। देवाः। अपि। स्मसि। युध्यन्तःऽइव। वर्मऽसु॥ यूयम्। महः। नः। एनसः।

यूयम्। अर्भात्। उरुष्यत। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ८॥

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु।

माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः॥ ९॥

अदितिः। नः। उरुष्यतु। अदितिः। शर्म। यच्छतु॥ माता। मित्रस्य। रेवतः।

अर्यम्णः। वरुणस्य। च। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ९॥

यद्देवाः शर्म शरणं यद्भद्रं यदनातुरम्।

त्रिधातु यद्वरूथ्यं१ तदस्मासु वि यन्तनानेहसो व ऊतयः सुऊतयो व ऊतयः॥ १०॥ [८]

यत्। देवाः। शर्म। शरणम्। यत्। भद्रम्। यत्। अनातुरम्॥ त्रिऽधातु। यत्। वरूथ्यम्।

तत्। अस्मासु। वि। यन्तन। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १०॥

आदित्या अव हि ख्यताधि कूलादिव स्पशः।

सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुऊतयो व ऊतयः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आदित्याः। अव। हि। ख्यत। अधि। कूलात्ऽइव। स्पशः॥ सुऽतीर्थम्। अर्वतः। यथा। अनु। नः। नेषथ। सुऽगम्। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ११॥

नेह भद्रं रक्षस्विने नावयै नोपया उत।
गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः॥ १२॥

न। इह। भद्रम्। रक्षस्विने। न। अवऽयै। न। उपऽयै। उत॥ गवे। च। भद्रम्। धेनवे। वीराय। च। श्रवस्यते। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १२॥

यदाविर्यदपीच्यं१ देवासो अस्ति दुष्कृतम्।
त्रिते तद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुऊतयो व ऊतयः॥ १३॥

यत्। आविः। यत्। अपीच्यम्। देवासः। अस्ति। दुःऽकृतम्॥ त्रिते। तत्। विश्वम्। आप्त्ये। आरे। अस्मत्। दधातन। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १३॥

यच्च गोषु दुष्ष्वप्न्यं यच्चास्मे दुहितर्दिवः।
त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः॥ १४॥

यत्। च। गोषु। दुःऽस्वप्न्यम्। यत्। च। अस्मे इति। दुहितः। दिवः॥ त्रिताय। तत्। विभाऽवरि। आप्त्याय। परा। वह। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १४॥

निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः।
त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥ १५॥ [९]

निष्कम्। वा। घ। कृणवते। स्रजम्। वा। दुहितः। दिवः॥ त्रिते। दुःऽस्वप्न्यम्। सर्वम्। आप्त्ये। परि। दद्मसि। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १५॥

तदन्नाय तदपसे तं भागमुपसेदुषे।
त्रिताय च द्विताय चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः॥ १६॥

तत्ऽअन्नाय। तत्ऽअपसे। तम्। भागम्। उपऽसेदुषे॥ त्रिताय। च। द्विताय। च। उषः। दुःऽस्वप्न्यम्। वह। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १६॥

यथा कलां यथा शफं यथ ऋणं संनयामसि।
एवा दुष्ष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥ १७॥

यथा। कलाम्। यथा। शफम्। यथा। ऋणम्। सम्ऽनयामसि॥ एव। दुःऽस्वप्न्यम्। सर्वम्। आप्त्ये। सम्। नयामसि। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अजैष्माद्यासनाम चाभूमानागसो वयम्।

उषो यस्माद्दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः॥ १८॥ [१०]

अजैष्म। अद्य। असनाम। च। अभूम। अनागसः। वयम्॥ उषः। यस्मात्। दुःऽस्वप्न्यात्।

अभैष्म। अप। तत्। उच्छतु। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १८॥

[४८] [१५ प्रगाथो घौरः काण्वः। सोमः। त्रिष्टुप्, ५ जगती।]

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य।

विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति॥ १॥

स्वादोः। अभक्षि। वयसः। सुऽमेधाः। सुऽआध्यः। वरिवोवित्ऽतरस्य।

विश्वे। यम्। देवाः। उत। मर्त्यासः। मधु। ब्रुवन्तः। अभि। सम्ऽचरन्ति॥ १॥

अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य।

इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः॥ २॥

अन्तरिति। च। प्र। अगाः। अदितिः। भवासि। अवऽयाता। हरसः। दैव्यस्य।

इन्दो इति। इन्द्रस्य। सख्यम्। जुषाणः। श्रौष्टीऽइव। धुरम्। अनु। राये। ऋध्याः॥ २॥

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्।

किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य॥ ३॥

अपाम। सोमम्। अमृताः। अभूम। अगन्म। ज्योतिः। अविदाम। देवान्।

किम्। नूनम्। अस्मान्। कृणवत्। अरातिः। किम्। ऊँ इति। धूर्तिः। अमृत। मर्त्यस्य॥ ३॥

शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः।

सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः॥ ४॥

शम्। नः। भव। हृदे। आ। पीतः। इन्दो इति। पिताऽइव। सोम। सूनवे। सुऽशेवः।

सखाऽइव। सख्ये। उरुऽशंस। धीरः। प्र। नः। आयुः। जीवसे। सोम। तारीः॥ ४॥

इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु।

ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः॥ ५॥ [११]

इमे। मा। पीताः। यशसः। उरुष्यवः। रथम्। न। गावः। सम्। अनाह। पर्वऽसु।

ते। मा। रक्षन्तु। विऽस्रसः। चरित्रात्। उत। मा। स्रामात्। यवयन्तु। इन्दवः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः।
अथा हि ते मद आ सोम मन्ये रेवाँइव प्र चरा पुष्टिमच्छ॥ ६॥
अग्निम्। न। मा। मथितम्। सम्। दिदीपः। प्र। चक्षय। कृणुहि। वस्यसः। नः।
अथ। हि। ते। मदे। आ। सोम। मन्ये। रेवान्ऽइव। प्र। चर। पुष्टिम्। अच्छ॥ ६॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः।
सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि॥ ७॥
इषिरेण। ते। मनसा। सुतस्य। भक्षीमहि। पित्र्यस्यऽइव। रायः।
सोम। राजन्। प्र। नः। आयूंषि। तारीः। अहानिऽइव। सूर्यः। वासराणि॥ ७॥

सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्या३स्तस्य विद्धि।
अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः॥ ८॥
सोम। राजन्। मृळय। नः। स्वस्ति। तव। स्मसि। व्रत्याः। तस्य। विद्धि।
अलर्ति। दक्षः। उत। मन्युः। इन्दो इति। मा। नः। अर्यः। अनुऽकामम्। परा। दाः॥ ८॥

त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः।
यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः॥ ९॥
त्वम्। हि। नः। तन्वः। सोम। गोपाः। गात्रेऽगात्रे। निऽससत्थ। नृऽचक्षाः।
यत्। ते। वयम्। प्रऽमिनाम। व्रतानि। सः। नः। मृळ। सुऽसखा। देव। वस्यः॥ ९॥

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः॥ १०॥ [१२]
ऋदूदरेण। सख्या। सचेय। यः। मा। न। रिष्येत्। हरिऽअश्व। पीतः।
अयम्। यः। सोमः। नि। अधायि। अस्मे इति। तस्मै। इन्द्रम्। प्रऽतिरम्। एमि। आयुः॥ १०॥

अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः।
आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः॥ ११॥
अप। त्याः। अस्थुः। अनिराः। अमीवाः। निः। अत्रसन्। तमिषीचीः। अभैषुः।
आ। सोमः। अस्मान्। अरुहत्। विऽहायाः। अगन्म। यत्र। प्रऽतिरन्ते। आयुः॥ ११॥

यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश।
तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। नः। इन्दुः। पितरः। हृत्ऽसु। पीतः। अमर्त्यः। मर्त्यान्। आऽविवेश।
तस्मै। सोमाय। हविषा। विधेम। मृळीके। अस्य। सुऽमतौ। स्याम॥ १२॥

त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम्॥ १३॥

त्वम्। सोम। पितृऽभिः। सम्ऽविदानः। अनु। द्यावापृथिवी इति। आ। ततन्थ।
तस्मै। ते। इन्दो इति। हविषा। विधेम। वयम्। स्याम। पतयः। रयीणाम्॥ १३॥

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम॥ १४॥

त्रातारः। देवाः। अधि। वोचत। नः। मा। नः। निऽद्रा। ईशत। मा। उत। जल्पिः।
वयम्। सोमस्य। विश्वह। प्रियासः। सुऽवीरासः। विदथम्। आ। वदेम॥ १४॥

त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात्॥ १५॥ [१३] (६)

त्वम्। नः। सोम। विश्वतः। वयःऽधाः। त्वम्। स्वःऽवित्। आ। विश। नृऽचक्षाः।
त्वम्। नः। इन्दो इति। ऊतिऽभिः। सऽजोषाः। पाहि। पश्चातात्। उत। वा। पुरस्तात्॥ १५॥

[अथ बालखिल्यम्]

[४९(१)] [१० प्रस्कण्वः काण्वः। इन्द्रः। प्रगाथः = अयुजो बृहत्यः, युजः सतोबृहत्यः)]

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे। यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति॥ १॥

अभि। प्र। वः। सुऽराधसम्। इन्द्रम्। अर्च। यथा। विदे।
यः। जरितृऽभ्यः। मघऽवा। पुरुऽवसुः। सहस्रेणऽइव। शिक्षति॥ १॥

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः॥ २॥

शतानीकाऽइव। प्र। जिगाति। धृष्णुऽया। हन्ति। वृत्राणि। दाशुषे।
गिरेःऽइव। प्र। रसाः। अस्य। पिन्विरे। दत्राणि। पुरुऽभोजसः॥ २॥

आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः।
आपो न वज्रिन्नन्वोक्यं१ सरः पृणन्ति शूर राधसे॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ । त्वा॒ । सु॒तास॑ः । इन्द॑वः । मदा॑ः । ये । इ॒न्द्र॒ । गि॒र्व॒णः॒ ।
आप॑ः । न । व॒ज्रि॒न् । अनु॑ । ओ॒क्य॑म् । सर॑ः । पृ॒णन्ति॑ । शू॒र॒ । राध॑से ॥ ३ ॥

अ॒ने॒हस॑ं प्र॒तर॑णं वि॒वक्ष॑णं॒ मध्व॒ः स्वादि॑ष्ठमीं पिब ।
आ यथा॑ मन्दसा॒नः कि॒रासि॑ नः॒ प्र क्षु॒द्रेव॒ त्मना॑ धृ॒षत् ॥ ४ ॥

अ॒ने॒हस॑म् । प्र॒ऽतर॑णम् । वि॒वक्ष॑णम् । मध्व॑ः । स्वादि॑ष्ठम् । ई॒म् । पि॒ब॒ ।
आ । यथा॑ । म॒न्द॒सा॒नः । कि॒रासि॑ । न॒ः । प्र । क्षु॒द्राऽइ॑व । त्मना॑ । धृ॒षत् ॥ ४ ॥

आ न॒ः स्तोम॒मुप॑ द्र॒वद्धि॒या॒नो अश्वो॒ न सोतृ॑भिः ।
यं ते॑ स्वधावन्त्स्व॒दय॑न्ति धे॒नव॒ इन्द्र॒ कण्वे॑षु रा॒तय॑ः ॥ ५ ॥ [१४]

आ । न॒ः । स्तोम॑म् । उप॑ । द्र॒वत् । हि॒या॒नः । अश्व॑ः । न । सोतृ॑ऽभिः ।
यम् । ते॒ । स्व॒धा॒ऽव॒न् । स्व॒दय॑न्ति । धे॒नव॑ः । इन्द्र॑ । कण्वे॑षु । रा॒तय॑ः ॥ ५ ॥

उ॒ग्रं न वी॒रं नम॒सोप॑ सेदिम॒ विभू॑ति॒मक्षि॑तावसुम् ।
उ॒द्रीव॑ वज्रिन्नव॒तो न सि॑ञ्च॒ते क्षर॑न्तीन्द्र धी॒तय॑ः ॥ ६ ॥

उ॒ग्रम् । न । वी॒रम् । नम॑सा । उप॑ । से॒दि॒म॒ । वि॑ऽभू॑तिम् । अक्षि॑तऽवसुम् ।
उ॒द्रीऽइ॑व । व॒ज्रि॒न् । अ॒व॒तः । न । सि॒ञ्च॒ते । क्षर॑न्ति । इ॒न्द्र॒ । धी॒तय॑ः ॥ ६ ॥

यद्ध॑ नू॒नं यद्वा॑ य॒ज्ञे यद्वा॑ पृथि॒व्यामधि॑ । अतो॑ नो य॒ज्ञमा॒शुभि॑र्महेमत उग्र उ॒ग्रेभि॒रा ग॑हि ॥ ७ ॥

यत् । ह॒ । नू॒नम् । यत् । वा॒ । य॒ज्ञे । यत् । वा॒ । पृ॒थि॒व्याम् । अधि॑ ।
अत॑ः । न॒ः । य॒ज्ञम् । आ॒शु॒ऽभि॑ः । म॒हे॒ऽम॒ते॒ । उ॒ग्रः॒ । उ॒ग्रेभि॑ः । आ । ग॒हि॒ ॥ ७ ॥

अ॒जि॒रासो॒ हर॑यो॒ ये त॑ आ॒शवो॒ वाता॑इव प्रस॒क्षिण॑ः ।
येभि॒रप॑त्यं॒ मनु॑षः प॒रीय॑से॒ येभि॒र्विश्व॑ं स्व॑र्दृ॒शे ॥ ८ ॥

अ॒जि॒रास॑ः । हर॑यः । ये । ते॒ । आ॒शव॑ः । वाता॑ःऽइव । प्र॒ऽस॒क्षिण॑ः ।
येभि॑ः । अप॑त्यम् । मनु॑षः । प॒रि॒ऽईय॑से । येभि॑ः । विश्व॑म् । स्व॑ः । दृ॒शे ॥ ८ ॥

ए॒तावत॑स्त ईमह॒ इन्द्र॑ सु॒म्नस्य॒ गोम॑तः ।
यथा॒ प्रावो॑ मघव॒न्मेध्या॑तिथिं॒ यथा॒ नीपा॑तिथिं॒ धने॑ ॥ ९ ॥

ए॒ताव॑तः । ते॒ । ई॒म॒हे॒ । इन्द्र॑ । सु॒म्नस्य॑ । गोऽम॑तः ।
यथा॑ । प्र । आव॑ः । म॒घ॒ऽव॒न् । मेध्य॑ऽअतिथिम् । यथा॑ । नीप॑ऽअतिथिम् । धने॑ ॥ ९ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा कण्वे मघवन्त्रसदस्यवि यथा पक्थे दशव्रजे।
यथा गोशर्ये असनोर्ऋजिश्वनीन्द्र गोमद्धिरण्यवत्॥ १०॥ [१५]
यथा। कण्वे। मघ॰वन्। त्रसदस्यवि। यथा। पक्थे। दश॰व्रजे।
यथा। गो॰शर्ये। असनोः। ऋजिश्वनि। इन्द्र। गो॰मत्। हिरण्य॰वत्॥ १०॥

[५०(२)] [१० पुष्टिगुः काण्वः। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्य)]

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये। यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते॥ १॥
प्र। सु। श्रुतम्। सु॰राधसम्। अर्च। शक्रम्। अभिष्टये।
यः। सुन्वते। स्तुवते। काम्यम्। वसु। सहस्रेणऽइव। मंहते॥ १॥
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः॥ २॥
शत॰अनीकाः। हेतयः। अस्य। दुस्तराः। इन्द्रस्य। सम्॰इषः। महीः।
गिरिः। न। भुज्मा। मघवत्॰सु। पिन्वते। यत्। ईम्। सुताः। अमन्दिषुः॥ २॥
यदीं सुतास इन्दवोऽभि प्रियममन्दिषुः।
आपो न धायि सवनं म आ वसो दुघाइवोप दाशुषे॥ ३॥
यत्। ईम्। सुतासः। इन्दवः। अभि। प्रियम्। अमन्दिषुः।
आपः। न। धायि। सवनम्। मे। आ। वसो इति। दुघाःऽइव। उप। दाशुषे॥ ३॥
अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे॥ ४॥
अनेहसम्। वः। हवमानम्। ऊतये। मध्वः। क्षरन्ति। धीतयः।
आ। त्वा। वसो इति। हवमानासः। इन्दवः। उप। स्तोत्रेषु। दधिरे॥ ४॥
आ नः सोमे स्वध्वर इयानो अत्यो न तोशते।
यं ते स्वदावन्त्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम्॥ ५॥ [१६]
आ। नः। सोमे। सु॰अध्वरे। इयानः। अत्यः। न। तोशते।
यम्। ते। स्वदा॰वन्। स्वदन्ति। गूर्तयः। पौरे। छन्दयसे। हवम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः।

उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे॥ ६॥

प्र। वीरम्। उग्रम्। विविचिम्। धनऽस्पृतम्। विऽभूतिम्। राधसः। महः।

उद्रीऽइव। वज्रिन्। अवतः। वसुऽत्वना। सदा। पीपेथ। दाशुषे॥ ६॥

यद्ध नूनं परावति यद्वा पृथिव्यां दिवि। युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि॥ ७॥

यत्। ह। नूनम्। पराऽवति। यत्। वा। पृथिव्याम्। दिवि।

युजानः। इन्द्र। हरिऽभिः। महेऽमते। ऋष्वः। ऋष्वेभिः। आ। गहि॥ ७॥

रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति।

येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे॥ ८॥

रथिरासः। हरयः। ये। ते। अस्रिधः। ओजः। वातस्य। पिप्रति।

येभिः। नि। दस्युम्। मनुषः। निऽघोषयः। येभिः। स्वर्१रिति स्वः। परिऽईयसे॥ ८॥

एतावतस्ते वसो विद्याम शूर नव्यसः। यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे॥ ९॥

एतावतः। ते। वसो इति। विद्याम। शूर। नव्यसः।

यथा। प्र। आवः। एतशम्। कृत्व्ये। धने। यथा। वशम्। दशऽव्रजे॥ ९॥

यथा कण्वे मघवन्मेधे अध्वरे दीर्घनीथे दमूनसि।

यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम्॥ १०॥ [१७]

यथा। कण्वे। मघऽवन्। मेधे। अध्वरे। दीर्घऽनीथे। दमूनसि।

यथा। गोऽशर्ये। असिसासः। अद्रिऽवः। मयि। गोत्रम्। हरिऽश्रियम्॥ १०॥

[५१(३)] [१०पुष्टिगुः काण्वः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम्।

नीपातिथौ मघवन्मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा॥ १॥

यथा। मनौ। साम्ऽवरणौ। सोमम्। इन्द्र। अपिबः। सुतम्।

नीपऽअतिथौ। मघऽवन्। मेध्यऽअतिथौ। पुष्टिऽगौ। श्रुष्टिऽगौ। सचा॥ १॥

पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम्।

सहस्राण्यसिषासद्गवामृषिस्त्वोतो दस्यवे वृकः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पार्षद्वाणः। प्रस्कण्वम्। सम्। असादयत्। शयानम्। जिव्रिम्। उद्धितम्।
सहस्राणि। असिसासत्। गवाम्। ऋषिः। त्वाऽऊतः। दस्यवे। वृकः॥ २॥

य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः।
इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे॥ ३॥

यः। उक्थेभिः। न। विन्धते। चिकित्। यः। ऋषिऽचोदनः।
इन्द्रम्। तम्। अच्छ। वद। नव्यस्या। मती। अरिष्यन्तम्। न। भोजसे॥ ३॥

यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे।
स त्वि१मा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम्॥ ४॥

यस्मै। अर्कम्। सप्तऽशीर्षाणम्। आनृचुः। त्रिऽधातुम्। उत्ऽतमे। पदे।
सः। तु। इमा। विश्वा। भुवनानि। चिक्रदत्। आत्। इत्। जनिष्ट। पौंस्यम्॥ ४॥

यो नो दाता वसूनामिन्द्रं तं हूमहे वयम्।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे॥ ५॥ [१८]

यः। नः। दाता। वसूनाम्। इन्द्रम्। तम्। हूमहे। वयम्।
विद्म। हि। अस्य। सुऽमतिम्। नवीयसीम्। गमेम। गोऽमति। व्रजे॥ ५॥

यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे॥ ६॥

यस्मै। त्वम्। वसो इति। दानाय। शिक्षसि। सः। रायः। पोषम्। अश्नुते।
तम्। त्वा। वयम्। मघऽवन्। इन्द्र। गिर्वणः। सुतऽवन्तः। हवामहे॥ ६॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते॥ ७॥

कदा। चन। स्तरीः। असि। न। इन्द्र। सश्चसि। दाशुषे।
उपऽउप। इत्। नु। मघऽवन्। भूयः। इत्। नु। ते। दानम्। देवस्य। पृच्यते॥ ७॥

प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन्।
यदेदस्तम्भीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः॥ ८॥

प्र। यः। ननक्षे। अभि। ओजसा। क्रिविम्। वधैः। शुष्णम्। निऽघोषयन्।
यदा। इत्। अस्तम्भीत्। प्रथयन्। अमूम्। दिवम्। आत्। इत्। जनिष्ट। पार्थिवः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः।

तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः॥ ९॥

यस्य। अयम्। विश्वः। आर्यः। दासः। शेवधिऽपाः। अरिः।

तिरः। चित्। अर्ये। रुशमे। पवीरवि। तुभ्य। इत्। सः। अज्यते। रयिः॥ ९॥

तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः।

अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः॥ १०॥ [१९]

तुरण्यवः। मधुऽमन्तम्। घृतऽश्चुतम्। विप्रासः। अर्कम्। आनृचुः।

अस्मे इति। रयिः। पप्रथे। वृष्ण्यम्। शवः। अस्मे इति। सुवानासः। इन्दवः॥ १०॥

[५२(४)] [१० आयुः काण्वः। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)॥]

यथा मनौ विवस्वति सोमं शक्रापिबः सुतम्।

यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा॥ १॥

यथा। मनौ। विवस्वति। सोमम्। शक्र। अपिबः। सुतम्।

यथा। त्रिते। छन्दः। इन्द्र। जुजोषसि। आयौ। मादयसे। सचा॥ १॥

पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः।

यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि॥ २॥

पृषध्रे। मेध्ये। मातरिश्वनि। इन्द्र। सुवाने। अमन्दथाः।

यथा। सोमम्। दशऽशिप्रे। दशऽओण्ये। स्यूमऽरश्मौ। ऋजूनसि॥ २॥

य उक्था केवला दधे यः सोमं धृषितापिबत्।

यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः॥ ३॥

यः। उक्था। केवला। दधे। यः। सोमम्। धृषिता। अपिबत्।

यस्मै। विष्णुः। त्रीणि। पदा। विऽचक्रमे। उप। मित्रस्य। धर्मऽभिः॥ ३॥

यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो।

तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः॥ ४॥

यस्य। त्वम्। इन्द्र। स्तोमेषु। चाकनः। वाजे। वाजिन्। शतक्रतो इति शतऽक्रतो।

तम्। त्वा। वयम्। सुदुघाम्ऽइव। गोऽदुहः। जुहूमसि। श्रवस्यवः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो नो दाता स नः पिता महाँ उग्र ईशानकृत्।

अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नः ॥ ५ ॥ [२०]

यः। नः। दाता। सः। नः। पिता। महान्। उग्रः। ईशान॑ऽकृत्।

अयामन्। उग्रः। मघऽवा। पुरुऽवसुः। गोः। अश्वस्य। प्र। दातु। नः ॥ ५ ॥

यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति।

वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥ ६ ॥

यस्मै। त्वम्। वसो इति। दानाय। मंहसे। सः। रायः। पोषम्। इन्वति।

वसुऽयवः। वसुऽपतिम्। शतऽक्रतुम्। स्तोमैः। इन्द्रम्। हवामहे ॥ ६ ॥

कदा चन प्र युच्छस्युभे नि पासि जन्मनी। तुरीयादित्य हवनं त इन्द्रियमा तस्थावमृतं दिवि ॥ ७ ॥

कदा। चन। प्र। युच्छसि। उभे इति। नि। पासि। जन्मनी इति।

तुरीय। आदित्य। हवनम्। ते। इन्द्रियम्। आ। तस्थौ। अमृतम्। दिवि ॥ ७ ॥

यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे।

अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ॥ ८ ॥

यस्मै। त्वम्। मघऽवन्। इन्द्र। गिर्वणः। शिक्षो इति। शिक्षसि। दाशुषे।

अस्माकम्। गिरः। उत। सुऽस्तुतिम्। वसो इति। कण्वऽवत्। शृणुधि। हवम् ॥ ८ ॥

अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत। पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ ९ ॥

अस्तावि। मन्म। पूर्व्यम्। ब्रह्म। इन्द्राय। वोचत।

पूर्वीः। ऋतस्य। बृहतीः। अनूषत। स्तोतुः। मेधाः। असृक्षत ॥ ९ ॥

समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम्।

सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥ १० ॥ [२१]

सम्। इन्द्रः। रायः। बृहतीः। अधूनुत। सम्। क्षोणी इति। सम्। ऊँ इति। सूर्यम्।

सम्। शुक्रासः। शुचयः। सम्। गोऽआशिरः। सोमाः। इन्द्रम्। अमन्दिषुः ॥ १० ॥

[५३(५)] [८ मेध्यः काण्वः। इन्द्रः। प्रगाथः = (अजुयो बृहत्यः युजः सतोबृहत्यः)।]

उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम्। पूर्भित्तमं मघवन्निन्द्र गोविदमीशानं राय ईमहे ॥ १ ॥

उपऽमम्। त्वा। मघोनाम्। ज्येष्ठम्। च। वृषभाणाम्।

पूर्भित्ऽतमम्। मघऽवन्। इन्द्र। गोऽविदम्। ईशानम्। रायः। ईमहे ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे।

तं त्वां वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे॥ २॥

यः। आयुम्। कुत्सम्। अतिथिऽग्वम्। अर्दयः। ववृधानः। दिवेऽदिवे।

तम्। त्वा। वयम्। हरिऽअश्वम्। शतऽक्रतुम्। वाजऽयन्तः। हवामहे॥ २॥

आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः। ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः॥ ३॥

आ। नः। विश्वेषाम्। रसम्। मध्वः। सिञ्चन्तु। अद्रयः।

ये। पराऽवति। सुन्विरे। जनेषु। आ। ये। अर्वाऽवति। इन्दवः॥ ३॥

विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु।

शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि॥ ४॥ [२२]

विश्वा। द्वेषांसि। जहि। च। अव। च। आ। कृधि। विश्वे। सन्वन्तु। आ। वसु।

शीष्टेषु। चित्। ते। मदिरासः। अंशवः। यत्र। सोमस्य। तृम्पसि॥ ४॥

इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः।

आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः॥ ५॥

इन्द्र। नेदीयः। आ। इत्। इहि। मितऽमेधाभिः। ऊतिऽभिः।

आ। शम्ऽतम। शम्ऽतमाभिः। अभिष्टिऽभिः। आ। सुऽआपे। स्वापिऽभिः॥ ५॥

आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम्।

प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक्॥ ६॥

आजिऽतुरम्। सत्ऽपतिम्। विश्वऽचर्षणिम्। कृधि। प्रऽजासु। आऽभगम्।

प्र। सु। तिर। शचीभिः। ये। ते। उक्थिनः। क्रतुम्। पुनते। आनुषक्॥ ६॥

यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते। वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे॥ ७॥

यः। ते। साधिष्ठः। अवसे। ते। स्याम। भरेषु। ते।

वयम्। होत्राभिः। उत। देवहूतिऽभिः। ससऽवांसः। मनामहे॥ ७॥

अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः।

त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम्॥ ८॥ [२३]

अहम्। हि। ते। हरिऽवः। ब्रह्म। वाजऽयुः। आजिम्। यामि। सदा। ऊतिऽभिः।

त्वाम्। इत्। एव। तम्। अमे। सम्। अश्वऽयुः। गव्युः। अग्रे। मथीनाम्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[५४(६)] [८ मातरिश्वा काण्वः। इन्द्रः, ३-४ विश्वे देवाः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

एतत्त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः।
ते स्तोभन्त ऊर्जमावन्घृतश्चुतं पौरासो नक्षन्धीतिभिः॥ १॥

एतत्। ते। इन्द्र। वीर्यम्। गीःऽभिः। गृणन्ति। कारवः।
ते। स्तोभन्तः। ऊर्जम्। आवन्। घृतऽश्चुतम्। पौरासः। नक्षन्। धीतिऽभिः॥ १॥

नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व॥ २॥

नक्षन्ते। इन्द्रम्। अवसे। सुऽकृत्यया। येषाम्। सुतेषु। मन्दसे।
यथा। सम्ऽवर्ते। अमदः। यथा। कृशे। एव। अस्मे इति। इन्द्र। मत्स्व॥ २॥

आ नो विश्वे सजोषसो देवासो गन्तनोप नः।
वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम्॥ ३॥

आ। नः। विश्वे। सऽजोषसः। देवासः। गन्तन। उप। नः।
वसवः। रुद्राः। अवसे। नः। आ। गमन्। शृण्वन्तु। मरुतः। हवम्॥ ३॥

पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम्॥ ४॥ [२४]

पूषा। विष्णुः। हवनम्। मे। सरस्वती। अवन्तु। सप्त। सिन्धवः।
आपः। वातः। पर्वतासः। वनस्पतिः। शृणोतु। पृथिवी। हवम्॥ ४॥

यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन्॥ ५॥

यत्। इन्द्र। राधः। अस्ति। ते। माघोनम्। मघवत्ऽतम।
तेन। नः। बोधि। सधमाद्यः। वृधे। भगः। दानाय। वृत्रऽहन्॥ ५॥

आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे॥ ६॥

आजिऽपते। नृऽपते। त्वम्। इत्। हि। नः। वाजे। आ। वक्षि। सुक्रतो इति सुऽक्रतो।
वीती। होत्राभिः। उत। देववीतिऽभिः। ससऽवांसः। वि। शृण्विरे॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सन्ति ह्य१र्य आशिष इन्द्र आयुर्जनानाम्।

अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम्॥ ७॥

सन्ति। हि। अर्ये। आऽशिषः। इन्द्रे। आयुः। जनानाम्।

अस्मान्। नक्षस्व। मघऽवन्। उप। अवसे। धुक्षस्व। पिप्युषीम्। इषम्॥ ७॥

वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो।

महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय॥ ८॥ [२५]

वयम्। ते। इन्द्र। स्तोमेभिः। विधेम। त्वम्। अस्माकम्। शतक्रतो इति शतऽक्रतो।

महि। स्थूरम्। शशयम्। राधः। अह्रयम्। प्रस्कण्वाय। नि। तोशय॥ ८॥

[५५(७)] [५ कृशः काण्वः। प्रस्कण्वस्य दानस्तुतिः। गायत्री, ३, ५ अनुष्टुभौ।]

भूरीदिन्द्रस्य वीर्य१ व्यख्यमभ्यायति। राधस्ते दस्यवे वृक॥ १॥

भूरि। इत्। इन्द्रस्य। वीर्यम्। वि। अख्यम्। अभि। आ। अयति। राधः। ते। दस्यवे। वृक॥ १॥

शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते। मह्ना दिवं न तस्तभुः॥ २॥

शतम्। श्वेतासः। उक्षणः। दिवि। तारः। न। रोचन्ते। मह्ना। दिवम्। न। तस्तभुः॥ २॥

शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि। शतं मे बल्बजस्तुका अरुषीणां चतुःशतम्॥ ३॥

शतम्। वेणून्। शतम्। शुनः। शतम्। चर्माणि। म्लातानि।

शतम्। मे। बल्बजऽस्तुकाः। अरुषीणाम्। चतुःऽशतम्॥ ३॥

सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः। अश्वासो न चङ्क्रमत॥ ४॥

सुऽदेवाः। स्थ। काण्वायनाः। वयःऽवयः। विऽचरन्तः। अश्वासः। न। चङ्क्रमत॥ ४॥

आदित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः। श्यावीरतिध्वसन्पथश्चक्षुषा चन संनशे॥ ५॥ [२६]

आत्। इत्। साप्तस्य। चर्किरन्। न। अनूनस्य। महि। श्रवः।

श्यावीः। अतिऽध्वसन्। पथः। चक्षुषा। चन। सम्ऽनशे॥ ५॥

[५६(८)] [५ पृषध्रः काण्वः। इन्द्रः, प्रस्कण्वस्य दानस्तुतिर्वा ५ अग्निसूर्यौ। गायत्री, ५ पङ्क्तिः।]

प्रति ते दस्यवे वृक राधो अदर्श्यह्रयम्। द्यौर्न प्रथिना शवः॥ १॥

प्रति। ते। दस्यवे। वृक। राधः। अदर्शि। अह्रयम्। द्यौः। न। प्रथिना। शवः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः। नित्याद्रायो अमंहत॥ २॥

दश। मह्यम्। पौतऽक्रतः। सहस्रा। दस्यवे। वृकः। नित्यात्। रायः। अमंहत॥ २॥

शतं मे गर्दभानां शतमूर्णावतीनाम्। शतं दासाँ अति स्रजः॥ ३॥

शतम्। मे। गर्दभानाम्। शतम्। ऊर्णाऽवतीनाम्। शतम्। दासान्। अति। स्रजः॥ ३॥

तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता। अश्वानामिन्न यूथ्याम्॥ ४॥

तत्रो इति। अपि। प्र। अनीयत। पूतऽक्रतायै। विऽअक्ता। अश्वानाम्। इत्। न। यूथ्याम्॥ ४॥

अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः।

अग्निः शुक्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत॥ ५॥ [२७]

अचेति। अग्निः। चिकितुः। हव्यऽवाट्। सः। सुमत्ऽरथः।

अग्निः। शुक्रेण। शोचिषा। बृहत्। सूरः। अरोचत। दिवि। सूर्यः। अरोचत॥ ५॥

[५७(१)] [४ मेध्यः काण्वः। अश्विनौ। त्रिष्टुप्।]

युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा।

आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः॥ १॥

युवम्। देवा। क्रतुना। पूर्व्येण। युक्ता। रथेन। तविषम्। यजत्रा।

आ। अगच्छतम्। नासत्या। शचीभिः। इदम्। तृतीयम्। सवनम्। पिबाथः॥ १॥

युवां देवास्त्रय एकादशासः सत्याः सत्यस्य ददृशे पुरस्तात्।

अस्माकं यज्ञं सवनं जुषाणां पातं सोममश्विना दीद्यग्नी॥ २॥

युवाम्। देवाः। त्रयः। एकादशासः। सत्याः। सत्यस्य। ददृशे। पुरस्तात्।

अस्माकम्। यज्ञम्। सवनम्। जुषाणा। पातम्। सोमम्। अश्विना। दीद्यग्नी इति दीदिऽअग्नी॥ २॥

पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः।

सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप याता पिबध्यै॥ ३॥

पनाय्यम्। तत्। अश्विना। कृतम्। वाम्। वृषभः। दिवः। रजसः। पृथिव्याः।

सहस्रम्। शंसाः। उत। ये। गोऽइष्टौ। सर्वान्। इत्। तान्। उप। यात। पिबध्यै॥ ३॥

अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम्।

पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः॥ ४॥ [२८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयम्। वाम्। भागः। निऽहितः। यजत्रा। इमाः। गिरः। नासत्या। उप। यातम्।

पिबतम्। सोमम्। मधुऽमन्तम्। अस्मे इति। प्र। दाश्वांसम्। अवतम्। शचीभिः॥ ४॥

[५८(१०) (५९)(११)] [७ सुपर्णः काण्वः। मित्रावरुणौ। जगती।]

इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम्।

यज्ञेयज्ञे ह सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः॥ १॥

इमानि। वाम्। भागऽधेयानि। सिस्रते। इन्द्रावरुणा। प्र। महे। सुतेषु। वाम्।

यज्ञेऽयज्ञे। ह। सवना। भुरण्यथः। यत्। सुन्वते। यजमानाय। शिक्षथः॥ १॥

निष्षिध्वरीरोषधीराप आस्तामिन्द्रावरुणा महिमानमाशत।

या सिस्रतू रजसस्पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते॥ २॥

निःऽसिध्वरीः। ओषधीः। आपः। आस्ताम्। इन्द्रावरुणा। महिमानम्। आशत।

या। सिस्रतुः। रजसः। पारे। अध्वनः। ययोः। शत्रुः। नकिः। अदेवः। ओहते॥ २॥

सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः।

ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः॥ ३॥

सत्यम्। तत्। इन्द्रावरुणा। कृशस्य। वाम्। मध्वः। ऊर्मिम्। दुहते। सप्त। वाणीः।

ताभिः। दाश्वांसम्। अवतम्। शुभः। पती इति। यः। वाम्। अदब्धः। अभि। पाति। चित्तिऽभिः॥ ३॥

घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य।

या ह वामिन्द्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतम्॥ ४॥ [२९ (३०)]

घृतऽप्रुषः। सौम्याः। जीरऽदानवः। सप्त। स्वसारः। सदने। ऋतस्य।

याः। ह। वाम्। इन्द्रावरुणा। घृतऽश्चुतः। ताभिः। धत्तम्। यजमानाय। शिक्षतम्॥ ४॥

अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम्।

अस्मान्त्स्विन्द्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती॥ ५॥

अवोचाम। महते। सौभगाय। सत्यम्। त्वेषाभ्याम्। महिमानम्। इन्द्रियम्।

अस्मान्। सु। इन्द्रावरुणा। घृतऽश्चुतः। त्रिऽभिः। साप्तेभिः। अवतम्। शुभः। पती इति॥ ५॥

इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे।

यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रावरुणा। यत्। ऋषिऽभ्यः। मनीषाम्। वाचः। मतिम्। श्रुतम्। अदत्तम्। अग्रे।
यानि। स्थानानि। असृजन्त। धीराः। यज्ञम्। तन्वाना। तपसा। अभि। अपश्यम्॥ ६॥

इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम्।
प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः॥ ७॥ [३० (३१)] {६}

इन्द्रावरुणा। सौमनसम्। अदृप्तम्। रायः। पोषम्। यजमानेषु। धत्तम्।
प्रऽजाम्। पुष्टिम्। भूतिम्। अस्मासु। धत्तम्। दीर्घायुऽत्वाय। प्र। तिरतम्। नः। आयुः॥ ७॥

[इति बालखिल्यं समाप्तम्]

[५९ (६०)] [२० भर्गः प्रागाथः। अग्निः। प्रगाथः = अयुजो बृहत्यः, युजः सतोबृहत्यः)]

अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे॥ १॥

अग्ने। आ। याहि। अग्निऽभिः। होतारम्। त्वा। वृणीमहे।
आ। त्वाम्। अनक्तु। प्रऽयता। हविष्मती। यजिष्ठम्। बर्हिः। आऽसदे॥ १॥

अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम्॥ २॥

अच्छ। हि। त्वा। सहसः। सूनो इति। अङ्गिरः। स्रुचः। चरन्ति। अध्वरे।
ऊर्जः। नपातम्। घृतऽकेशम्। ईमहे। अग्निम्। यज्ञेषु। पूर्व्यम्॥ २॥

अग्ने कविर्वेधा असि होता पावक यक्ष्यः।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः॥ ३॥

अग्ने। कविः। वेधाः। असि। होता। पावक। यक्ष्यः।
मन्द्रः। यजिष्ठः। अध्वरेषु। ईड्यः। विप्रेभिः। शुक्र। मन्मऽभिः॥ ३॥

अद्रोघमा वहोशतो यविष्ठ्य देवां अजस्र वीतये।
अभि प्रयांसि सुधिता वसो गहि मन्दस्व धीतिभिर्हितः॥ ४॥

अद्रोघम्। आ। वह। उशतः। यविष्ठ्य। देवान्। अजस्र। वीतये।
अभि। प्रयांसि। सुऽधिता। आ। वसो इति। गहि। मन्दस्व। धीतिऽभिः। हितः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतस्कविः।

त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ५ ॥ [३१ (३२)]

त्वम्। इत्। स॒ऽप्रथाः। असि। अग्ने। त्रातः। ऋतः। कविः।

त्वाम्। विप्रासः। सम्ऽइधान। दीदिऽवः। आ। विवासन्ति। वेधसः ॥ ५ ॥

शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि।

देवानां शर्मन्मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥ ६ ॥

शोच। शोचिष्ठ। दीदिहि। विशे। मयः। रास्व। स्तोत्रे। महान्। असि।

देवानाम्। शर्मन्। मम। सन्तु। सूरयः। शत्रुऽसहः। सुऽअग्नयः ॥ ६ ॥

यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि।

एवा दह मित्रमहो यो अस्मध्रुग्दुर्मन्मा कश्च वेनति ॥ ७ ॥

यथा। चित्। वृद्धम्। अतसम्। अग्ने। सम्ऽजूर्वसि। क्षमि।

एव। दह। मित्रऽमहः। यः। अस्मऽध्रुक्। दुःऽमन्मा। कः। च। वेनति ॥ ७ ॥

मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः।

अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥ ८ ॥

मा। नः। मर्ताय। रिपवे। रक्षस्विने। मा। अघऽशंसाय। रीरधः।

अस्रेधत्ऽभि। तरणिऽभिः। यविष्ठ्य। शिवेभिः। पाहि। पायुऽभिः ॥ ८ ॥

पाहि नो अग्न एकया पाह्युत द्वितीयया।

पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ९ ॥

पाहि। नः। अग्ने। एकया। पाहि। उत। द्वितीयया।

पाहि। गीःऽभिः। तिसृऽभिः। ऊर्जाम्। पते। पाहि। चतसृऽभिः। वसो इति ॥ ९ ॥

पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव।

त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ १० ॥

पाहि। विश्वऽस्मात्। रक्षसः। अराव्णः। प्र। स्म। वाजेषु। नः। अव।

त्वाम्। इत्। हि। नेदिष्ठम्। देवऽतातये। आपिम्। नक्षामहे। वृधे ॥ १० ॥

आ नो अग्ने वयोवृधं रयिं पावक शंस्यम्।

रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥ ११ ॥ [३२ (३३)]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। अग्ने। वयःऽवृधम्। रयिम्। पावक। शंस्यम्।
रास्व। च। नः। उपऽमाते। पुरुऽस्पृहम्। सुऽनीती। स्वयशःऽतरम्॥ ११॥

येन वंसाम पृतनासु शर्धतस्तरन्तो अर्य आदिशः।
स त्वं नो वर्ध प्रयसा शचीवसो जिन्वा धियो वसुविदः॥ १२॥
येन। वंसाम। पृतनासु। शर्धतः। तरन्तः। अर्यः। आऽदिशः।
सः। त्वम्। नः। वर्ध। प्रयसा। शचीवसो इति शचीऽवसो। जिन्व। धियः। वसुऽविदः॥ १२॥

शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत्।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः॥ १३॥
शिशानः। वृषभः। यथा। अग्निः। शृङ्गे इति। दविध्वत्।
तिग्माः। अस्य। हनवः। न। प्रतिऽधृषे। सुऽजम्भः। सहसः। यहुः॥ १३॥

नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद्वितिष्ठसे।
स त्वं नो होतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु॥ १४॥
नहि। ते। अग्ने। वृषभ। प्रतिऽधृषे। जम्भासः। यत्। विऽतिष्ठसे।
सः। त्वम्। नः। होतरिति। सुऽहुतम्। हविः। कृधि। वंस्व। नः। वार्या। पुरु॥ १४॥

शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते।
अतन्द्रो हव्या वहसि हविष्कृत आदिद्देवेषु राजसि॥ १५॥ [३३ (३४)]
शेषे। वनेषु। मात्रोः। सम्। त्वा। मर्तासः। इन्धते।
अतन्द्रः। हव्या। वहसि। हविःऽकृतः। आत्। इत्। देवेषु। राजसि॥ १५॥

सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयम्।
भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति॥ १६॥
सप्त। होतारः। तम्। इत्। ईळते। त्वा। अग्ने। सुऽत्यजम्। अह्रयम्।
भिनत्सि। अद्रिम्। तपसा। वि। शोचिषा। प्र। अग्ने। तिष्ठ। जनान्। अति॥ १६॥

अग्निमग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः।
अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनाम्॥ १७॥
अग्निम्ऽअग्निम्। वः। अध्रिऽगुम्। हुवेम। वृक्तऽबर्हिषः।
अग्निम्। हितऽप्रयसः। शश्वतीषु। आ। होतारम्। चर्षणीनाम्॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना।

इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये॥ १८॥

केतेन। शर्मन्। सचते। सुऽसामनि। अग्ने। तुभ्यम्। चिकित्वना।

इषण्यया। नः। पुरुऽरूपम्। आ। भर। वाजम्। नेदिष्ठम्। ऊतये॥ १८॥

अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः।

अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः॥ १९॥

अग्ने। जरितः। विश्पतिः। तेपानः। देव। रक्षसः।

अप्रोषिऽवान्। गृहऽपतिः। महान्। असि। दिवः। पायुः। दुरोणऽयुः॥ १९॥

मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावताम्।

परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः॥ २०॥ [३४ (३५)]

मा। नः। रक्षः। आ। वेशीत्। आघृणिवसो इत्याघृणिऽवसो। मा। यातुः। यातुऽमावताम्।

परःऽगव्यूति। अनिराम्। अप। क्षुधम्। अग्ने। सेध। रक्षस्विनः॥ २०॥

[६० (६१)] [१८ भर्गः प्रागाथः। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः), १७ शंकुमती।]

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः।

सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत्॥ १॥

उभयम्। शृणवत्। च। नः। इन्द्रः। अर्वाक्। इदम्। वचः।

सत्राच्या। मघऽवा। सोमऽपीतये। धिया। शविष्ठः। आ। गमत्॥ १॥

तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः।

उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः॥ २॥

तम्। हि। स्वऽराजम्। वृषभम्। तम्। ओजसे। धिषणे इति। निःऽततक्षतुः।

उत। उपऽमानाम्। प्रथमः। नि। सीदसि। सोमऽकामम्। हि। ते। मनः॥ २॥

आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः।

विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिद्दधृष्वणिम्॥ ३॥

आ। वृषस्व। पुरुवसो इति पुरुऽवसो। सुतस्य। इन्द्र। अन्धसः।

विद्म। हि। त्वा। हरिऽवः। पृत्ऽसु। ससहिम्। अधृष्टम्। चित्। दधृष्वणिम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अप्रामिसत्य मघवन्तथेदसदिन्द्र क्रत्वा यथा वशः।

सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः॥ ४॥

अप्रामिऽसत्य। मघऽवन्। तथा। इत्। असत्। इन्द्र। क्रत्वा। यथा। वशः।

सनेम। वाजम्। तव। शिप्रिन्। अवसा। मक्षु। चित्। यन्तः। अद्रिऽवः॥ ४॥

शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः।

भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि॥ ५॥ [३५ (३६)]

शग्धि। ऊँ इति। सु। शचीऽपते। इन्द्र। विश्वाभिः। ऊतिऽभिः।

भगम्। न। हि। त्वा। यशसम्। वसुऽविदम्। अनु। शूर। चरामसि॥ ५॥

पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः।

नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर॥ ६॥

पौरः। अश्वस्य। पुरुऽकृत्। गवाम्। असि। उत्सः। देव। हिरण्ययः।

नकिः। हि। दानम्। परिऽमर्धिषत्। त्वे इति। यत्ऽयत्। यामि। तत्। आ। भर॥ ६॥

त्वं ह्येहि चेरवे विदा भगं वसुत्तये। उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये॥ ७॥

त्वम्। हि। आ। इहि। चेरवे। विदाः। भगम्। वसुत्तये।

उत्। ववृषस्व। मघऽवन्। गोऽइष्टये। उत्। इन्द्र। अश्वम्ऽइष्टये॥ ७॥

त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे।

आ पुरंदरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे॥ ८॥

त्वम्। पुरु। सहस्राणि। शतानि। च। यूथा। दानाय। मंहसे।

आ। पुरम्ऽदरम्। चकृम। विप्रऽवचसः। इन्द्रम्। गायन्तः। अवसे॥ ८॥

अविप्रो वा यदविधद्विप्रो वेन्द्र ते वचः।

स प्र ममन्दत्त्वाया शतक्रतो प्राचामन्यो अहंसन॥ ९॥

अविप्रः। वा। यत्। अविधत्। विप्रः। वा। इन्द्र। ते। वचः।

सः। प्र। ममन्दत्। त्वाऽया। शतक्रतो इति शतऽक्रतो। प्राचामन्यो इति प्राचाऽमन्यो। अहम्ऽसन॥ ९॥

उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि मे शृणवद्धवम्।

वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे॥ १०॥ [३६ (३७)]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उग्रऽबाहुः। म्रक्षऽकृत्वा। पुरम्ऽदरः। यदि। मे। शृणवत्। हवम्।
वसुऽयवः। वसुऽपतिम्। शतऽक्रतुम्। स्तोमैः। इन्द्रम्। हवामहे ॥ १० ॥

न पापासो मनामहे नारायासो न जल्हवः।
यदिन्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥ ११ ॥

न। पापासः। मनामहे। न। अरायासः। न। जल्हवः।
यत्। इत्। नु। इन्द्रम्। वृषणम्। सचा। सुते। सखायम्। कृणवामहै ॥ ११ ॥

उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यम्।
वेदा भृमं चित्सनिता रथीतमो वाजिनं यमिदू नशत् ॥ १२ ॥

उग्रम्। युयुज्म। पृतनासु। ससहिम्। ऋणऽकातिम्। अदाभ्यम्।
वेद। भृमम्। चित्। सनिता। रथिऽतमः। वाजिनम्। यम्। इत्। ऊँ इति। नशत् ॥ १२ ॥

यत इन्द्र भयामहे ततो नो अभयं कृधि।
मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥ १३ ॥

यतः। इन्द्र। भयामहे। ततः। नः। अभयम्। कृधि।
मघऽवन्। शग्धि। तव। तत्। नः। ऊतिऽभिः। वि। द्विषः। वि। मृधः। जहि ॥ १३ ॥

त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १४ ॥

त्वम्। हि। राधः२पते। राधसः। महः। क्षयस्य। असि। विधतः।
तम्। त्वा। वयम्। मघऽवन्। इन्द्र। गिर्वणः। सुतऽवन्तः। हवामहे ॥ १४ ॥

इन्द्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः।
स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥ १५ ॥ [३७ (३८)]

इन्द्रः। स्पट्। उत। वृत्रऽहा। पुरः२पाः। नः। वरेण्यः।
सः। नः। रक्षिषत्। चरमम्। सः। मध्यमम्। सः। पश्चात्। पातु। नः। पुरः ॥ १५ ॥

त्वं नः पश्चादधरादुत्तरात्पुर इन्द्र नि पाहि विश्वतः।
आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥ १६ ॥

त्वम्। नः। पश्चात्। अधरात्। उत्तरात्। पुरः। इन्द्र। नि। पाहि। विश्वतः।
आरे। अस्मत्। कृणुहि। दैव्यम्। भयम्। आरे। हेतीः। अदेवीः ॥ १६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अ॒द्याद्या॒ श्वःश्व॒ इन्द्र॒ त्रास्व॑ प॒रे च॑ नः।

विश्वा॑ च नो जरि॒तॄन्त्स॑त्पते॒ अहा॒ दिवा॒ नक्तं॑ च रक्षिषः॥ १७॥

अ॒द्यऽअ॑द्य। श्वःऽश्व॑ः। इन्द्र॑। त्रास्व॑। प॒रे। च॒। न॒ः।

विश्वा॑। च॒। न॒ः। ज॒रि॒तॄन्। स॒त्ऽप॒ते॒। अहा॑। दिवा॑। नक्त॑म्। च॒। र॒क्षि॒ष॒ः॥ १७॥

प्र॒भ॒ङ्गी शूरो॑ म॒घवा॑ तु॒वीम॑घः संमि॑श्लो वी॒र्या॑य॒ कम्।

उ॒भा ते॑ बा॒हू वृष॑णा शतक्रतो॒ नि या वज्रं॑ मिमि॒क्षतुः॑॥ १८॥ [३८ (३९)]

प्र॒ऽभ॒ङ्गी। शूरः॑। म॒घऽवा॑। तु॒विऽम॑घः। सम्ऽमि॑श्लः। वी॒र्या॑य। कम्।

उ॒भा। ते॒। बा॒हू इति॑। वृष॑णा। श॒त॒क्र॒तो॒ इति॑ शत॒ऽक्रतो। नि। या। वज्र॑म्। मि॒मि॒क्षतुः॑॥ १८॥

[६१(६२)] **[१२ प्रगाथो घौरः काण्वः। इन्द्रः। पञ्चपदा पङ्क्तिः ७-९ बृहत्यः।]**

प्रो अ॑स्मा॒ उप॑स्तुतिं॒ भर॑ता॒ यज्जुजो॑षति।

उ॒क्थैरिन्द्र॑स्य॒ माहि॑नं॒ वयो॑ वर्धन्ति सो॒मिनो॑ भ॒द्रा इन्द्र॑स्य रा॒तयः॑॥ १॥

प्रो इति॑। अ॒स्मै॒। उप॑ऽस्तुतिम्। भर॑त। यत्। जुजो॑षति।

उ॒क्थैः। इन्द्र॑स्य। माहि॑नम्। वयः॑। व॒र्धन्ति॒। सो॒मिनः॑। भ॒द्राः। इन्द्र॑स्य। रा॒तयः॑॥ १॥

अ॒यु॒जो अस॑मो॒ नृभि॒रेकः॑ कृ॒ष्टीर॒यास्यः॑।

पू॒र्वीरति॒ प्र वा॑वृधे॒ विश्वा॑ जा॒तान्योज॑सा भ॒द्रा इन्द्र॑स्य रा॒तयः॑॥ २॥

अ॒यु॒जः। अस॑मः। नृऽभिः॑। एकः॑। कृ॒ष्टीः। अ॒यास्यः॑।

पू॒र्वीः। अति॑। प्र। व॒वृ॒धे॒। विश्वा॑। जा॒तानि॑। ओज॑सा। भ॒द्राः। इन्द्र॑स्य। रा॒तयः॑॥ २॥

अहि॑तेन चि॒दर्व॑ता जी॒रदा॑नुः सिषासति।

प्र॒वा॒च्य॑मिन्द्र॒ तत्तव॑ वी॒र्या॑णि करिष्य॒तो भ॒द्रा इन्द्र॑स्य रा॒तयः॑॥ ३॥

अहि॑तेन। चि॒त्। अर्व॑ता। जी॒रऽदा॑नुः। सि॒सा॒स॒ति॒।

प्र॒ऽवा॒च्य॑म्। इ॒न्द्र॒। तत्। तव॑। वी॒र्या॑णि। क॒रि॒ष्य॒तः। भ॒द्राः। इन्द्र॑स्य। रा॒तयः॑॥ ३॥

आ या॑हि कृ॒णवा॑म त॒ इन्द्र॒ ब्रह्मा॑णि॒ वर्ध॑ना।

येभिः॑ शविष्ठ चा॒कनो॑ भ॒द्रमि॒ह श्र॑वस्य॒ते भ॒द्रा इन्द्र॑स्य रा॒तयः॑॥ ४॥

आ। या॒हि॒। कृ॒णवा॑म। ते॒। इन्द्र॑। ब्रह्मा॑णि। वर्ध॑ना।

येभिः॑। श॒वि॒ष्ठ॒। चा॒कनः॑। भ॒द्रम्। इ॒ह। श्र॒व॒स्य॒ते। भ॒द्राः। इन्द्र॑स्य। रा॒तयः॑॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धृषतश्चिद्धृषन्मनः कृणोषीन्द्र यत्त्वम्।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ॥ ५ ॥ [३९ (४०)]
धृषतः। चित्। धृषत्। मनः। कृणोषि। इन्द्र। यत्। त्वम्।
तीव्रैः। सोमैः। सपर्यतः। नमःऽभिः। प्रतिऽभूषतः। भद्राः। इन्द्रस्य। रातयः॥ ५ ॥
अव चष्ट ऋचीषमोऽवताँइव मानुषः।
जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इन्द्रस्य रातयः ॥ ६ ॥
अव। चष्टे। ऋचीषमः। अवतान्ऽइव। मानुषः।
जुष्ट्वी। दक्षस्य। सोमिनः। सखायम्। कृणुते। युजम्। भद्राः। इन्द्रस्य। रातयः॥ ६ ॥
विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥ ७ ॥
विश्वे। ते। इन्द्र। वीर्यम्। देवाः। अनु। क्रतुम्। ददुः।
भुवः। विश्वस्य। गोऽपतिः। पुरुऽस्तुत। भद्राः। इन्द्रस्य। रातयः॥ ७ ॥
गृणे तदिन्द्र ते शव उपमं देवतातये। यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ॥ ८ ॥
गृणे। तत्। इन्द्र। ते। शवः। उपऽमम्। देवऽतातये।
यत्। हंसि। वृत्रम्। ओजसा। शचीऽपते। भद्राः। इन्द्रस्य। रातयः॥ ८ ॥
समनेव वपुष्यतः कृणवन्मानुषा युगा। विदे तदिन्द्रश्चेतनमध श्रुतो भद्रा इन्द्रस्य रातयः ॥ ९ ॥
समनाऽइव। वपुष्यतः। कृणवत्। मानुषा। युगा।
विदे। तत्। इन्द्रः। चेतनम्। अध। श्रुतः। भद्राः। इन्द्रस्य। रातयः॥ ९ ॥
उज्जातमिन्द्र ते शव उत्त्वामुत्तव क्रतुम्।
भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि भद्रा इन्द्रस्य रातयः ॥ १० ॥
उत्। जातम्। इन्द्र। ते। शवः। उत्। त्वाम्। उत्। तव। क्रतुम्।
भूरिगो इति भूरिऽगो। भूरि। ववृधुः। मघऽवन्। तव। शर्मणि। भद्राः। इन्द्रस्य। रातयः। १० ॥
अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ।
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥ ११ ॥
अहम्। च। त्वम्। च। वृत्रऽहन्। सम्। युज्याव। सनिऽभ्यः। आ।
अरातिऽवा। चित्। अद्रिऽवः। अनु। नौ। शूर। मंसते। भद्राः। इन्द्रस्य। रातयः॥ ११ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम्।

महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः॥ १२॥ [४० (४१)]

सत्यम्। इत्। वै। ऊँ इति। तम्। वयम्। इन्द्रम्। स्तवाम। न। अनृतम्।

महान्। असुन्वतः। वधः। भूरि। ज्योतींषि। सुन्वतः। भद्राः। इन्द्रस्य। रातयः॥ १२॥

[६२ (६३)] [१२ प्रगाथः काण्वः। इन्द्रः, १२ देवाः। गायत्री; १, ४-५, ७ अनुष्टुभः; १२ त्रिष्टुप्।]

स पूर्व्यो महानां वेनः क्रतुभिरानजे। यस्य द्वारा मनुष्पिता देवेषु धिय आनजे॥ १॥

सः। पूर्व्यः। महानाम्। वेनः। क्रतुभिः। आनजे।

यस्य। द्वारा। मनुः। पिता। देवेषु। धियः। आनजे॥ १॥

दिवो मानं नोत्सदन्त्सोमपृष्ठासो अद्रयः। उक्था ब्रह्म च शंस्या॥ २॥

दिवः। मानम्। न। उत्। सदन्। सोमऽपृष्ठासः। अद्रयः। उक्था। ब्रह्म। च। शंस्या॥ २॥

स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप। स्तुषे तदस्य पौंस्यम्॥ ३॥

सः। विद्वान्। अङ्गिरःऽभ्यः। इन्द्रः। गाः। अवृणोत्। अप। स्तुषे। तत्। अस्य। पौंस्यम्॥ ३॥

स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः। शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे॥ ४॥

सः। प्रत्नऽथा। कविऽवृधः। इन्द्रः। वाकस्य। वक्षणिः।

शिवः। अर्कस्य। होमनि। अस्मऽत्रा। गन्तु। अवसे॥ ४॥

आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः। श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने॥ ५॥

आत्। ऊँ इति। नु। ते। अनु। क्रतुम्। स्वाहा। वरस्य। यज्यवः।

श्वात्रम्। अर्काः। अनूषत। इन्द्र। गोत्रस्य। दावने॥ ५॥

इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च। यमर्का अध्वरं विदुः॥ ६॥ [४१ (४२)]

इन्द्रे। विश्वानि। वीर्या। कृतानि। कर्त्वानि। च। यम्। अर्काः। अध्वरम्। विदुः॥ ६॥

यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत। अस्तृणाद्बर्हणा विपो३र्यो मानस्य स क्षयः॥ ७॥

यत्। पाञ्चऽजन्यया। विशा। इन्द्रे। घोषाः। असृक्षत।

अस्तृणात्। बर्हणा। विपः। अर्यः। मानस्य। सः। क्षयः॥ ७॥

इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या। प्रावश्चक्रस्य वर्तनिम्॥ ८॥

इयम्। ऊँ इति। ते। अनुऽस्तुतिः। चकृषे। तानि। पौंस्या। प्र। आवः। चक्रस्य। वर्तनिम्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे। यवं न पश्व आ ददे॥ ९॥

अस्य। वृष्णः। विऽओदने। उरु। क्रमिष्ट। जीवसे। यवम्। न। पश्वः। आ। ददे॥ ९॥

तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः। स्याम मरुत्वतो वृधे॥ १०॥

तत्। दधानाः। अवस्यवः। युष्माभिः। दक्षऽपितरः। स्याम। मरुत्वतः। वृधे॥ १०॥

बळृत्वियाय धाम्न ऋक्वभिः शूर नोनुमः। जेषामेन्द्र त्वया युजा॥ ११॥

बट्। ऋत्वियाय। धाम्ने। ऋक्वऽभिः। शूर। नोनुमः। जेषाम। इन्द्र। त्वया। युजा॥ ११॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः।

यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः॥ १२॥ [४२ (४३)]

अस्मे इति। रुद्राः। मेहना। पर्वतासः। वृत्रऽहत्ये। भरऽहूतौ। सऽजोषाः।

यः। शंसते। स्तुवते। धायि। पज्रः। इन्द्रऽज्येष्ठाः। अस्मान्। अवन्तु। देवाः॥ १२॥

[६३ (६४)] [१२ प्रगाथः काण्वः। इन्द्रः। गायत्री।]

उत्त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः। अव ब्रह्मद्विषो जहि॥ १॥

उत्। त्वा। मन्दन्तु। स्तोमाः। कृणुष्व। राधः। अद्रिऽवः। अव। ब्रह्मऽद्विषः। जहि॥ १॥

पदा पणीँरराधसो नि बाधस्व महाँ असि। नहि त्वा कश्चन प्रति॥ २॥

पदा। पणीन्। अराधसः। नि। बाधस्व। महान्। असि। नहि। त्वा। कः। चन। प्रति॥ २॥

त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम्। त्वं राजा जनानाम्॥ ३॥

त्वम्। ईशिषे। सुतानाम्। इन्द्र। त्वम्। असुतानाम्। त्वम्। राजा। जनानाम्॥ ३॥

एहि प्रेहि क्षयो दिव्या३घोषञ्चर्षणीनाम्। ओभे पृणासि रोदसी॥ ४॥

आ। इहि। प्र। इहि। क्षयः। दिवि। आऽघोषन्। चर्षणीनाम्।

आ। उभे इति। पृणासि। रोदसी इति॥ ४॥

त्यं चित्पर्वतं गिरिं शतवन्तं सहस्रिणम्। वि स्तोतृभ्यो रुरोजिथ॥ ५॥

त्यम्। चित्। पर्वतम्। गिरिम्। शतऽवन्तम्। सहस्रिणम्। वि। स्तोतृऽभ्यः। रुरोजिथ॥ ५॥

वयमु त्वा दिवा सुते वयं नक्तं हवामहे। अस्माकं काममा पृण॥ ६॥ [४३ (४४)]

वयम्। ऊँ इति। त्वा। दिवा। सुते। वयम्। नक्तम्। हवामहे। अस्माकम्। कामम्। आ। पृण॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्व१ स्य वृषभो युवा तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति॥ ७॥

क्व। स्यः। वृषभः। युवा। तुवि॰ग्रीवः। अनानतः। ब्रह्मा। कः। तम्। सपर्यति॥ ७॥

कस्य स्वित्सवनं वृषा जुजुष्वाँ अव गच्छति। इन्द्रं क उ स्विदा चके॥ ८॥

कस्य। स्वित्। सवनम्। वृषा। जुजुष्वान्। अव। गच्छति।

इन्द्रम्। कः। ऊँ इति। स्वित्। आ। चके॥ ८॥

कं ते दाना असक्षत वृत्रहन्कं सुवीर्या। उक्थे क उ स्विदन्तमः॥ ९॥

कम्। ते। दानाः। असक्षत। वृत्र॰हन्। कम्। सु॰वीर्या। उक्थे। कः। ऊँ इति। स्वित्। अन्तमः॥ ९॥

अयं ते मानुषे जने सोमः पुरुषु सूयते। तस्येहि प्र द्रवा पिब॥ १०॥

अयम्। ते। मानुषे। जने। सोमः। पूरुषु। सूयते। तस्य। आ। इहि। प्र। द्रव। पिब॥ १०॥

अयं ते शर्यणावति सुषोमायामधि प्रियः। आर्जीकीये मदिन्तमः॥ ११॥

अयम्। ते। शर्यणा॰वति। सु॰सोमायाम्। अधि। प्रियः। आर्जीकीये। मदिन्॰तमः॥ ११॥

तमद्य राधसे महे चारुं मदाय घृष्वये। एहीमिन्द्र द्रवा पिब॥ १२॥ [४४ (४५)]

तम्। अद्य। राधसे। महे। चारुम्। मदाय। घृष्वये। आ। इहि। ईम्। इन्द्र। द्रव। पिब॥ १२॥

[६४ (६५)] [१२ प्रगाथः काण्वः। इन्द्रः। गायत्री।]

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः। आ याहि तूयमाशुभिः॥ १॥

यत्। इन्द्र। प्राक्। अपाक्। उदक्। न्यक्। वा। हूयसे। नृ॰भिः। आ। याहि। तूयम्। आशु॰भिः॥ १॥

यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे। यद्वा समुद्रे अन्धसः॥ २॥

यत्। वा। प्र॰स्रवणे। दिवः। मादयासे। स्वः॰नरे। यत्। वा। समुद्रे। अन्धसः॥ २॥

आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे। इन्द्र सोमस्य पीतये॥ ३॥

आ। त्वा। गीः॰भिः। महाम्। उरुम्। हुवे। गाम्॰इव। भोजसे। इन्द्र। सोमस्य। पीतये॥ ३॥

आ ते इन्द्र महिमानं हरयो देव ते महः। रथे वहन्तु बिभ्रतः॥ ४॥

आ। ते। इन्द्र। महिमानम्। हरयः। देव। ते। महः। रथे। वहन्तु। बिभ्रतः॥ ४॥

इन्द्रं गृणीष उ स्तुषे महाँ उग्र ईशानकृत्। एहि नः सुतं पिब॥ ५॥

इन्द्र। गृणीषे। ऊँ इति। स्तुषे। महान्। उग्रः। ईशान॰कृत्। आ। इहि। नः। सुतम्। पिब॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे। इदं नो बर्हिरासदे॥ ६॥ [४५ (४६)]

सुत॰वन्तः। त्वा। वयम्। प्रयस्वन्तः। हवामहे। इदम्। नः। बर्हिः। आ॰सदे॥ ६॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम्। तं त्वा वयं हवामहे॥ ७॥

यत्। चित्। हि। शश्वताम्। असि। इन्द्र। साधारणः। त्वम्। तम्। त्वा। वयम्। हवामहे॥ ७॥

इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः। जुषाण इन्द्र तत्पिब॥ ८॥

इदम्। ते। सोम्यम्। मधु। अधुक्षन्। अद्रि॰भिः। नरः। जुषाणः। इन्द्र। तत्। पिब॥ ८॥

विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि। अस्मे धेहि श्रवो बृहत्॥ ९॥

विश्वान्। अर्यः। विपः॰चितः। अति। ख्यः। तूयम्। आ। गहि। अस्मे इति। धेहि। श्रवः। बृहत्॥ ९॥

दाता मे पृषतीनां राजा हिरण्यवीनाम्। मा देवा मघवा रिषत्॥ १०॥

दाता। मे। पृषतीनाम्। राजा। हिरण्य॰वीनाम्। मा। देवाः। मघ॰वा। रिषत्॥ १०॥

सहस्रे पृषतीनामधि श्चन्द्रं बृहत्पृथु। शुक्रं हिरण्यमा ददे॥ ११॥

सहस्रे। पृषतीनाम्। अधि। चन्द्रम्। बृहत्। पृथु। शुक्रम्। हिरण्यम्। आ। ददे॥ ११॥

नपातो दुर्गहस्य मे सहस्रेण सुराधसः। श्रवो देवेष्वक्रत॥ १२॥ [४६ (४७)]

नपातः। दुः॰गहस्य। मे। सहस्रेण। सु॰राधसः। श्रवः। देवेषु। अक्रत॥ १२॥

[६५ (६६)] [१५ कलिः प्रागाथः। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः), १५ अनुष्टुप्।]

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये। बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम्॥ १॥

तरः॰भिः। वः। विदत्॰वसुम्। इन्द्रम्। स॰बाधः। ऊतये।

बृहत्। गायन्तः। सुत॰सोमे। अध्वरे। हुवे। भरम्। न। कारिणम्॥ १॥

न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः।

य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम्॥ २॥

न। यम्। दुध्राः। वरन्ते। न। स्थिराः। मुरः। मदे। सु॰शिप्रम्। अन्धसः।

यः। आ॰दृत्य। शशमानाय। सुन्वते। दाता। जरित्रे। उक्थ्यम्॥ २॥

यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः।

स ऊर्वस्य रेजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा॥ ३॥

यः। शक्रः। मृक्षः। अश्व्यः। यः। वा। कीजः। हिरण्ययः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। ऊ॒र्वस्यं। रे॒ज॒य॒ति॒। अप॑ऽवृतिम्। इन्द्रः॑। गव्य॑स्य। वृ॒त्र॒ऽहा॥ ३॥

निखा॑तं चि॒द्यः पु॑रुसंभृ॒तं वसू॒दिद्वप॑ति दा॒शुषे॑।

व॒ज्री सु॑शि॒प्रो हर्य॑श्व॒ इत्क॑र॒दिन्द्रः॒ क्रत्वा॒ यथा॒ वश॑त्॥ ४॥

नि॒ऽखा॑तम्। चि॒त्। यः। पु॒रु॒ऽसं॒भृ॒तम्। वसु॑। उत्। इत्। वप॑ति। दा॒शुषे॑।

व॒ज्री। सु॒ऽशि॒प्रः। हरि॑ऽअश्वः। इत्। क॒र॒त्। इन्द्रः॑। क्रत्वा॑। यथा॑। वश॑त्॥ ४॥

यद्वा॒वन्थ॑ पुरुष्टुत पु॒रा चि॑च्छूर नृ॒णाम्।

व॒यं तत्त॑ इन्द्र॒ सं भ॑रामसि य॒ज्ञमु॒क्थं तु॒रं वचः॑॥ ५॥ [४७ (४८)]

यत्। व॒वन्थ॑। पु॒रु॒ऽस्तु॒त॒। पु॒रा। चि॒त्। शू॒र॒। नृ॒णाम्।

व॒यम्। तत्। ते॒। इ॒न्द्र॒। सम्। भ॒रा॒म॒सि॒। य॒ज्ञम्। उ॒क्थम्। तु॒रम्। वचः॑॥ ५॥

सचा॒ सोमे॑षु पुरुहूत वज्रिवो॒ मदा॑य द्युक्ष सोमपाः।

त्वमिद्धि ब्र॑ह्म॒कृते॒ काम्यं॒ वसु॒ देष्ठः॑ सुन्व॒ते भुवः॑॥ ६॥

सचा॑। सोमे॑षु। पु॒रु॒ऽहू॒त॒। व॒ज्रि॒ऽवः॒। मदा॑य। द्यु॒क्ष॒। सो॒म॒ऽपाः॒।

त्वम्। इत्। हि। ब्र॒ह्म॒ऽकृते॑। काम्य॑म्। वसु॑। देष्ठः॑। सु॒न्व॒ते। भुवः॑॥ ६॥

व॒यमे॑नमि॒दा ह्योऽपी॑पेमे॒ह व॒ज्रिण॑म्। तस्मा॑ उ अ॒द्य स॑म॒ना सु॒तं भ॒रा नू॒नं भू॑षत श्रु॒ते॥ ७॥

व॒यम्। ए॒न॒म्। इ॒दा। ह्यः। अपी॑पेम। इ॒ह। व॒ज्रिण॑म्।

तस्मै॑। ऊँ इति॑। अ॒द्य। स॒म॒ना। सु॒तम्। भ॒र॒। आ। नू॒नम्। भू॒ष॒त॒। श्रु॒ते॥ ७॥

वृक॑श्चिदस्य वार॒ण उ॑रा॒मथि॒रा व॒युने॑षु भूषति।

सेमं न॒ः स्तोमं॑ जुजुषा॒ण आ ग॒हीन्द्र॒ प्र चि॒त्रया॑ धि॒या॥ ८॥

वृकः॑। चि॒त्। अ॒स्य॒। वा॒र॒णः। उ॒रा॒ऽमथिः॑। आ। व॒युने॑षु। भू॒ष॒ति॒।

सः। इ॒मम्। न॒ः। स्तोम॑म्। जु॒जु॒षा॒णः। आ। ग॒हि॒। इन्द्र॑। प्र। चि॒त्रया॑। धि॒या॥ ८॥

कदू॒ न्व१॒॑स्याकृ॑त॒मिन्द्र॑स्यास्ति॒ पौंस्य॑म्। केनो॒ नु कं॒ श्रोम॑तेन॒ न शु॑श्रुवे ज॒नुषः॒ परि॑ वृत्र॒हा॥ ९॥

कत्। ऊँ इति॑। नु। अ॒स्य॒। अकृ॑तम्। इन्द्र॑स्य। अ॒स्ति॒। पौंस्य॑म्।

केनो॒ इति॑। नु। क॒म्। श्रोम॑तेन। न। शु॒श्रु॒वे॒। ज॒नुषः॑। परि॑। वृ॒त्र॒ऽहा॥ ९॥

कदु॑ म॒हीरधृ॑ष्टा अस्य॒ तवि॑षीः॒ कदु॑ वृत्र॒घ्नो अस्तृ॑तम्।

इन्द्रो॒ विश्वा॑न्बेक॒नाटाँ॑ अह॒र्दृश॑ उ॒त क्रत्वा॑ प॒णीँर॒भि॥ १०॥ [४८ (४९)]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कत्। ऊँ इति। मही:। अधृष्टा:। अस्य। तविषी:। कत्। ऊँ इति। वृत्र॰घ्नः। अस्तृतम्।
इन्द्रः। विश्वान्। बेकु॰नाटान्। अहः॰दृशः। उत। क्रत्वा। पणीन्। अभि॥ १०॥

वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन्।
पुरूतमासः पुरुहूत वज्रिवो भृतं न प्र भरामसि॥ ११॥

वयम्। घ। ते। अपूर्व्या। इन्द्र। ब्रह्माणि। वृत्र॰हन्।
पुरु॰तमासः। पुरु॰हूत। वज्रि॰वः। भृतिम्। न। प्र। भरामसि॥ ११॥

पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः।
तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम्॥ १२॥

पूर्वीः। चित्। हि। त्वे इति। तुवि॰कूर्मिन्। आ॰शसः। हवन्ते। इन्द्र। ऊतयः।
तिरः। चित्। अर्यः। सवना। आ। वसो इति। गहि। शविष्ठ। श्रुधि। मे। हवम्॥ १२॥

वयं घा ते त्वे इद्विन्द्र विप्रा अपि ष्मसि। नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता॥ १३॥

वयम्। घ। ते। त्वे इति। इत्। ऊँ इति। इन्द्र। विप्राः। अपि। स्मसि।
नहि। त्वत्। अन्यः। पुरु॰हूत। कः। चन। मघ॰वन्। अस्ति। मर्डिता॥ १३॥

त्वं नो अस्या अमतेरुत क्षुधो३भिशस्तेरव स्पृधि।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित्॥ १४॥

त्वम्। नः। अस्याः। अमतेः। उत। क्षुधः। अभि॰शस्तेः। अव। स्पृधि।
त्वम्। नः। ऊती। तव। चित्रया। धिया। शिक्ष। शचिष्ठ। गातु॰वित्॥ १४॥

सोम इद्वः सुतो अस्तु कलयो मा बिभीतन। अपेदेष ध्वस्मायति स्वयं घैषो अपायति॥ १५॥

सोमः। इत्। वः। सुतः। अस्तु। कलयः। मा। बिभीतन। [४९ (५०)]
अप। इत्। एषः। ध्वस्मा। अयति। स्वयम्। घ। एषः। अप। अयति॥ १५॥

[६६ (६७)] [२१ मत्स्यः साम्मदः, मैत्रावरुणिर्मान्यो वा बहवो वा मत्स्या जालनद्धाः। आदित्याः। गायत्री।]

त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे। सुमृळीकाँ अभिष्टये॥ १॥

त्यान्। नु। क्षत्रियान्। अवः। आदित्यान्। याचिषामहे। सु॰मृळीकान्। अभिष्टये॥ १॥

मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा। आदित्यासो यथा विदुः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मित्रः। नः। अति। अंहतिम्। वरुणः। पर्षत्। अर्यमा। आदित्यासः। यथा। विदुः॥ २॥

तेषां हि चित्रमुक्थ्यं१ वरूथमस्ति दाशुषे। आदित्यानामरंकृते॥ ३॥

तेषाम्। हि। चित्रम्। उक्थ्यम्। वरूथम्। अस्ति। दाशुषे। आदित्यानाम्। अरम्ऽकृते॥ ३॥

महि वो महतामवो वरुण मित्रार्यमन्। अवांस्या वृणीमहे॥ ४॥

महि। वः। महताम्। अवः। वरुण। मित्र। अर्यमन्। अवांसि। आ। वृणीमहे॥ ४॥

जीवान्नो अभि धेतनादित्यासः पुरा हथात्। कद्ध स्थ हवनश्रुतः॥ ५॥ [५० (५१)]

जीवान्। नः। अभि। धेतन। आदित्यासः। पुरा। हथात्। कत्। ह। स्थ। हवनऽश्रुतः॥ ५॥

यद्वः श्रान्ताय सुन्वते वरूथमस्ति यच्छर्दिः। तेना नो अधि वोचत॥ ६॥

यत्। वः। श्रान्ताय। सुन्वते। वरूथम्। अस्ति। यत्। छर्दिः। तेन। नः। अधि। वोचत॥ ६॥

अस्ति देवा अंहोरुर्वस्ति रत्नमनागसः। आदित्या अद्भुतैनसः॥ ७॥

अस्ति। देवाः। अंहोः। उरु। अस्ति। रत्नम्। अनागसः। आदित्याः। अद्भुतऽएनसः॥ ७॥

मा नः सेतुः सिषेदयं महे वृणक्तु नस्परि। इन्द्र इद्धि श्रुतो वशी॥ ८॥

मा। नः। सेतुः। सिसेत्। अयम्। महे। वृणक्तु। नः। परि। इन्द्रः। इत्। हि। श्रुतः। वशी॥ ८॥

मा नो मृचा रिपूणां वृजिनानामविष्यवः। देवा अभि प्र मृक्षत॥ ९॥

मा। नः। मृचा। रिपूणाम्। वृजिनानाम्। अविष्यवः। देवाः। अभि। प्र। मृक्षत॥ ९॥

उत त्वामदिते मह्यहं देव्युप ब्रुवे। सुमृळीकामभिष्टये॥ १०॥ [५१ (५२)]

उत। त्वाम्। अदिते। महि। अहम्। देवि। उप। ब्रुवे। सुऽमृळीकाम्। अभिष्टये॥ १०॥

पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः। माकिस्तोकस्य नो रिषत्॥ ११॥

पर्षि। दीने। गभीरे। आ। उग्रऽपुत्रे। जिघांसतः। माकिः। तोकस्य। नः। रिषत्॥ ११॥

अनेहो न उरुव्रज उरूचि वि प्रसर्तवे। कृधि तोकाय जीवसे॥ १२॥

अनेहः। नः। उरुऽव्रजे। उरूचि। वि। प्रऽसर्तवे। कृधि। तोकाय। जीवसे॥ १२॥

ये मूर्धानः क्षितीनामदब्धासः स्वयशसः। व्रता रक्षन्ते अद्रुहः॥ १३॥

ये। मूर्धानः। क्षितीनाम्। अदब्धासः। स्वऽयशसः। व्रता। रक्षन्ते। अद्रुहः॥ १३॥

ते न आस्नो वृकाणामादित्यासो मुमोचत। स्तेनं बद्धमिवादिते॥ १४॥

ते। नः। आस्नः। वृकाणाम्। आदित्यासः। मुमोचत। स्तेनम्। बद्धम्ऽइव। अदिते॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपो॒ षु ण॑ इ॒यं शरु॒रादि॑त्या॒ अप॑ दु॒र्म॑तिः । अ॒स्मदे॒त्वज॑घ्नुषी ॥ १५ ॥ [५२ (५३)]

अपो॒ इति॑ । सु । न॒ः । इ॒यम् । शरु॑ः । आदि॑त्याः । अप॑ । दु॒ःऽम॒तिः । अ॒स्मत् । ए॒तु॒ । अज॑घ्नुषी ॥ १५ ॥

शश्व॒द्धि व॑ः सुदानव॒ आदि॑त्या ऊ॒तिभि॑र्व॒यम् । पु॒रा नू॒नं बु॑भु॒ज्महे ॥ १६ ॥

शश्व॑त् । हि । व॒ः । सु॒ऽदा॒न॒वः॒ । आदि॑त्याः । ऊ॒तिऽभि॑ः । व॒यम् । पु॒रा । नू॒नम् । बु॒भु॒ज्महे॑ ॥ १६ ॥

शश्व॑न्तं॒ हि प्र॑चेतसः प्रति॒यन्तं॑ चि॒देन॑सः । देवा॑ः कृणु॒थ जी॒वसे॑ ॥ १७ ॥

शश्व॑न्तम् । हि । प्र॒ऽचे॒त॒सः॒ । प्र॒ति॒ऽयन्त॑म् । चि॒त् । एन॑सः । देवा॑ः । कृ॒णु॒थ॒ । जी॒वसे॑ ॥ १७ ॥

तत्सु नो॒ नव्यं॒ सन्य॑स॒ आदि॑त्या॒ यन्मुमो॑चति । ब॒न्धाद्ब॒द्धमि॑वादिते ॥ १८ ॥

तत् । सु । न॒ः । नव्य॑म् । सन्य॑से । आदि॑त्याः । यत् । मुमो॑चति । ब॒न्धात् । ब॒द्धम्ऽइ॑व । अ॒दि॒ते॒ ॥ १८ ॥

नास्माक॑मस्ति॒ तत्तर॒ आदि॑त्यासो अति॒ष्कदे॑ । यू॒यम॒स्मभ्यं॑ मृळत ॥ १९ ॥

न । अ॒स्माक॑म् । अ॒स्ति॒ । तत् । तर॑ः । आदि॑त्यासः । अ॒ति॒ऽस्कदे॑ । यू॒यम् । अ॒स्मभ्य॑म् । मृ॒ळ॒त॒ ॥ १९ ॥

मा नो॑ हे॒तिर्वि॒वस्व॑त॒ आदि॑त्याः कृ॒त्रिमा॒ शरु॑ः । पु॒रा नु ज॒रसो॑ वधीत् ॥ २० ॥

मा । न॒ः । हे॒तिः । वि॒वस्व॑तः । आदि॑त्याः । कृ॒त्रिमा॑ । शरु॑ः । पु॒रा । नु । ज॒रस॑ः । व॒धी॒त् ॥ २० ॥

वि षु द्वेषो॒ व्यं॑ह॒तिमादि॑त्यासो॒ वि संहि॑तम् । विष्व॒ग्वि वृ॑हता॒ रप॑ः ॥ २१ ॥ [५३ (५४)]

वि । सु । द्वेष॑ः । वि । अं॒ह॒तिम् । आदि॑त्यासः । वि । सम्ऽहि॑तम् । विष्व॑क् । वि । वृ॒ह॒त॒ । रप॑ः ॥ २१ ॥

इत्याश्वलायन-संहितायां

षष्ठाष्टके

चतुर्थोऽध्यायः

समाप्तः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके पञ्चमोऽध्यायः ॥

[६७ (६८)] [१९ प्रियमेध आङ्गिरसः। इन्द्रः; १४-१९ ऋक्षाश्वमेधयोर्दानस्तुतिः। गायत्री, अनुष्टुम्मुखः प्रगाथ = (अनुष्टुप् + गायत्र्यौ), १, ४, ७, १० अनुष्टुप्, १६ शंकुमती।]

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि। तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते॥ १॥

आ। त्वा। रथम्। यथा। ऊतये। सुम्नाय। वर्तयामसि।

तुविऽकूर्मिम्। ऋतिऽसहम्। इन्द्र। शविष्ठ। सत्ऽपते॥ १॥

तुविशुष्म तुविक्रतो शचीवो विश्वया मते। आ पप्राथ महित्वना॥ २॥

तुविऽशुष्म। तुविक्रतो इति तविऽक्रतो। शचीऽवः। विश्वया। मते। आ। पप्राथ। महिऽत्वना॥ २॥

यस्य ते महिना महः परि ज्मायन्तमीयतुः। हस्ता वज्रं हिरण्ययम्॥ ३॥

यस्य। ते। महिना। महः। परि। ज्मायन्तम्। ईयतुः। हस्ता। वज्रम्। हिरण्ययम्॥ ३॥

विश्वानरस्य वस्पतिमनानतस्य शवसः। एवैश्च चर्षणीनामूती हुवे रथानाम्॥ ४॥

विश्वानरस्य। वः। पतिम्। अनानतस्य। शवसः। एवैः। च। चर्षणीनाम्। ऊती। हुवे। रथानाम्॥ ४॥

अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः। नाना हवन्त ऊतये॥ ५॥ [१]

अभिष्टये। सदाऽवृधम्। स्वःऽमीळ्हेषु। यम्। नरः। नाना। हवन्ते। ऊतये॥ ५॥

परोमात्रमृचीषममिन्द्रमुग्रं सुराधसम्। ईशानं चिद्वसूनाम्॥ ६॥

परःऽमात्रम्। ऋचीषमम्। इन्द्रम्। उग्रम्। सुऽराधसम्। ईशानम्। चित्। वसूनाम्॥ ६॥

तंतमिद्राधसे मह इन्द्रं चोदामि पीतये। यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः॥ ७॥

तम्ऽतम्। इत्। राधसे। महे। इन्द्रम्। चोदामि। पीतये।

यः। पूर्व्याम्। अनुऽस्तुतिम्। ईशे। कृष्टीनाम्। नृतुः॥ ७॥

न यस्य ते शवसान सख्यमानंश मर्त्यः। नकिः शवांसि ते नशत्॥ ८॥

न। यस्य। ते। शवसान। सख्यम्। आनंश। मर्त्यः। नकिः। शवांसि। ते। नशत्॥ ८॥

त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनम्। जयेम पृत्सु वज्रिवः॥ ९॥

त्वाऽऊतासः। त्वा। युजा। अप्ऽसु। सूर्ये। महत्। धनम्। जयेम। पृत्ऽसु। वज्रिऽवः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम। इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम्॥१०॥

तम्। त्वा। यज्ञेभिः। ईमहे। तम्। गीःऽभिः। गिर्वणःऽतम।

इन्द्र। यथा। चित्। आविथ। वाजेषु। पुरुऽमाय्यम्॥१०॥

यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः। यज्ञो वितन्तसाय्यः॥११॥

यस्य। ते। स्वादु। सख्यम्। स्वाद्वी। प्रऽनीतिः। अद्रिऽवः। यज्ञः। वितन्तसाय्यः॥११॥

उरु णस्तन्वे तन उरु क्षयाय नस्कृधि। उरु णो यन्धि जीवसे॥१२॥

उरु। नः। तन्वे। तने। उरु। क्षयाय। नः। कृधि। उरु। नः। यन्धि। जीवसे॥१२॥

उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम्। देववीतिं मनामहे॥१३॥

उरुम्। नृऽभ्यः। उरुम्। गवे। उरुम्। रथाय। पन्थाम्। देवऽवीतिम्। मनामहे॥१३॥

उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्या। तिष्ठन्ति स्वादुरातयः॥१४॥

उप। मा। षट्। द्वाऽद्वा। नरः। सोमस्य। हर्ष्या। तिष्ठन्ति। स्वादुऽरातयः॥१४॥

ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि। आश्वमेधस्य रोहिता॥१५॥

ऋज्रौ। इन्द्रोते। आ। ददे। हरी इति। ऋक्षस्य। सूनवि। आश्वऽमेधस्य। रोहिता॥१५॥

सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे। आश्वमेधे सुपेशसः॥१६॥

सुऽरथान्। आतिथिऽग्वे। सुऽअभीशून्। आर्क्षे। आश्वऽमेधे। सुऽपेशसः॥१६॥

षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः। सचा पूतक्रतौ सनम्॥१७॥

षट्। अश्वान्। आतिथिऽग्वे। इन्द्रोते। वधूऽमतः। सचा। पूतऽक्रतौ। सनम्॥१७॥

ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी। स्वभीशुः कशावती॥१८॥

आ। एषु। चेतत्। वृषण्ऽवती। अन्तः। ऋज्रेषु। अरुषी। सुऽअभीशुः। कशाऽवती॥१८॥

न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः। अवद्यमधि दीधरत्॥१९॥

न। युष्मे इति। वाजऽबन्धवः। निनित्सुः। चन। मर्त्यः। अवद्यम्। अधि। दीधरत्॥१९॥

[६८ (६९)] [१८ प्रियमेध आङ्गिरसः। इन्द्रः, ११ (अर्धर्चस्य) विश्वे देवाः, ११ (उत्तरार्धस्य)-१२ वरुणः। अनुष्टुप्, २ उष्णिक्, ४-६ गायत्र्यः, ११, १६ पङ्क्तिः, १७-१८ बृहत्यौ।]

प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे। धिया वो मेधसातये पुरंध्या विवासति॥१॥

प्रऽप्र। वः। त्रिऽस्तुभम्। इषम्। मन्दत्ऽवीराय। इन्दवे।

धिया। वः। मेधऽसातये। पुरम्ऽध्या। आ। विवासति॥१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नदं व ओदतीनां नदं योयुवतीनाम्। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि॥ २॥

नदम्। वः। ओदतीनाम्। नदम्। योयुवतीनाम्॥ पतिम्। वः। अघ्न्यानाम्। धेनूनाम्। इषुध्यसि॥ २॥

ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः॥ ३॥

ताः। अस्य। सूदऽदोहसः। सोमम्। श्रीणन्ति। पृश्नयः।

जन्मन्। देवानाम्। विशः। त्रिषु। आ। रोचने। दिवः॥ ३॥

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम्॥ ४॥

अभि। प्र। गोऽपतिम्। गिरा। इन्द्रम्। अर्च। यथा। विदे॥ सूनुम्। सत्यस्य। सत्ऽपतिम्॥ ४॥

आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे॥ ५॥ [५]

आ। हरयः। ससृज्रिरे। अरुषीः। अधि। बर्हिषि॥ यत्र। अभि। सम्ऽनवामहे॥ ५॥

इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु। यत्सीमुपह्वरे विदत्॥ ६॥

इन्द्राय। गावः। आऽशिरम्। दुदुह्रे। वज्रिणे। मधु॥ यत्। सीम्। उपऽह्वरे। विदत्॥ ६॥

उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि। मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे॥ ७॥

उत्। यत्। ब्रध्नस्य। विष्टपम्। गृहम्। इन्द्रः। च। गन्वहि।

मध्वः। पीत्वा। सचेवहि। त्रिः। सप्त। सख्युः। पदे॥ ७॥

अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ ८॥

अर्चत। प्र। अर्चत। प्रियऽमेधासः। अर्चत॥ अर्चन्तु। पुत्रकाः। उत। पुरम्। न। धृष्णु। अर्चत॥ ८॥

अव स्वराति गर्गरो गोधा परि सनिष्वणत्। पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम्॥ ९॥

अव। स्वराति। गर्गरः। गोधा। परि। सनिस्वनत्।

पिङ्गा। परि। चनिस्कदत्। इन्द्राय। ब्रह्म। उत्ऽयतम्॥ ९॥

आ यत्पतन्त्येन्यः सुदुघा अनपस्फुरः। अपस्फुरं गृभायत सोममिन्द्राय पातवे॥ १०॥ [६]

आ। यत्। पतन्ति। एन्यः। सुऽदुघाः। अनपस्फुरः।

अपस्फुरम्। गृभायत। सोमम्। इन्द्राय। पातवे॥ १०॥

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत।

वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव॥ ११॥

अपात्। इन्द्रः। अपात्। अग्निः। विश्वे। देवाः। अमत्सत।

वरुणः। इत्। इह। क्षयत्। तम्। आपः। अभि। अनूषत। वत्सम्। संशिश्वरीःऽइव॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं त्वां युज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम। इन्द्र यथां चिदाविथ वाजेषु पुरुमाय्यम्॥ १०॥ [२]

तम्। त्वा। युज्ञेभिः। ईमहे। तम्। गीःऽभिः। गिर्वणःऽतम।

इन्द्र। यथां। चित्। आविथ। वाजेषु। पुरुऽमाय्यम्॥ १०॥

यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः। यज्ञो वितन्तसाय्यः॥ ११॥

यस्य। ते। स्वादु। सख्यम्। स्वाद्वी। प्रऽनीतिः। अद्रिऽवः। यज्ञः। वितन्तसाय्यः॥ ११॥

उरु णस्तन्वे३ तनं उरु क्षयाय नस्कृधि। उरु णो यन्धि जीवसे॥ १२॥

उरु। नः। तन्वे। तनै। उरु। क्षयाय। नः। कृधि। उरु। नः। यन्धि। जीवसे॥ १२॥

उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम्। देववीतिं मनामहे॥ १३॥

उरुम्। नृऽभ्यः। उरुम्। गवे। उरुम्। रथाय। पन्थाम्। देवऽवीतिम्। मनामहे॥ १३॥

उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्या। तिष्ठन्ति स्वादुरातयः॥ १४॥

उप। मा। षट्। द्वाऽद्वा। नरः। सोमस्य। हर्ष्या। तिष्ठन्ति। स्वादुऽरातयः॥ १४॥

ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि। आश्वमेधस्य रोहिता॥ १५॥ [३]

ऋज्रौ। इन्द्रोते। आ। ददे। हरी इति। ऋक्षस्य। सूनवि। आश्वऽमेधस्य। रोहिता॥ १५॥

सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे। आश्वमेधे सुपेशसः॥ १६॥

सुऽरथान्। आतिथिऽग्वे। सुऽअभीशून्। आर्क्षे। आश्वऽमेधे। सुऽपेशसः॥ १६॥

षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः। सचा पूतक्रतौ सनम्॥ १७॥

षट्। अश्वान्। आतिथिऽग्वे। इन्द्रोते। वधूऽमतः। सचा। पूतऽक्रतौ। सनम्॥ १७॥

ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी। स्वभीशुः कशावती॥ १८॥

आ। एषु। चेतत्। वृषण्ऽवती। अन्तः। ऋज्रेषु। अरुषी। सुऽअभीशुः। कशाऽवती॥ १८॥

न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः। अवद्यमधि दीधरत्॥ १९॥ [४]

न। युष्मे इति। वाजऽबन्धवः। निनित्सुः। चन। मर्त्यः। अवद्यम्। अधि। दीधरत्॥ १९॥

[६८ (६९)] [१८ प्रियमेध आङ्गिरसः। इन्द्रः, ११ (अर्धर्चस्य) विश्वे देवाः, ११ (उत्तरार्धस्य)-१२ वरुणः। अनुष्टुप्, २ उष्णिक्, ४-६ गायत्र्यः, ११, १६ पङ्क्तिः, १७-१८ बृहत्यौ।]

प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे। धिया वो मेधसातये पुरंध्या विवासति॥ १॥

प्रऽप्र। वः। त्रिऽस्तुभम्। इषम्। मन्दत्ऽवीराय। इन्दवे।

धिया। वः। मेधऽसातये। पुरम्ऽध्या। आ। विवासति॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नदं व ओदतीनां नदं योयुवतीनाम्। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि॥ २॥

नदम्। वः। ओदतीनाम्। नदम्। योयुवतीनाम्॥ पतिम्। वः। अघ्न्यानाम्। धेनूनाम्। इषुध्यसि॥ २॥

ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः॥ ३॥

ताः। अस्य। सूद॑ऽदोहसः। सोमम्। श्रीणन्ति। पृश्नयः।

जन्मन्। देवानाम्। विशः। त्रिषु। आ। रोचने। दिवः॥ ३॥

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम्॥ ४॥

अभि। प्र। गोऽपतिम्। गिरा। इन्द्रम्। अर्च। यथा। विदे॥ सूनुम्। सत्यस्य। सत्ऽपतिम्॥ ४॥

आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे॥ ५॥ [५]

आ। हरयः। ससृज्रिरे। अरुषीः। अधि। बर्हिषि॥ यत्र। अभि। सम्ऽनवामहे॥ ५॥

इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु। यत्सीमुपह्वरे विदत्॥ ६॥

इन्द्राय। गावः। आऽशिरम्। दुदुह्रे। वज्रिणे। मधु॥ यत्। सीम्। उपऽह्वरे। विदत्॥ ६॥

उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि। मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे॥ ७॥

उत्। यत्। ब्रध्नस्य। विष्टपम्। गृहम्। इन्द्रः। च। गन्वहि।

मध्वः। पीत्वा। सचेवहि। त्रिः। सप्त। सख्युः। पदे॥ ७॥

अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ ८॥

अर्चत। प्र। अर्चत। प्रियऽमेधासः। अर्चत॥ अर्चन्तु। पुत्रकाः। उत। पुरम्। न। धृष्णु। अर्चत॥ ८॥

अव स्वराति गर्गरो गोधा परि सनिष्वणत्। पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम्॥ ९॥

अव। स्वराति। गर्गरः। गोधा। परि। सनिस्वनत्।

पिङ्गा। परि। चनिस्कदत्। इन्द्राय। ब्रह्म। उत्ऽयतम्॥ ९॥

आ यत्पतन्त्येन्यः सुदुघा अनपस्फुरः। अपस्फुरं गृभायत सोममिन्द्राय पातवे॥ १०॥ [६]

आ। यत्। पतन्ति। एन्यः। सुऽदुघाः। अनपस्फुरः।

अपस्फुरम्। गृभायत। सोमम्। इन्द्राय। पातवे॥ १०॥

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत।

वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव॥ ११॥

अपात्। इन्द्रः। अपात्। अग्निः। विश्वे। देवाः। अमत्सत।

वरुणः। इत्। इह। क्षयत्। तम्। आपः। अभि। अनूषत। वत्सम्। संशिश्वरीःऽइव॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥ १२॥

सु॰देवः। असि। वरुण। यस्य। ते। सप्त। सिन्धवः।

अनु॰क्षरन्ति। काकुदम्। सूर्म्यम्। सुषिराम्ऽइव॥ १२॥

यो व्यतीँरफाणयत्सुयुक्ताँ उप दाशुषे। तक्वो नेता तदिद्वपुरुपमा यो अमुच्यत॥ १३॥

यः। व्यतीन्। अफाणयत्। सु॰युक्तान्। उप। दाशुषे।

तक्वः। नेता। तत्। इत्। वपुः। उप॰मा। यः। अमुच्यत॥ १३॥

अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः। भिनत्कनीन ओदनं पच्यमानं परो गिरा॥ १४॥

अति। इत्। ऊँ इति। शक्रः। ओहते। इन्द्रः। विश्वाः। अति। द्विषः।

भिनत्। कनीनः। ओदनम्। पच्यमानम्। परः। गिरा॥ १४॥

अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम्। स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम्॥ १५॥

अर्भकः। न। कुमारकः। अधि। तिष्ठत्। नवम्। रथम्।

सः। पक्षत्। महिषम्। मृगम्। पित्रे। मात्रे। विभु॰क्रतुम्॥ १५॥

आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम्।

अध द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम्॥ १६॥

आ। तु। सु॰शिप्र। दम्॰पते। रथम्। तिष्ठ। हिरण्ययम्।

अध। द्युक्षम्। सचेवहि। सहस्र॰पादम्। अरुषम्। स्वस्ति॰गाम्। अनेहसम्॥ १६॥

तं घेमित्था नमस्विन उप स्वराजमासते।

अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने॥ १७॥

तम्। घ। ईम्। इत्था। नमस्विनः। उप। स्व॰राजम्। आसते।

अर्थम्। चित्। अस्य। सु॰धितम्। यत्। एतवे। आ॰वर्तयन्ति। दावने॥ १७॥

अनु प्रत्नस्यौकसः प्रियमेधास एषाम्।

पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयास आशत॥ १८॥ [७] {७}

अनु। प्रत्नस्य। ओकसः। प्रिय॰मेधासः। एषाम्।

पूर्वाम्। अनु। प्र॰यतिम्। वृक्त॰बर्हिषः। हित॰प्रयसः। आशत॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६९ (७०)] [१५ पुरुहन्मा आङ्गिरसः। इन्द्रः। बृहती; १-६ प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः), १२ शंकुमती, १३ उष्णिक्, १४ अनुष्टुप्, १५ पुरउष्णिक्।]

यो राजा॑ चर्षणी॒नां याता॒ रथे॑भि॒रध्रि॑गुः। विश्वा॑सां तरु॒ता पृत॑नानां॒ ज्येष्ठो॒ यो वृ॑त्र॒हा गृ॒णे ॥ १ ॥

यः। राजा॑। च॒र्ष॒णी॒नाम्। याता॑। रथे॑भिः। अध्रि॑ऽगुः।
विश्वा॑साम्। त॒रु॒ता। पृत॑नानाम्। ज्येष्ठः॑। यः। वृ॒त्र॒ऽहा। गृ॒णे ॥ १ ॥

इन्द्रं॒ तं शु॑म्भ पुरुहन्म॒न्नव॑से॒ यस्य॑ द्वि॒ता वि॑ध॒र्तरि॑।
हस्ता॑य॒ वज्रः॒ प्रति॑ धायि दर्श॒तो म॒हो दि॒वे न सूर्यः॑ ॥ २ ॥

इन्द्र॑म्। तम्। शु॒म्भ॒। पुरु॑ऽह॒न्म॒न्। अव॑से। यस्य॑। द्वि॒ता। वि॒ऽध॒र्तरि॑।
हस्ता॑य। वज्रः॑। प्रति॑। धा॒यि॒। द॒र्श॒तः। म॒हः। दि॒वे। न। सूर्यः॑ ॥ २ ॥

नकि॒ष्टं कर्म॑णा नश॒द्यश्च॒कार॑ स॒दावृ॑धम्।
इन्द्रं॒ न य॒ज्ञैर्वि॒श्वगू॑र्त॒मृभ्व॑स॒मधृ॑ष्टं धृ॒ष्ण्वो॑जसम् ॥ ३ ॥

नकिः॑। तम्। कर्म॑णा। न॒श॒त्। यः। च॒कार॑। स॒दाऽवृ॑धम्।
इन्द्र॑म्। न। य॒ज्ञैः। वि॒श्वऽगू॑र्तम्। ऋभ्व॑सम्। अधृ॑ष्टम्। धृ॒ष्णुऽओ॑जसम् ॥ ३ ॥

अषा॑ळ्हमु॒ग्रं पृत॑नासु सास॒हिं यस्मि॑न्म॒हीरु॑रु॒ज्रयः॑।
सं धे॒नवो॒ जाय॑माने अनोनवु॒र्द्यावः॒ क्षामो॑ अनोनवुः ॥ ४ ॥

अषा॑ळ्हम्। उ॒ग्रम्। पृत॑नासु। स॒स॒हिम्। यस्मि॑न्। म॒हीः। उ॒रु॒ऽज्रयः॑।
सम्। धे॒नवः॑। जाय॑माने। अ॒नो॒न॒वुः॒। द्यावः॑। क्षामः॑। अ॒नो॒न॒वुः॒ ॥ ४ ॥

यद्द्याव॑ इन्द्र ते श॒तं श॒तं भूमी॑रु॒त स्युः।
न त्वा॑ वज्रिन्त्स॒हस्रं॒ सूर्या॒ अनु॒ न जा॒तम॑ष्ट॒ रोद॑सी ॥ ५ ॥ [८]

यत्। द्याव॑ः। इ॒न्द्र॒। ते॒। श॒तम्। श॒तम्। भूमीः॑। उ॒त। स्युरिति॒ स्युः।
न। त्वा॒। व॒ज्रि॒न्। स॒हस्र॑म्। सूर्याः॑। अनु॑। न। जा॒तम्। अ॒ष्ट॒। रोद॑सी॒ इति॑ ॥ ५ ॥

आ प॑प्राथ महि॒ना वृष्ण्या॑ वृष॒न्विश्वा॑ शविष्ठ॒ शव॑सा।
अ॒स्माँ अ॑व मघव॒न्गोम॑ति व्र॒जे वज्रि॑ञ्चि॒त्राभि॑रू॒तिभिः॑ ॥ ६ ॥

आ। प॒प्राथ। म॒हि॒ना। वृष्ण्या॑। वृ॒ष॒न्। विश्वा॑। श॒वि॒ष्ठ॒। शव॑सा।
अ॒स्मान्। अ॒व॒। म॒घ॒ऽव॒न्। गोऽम॑ति। व्र॒जे। वज्रि॑न्। चि॒त्राभिः॑। ऊ॒तिऽभिः॑ ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न सीमदेव आपदिषं दीर्घायो मर्त्यः। एतग्वा चिद्य एतशा युयोजते हरी इन्द्रो युयोजते॥ ७॥

न। सीम्। अदेवः। आपत्। इषम्। दीर्घायो इति दीर्घऽआयो। मर्त्यः।

एतऽग्वा। चित्। यः। एतशा। युयोजते। हरी इति। इन्द्रः। युयोजते॥ ७॥

तं वो महो महाय्यमिन्द्रं दानाय सक्षणिम्। यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः॥ ८॥

तम्। वः। महः। महाय्यम्। इन्द्रम्। दानाय। सक्षणिम्।

यः। गाधेषु। यः। आऽअरणेषु। हव्यः। वाजेषु। अस्ति। हव्यः॥ ८॥

उदू षु णो वसो महे मृशस्व शूर राधसे। उदू षु मह्यै मघवन्मघत्तय उदिन्द्र श्रवसे महे॥ ९॥

उत्। ऊँ इति। सु। नः। वसो इति। महे। मृशस्व। शूर। राधसे।

उत्। ऊँ इति। सु। मह्यै। मघऽवन्। मघत्तये। उत्। इन्द्र। श्रवसे। महे॥ ९॥

त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि।

मध्ये वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः॥ १०॥ [९]

त्वम्। नः। इन्द्र। ऋतऽयुः। त्वाऽनिदः। नि। तृम्पसि।

मध्ये। वसिष्व। तुविऽनृम्ण। ऊर्वोः। नि। दासम्। शिश्नथः। हथैः॥ १०॥

अन्यव्रतममानुषमयज्वानमदेवयुम्। अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः॥ ११॥

अन्यऽव्रतम्। अमानुषम्। अयज्वानम्। अदेवऽयुम्।

अव। स्वः। सखा। दुधुवीत। पर्वतः। सुऽघ्नाय। दस्युम्। पर्वतः॥ ११॥

त्वं न इन्द्रासां हस्ते शविष्ठ दावने। धानानां न सं गृभायास्मयुर्द्विः सं गृभायास्मयुः॥ १२॥

त्वम्। नः। इन्द्र। आसाम्। हस्ते। शविष्ठ। दावने।

धानानाम्। न। सम्। गृभाय। अस्मऽयुः। द्विः। सम्। गृभाय। अस्मऽयुः॥ १२॥

सखायः क्रतुमिच्छत कथा राधाम शरस्य। उपस्तुतिं भोजः सूरिर्यो अह्रयः॥ १३॥

सखायः। क्रतुम्। इच्छत। कथा। राधाम। शरस्य। उपऽस्तुतिम्। भोजः। सूरिः। यः। अह्रयः॥ १३॥

भूरिभिः समह ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे। यदित्थमेकमेकमिच्छर वत्सान्पराददः॥ १४॥

भूरिऽभिः। समह। ऋषिऽभिः। बर्हिष्मत्ऽभिः। स्तविष्यसे।

यत्। इत्थम्। एकम्ऽएकम्। इत्। शर। वत्सान्। पराऽददः॥ १४॥

कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत्। अजां सुरिर्न धातवे॥ १५॥ [१०]

कर्णऽगृह्य। मघऽवा। शौरऽदेव्यः। वत्सम्। नः। त्रिऽभ्यः। आ। अनयत्। अजाम्। सूरिः। न। धातवे॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७० (७१)] [१५ सुदीतिपुरुमीळ्हावाङ्गिरसौ, तयोर्वान्यतरः। अग्निः। गायत्री,
१०-१५ प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)]

त्वं नो॑ अग्ने॒ महो॑भिः पा॒हि विश्व॑स्या॒ अरा॑तेः । उ॒त द्वि॒षो मर्त्य॑स्य ॥ १ ॥

त्वम् । न॒ः । अ॒ग्ने॒ । मह॑ःऽभिः । पा॒हि । विश्व॑स्याः । अरा॑तेः । उ॒त । द्वि॒षः । मर्त्य॑स्य ॥ १ ॥

न॒हि म॒न्युः पौरु॑षेय॒ ईशे॒ हि वः॑ प्रियजात । त्वमिद॑सि क्षपा॑वान् ॥ २ ॥

न॒हि । म॒न्युः । पौरु॑षेयः । ईशे॑ । हि । व॒ः । प्रि॒य॒ऽजा॒त॒ । त्वम् । इत् । अ॒सि॒ । क्षपा॑ऽवान् ॥ २ ॥

स नो॒ विश्वे॑भिर्दे॒वेभि॒रूर्जो॑ नपा॒द्भद्र॑शोचे । र॒यिं दे॑हि वि॒श्ववा॑रम् ॥ ३ ॥

सः । न॒ः । विश्वे॑भिः । दे॒वेभि॑ः । ऊर्जः॑ । न॒पा॒त् । भद्र॑ऽशोचे । र॒यिम् । दे॒हि॒ । वि॒श्वऽवा॑रम् ॥ ३ ॥

न तम॑ग्ने॒ अरा॑तयो॒ मर्तं॑ युवन्त रा॒यः । यं त्राय॑से दा॒श्वांस॑म् ॥ ४ ॥

न । तम् । अ॒ग्ने॒ । अरा॑तयः । मर्त॑म् । यु॒व॒न्त॒ । रा॒यः । यम् । त्राय॑से । दा॒श्वांस॑म् ॥ ४ ॥

यं त्वं वि॑प्र मे॒धसा॑ता॒वग्ने॑ हि॒नोषि॒ धना॑य । स तवो॒ती गोषु॒ गन्ता॑ ॥ ५ ॥ [११]

यम् । त्वम् । वि॒प्र॒ । मे॒धऽसा॑तौ । अग्ने॑ । हि॒नोषि॑ । धना॑य । सः । तव॑ । ऊ॒ती । गोषु॑ । गन्ता॑ ॥ ५ ॥

त्वं र॒यिं पु॑रु॒वीर॒मग्ने॑ दा॒शुषे॒ मर्ता॑य । प्र णो॑ नय॒ वस्यो॒ अच्छ॑ ॥ ६ ॥

त्वम् । र॒यिम् । पु॒रु॒ऽवीर॑म् । अग्ने॑ । दा॒शुषे॑ । मर्ता॑य । प्र । न॒ः । न॒य॒ । वस्य॑ः । अच्छ॑ ॥ ६ ॥

उ॒रु॒ष्या णो॒ मा परा॑ दा अघाय॒ते जा॑तवेदः । दु॒राध्ये॒३॒॑ मर्ता॑य ॥ ७ ॥

उ॒रु॒ष्य । न॒ः । मा । परा॑ । दा॒ः । अ॒घ॒ऽय॒ते । जा॒त॒ऽवे॒द॒ः । दुः॒ऽआ॒ध्ये॑ । मर्ता॑य ॥ ७ ॥

अग्ने॒ माकि॑ष्टे दे॒वस्य॑ रा॒तिमदे॑वो युयोत । त्वमी॑शिषे॒ वसू॑नाम् ॥ ८ ॥

अग्ने॑ । माकि॑ः । ते॒ । दे॒वस्य॑ । रा॒तिम् । अदे॑वः । यु॒यो॒त॒ । त्वम् । ई॒शि॒षे॒ । वसू॑नाम् ॥ ८ ॥

स नो॒ वस्व॒ उप॑ मा॒स्यूर्जो॑ नपा॒न्माहि॑नस्य । सखे॑ वसो जरि॒तृभ्य॑ः ॥ ९ ॥

सः । न॒ः । वस्व॑ः । उप॑ । मा॒सि॒ । ऊर्जः॑ । न॒पा॒त् । माहि॑नस्य । सखे॑ । व॒सो॒ इति॑ । ज॒रि॒तृऽभ्य॑ः ॥ ९ ॥

अच्छा॑ नः शी॒रशो॑चिषं॒ गिरो॑ यन्तु दर्श॒तम् ।
अच्छा॑ य॒ज्ञासो॒ नम॑सा पुरू॒वसुं॑ पुरुप्रश॒स्तमू॒तये॑ ॥ १० ॥ [१२]

अच्छ॑ । न॒ः । शी॒रऽशो॑चिषम् । गिर॑ः । य॒न्तु॒ । द॒र्श॒तम् ।
अच्छ॑ । य॒ज्ञास॑ः । नम॑सा । पु॒रु॒ऽवसु॑म् । पु॒रु॒ऽप्र॒श॒स्तम् । ऊ॒तये॑ ॥ १० ॥

अ॒ग्निं सू॒नुं सह॑सो जा॒तवे॑दसं दा॒नाय॒ वार्या॑णाम् ।
द्वि॒ता यो भूद॒मृतो॒ मर्त्ये॒ष्वा होता॑ म॒न्द्रत॑मो वि॒शि ॥ ११ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निम् । सूनुम् । सहसः । जातऽवेदसम् । दानाय । वार्याणाम् ।

द्विता । यः । भूत् । अमृतः । मर्त्येषु । आ । होता । मन्द्रऽतमः । विशि ॥ ११ ॥

अग्निं वो देवयज्ययाग्निं प्रयत्यध्वरे । अग्निं धीषु प्रथममग्निमर्वत्यग्निं क्षैत्राय साधसे ॥ १२ ॥

अग्निम् । वः । देवऽयज्यया । अग्निम् । प्रऽयति । अध्वरे ।

अग्निम् । धीषु । प्रथमम् । अग्निम् । अर्वति । अग्निम् । क्षैत्राय । साधसे ॥ १२ ॥

अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम् ।

अग्निं तोके तनये शश्वदीमहे वसुं सन्तं तनूपाम् ॥ १३ ॥

अग्निः । इषाम् । सख्ये । ददातु । नः । ईशे । यः । वार्याणाम् ।

अग्निम् । तोके । तनये । शश्वत् । ईमहे । वसुम् । सन्तम् । तनूऽपाम् ॥ १३ ॥

अग्निमीळिष्वावसे गाथाभिः शीरशोचिषम् ।

अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतये छर्दिः ॥ १४ ॥

अग्निम् । ईळिष्व । अवसे । गाथाभिः । शीरऽशोचिषम् ।

अग्निम् । राये । पुरुऽमीळ्ह । श्रुतम् । नरः । अग्निम् । सुऽदीतये । छर्दिः ॥ १४ ॥

अग्निं द्वेषो योतवै नो गृणीमस्यग्निं शं योश्च दातवे ।

विश्वासु विक्ष्ववितेव हव्यो भुवद्वस्तुर्ऋषूणाम् ॥ १५ ॥ [१३]

अग्निम् । द्वेषः । योतवै । नः । गृणीमसि । अग्निम् । शम् । योः । च । दातवे ।

विश्वासु । विक्षु । अविताऽइव । हव्यः । भुवत् । वस्तुः । ऋषूणाम् ॥ १५ ॥

[७१ (७२)] [१८ हर्यतः प्रागाथः । अग्निः, हवींषि वा । गायत्री ।]

हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः । विद्वाँ अस्य प्रशासनम् ॥ १ ॥

हविः । कृणुध्वम् । आ । गमत् । अध्वर्युः । वनते । पुनरिति । विद्वान् । अस्य । प्रऽशासनम् ॥ १ ॥

नि तिग्ममभ्यंशुं सीदद्धोता मनावधि । जुषाणो अस्य सख्यम् ॥ २ ॥

नि । तिग्मम् । अभि । अंशुम् । सीदत् । होता । मनौ । अधि । जुषाणः । अस्य । सख्यम् ॥ २ ॥

अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया । गृभ्णन्ति जिह्वया ससम् ॥ ३ ॥

अन्तः । इच्छन्ति । तम् । जने । रुद्रम् । परः । मनीषया । गृभ्णन्ति । जिह्वया । ससम् ॥ ३ ॥

जाम्यतीतपे धनुर्वयोधा अरुहद्वनम् । दृषदं जिह्वयावधीत् ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जामि। अतीतपे। धनुः। वयःऽधाः। अरुहत्। वनम्। दृषदम्। जिह्वया। आ। अवधीत्॥ ४॥

चरन्वत्सो रुशन्निह निदातारं न विन्दते। वेति स्तोतव अम्ब्यम्॥ ५॥ [१४]

चरन्। वत्सः। रुशन्। इह। निऽदातारम्। न। विन्दते। वेति। स्तोतवे। अम्ब्यम्॥ ५॥

उतो न्वस्य यन्महदश्वावद्योजनं बृहत्। दामा रथस्य ददृशे॥ ६॥

उतो इति। नु। अस्य। यत्। महत्। अश्वऽवत्। योजनम्। बृहत्। दामा। रथस्य। ददृशे॥ ६॥

दुहन्ति सप्तैकामुप द्वा पञ्च सृजतः। तीर्थे सिन्धोरधि स्वरे॥ ७॥

दुहन्ति। सप्त। एकाम्। उप। द्वा। पञ्च। सृजतः। तीर्थे। सिन्धोः। अधि। स्वरे॥ ७॥

आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत्। खेदया त्रिवृता दिवः॥ ८॥

आ। दशऽभिः। विवस्वतः। इन्द्रः। कोशम्। अचुच्यवीत्। खेदया। त्रिऽवृता। दिवः॥ ८॥

परि त्रिधातुरध्वरं जूर्णिरेति नवीयसी। मध्वा होतारो अञ्जते॥ ९॥

परि। त्रिऽधातुः। अध्वरम्। जूर्णिः। एति। नवीयसी। मध्वा। होतारः। अञ्जते॥ ९॥

सिञ्चन्ति नमसावतमुच्चाचक्रं परिज्मानम् नीचीनबारमक्षितम्॥ १०॥ [१५]

सिञ्चन्ति। नमसा। अवतम्। उच्चाऽचक्रम्। परिऽज्मानम्। नीचीनऽबारम्। अक्षितम्॥ १०॥

अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु। अवतस्य विसर्जने॥ ११॥

अभिऽआरम्। इत्। अद्रयः। निऽसिक्तम्। पुष्करे। मधु। अवतस्य। विऽसर्जने॥ ११॥

गाव उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया॥ १२॥

गावः। उप। अवत। अवतम्। मही इति। यज्ञस्य। रप्सुदा। उभा। कर्णा। हिरण्यया॥ १२॥

आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम्। रसा दधीत वृषभम्॥ १३॥

आ। सुते। सिञ्चत। श्रियम्। रोदस्योः। अभिऽश्रियम्। रसा। दधीत। वृषभम्॥ १३॥

ते जानत स्वमोक्यं१ सं वत्सासो न मातृभिः। मिथो नसन्त जामिभिः॥ १४॥

ते। जानत। स्वम्। ओक्यम्। सम्। वत्सासः। न। मातृऽभिः। मिथः। नसन्त। जामिऽभिः॥ १४॥

उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि। इन्द्रे अग्ना नमः स्वः॥ १५॥ [१६]

उप। स्रक्वेषु। बप्सतः। कृण्वते। धरुणम्। दिवि। इन्द्रे। अग्ना। नमः। स्वऽरिति स्वः॥ १५॥

अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः। सूर्यस्य सप्त रश्मिभिः॥ १६॥

अधुक्षत्। पिप्युषीम्। इषम्। ऊर्जम्। सप्तऽपदीम्। अरिः। सूर्यस्य। सप्त। रश्मिऽभिः॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोम॑स्य मि॒त्रावरु॒णोदि॑ता॒ सूर॒ आ द॑दे। तदातु॑रस्य भेष॒जम्॥ १७॥

सोम॑स्य। मि॒त्रा॒व॒रु॒णा॒। उत्ऽइ॑ता। सूरे॑। आ। द॒दे॒। तत्। आतु॑रस्य। भे॒ष॒जम्॥ १७॥

उ॒तो न्व॑स्य॒ यत्प॒दं ह॑र्य॒तस्य॑ निधा॒न्य॑म्। परि॒ द्यां जि॒ह्वया॑तनत्॥ १८॥ [१७]

उ॒तो इति॑। नु। अ॒स्य॒। यत्। प॒दम्। ह॒र्य॒तस्य॑। नि॒ऽधा॒न्य॑म्। परि॑। द्याम्। जि॒ह्वया॑। अ॒त॒न॒त्॥ १८॥

[७२ (७३)] [१८ गोपवन आत्रेयः, सप्तवध्रिर्वा। अश्विनौ। गायत्री।]

उदी॑राथामृताय॒ते यु॒ञ्जाथा॑मश्विना॒ रथ॑म्। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ १॥

उत्। ई॒रा॒था॒म्। ऋ॒त॒ऽय॒ते। यु॒ञ्जाथा॑म्। अ॒श्वि॒ना॒। रथ॑म्। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ १॥

नि॒मिष॑श्चि॒ज्जवी॑यसा॒ रथे॒ना या॑तमश्विना। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ २॥

नि॒ऽमिष॑ः। चि॒त्। जवी॑यसा। रथे॑न। आ। या॒त॒म्। अ॒श्वि॒ना॒। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ २॥

उप॑ स्तृणीत॒मत्र॑ये हि॒मेन॑ घ॒र्मम॑श्विना। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ३॥

उप॑। स्तृ॒णी॒त॒म्। अत्र॑ये। हि॒मेन॑। घ॒र्मम्। अ॒श्वि॒ना॒। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ३॥

कुह॑ स्थ॒ः कुह॑ जग्मथुः॒ कुह॑ श्ये॒नेव॑ पेतथुः। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ४॥

कुह॑। स्थ॒ः। कुह॑। ज॒ग्म॒थु॒ः। कह॑। श्ये॒नाऽइ॑व। पे॒त॒थु॒ः। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ४॥

यद॒द्य कर्हि॑ कर्हि॑ चिच्छुश्रू॒यात॑मि॒मं हव॑म्। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ५॥ [१८]

यत्। अ॒द्य। कर्हि॑। कर्हि॑। चि॒त्। शु॒श्रु॒यात॑म्। इ॒मम्। हव॑म्। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ५॥

अ॒श्विना॑ याम॒हूत॑मा॒ नेदि॑ष्ठं या॒म्याप्य॑म्। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ६॥

अ॒श्विना॑। या॒म॒ऽहूत॑मा। नेदि॑ष्ठम्। या॒मि॒। आप्य॑म्। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ६॥

अव॑न्त॒मत्र॑ये गृ॒हं कृ॑णु॒तं यु॒वम॑श्विना। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ७॥

अव॑न्तम्। अत्र॑ये। गृ॒हम्। कृ॒णु॒त॒म्। यु॒व॒म्। अ॒श्वि॒ना॒। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ७॥

वरे॑थे अ॒ग्निमा॒तपो॒ वद॑ते व॒ल्ग्वत्र॑ये। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ८॥

वरे॑थे॒ इति॑। अ॒ग्निम्। आ॒ऽतप॑ः। वद॑ते। व॒ल्गु। अत्र॑ये। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ८॥

प्र स॒प्तव॑ध्रिरा॒शसा॒ धारा॑म॒ग्नेर॑शायत। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ ९॥

प्र। स॒प्तऽव॑ध्रिः। आ॒ऽशसा॑। धारा॑म्। अ॒ग्नेः। अ॒शा॒य॒त॒। अन्ति॑। सत्। भू॒तु॒। वा॒म्। अव॑ः॥ ९॥

इ॒हा ग॑तं वृषण्वसू शृणु॒तं म॑ इ॒मं हव॑म्। अन्ति॒ षद्भू॑तु वा॒मव॑ः॥ १०॥ [१९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इह । आ । गतम् । वृषण्वसू इति वृषण्ऽवसू । शृणुतम् । मे । इमम् । हवम् ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ १० ॥

किमिदं वां पुराणवज्जरतोरिव शस्यते । अन्ति षद्भूतु वामवः ॥ ११ ॥

किम् । इदम् । वाम् । पुराणऽवत् । जरतोःऽइव । शस्यते । अन्ति । सत् । भूतु । वाम् । अवः ॥ ११ ॥

समानं वां सजात्यं समानो बन्धुरश्विना । अन्ति षद्भूतु वामवः ॥ १२ ॥

समानम् । वाम् । सऽजात्यम् । समानः । बन्धुः । अश्विना । अन्ति । सत् । भूतु । वाम् । अवः ॥ १२ ॥

यो वां रजांस्यश्विना रथो वियाति रोदसी । अन्ति षद्भूतु वामवः ॥ १३ ॥

यः । वाम् । रजांसि । अश्विना । रथः । विऽयाति । रोदसी इति । अन्ति । सत् । भूतु । वाम् । अवः ॥ १३ ॥

आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतम् । अन्ति षद्भूतु वामवः ॥ १४ ॥

आ । नः । गव्येभिः । अश्व्यैः । सहस्रैः । उप । गच्छतम् । अन्ति । सत् । भूतु । वाम् । अवः ॥ १४ ॥

मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम् । अन्ति षद्भूतु वामवः ॥ १५ ॥

मा । नः । गव्येभिः । अश्व्यैः । सहस्रेभिः । अति । ख्यतम् । अन्ति । सत् । भूतु । वाम् । अवः ॥ १५ ॥

अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी । अन्ति षद्भूतु वामवः ॥ १६ ॥

अरुणऽप्सुः । उषाः । अभूत् । अकः । ज्योतिः । ऋतऽवरी । अन्ति । सत् । भूतु । वाम् । अवः ॥ १६ ॥

अश्विना सु विचाकशद्वृक्षं परशुमाँइव । अन्ति षद्भूतु वामवः ॥ १७ ॥

अश्विना । सु । विऽचाकशत् । वृक्षम् । परशुमान्ऽइव । अन्ति । सत् । भूतु । वाम् । अवः ॥ १७ ॥

पुरं न धृष्णवा रुज कृष्णया बाधितो विशा । अन्ति षद्भूतु वामवः ॥ १८ ॥ [२०]

पुरम् । न । धृष्णो इति । आ । रुज । कृष्णया । बाधितः । विशा । अन्ति । सत् । भूतु । वाम् । अवः ॥ १८ ॥

[७३ (७४)] [१५ गोपवन आत्रेयः । अग्निः, १३-१५ आर्क्षस्य श्रुतर्वणो दानस्तुतिः । १-१२ अनुष्टुम्मुखः प्रगाथः = (अनुष्टुप् + गायत्र्यौ), १३-१५ अनुष्टुप् ।]

विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् । अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ १ ॥

विशःऽविशः । वः । अतिथिम् । वाजऽयन्तः । पुरुऽप्रियम् ।
अग्निम् । वः । दुर्यम् । वचः । स्तुषे । शूषस्य । मन्मऽभिः ॥ १ ॥

यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् । प्रशंसन्ति प्रशस्तिभिः ॥ २ ॥

यम् । जनासः । हविष्मन्तः । मित्रम् । न । सर्पिःऽआसुतिम् । प्रऽशंसन्ति । प्रशस्तिऽभिः ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पन्यांसं जातवेदसं यो देवतात्युद्यता। हव्यान्यैरयद्दिवि ॥ ३ ॥

पन्यांसम्। जातऽवेदसम्। यः। देवऽताति। उत्ऽयता। हव्यानि। ऐरयत। दिवि ॥ ३ ॥

आगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम्। यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥ ४ ॥

आ। अगन्म। वृत्रहन्ऽतमम्। ज्येष्ठम्। अग्निम्। आनवम्।

यस्य। श्रुतर्वा। बृहन्। आर्क्षः। अनीके। एधते ॥ ४ ॥

अमृतं जातवेदसं तिरस्तमांसि दर्शतम्। घृताहवनमीड्यम् ॥ ५ ॥ [२१]

अमृतम्। जातऽवेदसम्। तिरः। तमांसि। दर्शतम्। घृतऽआहवनम्। ईड्यम् ॥ ५ ॥

सबाधो यं जना इमे३ऽग्निं हव्येभिरीळते। जुह्वानासो यतस्रुचः ॥ ६ ॥

सऽबाधः। यम्। जनाः। इमे। अग्निम्। हव्येभिः। ईळते। जुह्वानासः। यतऽस्रुचः ॥ ६ ॥

इयं ते नव्यसी मतिरग्ने अधाय्यस्मदा। मन्द्र सुजात सुक्रतोऽमूर दस्मातिथे ॥ ७ ॥

इयम्। ते। नव्यसी। मतिः। अग्ने। अधायि। अस्मत्। आ।

मन्द्र। सुऽजात। सुक्रतो इति सुऽक्रतो। अमूर। दस्म। अतिथे ॥ ७ ॥

सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया। तया वर्धस्व सुष्टुतः ॥ ८ ॥

सा। ते। अग्ने। शम्ऽतमा। चनिष्ठा। भवतु। प्रिया। तया। वर्धस्व। सुऽस्तुतः ॥ ८ ॥

सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि श्रवः। दधीत वृत्रतूर्ये ॥ ९ ॥

सा। द्युम्नैः। द्युम्निनी। बृहत्। उपऽउप। श्रवसि। श्रवः। दधीत। वृत्रऽतूर्ये ॥ ९ ॥

अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्पतिम्। यस्य श्रवांसि तूर्वथ पन्यंपन्यं च कृष्टयः ॥ १० ॥ [२२]

अश्वम्। इत्। गाम्। रथऽप्राम्। त्वेषम्। इन्द्रम्। न। सत्ऽपतिम्।

यस्य। श्रवांसि। तूर्वथ। पन्यम्ऽपन्यम्। च। कृष्टयः ॥ १० ॥

यं त्वा गोपवनो गिरा चनिष्ठदग्ने अङ्गिरः। स पावक श्रुधी हवम् ॥ ११ ॥

यम्। त्वा। गोपवनः। गिरा। चनिष्ठत्। अग्ने। अङ्गिरः। सः। पावक। श्रुधि। हवम् ॥ ११ ॥

यं त्वा जनास ईळते सबाधो वाजसातये। स बोधि वृत्रतूर्ये ॥ १२ ॥

यम्। त्वा। जनासः। ईळते। सऽबाधः। वाजऽसातये। सः। बोधि। वृत्रऽतूर्ये ॥ १२ ॥

अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति। शर्धांसीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ॥ १३ ॥

अहम्। हुवानः। आर्क्षे। श्रुतर्वणि। मदऽच्युति।

शर्धांसिऽइव। स्तुकाऽविनाम्। मृक्षा। शीर्षा। चतुर्णाम् ॥ १३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मां चत्वार आशवः शविष्ठस्य द्रवित्नवः। सुरथासो अभि प्रयो वक्षन्वयो न तुग्र्यम्॥ १४॥

माम्। चत्वारः। आशवः। शविष्ठस्य। द्रवित्नवः।

सुऽरथासः। अभि। प्रयः। वक्षन्। वयः। न। तुग्र्यम्॥ १४॥

सत्यमित्त्वा महेनदि परुष्ण्यव देदिशम्। नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः॥ १५॥ [२३]

सत्यम्। इत्। त्वा। महेऽनदि। परुष्णि। अव। देदिशम्।

न। ईम्। आपः। अश्वऽदातरः। शविष्ठात्। अस्ति। मर्त्यः॥ १५॥

[७४ (७५)] [१६ विरूप आङ्गिरसः। अग्निः। गायत्री।]

युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव। नि होता पूर्व्यः सदः॥ १॥

युक्ष्व। हि। देवऽहूतमान्। अश्वान्। अग्ने। रथीःऽइव। नि। होता। पूर्व्यः। सदः॥ १॥

उत नो देव देवाँ अच्छा वोचो विदुष्टरः। श्रद्विश्वा वार्या कृधि॥ २॥

उत। नः। देव। देवान्। अच्छ। वोचः। विदुःऽतरः। श्रत्। विश्वा। वार्या। कृधि॥ २॥

त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः॥ ३॥

त्वम्। ह। यत्। यविष्ठ्य। सहसः। सूनो इति। आऽहुत। ऋतऽवा। यज्ञियः। भुवः॥ ३॥

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम्॥ ४॥

अयम्। अग्निः। सहस्रिणः। वाजस्य। शतिनः। पतिः। मूर्धा। कविः। रयीणाम्॥ ४॥

तं नेमिमृभवो यथा नमस्व सहूतिभिः। नेदीयो यज्ञमङ्गिरः॥ ५॥ [२४]

तम्। नेमिम्। ऋभवः। यथा। आ। नमस्व। सहूतिऽभिः। नेदीयः। यज्ञम्। अङ्गिरः॥ ५॥

तस्मै नूनमभिद्यवे वाचा विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिम्॥ ६॥

तस्मै। नूनम्। अभिऽद्यवे। वाचा। विऽरूप। नित्यया। वृष्णे। चोदस्व। सुऽस्तुतिम्॥ ६॥

कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः। पणिं गोषु स्तरामहे॥ ७॥

कम्। ऊँ इति। स्वित्। अस्य। सेनया। अग्नेः। अपाकऽचक्षसः। पणिम्। गोषु। स्तरामहे॥ ७॥

मा नो देवानां विशः प्रस्नातीरिवोस्राः। कृशं न हासुरघ्न्याः॥ ८॥

मा। नः। देवानाम्। विशः। प्रस्नातीःऽइव। उस्राः। कृशम्। न। हासुः। अघ्न्याः॥ ८॥

मा नः समस्य दूढ्यः परिद्वेषसो अंहतिः। ऊर्मिर्न नावमा वधीत्॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा । नः । समस्य । दुःऽध्यः । परिऽद्वेषसः । अंहतिः । ऊर्मिः । न । नावम् । आ । वधीत् ॥ ९ ॥

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ॥ १० ॥ [२५]

नमः । ते । अग्ने । ओजसे । गृणन्ति । देव । कृष्टयः । अमैः । अमित्रम् । अर्दय ॥ १० ॥

कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कृधि ॥ ११ ॥

कुवित् । सु । नः । गोऽइष्टये । अग्ने । सम्ऽवेषिषः । रयिम् । उरुऽकृत् । उरु । नः । कृधि ॥ ११ ॥

मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा । संवर्गं सं रयिं जय ॥ १२ ॥

मा । नः । अस्मिन् । महाऽधने । परा । वर्क् । भारऽभृत् । यथा । सम्ऽवर्गम् । सम् । रयिम् । जय ॥ १२ ॥

अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना । वर्धा नो अमवच्छवः ॥ १३ ।

अन्यम् । अस्मत् । भियै । इयम् । अग्ने । सिसक्तु । दुच्छुना । वर्ध । नः । अमऽवत् । शवः ॥ १३ ॥

यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा । तं घेदग्निर्वृधावति ॥ १४ ॥

यस्य । अजुषत् । नमस्विनः । शमीम् । अदुःऽमखस्य । वा । तम् । घ । इत् । अग्निः । वृधा । अवति ॥ १४ ॥

परस्या अधि संवतोऽवराँ अभ्या तर । यत्राहमस्मि ताँ अव ॥ १५ ॥

परस्याः । अधि । सम्ऽवतः । अवरान् । अभि । आ । तर । यत्र । अहम् । अस्मि । तान् । अव ॥ १५ ॥

विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः । अधा ते सुम्नमीमहे ॥ १६ ॥ [२६]

विद्म । हि । ते । पुरा । वयम् । अग्ने । पितुः । यथा । अवसः । अध । ते । सुम्नम् । ईमहे ॥ १६ ॥

[७५ (७६)] [१२ कुरुसुतिः काण्वः । इन्द्रः । गायत्री ।]

इमं नु मायिनं हुव इन्द्रमीशानमोजसा । मरुत्वन्तं न वृञ्जसे ॥ १ ॥

इमम् । नु । मायिनम् । हुवे । इन्द्रम् । ईशानम् । ओजसा । मरुत्वन्तम् । न । वृञ्जसे ॥ १ ॥

अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः । वज्रेण शतपर्वणा ॥ २ ॥

अयम् । इन्द्रः । मरुत्ऽसखा । वि । वृत्रस्य । अभिनत् । शिरः । वज्रेण । शतऽपर्वणा ॥ २ ॥

वावृधानो मरुत्सखेन्द्रो वि वृत्रमैरयत् । सृजन्त्समुद्रिया अपः ॥ ३ ॥

ववृधानः । मरुत्ऽसखा । इन्द्रः । वि । वृत्रम् । ऐरयत् । सृजन् । समुद्रियाः । अपः ॥ ३ ॥

अयं ह येन वा इदं स्वर्मरुत्वता जितम् । इन्द्रेण सोमपीतये ॥ ४ ॥

अयम् । ह । येन । वै । इदम् । स्वः । मरुत्वता । जितम् । इन्द्रेण । सोमऽपीतये ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मरुत्वन्तमृजीषिणमोजस्वन्तं विरप्शिनम्। इन्द्रं गीर्भिर्हवामहे॥ ५॥ [२७]

मरुत्वन्तम्। ऋजीषिणम्। ओजस्वन्तम्। विऽरप्शिनम्। इन्द्रम्। गीःऽभिः। हवामहे॥ ५॥

इन्द्रं प्रत्नेन मन्मना मरुत्वन्तं हवामहे। अस्य सोमस्य पीतये॥ ६॥

इन्द्रम्। प्रत्नेन। मन्मना। मरुत्वन्तम्। हवामहे। अस्य। सोमस्य। पीतये॥ ६॥

मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो। अस्मिन्यज्ञे पुरुष्टुत॥ ७॥

मरुत्वान्। इन्द्र। मीढ्वः। पिब। सोमम्। शतक्रतो इति शतक्रतो। अस्मिन्। यज्ञे। पुरुऽस्तुत॥ ७॥

तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः। हृदा हूयन्त उक्थिनः॥ ८॥

तुभ्य। इत्। इन्द्र। मरुत्वते। सुताः। सोमासः। अद्रिऽवः। हृदा। हूयन्ते। उक्थिनः॥ ८॥

पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु। वज्रं शिशान ओजसा॥ ९॥

पिब। इत्। इन्द्र। मरुत्ऽसखा। सुतम्। सोमम्। दिविष्टिषु। वज्रम्। शिशानः। ओजसा॥ ९॥

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः। सोममिन्द्र चमू सुतम्॥ १०॥

उत्ऽतिष्ठन्। ओजसा। सह। पीत्वी। शिप्रे इति। अवेपयः। सोमम्। इन्द्र। चमू इति। सुतम्॥ १०॥

अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम्। इन्द्र यद्दस्युहाभवः॥ ११॥

अनु। त्वा। रोदसी इति। उभे इति। क्रक्षमाणम्। अकृपेताम्। इन्द्र। यत्। दस्युऽहा। अभवः॥ ११॥

वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम्। इन्द्रात्परि तन्वं ममे॥ १२॥ [२८]

वाचम्। अष्टाऽपदीम्। अहम्। नवऽस्रक्तिम्। ऋतऽस्पृशम्। इन्द्रात्। परि। तन्वम्। ममे॥ १२॥

[७६ (७७)] [११ कुरुसुतिः काण्वः। इन्द्रः। गायत्री, १०-११ प्रगाथः = (बृहती, सतोबृहती)]

जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरम्। क उग्राः के ह शृण्विरे॥ १॥

जज्ञानः। नु। शतऽक्रतुः। वि। पृच्छत्। इति। मातरम्। के। उग्राः। के। ह। शृण्विरे॥ १॥

आदीं शवस्यब्रवीदौर्णवाभमहीशुवम्। ते पुत्र सन्तु निष्टुरः॥ २॥

आत्। ईम्। शवसी। अब्रवीत्। और्णऽवाभम्। अहीशुवम्। ते। पुत्र। सन्तु। निःऽतुरः॥ २॥

समित्तान्वृत्रहाखिदत्खे अराँइव खेदया। प्रवृद्धो दस्युहाभवत्॥ ३॥

सम्। इत्। तान्। वृत्रऽहा। अखिदत्। खे। अरान्ऽइव। खेदया। प्रऽवृद्धः। दस्युऽहा। अभवत्॥ ३॥

एकया प्रतिधापिबत्साकं सरांसि त्रिंशतम्। इन्द्रः सोमस्य काणुका॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकया। प्रति॰धा। अपिबत्। साकम्। सरांसि। त्रिंशतम्। इन्द्रः। सोमस्य। काणुका॥ ४॥

अभि गन्धर्वमतृणदबुध्नेषु रजःस्वा। इन्द्रो ब्रह्मभ्य इद्वृधे॥ ५॥ [२९]

अभि। गन्धर्वम्। अतृणत्। अबुध्नेषु। रजःऽसु। आ। इन्द्रः। ब्रह्म॰भ्यः। इत्। वृधे॥ ५॥

निराविध्यादिरिभ्य आ धारयत्पक्वमोदनम्। इन्द्रो बुन्दं स्वाततम्॥ ६॥

निः। अविध्यत्। गिरि॰भ्यः। आ। धारयत्। पक्वम्। ओदनम्। इन्द्रः। बुन्दम्। सु॰आततम्॥ ६॥

शतब्रध्न इषुस्तव सहस्रपर्ण एक इत। यमिन्द्र चकृषे युजम्॥ ७॥

शत॰ब्रध्नः। इषुः। तव। सहस्र॰पर्णः। एकः। इत्। यम्। इन्द्र। चकृषे। युजम्॥ ७॥

तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे। सद्यो जात ऋभुष्ठिर॥ ८॥

तेन। स्तोतृ॰भ्यः। आ। भर। नृ॰भ्यः। नारि॰भ्यः। अत्तवे। सद्यः। जातः। ऋभु॰स्थिर॥ ८॥

एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा। हृदा वीड्वधारयः॥ ९॥

एता। च्यौत्नानि। ते। कृता। वर्षिष्ठानि। परीणसा। हृदा। वीळु। अधारयः॥ ९॥

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः। शतं महिषान्क्षीरपाकमोदनं वराहमिन्द्र एमुषम्॥ १०॥

विश्वा। इत्। ता। विष्णुः। आ। अभरत्। उरु॰क्रमः। त्वा॰इषितः।

शतम्। महिषान्। क्षीर॰पाकम्। ओदनम्। वराहम्। इन्द्रः। एमुषम्॥ १०॥

तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः।

उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा॥ ११॥ [३०]

तुवि॰क्षम्। ते। सु॰कृतम्। सु॰मयम्। धनुः। साधुः। बुन्दः। हिरण्ययः।

उभा। ते। बाहू इति। रण्या। सु॰संस्कृता। ऋदु॰पे। चित्। ऋदु॰वृधा॥ ११॥

[७७ (७८)] [१० कुरुसुतिः काण्वः। इन्द्रः। गायत्री, १० बृहती।]

पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर। शता च शूर गोनाम्॥ १॥

पुरोळाशम्। नः। अन्धसः। इन्द्र। सहस्रम्। आ। भर। शता। च। शूर। गोनाम्॥ १॥

आ नो भर व्यञ्जनं गामश्वमभ्यञ्जनम्। सचा मना हिरण्यया॥ २॥

आ। नः। भर। वि॰अञ्जनम्। गाम्। अश्वम्। अभि॰अञ्जनम्। सचा। मना। हिरण्यया॥ २॥

उत नः कर्णशोभना पुरूणि धृष्णवा भर। त्वं हि शृण्विषे वसो॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत। नः। कर्णऽशोभना। पुरूणि। धृष्णो इति। आ। भर। त्वम्। हि। शृण्विषे। वसो इति॥ ३॥

नकीं वृधीक इन्द्र ते न सुषा न सुदा उत। नान्यस्त्वच्छूर वाघतः॥ ४॥

नकीम्। वृधीकः। इन्द्र। ते। न। सुऽसाः। न। सुऽदाः। उत। न। अन्यः। त्वत्। शूर। वाघतः॥ ४॥

नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे। विश्वं शृणोति पश्यति॥ ५॥ [३१]

नकीम्। इन्द्रः। निऽकर्तवे। न। शक्रः। परिऽशक्तवे। विश्वम्। शृणोति। पश्यति॥ ५॥

स मन्युं मर्त्यानामदब्धो नि चिकीषते। पुरा निदश्चिकीषते॥ ६॥

सः। मन्युम्। मर्त्यानाम्। अदब्धः। नि। चिकीषते। पुरा। निदः। चिकीषते॥ ६॥

क्रत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः। वृत्रघ्नः सोमपाव्नः॥ ७॥

क्रत्वः। इत्। पूर्णम्। उदरम्। तुरस्य। अस्ति। विधतः। वृत्रऽघ्नः। सोमऽपाव्नः॥ ७॥

त्वे वसूनि संगता विश्वा च सोम सौभगा। सुदात्वपरिह्वता॥ ८॥

त्वे इति। वसूनि। सम्ऽगता। विश्वा। च। सोम। सौभगा। सुऽदातु। अपरिऽह्वता॥ ८॥

त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः। त्वामश्वयुरेषते॥ ९॥

त्वाम्। इत्। यवऽयुः। मम। कामः। गव्युः। हिरण्यऽयुः। त्वाम्। अश्वऽयुः। आ। ईषते॥ ९॥

तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे।

दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना॥ १०॥ [३२]

तव। इत्। इन्द्र। अहम्। आऽशसा। हस्ते। दात्रम्। चन। आ। ददे।

दिनस्य। वा। मघऽवन्। सम्ऽभृतस्य। वा। पूर्धि। यवस्य। काशिना॥ १०॥

[७८ (७९)] [९ कृत्नुर्भार्गवः। सोमः। गायत्री, ९ अनुष्टुप्।]

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येन॥ १॥

अयम्। कृत्नुः। अगृभीतः। विश्वऽजित्। उत्ऽभित्। इत्। सोमः। ऋषिः। विप्रः। काव्येन॥ १॥

अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम्। प्रेमन्धः ख्यन्निः श्रोणो भूत्॥ २॥

अभि। ऊर्णोति। यत्। नग्नम्। भिषक्ति। विश्वम्। यत्। तुरम्।

प्र। ईम्। अन्धः। ख्यत्। निः। श्रोणः। भूत्॥ २॥

त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः। उरु यन्तासि वरूथम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। सोम। तनूकृत्॰भ्यः। द्वेषः॰भ्यः। अन्य॰कृतेभ्यः। उरु। यन्ता। असि। वरूथम्॥ ३॥

त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन्। यावीरघस्य चिद्द्वेषः॥ ४॥

त्वम्। चित्ती। तव। दक्षैः। दिवः। आ। पृथिव्याः। ऋजीषिन्। यावीः। अघस्य। चित्। द्वेषः॥ ४॥

अर्थिनो यन्ति चेदर्थं गच्छानिद्ददुषो रातिम्। ववृज्युस्तृष्यतः कामम्॥ ५॥ [३३]

अर्थिनः। यन्ति। च। इत्। अर्थम्। गच्छान्। इत्। ददुषः। रातिम्। ववृज्युः। तृष्यतः। कामम्॥ ५॥

विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत्। प्रेमायुस्तारीदतीर्णम्॥ ६॥

विदत्। यत्। पूर्व्यम्। नष्टम्। उत्। ईम्। ऋत॰युम्। ईरयत्। प्र। ईम्। आयुः। तारीत्। अतीर्णम्॥ ६॥

सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः। भवा नः सोम शं हृदे॥ ७॥

सु॰शेवः। नः। मृळयाकुः। अदृप्त॰क्रतुः। अवातः। भव। नः। सोम। शम्। हृदे॥ ७॥

मा नः सोम सं वीविजो मा वि बीभिषथा राजन्। मा नो हार्दि त्विषा वधीः॥ ८॥

मा। नः। सोम। सम्। वीविजः। मा। वि। बीभिषथाः। राजन्। मा। नः। हार्दि। त्विषा। वधीः॥ ८॥

अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे। राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध॥ ९॥ [३४]

अव। यत्। स्वे। सध॰स्थे। देवानाम्। दुः॰मतीः। ईक्षे।
राजन्। अप। द्विषः। सेध। मीढ्वः। अप। स्रिधः। सेध॥ ९॥

[७९ (८०)] [१० एकद्यूनौधसः। इन्द्रः, १० देवाः। गायत्री, १० त्रिष्टुप्।]

नह्य१न्यं बळाकरं मर्डितारं शतक्रतो। त्वं न इन्द्र मृळय॥ १॥

नहि। अन्यम्। बळा। अकरम्। मर्डितारम्। शतक्रतो इति शत॰क्रतो। त्वम्। नः। इन्द्र। मृळय॥ १॥

यो नः शश्वत्पुराविथामृध्रो वाजसातये। स त्वं न इन्द्र मृळय॥ २॥

यः। नः। शश्वत्। पुरा। आविथ। अमृध्रः। वाज॰सातये। सः। त्वम्। नः। इन्द्र। मृळय॥ २॥

किमङ्ग रध्रचोदनः सुन्वानस्यावितेदसि। कुवित्स्विन्द्र णः शकः॥ ३॥

किम्। अङ्ग। रध्र॰चोदनः। सुन्वानस्य। अविता। इत्। असि। कुवित्। सु। इन्द्र। नः। शकः॥ ३॥

इन्द्र प्र णो रथमव पश्चाच्चित्सन्तमद्रिवः। पुरस्तादेनं मे कृधि॥ ४॥

इन्द्र। प्र। नः। रथम्। अव। पश्चात्। चित्। सन्तम्। अद्रि॰वः। पुरस्तात्। एनम्। मे। कृधि॥ ४॥

हन्तो नु किमाससे प्रथमं नो रथं कृधि। उपमं वाजयु श्रवः॥ ५॥ [३५]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हन्तो इति । नु । किम् । आससे । प्रथमम् । नः । रथम् । कृधि । उपऽमम् । वाजऽयु । श्रवः ॥ ५ ॥

अवा नो वाजयुं रथं सुकरं ते किमित्परि । अस्मान्त्सु जिग्युषस्कृधि ॥ ६ ॥

अव । नः । वाजऽयुम् । रथम् । सुऽकरम् । ते । किम् । इत् । परि । अस्मान् । सु । जिग्युषः । कृधि ॥ ६ ॥

इन्द्र दृह्यस्व पूरसि भद्रा त एति निष्कृतम् । इयं धीर्ऋत्वियावती ॥ ७ ॥

इन्द्र । दृह्यस्व । पूः । असि । भद्रा । ते । एति । निःऽकृतम् । इयम् । धीः । ऋत्वियऽवती ॥ ७ ॥

मा सीमवद्य आ भागुर्वी काष्ठा हितं धनम् । अपावृक्ता अरत्नयः ॥ ८ ॥

मा । सीम् । अवद्ये । आ । भाक् । उर्वी । काष्ठा । हितम् । धनम् । अपऽआवृक्ताः । अरत्नयः ॥ ८ ॥

तुरीयं नाम यज्ञियं यदा करस्तदुश्मसि । आदित्पतिर्न ओहसे ॥ ९ ॥

तुरीयम् । नाम । यज्ञियम् । यदा । करः । तत् । उश्मसि । आत् । इत् । पतिः । नः । ओहसे ॥ ९ ॥

अवीवृधद्वो अमृता अमन्दीदेकद्यूर्देवा उत याश्च देवीः ।

तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १० ॥ [३६] {८}

अवीवृधत् । वः । अमृताः । अमन्दीत् । एकऽद्यूः । देवाः । उत । याः । च । देवीः ।

तस्मै । ऊँ इति । राधः । कृणुत । प्रऽशस्तम् । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १० ॥

[८० (८१)] [९ कुसीत काण्वः । इन्द्रः । गायत्री ।]

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥

आ । तु । नः । इन्द्र । क्षुऽमन्तम् । चित्रम् । ग्राभम् । सम् । गृभाय । महाऽहस्ती । दक्षिणेन ॥ १ ॥

विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ॥ २ ॥

विद्म । हि । त्वा । तुविऽकूर्मिम् । तुविऽदेष्णम् । तुविऽमघम् । तुविऽमात्रम् । अवःऽभिः ॥ २ ॥

नहि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ॥ ३ ॥

नहि । त्वा । शूर । देवाः । न । मर्तासः । दित्सन्तम् । भीमम् । न । गाम् । वारयन्ते ॥ ३ ॥

एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् । न राधसा मर्धिषन्नः ॥ ४ ॥

एतो इति । नु । इन्द्रम् । स्तवाम । ईशानम् । वस्वः । स्वऽराजम् । न । राधसा । मर्धिषत् । नः ॥ ४ ॥

प्र स्तोषदुप गासिषच्छ्रवत्साम गीयमानम् । अभि राधसा जुगुरत् ॥ ५ ॥ [३७]

प्र । स्तोषत् । उप । गासिषत् । श्रवत् । साम । गीयमानम् । अभि । राधसा । जुगुरत् ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ नो॑ भर॒ दक्षि॑णेना॒भि स॒व्येन॒ प्र मृ॑श। इन्द्र॒ मा नो॒ वसो॒र्निर्भा॑क्॥ ६॥

आ। न॒ः। भ॒र॒। दक्षि॑णेन। अ॒भि। स॒व्येन॑। प्र। मृ॒श॒। इन्द्र॑। मा। न॒ः। वसो॑ः। निः। भा॒क्॥ ६॥

उप॑ क्रम॒स्वा भ॑र धृ॒ष॒ता धृ॑ष्णो॒ जना॑नाम्। अदा॑शूष्टरस्य॒ वेद॑ः॥ ७॥

उप॑। क्र॒म॒स्व॒। आ। भ॒र॒। धृ॒ष॒ता। धृ॒ष्णो॒ इति॑। जना॑नाम्। अदा॑शूःऽतरस्य। वेद॑ः॥ ७॥

इन्द्र॒ य उ॒ नु ते॒ अस्ति॒ वाजो॒ विप्रे॑भि॒ः सनि॑त्वः। अ॒स्माभि॒ः सु तं स॑नुहि॥ ८॥

इन्द्र॑। यः। ऊँ इति॑। नु। ते॒। अस्ति॑। वाज॑ः। विप्रे॑भिः। सनि॑त्वः। अ॒स्माभि॑ः। सु। तम्। स॒नु॒हि॒॥ ८॥

स॒द्योजु॑वस्ते॒ वाजा॑ अ॒स्मभ्यं॑ वि॒श्वश्च॑न्द्राः। वशै॑श्च म॒क्षू ज॑रन्ते॥ ९॥ [३८]

स॒द्यःऽजुव॑ः। ते॒। वाजा॑ः। अ॒स्मभ्य॑म्। वि॒श्वऽच॑न्द्रा। वशै॑ः। च॒। म॒क्षु। ज॒र॒न्ते॒॥ ९॥

इत्याश्वलायन-संहितायां
षष्ठाष्टके
पञ्चमोऽध्याय
समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके षष्ठोऽध्यायः ॥

[८१ (८२)] [९ कुसीदी काण्वः। इन्द्रः। गायत्री।]

आ प्र द्रव परावतोऽर्वावतश्च वृत्रहन्। मध्वः प्रति प्रभर्मणि ॥ १ ॥

आ। प्र। द्रव। पराऽवतः। अर्वाऽवतः। च। वृत्रऽहन्। मध्वः। प्रति। प्रऽभर्मणि ॥ १ ॥

तीव्राः सोमास आ गहि सुतासो मादयिष्णवः। पिबा दधृग्यथोचिषे ॥ २ ॥

तीव्राः। सोमासः। आ। गहि। सुतासः। मादयिष्णवः। पिब। दधृक्। यथा। ओचिषे ॥ २ ॥

इषा मन्दस्वादु तेऽरं वराय मन्यवे। भुवत्त इन्द्र शं हृदे ॥ ३ ॥

इषा। मन्दस्व। आत्। ऊँ इति। ते। अरम्। वराय। मन्यवे। भुवत्। ते। इन्द्र। शम्। हृदे ॥ ३ ॥

आ त्वशत्रवा गहि न्युक्थानि च हूयसे। उपमे रोचने दिवः ॥ ४ ॥

आ। तु। अशत्रो इति। आ। गहि। नि। उक्थानि। च। हूयसे। उपऽमे। रोचने। दिवः ॥ ४ ॥

तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम्। प्र सोम इन्द्र हूयते ॥ ५ ॥ [१]

तुभ्य। अयम्। अद्रिऽभिः। सुतः। गोभिः। श्रीतः। मदाय। कम्। प्र। सोमः। इन्द्र। हूयते ॥ ५ ॥

इन्द्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः। वि पीतिं तृप्तिमश्नुहि ॥ ६ ॥

इन्द्र। श्रुधि। सु। मे। हवम्। अस्मे इति। सुतस्य। गोऽमतः। वि। पीतिम्। तृप्तिम्। अश्नुहि ॥ ६ ॥

य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे ॥ ७ ॥

यः। इन्द्र। चमसेषु। आ। सोमः। चमूषु। ते। सुतः। पिब। इत्। अस्य। त्वम्। ईशिषे ॥ ७ ॥

यो अप्सु चन्द्रमाइव सोमश्चमूषु ददृशे। पिबेदस्य त्वमीशिषे ॥ ८ ॥

यः। अप्ऽसु। चन्द्रमाःऽइव। सोमः। चमूषु। ददृशे। पिब। इत्। अस्य। त्वम्। ईशिषे ॥ ८ ॥

यं ते श्येनः पदाभरत्तिरो रजांस्यस्पृतम्। पिबेदस्य त्वमीशिषे ॥ ९ ॥ [२]

यम्। ते। श्येनः। पदा। आ। अभरत्। तिरः। रजांसि। अस्पृतम्। पिब। इत्। अस्य। त्वम्। ईशिषे ॥ ९ ॥

[८२ (८३)] [९ कुसीदी काण्वः। विश्वे देवाः। गायत्री।]

देवानामिदवो महत्तदा वृणीमहे वयम्। वृष्णामस्मभ्यमूतये ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम्। वराय देव मन्यवे ॥ ४ ॥

कया। ते। अग्ने। अङ्गिरः। ऊर्जः। नपात्। उपऽस्तुतिम्। वराय। देव। मन्यवे ॥ ४ ॥

दाशेम कस्य मनसा यज्ञस्य सहसो यहो। कदु वोच इदं नमः ॥ ५ ॥ [५]

दाशेम। कस्य। मनसा। यज्ञस्य। सहसः। यहो इति। कत्। ऊँ इति। वोचे। इदम्। नमः ॥ ५ ॥

अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिरः ॥ ६ ॥

अध। त्वम्। हि। नः। करः। विश्वाः। अस्मभ्यम्। सुऽक्षितीः। वाजऽद्रविणसः। गिरः ॥ ६ ॥

कस्य नूनं परीणसो धियो जिन्वसि दंपते। गोषाता यस्य ते गिरः ॥ ७ ॥

कस्य। नूनम्। परीणसः। धियः। जिन्वसि। दम्ऽपते। गोऽसाता। यस्य। ते। गिरः ॥ ७ ॥

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनम् ॥ ८ ॥

तम्। मर्जयन्त। सुऽक्रतुम्। पुरःऽयावानम्। आजिषु। स्वेषु। क्षयेषु। वाजिनम् ॥ ८ ॥

क्षेति क्षेमेभिः साधुभिर्नकिर्यं घ्नन्ति हन्ति यः। अग्ने सुवीर एधते ॥ ९ ॥ [६]

क्षेति। क्षेमेभिः। साधुऽभिः। नकिः। यम्। घ्नन्ति। हन्ति। यः। अग्ने। सुऽवीरः। एधते ॥ ९ ॥

[८४ (८५)] [९ कृष्ण आङ्गिरसः। अश्विनौ। गायत्री।]

आ मे हवं नासत्याश्विना गच्छतं युवम्। मध्वः सोमस्य पीतये ॥ १ ॥

आ। मे। हवम्। नासत्या। अश्विना। गच्छतम्। युवम्। मध्वः। सोमस्य। पीतये ॥ १ ॥

इमं मे स्तोममश्विनेमं मे शृणुतं हवम्। मध्वः सोमस्य पीतये ॥ २ ॥

इयम्। मे। स्तोमम्। अश्विना। इमम्। मे। शृणुतम्। हवम्। मध्वः। सोमस्य। पीतये ॥ २ ॥

अयं वां कृष्णो अश्विना हवते वाजिनीवसू। मध्वः सोमस्य पीतये ॥ ३ ॥

अयम्। वाम्। कृष्णः। अश्विना। हवते। वाजिनीवसू इति वाजिनीऽवसू। मध्वः। सोमस्य। पीतये ॥ ३ ॥

शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा। मध्वः सोमस्य पीतये ॥ ४ ॥

शृणुतम्। जरितुः। हवम्। कृष्णस्य। स्तुवतः। नरा। मध्वः। सोमस्य। पीतये ॥ ४ ॥

छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा। मध्वः सोमस्य पीतये ॥ ५ ॥ [७]

छर्दिः। यन्तम्। अदाभ्यम्। विप्राय। स्तुवते। नरा। मध्वः। सोमस्य। पीतये ॥ ५ ॥

गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना। मध्वः सोमस्य पीतये ॥ ६ ॥

गच्छतम्। दाशुषः। गृहम्। इत्था। स्तुवतः। अश्विना। मध्वः। सोमस्य। पीतये ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवानाम्। इत्। अवः। महत्। तत्। आ। वृणीमहे। वयम्। वृष्णाम्। अस्मभ्यम्। ऊतये॥ १॥

ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा। वृधासश्च प्रचेतसः॥ २॥

ते। नः। सन्तु। युजः। सदा। वरुणः। मित्रः। अर्यमा। वृधासः। च। प्रऽचेतसः॥ २॥

अति नो विष्पिता पुरु नौभिरपो न पर्षथ। यूयमृतस्य रथ्यः॥ ३॥

अति। नः। विष्पिता। पुरु। नौभिः। अपः। न। पर्षथ। यूयम्। ऋतस्य। रथ्यः॥ ३॥

वामं नो अस्त्वर्यमन्वामं वरुण शंस्यम्। वामं ह्यावृणीमहे॥ ४॥

वामम्। नः। अस्तु। अर्यमन्। वामम्। वरुण। शंस्यम्। वामम्। हि। आऽवृणीमहे॥ ४॥

वामस्य हि प्रचेतस ईशानासो रिशादसः। नेमादित्या अघस्य यत्॥ ५॥ [३]

वामस्य। हि। प्रऽचेतसः। ईशानासः। रिशादसः। न। ईम्। आदित्याः। अघस्य। यत्॥ ५॥

वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना। देवा वृधाय हूमहे॥ ६॥

वयम्। इत्। वः। सुऽदानवः। क्षियन्तः। यान्तः। अध्वन्। आ। देवाः। वृधाय। हूमहे॥ ६॥

अधि न इन्द्रैषां विष्णो सजात्यानाम्। इता मरुतो अश्विना॥ ७॥

अधि। नः। इन्द्र। एषाम्। विष्णो इति। सऽजात्यानाम्। इत। मरुतः। अश्विना॥ ७॥

प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या। मातुर्गर्भे भरामहे॥ ८॥

प्र। भ्रातृऽत्वम्। सुऽदानवः। अध। द्विता। समान्या। मातुः। गर्भे। भरामहे॥ ८॥

यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः। अधा चिद्व उत ब्रुवे॥ ९॥ [४]

यूयम्। हि। स्थ। सुऽदानवः। इन्द्रऽज्येष्ठाः। अभिऽद्यवः। अध। चित्। वः। उत। ब्रुवे॥ ९॥

[८३ (८४)] [९ उशना काव्यः। अग्निः। अग्निः। गायत्री।]

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्। अग्निं रथं न वेद्यम्॥ १॥

प्रेष्ठम्। वः। अतिथिम्। स्तुषे। मित्रम्ऽइव। प्रियम्। अग्निम्। रथम्। न। वेद्यम्॥ १॥

कविमिव प्रचेतसं यं देवासो अध द्विता। नि मर्त्येष्वादधुः॥ २॥

कविम्ऽइव। प्रऽचेतसम्। यम्। देवासः। अध। द्विता। नि। मर्त्येषु। आऽदधुः॥ २॥

त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः। रक्षा तोकमुत त्मना॥ ३॥

त्वम्। यविष्ठ। दाशुषः। नॄन्। पाहि। शृणुधि। गिरः। रक्ष। तोकम्। उत। त्मना॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कया॑ ते अग्ने अङ्गि॒र॒ ऊर्जो॑ नपा॒दुप॑स्तुतिम्। वरा॑य देव म॒न्यवे॑ ॥ ४॥

कया॑। ते॒। अ॒ग्ने॒। अ॒ङ्गि॒र॒ः। ऊर्जः॑। न॒पा॒त्। उप॑ऽस्तुतिम्। वरा॑य। दे॒व॒। म॒न्यवे॑ ॥ ४॥

दाशे॑म॒ कस्य॒ मन॑सा य॒ज्ञस्य॑ सहसो यहो। कदु॑ वोच इ॒दं नमः॑ ॥ ५॥ [५]

दाशे॑म। कस्य॑। मन॑सा। य॒ज्ञस्य॑। स॒ह॒सः॒। य॒हो॒ इति॑। कत्। ऊँ इति॑। वो॒चे॒। इ॒दम्। नमः॑ ॥ ५॥

अधा॒ त्वं हि न॒स्करो विश्वा॑ अ॒स्मभ्यं॑ सुक्षि॒तीः। वाज॑द्रविणसो॒ गिरः॑ ॥ ६॥

अध॑। त्वम्। हि। नः॒। करः॑। विश्वाः॑। अ॒स्मभ्य॑म्। सु॒ऽक्षि॒तीः। वाज॑ऽद्रविणसः। गिरः॑ ॥ ६॥

कस्य॑ नूनं परी॑णसो धियो॑ जिन्वसि दंपते। गोषा॑ता यस्य॑ ते गिरः॑ ॥ ७॥

कस्य॑। नूनम्। परी॑णसः। धियः॑। जि॒न्व॒सि॒। द॒म्ऽप॒ते॒। गोऽसा॑ता। यस्य॑। ते॒। गिरः॑ ॥ ७॥

तं म॑र्जयन्त सु॒क्रतुं॑ पुरो॒यावा॑नमा॒जिषु॑। स्वेषु॒ क्षये॑षु वा॒जिन॑म् ॥ ८॥

तम्। म॒र्ज॒य॒न्त॒। सु॒ऽक्रतु॑म्। पु॒रः॒ऽयावा॑नम्। आ॒जिषु॑। स्वेषु॑। क्षये॑षु। वा॒जिन॑म् ॥ ८॥

क्षेति॒ क्षेमे॑भिः सा॒धुभि॒र्नकि॒र्यं घ्नन्ति॒ हन्ति॒ यः। अग्ने॑ सु॒वीर॑ एधते ॥ ९॥ [६]

क्षेति॑। क्षेमे॑भिः। सा॒धुऽभिः॑। नकिः॑। यम्। घ्नन्ति॑। हन्ति॑। यः। अग्ने॑। सु॒ऽवीरः॑। ए॒ध॒ते॒ ॥ ९॥

[८४ (८५)] [९ कृष्ण आङ्गिरसः। अश्विनौ। गायत्री।]

आ मे॒ हवं॑ नास॒त्याश्वि॑ना॒ गच्छ॑तं युवम्। मध्वः॒ सोम॑स्य पीतये॑ ॥ १॥

आ। मे॒। हव॑म्। ना॒स॒त्या॒। अश्वि॑ना। गच्छ॑तम्। यु॒वम्। मध्वः॑। सोम॑स्य। पी॒तये॑ ॥ १॥

इ॒मं मे॒ स्तोम॑मश्विने॒मं मे॑ शृणुतं॒ हव॑म्। मध्वः॒ सोम॑स्य पीतये ॥ २॥

इ॒यम्। मे॒। स्तोम॑म्। अ॒श्वि॒ना॒। इ॒मम्। मे॒। शृ॒णु॒त॒म्। हव॑म्। मध्वः॑। सोम॑स्य। पी॒तये॑ ॥ २॥

अ॒यं वां॑ कृष्णो॑ अश्विना॒ हव॑ते वाजिनीवसू। मध्वः॒ सोम॑स्य पीतये॑ ॥ ३॥

अ॒यम्। वा॒म्। कृष्णः॑। अ॒श्वि॒ना॒। हव॑ते। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू। मध्वः॑। सोम॑स्य। पी॒तये॑ ॥ ३॥

शृणुतं ज॑रि॒तुर्हव॒ं कृष्ण॑स्य स्तु॒वतो न॑रा। मध्वः॒ सोम॑स्य पी॒तये॑ ॥ ४॥

शृ॒णु॒तम्। ज॒रि॒तुः। हव॑म्। कृष्ण॑स्य। स्तु॒व॒तः। न॒रा॒। मध्वः॑। सोम॑स्य। पी॒तये॑ ॥ ४॥

छ॒र्दिर्य॑न्त॒मदा॑भ्यं विप्रा॑य स्तु॒वते न॑रा। मध्वः॒ सोम॑स्य पी॒तये॑ ॥ ५॥ [७]

छ॒र्दिः। य॒न्त॒म्। अदा॑भ्यम्। विप्रा॑य। स्तु॒व॒ते। न॒रा॒। मध्वः॑। सोम॑स्य। पी॒तये॑ ॥ ५॥

गच्छ॑तं दा॒शुषो॑ गृ॒हमि॒त्था स्तु॑व॒तो अ॑श्विना। मध्वः॒ सोम॑स्य पी॒तये॑ ॥ ६॥

गच्छतम्। दा॒शुषः॑। गृ॒हम्। इ॒त्था। स्तु॒व॒तः। अ॒श्वि॒ना॒। मध्वः॑। सोम॑स्य। पी॒तये॑ ॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युञ्जाथां रासभं रथे वीड्वङ्गे वृषणवसू। मध्वः सोमस्य पीतये ॥ ७ ॥

युञ्जाथाम्। रासभम्। रथे। वीळुऽअङ्गे। वृषण्वसू इति वृषण्ऽवसू। मध्वः। सोमस्य। पीतये ॥ ७ ॥

त्रिवन्धुरेण त्रिवृता रथेना यातमश्विना। मध्वः सोमस्य पीतये ॥ ८ ॥

त्रिऽवन्धुरेण। त्रिऽवृता। रथेन। आ। यातम्। अश्विना। मध्वः। सोमस्य। पीतये ॥ ८ ॥

नू मे गिरो नासत्याश्विना प्रावतं युवम्। मध्वः सोमस्य पीतये ॥ ९ ॥ [८]

नु। मे। गिरः। नासत्या। अश्विना। प्र। अवतम्। युवम्। मध्वः। सोमस्य। पीतये ॥ ९ ॥

[८५ (८६)] [५ कृष्ण आङ्गिरसः, विश्वको वा कार्ष्णिः। अश्विनौ। जगती।]

उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम्॥ १ ॥

उभा। हि। दस्रा। भिषजा। मयःऽभुवा। उभा। दक्षस्य। वचसः। बभूवथुः।
ता। वाम्। विश्वकः। हवते। तनूऽकृथे। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥ १ ॥

कथा नूनं वां विमना उप स्तवद्युवं धियं ददथुर्वस्यइष्टये।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम्॥ २ ॥

कथा। नूनम्। वाम्। विऽमनाः। उप। स्तवत्। युवम्। धियम्। ददथुः। वस्यःऽइष्टये।
ता। वाम्। विश्वकः। हवते। तनूऽकृथे। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥ २ ॥

युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम्॥ ३ ॥

युवम्। हि। स्म। पुरुऽभुजा। इमम्। एधतुम्। विष्णाप्वे। ददथुः। वस्यःऽइष्टये।
ता। वाम्। विश्वकः। हवते। तनूऽकृथे। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥ ३ ॥

उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे।
यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतम्॥ ४ ॥

उत। त्यम्। वीरम्। धनऽसाम्। ऋजीषिणम्। दूरे। चित्। सन्तम्। अवसे। हवामहे।
यस्य। स्वादिष्ठा। सुऽमतिः। पितुः। यथा। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥ ४ ॥

ऋतेन देवः सविता शमायत ऋतस्य शृङ्गमुर्विया वि पप्रथे।
ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतम्॥ ५ ॥ [९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋतेन। देवः। सविता। शम्ऽआयते। ऋतस्य। शृङ्गम्। उर्विया। वि। पप्रथे।
ऋतम्। ससाह। महि। चित्। पृतन्यतः। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम्॥ ५॥

[८६ (८७)] [६ कृष्ण आङ्गिरसो, वासिष्ठो वा द्युम्नीकः, प्रियमेध आङ्गिरसो वा। अश्विनौ। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतम्।
मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे॥ १॥
द्युम्नी। वाम्। स्तोमः। अश्विना। क्रिविः। न। सेके। आ। गतम्।
मध्वः। सुतस्य। सः। दिवि। प्रियः। नरा। पातम्। गौरौऽइव। इरिणे॥ १॥

पिबतं घर्मं मधुमन्तमश्विना बर्हिः सीदतं नरा।
ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः॥ २॥
पिबतम्। घर्मम्। मधुऽमन्तम्। अश्विना। आ। बर्हिः। सीदतम्। नरा।
ता। मन्दसाना। मनुषः। दुरोणे। आ। नि। पातम्। वेदसा। वयः॥ २॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत।
ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु॥ ३॥
आ। वाम्। विश्वाभिः। ऊतिऽभिः। प्रियऽमेधाः। अहूषत।
ता। वर्तिः। यातम्। उप। वृक्तऽबर्हिषः। जुष्टम्। यज्ञम्। दिविष्टिषु॥ ३॥

पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत्।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम्॥ ४॥
पिबतम्। सोमम्। मधुऽमन्तम्। अश्विना। आ। बर्हिः। सीदतम्। सुऽमत्।
ता। ववृधानौ। उप। सुऽस्तुतिम्। दिवः। गन्तम्। गौरौऽइव। इरिणम्॥ ४॥

आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः।
दस्रा हिरण्यवर्तनी शुभस्पती पातं सोममृतावृधा॥ ५॥
आ। नूनम्। यातम्। अश्विना। अश्वेभिः। प्रुषितप्सुऽभिः।
दस्रा। हिरण्यवर्तनी इति हिरण्यऽवर्तनी। शुभः। पती इति। पातम्। सोमम्। ऋतऽवृधा॥ ५॥

वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये।
ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्या गतम्॥ ६॥ [१०]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

व॒यम्। हि। वा॒म्। हवा॑महे। वि॒प॒न्यवः॑। विप्रा॑सः। वाज॑ऽसातये।

ता। व॒ल्गू इति॑। द॒स्रा। पु॒रु॒ऽदंस॑सा। धि॒या। अश्वि॑ना। श्रु॒ष्टी। आ। ग॒त॒म्॥ ६॥

[८७ (८८)] [६ नोधा गौतमः। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

तं वो॑ द॒स्मम्‌ऋ॑ती॒षहं॒ वसो॑र्मन्दा॒नमन्ध॑सः।

अ॒भि व॒त्सं न स्वस॑रेषु धे॒नव॒ इन्द्रं॑ गी॒र्भिर्न॑वामहे॥ १॥

तम्। व॒ः। द॒स्मम्। ऋ॒ति॒ऽसह॑म्। वसोः॑। म॒न्दा॒नम्। अन्ध॑सः।

अ॒भि। व॒त्सम्। न। स्वस॑रेषु। धे॒नवः॑। इन्द्र॑म्। गी॒ःऽभिः। न॒वा॒म॒हे॥ १॥

द्यु॒क्षं सु॒दानुं॒ तवि॑षीभि॒राव॑तं गि॒रिं न पु॑रु॒भोज॑सम्।

क्षु॒मन्तं॒ वाजं॑ श॒तिनं॑ सह॒स्रिणं॑ म॒क्षू गोम॑न्तमीमहे॥ २॥

द्यु॒क्षम्। सु॒ऽदानु॑म्। तवि॑षीभिः। आऽवृ॑तम्। गि॒रिम्। न। पु॒रु॒ऽभोज॑सम्।

क्षु॒ऽमन्त॑म्। वाज॑म्। श॒तिन॑म्। स॒ह॒स्रिण॑म्। म॒क्षु। गोऽम॑न्तम्। ई॒म॒हे॒॥ २॥

न त्वा॑ बृ॒हन्तो॒ अद्र॑यो॒ वर॑न्त इन्द्र वी॒ळवः॑।

यद्दित्स॑सि स्तु॒व॒ते माव॑ते॒ वसु॒ नकि॒ष्टदा मि॑नाति ते॥ ३॥

न। त्वा॒। बृ॒हन्तः॑। अद्र॑यः। वर॑न्ते। इ॒न्द्र॒। वी॒ळवः॑।

यत्। दित्स॑सि। स्तु॒व॒ते। माऽव॑ते। वसु॑। नकिः॑। तत्। आ। मि॒ना॒ति॒। ते॥ ३॥

योद्धा॑सि॒ क्रत्वा॒ शव॑सो॒त दं॒सना॒ विश्वा॑ जा॒ताभि म॒ज्मना॑।

आ त्वा॒यमर्क ऊ॒तये॑ ववर्तति॒ यं गोत॑मा॒ अजी॑जनन्॥ ४॥

योद्धा॑। अ॒सि॒। क्रत्वा॑। शव॑सा। उ॒त। दं॒सना॑। विश्वा॑। जा॒ता। अ॒भि। म॒ज्मना॑।

आ। त्वा॒। अ॒यम्। अ॒र्कः। ऊ॒तये॑। व॒व॒र्त॒ति॒। यम्। गोत॑माः। अजी॑जनन्॥ ४॥

प्र हि रि॑रि॒क्ष ओज॑सा दि॒वो अन्ते॑भ्य॒स्परि॑।

न त्वा॑ विव्याच॒ रज॑ इन्द्र॒ पार्थि॑व॒मनु॑ स्व॒धां व॑वक्षिथ॥ ५॥

प्र। हि। रि॒रि॒क्षे। ओज॑सा। दि॒वः। अन्ते॑भ्यः। परि॑।

न। त्वा॒। वि॒व्या॒च॒। रजः॑। इ॒न्द्र॒। पार्थि॑वम्। अनु॑। स्व॒धाम्। व॒व॒क्षि॒थ॒॥ ५॥

नकिः॒ परि॑ष्टिर्मघवन्म॒घस्य॑ ते॒ यद्दा॒शुषे॑ दश॒स्यसि॑।

अ॒स्माकं॑ बोध्यु॒चथ॑स्य चोदि॒ता मंहि॑ष्ठो॒ वाज॑सातये॥ ६॥ [११]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नकिः। परिष्टिः। मघ॒ऽवन्। मघस्य॑। ते। यत्। दाशुषे॑। दशस्यसि॑।
अस्माक॑म्। बोधि। उचथ॑स्य। चोदिता। मंहि॑ष्ठः। वाज॑ऽसातये॥ ६॥

[८८ (८९)] [७ नृमेधपुरुमेधावाङ्गिरसौ। इन्द्रः। १-४ प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः), ५-६ अनुष्टुप्, ७ बृहती।]

बृहदिन्द्रा॑य गायत॒ मरु॑तो वृत्र॒हंत॑मम्।
येन॒ ज्योति॒रज॑नयन्नृता॒वृधो॑ दे॒वं दे॒वाय॒ जागृ॑वि॥ १॥
बृहत्। इन्द्रा॑य। गायत। मरु॑तः। वृत्र॒हम्ऽत॑मम्।
येन॑। ज्योति॑ः। अज॑नयन्। ऋत॒ऽवृध॑ः। दे॒वम्। दे॒वाय॑। जागृ॑वि॥ १॥
अपा॑धमद॒भिश॑स्तीरशस्ति॒हाथेन्द्रो॑ द्यु॒म्न्याभ॑वत्।
दे॒वास्त॑ इन्द्र स॒ख्याय॑ येमिरे॒ बृह॑द्भानो॒ मरु॑द्गण॥ २॥
अप॑। अ॒धम॒त्। अ॒भिऽश॑स्तीः। अ॒शस्ति॒ऽहा। अथ॑। इन्द्र॑ः। द्युम्नी। आ। अ॒भव॒त्।
दे॒वाः। ते॒। इन्द्र॒। स॒ख्याय॑। ये॒मि॒रे। बृह॑द्भानो॒ इति बृह॑त्ऽभानो। मरु॑त्ऽगण॥ २॥
प्र व॒ इन्द्रा॑य बृह॒ते मरु॑तो॒ ब्रह्मा॑र्चत। वृत्रं ह॑नति वृत्र॒हा श॒तक्र॑तु॒र्वज्रे॑ण श॒तप॑र्वणा॥ ३॥
प्र। व॒ः। इन्द्रा॑य। बृह॒ते। मरु॑तः। ब्रह्म॑। अर्च॒त॒।
वृत्र॑म्। ह॒न॒ति॒। वृत्र॒ऽहा। श॒त॒ऽक्र॑तुः। वज्रे॑ण। श॒त॒ऽप॑र्वणा॥ ३॥
अ॒भि प्र भ॑र धृष॒ता धृ॑षन्मन॒ः श्रव॑श्चित्ते असद्बृहत्।
अर्ष॑न्त्वापो॒ जव॑सा॒ वि मा॒तरो॒ हनो॑ वृत्रं जया॒ स्व॑ः॥ ४॥
अ॒भि। प्र। भ॒र॒। धृ॒ष॒ता। धृ॒ष॒त्ऽम॒न॒ः। श्रव॑ः। चि॒त्। ते॒। अ॒स॒त्। बृ॒ह॒त्।
अर्ष॑न्तु। आप॑ः। जव॑सा। वि। मा॒तर॑ः। हन॑ः। वृत्र॑म्। जय॑। स्व१रिति॑ स्व॑ः॥ ४॥
यज्जाय॑था अपूर्व्य॒ मघ॑वन्वृत्र॒हत्या॑य। तत्पृ॑थि॒वीम॑प्रथय॒स्तद॑स्तभ्ना उ॒त द्याम्॥ ५॥
यत्। जाय॑थाः। अ॒पू॒र्व्य॒। मघ॑ऽवन्। वृत्र॒ऽहत्या॑य।
तत्। पृ॒थि॒वीम्। अ॒प्र॒थ॒य॒ः। तत्। अ॒स्त॒भ्ना॒ः। उ॒त। द्याम्॥ ५॥
तत्ते॑ य॒ज्ञो अ॑जायत॒ तद॒र्क उ॒त हस्कृ॑तिः। तद्विश्व॑मभि॒भूर॑सि॒ यज्जा॒तं यच्च॒ जन्त्व॑म्॥ ६॥
तत्। ते॒। य॒ज्ञः। अ॒जा॒य॒त॒। तत्। अ॒र्कः। उ॒त। हस्कृ॑तिः।
तत्। विश्व॑म्। अ॒भि॒ऽभूः। अ॒सि॒। यत्। जा॒तम्। यत्। च॒। जन्त्व॑म्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[illegible] आ [illegible] ।

[illegible]

[illegible]

[illegible]

[८९ (९०)] [६ नृमेधपुरुमेधावाङ्गिरसौ । [illegible]]

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु ।

उप ब्रह्माणि सवनानि वृत्रहा परमज्या [illegible] ॥ १ ॥

आ । नः । विश्वासु । हव्यः । इन्द्रः । समत्ऽसु । भूषतु ।

उप । ब्रह्माणि । सवनानि । वृत्रऽहा । परमऽज्याः । [illegible]

त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।

तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः । [illegible]

त्वम् । दाता । प्रथमः । राधसाम् । असि । असि । [illegible]

तुविऽद्युम्नस्य । युज्या । आ । वृणीमहे । पुत्रस्य । [illegible]

ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता । [illegible]

ब्रह्म । ते । इन्द्र । गिर्वणः । क्रियन्ते । अनतिऽअद्भुता ।

इमा । जुषस्व । हरिऽअश्व । योजना । इन्द्र । या । ते । [illegible]

त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृञ्जसे ।

स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं रयिमा [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तम्। ऊँ इति। त्वा। नूनम्। असुर। प्रऽचैतसम्। राधः। भागम्ऽइव। ईमहे।
महीऽइव। कृत्तिः। शरणा। ते। इन्द्र। प्र। ते। सुम्ना। नः। अश्नवन्॥ ६॥

[९० (९१)] [७ आत्रेयी अपाला। इन्द्रः। अनुष्टुप्, १-२ पङ्क्तिः।]

कन्या३ वारवायती सोममपि स्रुताविदत्।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा॥ १॥

कन्या। वाः। अवऽयती। सोमम्। अपि। स्रुता। अविदत्।
अस्तम्। भरन्ती। अब्रवीत्। इन्द्राय। सुनवै। त्वा। शक्राय। सुनवै। त्वा॥ १॥

असौ य एषि वीरको गृहंगृहं विचाकशत्।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्॥ २॥

असौ। यः। एषि। वीरकः। गृहम्ऽगृहम्। विऽचाकशत्।
इमम्। जम्भऽसुतम्। पिब। धानाऽवन्तम्। करम्भिणम्। अपूपऽवन्तम्। उक्थिनम्॥ २॥

आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि। शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव॥ ३॥

आ। चन। त्वा। चिकित्सामः। अधि। चन। त्वा। न। इमसि।
शनैःऽइव। शनकैःऽइव। इन्द्राय। इन्दो इति। परि। स्रव॥ ३॥

कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत्। कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै॥ ४॥

कुवित्। शकत्। कुवित्। करत्। कुवित्। नः। वस्यसः। करत्।
कुवित्। पतिऽद्विषः। यतीः। इन्द्रेण। सम्ऽगमामहै॥ ४॥

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय। शिरस्ततस्योर्वरामादिदं म उपोदरे॥ ५॥

इमानि। त्रीणि। विष्टपा। तानि। इन्द्र। वि। रोहय।
शिरः। ततस्य। उर्वराम्। आत्। इदम्। मे। उप। उदरे॥ ५॥

असौ च या न उर्वरादिमां तन्व१ मम। अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि॥ ६॥

असौ। च। या। नः। उर्वरा। आत्। इमाम्। तन्वम्। मम।
अथो इति। ततस्य। यत्। शिरः। सर्वा। ता। रोमशा। कृधि॥ ६॥

खे रथस्य खेऽनसः खे युगस्य शतक्रतो। अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम्॥ ७॥ [१४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आमासु पक्वमैरय आ सूर्यं रोहयो दिवि।

घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत्॥ ७॥ [१२]

आमासु। पक्वम्। ऐरयः। आ। सूर्यम्। रोहयः। दिवि।

घर्मम्। न। सामन्। तपत। सुवृक्तिऽभिः। जुष्टम्। गिर्वणसे। बृहत्॥ ७॥

[८९ (९०)] [६ नृमेधपुरुमेधावाङ्गिरसौ। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु।

उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋजीषमः॥ १॥

आ। नः। विश्वासु। हव्यः। इन्द्रः। समत्ऽसु। भूषतु।

उप। ब्रह्माणि। सवनानि। वृत्रऽहा। परमऽज्याः। ऋचीषमः॥ १॥

त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत्।

तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः॥ २॥

त्वम्। दाता। प्रथमः। राधसाम्। असि। असि। सत्यः। ईशानऽकृत्।

तुविऽद्युम्नस्य। युज्या। आ। वृणीमहे। पुत्रस्य। शवसः। महः॥ २॥

ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता। इमा जुषस्व हर्यश्व योजनेन्द्र या ते अमन्महि॥ ३॥

ब्रह्म। ते। इन्द्र। गिर्वणः। क्रियन्ते। अनतिद्भुता।

इमा। जुषस्व। हरिऽअश्व। योजना। इन्द्र। या। ते। अमन्महि॥ ३॥

त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृञ्जसे।

स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं रयिमा कृधि॥ ४॥

त्वम्। हि। सत्यः। मघऽवन्। अनानतः। वृत्रा। भूरि। निऽऋञ्जसे।

सः। त्वम्। शविष्ठ। वज्रऽहस्त। दाशुषे। अर्वाञ्चम्। रयिम्। आ। कृधि॥ ४॥

त्वमिन्द्र यशा अस्यृजीषी शवसस्पते। त्वं वृत्राणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता॥ ५॥

त्वम्। इन्द्र। यशाः। असि। ऋजीषी। शवसः। पते।

त्वम्। वृत्राणि। हंसि। अप्रतीनि। एकः। इत्। अनुत्ता। चर्षणिऽधृता॥ ५॥

तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे।

महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन्॥ ६॥ [१३]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तम्। ऊँ इति। त्वा। नूनम्। असुर। प्रऽचेतसम्। राधः। भागम्ऽइव। ईमहे।
महीऽइव। कृत्तिः। शरणा। ते। इन्द्र। प्र। ते। सुम्ना। नः। अश्नवन्॥ ६॥

[९० (९१)] [७ आत्रेयी अपाला। इन्द्रः। अनुष्टुप्, १-२ पङ्क्तिः।]

कन्या३ वारवायती सोममपि स्रुताविदत्।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा॥ १॥
कन्या। वाः। अवऽयती। सोमम्। अपि। स्रुता। अविदत्।
अस्तम्। भरन्ती। अब्रवीत्। इन्द्राय। सुनवै। त्वा। शक्राय। सुनवै। त्वा॥ १॥
असौ य एषि वीरको गृहंगृहं विचाकशत्।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्॥ २॥
असौ। यः। एषि। वीरकः। गृहम्ऽगृहम्। विऽचाकशत्।
इमम्। जम्भऽसुतम्। पिब। धानाऽवन्तम्। करम्भिणम्। अपूपऽवन्तम्। उक्थिनम्॥ २॥
आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि। शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव॥ ३॥
आ। चन। त्वा। चिकित्सामः। अधि। चन। त्वा। न। इमसि।
शनैःऽइव। शनकैःऽइव। इन्द्राय। इन्दो इति। परि। स्रव॥ ३॥
कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत्। कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै॥ ४॥
कुवित्। शकत्। कुवित्। करत्। कुवित्। नः। वस्यसः। करत्।
कुवित्। पतिऽद्विषः। यतीः। इन्द्रेण। सम्ऽगमामहै॥ ४॥
इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय। शिरस्ततस्योर्वरामादिदं म उपोदरे॥ ५॥
इमानि। त्रीणि। विष्टपा। तानि। इन्द्र। वि। रोहय।
शिरः। ततस्य। उर्वराम्। आत्। इदम्। मे। उप। उदरे॥ ५॥
असौ च या न उर्वरादिमां तन्व१ मम। अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि॥ ६॥
असौ। च। या। नः। उर्वरा। आत्। इमाम्। तन्वम्। मम।
अथो इति। ततस्य। यत्। शिरः। सर्वा। ता। रोमशा। कृधि॥ ६॥
खे रथस्य खेऽनसः खे युगस्य शतक्रतो। अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम्॥ ७॥ [१४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

खे। रथस्य। खे। अनसः। खे। युगस्य। शतक्रतो इति शत॰क्रतो।

अपालाम्। इन्द्र। त्रिः। पूत्वी। अकृणोः। सूर्य॰त्वचम्॥ ७॥

[९१ (९२)] [३३ श्रुतकक्षः, सुकक्षो वा आङ्गिरसः। इन्द्रः। गायत्री, १ अनुष्टुप्।]

पान्तमा वो अन्धस इन्द्रमभि प्र गायत। विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम्॥ १॥

पान्तम्। आ। वः। अन्धसः। इन्द्रम्। अभि। प्र। गायत।

विश्व॰सहम्। शत॰क्रतुम्। मंहिष्ठम्। चर्षणीनाम्॥ १॥

पुरुहूतं पुरुष्टुतं गाथान्यं१ सनश्रुतम्। इन्द्र इति ब्रवीतन॥ २॥

पुरु॰हूतम्। पुरु॰स्तुतम्। गाथान्यम्। सन॰श्रुतम्। इन्द्रः। इति। ब्रवीतन॥ २॥

इन्द्र इन्नो महानां दाता वाजानां नृतुः। महाँ अभिज्ञ्वा यमत्॥ ३॥

इन्द्रः। इत्। नः। महानाम्। दाता। वाजानाम्। नृतुः। महान्। अभि॰ज्ञु। आ। यमत्॥ ३॥

अपादु शिप्रयन्धसः सुदक्षस्य प्रहोषिणः। इन्दोरिन्द्रो यवाशिरः॥ ४॥

अपात्। ऊँ इति। शिप्री। अन्धसः। सु॰दक्षस्य। प्र॰होषिणः। इन्दोः। इन्द्रः। यव॰आशिरः॥ ४॥

तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये। तदिद्ध्यस्य वर्धनम्॥ ५॥ [१५]

तम्। ऊँ इति। अभि। प्र। अर्चत। इन्द्रम्। सोमस्य। पीतये। तत्। इत्। हि। अस्य। वर्धनम्॥ ५॥

अस्य पीत्वा मदानां देवो देवस्यौजसा। विश्वाभि भुवना भुवत्॥ ६॥

अस्य। पीत्वा। मदानाम्। देवः। देवस्य। ओजसा। विश्वा। अभि। भुवना। भुवत्॥ ६॥

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम्। आ। च्यावयस्यूतये॥ ७॥

त्यम्। ऊँ इति। वः। सत्रा॰सहम्। विश्वासु। गीर्षु। आ॰यतम्। आ। च्यवयसि। ऊतये॥ ७॥

युध्मं सन्तमनर्वाणं सोमपामनपच्युतम्। नरमवार्यक्रतुम्॥ ८॥

युध्मम्। सन्तम्। अनर्वाणम्। सोम॰पाम्। अनप॰च्युतम्। नरम्। अवार्य॰क्रतुम्॥ ८॥

शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋजीषम। अवा नः पार्ये धने॥ ९॥

शिक्ष। नः। इन्द्र। रायः। आ। पुरु। विद्वान्। ऋजीषम। अव। नः। पार्ये। धने॥ ९॥

अतश्चिदिन्द्र ण उपा याहि शतवाजया। इषा सहस्त्रवाजया॥ १०॥ [१६]

अतः। चित्। इन्द्र। नः। उप। आ। याहि। शत॰वाजया। इषा। सहस्त्र॰वायजा॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयाम धीवतो धियोऽर्वद्भिः शक्र गोदरे। जयेम पृत्सु वज्रिवः॥ ११॥

अयाम। धीऽवतः। धियः। अर्वत्ऽभिः। शक्र। गोऽदरे। जयेम। पृत्ऽसु। वज्रिऽवः॥ ११॥

वयमु त्वा शतक्रतो गावो न यवसेष्वा। उक्थेषु रणयामसि॥ १२॥

वयम्। ऊँ इति। त्वा। शतक्रतो इति शतऽक्रतो। गावः। न। यवसेषु। आ। उक्थेषु। रणयामसि॥ १२॥

विश्वा हि मर्त्यत्वनानुकामा शतक्रतो। अगन्म वज्रिन्नाशसः॥ १३॥

विश्वा। हि। मर्त्यऽत्वना। अनुऽकामा। शतक्रतो इति शतऽक्रतो। अगन्म। वज्रिन्। आऽशसः॥ १३॥

त्वे सु पुत्र शवसोऽवृत्रन्कामकातयः। न त्वामिन्द्राति रिच्यते॥ १४॥

त्वे इति। सु। पुत्र। शवसः। अवृत्रन्। कामऽकातयः। न। त्वाम्। इन्द्र। अति। रिच्यते॥ १४॥

स नो वृषन्त्सनिष्ठया सं घोरया द्रवित्न्वा। धियाविड्ढि पुरंध्या॥ १५॥ [१७]

सः। नः। वृषन्। सनिष्ठया। सम्। घोरया। द्रवित्न्वा। धिया। अविड्ढि। पुरम्ऽध्या॥ १५॥

यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः। तेन नूनं मदे मदेः॥ १६॥

यः। ते। नूनम्। शतक्रतो इति शतऽक्रतो। इन्द्र। द्युम्निऽतमः। मदः।

तेन। नूनम्। मदे। मदेरिति मदेः॥ १६॥

यस्ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः। य ओजोदातमो मदः॥ १७॥

यः। ते। चित्रश्रवःऽतमः। यः। इन्द्र। वृत्रहन्ऽतमः। यः। ओजःऽदातमः। मदः॥ १७॥

विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः। विश्वासु दस्म कृष्टिषु॥ १८॥

विद्म। हि। यः। ते। अद्रिऽवः। त्वाऽदत्तः। सत्य। सोमऽपाः। विश्वासु। दस्म। कृष्टिषु॥ १८॥

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः॥ १९॥

इन्द्राय। मद्वने। सुतम्। परि। स्तोभन्तु। नः। गिरः। अर्कम्। अर्चन्तु। कारवः॥ १९॥

यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे॥ २०॥ [१८]

यस्मिन्। विश्वाः। अधि। श्रियः। रणन्ति। सप्त। सम्ऽसदः। इन्द्रम्। सुते। हवामहे॥ २०॥

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत। तमिद्वर्धन्तु नो गिरः॥ २१॥

त्रिऽकद्रुकेषु। चेतनम्। देवासः। यज्ञम्। अत्नत। तम्। इत्। वर्धन्तु। नः। गिरः॥ २१॥

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः। न त्वामिन्द्राति रिच्यते॥ २२॥

आ। त्वा। विशन्तु। इन्दवः। समुद्रम्ऽइव। सिन्धवः। न। त्वाम्। इन्द्र। अति। रिच्यते॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विव्यक्थं महिना वृषन्भक्षं सोमस्य जागृवे। य इन्द्र जठरेषु ते॥ २३॥

विव्यक्थं। महिना। वृषन्। भक्षम्। सोमस्य। जागृवे। यः। इन्द्र। जठरेषु। ते॥ २३॥

अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन्। अरं धामभ्य इन्दवः॥ २४॥

अरम्। ते। इन्द्र। कुक्षये। सोमः। भवतु। वृत्र॰हन्। अरम्। धाम॰भ्यः। इन्दवः॥ २४॥

अरमश्वाय गायति श्रुतकक्षो अरं गवे। अरमिन्द्रस्य धाम्ने॥ २५॥ [१९]

अरम्। अश्वाय। गायति। श्रुतकक्षः। अरम्। गवे। अरम्। इन्द्रस्य। धाम्ने॥ २५॥

अरं हि ष्मा सुतेषु णः सोमेष्विन्द्र भूषसि। अरं ते शक्र दावने॥ २६॥

अरम्। हि। स्म। सुतेषु। नः। सोमेषु। इन्द्र। भूषसि। अरम्। ते। शक्र। दावने॥ २६॥

पराकात्ताच्चिदद्रिवस्त्वां नक्षन्त नो गिरः। अरं गमाम ते वयम्॥ २७॥

पराकात्तात्। चित्। अद्रि॰वः। त्वाम्। नक्षन्त। नः। गिरः। अरम्। गमाम। ते। वयम्॥ २७॥

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः॥ २८॥

एव। हि। असि। वीरयुः। एव। शूरः। उत। स्थिरः। एव। ते। राध्यम्। मनः॥ २८॥

एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र मे सचा॥ २९॥

एव। रातिः। तुवि॰मघ। विश्वेभिः। धायि। धातृभिः। अध। चित्। इन्द्र। मे। सचा॥ २९॥

मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः॥ ३०॥

मो इति। सु। ब्रह्माऽइव। तन्द्रयुः। भुवः। वाजानाम्। पते। मत्स्व। सुतस्य। गो॰मतः॥ ३०॥

मा न इन्द्राभ्या३दिशः सूरो अक्तुष्वा यमन्। त्वा युजा वनेम तत्॥ ३१॥

मा। नः। इन्द्र। अभि। आ॰दिशः। सूरः। अक्तुषु। आ। यमन्। त्वा। युजा। वनेम। तत्॥ ३१॥

त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः। त्वमस्माकं तव स्मसि॥ ३२॥

त्वया। इत्। इन्द्र। यु॰जा। वयम्। प्रति। ब्रुवीमहि। स्पृधः। त्वम्। अस्माकम्। तव। स्मसि॥ ३२॥

त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान्। सखाय इन्द्र कारवः॥ ३३॥ [२०]

त्वाम्। इत्। हि। त्वायवः। अनु॰नोनुवतः। चरान्। सखायः। इन्द्र। कारवः॥ ३३॥

[९२ (९३)] [३४ सुकक्ष आङ्गिरसः। इन्द्रः, ३४ इन्द्र ऋभवश्च। गायत्री।]

उद्घेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य॥ १॥

उत्। घ। इत्। अभि। श्रुत॰मघम्। वृषभम्। नर्य॰अपसम्। अस्तारम्। एषि। सूर्य॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नव यो नवतिं पुरो बिभेद बाह्वोजसा। अहिं च वृत्रहावधीत्॥ २॥

नव। यः। नवतिम्। पुरः। बिभेद। बाहुऽओजसा। अहिम्। च। वृत्रऽहा। अवधीत्॥ २॥

स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत्। उरुधारेव दोहते॥ ३॥

सः। नः। इन्द्रः। शिवः। सखा। अश्वऽवत्। गोऽमत्। यवऽमत्। उरुधाराऽइव। दोहते॥ ३॥

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे॥ ४॥

यत्। अद्य। कत्। च। वृत्रऽहन्। उत्ऽअगाः। अभि। सूर्य। सर्वम्। तत्। इन्द्र। ते। वशे॥ ४॥

यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे। उतो तत्सत्यमित्तव॥ ५॥ [२१]

यत्। वा। प्रऽवृद्ध। सत्ऽपते। न। मरै। इति। मन्यसे। उतो इति। तत्। सत्यम्। इत्। तव॥ ५॥

ये सोमासः परावति ये अर्वावति सुन्विरे। सर्वांस्ताँ इन्द्र गच्छसि॥ ६॥

ये। सोमासः। पराऽवति। ये। अर्वाऽवति। सुन्विरे। सर्वान्। तान्। इन्द्र। गच्छसि॥ ६॥

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत्॥ ७॥

तम्। इन्द्रम्। वाजयामसि। महे। वृत्राय। हन्तवे। सः। वृषा। वृषभः। भुवत्॥ ७॥

इन्द्रः सा दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः॥ ८॥

इन्द्रः। सः। दामने। कृतः। ओजिष्ठः। सः। मदे। हितः। द्युम्नी। श्लोकी। सः। सोम्यः॥ ८॥

गिरा वज्रो न संभृतः सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः॥ ९॥

गिरा। वज्रः। न। सम्ऽभृतः। सऽबलः। अनपऽच्युतः। ववक्षे। ऋष्वः। अस्तृतः॥ ९॥

दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः। त्वं च मघवन्वशः॥ १०॥ [२२]

दुःऽगे। चित्। नः। सुऽगम्। कृधि। गृणानः। इन्द्र। गिर्वणः। त्वम्। च। मघऽवन्। वशः॥ १०॥

यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम्। न देवो नाध्रिगुर्जनः॥ ११॥

यस्य। ते। नु। चित्। आऽदिशम्। न। मिनन्ति। स्वऽराज्यम्। न। देवः। न। अध्रिऽगुः। जनः॥ ११॥

अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः। उभे सुशिप्र रोदसी॥ १२॥

अध। ते। अप्रतिऽस्कुतम्। देवी इति। शुष्मम्। सपर्यतः। उभे इति। सुऽशिप्र। रोदसी इति॥ १२॥

त्वमेतदधारयः कृष्णासु रोहिणीषु च। परुष्णीषु रुशत्पयः॥ १३॥

त्वम्। एतत्। अधारयः। कृष्णासु। रोहिणीषु। च। परुष्णीषु। रुशत्। पयः॥ १३॥

वि यदहेरध त्विषो विश्वे देवासो अक्रमुः। विदन्मृगस्य ताँ अमः॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि । यत् । अहे॑ः । अध॑ । त्वि॒षः । विश्वे॑ । दे॒वास॑ः । अक्र॑मुः । वि॒दत् । मृ॒गस्य॑ । तान् । अम॑ः ॥ १४ ॥

आदु॑ मे निव॒रो भु॑वद्वृत्र॒हादि॑ष्ट॒ पौंस्य॑म् । अजा॑तशत्रु॒रस्तृ॑तः ॥ १५ ॥ [२३]

आत् । ऊँ इति॑ । मे॒ । नि॒ऽव॒रः । भु॒व॒त् । वृ॒त्र॒ऽहा । अ॒दि॒ष्ट॒ । पौंस्य॑म् । अजा॑तऽशत्रुः । अस्तृ॑तः ॥ १५ ॥

श्रु॒तं वो॑ वृत्र॒हन्त॑मं॒ प्र शर्धं॑ चर्षणी॒नाम् । आ शु॑षे॒ राध॑से म॒हे ॥ १६ ॥

श्रु॒तम् । व॒ः । वृ॒त्र॒हन्ऽत॑मम् । प्र । शर्ध॑म् । च॒र्ष॒णी॒नाम् । आ । शु॒षे॒ । राध॑से । म॒हे ॥ १६ ॥

अ॒या धि॒या च॑ गव्य॒या पुरु॑णाम॒न्पुरु॑ष्टुत । यत्सोमे॑सोम॒ आभ॑वः ॥ १७ ॥

अ॒या । धि॒या । च॒ । ग॒व्य॒ऽया । पुरु॑ऽनामन् । पुरु॑ऽस्तुत । यत् । सोमे॑ऽसोमे । आ । अभ॑वः ॥ १७ ॥

बो॒धिन्म॑ना॒ इद॑स्तु नो वृत्र॒हा भूर्या॑सुतिः । शृ॒णोतु॑ श॒क्र आ॒शिष॑म् ॥ १८ ॥

बो॒धित्ऽम॑नाः । इत् । अ॒स्तु॒ । न॒ः । वृ॒त्र॒ऽहा । भूरि॑ऽआसुतिः । शृ॒णोतु॑ । श॒क्रः । आ॒ऽशिष॑म् ॥ १८ ॥

कया॑ त्वं न॑ ऊ॒त्याभि प्र म॑न्दसे वृषन् । कया॑ स्तो॒तृभ्य॒ आ भ॑र ॥ १९ ॥

कया॑ । त्वम् । न॒ः । ऊ॒त्या । अ॒भि । प्र । म॒न्द॒से॒ । वृ॒ष॒न् । कया॑ । स्तो॒तृऽभ्य॑ः । आ । भ॒र ॥ १९ ॥

कस्य॒ वृषा॑ सु॒ते सचा॑ नि॒युत्वा॑न्वृष॒भो र॑णत् । वृ॒त्र॒हा सोम॑पीतये ॥ २० ॥ [२४]

कस्य॑ । वृषा॑ । सु॒ते । सचा॑ । नि॒युत्वा॑न् । वृ॒ष॒भः । र॒ण॒त् । वृ॒त्र॒ऽहा । सोम॑ऽपीतये ॥ २० ॥

अ॒भी षु ण॒स्त्वं र॒यिं म॑न्दसा॒नः स॑ह॒स्त्रिण॑म् । प्र॒य॒न्ता बो॑धि दा॒शुषे॑ ॥ २१ ॥

अ॒भि । सु । न॒ः । त्वम् । र॒यिम् । म॒न्द॒सा॒नः । स॒ह॒स्त्रिण॑म् । प्र॒ऽय॒न्ता । बो॒धि॒ । दा॒शुषे॑ ॥ २१ ॥

पत्नी॑वन्तः सु॒ता इ॒म उ॒शन्तो॑ यन्ति वी॒तये॑ । अ॒पां जग्मि॑र्निचु॒म्पु॒णः ॥ २२ ॥

पत्नी॑ऽवन्तः । सु॒ताः । इ॒मे । उ॒शन्त॑ः । य॒न्ति॒ । वी॒तये॑ । अ॒पाम् । जग्मि॑ः । नि॒ऽचु॒म्पु॒णः ॥ २२ ॥

इ॒ष्टा होत्रा॑ असृक्ष॒तेन्द्रं॑ वृ॒धासो॑ अध्व॒रे । अच्छा॑वभृ॒थमोज॑सा ॥ २३ ॥

इ॒ष्टाः । होत्रा॑ः । अ॒सृ॒क्ष॒त॒ । इन्द्र॑म् । वृ॒धास॑ः । अ॒ध्व॒रे । अच्छ॑ । अ॒व॒ऽभृ॒थम् । ओज॑सा ॥ २३ ॥

इ॒ह त्या स॑ध॒माद्या॒ हरी॒ हिर॑ण्यकेश्या । वो॒ळ्हाम॒भि प्रयो॑ हि॒तम् ॥ २४ ॥

इ॒ह । त्या । स॒ध॒ऽमाद्या॑ । हरी॒ इति॑ । हिर॑ण्यऽकेश्या । वो॒ळ्हाम् । अ॒भि । प्रय॑ः । हि॒तम् ॥ २४ ॥

तुभ्यं॒ सोमा॑ः सु॒ता इ॒मे स्ती॒र्णं ब॒र्हिर्वि॑भावसो । स्तो॒तृभ्य॒ इन्द्र॒मा व॑ह ॥ २५ ॥ [२५]

तुभ्य॑म् । सोमा॑ः । सु॒ताः । इ॒मे । स्ती॒र्णम् । ब॒र्हिः । वि॒भा॒व॒सो॒ इति॑ विभा॑ऽवसो ।
स्तो॒तृऽभ्य॑ः । इन्द्र॑म् । आ । व॒ह ॥ २५ ॥

आ ते॒ दक्षं॑ वि रो॑च॒ना दध॒द्रत्ना॒ वि दा॒शुषे॑ । स्तो॒तृभ्य॒ इन्द्र॑मर्चत ॥ २६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ । ते । दक्षम् । वि । रोचना । दधत् । रत्ना । वि । दाशुषे । स्तोतृभ्यः । इन्द्रम् । अर्चत ॥ २६ ॥

आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो । स्तोतृभ्य इन्द्र मृळय ॥ २७ ॥

आ । ते । दधामि । इन्द्रियम् । उक्था । विश्वा । शतक्रतो इति शतऽक्रतो । स्तोतृभ्यः । इन्द्र । मृळय ॥ २७ ॥

भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो । यदिन्द्र मृळयासि नः ॥ २८ ॥

भद्रम्ऽभद्रम् । नः । आ । भर । इषम् । ऊर्जम् । शतक्रतो इति शतऽक्रतो ।

यत् । इन्द्र । मृळयासि । नः ॥ २८ ॥

स नो विश्वान्या भर सुवितानि शतक्रतो । यदिन्द्र मृळयासि नः ॥ २९ ॥

सः । नः । विश्वानि । आ । भर । सुवितानि । शतक्रतो इति शतऽक्रतो । यत् । इन्द्र । मृळयासि । नः ॥ २९ ॥

त्वामिद्वृत्रहन्तम सुतावन्तो हवामहे । यदिन्द्र मृळयासि नः ॥ ३० ॥ [२६]

त्वाम् । इत् । वृत्रहन्ऽतम । सुतऽवन्तः । हवामहे । यत् । इन्द्र । मृळयासि । नः ॥ ३० ॥

उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥ ३१ ॥

उप । नः । हरिऽभिः । सुतम् । याहि । मदानाम् । पते । उप । नः । हरिऽभिः । सुतम् ॥ ३१ ॥

द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम् ॥ ३२ ॥

द्विता । यः । वृत्रहन्ऽतमः । विदे । इन्द्रः । शतऽक्रतुः । उप । नः । हरिऽभिः । सुतम् ॥ ३२ ॥

त्वं हि वृत्रहन्नेषां पाता सोमानामसि । उप नो हरिभिः सुतम् ॥ ३३ ॥

त्वम् । हि । वृत्रऽहन् । एषाम् । पाता । सोमानाम् । असि । उप । नः । हरिऽभिः । सुतम् ॥ ३३ ॥

इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ॥ ३४ ॥ [२७] {९}

इन्द्रः । इषे । ददातु । नः । ऋभुक्षणम् । ऋभुम् । रयिम् । वाजी । ददातु । वाजिनम् ॥ ३४ ॥

[९३ (९४)] [१२ बिन्दुः, पूतदक्षो वा आङ्गिरसः । मरुतः । गायत्री ।]

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम् ॥ १ ॥

गौः । धयति । मरुताम् । श्रवस्युः । माता । मघोनाम् । युक्ता । वह्निः । रथानाम् ॥ १ ॥

यस्या देवा उपस्थे व्रता विश्वे धारयन्ते । सूर्यामासा दृशे कम् ॥ २ ॥

यस्याः । देवाः । उपऽस्थे । व्रता । विश्वे । धारयन्ते । सूर्यामासा । दृशे । कम् ॥ २ ॥

तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः । मरुतः सोमपीतये ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्। सु। नः। विश्वे। अर्यः। आ। सदा। गृणन्ति। कारवः। मरुतः। सोम॑ऽपीतये ॥ ३ ॥

अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ॥ ४ ॥

अस्ति। सोमः। अयम्। सुतः। पिबन्ति। अस्य। मरुतः। उत। स्वऽराजः। अश्विना ॥ ४ ॥

पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः ॥ ५ ॥

पिबन्ति। मित्रः। अर्यमा। तना। पूतस्य। वरुणः। त्रिऽसधस्थस्य। जाऽवतः ॥ ५ ॥

उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ॥ ६ ॥ [२८]

उतो इति। नु। अस्य। जोषम्। आ। इन्द्रः। सुतस्य। गोऽमतः। प्रातः। होताऽइव। मत्सति ॥ ६ ॥

कदत्विषन्त सूरयस्तिर आपइव स्त्रिधः। अर्षन्ति पूतदक्षसः ॥ ७ ॥

कत्। अत्विषन्त। सूरयः। तिरः। आपःऽइव। स्त्रिधः। अर्षन्ति। पूतऽदक्षसः ॥ ७ ॥

कद्वो अद्य महानां देवानामवो वृणे। त्मना च दस्मवर्चसाम् ॥ ८ ॥

कत्। वः। अद्य। महानाम्। देवानाम्। अवः। वृणे। त्मना। च। दस्मऽवर्चसाम् ॥ ८ ॥

आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः। मरुतः सोमपीतये ॥ ९ ॥

आ। ये। विश्वा। पार्थिवानि। पप्रथन्। रोचना। दिवः। मरुतः। सोम॑ऽपीतये ॥ ९ ॥

त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे। अस्य सोमस्य पीतये ॥ १० ॥

त्यान्। नु। पूतऽदक्षसः। दिवः। वः। मरुतः। हुवे। अस्य। सोमस्य। पीतये ॥ १० ॥

त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे। अस्य सोमस्य पीतये ॥ ११ ॥

त्यान्। नु। ये। वि। रोदसी इति। तस्तभुः। मरुतः। हुवे। अस्य। सोमस्य। पीतये ॥ ११ ॥

त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे। अस्य सोमस्य पीतये ॥ १२ ॥ [२९]

त्यम्। नु। मारुतम्। गणम्। गिरिऽस्थाम्। वृषणम्। हुवे। अस्य। सोमस्य। पीतये ॥ १२ ॥

[९४ (९५)] [९ तिरश्चीराङ्गिरसः। इन्द्रः। अनुष्टुप्।]

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः। अभि त्वा समनूषतेन्द्र वत्सं न मातरः ॥ १ ॥

आ। त्वा। गिरः। रथीःऽइव। अस्थुः। सुतेषु। गिर्वणः।

अभि। त्वा। सम्। अनूषत। इन्द्र। वत्सम्। न। मातरः ॥ १ ॥

आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः। पिबा त्व१स्यान्धस इन्द्र विश्वासु ते हितम् ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ । त्वा॒ । शु॒क्राः । अ॒चुच्य॒वुः । सु॒तास॑ः । इ॒न्द्र॒ । गि॒र्व॒ण॒ः ।

पिब॑ । तु । अ॒स्य । अन्ध॑सः । इन्द्र॑ । विश्वा॑सु । ते॒ । हि॒तम् ॥ २ ॥

पिबा॒ सोम॒॑ मदा॑य॒ कमि॑न्द्र श्ये॒नाभृ॑तं सु॒तम् । त्वं हि शश्व॑तीना॒॑ पती॒ राजा॑ वि॒शाम॑सि॑ ॥ ३ ॥

पिब॑ । सोम॑म् । मदा॑य । कम् । इन्द्र॑ । श्ये॒न॒ऽआ॑भृतम् । सु॒तम् ।

त्वम् । हि । शश्व॑तीनाम् । पति॑ः । राजा॑ । वि॒शाम् । असि॑ ॥ ३ ॥

श्रु॒धी हव॑ं ति॒र॒श्च्या इन्द्र॒ यस्त्वा॑ सप॒र्यति॑ । सु॒वीर्य॑स्य॒ गोम॑तो रा॒यस्पू॑र्धि म॒हाँ अ॑सि ॥ ४ ॥

श्रु॒धि । हव॑म् । ति॒र॒श्च्याः । इन्द्र॑ । यः । त्वा॒ । स॒प॒र्यति॑ ।

सु॒ऽवीर्य॑स्य । गोऽम॑तः । रा॒यः । पू॒र्धि॒ । म॒हान् । अ॒सि॒ ॥ ४ ॥

इन्द्र॒ यस्ते॒ नवी॑यसीं॒ गिर॑ं म॒न्द्राम॑जीजनत् ।

चि॒कि॒त्विन्म॑नसं॒ धियं॑ प्र॒त्नामृ॒तस्य॑ पि॒प्युषी॑म् ॥ ५ ॥ [३०]

इन्द्र॑ । यः । ते॒ । नवी॑यसीम् । गिर॑म् । म॒न्द्राम् । अजी॑जनत् ।

चि॒कि॒त्वित्ऽम॑नसम् । धिय॑म् । प्र॒त्नाम् । ऋ॒तस्य॑ । पि॒प्युषी॑म् ॥ ५ ॥

तमु॑ ष्टवा॒म॒ यं गिर॒ इन्द्र॑मु॒क्थानि॑ वावृ॒धुः । पु॒रूण्य॑स्य॒ पौंस्या॒ सिषा॑सन्तो वनामहे ॥ ६ ॥

तम् । ऊँ इति॑ । स्त॒वा॒म॒ । यम् । गिर॑ः । इन्द्र॑म् । उ॒क्थानि॑ । व॒वृ॒धुः ।

पु॒रूणि॑ । अ॒स्य॒ । पौंस्या॑ । सिसा॑सन्तः । व॒ना॒म॒हे॒ ॥ ६ ॥

एतो॒ न्विन्द्र॑ं स्तवा॑म शु॒द्धं शु॒द्धेन॒ साम्ना॑ । शु॒द्धैरु॒क्थैर्वा॑वृ॒ध्वांसं॑ शु॒द्ध आ॒शीर्वा॑न्ममत्तु ॥ ७ ॥

एतो॒ इति॑ । नु । इन्द्र॑म् । स्तवा॑म । शु॒द्धम् । शु॒द्धेन॑ । साम्ना॑ ।

शु॒द्धैः । उ॒क्थैः । व॒वृ॒ध्वांस॑म् । शु॒द्धः । आ॒शीःऽवा॑न् । म॒म॒त्तु॒ ॥ ७ ॥

इन्द्र॑ शु॒द्धो न॒ आ ग॑हि शु॒द्धः शु॒द्धाभि॑रू॒तिभि॑ः । शु॒द्धो र॒यिं नि धा॑रय शु॒द्धो म॑मद्धि सो॒म्यः ॥ ८ ॥

इन्द्र॑ । शु॒द्धः । न॒ः । आ । ग॒हि॒ । शु॒द्धः । शु॒द्धाभि॑ः । ऊ॒तिऽभि॑ः ।

शु॒द्धः । र॒यिम् । नि । धा॒र॒य॒ । शु॒द्धः । म॒म॒द्धि॒ । सो॒म्यः ॥ ८ ॥

इन्द्र॑ शु॒द्धो हि नो॑ र॒यिं शु॒द्धो रत्ना॑नि दा॒शुषे॑ ।

शु॒द्धो वृ॒त्राणि॑ जि॒घ्न॒से॒ शु॒द्धो वाज॑ं सिषाससि ॥ ९ ॥ [३१]

इन्द्र॑ । शु॒द्धः । हि । न॒ः । र॒यिम् । शु॒द्धः । रत्ना॑नि । दा॒शुषे॑ ।

शु॒द्धः । वृ॒त्राणि॑ । जि॒घ्न॒से॒ । शु॒द्धः । वाज॑म् । सि॒सा॒स॒सि॒ ॥ ९ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[९५ (९६)] [२१ तिरश्चीराङ्गिरसो, द्युतानो वा मारुतः। इन्द्रः। १४ इन्द्रामरुतः, १५ इन्द्राबृहस्पती। त्रिष्टुप्, ४ विराट्, २१ पुरस्ताज्ज्योतिः।]

अस्मा उषास आतिरन्त याममिन्द्राय नक्तमूर्म्याः सुवाचः।
अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिन्धवः सुपाराः॥ १॥
अस्मै। उषसः। आ। अतिरन्त। यामम्। इन्द्राय। नक्तम्। ऊर्म्याः। सुऽवाचः।
अस्मै। आपः। मातरः। सप्त। तस्थुः। नृऽभ्यः। तराय। सिन्धवः। सुऽपाराः॥ १॥

अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम्।
न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार॥ २॥
अतिऽविद्धा। विथुरेण। चित्। अस्त्रा। त्रिः। सप्त। सानु। सम्ऽहिता। गिरीणाम्।
न। तत्। देवः। न। मर्त्यः। तुतुर्यात्। यानि। प्रऽवृद्धः। वृषभः। चकार॥ २॥

इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः।
शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके॥ ३॥
इन्द्रस्य। वज्रः। आयसः। निऽमिश्लः। इन्द्रस्य। बाह्वोः। भूयिष्ठम्। ओजः।
शीर्षन्। इन्द्रस्य। क्रतवः। निरेके। आसन्। आ। ईषन्त। श्रुत्यै। उपाके॥ ३॥

मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम्।
मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम्॥ ४॥
मन्ये। त्वा। यज्ञियम्। यज्ञियानाम्। मन्ये। त्वा। च्यवनम्। अच्युतानाम्।
मन्ये। त्वा। सत्वनाम्। इन्द्र। केतुम्। मन्ये। त्वा। वृषभम्। चर्षणीनाम्॥ ४॥

आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्तवा उ।
प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम्॥ ५॥ [३२]
आ। यत्। वज्रम्। बाह्वोः। इन्द्र। धत्से। मदऽच्युतम्। अहये। हन्तवै। ऊँ इति।
प्र। पर्वताः। अनवन्त। प्र। गावः। प्र। ब्रह्माणः। अभिऽनक्षन्तः। इन्द्रम्॥ ५॥

तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात्।
इन्द्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम॥ ६।
तम्। ऊँ इति। स्तवाम। यः। इमा। जजान। विश्वा। जातानि। अवराणि। अस्मात्।
इन्द्रेण। मित्रम्। दिधिषेम। गीःऽभिः। उपो इति। नमःऽभिः। वृषभम्। विशेम॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि॥ ७॥
वृत्रस्य। त्वा। श्वसथात्। ईषमाणाः। विश्वे। देवाः। अजहुः। ये। सखायः।
मरुत्ऽभिः। इन्द्र। सख्यम्। ते। अस्तु। अथ। इमाः। विश्वाः। पृतनाः। जयासि॥ ७॥
त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्राइव राशयो यज्ञियासः।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम॥ ८॥
त्रिः। षष्टिः। त्वा। मरुतः। ववृधानाः। उस्राःऽइव। राशयः। यज्ञियासः।
उप। त्वा। आ। इमः। कृधि। नः। भागऽधेयम्। शुष्मम्। ते। एना। हविषा। विधेम॥ ८॥
तिग्ममायुधं मरुतामनीकं कस्त इन्द्र प्रति वज्रं दधर्ष।
अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन्॥ ९॥
तिग्मम्। आयुधम्। मरुताम्। अनीकम्। कः। ते। इन्द्र। प्रति। वज्रम्। दधर्ष।
अनायुधासः। असुराः। अदेवाः। चक्रेण। तान्। अप। वप। ऋजीषिन्॥ ९॥
मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः।
गिर्वाहसे गिर इन्द्राय पूर्वीर्धेहि तन्वे कुविदङ्ग वेदत्॥ १०॥ [३३]
महे। उग्राय। तवसे। सुऽवृक्तिम्। प्र। ईरय। शिवऽतमाय। पश्वः।
गिर्वाहसे। गिरः। इन्द्राय। पूर्वीः। धेहि। तन्वे। कुवित्। अङ्ग। वेदत्॥ १०॥
उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम्।
नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदङ्ग वेदत्॥ ११॥
उक्थऽवाहसे। विऽभ्वे। मनीषाम्। द्रुणा। न। पारम्। ईरय। नदीनाम्।
नि। स्पृश। धिया। तन्वि। श्रुतस्य। जुष्टऽतरस्य। कुवित्। अङ्ग। वेदत्॥ ११॥
तद्विविड्ढि यत्त इन्द्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास।
उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदङ्ग वेदत्॥ १२॥
तत्। विविड्ढि। यत्। ते। इन्द्रः। जुजोषत्। स्तुहि। सुऽस्तुतिम्। नमसा। आ। विवास।
उप। भूष। जरितः। मा। रुवण्यः। श्रवय। वाचम्। कुवित्। अङ्ग। वेदत्॥ १२॥
अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः।
आवत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अव॑ । द्र॒प्सः । अं॒शु॒ऽमती॑म् । अ॒ति॒ष्ठ॒त् । इ॒या॒नः । कृ॒ष्णः । द॒शऽभिः॑ । स॒हस्रैः॑ ।

आव॑त् । तम् । इन्द्रः॑ । शच्या॑ । धम॑न्तम् । अप॑ । स्नेहि॑तीः । नृ॒ऽमनाः॑ । अ॒धत्त ॥ १३ ॥

द्र॒प्सम॑पश्यं॒ विषु॑णे॒ चर॑न्तमुपह्व॒रे न॒द्यो॑ अंशु॒मत्याः॑ ।

नभो॒ न कृ॒ष्णम॑वतस्थि॒वांस॒मिष्या॑मि वो वृषणो॒ युध्य॑ता॒जौ ॥ १४ ॥

द्र॒प्सम् । अ॒प॒श्य॒म् । विषु॑णे । चर॑न्तम् । उ॒प॒ऽह्व॒रे । न॒द्यः॑ । अं॒शु॒ऽमत्याः॑ ।

नभः॑ । न । कृ॒ष्णम् । अ॒व॒त॒स्थि॒ऽवांस॑म् । इष्या॑मि । वः॒ । वृ॒ष॒णः॒ । युध्य॑त । आ॒जौ ॥ १४ ॥

अध॑ द्र॒प्सो अं॒शुम॑त्या उ॒पस्थेऽधा॑रय॒त्तन्व॑ं तितिवि॒षा॒णः ।

विशो॒ अदे॑वीर॒भ्या॒३॒॑चर॑न्ती॒र्बृह॒स्पति॑ना यु॒जेन्द्रः॑ ससाहे ॥ १५ ॥ [३४]

अध॑ । द्र॒प्सः । अं॒शु॒ऽमत्याः॑ । उ॒प॒ऽस्थे॑ । अधा॑रयत् । त॒न्व॑म् । ति॒त्वि॒षा॒णः ।

विशः॑ । अदे॑वीः । अ॒भि । आ॒ऽचर॑न्तीः । बृह॒स्पति॑ना । यु॒जा । इन्द्रः॑ । स॒स॒हे ॥ १५ ॥

त्वं ह॒ त्यत्स॒प्तभ्यो॒ जाय॑मानोऽश॒त्रुभ्यो॑ अभवः॒ शत्रु॑रिन्द्र ।

गू॒ळ्हे द्यावा॑पृथि॒वी अन्व॑विन्दो विभु॒मद्भ्यो॒ भुव॑नेभ्यो॒ रणं॑ धाः ॥ १६ ॥

त्वम् । ह॒ । त्यत् । स॒प्तऽभ्यः॑ । जाय॑मानः । अ॒श॒त्रु॒ऽभ्यः॑ । अ॒भ॒वः॒ । शत्रुः॑ । इ॒न्द्र॒ ।

गू॒ळ्हे इति॑ । द्यावा॑पृथि॒वी इति॑ । अनु॑ । अ॒वि॒न्दः॒ । वि॒भु॒मत्ऽभ्यः॑ । भुव॑नेभ्यः । रण॑म् । धाः॒ ॥ १६ ॥

त्वं ह॒ त्यदप्रतिमा॒नमोजो॒ वज्रे॑ण वज्रिन्धृषि॒तो जघन्थ ।

त्वं शुष्ण॒स्यावा॑तिरो॒ वध॑त्रै॒स्त्वं गा इ॑न्द्र॒ शच्येद॑विन्दः ॥ १७ ॥

त्वम् । ह॒ । त्यत् । अ॒प्र॒ति॒ऽमा॒नम् । ओजः॑ । वज्रे॑ण । व॒ज्रि॒न् । धृषि॒तः । ज॒घ॒न्थ॒ ।

त्वम् । शुष्ण॑स्य । अव॑ । अ॒ति॒रः॒ । वध॑त्रैः । त्वम् । गाः । इ॒न्द्र॒ । शच्या॑ । इत् । अ॒वि॒न्दः॒ ॥ १७ ॥

त्वं ह॒ त्यद्वृ॑षभ चर्षणी॒नां घ॒नो वृ॒त्राणां॑ तवि॒षो ब॑भूथ ।

त्वं सिन्धूँ॑रसृजस्तस्तभा॒नान् त्वम॒पो अ॑जयो दा॒सप॑त्नीः ॥ १८ ॥

त्वम् । ह॒ । त्यत् । वृ॒ष॒भ॒ । च॒र्ष॒णी॒नाम् । घ॒नः । वृ॒त्राणा॑म् । त॒वि॒षः । ब॒भू॒थ॒ ।

त्वम् । सिन्धू॑न् । अ॒सृ॒जः॒ । त॒स्त॒भा॒नान् । त्वम् । अ॒पः । अ॒ज॒यः॒ । दा॒सऽप॑त्नीः ॥ १८ ॥

स सु॒क्रतू॒ रणि॑ता॒ यः सु॒तेष्वनु॑त्तमन्यु॒र्यो अहे॑व रे॒वान् ।

य एक॒ इन्नर्यपां॑सि कर्ता॒ स वृ॑त्र॒हा प्रतीद॒न्यमा॑हुः ॥ १९ ॥

सः । सु॒ऽक्रतुः॑ । रणि॑ता । यः । सु॒तेषु॑ । अनु॑त्तऽमन्युः । यः । अहा॑ऽइव । रे॒वान् ।

यः । एकः॑ । इत् । नरि॑ । अपां॑सि । कर्ता॑ । सः । वृ॒त्र॒ऽहा । प्रति॑ । इत् । अ॒न्यम् । आ॒हुः॒ ॥ १९ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स वृत्रहेन्द्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम।

स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता॥ २०॥

सः। वृत्र॰हा। इन्द्रः। चर्षणि॰धृत्। तम्। सु॰स्तुत्या। हव्यम्। हुवेम।

सः। प्र॰अविता। मघ॰वा। नः। अधि॰वक्ता। सः। वाजस्य। श्रवस्यस्य। दाता॥ २०॥

स वृत्रहेन्द्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव।

कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः॥ २१॥ [३५]

सः। वृत्र॰हा। इन्द्रः। ऋभुक्षाः। सद्यः। जज्ञानः। हव्यः। बभूव।

कृण्वन्। अपांसि। नर्या। पुरूणि। सोमः। न। पीतः। हव्यः। सखि॰भ्यः॥ २१॥

[९६ (९७)] [१५ रेभः काश्यपः। इन्द्रः। बृहती, १०, १३ अतिजगत्यौ, ११-१२ उपरिष्टाद्बृहत्यौ, १४ त्रिष्टुप्, १५ जगती।]

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः।

स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः॥ १॥

याः। इन्द्र। भुजः। आ। अभरः। स्वः॰वान्। असुरेभ्यः।

स्तोतारम्। इत्। मघ॰वन्। अस्य। वर्धय। ये। च। त्वे इति। वृक्त॰बर्हिषः॥ १॥

यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम्।

यजमाने सुन्वति दक्षिणावति तस्मिन्तं धेहि मा पणौ॥ २॥

यम्। इन्द्र। दधिषे। त्वम्। अश्वम्। गाम्। भागम्। अव्ययम्।

यजमाने। सुन्वति। दक्षिणा॰वति। तस्मिन्। तम्। धेहि। मा। पणौ॥ २॥

य इन्द्र सस्त्यव्रतोऽनुष्वापमदेवयुः। स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः॥ ३॥

यः। इन्द्र। सस्ति। अव्रतः। अनु॰स्वापम्। अदेव॰युः।

स्वैः। सः। एवैः। मुमुरत्। पोष्यम्। रयिम्। सनुतः। धेहि। तम्। ततः॥ ३॥

यच्छक्रासि परावति यदर्वावति वृत्रहन्।

अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति॥ ४॥

यत्। शक्र। असि। परा॰वति। यत्। अर्वा॰वति। वृत्र॰हन्।

अतः। त्वा। गीःऽभिः। द्यु॰गत्। इन्द्र। केशि॰भिः। सुत॰वान्। आ। विवासति॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि।

यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि॥ ५॥ [३६]

यत्। वा। असि। रोचने। दिवः। समुद्रस्य। अधि। विष्टपि।

यत्। पार्थिवे। सदने। वृत्रहन्ऽतम। यत्। अन्तरिक्षे। आ। गहि॥ ५॥

स नः सोमेषु सोमपाः सुतेषु शवसस्पते। मादयस्व राधसा सूनृतावतेन्द्र राया परीणसा॥ ६॥

सः। नः। सोमेषु। सोमऽपाः। सुतेषु। शवसः। पते।

मादयस्व। राधसा। सूनृताऽवता। इन्द्र। राया। परीणसा॥ ६॥

मा न इन्द्र परा वृणग्भवा नः सधमाद्यः।

त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक्॥ ७॥

मा। नः। इन्द्र। परा। वृणक्। भव। नः। सधऽमाद्यः।

त्वम्। नः। ऊती। त्वम्। इत्। नः। आप्यम्। मा। नः। इन्द्र। परा। वृणक्॥ ७॥

अस्मे इन्द्र सचा सुते नि षदा पीतये मधु। कृधी जरित्रे मघवन्नवो महदस्मे इन्द्र सचा सुते॥ ८॥

अस्मे इति। इन्द्र। सचा। सुते। नि। सद। पीतये। मधु।

कृधि। जरित्रे। मघऽवन्। अवः। महत्। अस्मे इति। इन्द्र। सचा। सुते॥ ८॥

न त्वा देवास आशत न मर्त्यासो अद्रिवः।

विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत॥ ९॥

न। त्वा। देवासः। आशत। न। मर्त्यासः। अद्रिऽवः।

विश्वा। जातानि। शवसा। अभिऽभूः। असि। न। त्वा। देवासः। आशत॥ ९॥

विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे।

क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम्॥ १०॥ [३७]

विश्वाः। पृतनाः। अभिऽभूतरम्। नरम्। सऽजूः। ततक्षुः। इन्द्रम्। जजनुः। च। राजसे।

क्रत्वा। वरिष्ठम्। वरे। आऽमुरिम्। उत। उग्रम्। ओजिष्ठम्। तवसम्। तरस्विनम्॥ १०॥

समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये। स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः॥ ११॥

सम्। ईम्। रेभासः। अस्वरन्। इन्द्रम्। सोमस्य। पीतये।

स्वः२पतिम्। यत्। ईम्। वृधे। धृतऽव्रतः। हि। ओजसा। सम्। ऊतिऽभिः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नेमिं॒ नम॑न्ति॒ चक्ष॑सा मे॒षं विप्रा॑ अभि॒स्वरा॑।

सुदी॒तयो॑ वो अ॒द्रुहोऽपि॒ कर्णे॑ तर॒स्विन॑ः समृक्व॑भिः॥ १२॥

नेमिम्। न॒म॒न्ति॒। च॒क्ष॑सा। मे॒षम्। विप्राः॑। अ॒भि॒ऽस्वरा॑।

सु॒ऽदी॒तय॑ः। व॒ः। अ॒द्रुह॑ः। अपि॑। कर्णे॑। त॒र॒स्विन॑ः। सम्। ऋक्व॑ऽभिः॥ १२॥

तमिन्द्रं॑ जोहवीमि म॒घवा॑नमु॒ग्रं स॒त्रा दधा॑न॒मप्र॑तिष्कुतं॒ शवां॑सि।

मंहि॑ष्ठो गी॒र्भिरा च॑ य॒ज्ञियो॑ व॒वर्त॑द्रा॒ये नो॒ विश्वा॑ सु॒पथा॑ कृणोतु वज्री॥ १३॥

तम्। इन्द्र॑म्। जो॒ह॒वी॒मि॒। म॒घऽवा॑नम्। उ॒ग्रम्। स॒त्रा। दधा॑नम्। अप्र॑तिऽस्कुतम्। शवां॑सि।

मंहि॑ष्ठः। गी॒ःऽभिः। आ। च॒। य॒ज्ञिय॑ः। व॒वर्त॑त्। रा॒ये। न॒ः। विश्वा॑। सु॒ऽपथा॑। कृ॒णो॒तु॒। व॒ज्री॥ १३॥

त्वं पुर॑ इन्द्र चि॒किदे॑ना॒ व्योज॑सा शविष्ठ शक्र नाश॒यध्यै॑।

त्वद्विश्वा॑नि॒ भुव॑नानि वज्रिन् द्यावा॑ रेजेते पृथिवी च॑ भी॒षा॥ १४॥

त्वम्। पुर॑ः। इ॒न्द्र॒। चि॒कित्। ए॒ना॒ः। वि। ओज॑सा। श॒वि॒ष्ठ॒। श॒क्र॒। ना॒श॒यध्यै॑।

त्वत्। विश्वा॑नि। भुव॑नानि। व॒ज्रि॒न्। द्यावा॑। रे॒जे॒ते॒ इति॑। पृ॒थि॒वी इति॑। च॒। भी॒षा॥ १४॥

तन्म॑ ऋ॒तमि॑न्द्र शूर चित्र पात्व॒पो न व॑ज्रिन् दुरि॒ताति॑ पर्षि॒ भूरि॑।

क॒दा न॑ इन्द्र रा॒य आ द॑शस्येर्वि॒श्वप्स्न्य॑स्य स्पृह॒याय्य॑स्य राजन्॥ १५॥ [३८]

तत्। मा॒। ऋ॒तम्। इ॒न्द्र॒। शू॒र॒। चि॒त्र॒। पा॒तु॒। अ॒पः। न। व॒ज्रि॒न्। दु॒ःऽइ॒ता। अति॑। प॒र्षि॒। भूरि॑।

क॒दा। न॒ः। इ॒न्द्र॒। रा॒यः। आ। द॒श॒स्ये॒ः। वि॒श्वऽप्स्न्य॑स्य। स्पृ॒ह॒याय्य॑स्य। रा॒ज॒न्॥ १५॥

इत्याश्वलायन-संहितायां

षष्ठाष्टके

षष्ठोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके सप्तमोऽध्यायः ॥

[९७ (९८)] [१२ नृमेध आङ्गिरसः। इन्द्रः। उष्णिक्; ७, १०-११ ककुभः; ९, १२ पुरउष्णिजौ।]

इन्द्राय साम गायत विप्राय बृहते बृहत्। धर्मकृते विपश्चिते पनस्यवे ॥ १ ॥

इन्द्राय। साम। गायत। विप्राय। बृहते। बृहत्। धर्मऽकृते। विपःऽचिते। पनस्यवे ॥ १ ॥

त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः। विश्वकर्मा विश्वदेवो महाँ असि ॥ २ ॥

त्वम्। इन्द्र। अभिऽभूः। असि। त्वम्। सूर्यम्। अरोचयः।

विश्वऽकर्मा। विश्वऽदेवः। महान्। असि ॥ २ ॥

विभ्राजञ्ज्योतिषा स्व१रगच्छो रोचनं दिवः। देवास्त इन्द्र सख्याय येमिरे ॥ ३ ॥

विऽभ्राजन्। ज्योतिषा। स्वः। अगच्छः। रोचनम्। दिवः। देवाः। ते। इन्द्र। सख्याय। येमिरे ॥ ३ ॥

एन्द्र नो गधि प्रियः सत्राजिदगोह्यः। गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥ ४ ॥

आ। इन्द्र। नः। गधि। प्रियः। सत्राऽजित्। अगोह्यः। गिरिः। न। विश्वतः। पृथुः। पतिः। दिवः ॥ ४ ॥

अभि हि सत्य सोमपा उभे बभूथ रोदसी। इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ ५ ॥

अभि। हि। सत्य। सोमऽपाः। उभे इति। बभूथ। रोदसी इति।

इन्द्र। असि। सुन्वतः। वृधः। पतिः। दिवः ॥ ५ ॥

त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि। हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥ ६ ॥ [१]

त्वम्। हि। शश्वतीनाम्। इन्द्र। दर्ता। पुराम्। असि। हन्ता। दस्योः। मनोः। वृधः। पतिः। दिवः ॥ ६ ॥

अधा हीन्द्र गिर्वण उप त्वा कामान्महः ससृज्महे। उदेव यन्त उदभिः ॥ ७ ॥

अध। हि। इन्द्र। गिर्वणः। उप। त्वा। कामान्। महः। ससृज्महे। उदाऽइव। यन्तः। उदऽभिः ॥ ७ ॥

वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि। वावृध्वांसं चिदद्रिवो दिवेदिवे ॥ ८ ॥

वाः। न। त्वा। यव्याभिः। वर्धन्ति। शूर। ब्रह्माणि। ववृध्वांसम्। चित्। अद्रिऽवः। दिवेऽदिवे ॥ ८ ॥

युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे। इन्द्रवाहा वचोयुजा ॥ ९ ॥

युञ्जन्ति। हरी इति। इषिरस्य। गाथया। उरौ। रथे। उरुऽयुगे। इन्द्रऽवाहा। वचःऽयुजा ॥ ९ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे। आ वीरं पृतनाषहम्॥ १०॥

त्वम्। नः। इन्द्र। आ। भर। ओजः। नृम्णम्। शतक्रतो इति शतऽक्रतो। विऽचर्षणे।
आ। वीरम्। पृतनाऽसहम्॥ १०॥

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अधा ते सुम्नमीमहे॥ ११॥

त्वम्। हि। नः। पिता। वसो इति। त्वम्। माता। शतक्रतो इति शतऽक्रतो। बभूविथ।
अध। ते। सुम्नम्। ईमहे॥ ११॥

त्वां शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो। स नो रास्व सुवीर्यम्॥ १२॥ [२]

त्वाम्। शुष्मिन्। पुरुऽहूत। वाजऽयन्तम्। उप। ब्रुवे। शतक्रतो इति शतऽक्रतो।
सः। नः। रास्व। सुऽवीर्यम्॥ १२॥

[९८ (९९)] [८ नृमेध आङ्गिरसः। इन्द्रः। प्रगाथः = (अयुजो बृहत्यः युजः सतोबृहत्यः)।]

त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः। स इन्द्र स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि॥ १॥

त्वाम्। इदा। ह्यः। नरः। अपीप्यन्। वज्रिन्। भूर्णयः।
सः। इन्द्र। स्तोमऽवाहसाम्। इह। श्रुधि। उप। स्वसरम्। आ। गहि॥ १॥

मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषन्ति वेधसः।
तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः॥ २॥

मत्स्व। सुऽशिप्र। हरिऽवः। तत्। ईमहे। त्वे इति। आ। भूषन्ति। वेधसः।
तव। श्रवांसि। उपऽमानि। उक्थ्या। सुतेषु। इन्द्र। गिर्वणः॥ २॥

श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम॥ ३॥

श्रायन्तःऽइव। सूर्यम्। विश्वा। इत्। इन्द्रस्य। भक्षत।
वसूनि। जाते। जनमाने। ओजसा। प्रति। भागम्। न। दीधिम॥ ३॥

अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन्॥ ४॥

अनर्शऽरातिम्। वसुऽदाम्। उप। स्तुहि। भद्राः। इन्द्रस्य। रातयः।
सः। अस्य। कामम्। विधतः। न। रोषति। मनः। दानाय। चोदयन्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः। अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः॥ ५॥

त्वम्। इन्द्र। प्रऽतूर्तिषु। अभि। विश्वाः। असि। स्पृधः।

अशस्तिऽहा। जनिता। विश्वऽतूः। असि। त्वम्। तूर्य। तरुष्यतः॥ ५॥

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा।

विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि॥ ६॥

अनु। ते। शुष्मम्। तुरयन्तम्। ईयतुः। क्षोणी इति। शिशुम्। न। मातरा।

विश्वाः। ते। स्पृधः। श्नथयन्त। मन्यवे। वृत्रम्। यत्। इन्द्र। तूर्वसि॥ ६॥

इत ऊती वो अजरं प्रहेतारमप्रहितम्। आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम्॥ ७॥

इतः। ऊती। वः। अजरम्। प्रऽहेतारम्। अप्रऽहितम्।

आशुम्। जेतारम्। हेतारम्। रथिऽतमम्। अतूर्तम्। तुग्र्यऽवृधम्॥ ७॥

इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम्।

समानमिन्द्रमवसे हवामहे वसवानं वसूजुवम्॥ ८॥ [३]

इष्कर्तारम्। अनिःऽकृतम्। सहःऽकृतम्। शतम्ऽऊतिम्। शतऽक्रतुम्।

समानम्। इन्द्रम्। अवसे। हवामहे। वसवानम्। वसुऽजुवम्॥ ८॥

[९९ (१००)] [नेमो भार्गवः, ४-५ इन्द्रः। इन्द्र, १०-११ वाक्। त्रिष्टुप्, ६ जगती, ७-९ अनुष्टुभः।]

अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यन्ति पश्चात्।

यदा मह्यं दीधरो भागमिन्द्रादिन्मया कृणवो वीर्याणि॥ १॥

अयम्। ते। एमि। तन्वा। पुरस्तात्। विश्वे। देवाः। अभि। मा। यन्ति। पश्चात्।

यदा। मह्यम्। दीधरः। भागम्। इन्द्र। आत्। इत्। मया। कृणवः। वीर्याणि॥ १॥

दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः।

असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जङ्घनाव भूरि॥ २॥

दधामि। ते। मधुनः। भक्षम्। अग्रे। हितः। ते। भागः। सुतः। अस्तु। सोमः।

असः। च। त्वम्। दक्षिणतः। सखा। मे। अध। वृत्राणि। जङ्घनाव। भूरि॥ २॥

प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति।

नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । सु । स्तोमम् । भरत । वाजऽयन्तः । इन्द्राय । सत्यम् । यदि । सत्यम् । अस्ति ।
न । इन्द्रः । अस्ति । इति । नेमः । ऊँ इति । त्वः । आह । कः । ईम् । ददर्श । कम् । अभि । स्तवाम ॥ ३ ॥

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि॥ ४॥

अयम् । अस्मि । जरितरिति । पश्य । मा । इह । विश्वा । जातानि । अभि । अस्मि । मह्ना ।
ऋतस्य । मा । प्रऽदिशः । वर्धयन्ति । आऽदर्दिरः । भुवना । दर्दरीमि ॥ ४ ॥

आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदञ्छिशुमन्तः सखायः॥ ५॥

आ । यत् । मा । वेनाः । अरुहन् । ऋतस्य । एकम् । आसीनम् । हर्यतस्य । पृष्ठे ।
मनः । चित् । मे । हृदे । आ । प्रति । अवोचत् । अचिक्रदन् । शिशुऽमन्तः । सखायः ॥ ५ ॥

विश्वेत्ता ते सवनेषु प्रवाच्या य चकर्थ मघवन्निन्द्र सुन्वते।
पारावतं यत्पुरुसंभृतं वस्वपावृणोः शरभाय ऋषिबन्धवे॥ ६॥ [४]

विश्वा । इत् । ता । ते । सवनेषु । प्रऽवाच्या । या । चकर्थ । मघऽवन् । इन्द्र । सुन्वते ।
पारावतम् । यत् । पुरुऽसंभृतम् । वसु । अपऽअवृणोः । शरभाय । ऋषिऽबन्धवे ॥ ६ ॥

प्र नूनं धावता पृथङ्नेह यो वो अवावरीत्। नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत्॥ ७॥

प्र । नूनम् । धावत । पृथक् । न । इह । यः । वः । अवावरीत् ।
नि । सीम् । वृत्रस्य । मर्मणि । वज्रम् । इन्द्रः । अपीपतत् ॥ ७ ॥

मनोजवा अयमान आयसीमतरत्पुरम्। दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत्॥ ८॥

मनःऽजवाः । अयमानः । आयसीम् । अतरत् । पुरम् ।
दिवम् । सुऽपर्णः । गत्वाय । सोमम् । वज्रिणे । आ । अभरत् ॥ ८ ॥

समुद्रे अन्तः शयत उद्गा वज्रो अभीवृतः। भरन्त्यस्मै संयतः पुरःप्रस्रवणा बलिम्॥ ९॥

समुद्रे । अन्तरिति । शयते । उद्गा । वज्रः । अभिऽवृतः ।
भरन्ति । अस्मै । सम्ऽयतः । पुरःऽप्रस्रवणाः । बलिम् ॥ ९ ॥

यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्। वाक्। वदन्ती। अविऽचेतनानि। राष्ट्री। देवानाम्। निऽससाद। मन्द्रा।

चतस्रः। ऊर्जम्। दुदुहे। पयांसि। क्व। स्वित्। अस्याः। परमम्। जगाम॥ १०॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।

सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥ ११॥

देवीम्। वाचम्। अजनयन्त। देवाः। ताम्। विश्वऽरूपाः। पशवः। वदन्ति॥ सा। नः।

मन्द्रा। इषम्। ऊर्जम्। दुहाना। धेनुः। वाक्। अस्मान्। उप। सुऽस्तुता। आ। एतु॥ ११॥

सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे।

हनाव वृत्रं रिणचाव सिन्धूनिन्द्रस्य यन्तु प्रसवे विसृष्टाः॥ १२॥ [५]

सखे। विष्णो इति। विऽतरम्। वि। क्रमस्व। द्यौः। देहि। लोकम्। वज्राय। विऽस्कभे।

हनाव। वृत्रम्। रिणचाव। सिन्धून्। इन्द्रस्य। यन्तु। प्रऽसवे। विऽसृष्टाः॥ १२॥

[१०० (१०१)] [१६ जमदग्निर्भार्गवः। मित्रावरुणौ, ५ मित्रावरुणादित्याः, ६ आदित्याः, ७-८ अश्विनौ, ९-१० वायुः, ११-१२ सूर्यः, १३ उषाः, सूर्यप्रभा वा, १४ पवमानः, १५-१६ गौः। १-२ प्रगाथः = (बृहती, सतोबृहती), ३ गायत्री, ४ सतोबृहती, ५-२३ प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः), १४-१६ त्रिष्टुभः।]

ऋधगित्था स मर्त्यः शशमे देवतातये। यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये॥ १॥

ऋधक्। इत्था। सः। मर्त्यः। शशमे। देवऽतातये।

यः। नूनम्। मित्रावरुणौ। अभिष्टये। आऽचक्रे। हव्यऽदातये॥ १॥

वर्षिष्टक्षत्रा अरुचक्षसा नरा राजाना दीर्घश्रुत्तमा।

ता बाहुता न दंसना रथर्यतः साकं सूर्यस्य रश्मिभिः॥ २॥

वर्षिष्ठऽक्षत्रौ। उरुऽचक्षसा। नरा। राजाना। दीर्घश्रुत्ऽतमा।

ता। बाहुता। न। दंसना। रथर्यतः। साकम्। सूर्यस्य। रश्मिऽभिः॥ २॥

प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत्। अयःशीर्षा मदेरघुः॥ ३॥

प्र। यः। वाम्। मित्रावरुणा। अजिरः। दूतः। अद्रवत्। अयःऽशीर्षा। मदेऽरघुः॥ ३॥

न यः संपृच्छे न पुनर्हवीतवे न संवादाय रमते।

तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न। यः। सम्ऽपृच्छे। न। पुनः। हवीतवे। न। सम्ऽवादाय। रमते।

तस्मात्। नः। अद्य। सम्ऽऋतेः। उरुष्यतम्। बाहुऽभ्याम्। नः। उरुष्यतम्॥ ४॥

प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो। वरूथ्यं१ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत॥ ५॥ [६]

प्र। मित्राय। प्र। अर्यम्णे। सचथ्यम्। ऋतवसो इत्यृतऽवसो।

वरूथ्यम्। वरुणे। छन्द्यम्। वचः। स्तोत्रम्। राजऽसु। गायत॥ ५॥

ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम्। ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते॥ ६॥

ते। हिन्विरे। अरुणम्। जेन्यम्। वसु। एकम्। पुत्रम्। तिसृणाम्।

ते। धामानि। अमृताः। मर्त्यानाम्। अदब्धाः। अभि। चक्षते॥ ६॥

आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा। उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये॥ ७॥

आ। मे। वचांसि। उत्ऽयता। द्युमत्ऽतमानि। कर्त्वा।

उभा। यातम्। नासत्या। सऽजोषसा। प्रति। हव्यानि। वीतये॥ ७॥

रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू।

प्राचीं होत्रां प्रतिरन्ताविंतं नरा गृणाना जमदग्निना॥ ८॥

रातिम्। यत्। वाम्। अरक्षसम्। हवामहे। युवाभ्याम्। वाजिनीवसू इति वाजिनीऽवसू।

प्राचीम्। होत्राम्। प्रऽतिरन्तौ। इतम्। नरा। गृणाना। जमत्ऽअग्निना॥ ८॥

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः।

अन्तः पवित्र उपरि श्रीणानो३यं शुक्रो अयामि ते॥ ९॥

आ। नः। यज्ञम्। दिविऽस्पृशम्। वायो इति। याहि। सुमन्मऽभिः।

अन्तरिति। पवित्रे। उपरि। श्रीणानः। अयम्। शुक्रः। अयामि। ते॥ ९॥

वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये।

अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम्॥ १०॥ [७]

वेति। अध्वर्युः। पथिऽभिः। रजिष्ठैः। प्रति। हव्यानि। वीतये।

अध। नियुत्वः। उभयस्य। नः। पिब। शुचिम्। सोमम्। गोऽआशिरम्॥ १०॥

बण्महाँ असि सूर्य बळादित्य महाँ असि।

महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बट्। महान्। असि। सूर्य। बट्। आदित्य। महान्। असि।

महः। ते। सतः। महिमा। पनस्यते। अद्धा। देव। महान्। असि॥ ११॥

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि।

मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम्॥ १२॥

बट्। सूर्य। श्रवसा। महान्। असि। सत्रा। देव। महान्। असि।

मह्ना। देवानाम्। असुर्यः। पुरःऽहितः। विऽभु। ज्योतिः। अदाभ्यम्॥ १२॥

इयं या नीच्यर्किणी रूपा रोहिण्या कृता। चित्रेव प्रत्यदर्श्यायत्य१न्तर्दशसु बाहुषु॥ १३॥

इयम्। या। नीची। अर्किणी। रूपा। रोहिण्या। कृता।

चित्राऽइव। प्रति। अदर्शि। आऽयती। अन्तः। दशऽसु। बाहुषु॥ १३॥

प्रजा ह तिस्रो अत्यायमीयुर्न्य१न्या अर्कमभितो विविश्रे।

बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश॥ १४॥

प्रऽजाः। ह। तिस्रः। अतिऽआयम्। ईयुः। नि। अन्याः। अर्कम्। अभितः। विविश्रे।

बृहत्। ह। तस्थौ। भुवनेषु। अन्तरिति। पवमानः। हरितः। आ। विवेश॥ १४॥

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।

प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ १५॥

माता। रुद्राणाम्। दुहिता। वसूनाम्। स्वसा। आदित्यानाम्। अमृतस्य। नाभिः।

प्र। नु। वोचम्। चिकितुषे। जनाय। मा। गाम्। अनागाम्। अदितिम्। वधिष्ट॥ १५॥

वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम्।

देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः॥ १६॥ [८]

वचःऽविदम्। वाचम्। उत्ऽईरयन्तीम्। विश्वाभिः। धीभिः। उपऽतिष्ठमानाम्।

देवीम्। देवेभ्यः। परि। आऽईयुषीम्। गाम्। आ। मा। अवृक्त। मर्त्यः। दभ्रऽचेताः॥ १६॥

[१०१ (१०२)] [२२ भार्गवः प्रयोगः, अग्निर्बार्हस्पत्यः, पावको वा, सहसः पुत्रौ गृहपति-यविष्ठौ, तयोर्वान्यतरः। अग्निः। गायत्री।]

त्वमग्ने बृहद्वयो दधासि देव दाशुषे। कविर्गृहपतिर्युवा॥ १॥

त्वम्। अग्ने। बृहत्। वयः। दधासि। देव। दाशुषे। कविः। गृहऽपतिः। युवा॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स नु ईळानया सह देवाँ अग्ने दुवस्युवा। चिकिद्विभानवा वह॥ २॥

सः। नः। ईळानया। सह। देवान्। अग्ने। दुवस्युवा।

चिकित्। विभानो इति विऽभानो। आ। वह॥ २॥

त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य। अभि ष्मो वाजसातये॥ ३॥

त्वया। ह। स्वित्। युजा। वयम्। चोदिष्ठेन। यविष्ठ्य। अभि। स्मः। वाजऽसातये॥ ३॥

और्वभृगुवच्छुचिमप्नवानवदा हुवे। अग्निं समुद्रवाससम्॥ ४॥ [९]

और्वभृगुऽवत्। शुचिम्। अप्नवानऽवत्। आ। हुवे। अग्निम्। समुद्रऽवाससम्॥ ४॥

हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः। अग्निं समुद्रवाससम्। ५॥

हुवे। वातऽस्वनम्। कविम्। पर्जन्यऽक्रन्द्यम्। सहः। अग्निम्। समुद्रऽवाससम्। ५॥

आ सवं सवितुर्यथा भगस्येव भुजिं हुवे। अग्निं समुद्रवाससम्॥ ६॥

आ। सवम्। सवितुः। यथा। भगस्यऽइव। भुजिम्। हुवे। अग्निम्। समुद्रऽवाससम्॥ ६॥

अग्निं वो वृधन्तमध्वराणां पुरूतमम्। अच्छा नप्त्रे सहस्वते॥ ७॥

अग्निम्। वः। वृधन्तम्। अध्वराणाम्। पुरुऽतमम्। अच्छ। नप्त्रे। सहस्वते॥ ७॥

अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः॥ ८॥

अयम्। यथा। नः। आऽभुवत्। त्वष्टा। रूपाऽइव। तक्ष्या। अस्य। क्रत्वा। यशस्वतः॥ ८॥

अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते। आ वाजैरुप नो गमत्॥ ९॥

अयम्। विश्वाः। अभि। श्रियः। अग्निः। देवेषु। पत्यते। आ। वाजैः। उप। नः। गमत्॥ ९॥

विश्वेषामिह स्तुहि होतॄणां यशस्तमम्। अग्निं यज्ञेषु पूर्व्यम्॥ १०॥ [१०]

विश्वेषाम्। इह। स्तुहि। होतॄणाम्। यशःऽतमम्। अग्निम्। यज्ञेषु। पूर्व्यम्॥ १०॥

शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा। दीदाय दीर्घश्रुत्तमः॥ ११॥

शीरम्। पावकऽशोचिषम्। ज्येष्ठः। यः। दमेषु। आ। दीदाय। दीर्घश्रुत्ऽतमः॥ ११॥

तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम्। मित्रं न यातयज्जनम्॥ १२॥

तम्। अर्वन्तम्। न। सानसिम्। गृणीहि। विप्र। शुष्मिणम्। मित्रम्। न। यातयत्ऽजनम्॥ १२॥

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः। वायोरनीके अस्थिरन्॥ १३॥

उप। त्वा। जामयः। गिरः। देदिशतीः। हविःऽकृतः। वायोः। अनीके। अस्थिरन्॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्यं त्रिधात्ववृंतं बर्हिस्तस्थावसंन्दिनम्। आपंश्चिन्नि दंधा पदम्॥ १४॥

यस्यं। त्रिऽधातुं। अवृंतम्। बर्हिः। तस्थौ। असम्ऽदिनम्। आपंः। चित्। नि। दुध। पुदम्॥ १४॥

पुदं देवस्यं मीळ्हुषोऽनांदृष्टाभिरूतिभिंः। भुद्रा सूर्यंइवोपुदृक्॥ १५॥ [११]

पुदम्। देवस्यं। मीळ्हुषंः। अनांधृष्टाभिः। ऊतिऽभिंः। भुद्रा। सूर्यःऽइव। उपुऽदृक्॥ १५॥

अग्नें घृतस्यं धीतिभिंस्तेपानो दैव शोचिषां। आ देवान्वंक्षि यक्षि च॥ १६॥

अग्नें। घृतस्यं। धीतिऽभिंः। तेपानः। देव। शोचिषां। आ। देवान्। वक्षि। यक्षिं। च॥ १६॥

तं त्वांजनन्त मातरंः कविं देवासों अङ्गिरः। हव्यवाहममंर्त्यम्॥ १७॥

तम्। त्वा। अजनन्त। मातरंः। कविम्। देवासंः। अङ्गिरः। हव्यऽवाहंम्। अमंर्त्यम्॥ १७॥

प्रचैतसं त्वा कवेऽग्नें दूतं वरेण्यम्। हव्यवाहं नि षेंदिरे॥ १८॥

प्रऽचैतसम्। त्वा। कवे। अग्नें। दूतम्। वरेण्यम्। हव्यऽवाहंम्। नि। सेदिरे॥ १८॥

नहि मे अस्त्यघ्न्या न स्वधिंतिर्वनंन्वति। अथैतादृग्भंरामि ते॥ १९॥

नहि। मे। अस्तिं। अघ्न्यां। न। स्वऽधिंतिः। वनंन्ऽवति। अथं। एतादृक्। भरामि। ते॥ १९॥

यदंग्ने कानि कानिं चिदा ते दारूंणि दुध्मसिं। ता जुंषस्व यविष्ठ्य॥ २०॥

यत्। अग्ने। कानिं। कानिं। चित्। आ। ते। दारूंणि। दुध्मसिं। ता। जुषस्व। यविष्ठ्य॥ २०॥

यदत्त्युंपजिह्विका यद्वम्रो अंतिसर्पति। सर्वं तदंस्तु ते घृतम्॥ २१॥

यत्। अत्तिं। उपऽजिह्विका। यत्। वम्रः। अतिऽसर्पति। सर्वम्। तत्। अस्तु। ते। घृतम्॥ २१॥

अग्निमिन्धांनो मनंसा धियं सचेत मर्त्यः। अग्निमींधे विवस्वंभिः॥ २२॥ [१२]

अग्निम्। इन्धांनः। मनंसा। धियंम्। सचेत। मर्त्यः। अग्निम्। ईधे। विवस्वंऽभिः॥ २२॥

[१०२ (१०३)] [१४ सोभरिः काण्वः। अग्निः, १४ अग्नामरुतः। बृहती, ५ विराड्रूपा, ७, ९, ११; १३ सतोबृहत्यः, ८, १२ ककुप्; १० ह्रसीयसी; १४ अनुष्टुप्]

अदंर्शि गातुवित्तंमो यस्मिन्व्रतान्यांदधुः। उपो षु जातमार्यस्य वर्धनमग्निं नंक्षन्त नो गिरंः॥ १॥

अदंर्शि। गातुवित्ऽतंमः। यस्मिंन्। व्रतानिं। आऽदधुः।

उपो इतिं। सु। जातम्। आर्यस्य। वर्धनम्। अग्निम्। नक्षन्त। नः। गिरंः॥ १॥

प्र दैवोंदासो अग्निर्देवाँ अच्छा न मज्मनां।

अनुं मातरं पृथिवीं वि वांवृते तस्थौ नाकंस्य सानंवि॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र। दैवः२दासः। अग्निः। देवान्। अच्छ। न। मज्मना।
अनु। मातरम्। पृथिवीम्। वि। ववृते। तस्थौ। नाकस्य। सानवि॥ २॥

यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः।
सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत॥ ३॥

यस्मात्। रेजन्त। कृष्टयः। चर्कृत्यानि। कृण्वतः।
सहस्र॰साम्। मेधसातौऽइव। त्मना। अग्निम्। धीभिः। सपर्यत॥ ३॥

प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत्।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम्॥ ४॥

प्र। यम्। राये। निनीषसि। मर्तः। यः। ते। वसो इति। दाशत्।
सः। वीरम्। धत्ते। अग्ने। उक्थ॰शंसिनम्। त्मना। सहस्र॰पोषिणम्॥ ४॥

स दृळ्हे चिदभि तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः।
त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि॥ ५॥ [१३]

सः। दृळ्हे। चित्। अभि। तृणत्ति। वाजम्। अर्वता। सः। धत्ते। अक्षिति।
श्रवः। त्वे इति। देव॰त्रा। सदा। पुरुवसो इति पुरु॰वसो। विश्वा। वामानि। धीमहि॥ ५॥

यो विश्वा दयते वसु होता मन्द्रो जनानाम्। मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये॥ ६॥

यः। विश्वा। दयते। वसु। होता। मन्द्रः। जनानाम्।
मधोः। न। पात्रा। प्रथमानि। अस्मै। प्र। स्तोमाः। यन्ति। अग्नये॥ ६॥

अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम्॥ ७॥

अश्वम्। न। गीः२भिः। रथ्यम्। सु॰दानवः। मर्मृज्यन्ते। देव॰यवः।
उभे इति। तोके इति। तनये। दस्म। विश्पते। पर्षि। राधः। मघोनाम्॥ ७॥

प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये॥ ८॥

प्र। मंहिष्ठाय। गायत। ऋत॰व्ने। बृहते। शुक्र॰शोचिषे। उप॰स्तुतासः। अग्नये॥ ८॥

आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः।
कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत्॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ । वंसते । मघ॰वा । वीर॰वत् । यशः । सम्॰इद्धः । द्युम्नी । आ॰हुतः ।

कुवित् । नः । अस्य । सु॰मतिः । नवीयसी । अछ । वाजेभिः । आ॰गमत् ॥ ९ ॥

प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम् । अग्निं रथानां यमम् ॥ १० ॥ [१४]

प्रेष्ठम् । ऊँ इति । प्रियाणाम् । स्तुहि । आ॰साव । अतिथिम् । अग्निम् । रथानाम् । यमम् ॥ १० ॥

उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ।

दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥ ११ ॥

उत्॰इता । यः । नि॰दिता । वेदिता । वसु । आ । यज्ञियः । ववर्तति ।

दुस्तराः । यस्य । प्रवणे । न । ऊर्मयः । धिया । वाजम् । सिसासतः ॥ ११ ॥

मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः । यः सुहोता स्वध्वरः ॥ १२ ॥

मा । नः । हृणीताम् । अतिथिः । वसुः । अग्निः । पुरु॰प्रशस्तः । एषः । यः । सु॰होता । सु॰अध्वरः ॥ १२ ॥

मो ते रिषन् ये अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः ।

कीरिश्चिद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥ १३ ॥

मो इति । ते । रिषन् । ये । अच्छोक्ति॰भिः । वसो इति । अग्ने । केभिः । चित् । एवैः ।

कीरिः । चित् । हि । त्वाम् । ईट्टे । दूत्याय । रात॰हव्यः । सु॰अध्वरः ॥ १३ ॥

आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।

सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥ १४ ॥ [१५] {१०}

आ । अग्ने । याहि । मरुत्॰सखा । रुद्रेभिः । सोम॰पीतये ।

सोभर्याः । उप । सु॰स्तुतिम् । मादयस्व । स्वः॰नरे ॥ १४ ॥

इत्याश्वलायन–संहितायां अष्टमं मण्डलं समाप्तम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नवमं मण्डलम्

[१] [१० वैश्वामित्रो मधुच्छन्दाः। पवमानः सोमः। गायत्री।]

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥ १॥

स्वादिष्ठया। मदिष्ठया। पवस्व। सोम। धारया। इन्द्राय। पातवे। सुतः॥ १॥

रक्षोहा विश्वचर्षणिरभि योनिमयोहतम्। द्रुणा सधस्थमासदत्॥ २॥

रक्षःऽहा। विश्वऽचर्षणिः। अभि। योनिम्। अयःऽहतम्। द्रुणा। सधऽस्थम्। आ। असदत्॥ २॥

वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम्॥ ३॥

वरिवःऽधातमः। भव। मंहिष्ठः। वृत्रहन्ऽतमः। पर्षि। राधः। मघोनाम्॥ ३॥

अभ्यर्ष महानां देवानां वीतिमन्धसा। अभि वाजमुत श्रवः॥ ४॥

अभि। अर्ष। महानाम्। देवानाम्। वीतिम्। अन्धसा। अभि। वाजम्। उत। श्रवः॥ ४॥

त्वामच्छा चरामसि तदिदर्थं दिवेदिवे। इन्दो त्वे न आशसः॥ ५॥ [१६]

त्वाम्। अच्छ। चरामसि। तत्। इत्। अर्थम्। दिवेऽदिवे। इन्दो इति। त्वे इति। नः। आऽशसः॥ ५॥

पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना॥ ६॥

पुनाति। ते। परिऽस्रुतम्। सोमम्। सूर्यस्य। दुहिता। वारेण। शश्वता। तना॥ ६॥

तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश। स्वसारः पार्ये दिवि॥ ७॥

तम्। ईम्। अण्वीः। सऽमर्ये। आ। गृभ्णन्ति। योषणः। दश। स्वसारः। पार्ये। दिवि॥ ७॥

तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम्। त्रिधातु वारणं मधु॥ ८।

तम्। ईम्। हिन्वन्ति। अग्रुवः। धमन्ति। बाकुरम्। दृतिम्। त्रिऽधातु। वारणम्। मधु॥ ७॥

अभीइममघ्न्या उत श्रीणन्ति धेनवः शिशुम्। सोममिन्द्राय पातवे॥ ९॥

अभि। इमम्। अघ्न्याः। उत। श्रीणन्ति। धेनवः। शिशुम्। सोमम्। इन्द्राय। पातवे॥ ९॥

अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते॥ १०॥ [१७]

अस्य। इत्। इन्द्रः। मदेषु। आ विश्वा। वृत्राणि। जिघ्नते। शूरः। मघा। च। मंहते॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[२] [१० हिरण्यस्तूप आङ्गिरसः। पवमानः सोमः। गायत्री।]

पवस्व देववीरति पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषा विश॥ १॥

पवस्व। देव॒ऽवीः। अति। पवित्रम्। सोम। रंह्या। इन्द्रम्। इन्दो इति। वृषा। आ। विश॥ १॥

आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः। आ योनिं धर्णसिः सदः॥ २॥

आ। वच्यस्व। महि। प्सरः। वृषा। इन्दो इति। द्युम्नवत्ऽतमः। आ। योनिम्। धर्णसिः। सदः॥ २॥

अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः॥ ३॥

अधुक्षत। प्रियम्। मधु। धारा। सुतस्य। वेधसः। अपः। वसिष्ट। सुऽक्रतुः॥ ३॥

महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः। यद् गोभिर्वासयिष्यसे॥ ४॥

महान्तम्। त्वा। महीः। अनु। आपः। अर्षन्ति। सिन्धवः। यत्। गोभिः। वासयिष्यसे॥ ४॥

समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः। सोमः पवित्रे अस्मयुः॥ ५॥ [१८]

समुद्रः। अप्ऽसु। ममृजे। विष्टम्भः। धरुणः। दिवः। सोमः। पवित्रे। अस्मऽयुः॥ ५॥

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण रोचते॥ ६॥

अचिक्रदत्। वृषा। हरिः। महान्। मित्रः। नः। दर्शतः। सम्। सूर्येण। रोचते॥ ६॥

गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भसे॥ ७॥

गिरः। ते। इन्दो इति। ओजसा। मर्मृज्यन्ते। अपस्युवः। याभिः। मदाय। शुम्भसे॥ ७॥

तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तयो महीः॥ ८॥

तम्। त्वा। मदाय। घृष्वये। ऊँ इति। लोकऽकृत्नुम्। ईमहे। तव। प्रऽशस्तयः। महीः॥ ८॥

अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँइव॥ ९॥

अस्मभ्यम्। इन्दो इति। इन्द्रऽयुः। मध्वः। पवस्व। धारया। पर्जन्यः। वृष्टिमान्ऽइव॥ ९॥

गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः॥ १०॥ [१९]

गोऽसाः। इन्दो इति। नृऽसाः। असि। अश्वऽसाः। वाजऽसाः। उत। आत्मा। यज्ञस्य। पूर्व्यः॥ १०॥

[३] [१० आजीगर्तिः शुनशेपः, कृत्रिमो वैश्वामित्रो देवरातः।
पवमानः सोमः। गायत्री।]

एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणान्यासदम्॥ १॥

एषः। देवः। अमर्त्यः। पर्णवीःऽइव। दीयति। अभि। द्रोणानि। आऽसदम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः॥ २॥

एषः। देवः। विपा। कृतः। अति। ह्वरांसि। धावति। पवमानः। अदाभ्यः॥ २॥

एष देवा विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते॥ ३॥

एषः। देवः। विपन्युऽभिः। पवमानः। ऋतयुऽभिः। हरिः। वाजाय। मृज्यते॥ ३॥

एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति॥ ४॥

एषः। विश्वानि। वार्या। शूरः। यन्ऽइव। सत्वऽभिः। पवमानः। सिसासति॥ ४॥

एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुम्॥ ५॥ [२०]

एषः। देवः। रथर्यति। पवमानः। दशस्यति। आविः। कृणोति। वग्वनुम्॥ ५॥

एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे॥ ६॥

एषः। विप्रैः। अभिऽस्तुतः। अपः। देवः। वि। गाहते। दधत्। रत्नानि। दाशुषे॥ ६॥

एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत्॥ ७॥

एषः। दिवम्। वि। धावति। तिरः। रजांसि। धारया। पवमानः। कनिक्रदत्॥ ७॥

एष दिवं व्यासरत्तिरो रजांस्यस्पृतः। पवमानः स्वध्वरः॥ ८॥

एषः। दिवम्। वि। आ। असरत्। तिरः। रजांसि। अस्पृतः। पवमानः। सुऽअध्वरः॥ ८॥

एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति॥ ९॥

एषः। प्रत्नेन। जन्मना। देवः। देवेभ्यः। सुतः। हरिः। पवित्रे। अर्षति॥ ९॥

एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः॥ १०॥ [२१]

एषः। ऊँ इति। स्यः। पुरुऽव्रतः। जज्ञानः। जनयन्। इषः। धारया। पवते। सुतः॥ १०॥

[४] [१० हिरण्यस्तूप आङ्गिरसः। पवमानः सोमः। गायत्री।]

सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि॥ १॥

सन। च। सोम। जेषि। च। पवमान। महि। श्रवः। अथ। नः। वस्यसः। कृधि॥ १॥

सना ज्योतिः सना स्व१र्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि॥ २॥

सन। ज्योतिः। सन। स्वः। विश्वा। च। सोम। सौभगा। अथ। नः। वस्यसः। कृधि॥ २॥

सना दक्षमुत क्रतुमप सोम मृधो जहि। अथा नो वस्यसस्कृधि॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सन । दक्षम् । उत । क्रतुम् । अप । सोम । मृधः । जहि । अथ । नः । वस्यसः । कृधि ॥ ३ ॥

पवीतारः पुनीतन सोममिन्द्राय पातवे । अथा नो वस्यसस्कृधि ॥ ४ ॥

पवितारः । पुनीतन । सोमम् । इन्द्राय । पातवे । अथ । नः । वस्यसः । कृधि ॥ ४ ॥

त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः । अथा नो वस्यसस्कृधि ॥ ५ ॥ [२२]

त्वम् । सूर्ये । नः । आ । भज । तव । क्रत्वा । तव । ऊतिऽभिः । अथ । नः । वस्यसः । कृधि ॥ ५ ॥

तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् । अथा नो वस्यसस्कृधि ॥ ६ ॥

तव । क्रत्वा । तव । ऊतिऽभिः । ज्योक् । पश्येम । सूर्यम् । अथ । नः । वस्यसः । कृधि ॥ ६ ॥

अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम् । अथा नो वस्यसस्कृधि ॥ ७ ॥

अभि । अर्ष । सुऽआयुध । सोम । द्विऽबर्हसम् । रयिम् । अथ । नः । वस्यसः । कृधि ॥ ७ ॥

अभ्य१र्षानपच्युतो रयिं समत्सु सासहिः । अथा नो वस्यसस्कृधि ॥ ८ ॥

अभि । अर्ष । अनपऽच्युतः । रयिम् । समत्ऽसु । ससहिः । अथ । नः । वस्यसः । कृधि ॥ ८ ॥

त्वां यज्ञैरवीवृधन्पवमान विधर्मणि । अथा नो वस्यसस्कृधि ॥ ९ ॥

त्वाम् । यज्ञैः । अवीवृधन् । पवमान । विऽधर्मणि । अथ । नः । वस्यसः । कृधि ॥ ९ ॥

रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥ १० ॥ [२३]

रयिम् । नः । चित्रम् । अश्विनम् । इन्दो इति । विश्वऽआयुम् । आ । भर ।

अथ । नः । वस्यसः । कृधि ॥ १० ॥

[५] [११ काश्यपोऽसितो देवलो वा । आप्रीसूक्तम् = (१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ इळः, ४ बर्हिः, ५ देवीर्द्वारः, ६ उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः) गायत्री, ८-११ अनुष्टुप् ।]

समिद्धो विश्वतस्पतिः पवमानो वि राजति । प्रीणन्वृषा कनिक्रदत् ॥ १ ॥

सम्ऽइद्धः । विश्वतः । पतिः । पवमानः । वि । राजति । प्रीणन् । वृषा । कनिक्रदत् ॥ १ ॥

तनूनपात्पवमानः शृङ्गे शिशानो अर्षति । अन्तरिक्षेण रारजत् ॥ २ ॥

तनूऽनपात् । पवमानः । शृङ्गे इति । शिशानः । अर्षति । अन्तरिक्षेण । रारजत् ॥ २ ॥

ईळेन्यः पवमानो रयिर्वि राजति द्युमान् । मधोर्धाराभिरोजसा ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ई॒ळेन्य॑ः । पव॑मानः । र॒यिः । वि । रा॒ज॒ति॒ । द्यु॒ऽमान् । मधो॑ः । धारा॑भिः । ओज॑सा ॥ ३ ॥

ब॒र्हिः प्रा॒चीन॒मोज॑सा पव॑मानः स्तृ॒णन्हरि॑ः । दे॒वेषु॑ दे॒व ईयते ॥ ४ ॥

ब॒र्हिः । प्रा॒चीन॑म् । ओज॑सा । पव॑मानः । स्तृ॒णन् । हरि॑ः । दे॒वेषु॑ । दे॒वः । ई॒य॒ते ॥ ४ ॥

उदा॒तैर्जि॑हते बृ॒हद् द्वारो॑ दे॒वीर्हि॑र॒ण्ययी॑ः । पव॑मानेन॒ सुष्टु॑ताः ॥ ५ ॥ [२४]

उत् । आतै॑ः । जि॒ह॒ते॒ । बृ॒हत् । द्वार॑ः । दे॒वीः । हि॒र॒ण्ययी॑ः । पव॑मानेन । सुऽस्तु॑ताः ॥ ५ ॥

सु॒शि॒ल्पे बृ॑ह॒ती म॒ही पव॑मानो वृषण्यति । नक्तो॒षासा॒ न द॑र्श॒ते ॥ ६ ॥

सु॒शि॒ल्पे इति॑ सु॒ऽशि॒ल्पे । बृ॒ह॒ती इति॑ । म॒ही इति॑ । पव॑मानः । वृ॒ष॒ण्य॒ति॒ । नक्तो॒षसा॑ । न । द॒र्श॒ते इति॑ ॥ ६ ॥

उ॒भा दे॒वा नृ॒चक्ष॑सा होता॑रा॒ दैव्या॑ हुवे । पव॑मान॒ इन्द्रो॒ वृषा॑ ॥ ७ ॥

उ॒भा । दे॒वा । नृ॒ऽचक्ष॑सा । होता॑रा । दैव्या॑ । हु॒वे॒ । पव॑मानः । इन्द्र॑ः । वृषा॑ ॥ ७ ॥

भार॑ती॒ पव॑मानस्य॒ सर॑स्व॒तीळा॑ म॒ही । इ॒मं नो॑ य॒ज्ञमा ग॑मन्ति॒स्रो दे॒वीः सु॒पेश॑सः ॥ ८ ॥

भार॑ती । पव॑मानस्य । सर॑स्वती । इळा॑ । म॒ही ।

इ॒मम् । न॒ः । य॒ज्ञम् । आ । ग॒म॒न् । ति॒स्रः । दे॒वीः । सु॒ऽपेश॑सः ॥ ८ ॥

त्वष्टा॑रमग्र॒जां गोपां॑ पु॒रोयावा॑नमा हु॑वे । इन्दु॒रिन्द्रो॑ वृषा हरि॑ः पव॑मानः प्रजाप॑तिः ॥ ९ ॥

त्वष्टा॑रम् । अ॒ग्र॒ऽजाम् । गो॒पाम् । पु॒रः॒ऽयावा॑नम् । आ । हु॒वे॒ ।

इन्दु॑ः । इन्द्र॑ः । वृषा॑ । हरि॑ः । पव॑मानः । प्र॒जाऽप॑तिः ॥ ९ ॥

व॒न॒स्पतिं॑ पवमान॒ मध्वा॒ सम॑ङ्ग्धि॒ धार॑या । स॒हस्र॑वल्शं हरि॑तं॒ भ्राज॑मानं हि॒र॒ण्यय॑म् ॥ १० ॥

व॒न॒स्पति॑म् । प॒व॒मा॒न॒ । मध्वा॑ । सम् । अ॒ङ्ग्धि॒ । धार॑या ।

स॒हस्र॑ऽवल्शम् । हरि॑तम् । भ्राज॑मानम् । हि॒र॒ण्यय॑म् ॥ १० ॥

विश्वे॑ देवा॒ः स्वाहा॑कृति॒ं पव॑माने॒स्या ग॑त । वा॒युर्बृह॒स्पति॒ः सूर्यो॒ऽग्निरिन्द्र॑ः स॒जोष॑सः ॥ ११ ॥ [२५]

विश्वे॑ । दे॒वा॒ः । स्वाहा॑ऽकृतिम् । पव॑मानस्य । आ । ग॒त॒ ।

वा॒युः । बृह॒स्पति॑ः । सूर्य॑ः । अ॒ग्निः । इन्द्र॑ः । स॒ऽजोष॑सः ॥ ११ ॥

[६] [९ काश्यपोऽसितो देवलो वा । पवमानः सोमः । गायत्री ।]

म॒न्द्रया॑ सोम॒ धार॑या॒ वृषा॑ पवस्व देव॒युः । अव्यो॒ वारे॑ष्वस्म॒युः ॥ १ ॥

म॒न्द्रया॑ । सो॒म॒ । धार॑या । वृषा॑ । प॒व॒स्व॒ । दे॒व॒ऽयुः । अव्य॑ः । वारे॑षु । अ॒स्म॒ऽयुः ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभि त्यं मद्यं मदमिन्दविन्द्र इति क्षर। अभि वाजिनो अर्वतः॥ २॥

अभि। त्यम्। मद्यम्। मदम्। इन्दो इति। इन्द्रः। इति। क्षर। अभि। वाजिनः। अर्वतः॥ २॥

अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ। अभि वाजमुत श्रवः॥ ३॥

अभि। त्यम्। पूर्व्यम्। मदम्। सुवानः। अर्ष। पवित्रे। आ। अभि। वाजम्। उत। श्रवः॥ ३॥

अनु द्रप्सास इन्दव आपो न प्रवतासरन्। पुनाना इन्द्रमाशत॥ ४॥

अनु। द्रप्सासः। इन्दवः। आपः। न। प्रऽवता। असरन्। पुनानाः। इन्द्रम्। आशत॥ ४॥

यमत्यमिव वाजिनं मृजन्ति योषणो दश। वने क्रीळन्तमत्यविम्॥ ५॥ [२६]

यम्। अत्यम्ऽइव। वाजिनम्। मृजन्ति। योषणः। दश। वने। क्रीळन्तम्। अतिऽअविम्॥ ५॥

तं गोभिर्वृषणं रसं मदाय देववीतये। सुतं भराय सं सृज॥ ६॥

तम्। गोभिः। वृषणम्। रसम्। मदाय। देवऽवीतये। सुतम्। भराय। सम्। सृज॥ ६॥

देवो देवाय धारयेन्द्राय पवते सुतः। पयो यदस्य पीपयत्॥ ७॥

देवः। देवाय। धारया। इन्द्राय। पवते। सुतः। पयः। यत्। अस्य। पीपयत्॥ ७॥

आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः। प्रत्नं नि पाति काव्यम्॥ ८॥

आत्मा। यज्ञस्य। रंह्या। सुस्वानः। पवते। सुतः। प्रत्नम्। नि। पाति। काव्यम्॥ ८॥

एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये। गुहा चिद्दधिषे गिरः॥ ९॥ [२७]

एव। पुनानः। इन्द्रऽयुः। मदम्। मदिष्ठ। वीतये। गुहा। चित्। दधिषे। गिरः॥ ९॥

[७] [९ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजनम्॥ १॥

असृग्रम्। इन्दवः। पथा। धर्मन्। ऋतस्य। सुऽश्रियः। विदानाः। अस्य। योजनम्॥ १॥

प्र धारा मध्वो अग्रियो महीरपो वि गाहते। हविर्हविष्षु वन्द्यः॥ २॥

प्र। धाराः। मध्वः। अग्रियः। महीः। अपः। वि। गाहते। हविः। हविष्षु। वन्द्यः॥ २॥

प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने। सद्माभि सत्यो अध्वरः॥ ३॥

प्र। युजः। वाचः। अग्रियः। वृषा। अव। चक्रदत्। वने। सद्म। अभि। सत्यः। अध्वरः॥ ३॥

परि यत्काव्या कविर्नृम्णा वसानो अर्षति। स्वर्वाजी सिषासति॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि । यत् । काव्या । कविः । नृम्णा । वसानः । अर्षति । स्वः । वाजी । सिसासति ॥ ४ ॥

पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥ ५ ॥

पवमानः । अभि । स्पृधः । विशः । राजाऽइव । सीदति । यत् । ईम् । ऋण्वन्ति । वेधसः ॥ ५ ॥

अव्यो वारे परि प्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥ ६ ॥

अव्यः । वारे । परि । प्रियः । हरिः । वनेषु । सीदति । रेभः । वनुष्यते । मती ॥ ६ ॥

स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥ ७ ॥

सः । वायुम् । इन्द्रम् । अश्विना । साकम् । मदेन । गच्छति । रण । यः । अस्य । धर्मऽभिः ॥ ७ ॥

आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥ ८ ॥

आ । मित्रावरुणा । भगम् । मध्वः । पवन्ते । ऊर्मयः । विदानाः । अस्य । शक्मऽभिः ॥ ८ ॥

अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितम् ॥ ९ ॥ [२९]

अस्मभ्यम् । रोदसी इति । रयिम् । मध्वः । वाजस्य । सातये । श्रवः । वसूनि । सम् । जितम् ॥ ९ ॥

[८] [९ काश्यपोऽसितो देवलो वा । पवमानः सोमः । गायत्री ।]

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् । वर्धन्तो अस्य वीर्यम् ॥ १ ॥

एते । सोमाः । अभि । प्रियम् । इन्द्रस्य । कामम् । अक्षरन् । वर्धन्तः । अस्य । वीर्यम् ॥ १ ॥

पुनानासश्चमूषदो गच्छन्तो वायुमश्विना । ते नो धान्तु सुवीर्यम् ॥ २ ॥

पुनानासः । चमूऽसदः । गच्छन्तः । वायुम् । अश्विना । ते । नः । धान्तु । सुऽवीर्यम् ॥ २ ॥

इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदम् ॥ ३ ॥

इन्द्रस्य । सोम । राधसे । पुनानः । हार्दि । चोदय । ऋतस्य । योनिम् । आऽसदम् ॥ ३ ॥

मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥ ४ ॥

मृजन्ति । त्वा । दश । क्षिपः । हिन्वन्ति । सप्त । धीतयः । अनु । विप्राः । अमादिषुः ॥ ४ ॥

देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः । सं गोभिर्वासयामसि ॥ ५ ॥ [३०]

देवेभ्यः । त्वा । मदाय । कम् । सृजानम् । अति । मेष्यः । सम् । गोभिः । वासयामसि ॥ ५ ॥

पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥ ६ ॥

पुनानः । कलशेषु । आ । वस्त्राणि । अरुषः । हरिः । परि । गव्यानि । अव्यत ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मघोन आ पवस्व नो जहि विश्वा अप द्विषः। इन्दो सखायमा विश॥ ७॥

मघोनः। आ। पवस्व। नः। जहि। विश्वाः। अप। द्विषः। इन्दो इति। सखायम्। आ। विश॥ ७॥

वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः॥ ८॥

वृष्टिम्। दिवः। परि। स्रव। द्युम्नम्। पृथिव्याः। अधि। सहः। नः। सोम। पृत्ऽसु। धाः॥ ८॥

नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजामिषम्॥ ९॥ [३१]

नृऽचक्षसम्। त्वा। वयम्। इन्द्रऽपीतम्। स्वःऽविदम्। भक्षीमहि। प्रऽजाम्। इषम्॥ ९॥

[९] [९ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। सुवानो याति कविक्रतुः॥ १॥

परि। प्रिया। दिवः। कविः। वयांसि। नप्त्योः। हितः। सुवानः। याति। कविऽक्रतुः॥ १॥

प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे। वीत्यर्ष चनिष्ठया॥ २॥

प्रऽप्र। क्षयाय। पन्यसे। जनाय। जुष्टः। अद्रुहे। वीती। अर्ष। चनिष्ठया॥ २॥

स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा॥ ३॥

सः। सूनुः। मातरा। शुचिः। जातः। जाते इति। अरोचयत्। महान्। मही इति। ऋतऽवृधा॥ ३॥

स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः। या एकमक्षि वावृधुः॥ ४॥

सः। सप्त। धीतिऽभिः। हितः। नद्यः। अजिन्वत्। अद्रुहः। याः। एकम्। अक्षि। ववृधुः॥ ४॥

ता अभि सन्तमस्तृतं महे युवानमा दधुः। इन्दुमिन्द्र तव व्रते॥ ५॥ [३२]

ताः। अभि। सन्तम्। अस्तृतम्। महे। युवानम्। आ। दधुः। इन्दुम्। इन्द्र। तव। व्रते॥ ५॥

अभि वह्निरमर्त्यः सप्त पश्यति वावहिः। क्रिविर्देवीरतर्पयत्॥ ६॥

अभि। वह्निः। अमर्त्यः। सप्त। पश्यति। वावहिः। क्रिविः। देवीः। अतर्पयत्॥ ६॥

अवा कल्पेषु नः पुमस्तमांसि सोम योध्या। तानि पुनान जङ्घनः॥ ७॥

अव। कल्पेषु। नः। पुमः। तमांसि। सोम। योध्या। तानि। पुनान। जङ्घनः॥ ७॥

नू नव्यसे नवीयसे सूक्ताय साधया पथः। प्रत्नवद्रोचया रुचः॥ ८॥

नु। नव्यसे। नवीयसे। सुऽउक्ताय। साधय। पथः। प्रत्नऽवत्। रोचय। रुचः॥ ८॥

पवमान महि श्रवो गामश्वं रासि वीरवत्। सना मेधां सना स्वः॥ ९॥ [३३]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवमान । महि । श्रवः । गाम् । अश्वम् । रासि । वीरऽवत् । सन । मेधाम् । सन । स्वऽरिति स्वः ॥ ९ ॥

[१०] [९ काश्यपोऽसितो देवलो वा । पवमानः सोमः । गायत्री ।]

प्र स्वानासो रथाइवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥ १ ॥

प्र । स्वानासः । रथाःऽइव । अर्वन्तः । न । श्रवस्यवः । सोमासः । राये । अक्रमुः ॥ १ ॥

हिन्वानासो रथाइव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥ २ ॥

हिन्वानासः । रथाःऽइव । दधन्विरे । गभस्त्योः । भरासः । कारिणाम्ऽइव ॥ २ ॥

राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥ ३ ॥

राजानः । न । प्रशस्तिऽभिः । सोमासः । गोभिः । अञ्जते । यज्ञः । न । सप्त । धातृऽभिः ॥ ३ ॥

परि सुवानास इन्दवो मदाय बर्हणा गिरा । सुता अर्षन्ति धारया ॥ ४ ॥

परि । सुवानासः । इन्दवः । मदाय । बर्हणा । गिरा । सुताः । अर्षन्ति । धारया ॥ ४ ॥

आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥ ५ ॥ [३४]

आपानासः । विवस्वतः । जनन्तः । उषसः । भगम् । सूराः । अण्वम् । वि । तन्वते ॥ ५ ॥

अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥ ६ ॥

अप । द्वारा । मतीनाम् । प्रत्नाः । ऋण्वन्ति । कारवः । वृष्णः । हरसे । आयवः ॥ ६ ॥

समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥ ७ ॥

सम्ऽईचीनासः । आसते । होतारः । सप्तऽजामयः । पदम् । एकस्य । पिप्रतः ॥ ७ ॥

नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा । कवेरपत्यमा दुहे ॥ ८ ॥

नाभा । नाभिम् । नः । आ । ददे । चक्षुः । चित् । सूर्ये । सचा । कवेः । अपत्यम् । आ । दुहे ॥ ८ ॥

अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ॥ ९ ॥ [३५]

अभि । प्रिया । दिवः । पदम् । अध्वर्युऽभिः । गुहा । हितम् । सूरः । पश्यति । चक्षसा ॥ ९ ॥

[११] [९ काश्यपोऽसितो देवलो वा । पवमानः सोमः । गायत्री ।]

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ इयक्षते ॥ १ ॥

उप । अस्मै । गायत । नरः । पवमानाय । इन्दवे । अभि । देवान् । इयक्षते ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु॥ २॥

अभि। ते। मधुना। पयः। अथर्वाणः। अशिश्रयुः। देवम्। देवाय। देव॰यु॥। २॥

स नः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः॥ ३॥

सः। नः। पवस्व। शम्। गवे। शम्। जनाय॥ शम्। अर्वते। शम्। राजन्। ओषधीभ्यः॥ ३॥

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे। सोमस्य गाथमर्चत॥ ४॥

बभ्रवे। नु। स्व॰तवसे। अरुणाय। दिवि॰स्पृशे। सोमाय। गाथम्। अर्चत॥ ४॥

हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन। मधावा धावता मधु॥ ५॥ [३६]

हस्त॰च्युतेभिः। अद्रि॰भिः। सुतम्। सोमम्। पुनीतन। मधौ। आ। धावत। मधु॥ ५॥

नमसेदुप सीदत दध्नेदभि श्रीणीतन। इन्दुमिन्द्रे दधातन॥ ६॥

नमसा। इत्। उप। सीदत। दध्ना। इत्। अभि। श्रीणीतन। इन्दुम्। इन्द्रे। दधातन॥ ६॥

अमित्रहा विचर्षणिः पवस्व सोम शं गवे। देवेभ्यो अनुकामकृत्॥ ७॥

अमित्र॰हा। वि॰चर्षणिः। पवस्व। सोम। शम्। गवे। देवेभ्यः। अनुकाम॰कृत्॥ ७॥

इन्द्राय सोम पातवे मदाय परि षिच्यसे। मनश्चिन्मनसस्पतिः॥ ८॥

इन्द्राय। सोम। पातवे। मदाय। परि। सिच्यसे। मनः॰चित्। मनसः। पतिः॥ ८॥

पवमान सुवीर्यं रयिं सोम रिरीहि नः। इन्दविन्द्रेण नो युजा॥ ९॥ [३७]

पवमान। सु॰वीर्यम्। रयिम्। सोम। रिरीहि। नः। इन्दो इति। इन्द्रेण। नः। युजा॥ ९॥

[१२] [९ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

सोमा असृग्रमिन्दवः सुता ऋतस्य सादने। इन्द्राय मधुमत्तमाः॥ १॥

सोमाः। असृग्रम्। इन्दवः। सुताः। ऋतस्य। सदने। इन्द्राय। मधुमत्॰तमाः॥ १॥

अभि विप्रा अनूषत गावो वत्सं न मातरः। इन्द्रं सोमस्य पीतये॥ २॥

अभि। विप्राः। अनूषत। गावः। वत्सम्। न। मातरः। इन्द्रम्। सोमस्य। पीतये॥ २॥

मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः॥ ३॥

मद॰च्युत्। क्षेति। सदने। सिन्धोः। ऊर्मा। विपः॰चित्। सोमः। गौरी इति। अधि। श्रितः॥ ३॥

दिवो नाभा विचक्षणोऽव्यो वारे महीयते। सोमो यः सुक्रतुः कविः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दिवः। नाभा। विऽचक्षणः। अव्यः। वारे। महीयते। सोमः। यः। सुऽक्रतुः। कविः॥ ४॥

यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः। तमिन्दुः परि षस्वजे॥ ५॥ [३८]

यः। सोमः। कलशेषु। आ। अन्तरिति। पवित्रे। आऽहितः। तम्। इन्दुः। परि। सस्वजे॥ ५॥

प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन्कोशं मधुश्चुतम्॥ ६॥

प्र। वाचम्। इन्दुः। इष्यति। समुद्रस्य। अधि। विष्टपि। जिन्वन्। कोशम्। मधुऽश्चुतम्॥ ६॥

नित्यस्तोत्रो नवस्पतिर्धीनामन्तः संबर्दुघः। हिन्वानो मानुषा युगा॥ ७॥

नित्यऽस्तोत्रः। वनस्पतिः। धीनाम्। अन्तरिति। सबःऽदुघः। हिन्वानः। मानुषा। युगा॥ ७॥

अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति। विप्रस्य धारया कविः। ८॥

अभि। प्रिया। दिवः। पदा। सोमः। हिन्वानः। अर्षति। विप्रस्य। धारया। कविः॥ ८॥

आ पवमान धारय रयिं सहस्रवर्चसम्। अस्मे इन्दो स्वाभुवम्॥ ९॥ [३९]

आ। पवमान। धारय। रयिम्। सहस्रऽवर्चसम्। अस्मे इति। इन्दो इति। सुऽआभुवम्॥ ९॥

इत्याश्वलायन-संहितायां
षष्ठाष्टके
सप्तमोऽध्यायः
समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ षष्ठाष्टके अष्टमोऽध्यायः ॥

[१३] [९ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायोरिन्द्रस्य निष्कृतम्॥ १॥

सोमः। पुनानः। अर्षति। सहस्रऽधारः। अतिऽअविः। वायोः। इन्द्रस्य। निःऽकृतम्॥ १॥

पवमानवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये॥ २॥

पवमानम्। अवस्यवः। विप्रम्। अभि। प्र। गायत। सुस्वानम्। देवऽवीतये॥ २॥

पवन्ते वाजसातये सोमाः सहस्रपाजसः। गृणाना देववीतये॥ ३॥

पवन्ते। वाजऽसातये। सोमाः। सहस्रऽपाजसः। गृणानाः। देवऽवीतये॥ ३॥

उत नो वाजसातये पवस्व बृहतीरिषः। द्युमदिन्दो सुवीर्यम्॥ ४॥

उत। नः। वाजऽसातये। पवस्व। बृहतीः। इषः। द्युऽमत्। इन्दो इति। सुऽवीर्यम्॥ ४॥

ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम्। सुवाना देवास इन्दवः॥ ५॥ [१]

ते। नः। सहस्रिणम्। रयिम्। पवन्ताम्। आ। सुऽवीर्यम्। सुवानाः। देवासः। इन्दवः॥ ५॥

अत्या हियाना न हेतृभिरसृग्रं वाजसातये। वि वारमव्यमाशवः॥ ६॥

अत्याः। हियानाः। न। हेतृऽभिः। असृग्रम्। वाजऽसातये। वि। वारम्। अव्यम्। आशवः॥ ६॥

वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः। दधन्विरे गभस्त्योः॥ ७॥

वाश्राः। अर्षन्ति। इन्दवः। अभि। वत्सम्। न। धेनवः। दधन्विरे। गभस्त्योः॥ ७॥

जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत्। विश्वा अप द्विषो जहि॥ ८॥

जुष्टः। इन्द्राय। मत्सरः। पवमान। कनिक्रदत्। विश्वाः। अप। द्विषः। जहि॥ ८॥

अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः। योनावृतस्य सीदत॥ ९॥ [२]

अपऽघ्नन्तः। अराव्णः। पवमानाः। स्वःऽदृशः। योनौ। ऋतस्य। सीदत॥ ९॥

[१४] [८ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः। कारं बिभ्रत्पुरुस्पृहम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि । प्र । असिस्यदत् । कविः । सिन्धोः । ऊर्मौ । अधि । श्रितः । कारम् । बिभ्रत् । पुरुऽस्पृहम् ॥ १ ॥

गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् ॥ २ ॥

गिरा । यदि । सऽबन्धवः । पञ्च । व्राताः । अपस्यवः । परिऽकृण्वन्ति । धर्णसिम् ॥ २ ॥

आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥ ३ ॥

आत् । अस्य । शुष्मिणः । रसे । विश्वे । देवाः । अमत्सत । यदि । गोभिः । वसायते ॥ ३ ॥

निरिणानो वि धावति जहच्छर्याणि तान्वा । अत्रा सं जिघ्रते युजा ॥ ४ ॥

निःऽरिणानः । वि । धावति । जहत् । शर्याणि । तान्वा । अत्र । सम् । जिघ्रते । युजा ॥ ४ ॥

नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा । गाः कृण्वानो न निर्णिजम् ॥ ५ ॥ [३]

नप्तीभिः । यः । विवस्वतः । शुभ्रः । न । ममृजे । युवा । गाः । कृण्वानः । न । निःऽनिजम् ॥ ५ ॥

अति श्रिती तिरश्चता गव्या जिगात्यण्व्या । वग्नुमियर्ति यं विदे ॥ ६ ॥

अति । श्रिती । तिरश्चता । गव्या । जिगाति । अण्व्या । वग्नुम् । इयर्ति । यम् । विदे ॥ ६ ॥

अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णत वाजिनः ॥ ७ ॥

अभि । क्षिपः । सम् । अग्मत । मर्जयन्तीः । इषः । पतिम् । पृष्ठा । गृभ्णत । वाजिनः ॥ ७ ॥

परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा । वसूनि याह्यस्मयुः ॥ ८ ॥ [४]

परि । दिव्यानि । मर्मृशत् । विश्वानि । सोम । पार्थिवा । वसूनि । याहि । अस्मऽयुः ॥ ८ ॥

[१५] [८ काश्यपोऽसितो देवलो वा । पवमानः सोमः । गायत्री ।]

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥

एषः । धिया । याति । अण्व्या । शूरः । रथेभिः । आशुऽभिः । गच्छन् । इन्द्रस्य । निःऽकृतम् ॥ १ ॥

एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते ॥ २ ॥

एषः । पुरु । धियाऽयते । बृहते । देवऽतातये । यत्र । अमृतासः । आसते ॥ २ ॥

एष हितो वि नीयतेऽन्तः शुभ्रावता पथा । यदी तुञ्जन्ति भूर्णयः ॥ ३ ॥

एषः । हितः । वि । नीयते । अन्तरिति । शुभ्रऽवता । पथा । यदि । तुञ्जन्ति । भूर्णयः ॥ ३ ॥

एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा । नृम्णा दधान ओजसा ॥ ४ ॥

एषः । शृङ्गाणि । दोधुवत् । शिशीते । यूथ्यः । वृषा । नृम्णा । दधानः । ओजसा ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिन्धूनां भवन्॥ ५॥

एषः। रुक्मिऽभिः। ईयते। वाजी। शुभ्रेभिः। अंशुऽभिः। पतिः। सिन्धूनाम्। भवन्॥ ५॥

एष वसूनि पिब्दना परुषा ययिवाँ अति। अव शादेषु गच्छन्ति॥ ६॥

एषः। वसूनि। पिब्दना। परुषा। ययिऽवान्। अति। अव। शादेषु। गच्छति॥ ६॥

एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः॥ ७॥

एतम्। मृजन्ति। मर्ज्यम्। उप। द्रोणेषु। आयवः। प्रऽचक्राणम्। महीः। इषः॥ ७॥

एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः। स्वायुधं मदिन्तमम्॥ ८॥ [५]

एतम्। ऊँ इति। त्यम्। दश। क्षिपः। मृजन्ति। सप्त। धीतयः। सुऽआयुधम्। मदिन्ऽतमम्॥ ८॥

[१६] [८ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

प्र ते सोतार ओण्यो३ रसं मदाय धृष्वये। सर्गो न तक्त्येतशः॥ १॥

प्र। ते। सोतारः। ओण्योः। रसम्। मदाय। धृष्वये। सर्गः। न। तक्ति। एतशः॥ १॥

क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा। गोषामण्वेषु सश्चिम॥ २॥

क्रत्वा। दक्षस्य। रथ्यम्। अपः। वसानम्। अन्धसाः। गोऽसाम्। अण्वेषु। सश्चिम॥ २॥

अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे॥ ३॥

अनप्तम्। अप्ऽसु। दुस्तरम्। सोमम्। पवित्रे। आ। सृज। पुनीहि। इन्द्राय। पातवे॥ ३॥

प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति। क्रत्वा सधस्थमासदत्॥ ४॥

प्र। पुनानस्य। चेतसा। सोमः। पवित्रे। अर्षति। क्रत्वा। सधऽस्थम्। आ। असदत्॥ ४॥

प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत। महे भराय कारिणः॥ ५॥

प्र। त्वा। नमःऽभि। इन्दवः। इन्द्र। सोमाः। असृक्षत। महे। भराय। कारिणः॥ ५॥

पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति॥ ६॥

पुनानः। रूपे। अव्यये। विश्वाः। अर्षन्। अभि। श्रियः। शूरः। न। गोषु। तिष्ठति॥ ६॥

दिवो न सानु पिप्युषी धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति॥ ७॥

दिवः। न। सानु। पिप्युषी। धारा। सुतस्य। वेधसः। वृथा। पवित्रे। अर्षति॥ ७॥

त्वं सोम विपश्चितं तना पुनान आयुषु। अव्यो वारं वि धावसि॥ ८॥ [६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। सोम। विपःऽचितम्। तना। पुनानः। आयुषु। अव्यः। वारम्। वि। धावसि॥ ८॥

[१७] [८ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः। सोमा असृग्रमाशवः॥ १॥

प्र। निम्नेनऽइव। सिन्धवः। घ्नन्तः। वृत्राणि। भूर्णयः। सोमाः। असृग्रम्। आशवः॥ १॥

अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव। इन्द्रं सोमासो अक्षरन्॥ २॥

अभि। सुवानासः। इन्दवः। वृष्टयः। पृथिवीम्ऽइव। इन्द्रम्। सोमासः। अक्षरन्॥ २॥

अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति। विघ्नन्रक्षांसि देवयुः॥ ३॥

अतिऽऊर्मिः। मत्सरः। मदः। सोमः। पवित्रे। अर्षति। विऽघ्नन्। रक्षांसि। देवऽयुः॥ ३॥

आ कलशेषु धावति पवित्रे परि षिच्यते। उक्थैर्यज्ञेषु वर्धते॥ ४॥

आ। कलशेषु। धावति। पवित्रे। परि। सिच्यते। उक्थैः। यज्ञेषु। वर्धते॥ ४॥

अति त्री सोम रोचना रोहन्न भ्राजसे दिवम्। इष्णन्त्सूर्यं न चोदयः॥ ५॥

अति। त्री। सोम। रोचना। रोहन्। न। भ्राजसे। दिवम्। इष्णन्। सूर्यम्। न। चोदयः॥ ५।

अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः। दधानाश्चक्षसि प्रियम्॥ ६॥

अभि। विप्राः। अनूषत। मूर्धन्। यज्ञस्य। कारवः। दधानाः। चक्षसि। प्रियम्॥ ६॥

तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः। मृजन्ति देवतातये॥ ७॥

तम्। ऊँ इति। त्वा। वाजिनम्। नरः। धीभिः। विप्राः। अवस्यवः। मृजन्ति। देवऽतातये॥ ७॥

मधोर्धारामनु क्षर तीव्रः सधस्थमासदः। चारुर्ऋताय पीतये॥ ८॥ [७]

मधोः। धाराम्। अनु। क्षर। तीव्रः। सधऽस्थम्। आ। असदः। चारुः। ऋताय। पीतये॥ ८॥

[१८] [७ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः। मदेषु सर्वधा असि॥ १॥

परि। सुवानः। गिरिऽस्थाः। पवित्रे। सोमः। अक्षारिति। मदेषु। सर्वऽधाः। असि॥ १॥

त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि॥ २॥

त्वम्। विप्रः। त्वम्। कविः। मधु। प्र। जातम्। अन्धसः। मदेषु। सर्वऽधाः। असि॥ २॥

तव विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तव॑ । विश्वे॑ । स॒ऽजोष॑सः । दे॒वासः॑ । पी॒तिम् । आ॒श॒त॒ । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥ ३ ॥

आ यो विश्वा॑नि॒ वार्या॒ वसू॑नि॒ हस्त॑योर्द॒धे । मदे॑षु सर्व॒धा अ॑सि ॥ ४ ॥

आ । यः । विश्वा॑नि । वार्या॑ । वसू॑नि । हस्त॑योः । द॒धे । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥ ४ ॥

य इ॒मे रोद॑सी म॒ही सं मा॒तरे॑व॒ दोह॑ते । मदे॑षु सर्व॒धा अ॑सि ॥ ५ ॥

यः । इ॒मे इति॑ । रोद॑सी॒ इति॑ । म॒ही इति॑ । सम् । मा॒तरा॑ऽइव । दोह॑ते । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥ ५ ॥

परि॒ यो रोद॑सी उ॒भे स॒द्यो वाजे॑भि॒रर्ष॑ति । मदे॑षु सर्व॒धा अ॑सि ॥ ६ ॥

परि॑ । यः । रोद॑सी॒ इति॑ । उ॒भे इति॑ । स॒द्यः । वाजे॑भिः । अर्ष॑ति । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥ ६ ॥

स शु॒ष्मी क॒लशे॒ष्वा पु॑ना॒नो अ॑चिक्रदत् । मदे॑षु सर्व॒धा अ॑सि ॥ ७ ॥ [८]

सः । शु॒ष्मी । क॒लशे॑षु । आ । पु॒ना॒नः । अ॒चि॒क्र॒द॒त् । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥ ७ ॥

[१९] [७ काश्यपोऽसितो देवलो वा । पवमानः सोमः । गायत्री ।]

यत्सो॑म चि॒त्रमु॒क्थ्यं॑ दि॒व्यं पार्थि॑व॒ं वसु॑ । तन्नः॑ पुना॒न आ भ॑र ॥ १ ॥

यत् । सो॒म॒ । चि॒त्रम् । उ॒क्थ्य॑म् । दि॒व्यम् । पार्थि॑वम् । वसु॑ । तत् । न॒ः । पु॒ना॒नः । आ । भ॒र॒ ॥ १ ॥

यु॒वं हि स्थः स्व॑र्पती॒ इन्द्र॑श्च सोम॒ गोप॑ती । ई॒शा॒ना पि॑प्यत॒ं धियः॑ ॥ २ ॥

यु॒वम् । हि । स्थः । स्व॑ःपती॒ इति॒ स्वः॑ऽपती । इन्द्रः॑ । च॒ । सो॒म॒ । गोप॑ती॒ इति॒ गोऽप॑ती ।

ई॒शा॒ना । पि॒प्य॒त॒म् । धियः॑ ॥ २ ॥

वृषा॑ पुना॒न आ॒यु॑षु स्त॒नय॒न्नधि॑ ब॒र्हिषि॑ । हरि॒ः सन्योनि॒मास॑दत् ॥ ३ ॥

वृषा॑ । पु॒ना॒नः । आ॒यु॑षु । स्त॒नय॑न् । अधि॑ । ब॒र्हिषि॑ । हरि॑ः । सन् । योनि॑म् । आ । अ॒स॒द॒त् ॥ ३ ॥

अवा॑वशन्त धी॒तयो॑ वृष॒भस्याधि॒ रेत॑सि । सू॒नोर्व॒त्सस्य॑ मा॒तरः॑ ॥ ४ ॥

अवा॑वशन्त । धी॒तय॑ः । वृ॒ष॒भस्य॑ । अधि॑ । रेत॑सि । सू॒नोः । व॒त्सस्य॑ । मा॒तर॑ः ॥ ४ ॥

कु॒विद्वृ॑ष॒ण्यन्ती॑भ्यः पुना॒नो गर्भ॑माद॒धत् । याः शु॒क्रं दु॑ह॒ते पय॑ः ॥ ५ ॥

कु॒वित् । वृ॒ष॒ण्यन्ती॑भ्यः । पु॒ना॒नः । गर्भ॑म् । आ॒ऽदध॑त् । याः । शु॒क्रम् । दु॒ह॒ते । पय॑ः ॥ ५ ॥

उप॑ शिक्षापत॒स्थुषो॑ भि॒यस॒मा धे॑हि॒ शत्रु॑षु । पव॑मान वि॒दा र॒यिम् ॥ ६ ॥

उप॑ । शि॒क्ष॒ । अ॒प॒ऽत॒स्थुष॑ः । भि॒यस॑म् । आ । धे॒हि॒ । शत्रु॑षु । पव॑मानः । वि॒दाः । र॒यिम् ॥ ६ ॥

नि शत्रो॑ः सोम॒ वृष्ण्य॒ं नि शुष्म॒ं नि वय॑स्तिर । दूरे वा॑ स॒तो अन्ति॑ वा ॥ ७ ॥ [९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नि। शत्रोः। सोम। वृष्ण्यम्। नि। शुष्मम्। नि। वयः। तिर। दूरे। वा। सतः। अन्ति। वा॥ ७॥

[२०] [७ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

प्र कविर्देववीतयेऽव्यो वारेभिरर्षति। साह्वान्विश्वा अभि स्पृधः॥ १॥

प्र। कविः। देवऽवीतये। अव्यः। वारेभिः। अर्षति। सह्वान्। विश्वाः। अभि। स्पृधः॥ १॥

स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्त्रिणम्॥ २॥

सः। हि। स्म। जरितृऽभ्यः। आ। वाजम्। गोऽमन्तम्। इन्वति। पवमानः। सहस्त्रिणम्॥ २॥

परि विश्वानि चेतसा मृशसे पवसे मती। स नः सोम श्रवो विदः॥ ३॥

परि। विश्वानि। चेतसा। मृशसे। पवसे। मती। सः। नः। सोम। श्रवः। विदः॥ ३॥

अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य आ भर॥ ४॥

अभि। अर्ष। बृहत्। यशः। मघवत्ऽभ्यः। ध्रुवम्। रयिम्। इषम्। स्तोतृऽभ्यः। आ। भर॥ ४॥

त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत॥ ५॥

त्वम्। राजाऽइव। सुऽव्रतः। गिरः। सोम। आ। विवेशिथ। पुनानः। वह्ने। अद्भुत॥ ५॥

स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति॥ ६॥

सः। वह्निः। अप्ऽसु। दुस्तरः। मृज्यमानः। गभस्त्योः। सोमः। चमूषु। सीदति॥ ६॥

क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यम्॥ ७॥ [१०]

क्रीळुः। मखः। न। मंहयुः। पवित्रम्। सोम। गच्छसि। दधत्। स्तोत्रे। सुऽवीर्यम्॥ ७॥

[२१] [७ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः। मत्सरासः स्वर्विदः॥ १॥

एते। धावन्ति। इन्दवः। सोमाः। इन्द्राय। घृष्वयः। मत्सरासः। स्वःऽविदः॥ १॥

प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः। स्वयं स्तोत्रे वयस्कृतः॥ २॥

प्रऽवृण्वन्तः। अभिऽयुजः। सुस्वये। वरिवःऽविदः। स्वयम्। स्तोत्रे। वयःऽकृतः॥ २॥

वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित्। सिन्धोरूर्मा व्यक्षरन्॥ ३॥

वृथा। क्रीळन्तः। इन्दवः। सधऽस्थम्। अभि। एकम्। इत्। सिन्धोः। ऊर्मा। वि। अक्षरन्॥ ३॥

एते विश्वानि वार्या पवमानास आशत। हिता न सप्तयो रथे॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एते। विश्वानि। वार्या। पवमानासः। आशत। हिताः। न। सप्तयः। रथे॥ ४॥

आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे। यो अस्मभ्यमरावा॥ ५॥

आ। अस्मिन्। पिशङ्गम्। इन्दवः। दधात। वेनम्। आऽदिशे। यः। अस्मभ्यम्। अरावा॥ ५॥

ऋभुर्न रथ्यं नवं दधाता केतमादिशे। शुक्राः पवध्वमर्णसा॥ ६॥

ऋभुः। न। रथ्यम्। नवम्। दधात। केतम्। आऽदिशे। शुक्राः। पवध्वम्। अर्णसा॥ ६॥

एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत। सतः प्रासाविषुर्मतिम्॥ ७॥ [११]

एते। ऊँ इति। त्ये। अवीवशन्। काष्ठाम्। वाजिनः। अक्रत। सतः। प्र। असाविषुः। मतिम्॥ ७॥

[२२] [७ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

एते सोमास आशवो रथाइव प्र वाजिनः। सर्गाः सृष्टा अहेषत॥ १॥

एते। सोमासः। आशवः। रथाःऽइव। प्र। वाजिनः। सर्गाः। सृष्टाः। अहेषत॥ १॥

एते वाताइवोरवः पर्जन्यस्येव वृष्टयः। अग्नेरिव भ्रमा वृथा॥ २॥

एते। वाताःऽइव। उरवः। पर्जन्यस्यऽइव। वृष्टयः। अग्नेःऽइव। भ्रमाः। वृथा॥ २॥

एते पूता विपश्चितः सोमासो दध्याशिरः। विपा व्यानशुर्धियः॥ ३॥

एते। पूताः। विपःऽचितः। सोमासः। दधिऽआशिरः। विपा। वि। आनशुः। धियः॥ ३॥

एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः। इयक्षन्तः पथो रजः॥ ४॥

एते। मृष्टाः। अमर्त्याः। ससृऽवांसः। न। शश्रमुः। इयक्षन्तः। पथः। रजः॥ ४॥

एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः। उतेदमुत्तमं रजः॥ ५॥

एते। पृष्ठानि। रोदसोः। विऽप्रयन्तः। वि। आनशुः। उत। इदम्। उत्ऽतमम्। रजः॥ ५॥

तन्तुं तन्वानमुत्तममनु प्रवत आशत। उतेदमुत्तमाय्यम्॥ ६॥

तन्तुम्। तन्वानम्। उत्ऽतमम्। अनु। प्रऽवतः। आशत। उत। इदम्। उत्तमाय्यम्॥ ६॥

त्वं सोम पणिभ्य आ वसु गव्यानि धारयः। ततं तन्तुमचिक्रदः॥ ७॥ [१२]

त्वम्। सोम। पणिऽभ्यः। आ। वसु। गव्यानि। धारयः। ततम्। तन्तुम्। अचिक्रदः॥ ७॥

[२३] [७ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

सोमा असृग्रमाशवो मधोर्मदस्य धारया। अभि विश्वानि काव्या॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमाः। असृग्रम्। आशवः। मधोः। मदस्य। धारया। अभि। विश्वानि। काव्या॥ १॥

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम्॥ २॥

अनु। प्रत्नासः। आयवः। पदम्। नवीयः। अक्रमुः। रुचे। जनन्त। सूर्यम्॥ २॥

आ पवमान नो भरार्यो अदाशुषो गयम्। कृधि प्रजावतीरिषः॥ ३॥

आ। पवमान। नः। भर। अर्यः। अदाशुषः। गयम्। कृधि। प्रजाऽवतीः। इषः॥ ३॥

अभि सोमास आयवः पवन्ते मद्यं मदम्। अभि कोशं मधुश्चुतम्॥ ४॥

अभि। सोमासः। आयवः। पवन्ते। मद्यम्। मदम्। अभि। कोशम्। मधुऽश्चुतम्॥ ४॥

सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम्। सुवीरो अभिशस्तिपाः॥ ५॥

सोमः। अर्षति। धर्णसिः। दधानः। इन्द्रियम्। रसम्। सुऽवीरः। अभिशस्तिऽपाः॥ ५॥

इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः। इन्दो वाजं सिषाससि॥ ६॥

इन्द्राय। सोम। पवसे। देवेभ्यः। सधऽमाद्यः। इन्दो इति। वाजम्। सिसाससि॥ ६॥

अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति। जघान जघनच्च नु॥ ७॥ [१३]

अस्य। पीत्वा। मदानाम्। इन्द्रः। वृत्राणि। अप्रति। जघान। जघनत्। च। नु॥ ७॥

[२४] [७ काश्यपोऽसितो देवलो वा। पवमानः सोमः। गायत्री।]

प्र सोमासो अधन्विषुः पवमानास इन्दवः। श्रीणाना अप्सु मृञ्जत॥ १॥

प्र। सोमासः। अधन्विषुः। पवमानासः। इन्दवः। श्रीणानाः। अप्ऽसु। मृञ्जत॥ १॥

अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इन्द्रमाशत॥ २॥

अभि। गावः। अधन्विषुः। आपः। न। प्रऽवता। यतीः। पुनानाः। इन्द्रम्। आशत॥ २॥

प्र पवमान धन्वसि सोमेन्द्राय पातवे। नृभिर्यतो वि नीयसे॥ ३॥

प्र। पवमान। धन्वसि। सोम। इन्द्राय। पातवे। नृऽभिः। यतः। वि। नीयसे॥ ३॥

त्वं सोम नृमादनः पवस्व चर्षणीसहे। सस्निर्यो अनुमाद्यः॥ ४॥

त्वम्। सोम। नृऽमादनः। पवस्व। चर्षणिऽसहे। सस्निः। यः। अनुऽमाद्यः॥ ४॥

इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि। अरमिन्द्रस्य धाम्ने॥ ५॥

इन्दो इति। यत्। अद्रिऽभिः। सुतः। पवित्रम्। परिऽधावसि। अरम्। इन्द्रस्य। धाम्ने॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः॥ ६॥

पवस्व। वृत्रहन्ऽतम। उक्थेभिः। अनुऽमाद्यः। शुचिः। पावकः। अद्भुतः॥ ६॥

शुचिः पावक उच्यते सोमः सुतस्य मध्वः। देवावीरघशंसहा॥ ७॥ [१४] {१}

शुचिः। पावकः। उच्यते। सोमः। सुतस्य। मध्वः। देवऽअवीः। अघशंसऽहा॥ ७॥

[२५] [६ दृळ्हच्युत आगस्त्यः। पवमानः सोमः। गायत्री।]

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥ १॥

पवस्व। दक्षऽसाधनः। देवेभ्यः। पीतये। हरे। मरुत्ऽभ्यः। वायवे। मदः॥ १॥

पवमान धिया हितो३भि योनिं कनिक्रदत्। धर्मणा वायुमा विश॥ २॥

पवमान। धिया। हितः। अभि। योनिम्। कनिक्रदत्। धर्मणा। वायुम्। आ। विश॥ २॥

सं देवैः शोभते वृषा कविर्योनावधि प्रियः। वृत्रहा देववीतमः॥ ३॥

सम्। देवैः। शोभते। वृषा। कविः। योनौ। अधि। प्रियः। वृत्रऽहा। देवऽवीतमः॥ ३॥

विश्वा रूपाण्याविशन्पुनानो याति हर्यतः। यत्रामृतास आसते॥ ४॥

विश्वा। रूपाणि। आऽविशन्। पुनानः। याति। हर्यतः। यत्र। अमृतासः। आसते॥ ४॥

अरुषो जनयन् गिरः सोमः पवत आयुषक्। इन्द्रं गच्छन् कविक्रतुः॥ ५॥

अरुषः। जनयन्। गिरः। सोमः। पवते। आयुषक्। इन्द्रम्। गच्छन्। कविऽक्रतुः॥ ५॥

आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम्॥ ६॥ [१५]

आ। पवस्व। मदिन्ऽतम। पवित्रम्। धारया। कवे। अर्कस्य। योनिम्। आऽसदम्॥ ६॥

[२६] [६ इध्मवाहो दार्ढच्युतः। पवमानः सोमः। गायत्री।]

तममृक्षन्त वाजिनमुपस्थे अदितेरधि। विप्रासो अण्व्या धिया॥ १॥

तम्। अमृक्षन्त। वाजिनम्। उपऽस्थे। अदितेः। अधि। विप्रासः। अण्व्या। धिया॥ १॥

तं गावो अभ्यनूषत सहस्रधारमक्षितम्। इन्दुं धर्तारमा दिवः॥ २॥

तम्। गावः। अभि। अनूषत। सहस्रऽधारम्। अक्षितम्। इन्दुम्। धर्तारम्। आ। दिवः॥ २॥

तं वेधां मेधयाह्यन्पवमानमधि द्यवि। धर्णसिं भूरिधायसम्॥ ३॥

तम्। वेधाम्। मेधया। अह्यन्। पवमानम्। अधि। द्यवि। धर्णसिम्। भूरिऽधायसम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तम॑ह्यन्भु॒रिजो॑र्धि॒या सं॒वसा॑नं वि॒वस्व॑तः। पतिं॑ वा॒चो अदा॑भ्यम्॥ ४॥

तम्। अ॒ह्य॒न्। भु॒रिजोः॑। धि॒या। स॒म्ऽव॒सान॑म्। वि॒वस्व॑तः। पति॑म्। वा॒चः। अदा॑भ्यम्॥ ४॥

तं साना॒वधि॑ जा॒मयो॒ हरिं॑ हिन्व॒न्त्यद्रि॑भिः। ह॒र्य॒तं भूरि॑चक्षसम्॥ ५॥

तम्। सानौ॑। अधि॑। जा॒मयः॑। हरि॑म्। हि॒न्व॒न्ति॒। अद्रि॑ऽभिः। ह॒र्य॒तम्। भूरि॑ऽचक्षसम्॥ ५॥

तं त्वा॑ हिन्वन्ति वे॒धसः॒ पव॑मान गिरा॒वृध॑म्। इन्द॒विन्द्रा॑य मत्स॒रम्॥ ६॥ [१६]

तम्। त्वा॒। हि॒न्व॒न्ति॒। वे॒धसः॑। पव॑मान। गि॒रा॒ऽवृध॑म्। इन्दो॒ इति॑। इन्द्रा॑य। म॒त्स॒रम्॥ ६॥

[२७] [६ नृमेध आङ्गिरसः। पवमानः सोमः। गायत्री।]

ए॒ष क॒विर॒भिष्टु॑तः प॒वित्रे॒ अधि॑ तोशते। पु॒ना॒नो घ्नन्नप॒ स्रिधः॑॥ १॥

ए॒षः। क॒विः। अ॒भिऽस्तु॑तः। प॒वित्रे॑। अधि॑। तो॒श॒ते॒। पु॒ना॒नः। घ्नन्। अप॑। स्रिधः॑॥ १॥

ए॒ष इन्द्रा॑य वा॒यवे॑ स्व॒र्जित्परि॑ षिच्यते। प॒वित्रे॑ दक्ष॒साध॑नः॥ २॥

ए॒षः। इन्द्रा॑य। वा॒यवे॑। स्वः॒ऽजित्। परि॑। सि॒च्य॒ते॒। प॒वित्रे॑। द॒क्ष॒ऽसाध॑नः॥ २॥

ए॒ष नृभि॒र्वि नी॑यते दि॒वो मू॒र्धा वृषा॑ सु॒तः। सोमो॒ वने॑षु विश्व॒वित्॥ ३॥

ए॒षः। नृऽभिः॑। वि। नी॒य॒ते॒। दि॒वः। मू॒र्धा। वृषा॑। सु॒तः। सोमः॑। वने॑षु। वि॒श्व॒ऽवित्॥ ३॥

ए॒ष ग॒व्युर॑चिक्रद॒त्पव॑मानो हिरण्य॒युः। इन्दुः॑ सत्रा॒जिदस्तृ॑तः॥ ४॥

ए॒षः। ग॒व्युः। अ॒चि॒क्र॒द॒त्। पव॑मानः। हि॒र॒ण्य॒ऽयुः। इन्दुः॑। स॒त्रा॒ऽजित्। अस्तृ॑तः॥ ४॥

ए॒ष सूर्ये॑ण हासते॒ पव॑मानो॒ अधि॒ द्यवि॑। प॒वित्रे॑ मत्स॒रो मदः॑॥ ५॥

ए॒षः। सूर्ये॑ण। हा॒स॒ते॒। पव॑मानः। अधि॑। द्यवि॑। प॒वित्रे॑। म॒त्स॒रः। मदः॑॥ ५॥

ए॒ष शु॒ष्म्य॑सिष्यदद॒न्तरि॑क्षे॒ वृषा॒ हरिः॑। पु॒ना॒न इन्दु॒रिन्द्र॒मा॥ ६॥ [१७]

ए॒षः। शु॒ष्मी। अ॒सि॒स्य॒द॒त्। अ॒न्तरि॑क्षे। वृषा॑। हरिः॑। पु॒ना॒नः। इन्दुः॑। इन्द्र॑म्। आ॥ ६॥

[२८] [६ प्रियमेध आङ्गिरसः। पवमानः सोमः। गायत्री।]

ए॒ष वा॒जी हि॒तो नृभि॑र्विश्व॒विन्मन॑स॒स्पतिः॑। अव्यो॒ वारं॒ वि धा॑वति॥ १॥

ए॒षः। वा॒जी। हि॒तः। नृऽभिः॑। वि॒श्व॒ऽवित्। मन॑सः। पतिः॑। अव्यः॑। वार॑म्। वि। धा॒व॒ति॒॥ १॥

ए॒ष प॒वित्रे॑ अक्षर॒त्सोमो॑ दे॒वेभ्यः॑ सु॒तः। विश्वा॒ धामा॑न्यावि॒शन्॥ २॥

ए॒षः। प॒वित्रे॑। अ॒क्ष॒र॒त्। सोमः॑। दे॒वेभ्यः॑। सु॒तः। विश्वा॑। धामा॑नि। आ॒ऽवि॒शन्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः॥ ३॥

एषः। देवः। शुभायते। अधि। योनौ। अमर्त्यः। वृत्रऽहा। देवऽवीतमः॥ ३॥

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति॥ ४॥

एषः। वृषा। कनिक्रदत्। दशऽभिः। जामिऽभिः। यतः। अभि। द्रोणानि। धावति॥ ४॥

एष सूर्यमरोचयत्पवमानो विचर्षणिः। विश्वा धामानि विश्ववित्॥ ५॥

एषः। सूर्यम्। अरोचयत्। पवमानः। विऽचर्षणिः। विश्वा। धामानि। विश्वऽवित्॥ ५॥

एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा॥ ६॥ [१८]

एषः। शुष्मी। अदाभ्यः। सोमः। पुनानः। अर्षति। देवऽअवीः। अघशंसऽहा॥ ६॥

[२९] [६ नृमेध आङ्गिरसः। पवमानः सोमः। गायत्री।]

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा। देवाँ अनु प्रभूषतः॥ १॥

प्र। अस्य। धाराः। अक्षरन्। वृष्णः। सुतस्य। ओजसा। देवान्। अनु। प्रऽभूषतः॥ १॥

सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यम्॥ २॥

सप्तिम्। मृजन्ति। वेधसः। गृणन्तः। कारवः। गिरा। ज्योतिः। जज्ञानम्। उक्थ्यम्॥ २॥

सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्यम्॥ ३॥

सुऽसहा। सोम। तानि। ते। पुनानाय। प्रभुवसो इति प्रभुऽवसो। वर्ध। समुद्रम्। उक्थ्यम्॥ ३॥

विश्वा वसूनि संजयन्पवस्व सोम धारया। इनु द्वेषांसि सध्र्यक्॥ ४॥

विश्वा। वसूनि। सम्ऽजयन्। पवस्व। सोम। धारया। इनु। द्वेषांसि। सध्र्यक्॥ ४॥

रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित्। निदो यत्र मुमुच्महे॥ ५॥

रक्ष। सु। नः। अररुषः। स्वनात्। समस्य। कस्य। चित्। निदः। यत्र। मुमुच्महे॥ ५॥

एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया। द्युमन्तं शुष्ममा भर॥ ६॥ [१९]

आ। इन्दो इति। पार्थिवम्। रयिम्। दिव्यम्। पवस्व। धारया। द्युऽमन्तम्। शुष्मम्। आ। भर॥ ६॥

[३०] [६ बिन्दुराङ्गिरसः। पवमानः सोमः। गायत्री।]

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन्। पुनानो वाचमिष्यति॥ १॥

प्र। धाराः। अस्य। शुष्मिणः। वृथा। पवित्रे। अक्षरन्। पुनानः। वाचम्। इष्यति॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयर्ति वग्नुमिन्द्रियम्॥ २॥

इन्दुः। हियानः। सोतृऽभिः। मृज्यमानः। कनिक्रदत्। इयर्ति। वग्नुम्। इन्द्रियम्॥ २॥

आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम्। पवस्व सोम धारया॥ ३॥

आ। नः। शुष्मम्। नृऽसह्यम्। वीरऽवन्तम्। पुरुऽस्पृहम्। पवस्व। सोम। धारया॥ ३॥

प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदम्॥ ४॥

प्र। सोमः। अति। धारया। पवमानः। असिस्यदत्। अभि। द्रोणानि। आऽसदम्॥ ४॥

अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः। इन्दविन्द्राय पीतये॥ ५॥

अप्ऽसु। त्वा। मधुमत्ऽतमम्। हरिम्। हिन्वन्ति। अद्रिऽभिः। इन्दो इति। इन्द्राय। पीतये॥ ५॥

सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे। चारुं शर्धाय मत्सरम्॥ ६॥ [२०]

सुनोत। मधुमत्ऽतमम्। सोमम्। इन्द्राय। वज्रिणे। चारुम्। शर्धाय। मत्सरम्॥ ६॥

[३१] [६ गोतमो राहूगणः। पवमानः सोमः। गायत्री।]

प्र सोमासः स्वाध्यः१ पवमानासो अक्रमुः। रयिं कृण्वन्ति चेतनम्॥ १॥

प्र। सोमासः। सुऽआध्यः। पवमानासः। अक्रमुः। रयिम्। कृण्वन्ति। चेतनम्॥ १॥

दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः। भवा वाजानां पतिः॥ २॥

दिवः। पृथिव्याः। अधि। भव। इन्दो इति। द्युम्नऽवर्धनः। भव। वाजानाम्। पतिः॥ २॥

तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः। सोम वर्धन्ति ते महः॥ ३॥

तुभ्यम्। वाताः। अभिऽप्रियः। तुभ्यम्। अर्षन्ति। सिन्धवः। सोम। वर्धन्ति। ते। महः॥ ३॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे॥ ४॥

आ। प्यायस्व। सम्। एतु। ते। विश्वतः। सोम। वृष्ण्यम्। भव। वाजस्य। सम्ऽगथे॥ ४॥

तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम्। वर्षिष्ठे अधि सानवि॥ ५॥

तुभ्यम्। गावः। घृतम्। पयः। बभ्रो इति। दुदुह्रे। अक्षितम्। वर्षिष्ठे। अधि। सानवि॥ ५॥

स्वायुधस्य ते सतो भुवनस्य पते वयम्। इन्दो सखित्वमुश्मसि॥ ६॥ [२१]

सुऽआयुधस्य। ते। सतः। भुवनस्य। पते। वयम्। इन्दो इति। सखिऽत्वम्। उश्मसि॥ ६॥

[३२] [६ श्यावाश्व आत्रेयः। पवमानः सोमः। गायत्री।]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र सोमा॑सो मद॒च्युत॒ः श्रव॑से नो म॒घोन॑ः । सु॒ता वि॒दथे॑ अक्रमुः ॥ १ ॥

प्र । सोमा॑सः । म॒द॒॰च्यु॑त॒ः । श्रव॑से । न॒ः । म॒घोन॑ः । सु॒ताः । वि॒दथे॑ । अ॒क्र॒मुः ॥ १ ॥

आदीं॑ त्रि॒तस्य॒ योष॑णो॒ हरिं॑ हिन्व॒न्त्यद्रि॑भिः । इन्दु॒मिन्द्रा॑य पी॒तये॑ ॥ २ ॥

आत् । ई॒म् । त्रि॒तस्य॑ । योष॑णः । हरि॑म् । हि॒न्व॒न्ति॒ । अद्रि॑॰भिः । इन्दु॑म् । इन्द्रा॑य । पी॒तये॑ ॥ २ ॥

आदीं॑ हं॒सो यथा॑ ग॒णं विश्व॑स्यावीवशन्म॒तिम् । अत्यो॒ न गोभि॑रज्यते ॥ ३ ॥

आत् । ई॒म् । हं॒सः । यथा॑ । ग॒णम् । विश्व॑स्य । अ॒वी॒व॒श॒त् । म॒तिम् । अत्य॑ः । न । गोभि॑ः । अ॒ज्य॒ते ॥ ३ ॥

उ॒भे सो॑माव॒चाक॑शन्मृ॒गो न त॒क्तो अ॑र्षसि । सीद॑न्नृ॒तस्य॒ योनि॒मा ॥ ४ ॥

उ॒भे इति॑ । सो॒म॒ । अ॒व॒॰चाक॑शत् । मृ॒गः । न । त॒क्तः । अ॒र्ष॒ति॒ । सीद॑न् । ऋ॒तस्य॑ । योनि॑म् । आ ॥ ४ ॥

अ॒भि गावो॑ अनूषत॒ योषा॑ जा॒रमि॑व प्रि॒यम् । अग॑न्ना॒जिं यथा॑ हि॒तम् ॥ ५ ॥

अभि॒ । गाव॑ः । अ॒नू॒ष॒त॒ । योषा॑ । जा॒रम्ऽइ॑व । प्रि॒यम् । अग॑न् । आ॒जिम् । यथा॑ । हि॒तम् ॥ ५ ॥

अ॒स्मे धे॑हि द्यु॒मद्यशो॑ म॒घव॑द्भ्यश्च॒ मह्यं॑ च । स॒निं मे॒धामु॒त श्रव॑ः ॥ ६ ॥ [२२]

अ॒स्मे इति॑ । धे॒हि॒ । द्यु॒॰मत् । यश॑ः । म॒घव॑त्॰भ्यः । च॒ । मह्य॑म् । च॒ । स॒निम् । मे॒धाम् । उ॒त । श्रव॑ः ॥ ६ ॥

[३३] [६ त्रित आप्त्यः । पवमानः सोमः । गायत्री ।]

प्र सोमा॑सो विप॒श्चितो॒ऽपां न य॑न्त्यू॒र्मयः । वना॑नि महि॒षाइ॑व ॥ १ ॥

प्र । सोमा॑सः । वि॒प॒ःऽचित॑ः । अ॒पाम् । न । य॒न्ति॒ । ऊ॒र्मय॑ः । वना॑नि । म॒हि॒षाःऽइ॑व ॥ १ ॥

अ॒भि द्रोणा॑नि ब॒भ्रव॑ः शु॒क्रा ऋ॒तस्य॒ धार॑या । वाजं॒ गोम॑न्तमक्षरन् ॥ २ ॥

अ॒भि । द्रोणा॑नि । ब॒भ्रव॑ः । शु॒क्राः । ऋ॒तस्य॑ । धार॑या । वाज॑म् । गो॰म॑न्तम् । अ॒क्ष॒र॒न् ॥ २ ॥

सु॒ता इन्द्रा॑य वा॒यवे॒ वरु॑णाय म॒रुद्भ्य॑ः । सोमा॑ अर्षन्ति॒ विष्ण॑वे ॥ ३ ॥

सु॒ताः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय । म॒रुत्॰भ्य॑ः । सोमा॑ः । अ॒र्ष॒न्ति॒ । विष्ण॑वे ॥ ३ ॥

ति॒स्रो वाच॒ उदी॑रते॒ गावो॑ मिमन्ति धे॒नव॑ः । हरि॑रेति॒ कनि॑क्रदत् ॥ ४ ॥

ति॒स्रः । वाच॑ः । उत् । ई॒र॒ते॒ । गाव॑ः । मि॒म॒न्ति॒ । धे॒नव॑ः । हरि॑ः । ए॒ति॒ । कनि॑क्रदत् ॥ ४ ॥

अ॒भि ब्रह्मी॑रनूषत य॒ह्वीर्ऋ॒तस्य॑ मा॒तर॑ः । म॒र्मृ॒ज्यन्ते॑ दि॒वः शिशु॑म् ॥ ५ ॥

अ॒भि । ब्रह्मी॑ः । अ॒नू॒ष॒त॒ । य॒ह्वीः । ऋ॒तस्य॑ । मा॒तर॑ः । म॒र्मृ॒ज्यन्ते॑ । दि॒वः । शिशु॑म् ॥ ५ ॥

रा॒यः स॑मु॒द्रांश्च॒तुरो॒ऽस्मभ्यं॑ सोम वि॒श्वत॑ः । आ प॑वस्व सह॒स्रिण॑ः ॥ ६ ॥ [२३]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रायः। समुद्रान्। चतुरः। अस्मभ्यम्। सोम। विश्वतः। आ। पवस्व। सहस्रिणः॥ ६॥

[३४] [६ त्रित आप्त्यः। पवमानः सोमः। गायत्री।]

प्र सुवानो धारया तनेन्दुर्हिन्वानो अर्षति। रुजद्दृळ्हा व्योजसा॥ १॥

प्र। सुवानः। धारया। तना। इन्दुः। हिन्वानः। अर्षति। रुजत्। दृळ्हा। वि। ओजसा॥ १॥

सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे॥ २॥

सुतः। इन्द्राय। वायवे। वरुणाय। मरुत्ऽभ्यः। सोमः। अर्षति। विष्णवे॥ २॥

वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः। दुहन्ति शक्मना पयः॥ ३॥

वृषाणम्। वृषऽभिः। यतम्। सुन्वन्ति। सोमम्। अद्रिऽभिः। दुहन्ति। शक्मना। पयः॥ ३॥

भुवत्त्रितस्य मर्ज्यो भुवदिन्द्राय मत्सरः। सं रूपैरज्यते हरिः॥ ४॥

भुवत्। त्रितस्य। मर्ज्यः। भुवत्। इन्द्राय। मत्सरः। सम्। रूपैः। अज्यते। हरिः॥ ४॥

अभीमृतस्य विष्टपं दुहते पृश्निमातरः। चारु प्रियतमं हविः॥ ५॥

अभि। ईम्। ऋतस्य। विष्टपम्। दुहते। पृश्निऽमातरः। चारु। प्रियऽतमम्। हविः॥ ५॥

समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः। धेनूर्वाश्रो अवीवशत्॥ ६॥ [२४]

सम्। एनम्। अह्रुताः। इमाः। गिरः। अर्षन्ति। सऽस्रुतः। धेनूः। वाश्रः। अवीवशत्॥ ६॥

[३५] [६ प्रभूवसुराङ्गिरसः। पवमानः सोमः। गायत्री।]

आ नः पवस्व धारया पवमान रयिं पृथुम्। यया ज्योतिर्विदासि नः॥ १॥

आ। नः। पवस्व। धारया। पवमान। रयिम्। पृथुम्। यया। ज्योतिः। विदासि। नः॥ १॥

इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय। रायो धर्ता न ओजसा॥ २॥

इन्दो इति। समुद्रम्ऽईङ्खय। पवस्व। विश्वम्ऽएजय। रायः। धर्ता। नः। ओजसा॥ २॥

त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः। क्षरा णो अभि वार्यम्॥ ३॥

त्वया। वीरेण। वीरऽवः। अभि। स्याम। पृतन्यतः। क्षर। नः। अभि। वार्यम्॥ ३॥

प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः। व्रता विदान आयुधा॥ ४॥

प्र। वाजम्। इन्दुः। इष्यति। सिसासन्। वाजऽसाः। ऋषिः। व्रता। विदानः। आयुधा॥ ४॥

तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि। सोमं जनस्य गोपतिम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तम् । गीः२भिः । वाचम्ऽईङ्खयम् । पुनानम् । वासयामसि । सोमम् । जनस्य । गोऽपतिम् ॥ ५ ॥

विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः । पुनानस्य प्रभूवसोः ॥ ६ ॥ [२५]

विश्वः । यस्य । व्रते । जनः । दाधार । धर्मणः । पतेः । पुनानस्य । प्रभुऽवसोः ॥ ६ ॥

[३६] [६ प्रभूवसुराङ्गिरसः । पवमानः सोमः । गायत्री ।]

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन्वाजी न्यक्रमीत् ॥ १ ॥

असर्जि । रथ्यः । यथा । पवित्रे । चम्वोः । सुतः । कार्ष्मन् । वाजी । नि । अक्रमीत् ॥ १ ॥

स वह्निः सोम जागृविः पवस्व देववीरति । अभि कोशं मधुश्चुतम् ॥ २ ॥

सः । वह्निः । सोम । जागृविः । पवस्व । देवऽवीः । अति । अभि । कोशम् । मधुऽश्चुतम् ॥ २ ॥

स नो ज्योतींषि पूर्व्य पवमान वि रोचय । क्रत्वे दक्षाय नो हिनु ॥ ३ ॥

सः । नः । ज्योतींषि । पूर्व्य । पवमान । वि । रोचय । क्रत्वे । दक्षाय । नः । हिनु ॥ ३ ॥

शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः । पवते वारे अव्यये ॥ ४ ॥

शुम्भमानः । ऋतयुऽभिः । मृज्यमानः । गभस्त्योः । पवते । वारे । अव्यये ॥ ४ ॥

स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा । पवतामान्तरिक्ष्या ॥ ५ ॥

सः । विश्वा । दाशुषे । वसु । सोमः । दिव्यानि । पार्थिवा । पवताम् । आ । अन्तरिक्ष्या ॥ ५ ॥

आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि । वीरयुः शवसस्पते ॥ ६ ॥ [२६]

आ । दिवः । पृष्ठम् । अश्वऽयुः । गव्यऽयुः । सोम । रोहसि । वीरऽयुः । शवसः । पते ॥ ६ ॥

[३७] [६ रहूगण आङ्गिरसः । पवमानः सोमः । गायत्री ।]

स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ १ ॥

सः । सुतः । पीतये । वृषा । सोमः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥ १ ॥

स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥ २ ॥

सः । पवित्रे । विऽचक्षणः । हरिः । अर्षति । धर्णसिः । अभि । योनिम् । कनिक्रदत् ॥ २ ॥

स वाजी रोचना दिवः पवमानो वि धावति । रक्षोहा वारमव्ययम् ॥ ३ ॥

सः । वाजी । रोचना । दिवः । पवमानः । वि । धावति । रक्षः२हा । वारम् । अव्ययम् ॥ ३ ॥

स त्रितस्याधि सानवि पवमानो अरोचयत् । जामिभिः सूर्यं सह ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। त्रितस्य॑। अधि॑। सान॑वि। पव॑मानः। अ॒रो॒च॒य॒त्। जा॒मिऽभिः॑। सूर्य॑म्। स॒ह॥ ४॥

स वृ॑त्र॒हा वृषा॑ सु॒तो व॑रिवो॒विददा॑भ्यः। सोमो॒ वाज॑मिवासरत्॥ ५॥

सः। वृ॒त्र॒ऽहा। वृषा॑। सु॒तः। व॒रि॒वः॒ऽवित्। अदा॑भ्यः। सोम॑ः। वाज॑म्ऽइव। अ॒स॒र॒त्॥ ५॥

स दे॒वः क॒विने॑षि॒तो॒३॑ऽभि द्रोणा॑नि धावति। इन्दु॒रिन्द्रा॑य मं॒हना॑॥ ६॥ [२७]

सः। दे॒वः। क॒विना॑। इ॒षि॒तः। अ॒भि। द्रोणा॑नि। धा॒व॒ति॒। इन्दुः॑। इन्द्रा॑य। मं॒हना॑॥ ६॥

[३८] [६ रहूगण आङ्गिरसः। पवमानः सोमः। गायत्री।]

ए॒ष उ॒ स्य वृषा॒ रथोऽव्यो॒ वारे॑भिरर्षति। गच्छ॒न्वाजं॑ सह॒स्रिण॑म्॥ १॥

ए॒षः। ऊँ॒ इति॑। स्यः। वृषा॑। रथः॑। अव्यः॑। वारे॑भिः। अ॒र्ष॒ति॒। गच्छ॑न्। वाज॑म्। स॒ह॒स्रिण॑म्॥ १॥

ए॒तं त्रि॒तस्य॒ योष॑णो॒ हरिं॑ हिन्व॒न्त्यद्रि॑भिः। इन्दु॒मिन्द्रा॑य पी॒तये॑॥ २॥

ए॒तम्। त्रि॒तस्य॑। योष॑णः। हरि॑म्। हि॒न्व॒न्ति॒। अद्रि॑ऽभिः। इन्दु॑म्। इन्द्रा॑य। पी॒तये॑॥ २॥

ए॒तं त्यं ह॒रितो॒ दश॑ मर्मृ॒ज्यन्ते॑ अप॒स्युवः॑। याभि॒र्मदा॑य॒ शुम्भ॑ते॥ ३॥

ए॒तम्। त्यम्। ह॒रितः॑। दश॑। म॒र्मृ॒ज्यन्ते॑। अ॒प॒स्युवः॑। याभिः॑। मदा॑य। शुम्भ॑ते॥ ३॥

ए॒ष स्य मानु॑षी॒ष्वा श्ये॒नो न वि॒क्षु सी॑दति। गच्छ॑ञ्जा॒रो न यो॒षित॑म्॥ ४॥

ए॒षः। स्यः। मानु॑षीषु। आ। श्ये॒नः। न। वि॒क्षु। सी॒द॒ति॒। गच्छ॑न्। जा॒रः। न। यो॒षित॑म्॥ ४॥

ए॒ष स्य मद्यो॒ रसोऽव॑ चष्टे दि॒वः शिशुः॑। य इन्दु॒र्वार॒मावि॑शत्॥ ५॥

ए॒षः। स्यः। मद्यः॑। रसः॑। अव॑। च॒ष्टे॒। दि॒वः। शिशुः॑। यः। इन्दुः॑। वार॑म्। आ। अवि॑शत्॥ ५॥

ए॒ष स्य पी॒तये॑ सु॒तो हरि॑रर्षति धर्ण॒सिः। क्रन्द॒न्योनि॑म॒भि प्रि॒यम्॥ ६॥ [२८]

ए॒षः। स्यः। पी॒तये॑। सु॒तः। हरिः॑। अ॒र्ष॒ति॒। धर्णसिः। क्रन्द॑न्। योनि॑म्। अ॒भि। प्रि॒यम्॥ ६॥

[३९] [६ बृहन्मतिराङ्गिरसः। पवमानः सोमः। गायत्री।]

आ॒शुर॑र्ष बृहन्मते॒ परि॑ प्रि॒येण॒ धाम्ना॑। यत्र॑ दे॒वा इति॒ ब्रव॑न्॥ १॥

आ॒शुः। अ॒र्ष॒। बृ॒ह॒त्ऽम॒ते॒। परि॑। प्रि॒येण॑। धाम्ना॑। यत्र॑। दे॒वाः। इति॑। ब्रव॑न्॥ १॥

प॒रि॒ष्कृ॒ण्वन्ननि॑ष्कृतं॒ जना॑य यात॒यन्निषः॑। वृ॒ष्टिं दि॒वः परि॑ स्रव॥ २॥

प॒रि॒ऽकृ॒ण्वन्। अनिः॑ऽकृतम्। जना॑य। या॒तय॑न्। इषः॑। वृ॒ष्टिम्। दि॒वः। परि॑। स्र॒व॒॥ २॥

सु॒त ए॑ति प॒वित्र॒ आ त्विषिं॒ दधा॑न॒ ओज॑सा। वि॒चक्षा॑णो वि॒रो॒चय॑न्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुतः। एति। पवित्रे। आ। त्विषिम्। दधानः। ओजसा। विऽचक्षाणः। विऽरोचयन्॥ ३॥

अयं स यो दिवस्परि रघुयामा पवित्र आ। सिन्धोरूर्मा व्यक्षरत्॥ ४॥

अयम्। सः। यः। दिवः। परि। रघुऽयामा। पवित्रे। आ। सिन्धोः। ऊर्मा। वि। अक्षरत्॥ ४॥

आविवासन्परावतो अथो अर्वावतः सुतः। इन्द्राय सिच्यते मधु॥ ५॥

आऽविवासन्। पराऽवतः। अथो इति। अर्वाऽवतः। सुतः। इन्द्राय। सिच्यते। मधु॥ ५॥

समीचीना अनुषत हरिं हिन्वन्त्यद्रिभिः। योनावृतस्य सीदत॥ ६॥ [२९]

सम्ऽईचीनाः। अनूषत। हरिम्। हिन्वन्ति। अद्रिऽभिः। योनौ। ऋतस्य। सीदत॥ ६॥

[४०] [६ बृहन्मतिराङ्गिरसः। पवमानः सोमः। गायत्री।]

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः॥ १॥

पुनानः। अक्रमीत्। अभि। विश्वाः। मृधः। विऽचर्षणिः। शुम्भन्ति। विप्रम्। धीतिऽभिः॥ १॥

आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः। ध्रुवे सदसि सीदति॥ २॥

आ। योनिम्। अरुणः। रुहत्। गमत्। इन्द्रम्। वृषा। सुतः। ध्रुवे। सदसि। सीदति॥ २॥

नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्॥ ३॥

नु। नः। रयिम्। महाम्। इन्दो इति। अस्मभ्यम्। सोम। विश्वतः। आ। पवस्व। सहस्रिणम्॥ ३॥

विश्वा सोम पवमान द्युम्नानीन्दवा भर। विदाः सहस्रिणीरिषः॥ ४॥

विश्वा। सोम। पवमान। द्युम्नानि। इन्दो इति। आ। भर। विदाः। सहस्रिणीः। इषः॥ ४॥

स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम्। जरितुर्वर्धया गिरः॥ ५॥

सः। नः। पुनानः। आ। भर। रयिम्। स्तोत्रे। सुऽवीर्यम्। जरितुः। वर्धय। गिरः॥ ५॥

पुनान इन्दवा भर सोम द्विबर्हसं रयिम्। वृषन्निन्दो न उक्थ्यम्॥ ६॥ [३०]

पुनानः। इन्दो इति। आ। भर। सोम। द्विऽबर्हसम्। रयिम्। वृषन्। इन्दो इति। नः। उक्थ्यम्॥ ६॥

[४१] [६ मेध्यातिथिः काण्वः। पवमानः सोमः। गायत्री।]

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामप त्वचम्॥ १॥

प्र। ये। गावः। न। भूर्णयः। त्वेषाः। अयासः। अक्रमुः। घ्नन्तः। कृष्णाम्। अप। त्वचम्॥ १॥

सुवितस्य मनामहेऽति सेतुं दुराव्यम्। साह्वांसो दस्युमव्रतम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुवितस्य । मनामहे । अति । सेतुम् । दुःऽआव्यम् । सह्वांसः । दस्युम् । अव्रतम् ॥ २ ॥

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ॥ ३ ॥

शृण्वे । वृष्टेःऽइव । स्वनः । पवमानस्य । शुष्मिणः । चरन्ति । विऽद्युतः । दिवि ॥ ३ ॥

आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् । अश्वावद्वाजवत्सुतः ॥ ४ ॥

आ । पवस्व । महीम् । इषम् । गोऽमत् । इन्दो इति । हिरण्यऽवत् । अश्वऽवत् । वाजऽवत् । सुतः ॥ ४ ॥

स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥ ५ ॥

सः । पवस्व । विऽचर्षणे । आ । मही इति । रोदसी इति । पृण । उषाः । सूर्यः । न । रश्मिऽभिः ॥ ५ ॥

परि णः शर्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपम् ॥ ६ ॥ [३१]

परि । नः । शर्मऽयन्त्या । धारया । सोम । विश्वतः । सर । रसाऽइव । विष्टपम् ॥ ६ ॥

[४२] [६ मेध्यातिथिः काण्वः । पवमानः सोमः । गायत्री ।]

जनयन्रोचना दिवो जनयन्नप्सु सूर्यम् । वसानो गा अपो हरिः ॥ १ ॥

जनयन् । रोचना । दिवः । जनयन् । अप्ऽसु । सूर्यम् । वसानः । गाः । अपः । हरिः ॥ १ ॥

एष प्रत्नेन मन्मना देवो देवेभ्यस्परि । धारया पवते सुतः ॥ २ ॥

एषः । प्रत्नेन । मन्मना । देवः । देवेभ्यः । परि । धारया । पवते । सुतः ॥ २ ॥

वावृधानाय तूर्वये पवन्ते वाजसातये । सोमाः सहस्रपाजसः ॥ ३ ॥

ववृधानाय । तूर्वये । पवन्ते । वाजऽसातये । सोमाः । सहस्रऽपाजसः ॥ ३ ॥

दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते । क्रन्दन् देवाँ अजीजनत् ॥ ४ ॥

दुहानः । प्रत्नम् । इत् । पयः । पवित्रे । परि । सिच्यते । क्रन्दन् । देवान् । अजीजनत् ॥ ४ ॥

अभि विश्वानि वार्याभि देवाँ ऋतावृधः । सोमः पुनानो अर्षति ॥ ५ ॥

अभि । विश्वानि । वार्या । अभि । देवान् । ऋतऽवृधः । सोमः । पुनानः । अर्षति ॥ ५ ॥

गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः । पवस्व बृहतीरिषः ॥ ६ ॥ [३२]

गोऽमत् । नः । सोम । वीरऽवत् । अश्वऽवत् । वाजऽवत् । सुतः । पवस्व । बृहतीः । इषः ॥ ६ ॥

[४३] [६ मेध्यातिथिः काण्वः । पवमानः सोमः । गायत्री ।]

यो अत्यइव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। अत्यःऽइव। मृज्यते। गोभिः। मदाय। हर्यतः। तम्। गीःऽभिः। वासयामसि॥ १॥

तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा। इन्दुमिन्द्राय पीतये॥ २॥

तम्। नः। विश्वाः। अवस्युवः। गिरः। शुम्भन्ति। पूर्वऽथा। इन्दुम्। इन्द्राय। पीतये॥ २॥

पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः। विप्रस्य मेध्यातिथेः॥ ३॥

पुनानः। याति। हर्यतः। सोमः। गीःऽभिः। परिऽकृतः। विप्रस्य। मेध्यऽअतिथेः॥ ३॥

पवमान विदा रयिमस्मभ्यं सोम सुश्रियम्। इन्दो सहस्रवर्चसम्॥ ४॥

पवमान। विदाः। रयिम्। अस्मभ्यम्। सोम। सुऽश्रियम्। इन्दो इति। सहस्रऽवर्चसम्॥ ४॥

इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ। यदक्षारति देवयुः॥ ५॥

इन्दुः। अत्यः। न। वाजऽसृत्। कनिक्रन्ति। पवित्रे। आ। यत्। अक्षाः। अति। देवऽयुः॥ ५॥

पवस्व वाजसातये विप्रस्य गृणतो वृधे। सोम रास्व सुवीर्यम्॥ ६॥ [३३]

पवस्व। वाजऽसातये। विप्रस्य। गृणतः। वृधे। सोम। रास्व। सुऽवीर्यम्॥ ६॥

इत्याश्वलायन-संहितायां
षष्ठाष्टके
अष्टमोऽध्यायः समाप्तः
समाप्तं च षष्ठाष्टकम्॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके प्रथमोऽध्यायः ॥

[४४] [६ अयास्य आंङ्गिरसः। पवमानः सोमः। गायत्री।]

प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षति। अभि देवाँ अयास्यः॥ १॥

प्र। नः। इन्दो इति। महे। तने। ऊर्मिम्। न। बिभ्रत्। अर्षति। अभि। देवान्। अयास्यः॥ १॥

मती जुष्टो धिया हितः सोमो हिन्वे परावति। विप्रस्य धारया कविः॥ २॥

मती। जुष्टः। धिया। हितः। सोमः। हिन्वे। पराऽवति। विप्रस्य। धारया। कविः॥ २॥

अयं देवेषु जागृविः सुत एति पवित्र आ। सोमो याति विचर्षणिः॥ ३॥

अयम्। देवेषु। जागृविः। सुतः। एति। पवित्रे। आ। सोमः। याति। विऽचर्षणिः॥ ३॥

स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम्। बर्हिष्माँ आ विवासति॥ ४॥

सः। नः। पवस्व। वाजऽयुः। चक्राणः। चारुम्। अध्वरम्। बर्हिष्मान्। आ। विवासति॥ ४॥

स नो भगाय वायवे विप्रवीरः सदावृधः। सोमो देवेष्वा यमत्॥ ५॥

सः। नः। भगाय। वायवे। विप्रऽवीरः। सदाऽवृधः। सोमः। देवेषु। आ। यमत्॥ ५॥

स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः। वाजं जेषि श्रवो बृहत्॥ ६॥ [१]

सः। नः। अद्य। वसुत्तये। क्रतुऽवित्। गातुवित्ऽतमः। वाजम्। जेषि। श्रवः। बृहत्॥ ६॥

[४५] [६ अयास्य आङ्गिरसः। पवमानः सोमः। गायत्री।]

स पवस्व मदाय कं नृचक्षा देववीतये। इन्दविन्द्राय पीतये॥ १॥

सः। पवस्व। मदाय। कम्। नृऽचक्षाः। देवऽवीतये। इन्दो इति। इन्द्राय। पीतये॥ १॥

स नो अर्षाभि दूत्यं१ त्वमिन्द्राय तोशसे। देवान्त्सखिभ्य आ वरम्॥ २॥

सः। नः। अर्ष। अभि। दूत्यम्। त्वम्। इन्द्राय। तोशसे। देवान्। सखिऽभ्यः। आ। वरम्॥ २॥

उत त्वामरुणं वयं गोभिरञ्ज्मो मदाय कम्। वि नो राये दुरो वृधि॥ ३॥

उत। त्वाम्। अरुणम्। वयम्। गोभिः। अञ्ज्मः। मदाय। कम्। वि। नः। राये। दुरः। वृधि॥ ३॥

अत्यू पवित्रमक्रमीद्वाजी धुरं न यामनि। इन्दुर्देवेषु पत्यते॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अति । ॐ इति । पुवित्रम् । अुक्रमीत् । वाजी । धुरम् । न । यामनि । इन्दुः । देवेषु । पुत्यते ॥ ४ ॥

समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ॥ ५ ॥

सम् । ईमिति । सखायः । अस्वरन् । वने । क्रीळन्तम् । अति॰अविम् । इन्दुम् । नावाः । अनूषत ॥ ५ ॥

तया पवस्व धारया यया पीतो विचक्षसे । इन्दो स्तोत्रे सुवीर्यम् ॥ ६ ॥ [२]

तया । पुवस्व । धारया । यया । पीतः । वि॰चक्षसे । इन्दो इति । स्तोत्रे । सु॰वीर्यम् ॥ ६ ॥

[४६] [५ कविर्भार्गवः । पवमानः सोमः । गायत्री ।]

असृग्रन्देववीतयेऽत्यासः कृत्व्याइव । क्षरन्तः पर्वतावृधः ॥ १ ॥

असृग्रन् । देव॰वीतये । अत्यासः । कृत्व्याःऽइव । क्षरन्तः । पुर्वत॰वृधः ॥ १ ॥

परिष्कृतास इन्दवो योषेव पित्र्यावती । वायुं सोमा असृक्षतः ॥ २ ॥

परि॰कृतासः । इन्दवः । योषाऽइव । पित्र्य॰वती । वायुम् । सोमाः । असृक्षत ॥ २ ॥

एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः । इन्द्रं वर्धन्ति कर्मभिः ॥ ३ ॥

एते । सोमासः । इन्दवः । प्रयस्वन्तः । चमू इति । सुताः । इन्द्रम् । वर्धन्ति । कर्म॰भिः ॥ ३ ॥

आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना । गोभिः श्रीणीत मत्सरम् ॥ ४ ॥

आ । धावत । सु॰हस्त्यः । शुक्रा । गृभ्णीत । मन्थिना । गोभिः । श्रीणीत । मत्सरम् ॥ ४ ॥

स पवस्व धनंजय प्रयन्ता राधसो महः । अस्मभ्यं सोम गातुवित् ॥ ५ ॥

सः । पुवस्व । धनम्॰जय । प्र॰यन्ता । राधसः । महः । अस्मभ्यम् । सोम । गातु॰वित् ॥ ५ ॥

एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः । इन्द्राय मत्सरं मदम् ॥ ६ ॥ [३]

एतम् । मृजन्ति । मर्ज्यम् । पवमानम् । दश । क्षिपः । इन्द्राय । मत्सरम् । मदम् ॥ ६ ॥

[४७] [५ कविर्भार्गवः । पवमानः सोमः । गायत्री ।]

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत । मन्दान उद्वृषायते ॥ १ ॥

अया । सोमः । सु॰कृत्यया । महः । चित् । अभि । अवर्धत । मन्दानः । उत् । वृष॰यते ॥ १ ॥

कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा । ऋणा च धृष्णुश्चयते ॥ २ ॥

कृतानि । इत् । अस्य । कर्त्वा । चेतन्ते । दस्यु॰तर्हणा । ऋणा । च । धृष्णुः । चयते ॥ २ ॥

आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् । उक्थं यदस्य जायते ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आत्। सोमः। इन्द्रियः। रसः। वज्रः। सहस्रऽसाः। भुवत्। उक्थम्। यत्। अस्य। जायते॥ ३॥

स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति। यदी मर्मृज्यते धियः॥ ४॥

स्वयम्। कविः। विऽधर्तरि। विप्राय। रत्नम्। इच्छति। यदि। मर्मृज्यते। धियः॥ ४॥

सिषासतू रयीणां वाजेष्वर्वतामिव। भरेषु जिग्युषामसि॥ ५॥ [४]

सिसासतुः। रयीणाम्। वाजेषु। अर्वताम्ऽइव। भरेषु। जिग्युषाम्। असि॥ ५॥

[४८] [५ कविर्भार्गवः। पवमानः। सोमः। गायत्री।]

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः। चारुं सुकृत्ययेमहे॥ १॥

तम्। त्वा। नृम्णानि। बिभ्रतम्। सधऽस्थेषु। महः। दिवः। चारुम्। सुऽकृत्यया। ईमहे॥ १॥

संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम्॥ २॥

संवृक्तऽधृष्णुम्। उक्थ्यम्। महाऽमहिव्रतम्। मदम्। शतम्। पुरः। रुरुक्षणिम्॥ २॥

अतस्त्वा रयिमभि राजानं सुक्रतो दिवः। सुपर्णो अव्यथिर्भरत्॥ ३॥

अतः। त्वा। रयिम्। अभि। राजानम्। सुक्रतो इति सुऽक्रतो। दिवः। सुऽपर्णः। अव्यथिः। भरत्॥ ३॥

विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरम्। गोपामृतस्य विर्भरत्॥ ४॥

विश्वस्मै। इत्। स्वः। दृशे। साधारणम्। रजःऽतुरम्। गोपाम्। ऋतस्य। विः। भरत्॥ ४॥

अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः॥ ५॥ [५]

अध। हिन्वानः। इन्द्रियम्। ज्यायः। महिऽत्वम्। आनशे। अभिष्टिऽकृत्। विऽचर्षणिः॥ ५॥

[४९] [५ कविभार्गवः। पवमानः सोमः। गायत्री।]

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः॥ १॥

पवस्व। वृष्टिम्। आ। सु। नः। अपाम्। ऊर्मिम्। दिवः। परि। अयक्ष्माः। बृहतीः। इषः॥ १॥

तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहम्॥ २॥

तया। पवस्व। धारया। यया। गावः। इह। आऽगमन्। जन्यासः। उप। नः। गृहम्॥ २॥

घृतं पवस्व धारया यज्ञेषु देववीतमः। अस्मभ्यं वृष्टिमा पव॥ ३॥

घृतम्। पवस्व। धारया। यज्ञेषु। देवऽवीतमः। अस्मभ्यम्। वृष्टिम्। आ। पव॥ ३॥

स न ऊर्जे व्य१व्ययं पवित्रं धाव धारया। देवासः शृणवन् हि कम्॥ ४॥

सः। नः। ऊर्जे। वि। अव्ययम्। पवित्रम्। धाव। धारया। देवासः। शृणवन्। हि। कम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवमानो असिष्यदद्रक्षांस्यपजङ्घनत्। प्रत्नवद्रोचयन्रुचः॥ ५॥ [६]

पवमानः। असिस्यदत्। रक्षांसि। अपऽजङ्घनत्। प्रत्नऽवत्। रोचयन्। रुचः॥ ५॥

[५०] [५ उचथ्य आङ्गिरसः। पवमानः सोमः। गायत्री।]

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः। वाणस्य चोदया पविम्॥ १॥

उत्। ते। शुष्मासः। ईरते। सिन्धोः। ऊर्मेःऽइव। स्वनः। वाणस्य। चोदय। पविम्॥ १॥

प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि॥ २॥

प्रऽसवे। ते। उत्। ईरते। तिस्रः। वाचः। मखस्युवः। यत्। अव्ये। एषि। सानवि॥ २॥

अव्यो वारे परि प्रियं हरिं हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम्॥ ३॥

अव्यः। वारे। परि। प्रियम्। हरिम्। हिन्वन्ति। अद्रिऽभिः। पवमानम्। मधुऽश्चुतम्॥ ३॥

आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम्॥ ४॥

आ। पवस्व। मदिन्ऽतम। पवित्रम्। धारया। कवे। अर्कस्य। योनिम्। आऽसदम्॥ ४॥

स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः। इन्दविन्द्राय पीतये॥ ५॥ [७]

सः। पवस्व। मदिन्ऽतम। गोभिः। अञ्जानः। अक्तुऽभिः। इन्दो इति। इन्द्राय। पीतये॥ ५॥

[५१] [५ उचथ्य आङ्गिरसः। पवमानः सोमः। गायत्री।]

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे॥ १॥

अध्वर्यो इति। अद्रिऽभिः। सुतम्। सोमम्। पवित्रे। आ। सृज। पुनीहि। इन्द्राय। पातवे॥ १॥

दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्॥ २॥

दिवः। पीयूषम्। उत्ऽतमम्। सोमम्। इन्द्राय। वज्रिणे। सुनोत। मधुमत्ऽतमम्॥ २॥

तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नते। पवमानस्य मरुतः॥ ३॥

तव। त्ये। इन्दो इति। अन्धसः। देवाः। मधोः। वि। अश्नते। पवमानस्य। मरुतः॥ ३॥

त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये। वृषन्त्स्तोतारमूतये॥ ४॥

त्वम्। हि। सोम। वर्धयन्। सुतः। मदाय। भूर्णये। वृषन्। स्तोतारम्। ऊतये॥ ४॥

अभ्यर्ष विचक्षण पवित्रं धारया सुतः। अभि वाजमुत श्रवः॥ ५॥ [८]

अभि। अर्ष। विऽचक्षण। पवित्रम्। धारया। सुतः। अभि। वाजम्। उत। श्रवः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[५२] [५ उचथ्य आङ्गिरसः । पवमानः सोमः । गायत्री ।]

परि॑ द्यु॒क्षः स॒नद्र॑यि॒र्भर॒द्वाजं॑ नो॒ अन्ध॑सा । सु॒वा॒नो अ॑र्ष प॒वित्र॒ आ ॥ १ ॥

परि॑ । द्यु॒क्षः । स॒नत्ऽर॑यिः । भर॑त् । वाज॑म् । न॒: । अन्ध॑सा । सु॒वा॒नः । अ॒र्ष॒: । प॒वित्रे॑ । आ ॥ १ ॥

तव॑ प्र॒त्नेभि॒रध्व॑भि॒रव्यो॒ वारे॒ परि॑ प्रि॒यः । स॒हस्र॑धारो या॒त्तना॑ ॥ २ ॥

तव॑ । प्र॒त्नेभि॑: । अध्व॑ऽभिः । अव्यः॑ । वारे॑ । परि॑ । प्रि॒यः । स॒हस्र॑ऽधारः । या॒त् । तना॑ ॥ २ ॥

च॒रुर्न यस्तमी॑ङ्ख॒येन्दो॒ न दान॑मीङ्ख॒य । व॒धैर्व॑धस्नवीङ्ख॒य ॥ ३ ॥

च॒रुः । न । यः । तम् । ई॒ङ्ख॒य॒ । इन्दो॒ इति॑ । न । दान॑म् । ई॒ङ्ख॒य॒ । व॒धैः । व॒ध॒स्नो॒ इति॑ वधऽस्नो । ई॒ङ्ख॒य॒ ॥ ३ ॥

नि शुष्म॑मिन्दवेषां॒ पुरु॑हूत॒ जना॑नाम् । यो अ॒स्माँ आ॒दिदे॑शति ॥ ४ ॥

नि । शुष्म॑म् । इ॒न्दो॒ इति॑ । ए॒षा॒म् । पुरु॑ऽहूत । जना॑नाम् । यः । अ॒स्मान् । आ॒ऽदिदे॑शति ॥ ४ ॥

श॒तं न॑ इन्द ऊ॒तिभि॑: स॒हस्रं॑ वा॒ शुची॑नाम् । पव॑स्व मंह॒यद्र॑यिः ॥ ५ ॥ [९]

श॒तम् । न॒: । इ॒न्दो॒ इति॑ । ऊ॒तिऽभि॑: । स॒हस्र॑म् । वा॒ । शुची॑नाम् । पव॑स्व । मं॒ह॒यत्ऽर॑यिः ॥ ५ ॥

[५३] [४ अवत्सारः काश्यपः । पवमानः सोमः । गायत्री ।]

उत्ते॒ शुष्मा॑सो अस्थू॒ रक्षो॑ भि॒न्दन्तो॑ अद्रिवः । नु॒दस्व॒ याः प॑रि॒स्पृध॑: ॥ १ ॥

उत् । ते॒ । शुष्मा॑सः । अ॒स्थुः॒ । रक्ष॑: । भि॒न्दन्त॑: । अ॒द्रि॒ऽव॒: । नु॒दस्व॑ । याः । प॒रि॒ऽस्पृध॑: ॥ १ ॥

अ॒या नि॑ज॒घ्निरोज॑सा रथसङ्गे॒ धने॑ हि॒ते । स्तवा॒ अबि॑भ्युषा हृ॒दा ॥ २ ॥

अ॒या । नि॒ऽज॒घ्निः । ओज॑सा । र॒थ॒ऽस॒ङ्गे । धने॑ । हि॒ते । स्तवै॑ । अबि॑भ्युषा । हृ॒दा ॥ २ ॥

अस्य॑ व्र॒ताति॒ नाधृषे॒ पव॑मानस्य दू॒ढ्या॑ । रु॒ज यस्त्वा॑ पृत॒न्यति॑ ॥ ३ ॥

अस्य॑ । व्र॒तानि॑ । न । आ॒ऽधृषे॑ । पव॑मानस्य । दु॒ःऽध्या॑ । रु॒ज । यः । त्वा॒ । पृ॒त॒न्यति॑ ॥ ३ ॥

तं हि॑न्वन्ति मद॒च्युतं॒ हरिं॑ न॒दीषु॑ वा॒जिन॑म् । इन्दु॑मिन्द्रा॑य मत्स॒रम् ॥ ४ ॥ [१०]

तम् । हि॒न्व॒न्ति॒ । म॒द॒ऽच्युत॑म् । हरि॑म् । न॒दीषु॑ । वा॒जिन॑म् । इन्दु॑म् । इन्द्रा॑य । म॒त्स॒रम् ॥ ४ ॥

[५४] [४ अवत्सारः काश्यपः । पवमानः सोमः । गायत्री ।]

अ॒स्य प्र॒त्नामनु॒ द्युतं॑ शु॒क्रं दु॑दुह्रे॒ अह्र॑यः । पय॑: सहस्र॒सामृषि॑म् ॥ १ ॥

अ॒स्य । प्र॒त्नाम् । अनु॑ । द्युत॑म् । शु॒क्रम् । दु॒दु॒ह्रे॒ । अह्र॑यः । पय॑: । स॒ह॒स्र॒ऽसाम् । ऋषि॑म् ॥ १ ॥

अ॒यं सूर्य॑इवोप॒दृग॒यं सरां॑सि धावति । स॒प्त प्र॒वत॒ आ दिव॑म् ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयम्। सूर्यःऽइव। उपऽदृक्। अयम्। सरांसि। धावति। सप्त। प्रऽवतः। आ। दिवम्॥ २॥

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः॥ ३॥

अयम्। विश्वानि। तिष्ठति। पुनानः। भुवना। उपरि। सोमः। देवः। न। सूर्यः॥ ३॥

परि णो देववीतये वाजाँ अर्षसि गोमतः। पुनान इन्दविन्द्रयुः॥ ४॥ [११]

परि। नः। देवऽवीतये। वाजान्। अर्षसि। गोऽमतः। पुनानः। इन्दो इति। इन्द्रऽयुः॥ ४॥

[५५] [४ अवत्सारः काश्यपः। पवमानः सोमः। गायत्री।]

यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव। सोम विश्वा च सौभगा॥ १॥

यवम्ऽयवम्। नः। अन्धसा। पुष्टम्ऽपुष्टम्। परि। स्रव। सोम। विश्वा। च। सौभगा॥ १॥

इन्दो यथा तव स्तवो यथा ते जातमन्धसः। नि बर्हिषि प्रिये सदः॥ २॥

इन्दो इति। यथा। तव। स्तवः। यथा। ते। जातम्। अन्धसः। नि। बर्हिषि। प्रिये। सदः॥ २॥

उत नो गोविदश्ववित्पवस्व सोमान्धसा। मक्षूतमेभिरहभिः॥ ३॥

उत। नः। गोऽवित्। अश्वऽवित्। पवस्व। सोम। अन्धसा। मक्षुऽतमेभिः। अहऽभिः॥ ३॥

यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित्॥ ४॥ [१२]

यः। जिनाति। न। जीयते। हन्ति। शत्रुम्। अभिऽइत्य। सः। पवस्व। सहस्रऽजित्॥ ४॥

[५६] [४ अवत्सारः काश्यपः। पवमानः सोमः। गायत्री।]

परि सोम ऋतं बृहदाशुः पवित्रे अर्षति। विघ्नन्रक्षांसि देवयुः॥ १॥

परि। सोमः। ऋतम्। बृहत्। आशुः। पवित्रे। अर्षति। विऽघ्नन्। रक्षांसि। देवऽयुः॥ १॥

यत्सोमो वाजमर्षति शतं धारा अपस्युवः। इन्द्रस्य सख्यमाविशन्॥ २॥

यत्। सोमः। वाजम्। अर्षति। शतम्। धाराः। अपस्युवः। इन्द्रस्य। सख्यम्। आऽविशन्॥ २॥

अभि त्वा योषणो दश जारं न कन्यानूषत। मृज्यसे सोम सातये॥ ३॥

अभि। त्वा। योषणः। दश। जारम्। न। कन्या। अनूषत। मृज्यसे। सोम। सातये॥ ३॥

त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव। नृन्त्स्तोतृन्पाह्यंहसः॥ ४॥ [१३]

त्वम्। इन्द्राय। विष्णवे। स्वादुः। इन्दो इति। परि। स्रव। नृन्। स्तोतृन्। पाहि। अंहसः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[५७] [४ अवत्सारः काश्यपः। पवमानः सोमः। गायत्री।]

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः। अच्छा वाजं सहस्रिणम्॥ १॥

प्र। ते। धाराः। असश्चतः। दिवः। न। यन्ति। वृष्टयः। अच्छ। वाजम्। सहस्रिणम्॥ १॥

अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति। हरिस्तुञ्जान आयुधा॥ २॥

अभि। प्रियाणि। काव्या। विश्वा। चक्षाणः। अर्षति। हरिः। तुञ्जानः। आयुधा॥ २॥

स मर्मृजान आयुभिरिभो राजेव सुव्रतः। श्येनो न वंसु षीदति॥ ३॥

सः। मर्मृजानः। आयुऽभिः। इभः। राजाऽइव। सुऽव्रतः। श्येनः। न। वंसु। सीदति॥ ३॥

स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर॥ ४॥ [१४]

सः। नः। विश्वा। दिवः। वसु। उतो इति। पृथिव्याः। अधि। पुनानः। इन्दो इति। आ। भर॥ ४॥

[५८] [४ अवत्सारः काश्यपः। पवमानः सोमः। गायत्री।]

तरत्स मन्दी धावति धारा सुतस्यान्धसः। तरत्स मन्दी धावति॥ १॥

तरत्। सः। मन्दी। धावति। धारा। सुतस्य। अन्धसः। तरत्। सः। मन्दी। धावति॥ १॥

उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मन्दी धावति॥ २॥

उस्रा। वेद। वसूनाम्। मर्तस्य। देवी। अवसः। तरत्। सः। मन्दी। धावति॥ २॥

ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्स मन्दी धावति॥ ३॥

ध्वस्रयोः। पुरुऽसन्त्योः। आ। सहस्राणि। दद्महे। तरत्। सः। मन्दी। धावति॥ ३॥

आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्स मन्दी धावति॥ ४॥ [१५]

आ। ययोः। त्रिंशतम्। तना। सहस्राणि। च। दद्महे। तरत्। सः। मन्दी। धावति॥ ४॥

[५९] [४ अवत्सारः काश्यपः। पवमानः सोमः। गायत्री।]

पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित्। प्रजावद्रत्नमा भर॥ १॥

पवस्व। गोऽजित्। अश्वऽजित्। विश्वऽजित्। सोम। रण्यऽजित्। प्रजाऽवत्। रत्नम्। आ। भर॥ १॥

पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः। पवस्व धिषणाभ्यः॥ २॥

पवस्व। अत्ऽभ्यः। अदाभ्यः। पवस्व। ओषधीभ्यः। पवस्व। धिषणाभ्यः॥ २॥

त्वं सोम पवमानो विश्वानि दुरिता तर। कविः सीद नि बर्हिषि॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। सोम। पवमानः। विश्वानि। दुःऽइता। तर। कविः। सीद। नि। बर्हिषि॥ ३॥

पवमान स्वर्विदो जायमानोऽभवो महान्। इन्दो विश्वाँ अभीदसि॥ ४॥ [१६]

पवमान। स्वः। विदः। जायमानः। अभवः। महान्। इन्दो इति। विश्वान्। अभि। इत्। असि॥ ४॥

[६०] [४ अवत्सारः काश्यपः। पवमानः सोमः। गायत्री, ३ पुरउष्णिक्।]

प्र गायत्रेण गायत पवमानं विचर्षणिम्। इन्दुं सहस्रचक्षसम्॥ १॥

प्र। गायत्रेण। गायत। पवमानम्। विऽचर्षणिम्। इन्दुम्। सहस्रऽचक्षसम्॥ १॥

तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम्। अति वारमपाविषुः॥ २॥

तम्। त्वा। सहस्रऽचक्षसम्। अथो इति। सहस्रऽभर्णसम्। अति। वारम्। अपाविषुः॥ २॥

अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति। इन्द्रस्य हार्द्याविशन्॥ ३॥

अति। वारान्। पवमानः। असिस्यदत्। कलशान्। अभि। धावति। इन्द्रस्य। हार्दि। आऽविशन्॥ ३॥

इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे। प्रजावद्रेत आ भर॥ ४॥ [१७] {२}

इन्द्रस्य। सोम। राधसे। शम्। पवस्व। विऽचर्षणे। प्रजाऽवत्। रेतः। आ। भर॥ ४॥

[६१] [३० अमहीयुराङ्गिरसः। पवमानः सोमः। गायत्री।]

अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव॥ १॥

अया। वीती। परि। स्रव। यः। ते। इन्दो इति। मदेषु। आ। अवऽअहन्। नवतीः। नव॥ १॥

पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम्। अध त्यं तुर्वशं यदुम्॥ २॥

पुरः। सद्यः। इत्थाऽधिये। दिवःऽदासाय। शम्बरम्। अध। त्यम्। तुर्वशम्। यदुम्॥ २॥

परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः॥ ३॥

परि। नः। अश्वम्। अश्वऽवित्। गोऽमत्। इन्दो इति। हिरण्यऽवत्। क्षर। सहस्रिणीः। इषः॥ ३॥

पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे॥ ४॥

पवमानस्य। ते। वयम्। पवित्रम्। अभिऽउन्दतः। सखिऽत्वम्। आ। वृणीमहे॥ ४॥

ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृळय॥ ५॥ [१८]

ये। ते। पवित्रम्। ऊर्मयः। अभिऽक्षरन्ति। धारया। तेभिः। नः। सोम। मृळय॥ ५॥

स नः पुनान आ भर रयिं वीरवतीमिषम्। ईशानः सोम विश्वतः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। नः। पुनानः। आ। भर। रयिम्। वीरऽवतीम्। इषम्। ईशानः। सोम। विश्वतः॥ ६॥

एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत॥ ७॥

एतम्। ऊँ इति। त्यम्। दश। क्षिपः। मृजन्ति। सिन्धुऽमातरम्। सम्। आदित्येभिः। अख्यत॥ ७॥

समिन्द्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभिः॥ ८॥

सम्। इन्द्रेण। उत। वायुना। सुतः। एति। पवित्रे। आ। सम्। सूर्यस्य। रश्मिऽभिः॥ ८॥

स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च॥ ९॥

सः। नः। भगाय। वायवे। पूष्णे। पवस्व। मधुऽमान्। चारुः। मित्रे। वरुणे। च॥ ९॥

उच्चा ते जातमन्धसो दिवि षद्भूम्या ददे। उग्रं शर्म महि श्रवः॥ १०॥ [१९]

उच्चा। ते। जातम्। अन्धसः। दिवि। सत्। भूमिः। आ। ददे। उग्रम्। शर्म। महि। श्रवः॥ १०॥

एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे॥ ११॥

एना। विश्वानि। अर्यः। आ। द्युम्नानि। मानुषाणाम्। सिसासन्तः। वनामहे॥ ११॥

स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव॥ १२॥

सः। नः। इन्द्राय। यज्यवे। वरुणाय। मरुत्ऽभ्यः। वरिवःऽवित्। परि। स्रव॥ १२॥

उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम्। इन्दुं देवा अयासिषुः॥ १३॥

उपो इति। सु। जातम्। अप्ऽतुरम्। गोभिः। भङ्गम्। परिऽकृतम्। इन्दुम्। देवाः। अयासिषुः॥ १३॥

तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव। य इन्द्रस्य हृदंसनिः॥ १४॥

तम्। इत्। वर्धन्तु। नः। गिरः। वत्सम्। संशिश्वरीःऽइव। यः। इन्द्रस्य। हृदम्ऽसनिः॥ १४॥

अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्यम्॥ १५॥ [२०]

अर्ष। नः। सोम। शम्। गवे। धुक्षस्व। पिप्युषीम्। इषम्। वर्ध। समुद्रम्। उक्थ्यम्॥ १५॥

पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्॥ १६॥

पवमानः। अजीजनत्। दिवः। चित्रम्। न। तन्यतुम्। ज्योतिः। वैश्वानरम्। बृहत्॥ १६॥

पवमानस्य ते रसो मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति॥ १७॥

पवमानस्य। ते। रसः। मदः। राजन्। अदुच्छुनः। वि। वारम्। अव्यम्। अर्षति॥ १७॥

पवमान रसस्तव दक्षो वि राजति द्युमान्। ज्योतिर्विश्वं स्वर्दृशे॥ १८॥

पवमान। रसः। तव। दक्षः। वि। राजति। द्युऽमान्। ज्योतिः। विश्वम्। स्वः। दृशे॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

यस्ते॒ मदो॒ वरे॑ण्य॒स्तेना॑ पव॒स्वान्ध॑सा दे॒वा॒वीर॑घशंस॒हा ॥ १९ ॥

यः । ते॒ । मदः॑ । वरे॑ण्यः । तेन॑ । प॒व॒स्व॒ । अन्ध॑सा । दे॒व॒ऽअ॒वीः । अ॒घ॒शं॒स॒ऽहा ॥ १९ ॥

जघ्नि॑र्वृ॒त्रम॑मि॒त्रियं॑ सस्नि॒र्वाजं॑ दि॒वेदि॑वे । गो॒षा उ॑ अश्व॒सा अ॑सि ॥ २० ॥ [२१]

जघ्निः॑ । वृ॒त्रम् । अ॒मि॒त्रिय॑म् । सस्निः॑ । वाज॑म् । दि॒वेऽदि॑वे ।

गो॒ऽसाः । ऊँ इति॑ । अ॒श्व॒ऽसाः । अ॒सि॒ ॥ २० ॥

संमि॑श्लो अरु॒षो भ॑व सूप॒स्थाभि॒र्न धे॒नुभिः॑ । सीद॑ञ्छ्ये॒नो न योनि॒मा ॥ २१ ॥

सम्ऽमि॑श्लः । अ॒रु॒षः । भ॒व॒ । सु॒ऽउ॒प॒स्थाभिः॑ । न । धे॒नु॒ऽभिः॑ । सीद॑न् । श्ये॒नः । न । योनि॑म् । आ ॥ २१ ॥

स प॑वस्व॒ य आवि॒थेन्द्रं॑ वृ॒त्राय॒ हन्त॑वे । व॒व्रि॒वांसं॑ म॒हीर॒पः ॥ २२ ॥

सः । प॒व॒स्व॒ । यः । आवि॑थ । इन्द्र॑म् । वृ॒त्राय॑ । हन्त॑वे । व॒व्रि॒ऽवांस॑म् । म॒हीः । अ॒पः ॥ २२ ॥

सु॒वीरा॑सो व॒यं धना॒ जये॑म सोम मीढ्वः । पु॒ना॒नो व॑र्ध नो॒ गिरः॑ ॥ २३ ॥

सु॒ऽवीरा॑सः । व॒यम् । धना॑ । जये॑म । सो॒म॒ । मी॒ढ्वः॒ । पु॒ना॒नः । व॒र्ध॒ । नः॒ । गिरः॑ ॥ २३ ॥

त्वोता॑स॒स्तवाव॑सा॒ स्याम॑ व॒न्वन्त॑ आ॒मुरः॑ । सोम॑ व्र॒तेषु॑ जागृहि ॥ २४ ॥

त्वाऽऊ॑तासः । तव॑ । अव॑सा । स्याम॑ । व॒न्वन्तः॑ । आ॒ऽमुरः॑ । सोम॑ । व्र॒तेषु॑ । जा॒गृ॒हि॒ ॥ २४ ॥

अ॒प॒घ्नन्प॑वते॒ मृधोऽप॒ सोमो॒ अरा॑व्णः । गच्छ॒न्निन्द्र॑स्य निष्कृ॒तम् ॥ २५ ॥ [२२]

अ॒प॒ऽघ्नन् । प॒व॒ते॒ । मृधः॑ । अप॑ । सोमः॑ । अरा॑व्णः । गच्छ॑न् । इन्द्र॑स्य । निः॒ऽकृ॒तम् ॥ २५ ॥

म॒हो नो॑ रा॒य आ भ॑र॒ पव॑मान ज॒ही मृधः॑ । रास्वे॑न्दो वी॒रव॒द्यशः॑ ॥ २६ ॥

म॒हः । नः॒ । रा॒यः । आ । भ॒र॒ । पव॑मान । ज॒हि । मृधः॑ । रास्व॑ । इ॒न्दो॒ इति॑ । वी॒रऽव॑त् । यशः॑ ॥ २६ ॥

न त्वा॑ श॒तं च॒न ह्रुतो॒ राधो॒ दित्स॑न्त॒मा मि॑नन् । यत्पु॑ना॒नो म॑ख॒स्यसे॑ ॥ २७ ॥

न । त्वा॒ । श॒तम् । च॒न । ह्रुतः॑ । राधः॑ । दित्स॑न्तम् । आ । मि॒न॒न् । यत् । पु॒ना॒नः । म॒ख॒स्यसे॑ ॥ २७ ॥

पव॑स्वेन्दो॒ वृषा॑ सु॒तः कृ॒धी नो॑ य॒शसो॒ जने॑ । विश्वा॒ अप॒ द्विषो॑ जहि ॥ २८ ॥

पव॑स्व । इ॒न्दो॒ इति॑ । वृषा॑ । सु॒तः । कृ॒धि । नः॒ । य॒शसः॑ । जने॑ । विश्वाः॑ । अप॑ । द्विषः॑ । ज॒हि॒ ॥ २८ ॥

अ॒स्य॑ ते स॒ख्ये व॒यं तवे॑न्दो द्यु॒म्न उ॑त्त॒मे । सा॒स॒ह्याम॑ पृतन्य॒तः ॥ २९ ॥

अ॒स्य॑ । ते॒ । स॒ख्ये । व॒यम् । तव॑ । इ॒न्दो॒ इति॑ । द्यु॒म्ने । उ॒त्ऽत॒मे । स॒स॒ह्याम॑ । पृ॒त॒न्य॒तः ॥ २९ ॥

या ते॑ भी॒मान्यायु॑धा ति॒ग्मानि॒ सन्ति॒ धूर्व॑णे । रक्षा॑ समस्य नो नि॒दः ॥ ३० ॥ [२३]

या । ते॒ । भी॒मानि॑ । आयु॑धा । ति॒ग्मानि॑ । सन्ति॑ । धूर्व॑णे । रक्ष॑ । स॒म॒स्य॒ । नः॒ । नि॒दः ॥ ३० ॥

Digitized by Madhuban Trust
CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६२] [३० जमदग्निर्भार्गवः। पवमानः सोमः। गायत्री।]

एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा॥ १॥

एते। असृग्रम्। इन्दवः। तिरः। पवित्रम्। आशवः। विश्वानि। अभि। सौभगा॥ १॥

विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। तना कृण्वन्तो अर्वते॥ २॥

विघ्नन्तः। दुःऽइता। पुरु। सुऽगा। तोकाय। वाजिनः। तना। कृण्वन्तः। अर्वते॥ २॥

कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इळामस्मभ्यं संयतम्॥ ३॥

कृण्वन्तः। वरिवः। गवे। अभि। अर्षन्ति। सुऽस्तुतिम्। इळाम्। अस्मभ्यम्। सम्ऽयतम्॥ ३॥

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत्॥ ४॥

असावि। अंशुः। मदाय। अप्ऽसु। दक्षः। गिरिऽस्थाः। श्येनः। न। योनिम्। आ। असदत्॥ ४॥

शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः। स्वदन्ति गावः पयोभिः॥ ५॥ [२४]

शुभ्रम्। अन्धः। देवऽवातम्। अप्ऽसु। धूतः। नृऽभिः। सुतः। स्वदन्ति। गावः। पयःऽभिः॥ ५॥

आदीमश्वं न हेतारोऽशूशुभन्नमृताय। मध्वो रसं सधमादे॥ ६॥

आत्। ईम्। अश्वम्। न। हेतारः। अशूशुभन्। अमृताय। मध्वः। रसम्। सधऽमादे॥ ६॥

यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः॥ ७॥

याः। ते। धाराः। मधुऽश्चुतः। असृग्रम्। इन्दो इति। ऊतये। ताभिः। पवित्रम्। आ। असदः॥ ७॥

सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया। सीदन् योना वनेष्वा॥ ८॥

सः। अर्ष। इन्द्राय। पीतये। तिरः। रोमाणि। अव्यया। सीदन्। योना। वनेषु। आ॥ ८॥

त्वमिन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः। वरिवोविद्घृतं पयः॥ ९॥

त्वम्। इन्दो इति। परि। स्रव। स्वादिष्ठः। अङ्गिरःऽभ्यः। वरिवःऽवित्। घृतम्। पयः॥ ९॥

अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत्॥ १०॥ [२५]

अयम्। विऽचर्षणिः। हितः। पवमानः। सः। चेतति। हिन्वानः। आप्यम्। बृहत्॥ १०॥

एष वृषा वृषव्रतः पवमानो अशस्तिहा। करद्वसूनि दाशुषे॥ ११॥

एषः। वृषा। वृषऽव्रतः। पवमानः। अशस्तिऽहा। करत्। वसूनि। दाशुषे॥ ११॥

आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम्। पुरुश्चन्द्रं पुरुस्पृहम्॥ १२॥

आ। पवस्व। सहस्रिणम्। रयिम्। गोऽमन्तम्। अश्विनम्। पुरुऽचन्द्रम्। पुरुऽस्पृहम्॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष स्य परि षिच्यते मर्मृज्यमान आयुभिः। उरुगायः कविक्रतुः ॥ १३ ॥

एषः। स्यः। परि। सिच्यते। मर्मृज्यमानः। आयुऽभिः। उरुऽगायः। कविऽक्रतुः ॥ १३ ॥

सहस्रोतिः शतमघो विमानो रजसः कविः। इन्द्राय पवते मदः ॥ १४ ॥

सहस्रऽऊतिः। शतऽमघः। विऽमानः। रजसः। कविः। इन्द्राय। पवते। मदः ॥ १४ ॥

गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते। विर्योना वसताविव ॥ १५ ॥ [२६]

गिरा। जातः। इह। स्तुतः। इन्दुः। इन्द्राय। धीयते। विः। योना। वसतौऽइव ॥ १५ ॥

पवमानः सुतो नृभिः सोमो वाजमिवासरत्। चमूषु शक्मनासदम् ॥ १६ ॥

पवमानः। सुतः। नृऽभिः। सोमः। वाजम्ऽइव। असरत्। चमूषु। शक्मना। आऽसदम् ॥ १६ ॥

तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे। ऋषीणां सप्त धीतिभिः ॥ १७ ॥

तम्। त्रिऽपृष्ठे। त्रिऽवन्धुरे। रथे। युञ्जन्ति। यातवे। ऋषीणाम्। सप्त। धीतिऽभिः ॥ १७ ॥

तं सोतारो धनस्पृतमाशुं वाजाय यातवे। हरिं हिनोत वाजिनम् ॥ १८ ॥

तम्। सोतारः। धनऽस्पृतम्। आशुम्। वाजाय। यातवे। हरिम्। हिनोत। वाजिनम् ॥ १८ ॥

आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति ॥ १९ ॥

आऽविशन्। कलशम्। सुतः। विश्वाः। अर्षन्। अभि। श्रियः। शूरः। न। गोषु। तिष्ठति ॥ १९ ॥

आ त इन्दो मदाय कं पयो दुहन्त्यायवः। देवा देवेभ्यो मधु ॥ २० ॥ [२७]

आ। ते। इन्दो इति। मदाय। कम्। पयः। दुहन्ति। आयवः। देवाः। देवेभ्यः। मधु ॥ २० ॥

आ नः सोमं पवित्र आ सृजता मधुमत्तमम्। देवेभ्यो देवश्रुत्तमम् ॥ २१ ॥

आ। नः। सोमम्। पवित्रे। आ। सृजत। मधुमत्ऽतमम्। देवेभ्यः। देवश्रुत्ऽतमम् ॥ २१ ॥

एते सोमा असृक्षत गृणानाः श्रवसे महे। मदिन्तमस्य धारया ॥ २२ ॥

एते। सोमाः। असृक्षत। गृणानाः। श्रवसे। महे। मदिन्ऽतमस्य। धारया ॥ २२ ॥

अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सनद्वाजः परि स्रव ॥ २३ ॥

अभि। गव्यानि। वीतये। नृम्णा। पुनानः। अर्षसि। सनत्ऽवाजः। परि। स्रव ॥ २३ ॥

उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना ॥ २४ ॥

उत। नः। गोऽमतीः। इषः। विश्वाः। अर्ष। परिऽस्तुभः। गृणानः। जमत्ऽअग्निना ॥ २४ ॥

पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या ॥ २५ ॥ [२८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवस्व । वाचः । अग्रियः । सोम । चित्राभिः । ऊतिऽभिः । अभि । विश्वानि । काव्या ॥ २५ ॥

त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् । पवस्व विश्वमेजय ॥ २६ ॥

त्वम् । समुद्रियाः । अपः । अग्रियः । वाचः । ईरयन् । पवस्व । विश्वम्ऽएजय ॥ २६ ॥

तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्यमर्षन्ति सिन्धवः ॥ २७ ॥

तुभ्य । इमा । भुवना । कवे । महिम्ने । सोम । तस्थिरे । तुभ्यम् । अर्षन्ति । सिन्धवः ॥ २७ ॥

प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः । अभि शुक्रामुपस्तिरम् ॥ २८ ॥

प्र । ते । दिवः । न । वृष्टयः । धाराः । यन्ति । असश्चतः । अभि । शुक्राम् । उपऽस्तिरम् ॥ २८ ॥

इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम् । ईशानं वीतिराधसम् ॥ २९ ॥

इन्द्राय । इन्दुम् । पुनीतन । उग्रम् । दक्षाय । साधनम् । ईशानम् । वीतिऽराधसम् ॥ २९ ॥

पवमान ऋतः कविः सोमः पवित्रमासदत् । दधत्स्तोत्रे सुवीर्यम् ॥ ३० ॥ [२९]

पवमानः । ऋतः । कविः । सोमः । पवित्रम् । आ । असदत् । दधत् । स्तोत्रे । सुऽवीर्यम् ॥ ३० ॥

[६३] [३० निध्रुविः काश्यपः । पवमानः सोमः । गायत्री ।]

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् । अस्मे श्रवांसि धारय ॥ १ ॥

आ । पवस्व । सहस्रिणम् । रयिम् । सोम । सुऽवीर्यम् । अस्मे इति । श्रवांसि । धारय ॥ १ ॥

इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः । चमूष्वा नि षीदसि ॥ २ ॥

इषम् । ऊर्जम् । च । पिन्वसे । इन्द्राय । मत्सरिन्ऽतमः । चमूषु । आ । नि । सीदसि ॥ २ ॥

सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् । मधुमाँ अस्तु वायवे ॥ ३ ॥

सुतः । इन्द्राय । विष्णवे । सोमः । कलशे । अक्षरत् । मधुऽमान् । अस्तु । वायवे ॥ ३ ॥

एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः । सोमा ऋतस्य धारया ॥ ४ ॥

एते । असृग्रम् । आशवः । अति । ह्वरांसि । बभ्रवः । सोमाः । ऋतस्य । धारया ॥ ४ ॥

इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम् । अपघ्नन्तो अराव्णः ॥ ५ ॥ [३०]

इन्द्रम् । वर्धन्तः । अप्ऽतुरः । कृण्वन्तः । विश्वम् । आर्यम् । अपऽघ्नन्तः । अराव्णः ॥ ५ ॥

सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः । इन्द्रं गच्छन्त इन्दवः ॥ ६ ॥

सुताः । अनु । स्वम् । आ । रजः । अभि । अर्षन्ति । बभ्रवः । इन्द्रम् । गच्छन्तः । इन्दवः ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः॥ ७॥

अया। पवस्व। धारया। यया। सूर्यम्। अरोचयः। हिन्वानः। मानुषीः। अपः॥ ७॥

अयुक्त सूर एतशं पवमान मनावधि। अन्तरिक्षेण यातवे॥ ८॥

अयुक्त। सूरः। एतशम्। पवमानः। मनौ। अधि। अन्तरिक्षेण। यातवे॥ ८॥

उत त्या हरितो दश सूरो अयुक्त यातवे। इन्दुरिन्द्र इति ब्रुवन्॥ ९॥

उत। त्याः। हरितः। दश। सूरः। अयुक्त। यातवे। इन्दुः। इन्द्रः। इति। ब्रुवन्॥ ९॥

परीतो वायवे सुतं गिर इन्द्राय मत्सरम्। अव्यो वारेषु सिञ्चत॥ १०॥ [३१]

परि। इतः। वायवे। सुतम्। गिरः। इन्द्राय। मत्सरम्। अव्यः। वारेषु। सिञ्चत॥ १०॥

पवमान विदा रयिमस्मभ्यं सोम दुष्टरम्। यो दूणाशो वनुष्यता॥ ११॥

पवमान। विदाः। रयिम्। अस्मभ्यम्। सोम। दुस्तरम्। यः। दुःऽनशः। वनुष्यता॥ ११॥

अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम्। अभि वाजमुत श्रवः॥ १२॥

अभि। अर्ष। सहस्रिणम्। रयिम्। गोऽमन्तम्। अश्विनम्। अभि। वाजम्। उत। श्रवः॥ १२॥

सोमो देवो न सूर्योऽद्रिभिः पवते सुतः। दधानः कलशे रसम्॥ १३॥

सोमः। देवः। न। सूर्यः। अद्रिऽभिः। पवते। सुतः। दधानः। कलशे। रसम्॥ १३॥

एते धामान्यार्या शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन्॥ १४॥

एते। धामानि। आर्या। शुक्राः। ऋतस्य। धारया। वाजम्। गोऽमन्तम्। अक्षरन्॥ १४॥

सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः। पवित्रमत्यक्षरन्॥ १५॥ [३२]

सुताः। इन्द्राय। वज्रिणे। सोमासः। दधिऽआशिरः। पवित्रम्। अति। अक्षरन्॥ १५॥

प्र सोम मधुमत्तमो राये अर्ष पवित्र आ। मदो यो देववीतमः॥ १६॥

प्र। सोम। मधुमत्ऽतमः। राये। अर्ष। पवित्रे। आ। मदः। यः। देवऽवीतमः॥ १६॥

तमीं मृजन्त्यायवो हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम्॥ १७॥

तम्। ईमिति। मृजन्ति। आयवः। हरिम्। नदीषु। वाजिनम्। इन्दुम्। इन्द्राय। मत्सरम्॥ १७॥

आ पवस्व हिरण्यवदश्वावत्सोम वीरवत्। वाजं गोमन्तमा भर॥ १८॥

आ। पवस्व। हिरण्यऽवत्। अश्वऽवत्। सोम। वीरऽवत्। वाजम्। गोऽमन्तम्। आ। भर॥ १८॥

परि वाजे न वाजयुमव्यो वारेषु सिञ्चत। इन्द्राय मधुमत्तमम्॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि । वाजे । न । वाज॒ऽयुम् । अव्यः । वारेषु । सि॒ञ्च॒त॒ । इन्द्राय । मधुमत्ऽतमम् ॥ १९ ॥

क॒विं मृ॑जन्ति॒ मर्ज्यं॑ धी॒भिर्विप्रा॑ अव॒स्यवः॑ । वृषा॒ कनि॑क्रदर्षति ॥ २० ॥ [३३]

क॒विम् । मृ॒ज॒न्ति॒ । मर्ज्य॑म् । धी॒भिः । विप्राः॑ । अ॒व॒स्यवः॑ । वृषा॑ । कनि॑क्रत् । अ॒र्ष॒ति॒ ॥ २० ॥

वृष॑णं धी॒भिर॒प्तुरं॒ सोम॑मृ॒तस्य॒ धार॑या । म॒ती विप्रा॒ः सम॑स्वरन् ॥ २१ ॥

वृष॑णम् । धी॒भिः । अ॒प्ऽतुर॑म् । सोम॑म् । ऋ॒तस्य॑ । धार॑या । म॒ती । विप्राः॑ । सम् । अ॒स्व॒र॒न् ॥ २१ ॥

पव॑स्व देवायु॒षगिन्द्रं॑ गच्छतु ते॒ मदः॑ । वा॒युमा रो॑ह॒ धर्म॑णा ॥ २२ ॥

पव॑स्व । दे॒व॒ । आ॒यु॒षक् । इन्द्र॑म् । ग॒च्छ॒तु॒ । ते॒ । मदः॑ । वा॒युम् । आ । रो॒ह॒ । धर्म॑णा ॥ २२ ॥

पव॑मान॒ नि तो॑शसे र॒यिं सो॑म श्र॒वाय्य॑म् । प्रि॒यः स॑मु॒द्रमा वि॑श ॥ २३ ॥

पव॑मान । नि । तो॒श॒से॒ । र॒यिम् । सो॒म॒ । श्र॒वाय्य॑म् । प्रि॒यः । स॒मु॒द्रम् । आ । वि॒श॒ ॥ २३ ॥

अ॒प॒घ्नन्प॑वसे॒ मृधः॑ क्रतु॒वित्सो॑म मत्स॒रः । नु॒दस्वादे॑वयुं॒ जन॑म् ॥ २४ ॥

अ॒प॒ऽघ्नन् । प॒व॒से॒ । मृधः॑ । क्र॒तु॒ऽवित् । सो॒म॒ । म॒त्स॒रः । नु॒दस्व॑ । अदे॑वऽयुम् । जन॑म् ॥ २४ ॥

पव॑माना असृक्षत॒ सोमाः॑ शु॒क्रास॒ इन्द॑वः । अ॒भि विश्वा॑नि॒ काव्या॑ ॥ २५ ॥ [३४]

पव॑मानाः । अ॒सृ॒क्ष॒त॒ । सोमाः॑ । शु॒क्रासः॑ । इन्द॑वः । अ॒भि । विश्वा॑नि । काव्या॑ ॥ २५ ॥

पव॑मानास आ॒शवः॑ शु॒भ्रा अ॑सृग्र॒मिन्द॑वः । घ्नन्तो॒ विश्वा॒ अप॒ द्विषः॑ ॥ २६ ॥

पव॑मानासः । आ॒शवः॑ । शु॒भ्राः । अ॒सृ॒ग्र॒म् । इन्द॑वः । घ्नन्तः॑ । विश्वाः॑ । अप॑ । द्विषः॑ ॥ २६ ॥

पव॑माना दि॒वस्पर्य॒न्तरि॑क्षादसृक्षत । पृ॒थि॒व्या अधि॒ सान॑वि ॥ २७ ॥

पव॑मानाः । दि॒वः । परि॑ । अ॒न्तरि॑क्षात् । अ॒सृ॒क्ष॒त॒ । पृ॒थि॒व्याः । अधि॑ । सान॑वि ॥ २७ ॥

पु॒ना॒नः सो॑म॒ धार॒येन्दो॒ विश्वा॒ अप॒ स्रिधः॑ । ज॒हि रक्षां॑सि सुक्रतो ॥ २८ ॥

पु॒ना॒नः । सो॒म॒ । धार॑या । इन्दो॒ इति॑ । विश्वाः॑ । अप॑ । स्रिधः॑ ।

ज॒हि । रक्षां॑सि । सु॒क्र॒तो॒ इति॑ सुऽक्रतो ॥ २८ ॥

अ॒प॒घ्नन्त्सो॑म र॒क्षसो॒ऽभ्य॑र्ष॒ कनि॑क्रदत् । द्यु॒मन्तं॒ शुष्म॑मुत्त॒मम् ॥ २९ ॥

अ॒प॒ऽघ्नन् । सो॒म॒ । र॒क्षसः॑ । अ॒भि । अ॒र्ष॒ । कनि॑क्रदत् । द्यु॒ऽमन्त॑म् । शुष्म॑म् । उ॒त्ऽत॒मम् ॥ २९ ॥

अ॒स्मे वसू॑नि धारय॒ सोम॑ दि॒व्यानि॒ पार्थि॑वा । इन्दो॒ विश्वा॑नि॒ वार्या॑ ॥ ३० ॥ [३५]

अ॒स्मे इति॑ । वसू॑नि । धा॒र॒य॒ । सोम॑ । दि॒व्यानि॑ । पार्थि॑वा । इन्दो॒ इति॑ । विश्वा॑नि । वार्या॑ ॥ ३० ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६४] [३० कश्यपो मारीचः। पवमानः सोमः। गायत्री।]

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे॥ १॥

वृषा। सोम। द्युऽमान्। असि। वृषा। देव। वृषऽव्रतः। वृषा। धर्माणि। दधिषे॥ १॥

वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः। सत्यं वृषन्वृषेदसि॥ २॥

वृष्णः। ते। वृष्ण्यम्। शवः। वृषा। वनम्। वृषा। मदः। सत्यम्। वृषन्। वृषा। इत्। असि॥ २॥

अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः। वि नो राये दुरो वृधि॥ ३॥

अश्वः। न। चक्रदः। वृषा। सम्। गाः। इन्दो इति। सम्। अर्वतः। वि। नः। राये। दुरः। वृधि॥ ३॥

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः॥ ४॥

असृक्षत। प्र। वाजिनः। गव्या। सोमासः। अश्वऽया। शुक्रासः। वीरऽया। आशवः॥ ४॥

शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये॥ ५॥ [३६]

शुम्भमानाः। ऋतयुऽभिः। मृज्यमानाः। गभस्त्योः। पवन्ते। वारे। अव्यये॥ ५॥

ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या॥ ६॥

ते। विश्वा। दाशुषे। वसु। सोमाः। दिव्यानि। पार्थिवा। पवन्ताम्। आ। अन्तरिक्ष्या॥ ६॥

पवमानस्य विश्वविित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः॥ ७॥

पवमानस्य। विश्वऽवित्। प्र। ते। सर्गाः। असृक्षत। सूर्यस्यऽइव। न। रश्मयः॥ ७॥

केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे॥ ८॥

केतुम्। कृण्वन्। दिवः। परि। विश्वा। रूपा। अभि। अर्षति। समुद्रः। सोम। पिन्वसे॥ ८॥

हिन्वानो वाचमिष्यसि पवमान विधर्मणि। अक्रान्देवो न सूर्यः॥ ९॥

हिन्वानः। वाचम्। इष्यसि। पवमान। विऽधर्मणि। अक्रान्। देवः। न। सूर्यः॥ ९॥

इन्दुः पविष्ट चेतनः प्रियः कवीनां मती। सृजदश्वं रथीरिव॥ १०॥ [३७]

इन्दुः। पविष्ट। चेतनः। प्रियः। कवीनाम्। मती। सृजत्। अश्वम्। रथीःऽइव॥ १०॥

ऊर्मिर्यस्ते पवित्र आ देववीः पर्यक्षरत्। सीदन्नृतस्य योनिमा॥ ११॥

ऊर्मिः। यः। ते। पवित्रे। आ। देवऽअवीः। परिऽअक्षरत्। सीदन्। ऋतस्य। योनिम्। आ॥ ११॥

स नो अर्ष पवित्र आ मदो यो देववीतमः। इन्दविन्द्राय पीतये॥ १२॥

सः। नः। अर्ष। पवित्रे। आ। मदः। यः। देवऽवीतमः। इन्दो इति। इन्द्राय। पीतये॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि॥ १३॥

इषे। पवस्व। धारया। मृज्यमानः। मनीषिभिः। इन्दो इति। रुचा। अभि। गाः। इहि॥ १३॥

पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरम्॥ १४॥

पुनानः। वरिवः। कृधि। ऊर्जम्। जनाय। गिर्वणः। हरे। सृजानः। आऽशिरम्॥ १४॥

पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्यतः॥ १५॥ [३८]

पुनानः। देवऽवीतये। इन्द्रस्य। याहि। निःऽकृतम्। द्युतानः। वाजिऽभिः। यतः॥ १५॥

प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः। धिया जूता असृक्षत॥ १६॥

प्र। हिन्वानासः। इन्दवः। अच्छ। समुद्रम्। आशवः। धिया। जूताः। असृक्षत॥ १६॥

मर्मृजानास आयवो वृथा समुद्रमिन्दवः। अग्मन्नृतस्य योनिमा॥ १७॥

मर्मृजानासः। आयवः। वृथा। समुद्रम्। इन्दवः। अग्मन्। ऋतस्य। योनिम्। आ॥ १७॥

परि णो याह्यस्मयुर्विश्वा वसून्योजसा। पाहि नः शर्म वीरवत्॥ १८॥

परि। नः। याहि। अस्मऽयुः। विश्वा। वसूनि। ओजसा। पाहि। नः। शर्म। वीरऽवत्॥ १८॥

मिमाति वह्निरेतशः पदं युजान ऋक्वभिः। प्र यत्समुद्र आहितः॥ १९॥

मिमाति। वह्निः। एतशः। पदम्। युजानः। ऋक्वऽभिः। प्र। यत्। समुद्रे। आऽहितः॥ १९॥

आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति। जहात्यप्रचेतसः॥ २०॥ [३९]

आ। यत्। योनिम्। हिरण्ययम्। आशुः। ऋतस्य। सीदति। जहाति। अप्रऽचेतसः॥ २०॥

अभि वेना अनूषतेयक्षन्ति प्रचेतसः। मज्जन्त्यविचेतसः॥ २१॥

अभि। वेनाः। अनूषत। इयक्षन्ति। प्रऽचेतसः। मज्जन्ति। अविऽचेतसः॥ २१॥

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। ऋतस्य योनिमासदम्॥ २२॥

इन्द्राय। इन्दो इति। मरुत्वते। पवस्व। मधुमत्ऽतमः। ऋतस्य। योनिम्। आऽसदम्॥ २२॥

तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः। सं त्वा मृजन्त्यायवः॥ २३॥

तम्। त्वा। विप्राः। वचःऽविदः। परि। कृण्वन्ति। वेधसः। सम्। त्वा। मृजन्ति। आयवः॥ २३॥

रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे। पवमानस्य मरुतः॥ २४॥

रसम्। ते। मित्रः। अर्यमा। पिबन्ति। वरुणः। कवे। पवमानस्य। मरुतः॥ २४॥

त्वं सोम विपश्चितं पुनानो वाचमिष्यसि। इन्दो सहस्रभर्णसम्॥ २५॥ [४०]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम् । सो॒म॒ । वि॒प॒:ऽचित॑म् । पु॒ना॒नः । वाच॑म् । इ॒ष्य॒सि॒ । इन्दो॒ इति॑ । स॒हस्र॑ऽभर्णसम् ॥ २५ ॥

उ॒तो स॒हस्र॑भर्णसं॒ वाचं॑ सोम मख॒स्युव॑म् । पु॒ना॒न इ॑न्द॒वा भ॑र ॥ २६ ॥

उ॒तो इति॑ । स॒हस्र॑ऽभर्णसम् । वाच॑म् । सो॒म॒ । म॒ख॒स्युव॑म् । पु॒ना॒नः । इ॒न्दो॒ इति॑ । आ । भ॒र॒ ॥ २६ ॥

पु॒ना॒न इ॑न्दवे॒षां॒ पु॑रुहू॒त॒ जना॑नाम् । प्रि॒यः स॑मु॒द्रमा वि॑श ॥ २७ ॥

पु॒ना॒नः । इ॒न्दो॒ इति॑ । ए॒षा॒म् । पुरु॑ऽहूत । जना॑नाम् । प्रि॒यः । स॒मु॒द्रम् । आ । वि॒श॒ ॥ २७ ॥

दवि॑द्युतत्या रु॒चा प॑रि॒ष्टोभ॑न्त्या कृ॒पा । सोमा॑: शु॒क्रा गवा॑शिरः ॥ २८ ॥

दवि॑द्युतत्या । रु॒चा । प॒रि॒ऽस्तोभ॑न्त्या । कृ॒पा । सोमा॑: । शु॒क्राः । गोऽआ॑शिरः ॥ २८ ॥

हि॒न्वा॒नो हे॒तृभि॑र्य॒त आ वाजं॑ वा॒ज्य॑क्रमीत् । सीद॑न्तो व॒नुषो॑ यथा ॥ २९ ॥

हि॒न्वा॒नः । हे॒तृऽभि॑: । य॒तः । आ । वाज॑म् । वा॒जी । अ॒क्र॒मी॒त् । सीद॑न्तः । व॒नुष॑: । य॒था॒ ॥ २९ ॥

ऋ॒धक्सो॑म स्व॒स्तये॑ संजग्मा॒नो दि॒वः क॒विः । पव॑स्व॒ सूर्यो॑ दृ॒शे ॥ ३० ॥ [४१]

ऋ॒धक् । सो॒म॒ । स्व॒स्तये॑ । स॒म्ऽज॒ग्मा॒नः । दि॒वः । क॒विः । पव॑स्व । सूर्य॑: । दृ॒शे ॥ ३० ॥

इत्याश्वलायन-संहितायां
सप्तमाष्टके
प्रथमोऽध्यायः
समाप्तः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके द्वितीयोऽध्यायः ॥

[६५] [३० भृगुर्वारुणिर्जमदग्निर्भार्गवो वा। पवमानः सोमः। गायत्री।]

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम्। महामिन्दुं महीयुवः॥ १॥

हिन्वन्ति। सूरम्। उस्रयः। स्वसारः। जामयः। पतिम्। महाम्। इन्दुम्। महीयुवः॥ १॥

पवमान रुचारुचा देवो देवेभ्यस्परि। विश्वा वसून्या विश॥ २॥

पवमान। रुचाऽरुचा। देवः। देवेभ्यः। परि। विश्वा। वसूनि। आ। विश॥ २॥

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम्॥ ३॥

आ। पवमान। सुऽस्तुतिम्। वृष्टिम्। देवेभ्यः। दुवः। इषे। पवस्व। सम्ऽयतम्॥ ३॥

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वाध्यः॥ ४॥

वृषा। हि। असि। भानुना। द्युऽमन्तम्। त्वा। हवामहे। पवमान। सुऽआध्यः॥ ४॥

आ पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि॥ ५॥ [१]

आ। पवस्व। सुऽवीर्यम्। मन्दमानः। सुऽआयुध। इहो इति। सु। इन्दो इति। आ। गहि॥ ५॥

यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः। द्रुणा सधस्थमश्नुषे॥ ६॥

यत्। अत्ऽभिः। परिऽसिच्यसे। मृज्यमानः। गभस्त्योः। द्रुणा। सधऽस्थम्। अश्नुषे॥ ६॥

प्र सोमाय व्यश्ववत्पवमानाय गायत। महे सहस्रचक्षसे॥ ७॥

प्र। सोमाय। व्यश्वऽवत्। पवमानाय। गायत। महे। सहस्रऽचक्षसे॥ ७॥

यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये॥ ८॥

यस्य। वर्णम्। मधुऽश्चुतम्। हरिम्। हिन्वन्ति। अद्रिऽभिः। इन्दुम्। इन्द्राय। पीतये॥ ८॥

तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः। सखित्वमा वृणीमहे॥ ९॥

तस्य। ते। वाजिनः। वयम्। विश्वा। धनानि। जिग्युषः। सखिऽत्वम्। आ। वृणीमहे॥ ९॥

वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा॥ १०॥ [२]

वृषा। पवस्व। धारया। मरुत्वते। च। मत्सरः। विश्वा। दधानः। ओजसा॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं त्वा धर्तारमोण्योः पवमान स्वर्दृशम्। हिन्वे वाजेषु वाजिनम्॥ ११॥

तम्। त्वा। धर्तारम्। ओण्योः। पवमान। स्वः२दृशम्। हिन्वे। वाजेषु। वाजिनम्॥ ११॥

अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय॥ १२॥

अया। चित्तः। विपा। अनया। हरिः। पवस्व। धारया। युजम्। वाजेषु। चोदय॥ १२॥

आ न इन्दो महीमिषं पवस्व विश्वदर्शतः। अस्मभ्यं सोम गातुवित्॥ १३॥

आ। नः। इन्दो इति। महीम्। इषम्। पवस्व। विश्व॰दर्शतः। अस्मभ्यम्। सोम। गातु॰वित्॥ १३॥

आ कलशा अनूषतेन्दो धाराभिरोजसा। एन्द्रस्य पीतये विश॥ १४॥

आ। कलशाः। अनूषत। इन्दो इति। धाराभिः। ओजसा। आ। इन्द्रस्य। पीतये। विश॥ १४॥

यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः। स पवस्वाभिमातिहा॥ १५॥ [३]

यस्य। ते। मद्यम्। रसम्। तीव्रम्। दुहन्ति। अद्रि॰भिः। सः। पवस्व। अभिमाति॰हा॥ १५॥

राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे॥ १६॥

राजा। मेधाभिः। ईयते। पवमानः। मनौ। अधि। अन्तरिक्षेण। यातवे॥ १६॥

आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम्। वहा भगत्तिमूतये॥ १७॥

आ। नः। इन्दो इति। शत॰ग्विनम्। गवाम्। पोषम्। सु॰अश्व्यम्। वह। भगत्तिम्। ऊतये॥ १७॥

आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये॥ १८॥

आ। नः। सोम। सहः। जुवः। रूपम्। न। वर्चसे। भर। सुस्वानः। देव॰वीतये॥ १८॥

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदञ्छ्येनो न योनिमा॥ १९॥

अर्ष। सोम। द्युमत्॰तमः। अभि। द्रोणानि। रोरुवत्। सीदन्। श्येनः। न। योनिम्। आ॥ १९॥

अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे॥ २०॥ [४]

अप्साः। इन्द्राय। वायवे। वरुणाय। मरुत्॰भ्यः। सोमः। अर्षति। विष्णवे॥ २०॥

इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्॥ २१॥

इषम्। तोकाय। नः। दधत्। अस्मभ्यम्। सोम। विश्वतः। आ। पवस्व। सहस्रिणम्॥ २१॥

ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति॥ २२॥

ये। सोमासः। परा॰वति। ये। अर्वा॰वति। सुन्विरे। ये। वा। अदः। शर्यणा॰वति॥ २२॥

य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पञ्चसु॥ २३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ये। आर्जीकेषु। कृत्वंऽसु। ये। मध्ये। पुस्त्यानाम्। ये। वा। जनेषु। पुञ्चऽसु॥ २३॥

ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। सुवाना देवास इन्दवः॥ २४॥

ते। नः। वृष्टिम्। दिवः। परि। पवन्ताम्। आ। सुऽवीर्यम्। सुवानाः। देवासः। इन्दवः॥ २४॥

पवते हर्यतो हरिर्गृणानो जमदग्निना। हिन्वानो गोरधि त्वचि॥ २५॥ [५]

पवते। हर्यतः। हरिः। गृणानः। जमत्ऽअग्निना। हिन्वानः। गोः। अधि। त्वचि॥ २५॥

प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः। श्रीणाना अप्सु मृञ्जत॥ २६॥

प्र। शुक्रासः। वयःऽजुवः। हिन्वानासः। न। सप्तयः। श्रीणानाः। अप्ऽसु। मृञ्जत॥ २६॥

तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये। स पवस्वानया रुचा॥ २७॥

तम्। त्वा। सुतेषु। आऽभुवः। हिन्विरे। देवऽतातये। सः। पवस्व। अनया। रुचा॥ २७॥

आ ते दक्षं मयोभुवं वह्निमद्य वृणीमहे। पान्तमा पुरुस्पृहम्॥ २८॥

आ। ते। दक्षम्। मयःऽभुवम्। वह्निम्। अद्य। वृणीमहे। पान्तम्। आ। पुरुऽस्पृहम्॥ २८॥

आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम्॥ २९॥

आ। मन्द्रम्। आ। वरेण्यम्। आ। विप्रम्। आ। मनीषिणम्। पान्तम्। आ। पुरुऽस्पृहम्॥ २९॥

आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम्॥ ३०॥ [६]

आ। रयिम्। आ। सुऽचेतुनम्। आ। सुक्रतो इति सुऽक्रतो। तनूषु। आ।

पान्तम्। आ। पुरुऽस्पृहम्॥ ३०॥

[६६] [३० शतं वैखानसाः। पवमानः सोमः, १९-२१ अग्निः पवमानः। गायत्री, १८ अनुष्टुप्]

पवस्व विश्वचर्षणेऽभि विश्वानि काव्या। सखा सखिभ्य ईड्यः॥ १॥

पवस्व। विश्वऽचर्षणे। अभि। विश्वानि। काव्या। सखा। सखिऽभ्यः। ईड्यः॥ १॥

ताभ्यां विश्वस्य राजसि ये पवमान धामनी। प्रतीची सोम तस्थतुः॥ २॥

ताभ्याम्। विश्वस्य। राजसि। ये इति। पवमान। धामनी इति। प्रतीची इति। सोम। तस्थतुः॥ २॥

परि धामानि यानि ते त्वं सोमासि विश्वतः। पवमान ऋतुभिः कवे॥ ३॥

परि। धामानि। यानि। ते। त्वम्। सोम। असि। विश्वतः। पवमान। ऋतुऽभिः। कवे॥ ३॥

पवस्व जनयन्निषोऽभि विश्वानि वार्या। सखा सखिभ्य ऊतये॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प॑वस्व । ज॒नय॑न् । इष॑: । अ॒भि । विश्वा॑नि । वार्या॑ । सखा॑ । सखि॑ऽभ्यः । ऊ॒तये॑ ॥ ४ ॥

तव॑ शु॒क्रासो॑ अ॒र्चयो॑ दि॒वस्पृ॒ष्ठे वि त॑न्वते । प॒वित्रं॑ सोम॒ धाम॑भिः ॥ ५ ॥ [७]

तव॑ । शु॒क्रास॑: । अ॒र्चय॑: । दि॒वः । पृ॒ष्ठे । वि । त॒न्व॒ते॒ । प॒वित्र॑म् । सोम॒ । धाम॑ऽभिः ॥ ५ ॥

तवे॒मे स॒प्त सिन्ध॑वः प्र॒शिष॑ं सोम सिस्रते । तुभ्यं॑ धावन्ति धे॒नव॑: ॥ ६ ॥

तव॑ । इ॒मे । स॒प्त । सिन्ध॑वः । प्र॒ऽशिष॑म् । सोम॒ । सि॒स्र॒ते॒ । तुभ्य॑म् । धा॒व॒न्ति॒ । धे॒नव॑: ॥ ६ ॥

प्र सो॑म याहि॒ धार॑या सु॒त इन्द्रा॑य मत्स॒रः । दधा॑नो॒ अक्षि॑ति॒ श्रव॑: ॥ ७ ॥

प्र । सो॒म॒ । या॒हि॒ । धार॑या । सु॒तः । इन्द्रा॑य । म॒त्स॒रः । द॒धान॑: । अक्षि॑ति । श्रव॑: ॥ ७ ॥

समु॑ त्वा धी॒भिर॑स्वरन् हि॒न्व॒तीः स॒प्त जा॒मय॑: । विप्र॑मा॒जा वि॒वस्व॑तः ॥ ८ ॥

सम् । ऊँ इति॑ । त्वा॒ । धी॒भिः । अ॒स्व॒र॒न् । हि॒न्व॒तीः । स॒प्त । जा॒मय॑: । विप्र॑म् । आ॒जा । वि॒वस्व॑तः ॥ ८ ॥

मृ॒जन्ति॑ त्वा॒ सम॒ग्रुवोऽव्ये॑ जी॒रावधि॒ ष्वणि॑ । रे॒भो यद॒ज्यसे॒ वने॑ ॥ ९ ॥

मृ॒जन्ति॑ । त्वा॒ । सम् । अ॒ग्रुव॑: । अव्ये॑ । जी॒रौ । अधि॑ । स्वनि॑ । रे॒भः । यत् । अ॒ज्यसे॑ । वने॑ ॥ ९ ॥

पव॑मानस्य ते कवे॒ वाजि॒न्त्सर्गा॑ असृक्षत । अर्व॑न्तो॒ न श्र॑व॒स्यव॑: ॥ १० ॥ [८]

पव॑मानस्य । ते॒ । क॒वे॒ । वाजि॑न् । सर्गा॑: । अ॒सृ॒क्ष॒त॒ । अर्व॑न्तः । न । श्र॒व॒स्यव॑: ॥ १० ॥

अच्छा॒ कोश॑ं मधु॒श्चुत॒मसृ॑ग्रं॒ वारे॑ अ॒व्यये॑ । अवा॑वशन्त धी॒तय॑: ॥ ११ ॥

अच्छ॑ । कोश॑म् । म॒धु॒ऽश्चुत॑म् । असृ॑ग्रम् । वारे॑ । अ॒व्यये॑ । अवा॑वशन्त । धी॒तय॑: ॥ ११ ॥

अच्छा॑ समु॒द्रमिन्द॒वोऽस्तं॒ गावो॒ न धे॒नव॑: । अग्म॑न्नृ॒तस्य॒ योनि॒मा ॥ १२ ॥

अच्छ॑ । स॒मु॒द्रम् । इन्द॑वः । अस्त॑म् । गाव॑: । न । धे॒नव॑: । अग्म॑न् । ऋ॒तस्य॑ । योनि॑म् । आ ॥ १२ ॥

प्र ण॑ इन्दो म॒हे रण॒ आपो॑ अर्षन्ति॒ सिन्ध॑वः । यद्गोभि॑र्वासयि॒ष्यसे॑ ॥ १३ ॥

प्र । न॒: । इ॒न्दो॒ इति॑ । म॒हे । रणे॑ । आप॑: । अ॒र्ष॒न्ति॒ । सिन्ध॑वः । यत् । गोभि॑: । वा॒स॒यि॒ष्यसे॑ ॥ १३ ॥

अस्य॑ ते स॒ख्ये व॒यमिय॑क्षन्त॒स्त्वोत॑यः । इन्दो॑ सखि॒त्वमु॑श्मसि ॥ १४ ॥

अस्य॑ । ते॒ । स॒ख्ये । व॒यम् । इय॑क्षन्तः । त्वाऽऊ॑तयः । इन्दो॒ इति॑ । स॒खि॒ऽत्वम् । उ॒श्म॒सि॒ ॥ १४ ॥

आ प॑वस्व॒ गवि॑ष्टये म॒हे सो॑म नृ॒चक्ष॑से । एन्द्र॑स्य ज॒ठरे॑ विश ॥ १५ ॥ [९]

आ । प॒व॒स्व॒ । गोऽइ॑ष्टये । म॒हे । सो॒म॒ । नृ॒ऽचक्ष॑से । आ । इन्द्र॑स्य । ज॒ठरे॑ । वि॒श॒ ॥ १५ ॥

म॒हाँ अ॑सि सोम॒ ज्येष्ठ॑ उ॒ग्राणा॑मिन्द॒ ओजि॑ष्ठः । युध्वा॒ सञ्छश्व॑ज्जिगेथ ॥ १६ ॥

म॒हान् । अ॒सि॒ । सो॒म॒ । ज्येष्ठ॑: । उ॒ग्राणा॑म् । इ॒न्दो॒ इति॑ । ओजि॑ष्ठः । युध्वा॑ । सन् । शश्व॑त् । जि॒गे॒थ॒ ॥ १६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः। भूरिदाभ्यश्चिन्मंहीयान्॥ १७॥

यः। उग्रेभ्यः। चित्। ओजीयान्। शूरेभ्यः। चित्। शूरऽतरः। भूरिऽदाभ्यः। चित्। मंहीयान्॥ १७॥

त्वं सोम सूर एषस्तोकस्य साता तनूनाम्। वृणीमहे सख्याय वृणीमहे युज्याय॥ १८॥

त्वम्। सोम। सूरः। आ। इषः। तोकस्य। साता। तनूनाम्।

वृणीमहे। सख्याय। वृणीमहे। युज्याय॥ १८॥

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥ १९॥

अग्ने। आयूंषि। पवसे। आ। सुव। ऊर्जम्। इषम्। च। नः। आरे। बाधस्व। दुच्छुनाम्॥ १९॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्॥ २०॥ [१०]

अग्निः। ऋषिः। पवमानः। पाञ्चऽजन्यः। पुरःऽहितः। तम्। ईमहे। महाऽगयम्॥ २०॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं मयि पोषम्॥ २१॥

अग्ने। पवस्व। सुऽअपाः। अस्मे इति। वर्चः। सुऽवीर्यम्। दधत्। रयिम्। मयि। पोषम्॥ २१॥

पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिम्। सूरो न विश्वदर्शतः॥ २२॥

पवमानः। अति। स्रिधः। अभि। अर्षति। सुऽस्तुतिम्। सूरः। न। विश्वऽदर्शतः॥ २२॥

स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः। इन्दुरत्यो विचक्षणः॥ २३॥

सः। मर्मृजानः। आयुऽभिः। प्रयस्वान्। प्रयसे। हितः। इन्दुः। अत्यः। विऽचक्षणः॥ २३॥

पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत्। कृष्णा तमांसि जङ्घनत्॥ २४॥

पवमानः। ऋतम्। बृहत्। शुक्रम्। ज्योतिः। अजीजनत्। कृष्णा। तमांसि। जङ्घनत्॥ २४॥

पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः॥ २५॥ [११]

पवमानस्य। जङ्घ्नतः। हरेः। चन्द्राः। असृक्षत। जीराः। अजिरऽशोचिषः॥ २५॥

पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः॥ २६॥

पवमानः। रथिऽतमः। शुभ्रेभिः। शुभ्रशःऽतमः। हरिऽचन्द्रः। मरुत्ऽगणः॥ २६॥

पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम्॥ २७॥

पवमानः। वि। अश्नवत्। रश्मिऽभिः। वाजऽसातमः। दधत्। स्तोत्रे। सुऽवीर्यम्॥ २७॥

प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम्। पुनान इन्दुरिन्द्रमा॥ २८॥

प्र। सुवानः। इन्दुः। अक्षारिति। पवित्रम्। अति। अव्ययम्। पुनानः। इन्दुः। इन्द्रम्। आ॥ २८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः। इन्द्रं मदाय जोहुवत्॥ २९॥

एषः। सोमः। अधि। त्वचि। गवाम्। क्रीळति। अद्रिऽभिः। इन्द्रम्। मदाय। जोहुवत्॥ २९॥

यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः। तेन नो मृळ जीवसे॥ ३०॥ [१२]

यस्य। ते। द्युम्नऽवत्। पयः। पवमान। आऽभृतम्। दिवः। तेन। नः। मृळ। जीवसे॥ ३०॥

[६७)][(३२) १-३ भरद्वाजो बार्हस्पत्यः, ४-६ कश्यपो मारीचः, ७-९ गोतमो राहूगणः, १०-१२ अत्रिभौमः, १३-१५ विश्वामित्रो गाथिनः, १६-१८ जमदग्निर्भार्गवः, १९-२१ वसिष्ठो मैत्रावरुणिः, २२-३२ पवित्र आङ्गिरसो वा वसिष्ठो वा उभौ वा। पवमानः सोमः, १०-१२ पवमानः पूषा वा, २३-२७ पवमानोऽग्निः, २५ पवमानः सविता वा, २६ पवमानाग्निसवितारः, २७ विश्वे देवा वा, ३१-३२ पावमान्यध्येता। गायत्री, १६-१८ नित्यद्विपदा गायत्री, ३० पुरउष्णिक्; २७, ३१, ३२, अनुष्टुप्।]

त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः॥ १॥

त्वम्। सोम। असि। धारयुः। मन्द्रः। ओजिष्ठः। अध्वरे। पवस्व। मंहयत्ऽरयिः॥ १॥

त्वं सुतो नृमादनो दधन्वान्मत्सरिन्तमः। इन्द्राय सूरिरन्धसा॥ २॥

त्वम्। सुतः। नृऽमादनः। दधन्वान्। मत्सरिन्ऽतमः। इन्द्राय। सूरिः। अन्धसा॥ २॥

त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम्॥ ३॥

त्वम्। सुस्वानः। अद्रिऽभिः। अभि। अर्ष। कनिक्रदत्। द्युऽमन्तम्। शुष्मम्। उत्ऽतमम्॥ ३॥

इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरिर्वाजमचिक्रदत्॥ ४॥

इन्दुः। हिन्वानः। अर्षति। तिरः। वाराणि। अव्यया। हरिः। वाजम्। अचिक्रदत्॥ ४॥

इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा। वि वाजान्सोम गोमतः॥ ५॥ [१३]

इन्दो इति। वि। अव्यम्। अर्षसि। वि। श्रवांसि। वि। सौभगा। वि। वाजान्। सोम। गोऽमतः॥ ५॥

आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम्। भरा सोम सहस्रिणम्॥ ६॥

आ। नः। इन्दो इति। शतऽग्विनम्। रयिम्। गोऽमन्तम्। अश्विनम्। भर। सोम। सहस्रिणम्॥ ६॥

पवमानास इन्दवस्तिरः पवित्रमाशवः। इन्द्रं यामेभिराशत॥ ७॥

पवमानासः। इन्दवः। तिरः। पवित्रम्। आशवः। इन्द्रम्। यामेभिः। आशत॥ ७॥

ककुहः सोम्यो रस इन्दुरिन्द्राय पूर्व्यः। आयुः पवत आयवे॥ ८॥

ककुहः। सोम्यः। रसः। इन्दुः। इन्द्राय। पूर्व्यः। आयुः। पवते। आयवे॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम्। अभि गिरा समस्वरन्॥ ९॥

हिन्वन्ति। सूरम्। उस्रयः। पवमानम्। मधुऽश्चुतम्। अभि। गिरा। सम्। अस्वरन्॥ ९॥

अविता नो अजाश्वः पूषा यामनियामनि। आ भक्षत्कन्यासु नः॥ १०॥ [१४]

अविता। नः। अजऽअश्वः। पूषा। यामनिऽयामनि। आ। भक्षत्। कन्यासु। नः॥ १०॥

अयं सोमः कपर्दिने घृतं न पवते मधु। आ भक्षत्कन्यासु नः॥ ११॥

अयम्। सोमः। कपर्दिने। घृतम्। न। पवते। मधु। आ। भक्षत्। कन्यासु। नः॥ ११॥

अयं त आघृणे सुतो घृतं न पवते शुचि। आ भक्षत्कन्यासु नः॥ १२॥

अयम्। ते। आघृणे। सुतः। घृतम्। न। पवते। शुचि। आ। भक्षत्। कन्यासु। नः॥ १२॥

वाचो जन्तुः कवीनां पवस्व सोम धारया। देवेषु रत्नधा असि॥ १३॥

वाचः। जन्तुः। कवीनाम्। पवस्व। सोम। धारया। देवेषु। रत्नऽधाः। असि॥ १३॥

आ कलशेषु धावति श्येनो वर्म वि गाहते। अभि द्रोणा कनिक्रदत्॥ १४॥

आ। कलशेषु। धावति। श्येनः। वर्म। वि। गाहते। अभि। द्रोणा। कनिक्रदत्॥ १४॥

परि प्र सोम ते रसोऽसर्जि कलशे सुतः। श्येनो न तक्तो अर्षति॥ १५॥ [१५]

परि। प्र। सोम। ते। रसः। असर्जि। कलशे। सुतः। श्येनः। न। तक्तः। अर्षति॥ १५॥

पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः॥ १६॥

पवस्व। सोम। मन्दयन्। इन्द्राय। मधुमत्ऽतमः॥ १६॥

असृग्रन् देववीतये वाजयन्तो रथाइव॥ १७॥

असृग्रन्। देवऽवीतये। वाजऽयन्तः। रथाःऽइव॥ १७॥

ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत॥ १८॥

ते। सुतासः। मदिन्ऽतमाः। शुक्राः। वायुम्। असृक्षत॥ १८॥

ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यम्॥ १९॥

ग्राव्णा। तुन्नः। अभिऽस्तुतः। पवित्रम्। सोम। गच्छसि। दधत्। स्तोत्रे। सुऽवीर्यम्॥ १९॥

एष तुन्नो अभिष्टुतः पवित्रमति गाहते। रक्षोहा वारमव्ययम्॥ २०॥ [१६]

एषः। तुन्नः। अभिऽस्तुतः। पवित्रम्। अति। गाहते। रक्षःऽहा। वारम्। अव्ययम्॥ २०॥

यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमान वि तज्जहि॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्। अन्ति। यत्। च। दूरके। भयम्। विन्दति। माम्। इह। पवमान। वि। तत्। जहि॥ २१॥

पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु नः॥ २२॥

पवमानः। सः। अद्य। नः। पवित्रेण। विऽचर्षणिः। यः। पोता। सः। पुनातु। नः॥ २२॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनीहि नः॥ २३॥

यत्। ते। पवित्रम्। अर्चिषि। अग्ने। विऽततम्। अन्तः। आ। ब्रह्म। तेन। पुनीहि। नः॥ २३॥

यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः। ब्रह्मसवैः पुनीहि नः॥ २४॥

यत्। ते। पवित्रम्। अर्चिऽवत्। अग्ने। तेन। पुनीहि। नः। ब्रह्मऽसवैः। पुनीहि। नः॥ २४॥

उभाभ्यां देव सवितः पवित्रेण सवेन च। मां पुनीहि विश्वतः॥ २५॥ [१७]

उभाभ्याम्। देव। सवितरिति। पवित्रेण। सवेन। च। माम्। पुनीहि। विश्वतः॥ २५॥

त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः। अग्ने दक्षैः पुनीहि नः॥ २६॥

त्रिऽभिः। त्वम्। देव। सवितः। वर्षिष्ठैः। सोम। धामऽभिः। अग्ने। दक्षैः। पुनीहि। नः॥ २६॥

पुनन्तु मां देवजनाः पुनन्तु वसवो धिया। विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा॥ २७॥

पुनन्तु। माम्। देवऽजनाः। पुनन्तु। वसवः। धिया।

विश्वे। देवाः। पुनीत। मा। जातऽवेदः। पुनीहि। मा॥ २७॥

प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः। देवेभ्य उत्तमं हविः॥ २८॥

प्र। प्यायस्व। प्र। स्यन्दस्व। सोम। विश्वेभिः। अंशुऽभिः। देवेभ्यः। उत्ऽतमम्। हविः॥ २८॥

उप प्रियं पनिप्नतं युवानमाहुतीवृधम्। अगन्म बिभ्रतो नमः॥ २९॥

उप। प्रियम्। पनिप्नतम्। युवानम्। आहुतिऽवृधम्। अगन्म। बिभ्रतः। नमः॥ २९॥

अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम। आखुं चिदेव देव सोम॥ ३०॥

अलाय्यस्य। परशुः। ननाश। तम्। आ। पवस्व। देव। सोम।

आखुम्। चित्। एव। देव। सोम॥ ३०॥

यः पावमानीरध्येत्यृषिभिः संभृतं रसम्। सर्वं स पूतमश्नाति स्वदितं मातरिश्वना॥ ३१॥

यः। पावमानीः। अधिऽएति। ऋषिऽभिः। सम्ऽभृतम्। रसम्।

सर्वम्। सः। पूतम्। अश्नाति। स्वदितम्। मातरिश्वना॥ ३१॥

पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्।

तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम्॥ ३२॥ [१८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पावमानीः। यः। अधिऽएति। ऋषिऽभिः। सम्ऽभृतम्। रसम्।
तस्मै। सरस्वती। दुहे। क्षीरम्। सर्पिः। मधु। उदकम्॥ ३२॥

★[६८] [२० पवित्र आङ्गिरसो वा वसिष्ठो वा। पवमानीस्तुतिः। १-३, ५-१० त्रिष्टुभः, ९ अति जगती, ७ बृहती, ४, ११-२० अनुष्टुभः]

यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत्।
जातस्य यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि॥ १॥★
यत्। मे। गर्भे। वसतः। पापम्। उग्रम्। यत्। जायमानस्य। च। किम्। चित्। अन्यत्॥
जातस्य। यत्। च। अपि। च। वर्धतः। मे। तत्। पावमानीभिः। अहम्। पुनामि॥ १॥

मातापित्रोर्यन्न कृतं वचो मे यत्स्थावरं जङ्गममाबभूव।
विश्वस्य यत्प्रहृषितं वचो मे तत्पावमानीभिरहं पुनामि॥ २॥★
मातापित्रोः। यत्। न। कृतम्। वचः। मे। यत्। स्थावरम्। जङ्गमम्। आऽबभूव॥
विश्वस्य। यत्। प्रऽहृषितम्। वचः। मे। तत्। पावमानीभिः। अहम्। पुनामि॥ २॥

क्रयविक्रयाद्योनिदोषाद् भक्षाद्भोज्यात्प्रतिग्रहात्।
असंभोजनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि॥ ३॥★
क्रयविक्रयात्। योनिऽदोषात्। भक्षात्। भोज्यात्। प्रतिऽग्रहात्॥
असम्ऽभोजनात्। च। अपि। नृऽशंसम्। तत्। पावमानीभिः। अहम्। पुनामि॥ ३॥

गोघ्नात्तस्करत्वात्स्त्रीवधाद्यच्च किल्बिषम्।
पापकं च चरणेभ्यस्तत्पावमानीभिरहं पुनामि॥ ४॥★
गोऽघ्नात्। तस्करऽत्वात्। स्त्रीऽवधात्। यत्। च। किल्बिषम्।
पापकम्। च। चरणेभ्यः। तत्। पावमानीभिः। अहम्। पुनामि॥ ४॥

ब्रह्मवधात्सुरापानात्सुवर्णस्तेयाद्वृषलीमिथुनसंगमात्।
गुरोर्दाराभिगमनाच्च तत्पावमानीभिरहं पुनामि॥ ५॥★ [१९]
ब्रह्मऽवधात्। सुराऽपानात्। सुवर्णऽस्तेयात्। वृषलीमिथुनऽसंगमात्॥
गुरोः। दाराऽअभिगमनात्। च। तत्। पावमानीभिः। अहम्। पुनामि॥ ५॥

बालघ्नान्मातृपितृवधाद् भूमितस्करात्सर्ववर्णगमनमिथुनसंगमात्।
पापेभ्यश्च प्रतिग्रहात्सद्यः प्र हरन्ति सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि॥ ६॥★

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बालघ्नात्। मातृपितृवधात्। भूमिस्तस्करात्। सर्ववर्णगमनमिथुनसंगमात्॥ पापेभ्यः। च।

प्रतिग्रहात्। सद्यः। प्र। हरन्ति। सर्वदुष्कृतम्। तत्। पावमानीभिः। अहम्। पुनामि॥ ६॥

अमन्त्रमन्नं यत्किञ्चिद्धूयते च हुताशने।

संवत्सरकृतं पापं तत्पावमानीभिरहं पुनामि॥ ७॥ ★

अमन्त्रम्। अन्नम्। यत्। किम्। चित्। हूयते। च। हुतअशने॥

संवत्सरकृतम्। पापम्। तत्। पावमानीभिः। अहम्। पुनामि॥ ७॥

दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतो कृतम्।

अयाजिताश्चासंयाज्यास्तत्पावमानीभिरहं पुनामि॥ ८॥ ★

दुः२यष्टम्। दुः२अधीतम्। पापम्। यत्। च। अज्ञानतः। कृतम्।

अयाजिताः। च। असम्याज्याः। तत्। पावमानीभिः। अहम्। पुनामि॥ ८॥

ऋतस्य योनयोऽमृतस्य धाम सर्वा देवेभ्यः पुण्यगन्धाः।

ता न आपः प्र वहन्तु पापं शुद्धो गच्छामि सुकृतामु लोकं तत्पावमानीभिरहं पुनामि॥ ९॥ ★

ऋतस्य। योनयः। अमृतस्य। धाम। सर्वाः। देवेभ्यः। पुण्यगन्धाः॥ ताः। नः। आपः। प्र। वहन्तु।

पापम्। शुद्धः। गच्छामि। सुकृताम्। ऊँ इति। लोकम्। तत्। पावमानीभिः। अहम्। पुनामि॥ ९॥

इन्द्रः सुदीती सह मा पुनातु सोमः स्वस्त्या वरुणः सुनीत्या।

यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयन्त्या पुनातु॥ १०॥ ★ [२०]

इन्द्रः। सुदीतीः। सह। मा। पुनातु। सोमः। स्वस्त्या। वरुणः। सुनीत्या॥

यमः। राजा। प्रमृणाभिः। पुनातु। मा। जातवेदाः। मा। ऊर्जयन्त्या। पुनातु॥ १०॥

पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्च्युतः।

ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम्॥ ११॥ ★

पावमानीः। स्वस्तिअयनीः। सुदुघाः। हि। घृतश्च्युतः।

ऋषिभिः। सम्भृतः। रसः। ब्राह्मणेषु। अमृतम्। हितम्॥ ११॥

पावमानीर्दिशन्तु न इमल्ँलोकमथो अमुम्। कामान्त्समर्धयन्तु नो देवैर्देवीः समाहिताः॥ १२॥ ★

पावमानीः। दिशन्तु। नः। इमम्। लोकम्। अथो इति। अमुम्।

कामान्। सम्। अर्धयन्तु। नः। देवैः। देवीः। सम्आहिताः॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पवमानः पुनातु मा॥ १३॥ ★

येन। देवाः। पवित्रेण। आत्मानम्। पुनते। सदा।

तेन। सहस्रंऽधारेण। पवमानः। पुनातु। मा॥ १३॥

प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम्। तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनातु मा॥ १४॥ ★

प्राजापत्यम्। पवित्रम्। शतऽउद्यामम्। हिरण्मयम्।

तेन। ब्रह्मऽविदः। वयम्। पूतम्। ब्रह्म। पुनातु। मा॥ १४॥

पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नान्दनम्।

पुण्यांश्च भक्षान् भक्षयत्यमृतत्वं च गच्छति॥ १५॥ ★

पावमानीः। स्वस्तिऽअयनीः। याभिः। गच्छति। नान्दनम्॥

पुण्यान्। च। भक्षान्। भक्षयति। अमृतऽत्वम्। च। गच्छति॥ १५॥

पावमानं पितृन्देवान् ध्यायेद्यश्च सरस्वतीम्।

पितृँस्तस्योप तिष्ठेत क्षीरं सर्पिर्मधूदकम्॥ १६॥ ★ [२१]

पावमानम्। पितृन्। देवान्। ध्यायेत्। यः। च। सरस्वतीम्॥

पितृन्। तस्य। उप। तिष्ठेत। क्षीरम्। सर्पिः। मधु। उदकम्॥ १६॥

ऋषयस्तु तपस्तेपुः सर्वे स्वर्गजिगीषवः।

तपसस्तपसोऽग्र्यं तु पावमानीर्ऋचो जपेत्॥ १७॥ ★

ऋषयः। तु। तपः। तेपुः। सर्वे। स्वर्गऽजिगीषवः।

तपसःऽतपसः। अग्र्यम्। तु। पावमानीः। ऋचः। जपेत्॥ १७॥

पावमानं परं ब्रह्म ये पठन्ति मनीषिणः।

सप्त जन्म भवेद् विप्रो धनाढ्यो वेदपारगः॥ १८॥ ★

पावमानम्। परम्। ब्रह्म। ये। पठन्ति। मनीषिणः।

सप्त। जन्म। भवेत्। विप्रः। धनऽआढ्यः। वेदऽपारगः॥ १८॥

दशोत्तराण्यृचां चैतत्पावमानीः शतानि षट्।

एतज्जुह्वञ्जपंश्चैव घोरं मृत्युभयं जयेत्॥ १९॥ ★

दशऽउत्तराणि। ऋचाम्। च। एतत्। पावमानीः। शतानि। षट्।

एतत्। जुह्वन्। जपन्। च। एव। घोरम्। मृत्युऽभयम्। जयेत्॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पावमानं परं ब्रह्म शुक्रं ज्योतिः सनातनम्।

ऋषींस्तस्योप तिष्ठेत क्षीरं सर्पिर्मधूदकम्॥ २०॥ * [२२] {३}

पावमानम्। परम्। ब्रह्म। शुक्रम्। ज्योतिः। सनातनम्।

ऋषीन्। तस्य। उप। तिष्ठेत। क्षीरम्। सर्पिः। मधु। उदकम्॥ २०॥

[६९ (६८)] [१० वत्सप्रिर्भालन्दनः। पवमानः सोमः। जगती, १० त्रिष्टुप्।]

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः।

बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे॥ १॥

प्र। देवम्। अच्छ। मधुऽमन्तः। इन्दवः। असिस्यदन्त। गावः। आ। न। धेनवः।

बर्हिऽसदः। वचनाऽवन्तः। ऊधऽभिः। परिऽस्रुतम्। उस्रियाः। निःऽनिजम्। धिरे॥ १॥

स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्त्स्वादते हरिः।

तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरम्॥ २॥

सः। रोरुवत्। अभि। पूर्वाः। अचिक्रदत्। उपऽआरुहः। श्रथयन्। स्वादते। हरिः।

तिरः। पवित्रम्। परिऽयन्। उरु। ज्रयः। नि। शर्याणि। दधते। देवः। आ। वरम्॥ २॥

वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता।

मही अपारे रजसी विवेविददभिव्रजन्नक्षितं पाज आ ददे॥ ३॥

वि। यः। ममे। यम्या। संयती इति सम्ऽयती। मदः। साकम्ऽवृधा। पयसा। पिन्वत्। अक्षिता।

मही इति। अपारे इति। रजसी इति। विऽवेविदत्। अभिऽव्रजन्। अक्षितम्। पाजः। आ। ददे॥ ३॥

स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम्।

अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः॥ ४॥

सः। मातरा। विऽचरन्। वाजयन्। अपः। प्र। मेधिरः। स्वधया। पिन्वते। पदम्।

अंशुः। यवेन। पिपिशे। यतः। नृऽभिः। सम्। जामिऽभिः। नसते। रक्षते। शिरः॥ ४॥

सं दक्षेण मनसा जायते कविर्ऋतस्य गर्भो निहितो यमा परः।

यूना ह सन्ता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतम्॥ ५॥ [२३ (१९)]

सम्। दक्षेण। मनसा। जायते। कविः। ऋतस्य। गर्भः। निऽहितः। यमा। परः।

यूना। ह। सन्ता। प्रथमम्। वि। जज्ञतुः। गुहा। हितम्। जनिम। नेमम्। उत्ऽयतम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः।
तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम्॥ ६॥
मन्द्रस्य। रूपम्। विविदुः। मनीषिणः। श्येनः। यत्। अन्धः। अभरत्। पराऽवतः।
तम्। मर्जयन्त। सुऽवृधम्। नदीषु। आ। उशन्तम्। अंशुम्। परिऽयन्तम्। ऋग्मियम्॥ ६॥
त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम्।
अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये॥ ७॥
त्वाम्। मृजन्ति। दश। योषणः। सुतम्। सोम। ऋषिऽभिः। मतिऽभिः। धीतिऽभिः। हितम्।
अव्यः। वारेभिः। उत। देवहूतिऽभिः। नृऽभिः। यतः। वाजम्। आ। दर्षि। सातये॥ ७॥
परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः।
यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः॥ ८॥
परिऽप्रयन्तम्। वय्यम्। सुऽसंसदम्। सोमम्। मनीषाः। अभि। अनूषत। स्तुभः।
यः। धारया। मधुऽमान्। ऊर्मिणा। दिवः। इयर्ति। वाचम्। रयिषाट्। अमर्त्यः॥ ८॥
अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति।
अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत्प्रियम्॥ ९॥
अयम्। दिवः। इयर्ति। विश्वम्। आ। रजः। सोमः। पुनानः। कलशेषु। सीदति।
अत्ऽभिः। गोभिः। मृज्यते। अद्रिऽभिः। सुतः। पुनानः। इन्दुः। वरिवः। विदत्। प्रियम्॥ ९॥
एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम्॥ १०॥ [२४ (२०)]
एव। नः। सोम। परिऽसिच्यमानः। वयः। दधत्। चित्रऽतमम्। पवस्व।
अद्वेषे इति। द्यावापृथिवी इति। हुवेम। देवाः। धत्त। रयिम्। अस्मे इति। सुऽवीरम्॥ १०॥

[७० (६९)] [१० हिरण्यस्तूप आङ्गिरसः। पवमानः सोमः। जगती, ९-१० त्रिष्टुप्]

इषुर्न धन्वन् प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि।
उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते॥ १॥
इषुः। न। धन्वन्। प्रति। धीयते। मतिः। वत्सः। न। मातुः। उप। सर्जि। ऊधनि।
उरुधाराऽइव। दुहे। अग्रे। आऽयती। अस्य। व्रतेषु। अपि। सोमः। इष्यते॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि।
पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति॥ २॥
उपो इति। मतिः। पृच्यते। सिच्यते। मधु। मन्द्रऽअजनी। चोदते। अन्तः। आसनि।
पवमानः। सम्ऽतनिः। प्रघ्नताम्ऽइव। मधुऽमान्। द्रप्सः। परि। वारम्। अर्षति॥ २॥

अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते।
हरिरक्रान् यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते॥ ३॥
अव्ये। वधूऽयुः। पवते। परि। त्वचि। श्रथ्नीते। नप्तीः। अदितेः। ऋतम्। यते।
हरिः। अक्रान्। यजतः। सम्ऽयतः। मदः। नृम्णा। शिशानः। महिषः। न। शोभते॥ ३॥

उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम्।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत॥ ४॥
उक्षा। मिमाति। प्रति। यन्ति। धेनवः। देवस्य। देवीः। उप। यन्ति। निःऽकृतम्।
अति। अक्रमीत्। अर्जुनम्। वारम्। अव्ययम्। अत्कम्। न। निक्तम्। परि। सोमः। अव्यत॥ ४॥

अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत।
दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयम्॥ ५॥ [२५ (२१)]
अमृक्तेन। रुशता। वाससा। हरिः। अमर्त्यः। निःऽनिजानः। परि। व्यत।
दिवः। पृष्ठम्। बर्हणा। निःऽनिजे। कृत। उपऽस्तरणम्। चम्वोः। नभस्मयम्॥ ५॥

सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन॥ ६॥
सूर्यस्यऽइव। रश्मयः। द्रवयित्नवः। मत्सरासः। प्रऽसुपः। साकम्। ईरते।
तन्तुम्। ततम्। परि। सर्गासः। आशवः। न। इन्द्रात्। ऋते। पवते। धाम। किम्। चन॥ ६॥

सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत।
शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः॥ ७॥
सिन्धोःऽइव। प्रवणे। निम्ने। आशवः। वृषऽच्युताः। मदासः। गातुम्। आशत।
शम्। नः। निऽवेशे। द्विऽपदे। चतुःऽपदे। अस्मे इति। वाजाः। सोम। तिष्ठन्तु। कृष्टयः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ नः पवस्व वसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यम्।

यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः॥ ८॥

आ। नः। पवस्व। वसुऽमत्। हिरण्यऽवत्। अश्वऽवत्। गोऽमत्। यवऽमत्। सुऽवीर्यम्।

यूयम्। हि। सोम। पितरः। मम। स्थन। दिवः। मूर्धानः। प्रऽस्थिताः। वयःऽकृतः॥ ८॥

एते सोमाः पवमानास इन्द्रं रथाइव प्र ययुः सातिमच्छ।

सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ॥ ९॥

एते। सोमाः। पवमानासः। इन्द्रम्। रथाःऽइव। प्र। ययुः। सातिम्। अच्छ।

सुताः। पवित्रम्। अति। यन्ति। अव्यम्। हित्वी। वव्रिम्। हरितः। वृष्टिम्। अच्छ॥ ९॥

इन्दविन्द्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः।

भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः॥ १०॥ [२६ (२२)]

इन्दो इति। इन्द्राय। बृहते। पवस्व। सुऽमृळीकः। अनवद्यः। रिशादाः।

भर। चन्द्राणि। गृणते। वसूनि। देवैः। द्यावापृथिवी इति। प्र। अवतम्। नः॥ १०॥

[७१ (७०)] [१० रेणुर्वैश्वामित्रः। पवमानः सोमः। जगती, १० त्रिष्टुप्।]

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि।

चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत॥ १॥

त्रिः। अस्मै। सप्त। धेनवः। दुदुह्रे। सत्याम्। आऽशिरम्। पूर्व्ये। विऽओमनि।

चत्वारि। अन्या। भुवनानि। निःऽनिजे। चारूणि। चक्रे। यत्। ऋतैः। अवर्धत॥ १॥

स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे।

तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः॥ २॥

सः। भिक्षमाणः। अमृतस्य। चारुणः। उभे इति। द्यावा। काव्येन। वि। शश्रथे।

तेजिष्ठाः। अपः। मंहना। परि। व्यत। यदि। देवस्य। श्रवसा। सदः। विदुः॥ २॥

ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु।

येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत॥ ३॥

ते। अस्य। सन्तु। केतवः। अमृत्यवः। अदाभ्यासः। जनुषी इति। उभे इति। अनु।

येभिः। नृम्णा। च। देव्या। च। पुनते। आत्। इत्। राजानम्। मननाः। अगृभ्णत॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा।
व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ॥ ४॥
सः। मृज्यमानः। दशऽभिः। सुकर्मऽभिः। प्र। मध्यमासु। मातृषु। प्रऽमे। सचा।
व्रतानि। पानः। अमृतस्य। चारुणः। उभे इति। नृऽचक्षाः। अनु। पश्यते। विशौ ॥ ४॥
स मर्मृजान इन्द्रियाय धायस ओभे अन्ता रोदसी हर्षते हितः।
वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥ ५॥ [२७ (२३)]
सः। मर्मृजानः। इन्द्रियाय। धायसे। आ। उभे इति। अन्तरिति। रोदसी इति। हर्षते। हितः।
वृषा। शुष्मेण। बाधते। वि। दुःऽमतीः। आऽदेदिशानः। शर्यहाऽइव। शुरुधः ॥ ५॥
स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः।
जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥ ६॥
सः। मातरा। न। ददृशानः। उस्रियः। नानदत्। एति। मरुताम्ऽइव। स्वनः।
जानन्। ऋतम्। प्रथमम्। यत्। स्वःऽनरम्। प्रऽशस्तये। कम्। अवृणीत। सुऽक्रतुः ॥ ६॥
रुवति भीमो वृषभस्तविष्यया शृङ्गे शिशानो हरिणी विचक्षणः।
आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥ ७॥
रुवति। भीमः। वृषभः। तविष्यया। शृङ्गे इति। शिशानः। हरिणी इति। विऽचक्षणः।
आ। योनिम्। सोमः। सुऽकृतम्। नि। सीदति। गव्ययी। त्वक्। भवति। निःऽनिक्। अव्ययी ॥ ७॥
शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि।
जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥ ८॥
शुचिः। पुनानः। तन्वम्। अरेपसम्। अव्ये। हरिः। नि। अधाविष्ट। सानवि।
जुष्टः। मित्राय। वरुणाय। वायवे। त्रिऽधातु। मधु। क्रियते। सुकर्मऽभिः ॥ ८॥
पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश।
पुरा नो बाधाद्दुरिताति पारया क्षेत्रविद्धि दिश आहा विपृच्छते ॥ ९॥
पवस्व। सोम। देवऽवीतये। वृषा। इन्द्रस्य। हार्दि। सोमऽधानम्। आ। विश।
पुरा। नः। बाधात्। दुःऽइता। अति। पारय। क्षेत्रऽवित्। हि। दिशः। आह। विऽपृच्छते ॥ ९॥
हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व।
नावा न सिन्धुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निदः स्पः ॥ १०॥ [२८ (२४)]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हि॒तः । न । सप्तिः॑ । अ॒भि । वाज॑म् । अ॒र्ष॒ । इन्द्र॑स्य । इ॒न्दो॒ इति॑ । ज॒ठर॑म् । आ । प॒व॒स्व॒ ।
ना॒वा । न । सिन्धु॑म् । अति॑ । प॒र्षि॒ । वि॒द्वान् । शूरः॑ । न । युध्य॑न् । अव॑ । नः॒ । नि॒दः । स्प॒रिति॑ स्पः ॥ १० ॥

[७२ (७१)] [९ हरिमन्त आङ्गिरसः । पवमानः सोमः । जगती ।]

आ दक्षि॑णा सृज्यते शु॒ष्म्या॒३॒॑सदं॒ वेति॑ द्रु॒हो र॒क्षसः॑ पाति॒ जागृ॑विः ।
हरि॑रोप॒शं कृ॑णुते॒ नभ॒स्पय॑ उप॒स्तिरे॑ च॒म्वो॒३॒॑र्ब्रह्म॑ नि॒र्णिजे॑ ॥ १ ॥
आ । दक्षि॑णा । सृ॒ज्य॒ते॒ । शु॒ष्मी । आ॒ऽसद॑म् । वेति॑ । द्रु॒हः । र॒क्षसः॑ । पा॒ति॒ । जागृ॑विः ।
हरिः॑ । आ॒प॒शम् । कृ॒णु॒ते॒ । नभः॑ । पयः॑ । उ॒प॒ऽस्तिरे॑ । च॒म्वोः॑ । ब्रह्म॑ । निः॒ऽनिजे॑ ॥ १ ॥
प्र कृ॑ष्टि॒हेव॑ शू॒ष ए॑ति॒ रोरु॑वदसु॒र्यं१॒॑ वर्णं॒ नि रि॑णीते अ॒स्य॒ तम् ।
जहा॑ति व॒व्रिं पि॒तुरे॑ति निष्कृ॒तमु॑प॒प्रुतं॑ कृणुते नि॒र्णिजं॒ तना॑ ॥ २ ॥
प्र । कृ॒ष्टि॒हाऽइ॑व । शू॒षः । ए॒ति॒ । रोरु॑वत् । अ॒सु॒र्य॑म् । वर्ण॑म् । नि । रि॒णी॒ते॒ । अ॒स्य॒ । तम् ।
जहा॑ति । व॒व्रिम् । पि॒तुः । ए॒ति॒ । निः॒ऽकृ॒तम् । उ॒प॒ऽप्रुत॑म् । कृ॒णु॒ते॒ । निः॒ऽनिज॑म् । तना॑ ॥ २ ॥
अद्रि॑भिः सु॒तः प॑वते॒ गभ॑स्त्योर्वृषा॒यते॒ नभ॑सा॒ वेप॑ते म॒ती ।
स मो॑दते॒ नस॑ते॒ साध॑ते गि॒रा नै॑नि॒क्ते अ॒प्सु यज॑ते॒ परी॑मणि ॥ ३ ॥
अद्रि॑ऽभिः । सु॒तः । प॒व॒ते॒ । गभ॑स्त्योः । वृ॒ष॒ऽयते॑ । नभ॑सा । वेप॑ते । म॒ती ।
सः । मो॒द॒ते॒ । नस॑ते । साध॑ते । गि॒रा । ने॒नि॒क्ते । अ॒प्ऽसु । यज॑ते । परी॑मणि ॥ ३ ॥
परि॑ द्यु॒क्षं सह॑सः पर्वता॒वृधं॒ मध्वः॑ सिञ्चन्ति ह॒र्म्यस्य॑ स॒क्षणि॑म् ।
आ यस्मि॒न्गावः॑ सुहु॒ताद॒ ऊध॑नि मू॒र्धञ्छ्री॒णन्त्य॑ग्रि॒यं वरी॑मभिः ॥ ४ ॥
परि॑ । द्यु॒क्षम् । सह॑सः । प॒र्व॒त॒ऽवृध॑म् । मध्वः॑ । सि॒ञ्च॒न्ति॒ । ह॒र्म्यस्य॑ । स॒क्षणि॑म् ।
आ । यस्मि॑न् । गावः॑ । सु॒हु॒त॒ऽअदः॑ । ऊध॑नि । मू॒र्धन् । श्री॒णन्ति॑ । अ॒ग्रि॒यम् । वरी॑मऽभिः ॥ ४ ॥
समी॒ रथं॒ न भु॒रिजो॑रहेषत॒ दश॒ स्वसा॑रो॒ अदि॑तेरु॒पस्थ॒ आ ।
जिगा॒दुप॑ ज्रयति॒ गोर॑पी॒च्यं॑ प॒दं यद॑स्य म॒तुथा॒ अजी॑जनन् ॥ ५ ॥ [२९ (२५)]
सम् । ई॒मिति॑ । रथ॑म् । न । भु॒रिजोः॑ । अ॒हे॒ष॒त॒ । दश॑ । स्वसा॑रः । अदि॑तेः । उ॒प॒ऽस्थे॑ । आ ।
जिगा॑त् । उप॑ । ज्र॒य॒ति॒ । गोः । अ॒पी॒च्य॑म् । प॒दम् । यत् । अ॒स्य॒ । म॒तुथाः॑ । अजी॑जनन् ॥ ५ ॥
श्ये॒नो न योनिं॒ सद॑नं धि॒या कृ॒तं हि॑र॒ण्यय॑मा॒सदं॑ दे॒व एष॑ति ।
ए रि॑णन्ति ब॒र्हिषि॑ प्रि॒यं गि॒राश्वो॒ न दे॒वाँ अप्ये॑ति य॒ज्ञियः॑ ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्येनः । न । योनिम् । सदनम् । धिया । कृतम् । हिरण्ययम् । आऽसदम् । देवः । आ । ईषति ।
आ । ईमिति । रिणन्ति । बर्हिषि । प्रियम् । गिरा । अश्वः । न । देवान् । अपि । एति । यज्ञियः ॥ ६ ॥

परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि।
सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ॥ ७ ॥

परा । विऽअक्तः । अरुषः । दिवः । कविः । वृषा । त्रिऽपृष्ठः । अनविष्ट । गाः । अभि ।
सहस्रऽनीतिः । यतिः । पराऽयतिः । रेभः । न । पूर्वीः । उषसः । वि । राजति ॥ ७ ॥

त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥ ८ ॥

त्वेषम् । रूपम् । कृणुते । वर्णः । अस्य । सः । यत्र । अशयत् । सम्ऽऋता । सेधति । स्रिधः ।
अप्साः । याति । स्वधया । दैव्यम् । जनम् । सम् । सुऽस्तुती । नसते । सम् । गोऽअग्रया ॥ ८ ॥

उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य।
दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥ ९ ॥ [३० (२६)]

उक्षाऽइव । यूथा । परिऽयन् । अरावीत् । अधि । त्विषीः । अधित । सूर्यस्य ।
दिव्यः । सुऽपर्णः । अव । चक्षत । क्षाम् । सोमः । परि । क्रतुना । पश्यते । जाः ॥ ९ ॥

[७३ (७२)] [९ हरिमन्त आङ्गिरसः । पवमानः सोमः । जगती ।]

हरिं मृजन्त्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते।
उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः ॥ १ ॥

हरिम् । मृजन्ति । अरुषः । न । युज्यते । सम् । धेनुऽभिः । कलशे । सोमः । अज्यते ।
उत् । वाचम् । ईरयति । हिन्वते । मती । पुरुऽस्तुतस्य । कति । चित् । परिऽप्रियः ॥ १ ॥

साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः ।
यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु ॥ २ ॥

साकम् । वदन्ति । बहवः । मनीषिणः । इन्द्रस्य । सोमम् । जठरे । यत् । आऽदुहुः ।
यदि । मृजन्ति । सुऽगभस्तयः । नरः । सऽनीळाभिः । दशऽभिः । काम्यम् । मधु ॥ २ ॥

अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम्।
अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अरममाणः । अति । एति । गाः । अभि । सूर्यस्य । प्रियम् । दुहितुः । तिरः । रवम् ।
अनु । अस्मै । जोषम् । अभरत् । विनम्ऽगृसः । सम् । द्वयीभिः । स्वसृऽभिः । क्षेति । जामिऽभिः ॥ ३ ॥

नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुर्ऋत्वियः ।
पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ॥ ४ ॥

नृऽधूतः । अद्रिऽसुतः । बर्हिषि । प्रियः । पतिः । गवाम् । प्रऽदिवः । इन्दुः । ऋत्वियः ।
पुरंधिऽवान् । मनुषः । यज्ञऽसाधनः । शुचिः । धिया । पवते । सोमः । इन्द्र । ते ॥ ४ ॥

नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते ।
आप्राः क्रतून्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वो३रासदद्धरिः ॥ ५ ॥ [३१ (२७)]

नृबाहुऽभ्याम् । चोदितः । धारया । सुतः । अनुऽस्वधम् । पवते । सोमः । इन्द्र । ते ।
आ । अप्राः । क्रतून् । सम् । अजैः । अध्वरे । मतीः । वेः । न । द्रुऽसत् । चम्वोः । आ । असदत् । हरिः ॥ ५ ॥

अंशुं दुहन्ति स्तनयन्तमक्षितं कविं कवयोऽपसो मनीषिणः ।
समी गावो मतयो यन्ति संयत ऋतस्य योना सदने पुनर्भुवः ॥ ६ ॥

अंशुम् । दुहन्ति । स्तनयन्तम् । अक्षितम् । कविम् । कवयः । अपसः । मनीषिणः ।
सम् । ईमिति । गावः । मतयः । यन्ति । सम्ऽयतः । ऋतस्य । योना । सदने । पुनःऽभुवः ॥ ६ ॥

नाभा पृथिव्या धरुणो महो दिवो३ऽपामूर्मौ सिन्धुष्वन्तरुक्षितः ।
इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥ ७ ॥

नाभा । पृथिव्याः । धरुणः । महः । दिवः । अपाम् । ऊर्मौ । सिन्धुषु । अन्तः । उक्षितः ।
इन्द्रस्य । वज्रः । वृषभः । विभुऽवसुः । सोमः । हृदे । पवते । चारु । मत्सरः ॥ ७ ॥

स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।
मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशङ्गं बहुलं वसीमहि ॥ ८ ॥

सः । तु । पवस्व । परि । पार्थिवम् । रजः । स्तोत्रे । शिक्षन् । आऽधून्वते । च । सुक्रतो इति सुक्रतो ।
मा । नः । निः । भाक् । वसुनः । सदनऽस्पृशः । रयिम् । पिशङ्गम् । बहुलम् । वसीमहि ॥ ८ ॥

आ तू न इन्दो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत् ।
उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि ॥ ९ ॥ [३२ (२८)]

आ । तु । नः । इन्दो इति । शतऽदातु । अश्व्यम् । सहस्रऽदातु । पशुऽमत् । हिरण्यऽवत् ।
उप । मास्व । बृहतीः । रेवतीः । इषः । अधि । स्तोत्रस्य । पवमान । नः । गहि ॥ ९ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७४ (७३)] [९ पवित्र आङ्गिरसः। पवमान सोमः। जगती।]

स्रक्वे॑ द्र॒प्सस्य॒ धम॑त॒ः सम॑स्वरन्नृ॒तस्य॒ योना॒ सम॑रन्त॒ नाभ॑यः।
त्रीन्त्स मू॒र्ध्नो असु॑रश्चक्र आ॒रभे॑ स॒त्यस्य॒ नाव॑ः सु॒कृत॑मपीपरन्॥ १॥
स्रक्वे॑। द्र॒प्सस्य॑। धम॑तः। सम्। अ॒स्व॒र॒न्। ऋ॒तस्य॑। योना॑। सम्। अ॒र॒न्त॒। नाभ॑यः।
त्रीन्। सः। मू॒र्ध्नः। असु॑रः। च॒क्रे॒। आ॒ऽरभे॑। स॒त्यस्य॑। नाव॑ः। सु॒ऽकृत॑म्। अ॒पी॒प॒र॒न्॥ १॥
स॒म्यक् स॒म्यञ्चो॑ महि॒षा अ॑हेषत॒ सिन्धो॑रू॒र्मावधि॑ वे॒ना अ॑वीविपन्।
मधो॒र्धारा॑भिर्ज॒नय॑न्तो अ॒र्कमित्प्रि॒यामिन्द्र॑स्य त॒न्व॑मवीवृधन्॥ २॥
स॒म्यक्। स॒म्यञ्च॑ः। म॒हि॒षाः। अ॒हे॒ष॒त॒। सिन्धो॑ः। ऊ॒र्मौ। अधि॑। वे॒नाः। अ॒वी॒वि॒प॒न्।
मधो॑ः। धारा॑भिः। ज॒नय॑न्तः। अ॒र्कम्। इत्। प्रि॒याम्। इन्द्र॑स्य। त॒न्व॑म्। अ॒वी॒वृ॒ध॒न्॥ २॥
पवि॒त्र॑वन्त॒ः परि॒ वाच॑मासते पि॒तैषां॑ प्र॒त्नो अ॒भि र॑क्षति व्र॒तम्।
म॒हः स॑मु॒द्रं वरु॑णस्ति॒रो द॑धे॒ धीरा॑ इच्छेकुर्ध॒रुणे॑ष्वा॒रभ॑म्॥ ३॥
प॒वित्र॑ऽवन्तः। परि॑। वाच॑म्। आ॒स॒ते॒। पि॒ता। ए॒षा॒म्। प्र॒त्नः। अ॒भि। र॒क्ष॒ति॒। व्र॒तम्।
म॒हः। स॒मु॒द्रम्। वरु॑णः। ति॒रः। द॒धे॒। धीरा॑ः। इत्। शे॒कु॒ः। ध॒रुणे॑षु। आ॒ऽरभ॑म्॥ ३॥
स॒हस्र॑धा॒रेऽव॒ ते सम॑स्वरन्दि॒वो नाके॒ मधु॑जिह्वा अस॒श्चत॑ः।
अस्य॒ स्पशो॒ न नि मि॑षन्ति॒ भूर्ण॑यः प॒देप॑दे पा॒शिन॑ः सन्ति॒ सेत॑वः॥ ४॥
स॒हस्र॑ऽधारे। अव॑। ते। सम्। अ॒स्व॒र॒न्। दि॒वः। नाके॑। मधु॑ऽजिह्वाः। अ॒स॒श्चत॑ः।
अस्य॑। स्पश॑ः। न। नि। मि॒ष॒न्ति॒। भूर्ण॑यः। प॒दे॑ऽपदे। पा॒शिन॑ः। स॒न्ति॒। सेत॑वः॥ ४॥
पि॒तुर्मा॒तुरध्या ये स॒मस्व॑रन्नृ॒चा शोच॑न्तः स॒ंदह॑न्तो अव्र॒तान्।
इन्द्र॑द्विष्टा॒मप॑ धमन्ति मा॒यया॒ त्वच॒मसि॑क्नीं॒ भूम॑नो दि॒वस्परि॑॥ ५॥ [३३ (२९)]
पि॒तुः। मा॒तुः। अधि॑। आ। ये। स॒म्ऽअस्व॑रन्। ऋ॒चा। शोच॑न्तः। स॒म्ऽदह॑न्तः। अ॒व्र॒तान्।
इन्द्र॑ऽद्विष्टाम्। अप॑। ध॒म॒न्ति॒। मा॒यया॑। त्वच॑म्। असि॑क्नीम्। भूम॑नः। दि॒वः। परि॑॥ ५॥
प्र॒त्नान्माना॒दध्या ये स॒मस्व॑र॒ञ्छ्लोक॑यन्त्रासो रभ॒सस्य॒ मन्त॑वः।
अपा॑न॒क्षासो॑ बधि॒रा अ॑हासत ऋ॒तस्य॒ पन्थां॒ न तर॑न्ति दु॒ष्कृत॑ः॥ ६॥
प्र॒त्नात्। माना॑त्। अधि॑। आ। ये। स॒म्ऽअस्व॑रन्। श्लोक॑ऽयन्त्रासः। र॒भ॒सस्य॑। मन्त॑वः।
अप॑। अ॒न॒क्षास॑ः। ब॒धि॒राः। अ॒हा॒स॒त॒। ऋ॒तस्य॑। पन्था॑म्। न। त॒र॒न्ति॒। दु॒ःऽकृत॑ः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः।
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वञ्चः सुदृशो नृचक्षसः॥ ७॥
सहस्रऽधारे। विऽतते। पवित्रे। आ। वाचम्। पुनन्ति। कवयः। मनीषिणः।
रुद्रासः। एषाम्। इषिरासः। अद्रुहः। स्पशः। सुऽअञ्चः। सुदृशः। नृऽचक्षसः॥ ७॥
ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्य१न्तरा दधे।
विद्वान्त्स विश्वा भुवनाभि पश्यत्यवाजुष्टान् विध्यति कर्ते अव्रतान्॥ ८॥
ऋतस्य। गोपाः। न। दभाय। सुऽक्रतुः। त्री। सः। पवित्रा। हृदि। अन्तः। आ। दधे।
विद्वान्। सः। विश्वा। भुवना। अभि। पश्यति। अव। अजुष्टान्। विध्यति। कर्ते। अव्रतान्॥ ८॥
ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया।
धीराश्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभुः॥ ९॥ [३४ (३०)]
ऋतस्य। तन्तुः। विऽततः। पवित्रे। आ। जिह्वायाः। अग्रे। वरुणस्य। मायया।
धीराः। चित्। तत्। सम्ऽइनक्षन्तः। आशत। अत्र। कर्तम्। अव। पदाति। अप्रऽभुः॥ ९॥

[७५ (७४)] [९ कक्षीवान् दैर्घतमसः। पवमानः सोमः। जगती, ८ त्रिष्टुप्।]

शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सिषासति।
दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः॥ १।
शिशुः। न। जातः। अव। चक्रदत्। वने। स्वः। यत्। वाजी। अरुषः। सिसासति।
दिवः। रेतसा। सचते। पयःऽवृधा। तम्। ईमहे। सुऽमती। शर्म। सऽप्रथः॥ १॥
दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः।
सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः॥ २॥
दिवः। यः। स्कम्भः। धरुणः। सुऽआततः। आऽपूर्णः। अंशुः। परिऽएति। विश्वतः।
सः। इमे इति। मही इति। रोदसी इति। यक्षत्। आऽवृता।
समीचीने इति सम्ऽईचीने। दाधार। सम्। इषः। कविः॥ २॥
महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेर्ऋतं यते।
ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिर्ऋग्मियः॥ ३॥
महि। प्सरः। सुऽकृतम्। सोम्यम्। मधु। उर्वी। गव्यूतिः। अदितेः। ऋतम्। यते।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ईशे। यः। वृष्टेः। इतः। उस्रियः। वृषा। अपाम्। नेता। यः। इतःऽऊतिः। ऋग्मियः॥ ३॥

आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते।

समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः॥ ४॥

आत्मन्ऽवत्। नभः। दुह्यते। घृतम्। पयः। ऋतस्य। नाभिः। अमृतम्। वि। जायते।

सम्ऽईचीनाः। सुऽदानवः। प्रीणन्ति। तम्। नरः। हितम्। अव। मेहन्ति। पेरवः॥ ४॥

अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१ मनुषे पिन्वति त्वचम्।

दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे॥ ५॥ [३५ (३१)]

अरावीत्। अंशुः। सचमानः। ऊर्मिणा। देवऽअव्यम्। मनुषे। पिन्वति। त्वचम्।

दधाति। गर्भम्। अदितेः। उपऽस्थे। आ। येन। तोकम्। च। तनयम्। च। धामहे॥ ५॥

सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः।

चतस्रो नाभो निहिता अवो दिवो हविर्भरन्त्यमृतं घृतश्चुतः॥ ६॥

सहस्रऽधारे। अव। ताः। असश्चतः। तृतीये। सन्तु। रजसि। प्रजाऽवतीः।

चतस्रः। नाभः। निऽहिताः। अवः। दिवः। हविः। भरन्ति। अमृतम्। घृतऽश्चुतः॥ ६॥

श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः।

धिया शमी सचते सेमभि प्रवद्दिवस्कवन्धमव दर्षदुद्रिणम्॥ ७॥

श्वेतम्। रूपम्। कृणुते। यत्। सिसासति। सोमः। मीढ्वान्। असुरः। वेद। भूमनः।

धिया। शमी। सचते। सः। ईम्। अभि। प्रऽवत्। दिवः। कवन्धम्। अव। दर्षत्। उद्रिणम्॥ ७॥

अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत् ससवान्।

आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम्॥ ८॥

अध। श्वेतम्। कलशम्। गोभिः। अक्तम्। कार्ष्मन्। आ। वाजी। अक्रमीत्। ससऽवान्।

आ। हिन्विरे। मनसा। देवऽयन्तः। कक्षीवते। शतऽहिमाय। गोनाम्॥ ८॥

अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति।

स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये॥ ९॥ [३६ (३२)]

अत्ऽभिः। सोम। पपृचानस्य। ते। रसः। अव्यः। वारम्। वि। पवमान। धावति।

सः। मृज्यमानः। कविऽभिः। मदिन्ऽतम। स्वदस्व। इन्द्राय। पवमान। पीतये॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७६ (७५)] [५ कविर्भार्गवः। पवमानः सोमः। जगती।]

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः॥ १॥

अभि। प्रियाणि। पवते। चनःऽहितः। नामानि। यह्वः। अधि। येषु। वर्धते।
आ। सूर्यस्य। बृहतः। बृहन्। अधि। रथम्। विष्वञ्चम्। अरुहत्। विऽचक्षणः॥ १॥

ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः।
दधाति पुत्रः पित्रोरपीच्यं१ नाम तृतीयमधि रोचने दिवः॥ २॥

ऋतस्य। जिह्वा। पवते। मधु। प्रियम्। वक्ता। पतिः। धियः। अस्याः। अदाभ्यः।
दधाति। पुत्रः। पित्रोः। अपीच्यम्। नाम। तृतीयम्। अधि। रोचने। दिवः॥ २॥

अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये।
अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति॥ ३॥

अव। द्युतानः। कलशान्। अचिक्रदत्। नृऽभिः। येमानः। कोशे। आ। हिरण्यये।
अभि। ईम्। ऋतस्य। दोहनाः। अनूषत। अधि। त्रिऽपृष्ठः। उषसः। वि। राजति॥ ३॥

अद्रिभिः सुतो मतिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः।
रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे॥ ४॥

अद्रिऽभिः। सुतः। मतिऽभिः। चनःऽहितः। प्रऽरोचयन्। रोदसी इति। मातरा। शुचिः।
रोमाणि। अव्या। समया। वि। धावति। मधोः। धारा। पिन्वमाना। दिवेऽदिवे॥ ४॥

परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम्।
ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम्॥ ५॥ **[३७ (३३)]**

परि। सोम। प्र। धन्व। स्वस्तये। नृऽभिः। पुनानः। अभि। वासय। आऽशिरम्।
ये। ते। मदाः। आहनसः। विऽहायसः। तेभिः। इन्द्रम्। चोदय। दातवे। मघम्॥ ५॥

इत्याश्वलायन-संहितायां सप्तमाष्टके द्वितीयोऽध्यायः समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके तृतीयोऽध्यायः ॥

[७७ (७६)] [५ कविर्भार्गवः । पवमानः सोमः । जगती ।]

ध॒र्ता दि॒वः प॑वते॒ कृत्व्यो॒ रसो॒ दक्षो॑ दे॒वाना॑मनु॒माद्यो॒ नृभिः॑ ।
हरिः॑ सृजा॒नो अत्यो॒ न सत्व॑भि॒र्वृथा॒ पाजां॑सि कृणुते न॒दीष्वा ॥ १ ॥
ध॒र्ता । दि॒वः । प॒व॒ते॒ । कृत्व्यः॑ । रसः॑ । दक्षः॑ । दे॒वाना॑म् । अ॒नु॒॰माद्यः॑ । नृ॰भिः॑ ।
हरिः॑ । सृ॒जा॒नः । अत्यः॑ । न । सत्व॑॰भिः । वृथा॑ । पाजां॑सि । कृ॒णु॒ते॒ । न॒दीषु॑ । आ ॥ १ ॥

शूरो॒ न ध॑त्त॒ आयु॑धा॒ गभ॑स्त्योः॒ स्व१ः सिषा॑सन्रथि॒रो गवि॑ष्टिषु ।
इन्द्र॑स्य॒ शुष्म॑मी॒रय॑न्नप॒स्युभि॒रिन्दु॑र्हिन्वा॒नो अ॑ज्यते मनी॒षिभिः॑ ॥ २ ॥
शूरः॑ । न । ध॒त्ते॒ । आयु॑धा । गभ॑स्त्योः । स्व१रिति॑ स्वः॑ । सिसा॑सन् । र॒थि॒रः । गो॰इ॑ष्टिषु ।
इन्द्र॑स्य । शुष्म॑म् । ई॒रय॑न् । अ॒प॒स्यु॰भिः॑ । इन्दुः॑ । हि॒न्वा॒नः । अ॒ज्य॒ते॒ । म॒नी॒षि॰भिः॑ ॥ २ ॥

इन्द्र॑स्य सोम॒ पव॑मान ऊ॒र्मिणा॑ तवि॒ष्यमा॑णो ज॒ठरे॒ष्वा वि॑श ।
प्र णः॑ पिन्व वि॒द्युद॒भ्रेव॒ रोद॑सी धि॒या न वाजाँ॒ उप॑ मासि॒ शश्व॑तः ॥ ३ ॥
इन्द्र॑स्य । सो॒म॒ । पव॑मानः । ऊ॒र्मिणा॑ । त॒वि॒ष्यमा॑णः । ज॒ठरे॑षु । आ । वि॒श॒ ।
प्र । नः॒ । पि॒न्व॒ । वि॒॰द्युत् । अ॒भ्राऽइ॑व । रोद॑सी॒ इति॑ । धि॒या । न । वाजा॑न् । उप॑ । मा॒सि॒ । शश्व॑तः ॥ ३ ॥

विश्व॑स्य॒ राजा॑ पवते स्व॒र्दृश॑ ऋ॒तस्य॑ धी॒तिमृ॑षि॒षाळ॑वीवशत् ।
यः सूर्य॒स्यासि॑रेण मृ॒ज्यते॑ पि॒ता म॑ती॒नामसं॑मष्टकाव्यः ॥ ४ ॥
विश्व॑स्य । राजा॑ । प॒व॒ते॒ । स्वः॒॰दृशः॑ । ऋ॒तस्य॑ । धी॒तिम् । ऋ॒षि॒षाट् । अ॒वी॒व॒श॒त् ।
यः । सूर्य॑स्य । असि॑रेण । मृ॒ज्यते॑ । पि॒ता । म॒ती॒नाम् । अस॑मष्ट॰काव्यः ॥ ४ ॥

वृषे॑व यू॒था परि॒ कोश॑मर्षस्य॒पामु॒पस्थे॑ वृष॒भः कनि॑क्रदत् ।
स इन्द्रा॑य पवसे मत्स॒रिन्त॑मो॒ यथा॒ जेषा॑म समि॒थे त्वोत॑यः ॥ ५ ॥ [१]
वृषा॑ऽइव । यू॒था । परि॑ । कोश॑म् । अ॒र्ष॒सि॒ । अ॒पाम् । उ॒प॰स्थे॑ । वृ॒ष॒भः । कनि॑क्रदत् ।
सः । इन्द्रा॑य । प॒व॒से॒ । म॒त्स॒रिन्॰त॑मः । यथा॑ । जेषा॑म । स॒म्॰इ॒थे । त्वा॰ऊ॑तयः ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७८ (७७)] [५ कविर्भार्गवः। पवमानः सोमः। जगती।]

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः॥ १॥
एषः। प्र। कोशे। मधुऽमान्। अचिक्रदत्। इन्द्रस्य। वज्रः। वपुषः। वपुःऽतरः।
अभि। ईम्। ऋतस्य। सुऽदुघाः। घृतऽश्चुतः। वाश्राः। अर्षन्ति। पयसाऽइव। धेनवः॥ १॥
स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः।
स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा॥ २॥
सः। पूर्व्यः। पवते। यम्। दिवः। परि। श्येनः। मथायत्। इषितः। तिरः। रजः।
सः। मध्वः। आ। युवते। वेविजानः। इत्। कृशानोः। अस्तुः। मनसा। अह। बिभ्युषा॥ २॥
ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते।
ईक्षेण्यासो अह्यो३ न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः॥ ३॥
ते। नः। पूर्वासः। उपरासः। इन्दवः। महे। वाजाय। धन्वन्तु। गोऽमते।
ईक्षेण्यासः। अह्यः। न। चारवः। ब्रह्मऽब्रह्म। ये। जुजुषुः। हविःऽहविः॥ ३॥
अयं नो विद्वान् वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम्॥ ४॥
अयम्। नः। विद्वान्। वनवत्। वनुष्यतः। इन्दुः। सत्राचा। मनसा। पुरुऽस्तुतः।
इनस्य। यः। सदने। गर्भम्। आऽदधे। गवाम्। उरुब्जम्। अभि। अर्षति। व्रजम्॥ ४॥
चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते।
असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत्॥ ५॥ [२]
चक्रिः। दिवः। पवते। कृत्व्यः। रसः। महान्। अदब्धः। वरुणः। हुरुक्। यते।
असावि। मित्रः। वृजनेषु। यज्ञियः। अत्यः। न। यूथे। वृषऽयुः। कनिक्रदत्॥ ५॥

[७९ (७८)] [५ कविर्भार्गवः। पवमानः सोमः। जगती।]

प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र। राजा। वाचम्। जनयन्। असिस्यदत्। अपः। वसानः। अभि। गाः। इयक्षति।
गृभ्णाति। रिप्रम्। अविः। अस्य। तान्वा। शुद्धः। देवानाम्। उप। याति। निःऽकृतम्॥ १॥

इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने।
पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः॥ २॥

इन्द्राय। सोम। परि। सिच्यसे। नृऽभिः। नृऽचक्षाः। ऊर्मिः। कविः। अज्यसे। वने।
पूर्वीः। हि। ते। स्रुतयः। सन्ति। यातवे। सहस्रम्। अश्वाः। हरयः। चमूऽसदः॥ २॥

समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोममक्षरन्।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम्॥ ३॥

समुद्रियाः। अप्सरसः। मनीषिणम्। आसीनाः। अन्तः। अभि। सोमम्। अक्षरन्।
ताः। ईम्। हिन्वन्ति। हर्म्यस्य। सक्षणिम्। याचन्ते। सुम्नम्। पवमानम्। अक्षितम्॥ ३॥

गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित्।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम्॥ ४॥

गोऽजित्। नः। सोमः। रथऽजित्। हिरण्यऽजित्। स्वःऽजित्। अप्ऽजित्। पवते। सहस्रऽजित्।
यम्। देवासः। चक्रिरे। पीतये। मदम्। स्वादिष्ठम्। द्रप्सम्। अरुणम्। मयःऽभुवम्॥ ४॥

एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन् द्रविणान्यर्षसि।
जहि शत्रुमन्तिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि॥ ५॥ [३]

एतानि। सोम। पवमानः। अस्मऽयुः। सत्यानि। कृण्वन्। द्रविणानि। अर्षसि।
जहि। शत्रुम्। अन्तिके। दूरके। च। यः। उर्वीम्। गव्यूतिम्। अभयम्। च। नः। कृधि॥ ५॥

[८० (७९)] [५ कविर्भार्गवः। पवमानः सोमः। जगती।]

अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः।
वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः॥ १॥

अचोदसः। नः। धन्वन्तु। इन्दवः। प्र। सुवानासः। बृहत्ऽदिवेषु। हरयः।
वि। च। नशन्। नः। इषः। अरातयः। अर्यः। नशन्त। सनिषन्त। नः। धियः॥ १॥

प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि।
तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । नः । धन्वन्तु । इन्दवः । मदऽच्युतः । धना । वा । येभिः । अर्वतः । जुनीमसि ।
तिरः । मर्तस्य । कस्य । चित् । परिऽह्वृतिम् । वयम् । धनानि । विश्वधा । भरेमहि ॥ २ ॥

उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन्न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ॥ ३ ॥

उत । स्वस्याः । अरात्याः । अरिः । हि । सः । उत । अन्यस्याः । अरात्याः । वृकः । हि । सः ।
धन्वन् । न । तृष्णा । सम् । अरीत । तान् । अभि । सोम । जहि । पवमान । दुःऽआध्यः ॥ ३ ॥

दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
अद्रयस्त्वा बप्सति गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥ ४ ॥

दिवि । ते । नाभा । परमः । यः । आऽददे । पृथिव्याः । ते । रुरुहुः । सानवि । क्षिपः ।
अद्रयः । त्वा । बप्सति । गोः । अधि । त्वचि । अप्ऽसु । त्वा । हस्तैः । दुदुहुः । मनीषिणः ॥ ४ ॥

एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।
निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥ ५ ॥ [४]

एव । ते । इन्दो इति । सुऽभ्वम् । सुऽपेशसम् । रसम् । तुञ्जन्ति । प्रथमाः । अभिऽश्रियः ।
निदम्ऽनिदम् । पवमान । नि । तारिषः । आविः । ते । शुष्मः । भवतु । प्रियः । मदः ॥ ५ ॥

[८१ (८०)] [५ वसुर्भारद्वाजः । पवमानः सोमः । जगती ।]

सोमस्य धारा पवते नृचक्षस ऋतेन देवान् हवते दिवस्परि ।
बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥ १ ॥

सोमस्य । धारा । पवते । नृऽचक्षसः । ऋतेन । देवान् । हवते । दिवः । परि ।
बृहस्पतेः । रवथेन । वि । दिद्युते । समुद्रासः । न । सवनानि । विव्यचुः ॥ १ ॥

यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन् महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥ २ ॥

यम् । त्वा । वाजिन् । अघ्न्याः । अभि । अनूषत । अयःऽहतम् । योनिम् । आ । रोहसि । द्युऽमान् ।
मघोनाम् । आयुः । प्रऽतिरन् । महि । श्रवः । इन्द्राय । सोम । पवसे । वृषा । मदः ॥ २ ॥

एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन् हरिरत्यः स्यन्दते वृषा ॥ ३ ॥

आ। इन्द्रस्य। कुक्षा। पवते। मदिन्ऽतमः। ऊर्जम्। वसानः। श्रवसे। सुऽमङ्गलः।

प्रत्यङ्। सः। विश्वा। भुवना। अभि। पप्रथे। क्रीळन्। हरिः। अत्यः। स्यन्दते। वृषा ॥ ३ ॥

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः।

नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान् देवाँ आ पवस्वा सहस्रजित् ॥ ४ ॥

तम्। त्वा। देवेभ्यः। मधुमत्ऽतमम्। नरः। सहस्रऽधारम्। दुहते। दश। क्षिपः।

नृऽभिः। सोम। प्रऽच्युतः। ग्रावऽभिः। सुतः। विश्वान्। देवान्। आ। पवस्व। सहस्रऽजित् ॥ ४ ॥

तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः।

इन्द्रं सोम मादयन् दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥ ५ ॥ [५]

तम्। त्वा। हस्तिनः। मधुऽमन्तम्। अद्रिऽभिः। दुहन्ति। अप्ऽसु। वृषभम्। दश। क्षिपः।

इन्द्रम्। सोम। मादयन्। दैव्यम्। जनम्। सिन्धोःऽइव। ऊर्मिः। पवमानः। अर्षसि ॥ ५ ॥

[८२ (८१)] [५ वसुर्भारद्वाजः। पवमानः सोमः। जगती।]

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः।

दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥ १ ॥

प्र। सोमस्य। पवमानस्य। ऊर्मयः। इन्द्रस्य। यन्ति। जठरम्। सुऽपेशसः।

दध्ना। यत्। ईम्। उत्ऽनीताः। यशसा। गवाम्। दानाय। शूरम्। उत्ऽअमन्दिषुः। सुताः ॥ १ ॥

अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा।

अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥ २ ॥

अच्छ। हि। सोमः। कलशान्। असिस्यदत्। अत्यः। न। वोळ्हा। रघुऽवर्तनिः। वृषा।

अथ। देवानाम्। उभयस्य। जन्मनः। विद्वान्। अश्नोति। अमुतः। इतः। च। यत् ॥ २ ॥

आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः।

शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥ ३ ॥

आ। नः। सोम। पवमानः। किर। वसु। इन्दो इति। भव। मघऽवा। राधसः। महः।

शिक्ष। वयःऽधः। वसवे। सु। चेतुना। मा। नः। गयम्। आरे। अस्मत्। परा। सिचः ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती॥ ४॥
आ। नः। पूषा। पवमानः। सुऽरातयः। मित्रः। गच्छन्तु। वरुणः। सऽजोषसः।
बृहस्पतिः। मरुतः। वायुः। अश्विना। त्वष्टा। सविता। सुऽयमा। सरस्वती॥ ४॥
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता।
भगो नृशंस उर्व१न्तरिक्षं विश्वे देवाः पवमानं जुषन्त॥ ५॥ [६]
उभे इति। द्यावापृथिवी इति। विश्वमिन्वे इति विश्वम्ऽइन्वे। अर्यमा। देवः। अदितिः। विऽधाता।
भगः। नृशंसः। उरु। अन्तरिक्षम्। विश्वे। देवाः। पवमानम्। जुषन्त॥ ५॥

[८३ (८२)] [५ वसुर्भारद्वाजः। पवमानः सोमः। जगती, ५ त्रिष्टुप्।]

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत्।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम्॥ १॥
असावि। सोमः। अरुषः। वृषा। हरिः। राजाऽइव। दस्मः। अभि। गाः। अचिक्रदत्।
पुनानः। वारम्। परि। एति। अव्ययम्। श्येनः। न। योनिम्। घृतऽवन्तम्। आऽसदम्॥ १॥
कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि।
अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम्॥ २॥
कविः। वेधस्या। परि। एषि। माहिनम्। अत्यः। न। मृष्टः। अभि। वाजम्। अर्षसि।
अपऽसेधन्। दुःऽइता। सोम। मृळय। घृतम्। वसानः। परि। यासि। निःऽनिजम्॥ २॥
पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे।
स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे॥ ३॥
पर्जन्यः। पिता। महिषस्य। पर्णिनः। नाभा। पृथिव्याः। गिरिषु। क्षयम्। दधे।
स्वसारः। आपः। अभि। गाः। उत। असरन्। सम्। ग्रावऽभिः। नसते। वीते। अध्वरे॥ ३॥
जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते।
अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि॥ ४॥
जायाऽइव। पत्यौ। अधि। शेव। मंहसे। पज्रायाः। गर्भ। शृणुहि। ब्रवीमि। ते।
अन्तः। वाणीषु। प्र। चर। सु। जीवसे। अनिन्द्यः। वृजने। सोम। जागृहि॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो।
एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते॥ ५॥ [७]

यथा। पूर्वेभ्यः। शतऽसाः। अमृध्रः। सहस्रऽसाः। परिऽअयाः। वाजम्। इन्दो इति।
एव। पवस्व। सुविताय। नव्यसे। तव। व्रतम्। अनु। आपः। सचन्ते॥ ५॥

[८४ (८३)] [५ वसुर्भारद्वाजः। पवमानः सोमः। जगती]

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत॥ १॥

पवित्रम्। ते। विऽततम्। ब्रह्मणः। पते। प्रऽभुः। गात्राणि। परि। एषि। विश्वतः।
अतप्तऽतनूः। न। तत्। आमः। अश्नुते। शृतासः। इत्। वहन्तः। तत्। सम्। आशत॥ १॥

तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन्।
अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा॥ २॥

तपोः। पवित्रम्। विऽततम्। दिवः। पदे। शोचन्तः। अस्य। तन्तवः। वि। अस्थिरन्।
अवन्ति। अस्य। पवितारम्। आशवः। दिवः। पृष्ठम्। अधि। तिष्ठन्ति। चेतसा॥ २॥

अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः॥ ३॥

अरूरुचत्। उषसः। पृश्निः। अग्रियः। उक्षा। बिभर्ति। भुवनानि। वाजऽयुः।
मायाऽविनः। ममिरे। अस्य। मायया। नृऽचक्षसः। पितरः। गर्भम्। आ। दधुः॥ ३॥

गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत॥ ४॥

गन्धर्वः। इत्था। पदम्। अस्य। रक्षति। पाति। देवानाम्। जनिमानि। अद्भुतः।
गृभ्णाति। रिपुम्। निऽधया। निधाऽपतिः। सुकृत्ऽतमाः। मधुनः। भक्षम्। आशत॥ ४॥

हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम्।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत्॥ ५॥ [८]

हविः। हविष्मः। महि। सद्म। दैव्यम्। नभः। वसानः। परि। यासि। अध्वरम्।
राजा। पवित्रऽरथः। वाजम्। आ। अरुहः। सहस्रऽभृष्टिः। जयसि। श्रवः। बृहत्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८५ (८४)] [५ प्रजापतेर्वाच्यः। पवमानः सोमः। जगती।]

पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे।
कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम्॥ १॥
पवस्व। देवऽमादनः। विऽचर्षणिः। अप्साः। इन्द्राय। वरुणाय। वायवे।
कृधि। नः। अद्य। वरिवः। स्वस्तिऽमत्। उरुऽक्षितौ। गृणीहि। दैव्यम्। जनम्॥ १॥
आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति।
कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः॥ २॥
आ। यः। तस्थौ। भुवनानि। अमर्त्यः। विश्वानि। सोमः। परि। तानि। अर्षति।
कृण्वन्। सम्ऽचृतम्। विऽचृतम्। अभिष्टये। इन्दुः। सिसक्ति। उषसम्। न। सूर्यः॥ २॥
आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः।
आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम्॥ ३॥
आ। यः। गोभिः। सृज्यते। ओषधीषु। आ। देवानाम्। सुम्ने। इषयन्। उपऽवसुः।
आ। विऽद्युता। पवते। धारया। सुतः। इन्द्रम्। सोमः। मादयन्। दैव्यम्। जनम्॥ ३॥
एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम्।
इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति॥ ४॥
एषः। स्यः। सोमः। पवते। सहस्रऽजित्। हिन्वानः। वाचम्। इषिराम्। उषःऽबुधम्।
इन्दुः। समुद्रम्। उत्। इयर्ति। वायुऽभिः। आ। इन्द्रस्य। हार्दि। कलशेषु। सीदति॥ ४॥
अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम्।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः॥ ५॥ [९]
अभि। त्यम्। गावः। पयसा। पयःऽवृधम्। सोमम्। श्रीणन्ति। मतिऽभिः। स्वःऽविदम्।
धनम्ऽजयः। पवते। कृत्व्यः। रसः। विप्रः। कविः। काव्येन। स्वःऽचनाः॥ ५॥

[८६ (८५)] [१२ वेनो भार्गवः। पवमानः सोमः। जगती, ११-१९ त्रिष्टुप्।]

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्राय । सोम । सु॰सुतः । परि । स्रव । अप । अमीवा । भवतु । रक्षसा । सह ।
मा । ते । रसस्य । मत्सत । द्वयाविनः । द्रविणस्वन्तः । इह । सन्तु । इन्दवः ॥ १ ॥

अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥ २ ॥

अस्मान् । स॰मर्ये । पवमान । चोदय । दक्षः । देवानाम् । असि । हि । प्रियः । मदः ।
जहि । शत्रून् । अभि । आ । भन्दना॰यतः । पिब । इन्द्र । सोमम् । अव । नः । मृधः । जहि ॥ २ ॥

अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥ ३ ॥

अदब्धः । इन्दो इति । पवसे । मदिन्॰तमः । आत्मा । इन्द्रस्य । भवसि । धासिः । उत्॰तमः ।
अभि । स्वरन्ति । बहवः । मनीषिणः । राजानम् । अस्य । भुवनस्य । निंसते ॥ ३ ॥

सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।
जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥ ४ ॥

सहस्र॰नीथः । शत॰धारः । अद्भुतः । इन्द्रायः । इन्दुः । पवते । काम्यम् । मधु ।
जयन् । क्षेत्रम् । अभि । अर्ष । जयन् । अपः । उरुम् । नः । गातुम् । कृणु । सोम । मीढ्वः ॥ ४ ॥

कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।
मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥ ५ ॥

कनिक्रदत् । कलशे । गोभिः । अज्यसे । वि । अव्ययम् । समया । वारम् । अर्षसि ।
मर्मृज्यमानः । अत्यः । न । सानसिः । इन्द्रस्य । सोम । जठरे । सम् । अक्षरः ॥ ५ ॥

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥ ६ ॥ [१०]

स्वादुः । पवस्व । दिव्याय । जन्मने । स्वादुः । इन्द्राय । सुहवीतु॰नाम्ने ।
स्वादुः । मित्राय । वरुणाय । वायवे । बृहस्पतये । मधु॰नाम् । अदाभ्यः ॥ ६ ॥

अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।
पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ॥ ७ ॥

अत्यम् । मृजन्ति । कलशे । दश । क्षिपः । प्र । विप्राणाम् । मतयः । वाचः । ईरते ।
पवमानाः । अभि । अर्षन्ति । सु॰स्तुतिम् । आ । इन्द्रम् । विशन्ति । मदिरासः । इन्दवः ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः।

माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम्॥ ८॥

पवमानः। अभि। अर्ष। सुऽवीर्यम्। उर्वीम्। गव्यूतिम्। महि। शर्म। सऽप्रथः।

माकिः। नः। अस्य। परिऽसूतिः। ईशत। इन्दो इति। जयेम। त्वया। धनम्ऽधनम्॥ ८॥

अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः।

राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः॥ ९॥

अधि। द्याम्। अस्थात्। वृषभः। विऽचक्षणः। अरूरुचत्। वि। दिवः। रोचना। कविः।

राजा। पवित्रम्। अति। एति। रोरुवत्। दिवः। पीयूषम्। दुहते। नृऽचक्षसः॥ ९॥

दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम्।

अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ॥ १०॥

दिवः। नाके। मधुऽजिह्वाः। असश्चतः। वेनाः। दुहन्ति। उक्षणम्। गिरिऽस्थाम्।

अप्ऽसु। द्रप्सम्। ववृधानम्। समुद्रे। आ। सिन्धोः। ऊर्मा। मधुऽमन्तम्। पवित्रे। आ॥ १०॥

नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः।

शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम्॥ ११॥

नाके। सुऽपर्णम्। उपपप्तिऽवांसम्। गिरः। वेनानाम्। अकृपन्त। पूर्वीः।

शिशुम्। रिहन्ति। मतयः। पनिप्नतम्। हिरण्ययम्। शकुनम्। क्षामणि। स्थाम्॥ ११॥

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य।

भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः॥ १२॥ [११] {४}

ऊर्ध्वः। गन्धर्वः। अधि। नाके। अस्थात्। विश्वा। रूपा। प्रतिऽचक्षाणः। अस्य।

भानुः। शुक्रेण। शोचिषा। वि। अद्यौत्। प्र। अरूरुचत्। रोदसी इति। मातरा। शुचिः॥ १२॥

[८७ (८६)] [(१-४८) १-१० अकृष्टा माषाः, ११-२० सिकता नीवावरी, २१-३० पृश्नियोऽजाः, ३१-४० अकृष्टमाषादयस्त्रयः, ४१-४५ भौमोऽत्रिः, ४६-४८ गृत्समदः शौनकः। पवमानः सोमः। जगती।]

प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजाइव त्मना।

दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । ते । आशवः । पवमान । धीऽजवः । मदाः । अर्षन्ति । रघुजाःऽइव । त्मना ।
दिव्याः । सुऽपर्णाः । मधुऽमन्तः । इन्दवः । मदिन्ऽतमासः । परि । कोशम् । आसते ॥ १ ॥

प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर्न वत्सं पयसाभि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥ २ ॥

प्र । ते । मदासः । मदिरासः । आशवः । असृक्षत । रथ्यासः । यथा । पृथक् ।
धेनुः । न । वत्सम् । पयसा । अभि । वज्रिणम् । इन्द्रम् । मधुऽमन्तः । ऊर्मयः ॥ २ ॥

अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् ।
वृषा पवित्रे अधि सानौ अव्ययो सोमः पुनान इन्द्रियाय धायसे ॥ ३ ॥

अत्यः । न । हियानः । अभि । वाजम् । अर्ष । स्वःऽवित् । कोशम् । दिवः । अद्रिऽमातरम् ।
वृषा । पवित्रे । अधि । सानौ । अव्यये । सोमः । पुनानः । इन्द्रियाय । धायसे ॥ ३ ॥

प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन् पयसा धरीमणि ।
प्रान्तर्ऋषयः स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥ ४ ॥

प्र । ते । आश्विनीः । पवमान । धीऽजुवः । दिव्याः । असृग्रन् । पयसा । धरीमणि ।
प्र । अन्तः । ऋषयः । स्थाविरीः । असृक्षत । ये । त्वा । मृजन्ति । ऋषिऽसान । वेधसः ॥ ४ ॥

विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥ ५ ॥ [१२]

विश्वा । धामानि । विश्वऽचक्षः । ऋभ्वसः । प्रऽभोः । ते । सतः । परि । यन्ति । केतवः ।
विऽआनशिः । पवसे । सोम । धर्मऽभिः । पतिः । विश्वस्य । भुवनस्य । राजसि ॥ ५ ॥

उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥ ६ ॥

उभयतः । पवमानस्य । रश्मयः । ध्रुवस्य । सतः । परि । यन्ति । केतवः ।
यदि । पवित्रे । अधि । मृज्यते । हरिः । सत्ता । नि । योना । कलशेषु । सीदति ॥ ६ ॥

यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥ ७ ॥

यज्ञस्य । केतुः । पवते । सुऽअध्वरः । सोमः । देवानाम् । उप । याति । निःऽकृतम् ।
सहस्रऽधारः । परि । कोशम् । अर्षति । वृषा । पवित्रम् । अति । एति । रोरुवत् ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः॥ ८॥
राजा। समुद्रम्। नद्यः। वि। गाहते। अपाम्। ऊर्मिम्। सचते। सिन्धुषु। श्रितः।
अधि। अस्थात्। सानु। पवमानः। अव्ययम्। नाभा। पृथिव्याः। धरुणः। महः। दिवः॥ ८॥
दिवो न सानु स्तनयन्नचिक्रदद् द्यौश्च यस्य पृथिवी च धर्मभिः।
इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति॥ ९॥
दिवः। न। सानु। स्तनयन्। अचिक्रदत्। द्यौः। च। यस्य। पृथिवी। च। धर्मऽभिः।
इन्द्रस्य। सख्यम्। पवते। विऽवेविदत्। सोमः। पुनानः। कलशेषु। सीदति॥ ९॥
ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः।
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः॥ १०॥ [१३]
ज्योतिः। यज्ञस्य। पवते। मधु। प्रियम्। पिता। देवानाम्। जनिता। विभुऽवसुः।
दधाति। रत्नम्। स्वधयोः। अपीच्यम्। मदिन्ऽतमः। मत्सरः। इन्द्रियः। रसः॥ १०॥
अभिक्रन्दन् कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा॥ ११॥
अभिऽक्रन्दन्। कलशम्। वाजी। अर्षति। पतिः। दिवः। शतऽधारः। विऽचक्षणः।
हरिः। मित्रस्य। सदनेषु। सीदति। मर्मृजानः। अविऽभिः। सिन्धुऽभिः। वृषा॥ ११॥
अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा॥ १२॥
अग्रे। सिन्धूनाम्। पवमानः। अर्षति। अग्रे। वाचः। अग्रियः। गोषु। गच्छति।
अग्रे। वाजस्य। भजते। महाऽधनम्। सुऽआयुधः। सोतृऽभिः। पूयते। वृषा॥ १२॥
अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते॥ १३॥
अयम्। मतऽवान्। शकुनः। यथा। हितः। अव्ये। ससार। पवमानः। ऊर्मिणा।
तव। क्रत्वा। रोदसी इति। अन्तरा। कवे। शुचिः। धिया। पवते। सोमः। इन्द्र। ते॥ १३॥
द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः।
स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्रापिम्। वसानः। यजतः। दिविऽस्पृशम्। अन्तरिक्षऽप्राः। भुवनेषु। अर्पितः।
स्वः। जज्ञानः। नभसा। अभि। अक्रमीत्। प्रत्नम्। अस्य। पितरम्। आ। विवासति॥ १४॥

सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे।
पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः॥ १५॥ [१४]

सः। अस्य। विशे। महि। शर्म। यच्छति। यः। अस्य। धाम। प्रथमम्। विऽआनशे।
पदम्। यत्। अस्य। परमे। विऽओमनि। अतः। विश्वाः। अभि। सम्। याति। सम्ऽयतः॥ १५॥

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम्।
मर्यइव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा॥ १६॥

प्रो इति। अयासीत्। इन्दुः। इन्द्रस्य। निःऽकृतम्। सखा। सख्युः। न। प्र। मिनाति। सम्ऽगिरम्॥
मर्यःऽइव। युवतिऽभिः। सम्। अर्षति। सोमः। कलशे। शतऽयाम्ना। पथा॥ १६॥

प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः।
सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः॥ १७॥

प्र। वः। धियः। मन्द्रऽयुवः। विपन्युवः। पनस्युवः। सम्ऽवसनेषु। अक्रमुः।
सोमम्। मनीषाः। अभि। अनूषत। स्तुभः। अभि। धेनवः। पयसा। ईम्। अशिश्रयुः॥ १७॥

आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्त्रिधम्।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम्॥ १८॥

आ। नः। सोम। सम्ऽयतम्। पिप्युषीम्। इषम्। इन्दो इति। पवस्व। पवमानः। अस्त्रिधम्।
या। नः। दोहते। त्रिः। अहन्। असश्चुषी। क्षुऽमत्। वाजऽवत्। मधुऽमत्। सुऽवीर्यम्॥ १८॥

वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः।
क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्द्याविशन्मनीषिभिः॥ १९॥

वृषा। मतीनाम्। पवते। विऽचक्षणः। सोमः। अह्नः। प्रऽतरीता। उषसः। दिवः।
क्राणा। सिन्धूनाम्। कलशान्। अवीवशत्। इन्द्रस्य। हार्दि। आऽविशन्। मनीषिऽभिः॥ १९॥

मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत्।
त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे॥ २०॥ [१५]

मनीषिऽभिः। पवते। पूर्व्यः। कविः। नृऽभिः। यतः। परि। कोशान्। अचिक्रदत्।
त्रितस्य। नाम। जनयन्। मधु। क्षरत्। इन्द्रस्य। वायोः। सख्याय। कर्तवे॥ २०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत्।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः॥ २१॥
अयम्। पुनानः। उषसः। वि। रोचयत्। अयम्। सिन्धुऽभ्यः। अभवत्। ऊँ इति। लोकऽकृत्॥
अयम्। त्रिः। सप्त। दुदुहानः। आऽशिरम्। सोमः। हृदे। पवते। चारु। मत्सरः॥ २१॥
पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ।
सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि॥ २२॥
पवस्व। सोम। दिव्येषु। धामऽसु। सृजानः। इन्दो इति। कलशे। पवित्रे। आ।
सीदन्। इन्द्रस्य। जठरे। कनिक्रदत्। नृऽभिः। यतः। सूर्यम्। आ। अरोहयः। दिवि॥ २२॥
अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन्।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमङ्गिरोभ्योऽवृणोरप॥ २३॥
अद्रिऽभिः। सुतः। पवसे। पवित्रे। आ। इन्दो इति। इन्द्रस्य। जठरेषु। आऽविशन्।
त्वम्। नृऽचक्षाः। अभवः। विऽचक्षण। सोम। गोत्रम्। अङ्गिरःऽभ्यः। अवृणोः। अप॥ २३॥
त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः।
त्वां सुपर्ण आभरद्दिवस्परीन्दो विश्वाभिर्मतिभिः परिष्कृतम्॥ २४॥
त्वाम्। सोम। पवमानम्। सुऽआध्यः। अनु। विप्रासः। अमदन्। अवस्यवः॥ त्वाम्। सुऽपर्णः।
आ। अभरत्। दिवः। परि। इन्दो इति। विश्वाभिः। मतिऽभिः। परिऽकृतम्॥ २४॥
अव्ये पुनानं परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः।
अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत॥ २५॥ [१६]
अव्ये। पुनानम्। परि। वारे। ऊर्मिणा। हरिम्। नवन्ते। अभि। सप्त। धेनवः।
अपाम्। उपऽस्थे। अधि। आयवः। कविम्। ऋतस्य। योना। महिषाः। अहेषत॥ २५॥
इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्सुपथानि यज्यवे।
गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन् परि वारमर्षति॥ २६॥
इन्दुः। पुनानः। अति। गाहते। मृधः। विश्वानि। कृण्वन्। सुऽपथानि। यज्यवे।
गाः। कृण्वानः। निःऽनिजम्। हर्यतः। कविः। अत्यः। न। क्रीळन्। परि। वारम्। अर्षति॥ २६॥
असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः।
क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः॥ २७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अ॒स॒श्चत॑ः । श॒त॒ऽधा॑राः । अ॒भि॒ऽश्रिय॑ः । हरि॑म् । न॒वन्ते॒ । अव॑ । ताः । उ॒द॒न्युव॑ः ।
क्षिप॑ः । मृ॒ज॒न्ति॒ । परि॑ । गोभि॑ः । आऽवृ॑तम् । तृ॒तीये॑ । पृ॒ष्ठे । अधि॑ । रो॒च॒ने । दि॒वः ॥ २७ ॥

तवे॒माः प्र॒जा दि॒व्यस्य॒ रेत॑स॒स्त्वं विश्व॑स्य॒ भुव॑नस्य राजसि ।
अथे॒दं विश्वं॑ पवमान॒ ते॒ वशे॒ त्वमि॑न्दो प्रथ॒मो धा॑म॒धा अ॑सि ॥ २८ ॥

तव॑ । इ॒माः । प्र॒ऽजाः । दि॒व्यस्य॑ । रेत॑सः । त्वम् । विश्व॑स्य । भुव॑नस्य । रा॒ज॒सि॒ ।
अथ॑ । इ॒दम् । विश्व॑म् । प॒व॒मा॒न॒ । ते॒ । वशे॑ । त्वम् । इ॒न्दो॒ इति॑ । प्र॒थ॒मः । धा॒म॒ऽधाः । अ॒सि॒ ॥ २८ ॥

त्वं स॑मु॒द्रो अ॑सि विश्व॒वित्क॑वे॒ तवे॒माः पञ्च॑ प्र॒दिशो॒ विध॑र्मणि ।
त्वं द्यां च॑ पृथि॒वीं चाति॑ जभ्रिषे॒ तव॒ ज्योतीं॑षि पवमान॒ सूर्य॑ः ॥ २९ ॥

त्वम् । स॒मु॒द्रः । अ॒सि॒ । वि॒श्व॒ऽवित् । क॒वे॒ । तव॑ । इ॒माः । पञ्च॑ । प्र॒ऽदिश॑ः । विऽध॑र्मणि ।
त्वम् । द्याम् । च॒ । पृ॒थि॒वीम् । च॒ । अति॑ । ज॒भ्रि॒षे॒ । तव॑ । ज्योतीं॑षि । प॒व॒मा॒न॒ । सूर्य॑ः ॥ २९ ॥

त्वं प॒वित्रे॒ रज॑सो॒ विध॑र्मणि दे॒वेभ्य॑ः सोम पवमान पूयसे ।
त्वामु॒शिज॑ः प्रथ॒म अ॑गृभ्णत॒ तुभ्ये॒मा विश्वा॒ भुव॑नानि येमिरे ॥ ३० ॥ [१७]

त्वम् । प॒वित्रे॑ । रज॑सः । विऽध॑र्मणि । दे॒वेभ्य॑ः । सोम॒ । प॒व॒मा॒न॒ । पू॒य॒से॒ ।
त्वाम् । उ॒शिज॑ः । प्र॒थ॒माः । अ॒गृ॒भ्ण॒त॒ । तुभ्य॑ । इ॒मा । विश्वा॑ । भुव॑नानि । ये॒मि॒रे॒ ॥ ३० ॥

प्र रे॒भ ए॒त्यति॒ वार॑म॒व्ययं॒ वृषा॒ वने॒ष्वव॑ चक्रद॒द्धरि॑ः ।
सं धी॒तयो॑ वावश॒ाना अ॑नूषत॒ शिशुं॑ रिहन्ति म॒तय॒ः पनि॑प्नतम् ॥ ३१ ॥

प्र । रे॒भः । ए॒ति॒ । अति॑ । वार॑म् । अ॒व्यय॑म् । वृषा॑ । वने॑षु । अव॑ । च॒क्र॒द॒त् । हरि॑ः ।
सम् । धी॒तय॑ः । वा॒व॒शा॒नाः । अ॒नू॒ष॒त॒ । शिशु॑म् । रि॒ह॒न्ति॒ । म॒तय॑ः । पनि॑प्नतम् ॥ ३१ ॥

स सूर्य॑स्य र॒श्मिभि॒ः परि॑ व्यत॒ तन्तुं॑ तन्वा॒नस्त्रि॒वृतं॒ यथा॑ वि॒दे ।
नय॑न्नृ॒तस्य॑ प्र॒शिषो॒ नवी॑यसी॒ः पति॒र्जनी॑नामुप॑ याति निष्कृतम् ॥ ३२ ॥

सः । सूर्य॑स्य । र॒श्मिऽभि॑ः । परि॑ । व्य॒त॒ । तन्तु॑म् । त॒न्वा॒नः । त्रि॒ऽवृत॑म् । यथा॑ । वि॒दे ।
नय॑न् । ऋ॒तस्य॑ । प्र॒ऽशिष॑ः । नवी॑यसीः । पति॑ः । जनी॑नाम् । उप॑ । या॒ति॒ । नि॒ःऽकृतम् ॥ ३२ ॥

राजा॒ सिन्धू॑नां पवते॒ पति॒र्दिव ऋ॒तस्य॑ याति प॒थिभि॒ः कनि॑क्रदत् ।
स॒हस्र॑धार॒ः परि॑ षिच्यते॒ हरि॑ः पुना॒नो वाचं॑ ज॒नय॑न्नुपाव॑सुः ॥ ३३ ॥

राजा॑ । सिन्धू॑नाम् । प॒व॒ते॒ । पति॑ः । दि॒वः । ऋ॒तस्य॑ । या॒ति॒ । प॒थिऽभि॑ः । कनि॑क्रदत् ।
स॒हस्र॑ऽधाराः । परि॑ । सि॒च्य॒ते॒ । हरि॑ः । पु॒ना॒नः । वाच॑म् । ज॒नय॑न् । उप॑ऽवसुः ॥ ३३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि॥ ३४॥

पवमान। महि। अर्णः। वि। धावसि। सूरः। न। चित्रः। अव्ययानि। पव्यया।
गभस्तिऽपूतः। नृऽभिः। अद्रिऽभिः। सुतः। महे। वाजाय। धन्याय। धन्वसि॥ ३४॥

इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि।
इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः॥ ३५॥ [१८]

इषम्। ऊर्जम्। पवमान। अभि। अर्षसि। श्येनः। न। वंसु। कलशेषु। सीदसि।
इन्द्राय। मद्वा। मद्यः। मदः। सुतः। दिवः। विष्टम्भः। उपऽमः। विऽचक्षणः॥ ३५॥

सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम्।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे॥ ३६॥

सप्त। स्वसारः। अभि। मातरः। शिशुम्। नवम्। जज्ञानम्। जेन्यम्। विपःऽचितम्।
अपाम्। गन्धर्वम्। दिव्यम्। नृऽचक्षसम्। सोमम्। विश्वस्य। भुवनस्य। राजसे॥ ३६॥

ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः।
तास्ते क्षरन्तु मधुमद्धृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः॥ ३७॥

ईशानः। इमा। भुवनानि। वि। ईयसे। युजानः। इन्दो इति। हरितः। सुऽपर्ण्यः।
ताः। ते। क्षरन्तु। मधुऽमत्। घृतम्। पयः। तव। व्रते। सोम। तिष्ठन्तु। कृष्टयः॥ ३७॥

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे॥ ३८॥

त्वम्। नृऽचक्षाः। असि। सोम। विश्वतः। पवमान। वृषभ। ता वि। धावसि।
सः। नः। पवस्व। वसुऽमत्। हिरण्यऽवत्। वयम्। स्याम। भुवनेषु। जीवसे॥ ३८॥

गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते॥ ३९॥

गोऽवित्। पवस्व। वसुऽवित्। हिरण्यऽवित्। रेतःऽधाः। इन्दो इति। भुवनेषु। अर्पितः।
त्वम्। सुऽवीरः। असि। सोम। विश्वऽवित्। तम्। त्वा। विप्राः। उप। गिरा। इमे। आसते॥ ३९॥

उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते।
राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत्॥ ४०॥ [१९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्। मध्वः। ऊर्मिः। वननाः। अतिस्थिपत्। अपः। वसानः। महिषः। वि। गाहते।

राजा। पवित्रऽरथः। वाजम्। आ। अरुहत्। सहस्रऽभृष्टिः। जयति। श्रवः। बृहत्॥ ४०॥

स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि।

ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात्॥ ४१॥

सः। भन्दनाः। उत्। इयर्ति। प्रजाऽवतीः। विश्वऽआयुः। विश्वाः। सुऽभराः। अहःऽदिवि।

ब्रह्म। प्रजाऽवत्। रयिम्। अश्वऽपस्त्यम्। पीतः। इन्दो इति। इन्द्रम्। अस्मभ्यम्। याचतात्॥ ४१॥

सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः।

द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि॥ ४२॥

सः। अग्रे। अह्नाम्। हरिः। हर्यतः। मदः। प्र। चेतसा। चेतयते। अनु। द्युऽभिः।

द्वा। जना। यातयन्। अन्तः। ईयते। नराशंसम्। च। दैव्यम्। च। धर्तरि॥ ४२॥

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते।

सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते॥ ४३॥

अञ्जते। वि। अञ्जते। सम्। अञ्जते। क्रतुम्। रिहन्ति। मधुना। अभि। अञ्जते।

सिन्धोः। उत्ऽश्वासे। पतयन्तम्। उक्षणम्। हिरण्यऽपावाः। पशुम्। आसु। गृभ्णते॥ ४३॥

विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति।

अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः॥ ४४॥

विपःऽचिते। पवमानाय। गायत। मही। न। धारा। अति। अन्धः। अर्षति।

अहिः। न। जूर्णाम्। अति। सर्पति। त्वचम्। अत्यः। न। क्रीळन्। असरत्। वृषा। हरिः॥ ४४॥

अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः।

हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः॥ ४५॥ [२०]

अग्रेऽगः। राजा। अप्यः। तविष्यते। विऽमानः। अह्नाम्। भुवनेषु। अर्पितः।

हरिः। घृतऽस्नुः। सुऽदृशीकः। अर्णवः। ज्योतिःऽरथः। पवते। राये। ओक्यः॥ ४५॥

असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति।

अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः॥ ४६॥

असर्जि। स्कम्भः। दिवः। उत्ऽयतः। मदः। परि। त्रिऽधातुः। भुवनानि। अर्षति।

अंशुम्। रिहन्ति। मतयः। पनिप्नतम्। गिरा। यदि। निःऽनिजम्। ऋग्मिणः। ययुः॥ ४६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः।
यद्गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि॥ ४७॥
प्र। ते। धाराः। अति। अण्वानि। मेष्यः। पुनानस्य। सम्ऽयतः। यन्ति। रंहयः।
यत्। गोभिः। इन्दो इति। चम्वोः। सम्ऽअज्यसे। आ। सुवानः। सोम। कलशेषु। सीदसि॥ ४७॥
पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियम्।
जहि विश्वान्रक्षस इन्दो अत्रिणो बृहद्वदेम विदथे सुवीराः॥ ४८॥ [२१]
पवस्व। सोम। क्रतुऽवित्। नः। उक्थ्यः। अव्यः। वारे। परि। धाव। मधु। प्रियम्।
जहि। विश्वान्। रक्षसः। इन्दो इति। अत्रिणः। बृहत्। वदेम। विदथे। सुऽवीराः॥ ४८॥

[८८ (८७)] [९ उशना काव्यः। पवमानः सोमः। त्रिष्टुप्।]

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति॥ १॥
प्र। तु। द्रव। परि। कोशम्। नि। सीद। नृऽभिः। पुनानः। अभि। वाजम्। अर्ष।
अश्वम्। न। त्वा। वाजिनम्। मर्जयन्तः। अच्छ। बर्हिः। रशनाभिः। नयन्ति॥ १॥
स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः॥ २॥
सुऽआयुधः। पवते। देवः। इन्दुः। अशस्तिऽहा। वृजनम्। रक्षमाणः।
पिता। देवानाम्। जनिता। सुऽदक्षः। विष्टम्भः। दिवः। धरुणः। पृथिव्याः॥ २॥
ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन।
स चिद्विवेद निहितं यदासामपीच्यं१ गुह्यं नाम गोनाम्॥ ३॥
ऋषिः। विप्रः। पुरःऽएता। जनानाम्। ऋभुः। धीरः। उशना। काव्येन।
सः। चित्। विवेद। निऽहितम्। यत्। आसाम्। अपीच्यम्। गुह्यम्। नाम। गोनाम्॥ ३॥
एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात्॥ ४॥
एषः। स्यः। ते। मधुऽमान्। इन्द्र। सोमः। वृषा। वृष्णे। परि। पवित्रे। अक्षारिति।
सहस्रऽसाः। शतऽसाः। भूरिऽदावा। शश्वत्ऽतमम्। बर्हिः। आ। वाजी। अस्थात्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि।

पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः॥ ५॥ [२२]

एते। सोमाः। अभि। गव्या। सहस्रा। महे। वाजाय। अमृताय। श्रवांसि।

पवित्रेभिः। पवमानाः। असृग्रन्। श्रवस्यवः। न। पृतनाजः। अत्याः॥ ५॥

परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः।

अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजमर्ष॥ ६॥

परि। हि। स्म। पुरुऽहूतः। जनानाम्। विश्वा। असरत्। भोजना। पूयमानः।

अथ। आ। भर। श्येनऽभृत। प्रयांसि। रयिम्। तुञ्जानः। अभि। वाजम्। अर्ष॥ ६॥

एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा।

तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा॥ ७॥

एषः। सुवानः। परि। सोमः। पवित्रे। सर्गः। न। सृष्टः। अदधावत्। अर्वा।

तिग्मे इति। शिशानः। महिषः। न। शृङ्गे इति। गाः। गव्यन्। अभि। शूरः। न। सत्वा॥ ७॥

एषा ययौ परमादन्तरद्रेः कूचित्सतीरूर्वे गा विवेद।

दिवो न विद्युत्स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा॥ ८॥

एषा। आ। ययौ। परमात्। अन्तः। अद्रेः। कूऽचित्। सतीः। ऊर्वे। गाः। विवेद।

दिवः। न। विऽद्युत्। स्तनयन्ती। अभ्रैः। सोमस्य। ते। पवते। इन्द्र। धारा॥ ८॥

उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः।

पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत्॥ ९॥ [२३]

उत। स्म। राशिम्। परि। यासि। गोनाम्। इन्द्रेण। सोम। सऽरथम्। पुनानः।

पूर्वीः। इषः। बृहतीः। जीरदानो इति जीरऽदानो। शिक्ष। शचीऽवः। तव। ताः। उपऽस्तुत्॥ ९॥

[८९ (८८)] [८ उशना काव्यः। पवमानः सोमः। त्रिष्टुप्।]

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि।

त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम्॥ १॥

अयम्। सोमः। इन्द्र। तुभ्यम्। सुन्वे। तुभ्यम्। पवते। त्वम्। अस्य। पाहि।

त्वम्। ह। यम्। चकृषे। त्वम्। ववृषे। इन्दुम्। मदाय। युज्याय। सोमम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त॥ २॥
सः। ईम्। रथः। न। भुरिषाट्। अयोजि। महः। पुरूणि। सातये। वसूनि।
आत्। ईम्। विश्वा। नहुष्याणि। जाता। स्वः॰साता। वने। ऊर्ध्वा। नवन्त॥ २॥
वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः।
विश्ववारो द्रविणोदाइव त्मन्पूषेव धीजवनोऽसि सोम॥ ३॥
वायुः। न। यः। नियुत्वान्। इष्ट॰यामा। नासत्याऽइव। हवे। आ। शम्॰भविष्ठः।
विश्व॰वारः। द्रविणोदाःऽइव। त्मन्। पूषाऽइव। धी॰जवनः। असि। सोम॥ ३॥
इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित्।
पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः॥ ४॥
इन्द्रः। न। यः। महा। कर्माणि। चक्रिः। हन्ता। वृत्राणाम्। असि। सोम। पूः॰भित्।
पैद्वः। न। हि। त्वम्। अहि॰नाम्नाम्। हन्ता। विश्वस्य। असि। सोम। दस्योः॥ ४॥
अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु।
जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम्॥ ५॥
अग्निः। न। यः। वने। आ। सृज्यमानः। वृथा। पाजांसि। कृणुते। नदीषु।
जनः। न। युध्वा। महतः। उपब्दिः। इयर्ति। सोमः। पवमानः। ऊर्मिम्॥ ५॥
एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः।
वृषा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन्॥ ६॥
एते। सोमाः। अति। वाराणि। अव्या। दिव्याः। न। कोशासः। अभ्र॰वर्षाः।
वृषा। समुद्रम्। सिन्धवः। न। नीचीः। सुतासः। अभि। कलशान्। असृग्रन्॥ ६॥
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट्।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः॥ ७॥
शुष्मी। शर्धः। न। मारुतम्। पवस्व। अनभि॰शस्ता। दिव्या। यथा। विट्।
आपः। न। मक्षु। सु॰मतिः। भव। नः। सहस्र॰अप्साः। पृतनाषाट्। न। यज्ञः॥ ७॥
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम॥ ८॥ [२४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

राज्ञः। नु। ते। वरुणस्य। व्रतानि। बृहत्। गभीरम्। तव। सोम। धाम।

शुचिः। त्वम्। असि। प्रियः। न। मित्रः। दक्षाय्यः। अर्यमाऽइव। असि। सोम ॥ ८ ॥

[९० (८९)] [७ उशना काव्यः। पवमानः सोमः। त्रिष्टुप्।]

प्रो स्य वह्निः पथ्याभिरस्यान् दिवो न वृष्टिः पवमान अक्षाः।

सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः॥ १ ॥

प्रो इति। स्यः। वह्निः। पथ्याभिः। अस्यान्। दिवः। न। वृष्टिः। पवमानः। अक्षारिति।

सहस्र॑ऽधारः। असदत्। नि। अस्मे इति। मातुः। उपऽस्थे। वने। आ। च। सोमः॥ १ ॥

राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम्।

अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम्॥ २ ॥

राजा। सिन्धूनाम्। अवसिष्ट। वासः। ऋतस्य। नावम्। आ। अरुहत्। रजिष्ठाम्।

अप्ऽसु। द्रप्सः। ववृधे। श्येनऽजूतः। दुहे। ईम्। पिता। दुहे। ईम्। पितुः। जाम्॥ २ ॥

सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम्।

शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा॥ ३ ॥

सिंहम्। नसन्त। मध्वः। अयासम्। हरिम्। अरुषम्। दिवः। अस्य। पतिम्।

शूरः। युत्ऽसु। प्रथमः। पृच्छते। गाः। अस्य। चक्षसा। परि। पाति। उक्षा॥ ३ ॥

मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम्।

स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति॥ ४ ॥

मधुऽपृष्ठम्। घोरम्। अयासम्। अश्वम्। रथे। युञ्जन्ति। उरुऽचक्रे। ऋष्वम्।

स्वसारः। ईम्। जामयः। मर्जयन्ति। सऽनाभयः। वाजिनम्। ऊर्जयन्ति॥ ४ ॥

चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः।

ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः परि षन्ति पूर्वीः॥ ५ ॥

चतस्रः। ईम्। घृतऽदुहः। सचन्ते। समाने। अन्तः। धरुणे। निऽसत्ताः।

ताः। ईम्। अर्षन्ति। नमसा। पुनानाः। ताः। ईम्। विश्वतः। परि। सन्ति। पूर्वीः॥ ५ ॥

विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य।

असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विष्टम्भः। दिवः। धरुणः। पृथिव्याः। विश्वाः। उत। क्षितयः। हस्ते। अस्य।
असत्। ते। उत्सः। गृणते। नियुत्वान्। मध्वः। अंशुः। पवते। इन्द्रियाय॥ ६॥

वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम॥ ७॥ [२५]
वन्वन्। अवातः। अभि। देवऽवीतिम्। इन्द्राय। सोम। वृत्रऽहा। पवस्व।
शग्धि। महः। पुरुऽचन्द्रस्य। रायः। सुऽवीर्यस्य। पतयः। स्याम॥ ७॥

[९१ (९०)] [६ वसिष्ठो मैत्रावरुणिः। पवमानः सोमः। त्रिष्टुप्।]

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत्।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः॥ १॥
प्र। हिन्वानः। जनिता। रोदस्योः। रथः। न। वाजम्। सनिष्यन्। अयासीत्।
इन्द्रम्। गच्छन्। आयुधा। सम्ऽशिशानः। विश्वा। वसु। हस्तयोः। आऽदधानः॥ १॥

अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषाणामवावशन्त वाणीः।
वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि॥ २॥
अभि। त्रिऽपृष्ठम्। वृषणम्। वयःऽधाम्। आङ्गूषाणाम्। अवावशन्त। वाणीः।
वना। वसानः। वरुणः। न। सिन्धून्। वि। रत्नऽधाः। दयते। वार्याणि॥ २॥

शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान्पृतनासु शत्रून्॥ ३॥
शूरऽग्रामः। सर्वऽवीरः। सहावान्। जेता। पवस्व। सनिता। धनानि।
तिग्मऽआयुधः। क्षिप्रऽधन्वा। समत्ऽसु। अषाळ्हः। सह्वान्। पृतनासु। शत्रून्॥ ३॥

उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरंधी।
अपः सिषासन्नुषसः स्व१र्गाः सं चिक्रदो महो अस्मभ्यं वाजान्॥ ४॥
उरुऽगव्यूतिः। अभयानि। कृण्वन्। समीचीने इति सम्ऽईचीने। आ। पवस्व। पुरंधी इति पुरम्ऽधी।
अपः। सिसासन्। उषसः। स्वः। गाः। सम्। चिक्रदः। महः। अस्मभ्यम्। वाजान्॥ ४॥

मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम्।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मत्सि। सोम। वरुणम्। मत्सि। मित्रम्। मत्सि। इन्द्रम्। इन्दो इति। पवमान। विष्णुम्।
मत्सि। शर्धः। मारुतम्। मत्सि। देवान्। मत्सि। महाम्। इन्द्रम्। इन्दो इति। मदाय॥ ५॥

एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नदुरिता पवस्व।
इन्दो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः॥ ६॥ [२६]

एव। राजाऽइव। क्रतुऽमान्। अमेन। विश्वा। घनिघ्नत्। दुःऽइता। पवस्व।
इन्दो इति। सुऽउक्ताय। वचसे। वयः। धाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

इत्याश्वलायन-संहितायां
सप्तमाष्टके तृतीयोऽध्यायः
समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके चतुर्थोऽध्यायः ॥

[९२ (९१)] [६ कश्यपो मारीचः। पवमानः सोमः। त्रिष्टुप्।]

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी।
दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ॥ १॥

असर्जि। वक्वा। रथ्ये। यथा। आजौ। धिया। मनोता। प्रथमः। मनीषी।
दश। स्वसारः। अधि। सानौ। अव्ये। अजन्ति। वह्निम्। सदनानि। अच्छ॥ १॥

वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः।
प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः॥ २॥

वीती। जनस्य। दिव्यस्य। कव्यैः। अधि। सुवानः। नहुष्येभिः। इन्दुः।
प्र। यः। नृऽभिः। अमृतः। मर्त्येभिः। मर्मृजानः। अविऽभिः। गोभिः। अत्ऽभिः॥ २॥

वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः।
सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति॥ ३॥

वृषा। वृष्णे। रोरुवत्। अंशुः। अस्मै। पवमानः। रुशत्। ईर्ते। पयः। गोः।
सहस्रम्। ऋक्वा। पथिऽभिः। वचःऽवित्। अध्वस्मऽभिः। सूरः। अण्वम्। वि। याति॥ ३॥

रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान्।
वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम्॥ ४॥

रुज। दृळ्हा। चित्। रक्षसः। सदांसि। पुनानः। इन्दो इति। ऊर्णुहि। वि। वाजान्।
वृश्च। उपरिष्टात्। तुजता। वधेन। ये। अन्ति। दूरात्। उपऽनायम्। एषाम्॥ ४॥

स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः।
ये दुष्षहासो वनुषा बृहन्तस्तांस्ते अश्याम पुरुकृत्पुरुक्षो॥ ५॥

सः। प्रत्नऽवत्। नव्यसे। विश्वऽवार। सुऽउक्ताय। पथः। कृणुहि। प्राचः।
ये। दुःऽसहासः। वनुषा। बृहन्तः। तान्। ते। अश्याम। पुरुऽकृत्। पुरुक्षो इति पुरुऽक्षो॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवा पुनानो अपः स्व१र्गा अस्मभ्यं तोका तनयानि भूरि।

शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि॥ ६॥

एव। पुनानः। अपः। स्वः। गाः। अस्मभ्यम्। तोका। तनयानि। भूरि।

शम्। नः। क्षेत्रम्। उरु। ज्योतींषि। सोम। ज्योक्। नः। सूर्यम्। दृशये। रिरीहि॥ ६॥ [१]

[९३ (९२)] [६ कश्यपो मारीचः। पवमानः सोमः। त्रिष्टुप्।]

परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः।

आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः॥ १॥

परि। सुवानः। हरिः। अंशुः। पवित्रे। रथः। सर्जि। सनये। हियानः।

आपत्। श्लोकम्। इन्द्रियम्। पूयमानः। प्रति। देवान्। अजुषत। प्रयःऽभिः॥ १॥

अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ।

सीदन् होतेव सदने चमूषूपेमगमन्नृषयः सप्त विप्राः॥ २॥

अच्छ। नृऽचक्षाः। असरत्। पवित्रे। नाम। दधानः। कविः। अस्य। योनौ।

सीदन्। होताऽइव। सदने। चमूषु। उप। ईम्। अग्मन्। ऋषयः। सप्त। विप्राः॥ २॥

प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यम्।

भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः॥ ३॥

प्र। सुऽमेधाः। गातुऽवित्। विश्वऽदेवः। सोमः। पुनानः। सदः। एति। नित्यम्।

भुवत्। विश्वेषु। काव्येषु। रन्ता। अनु। जनान्। यतते। पञ्च। धीरः॥ ३॥

तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः।

दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः॥ ४॥

तव। त्ये। सोम। पवमान। निण्ये। विश्वे। देवाः। त्रयः। एकादशासः।

दश। स्वधाभिः। अधि। सानौ। अव्ये। मृजन्ति। त्वा। नद्यः। सप्त। यह्वीः॥ ४॥

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त।

ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम्॥ ५॥

तत्। नु। सत्यम्। पवमानस्य। अस्तु। यत्र। विश्वे। कारवः। सम्ऽनसन्त।

ज्योतिः। यत्। अह्ने। अकृणोत्। ऊँ इति। लोकम्। प्र। आवत्। मनुम्। दस्यवे। कः। अभीकम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः।
सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु॥ ६॥ [२]
परि। सद्मऽइव। पशुऽमन्ति। होता। राजा। न। सत्यः। सम्ऽइतीः। इयानः।
सोमः। पुनानः। कलशान्। अयासीत्। सीदन्। मृगः। न। महिषः। वनेषु॥ ६॥

[९४ (९३)] [५ नोधा गौतमः। पवमानः सोमः। त्रिष्टुप्।]

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी॥ १॥
साकम्ऽउक्षः। मर्जयन्त। स्वसारः। दश। धीरस्य। धीतयः। धनुत्रीः।
हरिः। परि। अद्रवत्। जाः। सूर्यस्य। द्रोणम्। ननक्षे। अत्यः। न। वाजी॥ १॥
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः।
मर्यो न योषामभि निष्कृतं सन्त्सं गच्छते कलश उस्रियाभिः॥ २॥
सम्। मातृऽभिः। न। शिशुः। वावशानः। वृषा। दधन्वे। पुरुऽवारः। अत्ऽभिः।
मर्यः। न। योषाम्। अभि। निःऽकृतम्। यन्। सम्। गच्छते। कलशे। उस्रियाभिः॥ २॥
उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः॥ ३॥
उत। प्र। पिप्ये। ऊधः। अघ्न्यायाः। इन्दुः। धाराभिः। सचते। सुऽमेधाः।
मूर्धानम्। गावः। पयसा। चमूषु। अभि। श्रीणन्ति। वसुऽभिः। न। निक्तैः॥ ३॥
स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः।
रथिरायतामुशती पुरंधिरस्मद्र्य१गा दावने वसूनाम्॥ ४॥
सः। नः। देवेभिः। पवमान। रद। इन्दो इति। रयिम्। अश्विनम्। वावशानः।
रथिरायताम्। उशती। पुरम्ऽधिः। अस्मद्र्यक्। आ। दावने। वसूनाम्॥ ४॥
नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम्।
प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात्॥ ५॥ [३]
नु। नः। रयिम्। उप। मास्व। नृऽवन्तम्। पुनानः। वाताप्यम्। विश्वऽचन्द्रम्।
प्र। वन्दितुः। इन्दो इति। तारि। आयुः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[९५ (९४)] [५ कण्वो घौरः। पवमानः सोमः। त्रिष्टुप्।]

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूर्ये न विशः।
अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म॥ १॥
अधि। यत्। अस्मिन्। वाजिनिऽइव। शुभः। स्पर्धन्ते। धियः। सूर्ये। न। विशः।
अपः। वृणानः। पवते। कविऽयन्। व्रजम्। न। पशुऽवर्धनाय। मन्म॥ १॥

द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त।
धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम्॥ २॥
द्विता। विऽऊर्ण्वन्। अमृतस्य। धाम। स्वःऽविदे। भुवनानि। प्रथन्त।
धियः। पिन्वानाः। स्वसरे। न। गावः। ऋतऽयन्तीः। अभि। वावश्रे। इन्दुम्॥ २॥

परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा।
देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः॥ ३॥
परि। यत्। कविः। काव्या। भरते। शूरः। न। रथः। भुवनानि। विश्वा।
देवेषु। यशः। मर्ताय। भूषन्। दक्षाय। रायः। पुरुऽभूषु। नव्यः॥ ३॥

श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति।
श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ॥ ४॥
श्रिये। जातः। श्रिये। आ। निः। इयाय। श्रियम्। वयः। जरितृऽभ्यः। दधाति।
श्रियम्। वसानाः। अमृतऽत्वम्। आयन्। भवन्ति। सत्या। सम्ऽइथा। मितऽद्रौ॥ ४॥

इषमूर्जमभ्य१र्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान्।
विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून्॥ ५॥ [४]
इषम्। ऊर्जम्। अभि। अर्ष। अश्वम्। गाम्। उरु। ज्योतिः। कृणुहि। मत्सि। देवान्।
विश्वानि। हि। सुऽसहा। तानि। तुभ्यम्। पवमान। बाधसे। सोम। शत्रून्॥ ५॥

[९६ (९५)] [५ प्रस्कण्वः काण्वः। पवमानः सोमः। त्रिष्टुप्।]

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कनिक्रन्ति । हरिः । आ । सृज्यमानः । सीदन् । वनस्य । जठरे । पुनानः ।
नृऽभिः । यतः । कृणुते । निःऽनिजम् । गाः । अतः । मतीः । जनयत । स्वधाभिः ॥ १ ॥

हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।
देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥ २ ॥

हरिः । सृजानः । पथ्याम् । ऋतस्य । इयर्ति । वाचम् । अरिताऽइव । नावम् ।
देवः । देवानाम् । गुह्यानि । नाम । आविः । कृणोति । बर्हिषि । प्रऽवाचे ॥ २ ॥

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥ ३ ॥

अपाम्ऽइव । इत् । ऊर्मयः । तर्तुराणाः । प्र । मनीषाः । ईरते । सोमम् । अच्छ ।
नमस्यन्तीः । उप । च । यन्ति । सम् । च । आ । च । विशन्ति । उशतीः । उशन्तम् ॥ ३ ॥

तं मर्मृजानः महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।
तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥ ४ ॥

तम् । मर्मृजानम् । महिषम् । न । सानौ । अंशुम् । दुहन्ति । उक्षणम् । गिरिऽस्थाम् ।
तम् । वावशानम् । मतयः । सचन्ते । त्रितः । बिभर्ति । वरुणम् । समुद्रे ॥ ४ ॥

इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।
इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥ ५ ॥ [५]

इष्यन् । वाचम् । उपवक्ताऽइव । होतुः । पुनानः । इन्दो इति । वि । स्य । मनीषाम् ।
इन्द्रः । च । यत् । क्षयथः । सौभगाय । सुऽवीर्यस्य । पतयः । स्याम ॥ ५ ॥

[९७ (९६)] [२४ प्रतर्दनो दैवोदासिः । पवमानः सोमः । त्रिष्टुप् ।]

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ १ ॥

प्र । सेनाऽनीः । शूरः । अग्रे । रथानाम् । गव्यन् । एति । हर्षते । अस्य । सेना ।
भद्रान् । कृण्वन् । इन्द्रऽहवान् । सखिऽभ्यः । आ । सोमः । वस्त्रा । रभसानि । दत्ते ॥ १ ॥

समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।
आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्। अस्य। हरिम्। हरयः। मृजन्ति। अश्वऽहयैः। अनिऽशितम्। नमःऽभिः।

आ। तिष्ठति। रथम्। इन्द्रस्य। सखा। विद्वान्। एन। सुऽमतिम्। याति। अच्छ॥ २॥

स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः।

कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः॥ ३॥

सः। नः। देव। देवऽताते। पवस्व। महे। सोम। प्सरसे। इन्द्रऽपानः।

कृण्वन्। अपः। वर्षयन्। द्याम्। उत। इमाम्। उरोः। आ। नः। वरिवस्य। पुनानः॥ ३॥

अजीतयेऽहतये पवस्य स्वस्तये सर्वतातये बृहते।

तदुशन्ति विश्वे इमे सखायस्तदहं वश्मि पवमान सोम॥ ४॥

अजीतये। अहतये। पवस्व। स्वस्तये। सर्वऽतातये। बृहते।

तत्। उशन्ति। विश्वे। इमे। सखायः। तत्। अहम्। वश्मि। पवमान। सोम॥ ४॥

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।

जनितागनेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः॥ ५॥ [६]

सोमः। पवते। जनिता। मतीनाम्। जनिता। दिवः। जनिता। पृथिव्याः।

जनिता। अग्नेः। जनिता। सूर्यस्य। जनिता। इन्द्रस्य। जनिता। उत। विष्णोः॥ ५॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्।

श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्॥ ६॥

ब्रह्मा। देवानाम्। पदऽवीः। कवीनाम्। ऋषिः। विप्राणाम्। महिषः। मृगाणाम्।

श्येनः। गृध्राणाम्। स्वऽधितिः। वनानाम्। सोमः। पवित्रम्। अति। एति। रेभन्॥ ६॥

प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः।

अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन्॥ ७॥

प्र। अवीविपत्। वाचः। ऊर्मिम्। न। सिन्धुः। गिरः। सोमः। पवमानः। मनीषाः।

अन्तरिति। पश्यन्। वृजना। इमा। अवराणि। आ। तिष्ठति। वृषभः। गोषु। जानन्॥ ७॥

स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष।

इन्द्रायेन्द्रो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन्॥ ८॥

सः। मत्सरः। पृत्ऽसु। वन्वन्। अवातः। सहस्रऽरेताः। अभि। वाजम्। अर्ष।

इन्द्राय। इन्दो इति। पवमानः। मनीषी। अंशोः। ऊर्मिम्। ईरय। गाः। इषण्यन्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय।

सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति॥ ९॥

परि। प्रियः। कलशे। देवऽवातः। इन्द्राय। सोमः। रण्यः। मदाय।

सहस्रऽधारः। शतऽवाजः। इन्दुः। वाजी। न। सप्तिः। समना। जिगाति॥ ९॥

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ।

अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः॥ १०॥ [७]

सः। पूर्व्यः। वसुऽवित्। जायमानः। मृजानः। अप्ऽसु। दुदुहानः। अद्रौ।

अभिशस्तिऽपाः। भुवनस्य। राजा। विदत्। गातुम्। ब्रह्मणे। पूयमानः॥ १०॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः।

वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः॥ ११॥

त्वया। हि। नः। पितरः। सोम। पूर्वे। कर्माणि। चक्रुः। पवमान। धीराः।

वन्वन्। अवातः। परिऽधीन्। अप। ऊर्णु। वीरेभिः। अश्वैः। मघऽवा। भव। नः॥ ११॥

यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान्।

एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि॥ १२॥

यथा। अपवथाः। मनवे। वयःऽधाः। अमित्रऽहा। वरिवःऽवित्। हविष्मान्।

एव। पवस्व। द्रविणम्। दधानः। इन्द्रे। सम्। तिष्ठ। जनय। आयुधानि॥ १२॥

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये।

अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः॥ १३॥

पवस्व। सोम। मधुऽमान्। ऋतऽवा। अपः। वसानः। अधि। सानौ। अव्ये।

अव। द्रोणानि। घृतऽवन्ति। सीद। मदिन्ऽतमः। मत्सरः। इन्द्रऽपानः॥ १३॥

वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ।

सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः॥ १४॥

वृष्टिम्। दिवः। शतऽधारः। पवस्व। सहस्रऽसाः। वाजऽयुः। देवऽवीतौ।

सम्। सिन्धुऽभिः। कलशे। वावशानः। सम्। उस्रियाभिः। प्रऽतिरन्। नः। आयुः॥ १४॥

एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः।

पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा॥ १५॥ [८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एषः। स्यः। सोमः। मतिऽभिः। पुनानः। अत्यः। न। वाजी। तरति। इत्। अरातीः।

पयः। न। दुग्धम्। अदितेः। इषिरम्। उरुऽइव। गातुः। सुऽयमः। न। वोळ्हा॥ १५॥

स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम।

अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम॥ १६॥

सुऽआयुधः। सोतृऽभिः। पूयमानः। अभि। अर्ष। गुह्यम्। चारु। नाम।

अभि। वाजम्। सप्तिःऽइव। श्रवस्या। अभि। वायुम्। अभि। गाः। देव। सोम॥ १६॥

शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन।

कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन्॥ १७॥

शिशुम्। जज्ञानम्। हर्यतम्। मृजन्ति। शुम्भन्ति। वह्निम्। मरुतः। गणेन।

कविः। गीःऽभिः। काव्येन। कविः। सन्। सोमः। पवित्रम्। अति। एति। रेभन्॥ १७॥

ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम्।

तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप्॥ १८॥

ऋषिऽमनः। यः। ऋषिऽकृत्। स्वःऽसाः। सहस्रऽनीथः। पदऽवीः। कवीनाम्।

तृतीयम्। धाम। महिषः। सिसासन्। सोमः। विऽराजम्। अनु। राजति। स्तुप्॥ १८॥

चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत्।

अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति॥ १९॥

चमूऽसत्। श्येनः। शकुनः। विऽभृत्वा। गोऽविन्दुः। द्रप्सः। आयुधानि। बिभ्रत्।

अपाम्। ऊर्मिम्। सचमानः। समुद्रम्। तुरीयम्। धाम। महिषः। विवक्ति॥ १९॥

मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानाम्।

वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वो३रा विवेश॥ २०॥ [९]

मर्यः। न। शुभ्रः। तन्वम्। मृजानः। अत्यः। न। सृत्वा। सनये। धनानाम्।

वृषाऽइव। यूथा। परि। कोशम्। अर्षन्। कनिक्रदत्। चम्वोः। आ। विवेश॥ २०॥

पवस्वेन्दो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष।

क्रीळञ्चम्वो३रा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु॥ २१॥

पवस्व। इन्दो इति। पवमानः। महःऽभिः। कनिक्रदत्। परि। वाराणि। अर्ष।

क्रीळन्। चम्वोः। आ। विश। पूयमानः। इन्द्रम्। ते। रसः। मदिरः। ममत्तु॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश।
साम कृण्वन्त्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम्॥ २२॥
प्र। अस्य। धाराः। बृहतीः। असृग्रन्। अक्तः। गोभिः। कलशान्। आ। विवेश।
साम। कृण्वन्। सामन्यः। विपःऽचित्। क्रन्दन्। एति। अभि। सख्युः। न। जामिम्॥ २२॥
अपघ्नन्नेषि पवमान शत्रुम् प्रियां न जारो अभिगीत इन्दुः।
सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता॥ २३॥
अपऽघ्नन्। एषि। पवमान। शत्रून्। प्रियाम्। न। जारः। अभिऽगीतः। इन्दुः।
सीदन्। वनेषु। शकुनः। न। पत्वा। सोमः। पुनानः। कलशेषु। सत्ता॥ २३॥
आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः।
हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनाम्॥ २४॥ [१०] {५}
आ। ते। रुचः। पवमानस्य। सोम। योषाऽइव। यन्ति। सुऽदुघाः। सुऽधाराः।
हरिः। आऽनीतः। पुरुऽवारः। अप्ऽसु। अचिक्रदत्। कलशे। देवऽयूनाम्॥ २४॥

[९८ (९७)] [५८ : १-३ वसिष्ठोमैत्रावरुणिः, ४-६ इन्द्रप्रमतिर्वासिष्ठः, ७-९ वृषगणार्वासिष्ठः, १०-१२ मन्युर्वासिष्ठः, १३-१५ उपमन्युर्वासिष्ठः, १६-१८ व्याघ्रपाद् वासिष्ठ, १९-२१ शक्तिर्वासिष्ठः, २२-२४ कर्णश्रुद् वासिष्ठ, २५-२७ मृळीको वासिष्ठः, २८-३० वसुक्रोर्वासिष्ठः, ३१-४४ पराशरः शाक्त्यः, ४५-५८ कुत्स आङ्गिरसः। पवमानः सोमः। त्रिष्टुप्।]

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम्।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमान्ति होता॥ १॥
अस्य। प्रेषा। हेमना। पूयमानः। देवः। देवेभिः। सम्। अपृक्त। रसम्।
सुतः। पवित्रम्। परि। एति। रेभन्। मिताऽइव। सद्म। पशुऽमन्ति। होता॥ १॥
भद्रा वस्त्रा समन्या३ वसानो महान् कविर्निवचनानि शंसन्।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ॥ २॥
भद्रा। वस्त्रा। समन्या। वसानः। महान्। कविः। निऽवचनानि। शंसन्।
आ। वच्यस्व। चम्वोः। पूयमानः। विऽचक्षणः। जागृविः। देवऽवीतौ॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे।

अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः॥ ३॥

सम्। ऊँ इति। प्रियः। मृज्यन्ते। सानौ। अव्यै। यशःऽतरः। यशसाम्। क्षैतः। अस्मे इति।

अभि। स्वर। धन्व। पूयमानः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय।

स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः॥ ४॥

प्र। गायत। अभि। अर्चाम। देवान्। सोमम्। हिनोत। महते। धनाय।

स्वादुः। पवाते। अति। वारम्। अव्यम्। आ। सीदाति। कलशम्। देवऽयुः। नः॥ ४॥

इन्दुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय।

नृभिः स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय॥ ५॥ [११]

इन्दुः। देवानाम्। उप। सख्यम्। आऽयन्। सहस्रऽधारः। पवते। मदाय।

नृऽभिः। स्तवानः। अनु। धाम। पूर्वम्। अगन्। इन्द्रम्। महते। सौभगाय॥ ५॥

स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय।

देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः॥ ६॥

स्तोत्रे। राये। हरिः। अर्ष। पुनानः। इन्द्रम्। मदः। गच्छतु। ते। भराय।

देवैः। याहि। सऽरथम्। राधः। अच्छ। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति।

महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन्॥ ७॥

प्र। काव्यम्। उशनाऽइव। ब्रुवाणः। देवः। देवानाम्। जनिम। विवक्ति।

महिऽव्रतः। शुचिऽबन्धुः। पावकः। पदा। वराहः। अभि। एति। रेभन्॥ ७॥

प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः।

आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम्॥ ८॥

प्र। हंसासः। तृपलम्। मन्युम्। अच्छ। अमात्। अस्तम्। वृषऽगणाः। अयासुः।

आङ्गूष्यम्। पवमानम्। सखायः। दुःऽमर्षम्। साकम्। प्र। वदन्ति। वाणम्॥ ८॥

स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः।

परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। रंहते। उरुऽगायस्य। जूतिम्। वृथा। क्रीळन्तम्। मिमते। न। गावः।
परीणसम्। कृणुते। तिग्मऽशृङ्गः। दिवा। हरिः। ददृशे। नक्तम्। ऋज्रः॥ ९॥

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय।
हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन् वृजनस्य राजा॥ १०॥ [१२]

इन्दुः। वाजी। पवते। गोऽन्योघाः। इन्द्रे। सोमः। सहः। इन्वन्। मदाय।
हन्ति। रक्षः। बाधते। परि। अरातीः। वरिवः। कृण्वन्। वृजनस्य। राजा॥ १०॥

अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय॥ ११॥

अध। धारया। मध्वा। पृचानः। तिरः। रोम। पवते। अद्रिऽदुग्धः।
इन्दुः। इन्द्रस्य। सख्यम्। जुषाणः। देवः। देवस्य। मत्सरः। मदाय॥ ११॥

अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन्।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये॥ १२॥

अभि। प्रियाणि। पवते। पुनानः। देवः। देवान्। स्वेन। रसेन। पृञ्चन्।
इन्दुः। धर्माणि। ऋतुऽथा। वसानः। दश। क्षिपः। अव्यत। सानौ। अव्ये॥ १२॥

वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्याम्।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम्॥ १३॥

वृषा। शोणः। अभिऽकनिक्रदत्। गाः। नदयन्। एति। पृथिवीम्। उत। द्याम्।
इन्द्रस्यऽइव। वग्नुः। आ। शृण्वे। आजौ। प्रऽचेतयन्। अर्षति। वाचम्। आ। इमाम्॥ १३॥

रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम्।
पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः॥ १४॥

रसाय्यः। पयसा। पिन्वमानः। ईरयन्। एषि। मधुऽमन्तम्। अंशुम्।
पवमानः। सम्ऽतनिम्। एषि। कृण्वन्। इन्द्राय। सोम। परिऽसिच्यमानः॥ १४॥

एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नैः।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः॥ १५॥ [१३]

एव। पवस्व। मदिरः। मदाय। उदऽग्राभस्य। नमयन्। वधःऽस्नैः।
परि। वर्णम्। भरमाणः। रुशन्तम्। गव्युः। नः। अर्ष। परि। सोम। सिक्तः॥ १५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जुष्ट्वी न इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन्।

घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये॥ १६॥

जुष्ट्वी। नः। इन्दो इति। सुऽपथा। सुऽगानि। उरौ। पवस्व। वरिवांसि। कृण्वन्।

घनाऽइव। विष्वक्। दुःऽइतानि। विऽघ्नन्। अधि। स्नुना। धन्व। सानौ। अव्ये॥ १६॥

वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम्।

स्तुकेव वीता धन्वा विचिन्वन्बन्धूँरिमाँ अवराँ इन्दो वायून्॥ १७॥

वृष्टिम्। नः। अर्ष। दिव्याम्। जिगत्नुम्। इळाऽवतीम्। शम्ऽगयीम्। जीरऽदानुम्।

स्तुकाऽइव। वीता। धन्व। विऽचिन्वन्। बन्धून्। इमान्। अवरान्। इन्दो इति। वायून्॥ १७॥

ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम।

अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान्॥ १८॥

ग्रन्थिम्। न। वि। स्य। ग्रथितम्। पुनानः। ऋजुम्। च। गातुम्। वृजिनम्। च। सोम।

अत्यः। न। क्रदः। हरिः। आ। सृजानः। मर्यः। देव। धन्व। पस्त्यऽवान्॥ १८॥

जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये।

सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये॥ १९॥

जुष्टः। मदाय। देवऽताते। इन्दो इति। परि। स्नुना। धन्व। सानौ। अव्ये।

सहस्रऽधारः। सुरभिः। अदब्धः। परि। स्रव। वाजऽसातौ। नृऽसह्ये॥ १९॥

अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ।

एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै॥ २०॥ [१४]

अरश्मानः। ये। अरथाः। अयुक्ताः। अत्यासः। न। ससृजानासः। आजौ।

एते। शुक्रासः। धन्वन्ति। सोमाः। देवासः। तान्। उप। यात। पिबध्यै॥ २०॥

एवा न इन्दो अभि देववीतिं परि स्रव नभो अर्णश्चमूषु।

सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम्॥ २१॥

एव। नः। इन्दो इति। अभि। देवऽवीतिम्। परि। स्रव। नभः। अर्णः। चमूषु।

सोमः। अस्मभ्यम्। काम्यम्। बृहन्तम्। रयिम्। ददातु। वीरऽवन्तम्। उग्रम्॥ २१॥

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षोरनीके।

आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम्॥ २२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तक्षत्। यदि। मनसः। वेनतः। वाक्। ज्येष्ठस्य। वा। धर्मणि। क्षोः। अनीके।
आत्। ईम्। आयन्। वरम्। आ। वावशानाः। जुष्टम्। पतिम्। कलशे। गावः। इन्दुम्॥ २२॥

प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः।
धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम॥ २३॥

प्र। दानुऽदः। दिव्यः। दानुऽपिन्वः। ऋतम्। ऋताय। पवते। सुऽमेधाः।
धर्मा। भुवत्। वृजन्यस्य। राजा। प्र। रश्मिऽभिः। दशऽभिः। भारि। भूम॥ २३॥

पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम्।
द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विन्दुः॥ २४॥

पवित्रेभिः। पवमानः। नृऽचक्षाः। राजा। देवानाम्। उत। मर्त्यानाम्।
द्विता। भुवत्। रयिऽपतिः। रयीणाम्। ऋतम्। भरत्। सुऽभृतम्। चारु। इन्दुः॥ २४॥

अर्वाँइव श्रवसे सातिमच्छेन्द्रस्य वायोरभि वीतिमर्ष।
स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः॥ २५॥ [१५]

अर्वान्ऽइव। श्रवसे। सातिम्। अच्छ। इन्द्रस्य। वायोः। अभि। वीतिम्। अर्ष।
सः। नः। सहस्रा। बृहतीः। इषः। दाः। भव। सोम। द्रविणःऽवित्। पुनानः॥ २५॥

देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः।
आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः॥ २६॥

देवऽअव्यः। नः। परिऽसिच्यमानाः। क्षयम्। सुऽवीरम्। धन्वन्तु। सोमाः।
आऽयज्यवः। सुऽमतिम्। विश्वऽवाराः। होतारः। न। दिविऽयजः। मन्द्रऽतमाः॥ २६॥

एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः।
महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः॥ २७॥

एव। देव। देवऽताते। पवस्व। महे। सोम। प्सरसे। देवऽपानः॥ महः। चित्।
हि। स्मसि। हिताः। सऽमर्ये। कृधि। सुऽस्थाने इति सुऽस्थाने। रोदसी इति। पुनानः॥ २७॥

अश्वो न क्रदो वृषभिर्युजानः सिंहो न भीमो मनसो जवीयान्।
अर्वाचीनैः पथिभिर्ये रजिष्ठा आ पवस्व सौमनसं न इन्दो॥ २८॥

अश्वः। न। क्रदः। वृषऽभिः। युजानः। सिंहः। न। भीमः। मनसः। जवीयान्।
अर्वाचीनैः। पथिऽभिः। ये। रजिष्ठाः। आ। पवस्व। सौमनसम्। नः। इन्दो इति॥ २८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शतं धारा देवजाता असृग्रन्त्सहस्रमेनाः कवयो मृजन्ति।

इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य॥ २९॥

शतम्। धाराः। देवऽजाताः। असृग्रन्। सहस्रम्। एनाः। कवयः। मृजन्ति।

इन्दो इति। सनित्रम्। दिवः। आ। पवस्व। पुरःऽएता। असि। महतः। धनस्य॥ २९॥

दिवो न सर्गा अससृग्रमह्नां राजा न मित्रं प्र मिनाति धीरः।

पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिम्॥ ३०॥ [१६]

दिवः। न। सर्गाः। अससृग्रम्। अह्नाम्। राजा। न। मित्रम्। प्र। मिनाति। धीरः।

पितुः। न। पुत्रः। क्रतुऽभिः। यतानः। आ। पवस्व। विशे। अस्यै। अजीतिम्॥ ३०॥

प्र ते धारा मधुमतीरसृग्रन्वारान्यत्पूतो अत्येष्यव्यान्।

पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः॥ ३१॥

प्र। ते। धाराः। मधुऽमतीः। असृग्रन्। वारान्। यत्। पूतः। अतिऽएषि। अव्यान्।

पवमान। पवसे। धाम। गोनाम्। जज्ञानः। सूर्यम्। अपिन्वः। अर्कैः॥ ३१॥

कनिक्रददनु पन्थामृतस्य शुक्रो वि भास्यमृतस्य धाम।

स इन्द्राय पवसे मत्सरवान् हिन्वानो वाचं मतिभिः कवीनाम्॥ ३२॥

कनिक्रदत्। अनु। पन्थाम्। ऋतस्य। शुक्रः। वि। भासि। अमृतस्य। धाम।

सः। इन्द्राय। पवसे। मत्सरऽवान्। हिन्वानः। वाचम्। मतिऽभिः। कवीनाम्॥ ३२॥

दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ।

एन्दो विश कलशं सोमधानं क्रन्दन्निहि सूर्यस्योप रश्मिम्॥ ३३॥

दिव्यः। सुऽपर्णः। अव। चक्षि। सोम। पिन्वन्। धाराः। कर्मणा। देवऽवीतौ।

आ। इन्दो इति। विश। कलशम्। सोमऽधानम्। क्रन्दन्। इहि। सूर्यस्य। उप। रश्मिम्॥ ३३॥

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम्।

गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः॥ ३४॥

तिस्रः। वाचः। ईरयति। प्र। वह्निः। ऋतस्य। धीतिम्। ब्रह्मणः। मनीषाम्।

गावः। यन्ति। गोऽपतिम्। पृच्छमानाः। सोमम्। यन्ति। मतयः। वावशानाः॥ ३४॥

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः।

सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते॥ ३५॥ [१७]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमम्। गावः। धेनवः। वावशानाः। सोमम्। विप्राः। मतिऽभिः। पृच्छमानाः।
सोमः। सुतः। पूयते। अज्यमानः। सोमे। अर्काः। त्रिऽस्तुभः। सम्। नवन्ते ॥ ३५ ॥

एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति।
इन्द्रमा विश बृहता रवेण वर्धया वाचं जनया पुरंधिम् ॥ ३६ ॥

एव। नः। सोम। परिऽसिच्यमानः। आ। पवस्व। पूयमानः। स्वस्ति।
इन्द्रम्। आ। विश। बृहता। रवेन। वर्धय। वाचम्। जनय। पुरम्ऽधिम् ॥ ३६ ॥

आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ ३७ ॥

आ। जागृविः। विप्रः। ऋता। मतीनाम्। सोमः। पुनानः। असदत्। चमूषु।
सपन्ति। यम्। मिथुनासः। निऽकामाः। अध्वर्यवः। रथिरासः। सुऽहस्ताः ॥ ३७ ॥

स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः।
प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥ ३८ ॥

सः। पुनानः। उप। सूरे। न। धाता। आ। उभे इति। अप्राः। रोदसी इति। वि। सः। आवरित्यावः।
प्रिया। चित्। यस्य। प्रियसासः। ऊती। सः। तु। धनम्। कारिणे। न। प्र। यंसत् ॥ ३८ ॥

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत्।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥ ३९ ॥

सः। वर्धिता। वर्धनः। पूयमानः। सोमः। मीढ्वान्। अभि। नः। ज्योतिषा। आवीत्।
येन। नः। पूर्वे। पितरः। पदऽज्ञाः। स्वःऽविदः। अभि। गाः। अद्रिम्। उष्णन् ॥ ३९ ॥

अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः ॥ ४० ॥ [१८]

अक्रान्। समुद्रः। प्रथमे। विऽधर्मन्। जनयन्। प्रऽजाः। भुवनस्य। राजा।
वृषा। पवित्रे। अधि। सानौ। अव्ये। बृहत्। सोमः। ववृधे। सुवानः। इन्दुः ॥ ४० ॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ ४१ ॥

महत्। तत्। सोमः। महिषः। चकार। अपाम्। यत्। गर्भः। अवृणीत। देवान्।
अदधात्। इन्द्रे। पवमानः। ओजः। अजनयत्। सूर्ये। ज्योतिः। इन्दुः ॥ ४१ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः।

मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम॥ ४२॥

मत्सि। वायुम्। इष्टये। राधसे। च। मत्सि। मित्रावरुणा। पूयमानः।

मत्सि। शर्धः। मारुतम्। मत्सि। देवान्। मत्सि। द्यावापृथिवी इति। देव। सोम॥ ४२॥

ऋजुः पवस्व वृजिनस्य हन्तापामीवां बाधमानो मृधश्च।

अभिश्रीणन्पयः पयसाभि गोनामिन्द्रस्य त्वं तव वयं सखायः। ४३॥

ऋजुः। पवस्व। वृजिनस्य। हन्ता। अप। अमीवाम्। बाधमानः। मृधः। च।

अभिऽश्रीणन्। पयः। पयसा। अभि। गोनाम्। इन्द्रस्य। त्वम्। तव। वयम्। सखायः॥ ४३॥

मध्वः सूदं पवस्व वस्व उत्सं वीरं च आ पवस्वा भगं च।

स्वदस्वेन्द्राय पवमान इन्दो रयिं च न आ पवस्वा समुद्रात्॥ ४४॥

मध्वः। सूदम्। पवस्व। वस्वः। उत्सम्। वीरम्। च। नः। आ। पवस्व। भगम्। च।

स्वदस्व। इन्द्राय। पवमानः। इन्दो इति। रयिम्। च। नः। आ। पवस्व। समुद्रात्॥ ४४॥

सोमः सुतो धारयात्यो न हित्वा सिन्धुर्न निम्नमभि वाज्यक्षाः।

आ योनिं वन्यमसदत्पुनानः समिन्दुर्गोभिरसरत्समद्भिः॥ ४५॥ [१९]

सोमः। सुतः। धारया। अत्यः। न। हित्वा। सिन्धुः। न। निम्नम्। अभि। वाजी। अक्षारिति।

आ। योनिम्। वन्यम्। असदत्। पुनानः। सम्। इन्दुः। गोभिः। असरत्। सम्। अत्ऽभिः॥ ४५॥

एष स्य ते पवत इन्द्र सोमश्चमूषु धीर उशते तवस्वान्।

स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि॥ ४६॥

एषः। स्यः। ते। पवते। इन्द्र। सोमः। चमूषु। धीरः। उशते। तवस्वान्।

स्वःऽचक्षाः। रथिरः। सत्यऽशुष्मः। कामः। न। यः। देवऽयताम्। असर्जि॥ ४६॥

एष प्रत्नेन वयसा पुनानस्तिरो वर्पांसि दुहितुर्दधानः।

वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन्॥ ४७॥

एषः। प्रत्नेन। वयसा। पुनानः। तिरः। वर्पांसि। दुहितुः। दधानः।

वसानः। शर्म। त्रिऽवरूथम्। अप्ऽसु। होताऽइव। याति। समनेषु। रेभन्॥ ४७॥

नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः।

अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा॥ ४८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नु। नः। त्वम्। रथिरः। देव। सोम। परि। स्रव। चम्वोः। पूयमानः।
अप्ऽसु। स्वादिष्ठः। मधुऽमान्। ऋतऽवा। देवः। न। यः। सविता। सत्यऽमन्मा॥ ४८॥

अभि वायुं वीत्यर्षा गृणानो३भि मित्रावरुणा पूयमानः।
अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम्॥ ४९॥

अभि। वायुम्। वीती। अर्ष। गृणानः। अभि। मित्रावरुणा। पूयमानः।
अभि। नरम्। धीऽजवनम्। रथेऽस्थाम्। अभि। इन्द्रम्। वृषणम्। वज्रऽबाहुम्॥ ४९॥

अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः।
अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम॥ ५०॥ [२०]

अभि। वस्त्रा। सुऽवसनानि। अर्ष। अभि। धेनूः। सुऽदुघाः। पूयमानः।
अभि। चन्द्रा। भर्तवे। नः। हिरण्या। अभि। अश्वान्। रथिनः। देव। सोम॥ ५०॥

अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः।
अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः॥ ५१॥

अभि। नः। अर्ष। दिव्या। वसूनि। अभि। विश्वा। पार्थिवा। पूयमानः।
अभि। येन। द्रविणम्। अश्नवाम। अभि। आर्षेयम्। जमदग्निऽवत्। नः॥ ५१॥

अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व।
ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात्॥ ५२॥

अया। पवा। पवस्व। एना। वसूनि। माँश्चत्वे। इन्दो इति। सरसि। प्र। धन्व।
ब्रध्नः। चित्। अत्र। वातः। न। जूतः। पुरुऽमेधः। चित्। तकवे। नरम्। दात्॥ ५२॥

उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय॥ ५३॥

उत। नः। एना। पवया। पवस्व। अधि। श्रुते। श्रवाय्यस्य। तीर्थे।
षष्टिम्। सहस्रा। नैगुतः। वसूनि। वृक्षम्। न। पक्वम्। धूनवत्। रणाय॥ ५३॥

महीमे अस्य वृषनाम शूषे माँश्चत्वे वा पृशने वा वधत्रे।
अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः॥ ५४॥

महि। इमे इति। अस्य। वृषनाम। शूषे इति। माँश्चत्वे। वा। पृशने। वा। वधत्रे इति।
अस्वापयत्। निऽगुतः। स्नेहयत्। च। अप। अमित्रान्। अप। अचितः। अच। इतः॥ ५४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सं त्री पवित्रा विततान्येष्यन्वेकं धावसि पूयमानः।

असि भगो असि दात्रस्य दातासि मघवा मघवद्भ्य इन्दो॥ ५५॥ [२१]

सम्। त्री। पवित्रा। वितंतानि। एषि। अनु। एकम्। धावसि। पूयमानः।

असि। भगः। असि। दात्रस्य। दाता। असि। मघऽवा। मघवत्ऽभ्यः। इन्दो इति॥ ५५॥

एष विश्ववित्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा।

द्रप्साँ ईरयन्विदथेष्विन्दुर्वि वारमव्यं समयाति याति॥ ५६॥

एषः। विश्वऽवित्। पवते। मनीषी। सोमः। विश्वस्य। भुवनस्य। राजा।

द्रप्सान्। ईरयन्। विदथेषु। इन्दुः। वि। वारम्। अव्यम्। समया। अति। याति॥ ५६॥

इन्दुं रिहन्ति महिषा अदब्धाः पदे रेभन्ति कवयो न गृध्राः।

हिन्वन्ति धीरा दशभिः क्षिपाभिः समञ्जते रूपमपां रसेन॥ ५७॥

इन्दुम्। रिहन्ति। महिषाः। अदब्धाः। पदे। रेभन्ति। कवयः। न। गृध्राः।

हिन्वन्ति। धीराः। दशऽभिः। क्षिपाभिः। सम्। अञ्जते। रूपम्। अपाम्। रसेन॥ ५७॥

त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत्।

तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ ५८॥ [२२]

त्वया। वयम्। पवमानेन। सोम। भरे। कृतम्। वि। चिनुयाम। शश्वत्।

तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ ५८॥

[९९ (९८)] [१२ अम्बरीषो वार्षागिरः, ऋजिष्वा भारद्वाजश्च।
पवमानः सोमः। अनुष्टुप्, ११ बृहती।]

अभि नो वाजसातमं रयिमर्ष पुरुस्पृहम्। इन्दो सहस्रभर्णसं तुविद्युम्नं विभ्वासहम्॥ १॥

अभि। नः। वाजऽसातमम्। रयिम्। अर्ष। पुरुऽस्पृहम्।

इन्दो इति। सहस्रऽभर्णसम्। तुविऽद्युम्नम्। विभ्वऽसहम्॥ १॥

परि ष्य सुवानो अव्ययं रथे न वर्माव्यत। इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः॥ २॥

परि। स्यः। सुवानः। अव्ययम्। रथे। न। वर्म। अव्यत।

इन्दुः। अभि। द्रुणा। हितः। हियानः। धाराभिः। अक्षारिति॥ २॥

परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः। धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि । स्यः । सुवानः । अक्षारिति । इन्दुः । अव्ये । मदच्युतः ।
धारा । यः । ऊर्ध्वः । अध्वरे । भ्राजा । न । एति । गव्यऽयुः ॥ ३ ॥

स हि त्वं देव शश्वते वसु मर्ताय दाशुषे । इन्दो सहस्रिणं रयिं शतात्मानं विवाससि ॥ ४ ॥

सः । हि । त्वम् । देव । शश्वते । वसु । मर्ताय । दाशुषे ।
इन्दो इति । सहस्रिणम् । रयिम् । शतऽआत्मानम् । विवाससि ॥ ४ ॥

वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः । नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥ ५ ॥

वयम् । ते । अस्य । वृत्रऽहन् । वसो इति । वस्वः । पुरुऽस्पृहः ।
नि । नेदिष्ठऽतमाः । इषः । स्याम । सुम्नस्य । अध्रिगो इत्यध्रिऽगो ॥ ५ ॥

द्विर्यं पञ्च स्वयशसं स्वसारो अद्रिसंहतम । प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ॥ ६ ॥ [२३]

द्विः । यम् । पञ्च । स्वऽयशसम् । स्वसारः । अद्रिऽसंहतम् ।
प्रियम् । इन्द्रस्य । काम्यम् । प्रऽस्नापयन्ति । ऊर्मिणम् ॥ ६ ॥

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण । यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥ ७ ॥

परि । त्यम् । हर्यतम् । हरिम् । बभ्रुम् । पुनन्ति । वारेण ।
यः । देवान् । विश्वान् । इत् । परि । मदेन । सह । गच्छति ॥ ७ ॥

अस्य वो ह्यवसा पान्तो दक्षसाधनम् । यः सूरिषु श्रवो बृहद्दधे स्वर्ण हर्यतः ॥ ८ ॥

अस्य । वः । हि । अवसा । पान्तः । दक्षऽसाधनम् ।
यः । सूरिषु । श्रवः । बृहत् । दधे । स्वः । न । हर्यतः ॥ ८ ॥

स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी । देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वनि ॥ ९ ॥

सः । वाम् । यज्ञेषु । मानवी इति । इन्दुः । जनिष्ट । रोदसी इति ।
देवः । देवी इति । गिरिऽस्थाः । अस्रेधन् । तम् । तुविऽस्वनि ॥ ९ ॥

इन्द्राय सोम पातवे वृत्रघ्ने परि शिच्यसे । नरे च दक्षिणावते देवाय सदनासदे ॥ १० ॥

इन्द्राय । सोम । पातवे । वृत्रऽघ्ने । परि । सिच्यसे । नरे । च । दक्षिणाऽवते । देवाय । सदनऽसदे ॥ १० ॥

ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् ।
अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ॥ ११ ॥

ते । प्रत्नासः । विऽउष्टिषु । सोमाः । पवित्रे । अक्षरन् ।
अपऽप्रोथन्तः । सनुतः । हुरःऽचितः । प्रातरिति । तान् । अप्रऽचेतसः ॥ ११ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं सखायः पुरोरुचं यूयं वयं च सूरयः। अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम्॥ १२॥ [२४]

तम्। सखायः। पुरःऽरुचम्। यूयम्। वयम्। च। सूरयः।

अश्याम। वाजऽगन्ध्यम्। सनेम। वाजऽपस्त्यम्॥ १२॥

[१०० (९९)] [८ रेभसूनू काश्यपौ। पवमानः सोमः। अनुष्टुप्, १ बृहती।]

आ हर्यताय धृष्णवे धनुस्तन्वन्ति पौंस्यम्।

शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः॥ १॥

आ। हर्यताय। धृष्णवे। धनुः। तन्वन्ति। पौंस्यम्।

शुक्राम्। वयन्ति। असुराय। निःऽनिजम्। विपाम्। अग्रे। महीयुवः॥ १॥

अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते। यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे॥ २॥

अध। क्षपा। परिऽकृतः। वाजान्। अभि। प्र। गाहते।

यदि। विवस्वतः। धियः। हरिम्। हिन्वन्ति। यातवे॥ २॥

तमस्य मर्जयामसि मदो य इन्द्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं च सूरय॥ ३॥

तम्। अस्य। मर्जयामसि। मदः। यः। इन्द्रऽपातमः।

यम्। गावः। आसऽभिः। दधुः। पुरा। नूनम्। च। सूरयः॥ ३॥

तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः॥ ४॥

तम्। गाथया। पुराण्या। पुनानम्। अभि। अनूषत।

उतो इति। कृपन्त। धीतयः। देवानाम्। नाम। बिभ्रतीः॥ ४॥

तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम्। दूतं न पूर्वचित्तय आ शासते मनीषिणः॥ ५॥ [२५]

तम्। उक्षमाणम्। अव्यये। वारे। पुनन्ति। धर्णसिम्।

दूतम्। न। पूर्वऽचित्तये। आ। शासते। मनीषिणः॥ ५॥

स पुनानो मदिन्तमः सोमश्चमूषु सीदति। पशौ न रेत आदधत्पतिर्वचस्यते धियः॥ ६॥

सः। पुनानः। मदिन्ऽतमः। सोमः। चमूषु। सीदति।

पशौ। न। रेतः। आऽदधत्। पतिः। वचस्यते। धियः॥ ६॥

स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः। विदे यदासु संददिर्महीरपो वि गाहते॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। मृज्यते। सुकर्मऽभिः। देवः। देवेभ्यः। सुतः।
विदे। यत्। आसु। सम्ऽदधिः। महीः। अपः। वि। गाहते॥ ७॥
सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे। इन्द्राय मत्सरिन्तमश्चमूष्वा नि षीदसि॥ ८॥ [२६]
सुतः। इन्दो इति। पवित्रे। आ। नृऽभिः। यतः। वि। नीयसे।
इन्द्राय। मत्सरिन्ऽतमः। चमूषु। आ। नि। सीदसि॥ ८॥

[१०१ (१००)[९ रेभसूनू काश्यपौ। पवमानः सोमः। अनुष्टुप्।]

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम्। वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः॥ १॥
अभि। नवन्ते। अद्रुहः। प्रियम्। इन्द्रस्य। काम्यम्।
वत्सम्। न। पूर्वे। आयुनि। जातम्। रिहन्ति। मातरः॥ १॥
पुनान इन्दवा भर सोम द्विबर्हसं रयिम्। त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे॥ २॥
पुनानः। इन्दो इति। आ। भर। सोम। द्विऽबर्हसम्। रयिम्।
त्वम्। वसूनि। पुष्यसि। विश्वानि। दाशुषः। गृहे॥ २॥
त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः। त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि॥ ३॥
त्वम्। धियम्। मनःऽयुजम्। सृज। वृष्टिम्। न। तन्यतुः।
त्वम्। वसूनि। पार्थिवा। दिव्या। च। सोम। पुष्यसि॥ ३॥
परि ते जिग्युषो यथा धारा सुतस्य धावति। रंहमाणा व्य१व्ययं वारं वाजीव सानसिः॥ ४॥
परि। ते। जिग्युषः। यथा। धारा। सुतस्य। धावति।
रंहमाणा। वि। अव्ययम्। वारम्। वाजीऽइव। सानसिः॥ ४॥
क्रत्वे दक्षाय नः कवे पवस्व सोम धारया। इन्द्राय पातवे सुतो मित्राय वरुणाय च॥ ५॥ [२७]
क्रत्वे। दक्षाय। नः। कवे। पवस्व। सोम। धारया।
इन्द्राय। पातवे। सुतः। मित्राय। वरुणाय। च॥ ५॥
पवस्व वाजसातमः पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः॥ ६॥
पवस्व। वाजऽसातमः। पवित्रे। धारया। सुतः।
इन्द्राय। सोम। विष्णवे। देवेभ्यः। मधुमत्ऽतमः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वां रि॑हन्ति मा॒तरो॒ हरिं॑ प॒वित्रे॑ अ॒द्रुहः॑। व॒त्सं जा॒तं न धे॒नवः॒ पव॑मान॒ विध॑र्मणि ॥ ७ ॥

त्वाम्। रि॒ह॒न्ति॒। मा॒तरः॑। हरि॑म्। प॒वित्रे॑। अ॒द्रुहः॑।

व॒त्सम्। जा॒तम्। न। धे॒नवः॑। पव॑मान। वि॒ऽध॑र्मणि ॥ ७ ॥

पव॑मान॒ महि॒ श्रव॑श्चि॒त्रेभि॑र्यासि र॒श्मिभिः॑। शर्ध॑न् तमां॑सि जिघ्नसे॒ विश्वा॑नि दा॒शुषो॑ गृ॒हे ॥ ८ ॥

पव॑मान। महि॑। श्रवः॑। चि॒त्रेभिः॑। या॒सि॒। र॒श्मिऽभिः॑।

शर्ध॑न्। तमां॑सि। जि॒घ्न॒से॒। विश्वा॑नि। दा॒शुषः॑। गृ॒हे ॥ ८ ॥

त्वं द्यां च॑ महिव्रत पृथि॒वीं चाति॑ जभ्रिषे। प्रति॑ द्रा॒पिम॑मुञ्चथाः पव॑मान महित्व॒ना ॥ ९ ॥ [२८]

त्वम्। द्याम्। च॒। म॒हि॒ऽव्र॒त॒। पृ॒थि॒वीम्। च॒। अति॑। ज॒भ्रि॒षे॒।

प्रति॑। द्रा॒पिम्। अ॒मु॒ञ्च॒थाः॒। पव॑मान। म॒हि॒ऽत्व॒ना ॥ ९ ॥

इत्याश्वलायन-संहितायां
सप्तमाष्टके
चतुर्थोऽध्यायः
समाप्तः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके पंचमोऽध्यायः॥

[१०२ (१०१)] [(१६) १-३ अन्धीगुः श्यावाश्विः, ४-६ ययातिर्नाहुषः, ७-९ नहुषो मानवः, १०-१२ मनुः सांवरणः, १३-१६ प्रजापतिर्वैश्वामित्रो वाच्यो वा। पवमानः सोमः। अनुष्टुप्, २-३ गायत्र्यौ।]

पुरोजि॑ती वो॒ अन्ध॑सः सु॒ताय॑ मादयि॒त्नवे॑। अप॒ श्वानं॑ श्नथिष्टन॒ सखा॑यो दीर्घजि॒ह्व्य॑म्॥ १॥

पु॒रः॒ऽजि॑ती। वः॒। अन्ध॑सः। सु॒ताय॑। मा॒द॒यि॒त्नवे॑।

अप॑। श्वान॑म्। श्न॒थि॒ष्ट॒न॒। सखा॑यः। दी॒र्घ॒ऽजि॒ह्व्य॑म्॥ १॥

यो धार॑या पाव॒कया॑ परिप्र॒स्यन्द॑ते सु॒तः। इन्दु॒रश्वो॒ न कृत्व्यः॑॥ २॥

यः। धार॑या। पा॒व॒कया॑। प॒रि॒ऽप्र॒स्यन्द॑ते। सु॒तः। इन्दुः॑। अश्वः॑। न। कृत्व्यः॑॥ २॥

तं दु॒रोष॑म॒भी नरः॒ सोमं॑ वि॒श्वाच्या॑ धि॒या। य॒ज्ञं हि॑न्व॒न्त्यद्रि॑भिः॥ ३॥

तम्। दु॒रोष॑म्। अ॒भि। नरः॑। सोम॑म्। वि॒श्वाच्या॑। धि॒या। य॒ज्ञम्। हि॒न्व॒न्ति॒। अद्रि॑ऽभिः॥ ३॥

सु॒तासो॒ मधु॑मत्तमाः॒ सोमा॒ इन्द्रा॑य म॒न्दिनः॑। प॒वित्र॑वन्तो अक्षरन्दे॒वान्ग॑च्छन्तु वो॒ मदाः॑॥ ४॥

सु॒तासः॑। मधु॑मत्ऽतमाः। सोमाः॑। इन्द्रा॑य। म॒न्दिनः॑।

प॒वित्र॑ऽवन्तः। अ॒क्ष॒र॒न्। दे॒वान्। ग॒च्छ॒न्तु॒। वः॒। मदाः॑॥ ४॥

इन्दु॒रिन्द्रा॑य पवत॒ इति॑ दे॒वासो॑ अब्रुवन्। वा॒चस्पति॑र्मखस्यते॒ विश्व॒स्येशा॑न॒ ओज॑सा॥ ५॥ [१]

इन्दुः॑। इन्द्रा॑य। प॒व॒ते॒। इति॑। दे॒वासः॑। अ॒ब्रु॒व॒न्।

वा॒चः। पतिः॑। म॒ख॒स्य॒ते॒। विश्व॑स्य। ईशा॑नः। ओज॑सा॥ ५॥

स॒हस्र॑धारः पवते समु॒द्रो वा॑चमीङ्ख॒यः। सोमः॒ पती॑ रयी॒णां सखेन्द्र॑स्य दि॒वेदि॑वे॥ ६॥

स॒हस्र॑ऽधारः। प॒व॒ते॒। स॒मु॒द्रः। वा॒च॒म्ऽई॒ङ्ख॒यः।

सोमः॑। पतिः॑। र॒यी॒णाम्। सखा॑। इन्द्र॑स्य। दि॒वेऽदि॑वे॥ ६॥

अ॒यं पू॒षा र॒यिर्भगः॒ सोमः॑ पुना॒नो अ॑र्षति। पति॒र्विश्व॑स्य॒ भूम॑नो॒ व्य॑ख्य॒द्रोद॑सी उ॒भे॥ ७॥

अ॒यम्। पू॒षा। र॒यिः। भगः॑। सोमः॑। पु॒ना॒नः। अ॒र्ष॒ति॒।

पतिः॑। विश्व॑स्य। भूम॑नः। वि। अ॒ख्य॒त्। रोद॑सी॒ इति॑। उ॒भे इति॑॥ ७॥

समु॑ प्रि॒या अ॑नूषत॒ गावो॒ मदा॑य॒ घृष्व॑यः। सोमा॑सः कृण्वते प॒थः पव॑मानास॒ इन्द॑वः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्। ॐ इति। प्रियाः। अनूषत। गावः। मदाय। घृष्वयः।

सोमासः। कृण्वते। पथः। पवमानासः। इन्दवः॥ ८॥

य ओजिष्ठस्तमा भर पवमान श्रवाय्यम्। यः पञ्च चर्षणीरभि रयिं येन वनामहै॥ ९॥

यः। ओजिष्ठः। तम्। आ। भर। पवमान। श्रवाय्यम्।

यः। पञ्च। चर्षणीः। अभि। रयिम्। येन। वनामहै॥ ९॥

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः॥ १०॥ [२]

सोमाः। पवन्ते। इन्दवः। अस्मभ्यम्। गातुवित्ऽतमाः।

मित्राः। सुवानाः। अरेपसः। सुऽआध्यः। स्वःऽविदः॥ १०॥

सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन्वसुविदः॥ ११॥

सुस्वानासः। वि। अद्रिऽभिः। चितानाः। गोः। अधि। त्वचि।

इषम्। अस्मभ्यम्। अभितः। सम्। अस्वरन्। वसुऽविदः॥ ११॥

एते पूता विपश्चितः सोमासो दध्याशिरः। सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते॥ १२॥

एते। पूताः। विपःऽचितः। सोमासः। दधिऽआशिरः।

सूर्यासः। न। दर्शतासः। जिगत्नवः। ध्रुवाः। घृते॥ १२॥

प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः। अप श्वानमराधसं हता मखं न भृगवः॥ १३॥

प्र। सुन्वानस्य। अन्धसः। मर्तः। न। वृत। तत्। वचः।

अप। श्वानम्। अराधसम्। हत। मखम्। न। भृगवः॥ १३॥

आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः। सरज्जारो न योषणां वरो न योनिमासदम्॥ १४॥

आ। जामिः। अत्के। अव्यत। भुजे। न। पुत्रः। ओण्योः।

सरत्। जारः। न। योषणाम्। वरः। न। योनिम्। आऽसदम्॥ १४॥

स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदम्॥ १५॥

सः। वीरः। दक्षऽसाधनः। वि। यः। तस्तम्भ। रोदसी इति।

हरिः। पवित्रे। अव्यत। वेधाः। न। योनिम्। आऽसदम्॥ १५॥

अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि।

कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम्॥ १६॥ [३]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अव्यः। वारेभिः। पवते। सोमः। गव्ये। अधि। त्वचि।

कनिक्रदत्। वृषा। हरिः। इन्द्रस्य। अभि। एति। निःऽकृतम्॥ १६॥

[१०३ (१०२)] [८ त्रित आप्त्यः। पवमानः सोमः। उष्णिक्।]

क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुवदध द्विता॥ १॥

क्राणा। शिशुः। महीनाम्। हिन्वन्। ऋतस्य। दीधितिम्॥ विश्वा। परि। प्रिया। भुवत्। अध। द्विता॥ १॥

उप त्रितस्य पाष्यो३रभक्त यद्गुहा पदम्। यज्ञस्य सप्त धामभिरध प्रियम्॥ २॥

उप। त्रितस्य। पाष्योः। अभक्त। यत्। गुहा। पदम्॥ यज्ञस्य। सप्त। धामऽभिः। अध। प्रियम्॥ २॥

त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिम्। मिमीते अस्य योजना वि सुक्रतुः॥ ३॥

त्रीणि। त्रितस्य। धारया। पृष्ठेषु। आ। ईरय। रयिम्॥ मिमीते। अस्य। योजना। वि। सुऽक्रतुः॥ ३॥

जज्ञानं सप्त मातरो वेधामशासत श्रिये। अयं ध्रुवो रयीणां चिकेत यत्॥ ४॥

जज्ञानम्। सप्त। मातरः। वेधाम्। अशासत। श्रिये॥ अयम्। ध्रुवः। रयीणाम्। चिकेत। यत्॥ ४॥

अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः। स्पार्हा भवन्ति रन्तयो जुषन्त यत्॥ ५॥ [४]

अस्य। व्रते। सऽजोषसः। विश्वे। देवासः। अद्रुहः॥ स्पार्हाः। भवन्ति। रन्तयः। जुषन्त। यत्॥ ५॥

यमी गर्भमृतावृधो दृशे चारुमजीजनन्। कविं मंहिष्ठमध्वरे पुरुस्पृहम्॥ ६॥

यम्। ईमिति। गर्भम्। ऋतऽवृधः। दृशे। चारुम्। अजीजनन्।

कविम्। मंहिष्ठम्। अध्वरे। पुरुऽस्पृहम्॥ ६॥

समीचीने अभि त्मना यह्वी ऋतस्य मातरा। तन्वाना यज्ञमानुषग्यदञ्जते॥ ७॥

समीचीने इति सम्ऽईचीने। अभि। त्मना। यह्वी इति। ऋतस्य। मातरा।

तन्वाना। यज्ञम्। आनुषक्। यत्। अञ्जते॥ ७॥

क्रत्वा शुक्रेभिरक्षभिर्ऋणोरप व्रजं दिवः। हिन्वन्नृतस्य दीधितिं प्राध्वरे॥ ८॥ [८]

क्रत्वा। शुक्रेभिः। अक्षऽभिः। ऋणोः। अप। व्रजम्। दिवः।

हिन्वन्। ऋतस्य। दीधितिम्। प्र। अध्वरे॥ ८॥

[१०४ (१०३)] [६ द्वित आप्त्यः। पवमानः सोमः। उष्णिक्।]

प्र पुनानाय वेधसे सोमाय वच उद्यतम्। भृतिं न भरा मतिभिर्जुजोषते॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । पु॒ना॒नाय॑ । वे॒धसे॑ । सोमा॑य । वचः॑ । उत्ऽय॑तम् ॥ भृ॒तिम् । न । भ॒र॒ । म॒तिऽभिः॑ । जुजो॑षते ॥ १ ॥

परि॒ वारा॑ण्य॒व्यया॒ गोभि॑रञ्जा॒नो अ॑र्षति । त्री ष॒धस्था॑ पुना॒नः कृ॑णुते॒ हरिः॑ ॥ २ ॥

परि॑ । वारा॑णि । अ॒व्यया॑ । गोभिः॑ । अ॒ञ्जा॒नः । अ॒र्ष॒ति॒ ॥ त्री । स॒धऽस्था॑ । पु॒ना॒नः । कृ॒णु॒ते॒ । हरिः॑ ॥ २ ॥

परि॒ कोश॑म्मधु॒श्चुत॑म॒व्यये॒ वारे॑ अर्षति । अ॒भि वाणी॒र्ऋषी॑णां स॒प्त नू॑षत ॥ ३ ॥

परि॑ । कोश॑म् । म॒धु॒ऽश्चुत॑म् । अ॒व्यये॑ । वारे॑ । अ॒र्ष॒ति॒ । अ॒भि । वाणीः॑ । ऋषी॑णाम् । स॒प्त । नू॒ष॒त॒ ॥ ३ ॥

परि॒ णेता म॑ती॒नां वि॒श्वदे॑वो॒ अदा॑भ्यः । सोमः॑ पुना॒नश्च॒म्वो॑र्विश॒द्धरिः॑ ॥ ४ ॥

परि॑ । ने॒ता । म॒ती॒नाम् । वि॒श्वऽदे॑वः । अदा॑भ्यः ॥ सोमः॑ । पु॒ना॒नः । च॒म्वोः॑ । वि॒श॒त् । हरिः॑ ॥ ४ ॥

परि॒ दैवी॒रनु॑ स्व॒धा इन्द्रे॑ण याहि स॒रथ॑म् । पुना॒नो वा॒घद्वा॒घद्भि॒रम॑र्त्यः ॥ ५ ॥

परि॑ । दैवीः॑ । अनु॑ । स्व॒धाः । इन्द्रे॑ण । या॒हि॒ । स॒ऽरथ॑म् ॥ पु॒ना॒नः । वा॒घत् । वा॒घत्ऽभिः॑ । अम॑र्त्यः ॥ ५ ॥

परि॒ सप्ति॒र्न वा॑ज॒युर्दे॒वो दे॒वेभ्यः॑ सु॒तः । व्या॒न॒शिः पव॑मानो॒ वि धा॑वति ॥ ६ ॥ [६] {६}

परि॑ । सप्तिः॑ । न । वा॒ज॒ऽयुः । दे॒वः । दे॒वेभ्यः॑ । सु॒तः । वि॒ऽआ॒न॒शिः । पव॑मानः । वि । धा॒व॒ति॒ ॥ ६ ॥

[१०५ (१०४)] [६ पर्वतनारदौ काण्वौ, शिखण्डिन्यावप्सरसौ काश्यप्यौ वा । पवमानः सोमः । उष्णिक् ।]

सखा॑य॒ आ नि षी॑दत पुना॒नाय॒ प्र गा॑यत । शिशुं॒ न य॒ज्ञैः परि॑ भूषत श्रि॒ये ॥ १ ॥

सखा॑यः । आ । नि । सी॒द॒त॒ । पु॒ना॒नाय॑ । प्र । गा॒य॒त॒ । शिशु॑म् । न । य॒ज्ञैः । परि॑ । भू॒ष॒त॒ । श्रि॒ये ॥ १ ॥

समीं॑ व॒त्सं न मा॒तृभिः॑ सृ॒जता॑ गय॒साध॑नम् । दे॒वा॒व्यं१॒॑ मद॑म॒भि द्विश॑वसम् ॥ २ ॥

सम् । ई॒मिति॑ । व॒त्सम् । न । मा॒तृऽभिः॑ । सृ॒जत॑ । ग॒य॒ऽसाध॑नम् ।
दे॒व॒ऽअ॒व्य॑म् । मद॑म् । अ॒भि । द्विऽश॑वसम् ॥ २ ॥

पु॒नाता॑ द॒क्ष॒साध॑नं॒ यथा॒ शर्धा॑य वी॒तये॑ । यथा॑ मि॒त्राय॒ वरु॑णाय॒ शंत॑मः ॥ ३ ॥

पु॒नात॑ । द॒क्ष॒ऽसाध॑नम् । यथा॑ । शर्धा॑य । वी॒तये॑ । यथा॑ । मि॒त्राय॑ । वरु॑णाय । शम्ऽत॑मः ॥ ३ ॥

अ॒स्मभ्यं॑ त्वा वसु॒विद॑म॒भि वाणी॑रनूषत । गोभि॑ष्टे॒ वर्ण॑म॒भि वा॑सयामसि ॥ ४ ॥

अ॒स्मभ्य॑म् । त्वा॒ । व॒सु॒ऽविद॑म् । अ॒भि । वाणीः॑ । अ॒नू॒ष॒त॒ । गोभिः॑ । ते॒ । वर्ण॑म् । अ॒भि । वा॒स॒या॒म॒सि॒ ॥ ४ ॥

सा नो॑ मदानां पत॒ इन्दो॑ दे॒वप्स॑रा असि । सखे॑व॒ सख्ये॑ गातु॒वित्त॑मो भव ॥ ५ ॥

सः । नः॒ । म॒दा॒ना॒म् । प॒ते॒ । इन्दो॒ इति॑ । दे॒वऽप्स॑राः । अ॒सि॒ ।
सखा॑ऽइव । सख्ये॑ । गा॒तु॒वित्ऽत॑मः । भ॒व॒ ॥ ५ ॥

सने॑मि कृ॒ध्य१॒॑स्मदा र॒क्षसं॒ कं चि॑द॒त्रिण॑म् । अपादे॑वं द्व॒युमंहो॑ युयोधि नः ॥ ६ ॥ [७]

CC-0. Public Domain. Vipin Kumar Collection Deoband

Digitized by Madhuban Trust

सनेमि। कृधि। अस्मत्। आ। रक्षसम्। कम्। चित्। अत्रिणम्।
अप। अदेवम्। द्वयुम्। अंहः। युयोधि। नः॥ ६॥

[१०६ (१०५)] [६ पर्वतनारदौ काण्वौ। पवमानः सोमः। उष्णिक्।]

तं वः सखायो मदाय पुनानमभि गायत। शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः॥ १॥

तम्। वः। सखायः। मदाय। पुनानम्। अभि। गायत। शिशुम्। न। यज्ञैः। स्वदयन्त। गूर्तिऽभिः॥ १॥

सं वत्सइव मातृभिरिन्दुर्हिन्वानो अज्यते। देवावीर्मदो मतिभिः परिष्कृतः॥ २॥

सम्। वत्सःऽइव। मातृऽभिः। इन्दुः। हिन्वानः। अज्यते।
देवऽअवीः। मदः। मतिऽभिः। परिऽकृतः॥ २॥

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धन्व। शुचिं ते वर्णमधि गोषु दीधरम्॥ ४॥

गोऽमत्। नः। इन्दो इति। अश्वऽवत्। सुतः। सुऽदक्ष। धन्व।
शुचिम्। ते। वर्णम्। अधि। गोषु। दीधरम्॥ ४॥

स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव॥ ५॥

सः। नः। हरीणाम्। पते। इन्दो इति। देवप्सरःऽतमः। सखाऽइव। सख्ये। नर्यः। रुचे। भव॥ ५॥

सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम्। साह्वाँ इन्दो परि बाधो अप द्वयुम्॥ ६॥ [८]

सनेमि। त्वम्। अस्मत्। आ। अदेवम्। कम्। चित्। अत्रिणम्।
सह्वान्। इन्दो इति। परि। बाधः। अप। द्वयुम्॥ ६॥

[१०७ (१०६)] [१४ : १-३, १०-१४ अग्निश्चाक्षुषः, ४-६ चक्षुर्मानवः, ७-९ मनुराप्सवः। पवमानः सोमः। उष्णिक्।]

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः। श्रुष्टी जातास इन्दवः स्वर्विदः॥ १॥

इन्द्रम्। अच्छ। सुताः। इमे। वृषणम्। यन्तु। हरयः। श्रुष्टी। जातासः। इन्दवः। स्वःऽविदः॥ १॥

अयं भराय सानसिरिन्द्राय पवते सुतः। सोमो जैत्रस्य चेतति यथा विदे॥ २॥

अयम्। भराय। सानसिः। इन्द्राय। पवते। सुतः। सोमः। जैत्रस्य। चेतति। यथा। विदे॥ २॥

अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम्। वज्रं च वृषणं भरत्समप्सुजित्॥ ३॥

अस्य। इत्। इन्द्रः। मदेषु। आ। ग्राभम्। गृभ्णीत। सानसिम्।
वज्रम्। च। वृषणम्। भरत्। सम्। अप्सुऽजित्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव। द्युमन्तं शुष्ममा भरा स्वर्विदम्॥ ४॥

प्र। धन्व। सोम। जागृविः। इन्द्राय। इन्दो इति। परि। स्रव।

द्युऽमन्तम्। शुष्मम्। आ। भर। स्वःऽविदम्॥ ४॥

इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः। सहस्रयामा पथिकृद्विचक्षणः॥ ५॥ [९]

इन्द्राय। वृषणम्। मदम्। पवस्व। विश्वऽदर्शतः॥ सहस्रऽयामा। पथिऽकृत्। विऽचक्षणः॥ ५॥

अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः। सहस्रं याहि पथिभिः कनिक्रदत्॥ ६॥

अस्मभ्यम्। गातुवित्ऽतमः। देवेभ्यः। मधुमत्ऽतमः॥ सहस्रम्। याहि। पथिऽभिः। कनिक्रदत्॥ ६॥

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः॥ ७॥

पवस्व। देवऽवीतये। इन्दो इति। धाराभिः। ओजसा।

आ। कलशम्। मधुऽमान्। सोम। नः। सदः॥ ७॥

तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः॥ ८॥

तव। द्रप्साः। उदऽप्रुतः। इन्द्रम्। मदाय। ववृधुः॥ त्वाम्। देवासः। अमृताय। कम्। पपुः॥ ८॥

आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः॥ ९॥

आ। नः। सुतासः। इन्दवः। पुनानाः। धावत। रयिम्।

वृष्टिऽद्यावः। रीतिऽआपः। स्वःऽविदः॥ ९॥

सोमः पुनान ऊर्मिणाव्यो वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत्॥ १०॥ [१०]

सोमः। पुनानः। ऊर्मिणा। अव्यः। वारम्। वि। धावति॥ अग्रे। वाचः। पवमानः। कनिक्रदत्॥ १०॥

धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम्। अभि त्रिपृष्ठं मतयः समस्वरन्॥ ११॥

धीभिः। हिन्वन्ति। वाजिनम्। वने। क्रीळन्तम्। अतिऽअविम्।

अभि। त्रिऽपृष्ठम्। मतयः। सम्। अस्वरन्॥ ११॥

असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः। पुनानो वाचं जनयन्नसिष्यदत्॥ १२॥

असर्जि। कलशान्। अभि। मीळ्हे। सप्तिः। न। वाजऽयुः।

पुनानः। वाचम्। जनयन्। असिस्यदत्॥ १२॥

पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्षन्त्स्तोतृभ्यो वीरवद्यशः॥ १३॥

पवते। हर्यतः। हरिः। अति। ह्वरांसि। रंह्या। अभिऽअर्षन्। स्तोतृऽभ्यः। वीरऽवत्। यशः॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अया पवस्व देवयुर्मधोर्धारा असृक्षत। रेभन्पवित्रं पर्येषि विश्वतः॥ १४॥ [११]

अया। पवस्व। देवऽयुः। मधोः। धाराः। असृक्षत॥ रेभन्। पवित्रम्। परि। एषि। विश्वतः॥ १४॥

[१०८ (१०७)] [२६ सप्तर्षयः (भरद्वाजो बार्हस्पत्यः, कश्यपो मारीचः, गोतमो राहूगणः, भौमः अत्रिः, विश्वामित्रो गाथिनः, जमदग्निर्भार्गवः, वसिष्ठोमैत्रावरुणिः। पवमानः सोमः। प्रगाथ := (१, ४, ६, ८, ९, १०, १२, १४, १७, बृहती;, २, ५, ७, ११, १३, १५, १८ सतोबृहती; ३, १६ द्विपदा विराजौ, १९-२६ प्रगाथः = (अयुजो बृहत्यः, युजः सतोबृहत्यः)।]

परीतो षिञ्चता सुतं सोमो य उत्तमं हविः।

दधन्वाँ यो नर्यो अप्स्व१न्तरा सुषाव सोममद्रिभिः॥ १॥

परि। इतः। सिञ्चत। सुतम्। सोमः। यः। उत्ऽतमम्। हविः।

दधन्वान्। यः। नर्यः। अप्ऽसु। अन्तः। आ। सुसाव। सोमम्। अद्रिऽभिः॥ १॥

नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः।

सुते चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम्॥ २॥

नूनम्। पुनानः। अविऽभिः। परि। स्रव। अदब्धः। सुरभिम्ऽतरः।

सुते। चित्। त्वा। अप्ऽसु। मदामः। अन्धसा। श्रीणन्तः। गोभिः। उत्ऽतरम्॥ २॥

परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः॥ ३॥

परि। सुवानः। चक्षसे। देवऽमादनः। क्रतुः। इन्दुः। विऽचक्षणः॥ ३॥

पुनानः सोम धारयापो वसानो अर्षसि। आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः॥ ४॥

पुनानः। सोम। धारया। अपः। वसानः। अर्षसि।

आ। रत्नऽधाः। योनिम्। ऋतस्य। सीदसि। उत्सः। देव। हिरण्ययः॥ ४॥

दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत्।

आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः॥ ५॥ [१२]

दुहानः। ऊधः। दिव्यम्। मधु। प्रियम्। प्रत्नम्। सधऽस्थम्। आ। असदत्।

आऽपृच्छ्यम्। धरुणम्। वाजी। अर्षति। नृऽभिः। धूतः। विऽचक्षणः॥ ५॥

पुनानः सोम जागृविरव्यो वारे परि प्रियः।

त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पु॒ना॒नः। सो॒म॒। जागृ॑विः। अव्यः॑। वारे॑। परि॑। प्रि॒यः।

त्वम्। विप्रः॑। अ॒भ॒वः॒। अङ्गि॑रःऽतमः। मध्वा॑। य॒ज्ञम्। मि॒मि॒क्ष॒। नः॒॥ ६॥

सोमो॑ मी॒ढ्वान्प॑वते गातु॒वित्त॑म ऋषि॒र्विप्रो॑ विचक्ष॒णः।

त्वं क॒विर॑भवो देव॒वीत॑म॒ आ सूर्यं॑ रोहयो दि॒वि॥ ७॥

सोमः॑। मी॒ढ्वान्। प॒व॒ते॒। गा॒तु॒वित्ऽत॑मः। ऋषिः॑। विप्रः॑। वि॒ऽच॒क्ष॒णः।

त्वम्। क॒विः। अ॒भ॒वः॒। दे॒व॒ऽवीत॑मः। आ। सूर्य॑म्। रो॒ह॒यः॒। दि॒वि॥ ७॥

सोम॑ उ षुवा॒णः सो॒तृभि॒रधि॒ ष्णुभि॒रवी॑नाम्।

अश्व॑येव ह॒रिता॑ याति॒ धार॑या म॒न्द्रया॑ याति॒ धार॑या॥ ८॥

सोमः॑। ॐ इति॑। सु॒वा॒नः। सो॒तृऽभिः॑। अधि॑। स्नुऽभिः॑। अवी॑नाम्।

अश्व॑याऽइव। ह॒रिता॑। या॒ति॒। धार॑या। म॒न्द्रया॑। या॒ति॒। धार॑या॥ ८॥

अ॒नू॒पे गोमा॒न्गोभि॑रक्षाः॒ सोमो॑ दु॒ग्धाभि॑रक्षाः।

स॒मु॒द्रं न सं॒वर॑णान्यग्मन्म॒न्दी मदा॑य तोशते॥ ९॥

अ॒नू॒पे। गोऽमा॑न्। गोभिः॑। अ॒क्षा॒रिति॑। सोमः॑। दु॒ग्धाभिः॑। अ॒क्षा॒रिति॑।

स॒मु॒द्रम्। न। स॒म्ऽवर॑णानि। अ॒ग्म॒न्। म॒न्दी। मदा॑य। तो॒श॒ते॒॥ ९॥

आ सो॑म सुवा॒नो अद्रि॑भिस्ति॒रो वारा॑ण्य॒व्यया॑।

जनो॒ न पु॒रि च॒म्वो॑र्विशद्धरिः॒ सदो॒ वने॑षु दधिषे॥ १०॥ [१३]

आ। सो॒म॒। सु॒वा॒नः। अद्रि॑ऽभिः। ति॒रः। वारा॑णि। अ॒व्यया॑।

जनः॑। न। पु॒रि। च॒म्वोः॑। वि॒श॒त्। हरिः॑। सदः॑। वने॑षु। द॒धि॒षे॒॥ १०॥

स मा॑मृजे ति॒रो अण्वा॑नि मे॒ष्यो॑ मी॒ळ्हे सप्ति॒र्न वा॑ज॒युः।

अ॒नु॒माद्यः॒ पव॑मानो मनी॒षिभि॒ः सोमो॒ विप्रे॑भि॒र्ऋक्व॑भिः॥ ११॥

सः। म॒मृ॒जे॒। ति॒रः। अण्वा॑नि। मे॒ष्यः॑। मी॒ळ्हे। सप्तिः॑। न। वा॒ज॒ऽयुः।

अ॒नु॒ऽमाद्यः॑। पव॑मानः। म॒नी॒षिऽभिः॑। सोमः॑। विप्रे॑भिः। ऋक्व॑ऽभिः॥ ११॥

प्र सो॑म दे॒ववी॑तये॒ सिन्धु॒र्न पि॑प्ये॒ अर्ण॑सा।

अं॒शोः पय॑सा मदि॒रो न जागृ॑वि॒रच्छा॒ कोशं॑ मधु॒श्चुत॑म्॥ १२॥

प्र। सो॒म॒। दे॒ववी॑तये। सिन्धुः॑। न। पि॒प्ये॒। अर्ण॑सा।

अं॒शोः। पय॑सा। म॒दि॒रः। न। जागृ॑विः। अच्छ॑। कोश॑म्। म॒धु॒ऽश्चुत॑म्॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः।

तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः॥ १३

आ। हर्यतः। अर्जुने। अत्के। अव्यत। प्रियः। सूनुः। न। मर्ज्यः।

तम्। ईम्। हिन्वन्ति। अपसः। यथा। रथम्। नदीषु। आ। गभस्त्योः॥ १३॥

अभि सोमास आयवः पवन्ते मद्यं मदम्।

समुद्रऽस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः॥ १४॥

अभि। सोमासः। आयवः। पवन्ते। मद्यम्। मदम्।

समुद्रस्य। अधि। विष्टपि। मनीषिणः। मत्सरासः। स्वः२विदः॥ १४॥

तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत्।

अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत्॥ १५॥ [१४]

तरत्। समुद्रम्। पवमानः। ऊर्मिणा। राजा। देव। ऋतम्। बृहत्।

अर्षत्। मित्रस्य। वरुणस्य। धर्मणा। प्र। हिन्वानः। ऋतम्। बृहत्॥ १५॥

नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः॥ १६॥

नृऽभिः। येमानः। हर्यतः। विऽचक्षणः। राजा। देवः। समुद्रियः॥ १६॥

इन्द्राय पवते मदः सोमो मरुत्वते सुतः। सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः॥ १७॥

इन्द्राय। पवते। मदः। सोमः। मरुत्वते। सुतः।

सहस्रऽधारः। अति। अव्यम्। अर्षति। तम्। ईमिति। मृजन्ति। आयवः॥ १७॥

पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति।

अपो वसानः परि गोभिरुत्तरः सीदन्वनेष्वव्यत॥ १८॥

पुनानः। चमू इति। जनयन्। मतिम्। कविः। देवेषु। रण्यति।

अपः। वसानः। परि। गोभिः। उत्ऽतरः। सीदन्। वनेषु। अव्यत॥ १८॥

तवाहं सोम रारण सख्य इन्दो दिवेदिवे।

पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि॥ १९॥

तव। अहम्। सोम। ररण। सख्ये। इन्दो इति। दिवेऽदिवे।

पुरूणि। बभ्रो इति। नि। चरन्ति। माम्। अव। परिऽधीन्। अति। तान्। इहि॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उताहं नक्तमुत सोम ते दिवा सख्याय बभ्रु ऊधनि।

घृणा तपन्तमति सूर्यं परः शकुनाइव पप्तिम॥ २०॥ [१५]

उत। अहम्। नक्तम्। उत। सोम। ते। दिवा। सख्याय। बभ्रो इति। ऊधनि।

घृणा। तपन्तम्। अति। सूर्यम्। परः। शकुनाःऽइव। पप्तिम॥ २०॥

मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि। रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि॥ २१॥

मृज्यमानः। सुऽहस्त्य। समुद्रे। वाचम्। इन्वसि।

रयिम्। पिशङ्गम्। बहुलम्। पुरुऽस्पृहम्। पवमान। अभि। अर्षसि॥ २१॥

मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने।

देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि॥ २२॥

मृजानः। वारे। पवमानः। अव्यये। वृषा। अव। चक्रदः। वने।

देवानाम्। सोम। पवमान। निःऽकृतम्। गोभिः। अञ्जानः। अर्षसि॥ २२॥

पवस्व वाजसातयेऽभि विश्वानि काव्या।

त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः॥ २३॥

पवस्व। वाजऽसातये। अभि। विश्वानि। काव्या।

त्वम्। समुद्रम्। प्रथमः। वि। धारयः। देवेभ्यः। सोम। मत्सरः॥ २३॥

स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः।

त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वन्ति धीतिभिः॥ २४॥

सः। तु। पवस्व। परि। पार्थिवम्। रजः। दिव्या। च। सोम। धर्मऽभिः।

त्वाम्। विप्रासः। मतिऽभिः। विऽचक्षण। शुभ्रम्। हिन्वन्ति। धीतिऽभिः॥ २४॥

पवमाना असृक्षत पवित्रमति धारया।

मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च॥ २५॥

पवमानाः। असृक्षत। पवित्रम्। अति। धारया।

मरुत्वन्तः। मत्सराः। इन्द्रियाः। हयाः। मेधाम्। अभि। प्रयांसि। च॥ २५॥

अपो वसानः परि कोशमर्षतीन्दुर्हियानः सोतृभिः।

जनयञ्ज्योतिर्मन्दना अवीवशद्गाः कृण्वानो न निर्णिजम्॥ २६॥ [१६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपः। वसानः। परि। कोशम्। अर्षति। इन्दुः। हियानः। सोतृऽभिः।
जनयन्। ज्योतिः। मन्दनाः। अवीवशत्। गाः। कृण्वानः। न। निःऽनिजम्॥ २६॥

[१०९ (१०८)] [१६ : १-२ गौरिवीतिः शाक्त्यः; ३, १४-१६ शक्तिर्वासिष्ठः, ४-५ ऊरुराङ्गिरसः, ६-७ ऋजिश्वा भारद्वाजः, ८-९ ऊर्ध्वसद्मा आङ्गिरसः, १०-११ कृतयशा आङ्गिरसः, १२-१३ ऋणंचयो राजर्षिः। पवमानः सोमः। काकुभः प्रगाथः = (अयुजः ककुभः, युजः सतोबृहत्यः), १३ यवमध्या गायत्री।]

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः॥ १॥
पवस्व। मधुमत्ऽतमः। इन्द्राय। सोम। क्रतुवित्ऽतमः। मदः॥ महि। द्युक्षऽतमः। मदः॥ १॥
यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः॥ २॥
यस्य। ते। पीत्वा। वृषभः। वृषऽयते। अस्य। पीता। स्वःऽविदः।
सः। सुऽप्रकेतः। अभि। अक्रमीत्। इषः। अच्छ। वाजम्। न। एतशः॥ २॥
त्वं ह्य१ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयः॥ ३॥
त्वम्। हि। अङ्ग। दैव्या। पवमान। जनिमानि। द्युमत्ऽतमः॥ अमृतऽत्वाय। घोषयः॥ ३॥
येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः॥ ४॥
येन। नवऽग्वः। दध्यङ्। अपऽऊर्णुते। येन। विप्रासः। आपिरे।
देवानाम्। सुम्ने। अमृतस्य। चारुणः। येन। श्रवांसि। आनशुः॥ ४॥
एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मिरपामिव॥ ५॥ [१७]
एषः। स्यः। धारया। सुतः। अव्यः। वारेभिः। पवते। मदिन्ऽतमः॥ क्रीळन्। ऊर्मिः। अपाम्ऽइव॥ ५॥
य उस्त्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज॥ ६॥
यः। उस्त्रियाः। अप्याः। अन्तः। अश्मनः। निः। गाः। अकृन्तत्। ओजसा।
अभि। व्रजम्। तत्निषे। गव्यम्। अश्व्यम्। वर्मीऽइव। धृष्णो इति। आ। रुज॥ ६॥
सा सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम्। वनक्रक्षमुदप्रुतम्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। सो॒त॒। परि॑। सि॒ञ्च॒त॒। अश्व॑म्। न। स्तोम॑म्। अ॒प्°तु॒र॑म्। र॒ज॒ःऽतु॒र॑म्।

व॒न॒°क्र॒क्षम्। उ॒द॒°प्रु॒त॑म्॥ ७॥

स॒हस्र॑धारं वृष॒भं पयो॒वृधं॑ प्रि॒यं दे॒वाय॒ जन्म॑ने।

ऋ॒तेन॒ य ऋ॒तजा॑तो विवावृधे राजा॑ दे॒व ऋ॒तं बृ॒हत्॥ ८॥

स॒हस्र॑°धारम्। वृ॒ष॒भम्। प॒य॒ःऽवृध॑म्। प्रि॒यम्। दे॒वाय॑। जन्म॑ने।

ऋ॒तेन॑। यः। ऋ॒त°जा॑तः। वि॒°व॒वृ॒धे। राजा॑। दे॒वः। ऋ॒तम्। बृ॒हत्॥ ८॥

अ॒भि द्यु॒म्नं बृ॒हद्यश॒ इषं॑स्पते दिदी॒हि दे॑व देव॒युः। वि कोशं॑ मध्य॒मं यु॑व॥ ९॥

अ॒भि। द्यु॒म्नम्। बृ॒हत्। यश॑ः। इष॑ः। प॒ते। दि॒दी॒हि। दे॒व॒। दे॒व॒°यु॒ः॥ वि। कोश॑म्। म॒ध्य॒मम्। यु॒व॒॥ ९॥

आ व॑च्यस्व सुदक्ष च॒म्वो॑ः सु॒तो वि॒शां वह्नि॒र्न वि॒श्पति॑ः।

वृष्टिं॑ दि॒वः प॑वस्व री॒तिम॒पां जिन्वा॒ गवि॑ष्ठये॒ धिय॑ः॥ १०॥ [१८]

आ। व॒च्य॒स्व॒। सु॒°द॒क्ष॒। च॒म्वो॑ः। सु॒तः। वि॒शाम्। वह्नि॑ः। न। वि॒श्पति॑ः।

वृ॒ष्टिम्। दि॒वः। प॒व॒स्व॒। री॒तिम्। अ॒पाम्। जिन्व॑। गो°इ॑ष्टये। धिय॑ः॥ १०॥

ए॒तमु॒ त्यं म॑द॒च्युतं॑ स॒हस्र॑धारं वृष॒भं दिवो॑ दुहुः। विश्वा॒ वसू॑नि॒ बिभ्र॑तम्॥ ११॥

ए॒तम्। ऊँ इति॑। त्यम्। म॒द॒°च्यु॒त॑म्। स॒हस्र॑°धारम्। वृ॒ष॒भम्। दिव॑ः। दु॒हु॒ः।

विश्वा॑। वसू॑नि। बिभ्र॑तम्॥ ११॥

वृषा॒ वि ज॑ज्ञे ज॒नय॒न्नम॑र्त्यः प्र॒तप॒ञ्ज्योति॑षा॒ तम॑ः।

स सुष्टु॑तः क॒विभि॑र्नि॒र्णिजं॑ दधे त्रि॒धात्व॑स्य॒ दंस॑सा॥ १२॥

वृषा॑। वि। ज॒ज्ञे॒। ज॒नय॑न्। अम॑र्त्यः। प्र॒°तप॑न्। ज्योति॑षा। तम॑ः।

सः। सु॒°स्तु॒तः। क॒वि°भि॑ः। नि॒ःऽनिज॑म्। द॒धे॒। त्रि॒°धातु॑। अ॒स्य॒। दंस॑सा॥ १२॥

स सु॑न्वे॒ यो वसू॑नां॒ यो रा॒यामा॑ने॒ता य इळा॑नाम्। सोमो॒ यः सु॑क्षिती॒नाम्॥ १३॥

सः। सु॒न्वे॒। यः। वसू॑नाम्। यः। रा॒याम्। आ॒°ने॒ता। यः। इळा॑नाम्॥ सोम॑ः। यः। सु॒°क्षि॒ती॒नाम्॥ १३॥

यस्य॑ न॒ इन्द्र॑ः पिबा॒द्यस्य॑ म॒रुतो॒ यस्य॑ वार्य॒मणा॒ भग॑ः।

आ येन॑ मि॒त्रावरु॑णा॒ करा॑मह॒ एन्द्र॒मव॑से म॒हे॥ १४॥

यस्य॑। न॒ः। इन्द्र॑ः। पिबा॑त्। यस्य॑। म॒रुत॑ः। यस्य॑। वा॒। अ॒र्य॒मणा॑। भग॑ः।

आ। येन॑। मि॒त्रावरु॑णा। करा॑महे। आ। इन्द्र॑म्। अव॑से। म॒हे॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः। पवस्व मधुमत्तमः॥ १५॥

इन्द्राय। सोम। पातवे। नृऽभिः। यतः। सुऽआयुधः। मदिन्ऽतमः। पवस्व॥ मधुमत्ऽतमः॥ १५॥

इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः।

जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः॥ १६॥ [१९]

इन्द्रस्य। हार्दि। सोमऽधानम्। आ। विश। समुद्रम्ऽइव। सिन्धवः।

जुष्टः। मित्राय। वरुणाय। वायवे। दिवः। विष्टम्भः। उत्ऽतमः॥ १६॥

[११० (१०९)] [२२ अग्नयो धिष्ण्या ऐश्वराः। पवमानः सोमः। द्विपदा विराट्।]

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय॥ १॥

परि। प्र। धन्व। इन्द्राय। सोम। स्वादुः। मित्राय। पूष्णे। भगाय॥ १॥

इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः॥ २॥

इन्द्रः। ते। सोम। सुतस्य। पेयाः। क्रत्वे। दक्षाय। विश्वे। च। देवाः॥ २॥

एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः॥ ३॥

एव। अमृताय। महे। क्षयाय। सः। शुक्रः। अर्ष। दिव्यः। पीयूषः॥ ३॥

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम॥ ४॥

पवस्व। सोम। महान्। समुद्रः। पिता। देवानाम्। विश्वा। अभि। धाम॥ ४॥

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै॥ ५॥

शुक्रः। पवस्व। देवेभ्यः। सोम। दिवे। पृथिव्यै। शम्। च। प्रऽजायै॥ ५॥

दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व॥ ६॥

दिवः। धर्त्ता। असि। शुक्रः। पीयूषः। सत्ये। विऽधर्मन्। वाजी। पवस्व॥ ६॥

पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः॥ ७॥

पवस्व। सोम। द्युम्नी। सुऽधारः। महाम्। अवीनाम्। अनु। पूर्व्यः॥ ७॥

नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मन्द्रः स्वर्वित्॥ ८॥

नृऽभिः। येमानः। जज्ञानः। पूतः। क्षरत्। विश्वानि। मन्द्रः। स्वःऽवित्॥ ८॥

इन्दुः पुनानः प्रजामुराणः करद्विश्वानि द्रविणानि नः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्दुः। पुनानः। प्रऽजाम्। उराणः। करत्। विश्वानि। द्रविणानि। नः॥ ९॥

पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय॥ १०॥ [२०]

पवस्व। सोम। क्रत्वे। दक्षाय। अश्वः। न। निक्तः। वाजी। धनाय॥ १०॥

तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय॥ ११॥

तम्। ते। सोतारः। रसम्। मदाय। पुनन्ति। सोमम्। महे। द्युम्नाय॥ ११॥

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम्॥ १२॥

शिशुम्। जज्ञानम्। हरिम्। मृजन्ति। पवित्रे। सोमम्। देवेभ्यः। इन्दुम्॥ १२॥

इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय॥ १३॥

इन्दुः। पविष्ट। चारुः। मदाय। अपाम्। उपऽस्थे। कविः। भगाय॥ १३॥

बिभर्ति चार्विन्द्रस्य नाम येन विश्वानि वृत्रा जघान॥ १४॥

बिभर्ति। चारु। इन्द्रस्य। नाम। येन। विश्वानि। वृत्रा। जघान॥ १४॥

पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य॥ १५॥

पिबन्ति। अस्य। विश्वे। देवासः। गोभिः। श्रीतस्य। नृऽभिः। सुतस्य॥ १५॥

प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम्॥ १६॥

प्र। सुवानः। अक्षारिति। सहस्रऽधारः। तिरः। पवित्रम्। वि। वारम्। अव्यम्॥ १६॥

स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः॥ १७॥

सः। वाजी। अक्षारिति। सहस्रऽरेताः। अत्ऽभिः। मृजानः। गोभिः। श्रीणानः॥ १७॥

प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः॥ १८॥

प्र। सोम। याहि। इन्द्रस्य। कुक्षा। नृऽभिः। येमानः। अद्रिऽभिः। सुतः॥ १८॥

असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः॥ १९॥

असर्जि। वाजी। तिरः। पवित्रम्। इन्द्राय। सोमः। सहस्रऽधारः॥ १९॥

अञ्जन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय॥ २०॥

अञ्जन्ति। एनम्। मध्वः। रसेन। इन्द्राय। वृष्णे। इन्दुम्। मदाय॥ २०॥

देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति॥ २१॥

देवेभ्यः। त्वा। वृथा। पाजसे। अपः। वसानम्। हरिम्। मृजन्ति॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः॥ २२॥ [२१]

इन्दुः। इन्द्राय। तोशते। नि। तोशते। श्रीणन्। उग्रः। रिणन्। अपः॥ २२॥

[१११ (११०)] [१२ त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्स्यश्च। पवमानः सोमः। १-३ पिपीलिकमध्या अनुष्टुभः, ४-९ ऊर्ध्वबृहत्यः, १०-१२ विराजः।]

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईयसे॥ १॥

परि। ऊँ इति। सु। प्र। धन्व। वाज॰सातये। परि। वृत्राणि। सक्षणिः।

द्विषः। तरध्यै। ऋण॰याः। नः। ईयसे॥ १॥

अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये। वाजाँ अभि पवमान प्र गाहसे॥ २॥

अनु। हि। त्वा। सुतम्। सोम। मदामसि। महे। समर्य॰राज्ये।

वाजान्। अभि। पवमान। प्र। गाहसे॥ २॥

अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः। गोजीरया रंहमाणः पुरंध्या॥ ३॥

अजीजनः। हि। पवमान। सूर्यम्। वि॰धारे। शक्मना। पयः।

गो॰जीरया। रंहमाणः। पुरम्॰ध्या। ३॥

अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः। सदासरो वाजमच्छा सनिष्यदत्॥ ४॥

अजीजनः। अमृत। मर्त्येषु। आ। ऋतस्य। धर्मन्। अमृतस्य। चारुणः।

सदा। असरः। वाजम्। अच्छ। सनिस्यदत्॥ ४॥

अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम्।

शर्याभिर्न भरमाणो गभस्त्योः॥ ५॥

अभि॰अभि। हि। श्रवसा। ततर्दिथ। उत्सम्। न। कम्। चित्। जन॰पानम्। अक्षितम्।

शर्याभिः। न। भरमाणः। गभस्त्यः॥ ५॥

आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत।

वारं न देवः सविता व्यूर्णुते॥ ६॥ [२२]

आत्। ईम्। के। चित्। पश्यमानासः। आप्यम्। वसु॰रुचः। दिव्याः। अभि। अनूषत।

वारम्। न। देवः। सविता। वि। ऊर्णुते॥ ६॥

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः। स त्वं नो वीर वीर्याय चोदय॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वे इति। सोम। प्रथमाः। वृक्तऽबर्हिषः। महे। वाजाय। श्रवसे। धियम्। दधुः।

सः। त्वम्। नः। वीर। वीर्याय। चोदय॥ ७॥

दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत। इन्द्रमभि जायमानं समस्वरन्॥ ८॥

दिवः। पीयूषम्। पूर्व्यम्। यत्। उक्थ्यम्। महः। गाहात्। दिवः। आ। निः। अधुक्षत।

इन्द्रम्। अभि। जायमानम्। सम्। अस्वरन्॥ ८॥

अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना।

यूथे न निःष्ठा वृषभो वि तिष्ठसे॥ ९॥

अध। यत्। इमे इति। पवमान। रोदसी इति। इमा। च। विश्वा। भुवना। अभि। मज्मना।

यूथे। न। निःऽस्थाः। वृषभः। वि। तिष्ठसे॥ ९॥

सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन्पवमानो अक्षाः। सहस्रधारः शतवाज इन्दुः॥ १०॥

सोमः। पुनानः। अव्यये। वारे। शिशुः। न। क्रीळन्। पवमानः। अक्षारिति।

सहस्रऽधारः। शतऽवाजः। इन्दुः॥ १०॥

एष पुनानो मधुमाँ ऋतावेन्द्रायेन्दुः पवते स्वादुरूर्मिः। वाजसनिर्वरिवोविद्वयोधाः॥ ११॥

एषः। पुनानः। मधुऽमान्। ऋतऽवा। इन्द्राय। इन्दुः। पवते। स्वादुः। ऊर्मिः।

वाजऽसनिः। वरिवःऽवित्। वयःऽधाः॥ ११॥

स पवस्व सहमानः पृतन्यून्त्सेधन्रक्षांस्यप दुर्गहाणि। स्वायुधः सासह्वान्त्सोम शत्रून्॥ १२॥ [२३]

सः। पवस्व। सहमानः। पृतन्यून्। सेधन्। रक्षांसि। अप। दुःऽगहानि।

सुऽआयुधः। ससह्वान्। सोम। शत्रून्॥ १२॥

[११२ (१११)] [३ अनानतः पारुच्छेपिः। पवमानः सोमः। अत्यष्टिः]

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः।

धारा सुतस्य रोचते पुनानो अरुषो हरिः।

विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः॥ १॥

अया। रुचा। हरिण्या। पुनानः। विश्वा। द्वेषांसि। तरति। स्वयुग्वऽभिः। सूरः। नि। स्वयुग्वऽभिः।

धारा। सुतस्य। रोचते। पुनानः। अरुषः। हरिः।

विश्वा। यत्। रूपा। परिऽयाति। ऋक्वऽभिः। सप्तऽआस्येभिः। ऋक्वऽभिः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे।
परावतो न साम तद्यत्रा रणन्ति धीतयः।
त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे॥ २॥

त्वम्। त्यत्। पणीनाम्। विदः। वसु। सम्। मातृऽभिः। मर्जयसि। स्वे। आ। दमे।
ऋतस्य। धीतिऽभिः। दमे॥ पराऽवतः। न। साम। तत्। यत्र। रणन्ति। धीतयः।
त्रिधातुऽभिः। अरुषीभिः। वयः। दधे। रोचमानः। वयः। दधे॥ २॥

पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः।
अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता॥ ३॥ [२४]

पूर्वाम्। अनु। प्रऽदिशम्। याति। चेकितत्। सम्। रश्मिऽभिः। यतते। दर्शतः। रथः।
दैव्यः। दर्शतः। रथः॥ अग्मन्। उक्थानि। पौंस्या। इन्द्रम्। जैत्राय। हर्षयन्।
वज्रः। च। यत्। भवथः। अनपऽच्युता। समत्ऽसु। अनपऽच्युता॥ ३॥

[११३ (११२)] [४ शिशुराङ्गिरसः। पवमानः सोमः। पङ्क्तिः।]

नानानं वा उ नो धियो वि व्रतानि जनानाम्।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव॥ १॥

नानानम्। वै। ऊँ इति। नः। धियः। वि। व्रतानि। जनानाम्।
तक्षा। रिष्टम्। रुतम्। भिषक्। ब्रह्मा। सुन्वन्तम्। इच्छति। इन्द्राय। इन्दो इति। परि। स्रव॥ १॥

जरतीभिरोषधीभिः पर्णेभिः शकुनानाम्।
कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव॥ २॥

जरतीभिः। ओषधीभिः। पर्णेभिः। शकुनानाम्।
कार्मारः। अश्मऽभिः। द्युऽभिः। हिरण्यऽवन्तम्। इच्छति। इन्द्राय। इन्दो इति। परि। स्रव॥ २॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना।
नानाधियो वसूयवोऽनु गाइव तस्थिमेन्द्रायेन्दो परि स्रव॥ ३॥

कारुः। अहम्। ततः। भिषक्। उपलऽप्रक्षिणी। नना।
नानाऽधियः। वसुऽयवः। अनु। गाःऽइव। तस्थिम। इन्द्राय। इन्दो इति। परि। स्रव॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः।

शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव॥ ४॥ [२५]

अश्वः। वोळ्हा। सुऽखम्। रथम्। हसनाम्। उपऽमन्त्रिणः।

शेपः। रोमण्ऽवन्तौ। भेदौ। वाः। इत्। मण्डूकः। इच्छति। इन्द्राय। इन्दो इति। परि। स्रव॥ ४॥

[११४ (११३)] [१६ कश्यपो मारीचः। पवमानः सोमः। पङ्क्तिः।]

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा।

बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परि स्रव॥ १॥

शर्यणाऽवति। सोमम्। इन्द्रः। पिबतु। वृत्रऽहा।

बलम्। दधानः। आत्मनि। करिष्यन्। वीर्यम्। महत्। इन्द्राय। इन्दो इति। परि। स्रव॥ १॥

आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः।

ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव॥ २॥

आ। पवस्व। दिशाम्। पते। आर्जीकात्। सोम। मीढ्वः।

ऋतऽवाकेन। सत्येन। श्रद्धया। तपसा। सुतः। इन्द्राय। इन्दो इति। परि। स्रव॥ २॥

पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत्।

तं गन्धर्वाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिन्द्रायेन्दो परि स्रव॥ ३॥

पर्जन्यऽवृद्धम्। महिषम्। तम्। सूर्यस्य। दुहिता। आ। अभरत्॥ तम्। गन्धर्वाः। प्रति।

अगृभ्णन्। तम्। सोमे। रसम्। आ। अदधुः। इन्द्राय। इन्दो इति। परि। स्रव॥ ३॥

ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन्।

श्रद्धां वदन्त्सोम राजन्धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव॥ ४॥

ऋतम्। वदन्। ऋतऽद्युम्न। सत्यम्। वदन्। सत्यऽकर्मन्।

श्रद्धाम्। वदन्। सोम। राजन्। धात्रा। सोम। परिऽकृतः। इन्द्राय। इन्दो इति। परि। स्रव॥ ४॥

सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रवाः।

सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव॥ ५॥ [२६]

सत्यम्ऽउग्रस्य। बृहतः। सम्। स्रवन्ति। सम्ऽस्रवाः।

सम। यन्ति। रसिनः। रसाः। पुनानः। ब्रह्मणा। हरे। इन्द्राय। इन्दो इति। परि। स्रव॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्र ब्रह्मा पवमान छन्दस्यां३ वाचं वदन्।

ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परि स्रव॥ ६॥

यत्र। ब्रह्मा। पवमान। छन्दस्याम्। वाचम्। वदन्।

ग्राव्णा। सोमे। महीयते। सोमेन। आऽनन्दम्। जनयन्। इन्द्राय। इन्दो इति। परि। स्रव॥ ६॥

यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितम्।

तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव॥ ७॥

यत्र। ज्योतिः। अजस्रम्। यस्मिन्। लोके। स्वः। हितम्।

तस्मिन्। माम्। धेहि। पवमान। अमृते। लोके। अक्षिते। इन्द्राय। इन्दो इति। परि। स्रव॥ ७॥

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः।

यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव॥ ८॥

यत्र। राजा। वैवस्वतः। यत्र। अवऽरोधनम्। दिवः।

यत्र। अमूः। यह्वतीः। आपः। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्रव॥ ८॥

यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः।

लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव॥ ९॥

यत्र। अनुऽकामम्। चरणम्। त्रिऽनाके। त्रिऽदिवे। दिवः।

लोकाः। यत्र। ज्योतिष्मन्तः। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्रव॥ ९॥

यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम्।

स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रयेन्दो परि स्रव॥ १०॥

यत्र। कामाः। निऽकामाः। च। यत्र। ब्रध्नस्य। विष्टपम्।

स्वधा। च। यत्र। तृप्तिः। च। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्रव॥ १०॥

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते।

कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव॥ ११॥ [२७]

यत्र। आऽनन्दाः। च। मोदाः। च। मुदः। प्रऽमुदः। आसते॥ कामस्य। यत्र।

आप्ताः। कामाः। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्रव॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

★[११५] [१६ कश्यपो मारीचः। पवमानः सोमः। पङ्क्तिः।]

यत्र तत्परमं पदं विष्णोर्लोके महीयते।

देवैः सुकृतकर्मभिस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्त्रव॥ १॥★

यत्र। तत्। परमम्। पदम्। विष्णोः। लोके। महीयते।

देवैः। सुकृतकर्म॰भिः। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्त्रव॥ १॥

यत्र तत्परमाव्यं भूतानामधिपतिः।

भावभावी च योगीश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्त्रव॥ २॥★

यत्र। तत्। परम॰अव्यम्। भूतानाम्। अधि॰पतिः।

भाव॰भावी। च। योगीः। च। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्त्रव॥ २॥

यत्र देवा महात्मानः सेन्द्राश्च समरुद्गणाः।

ब्रह्मा च यत्र विष्णुश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्त्रव॥ ३॥★

यत्र। देवाः। महा॰आत्मानः। स॰इन्द्राः। च। स॰मरुद्गणाः।

ब्रह्मा। च। यत्र। विष्णुः। च। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्त्रव॥ ३॥

यत्र लोक्यास्तनूत्यजाः श्रद्धया तपसा जिताः।

तेजश्च यत्र ब्रह्म च तत्र माममृतं कृधीन्द्रायेन्दो परि स्त्रव॥ ४॥★

यत्र। लोक्याः। तनु॰त्यजाः। श्रद्धया। तपसा। जिताः।

तेजः। च। यत्र। ब्रह्म। च। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्त्रव॥ ४॥

यत्र गङ्गा च यमुना यत्र प्राची सरस्वती।

यत्र सोमेश्वरो देवस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्त्रव॥ ५॥★ [२८]

यत्र। गङ्गा। च। यमुना। यत्र। प्राची। सरस्वती॥

यत्र। सोम॰ईश्वरः। देवः। तत्र। माम्। अमृतम्। कृधि। इन्द्राय। इन्दो इति। परि। स्त्रव॥ ५॥

[११६ (११४)] [४ कश्यपो मारीचः। पवमानः सोमः। पङ्क्ति।]

य इन्दोः पवमानस्यानु धामान्यक्रमीत्।

तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्त्रव॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। इन्दोः। पवमानस्य। अनु। धामानि। अक्रमीत्॥ तम्। आहुः। सुऽप्रजाः।
इति। यः। ते। सोम। अविधत्। मनः। इन्द्राय। इन्दो इति। परि। स्रव॥ १॥

ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः।
सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्दो परि स्रव॥ २॥

ऋषे। मन्त्रऽकृताम्। स्तोमैः। कश्यप। उत्ऽवर्धयन्। गिरः।
सोमम्। नमस्य। राजानम्। यः। जज्ञे। वीरुधाम्। पतिः। इन्द्राय। इन्दो इति। परि। स्रव॥ २॥

सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्द्रो परि स्रव॥ ३॥

सप्त। दिशः। नानाऽसूर्याः। सप्त। होतारः। ऋत्विजः।
देवाः। आदित्याः। ये। सप्त। तेभिः। सोम। अभि। रक्ष। नः। इन्द्राय। इन्दो इति। परि। स्रव॥ ३॥

यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः।
अरातीवा मा नस्तारीन्मो च नः किं चनाममदिन्द्रायेन्दो परि स्रव॥ ४॥ [२९ (२८)] {७}

यत्। ते। राजन्। शृतम्। हविः। तेन। सोम। अभि। रक्ष। नः।
अरातिऽवा। मा। नः। तारीत्। मो इति। च। नः। किम्। चन। आममत्।
इन्द्राय। इन्दो इति। परि। स्रव॥ ४॥

इत्याश्वलायन-संहितायां
नवमं मण्डलं
समाप्तम्॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ दशमं मण्डलम् ॥

[१] [७ त्रित आप्त्यः । अग्निः । त्रिष्टुप् ।]

अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात् ।

अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥ १ ॥

अग्रे । बृहन् । उषसाम् । ऊर्ध्वः । अस्थात् । निःऽजगन्वान् । तमसः । ज्योतिषा । आ । अगात् ।

अग्निः । भानुना । रुशता । सुऽअङ्गः । आ । जातः । विश्वा । सद्मानि । अप्राः ॥ १ ॥

स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।

चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥ २ ॥

सः । जातः । गर्भः । असि । रोदस्योः । अग्ने । चारुः । विऽभृतः । ओषधीषु ।

चित्रः । शिशुः । परि । तमांसि । अक्तून् । प्र । मातृऽभ्यः । अधि । कनिक्रदत् । गाः ॥ २ ॥

विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभि पाति तृतीयम् ।

आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यर्चन्त्यत्र ॥ ३ ॥

विष्णुः । इत्था । परमम् । अस्य । विद्वान् । जातः । बृहन् । अभि । पाति । तृतीयम् ।

आसा । यत् । अस्य । पयः । अक्रत । स्वम् । सऽचेतसः । अभि । अर्चन्ति । अत्र ॥ ३ ॥

अत उ त्वा पितुभृतो जनित्रीरन्नावृधं प्रति चरन्त्यन्नैः ।

ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥ ४ ॥

अतः । ऊँ इति । त्वा । पितुऽभृतः । जनित्रीः । अन्नऽवृधम् । प्रति । चरन्ति । अन्नैः ।

ताः । ईम् । प्रति । एषि । पुनः । अन्यऽरूपाः । असि । त्वम् । विक्षु । मानुषीषु । होता ॥ ४ ॥

होतारं चित्ररथमध्वरस्य यज्ञस्ययज्ञस्य केतुं रुशन्तम् ।

प्रत्यर्धिं देवस्यदेवस्य मह्ना श्रिया त्व१ग्निमतिथिं जनानाम् ॥ ५ ॥

होतारम् । चित्रऽरथम् । अध्वरस्य । यज्ञस्यऽयज्ञस्य । केतुम् । रुशन्तम् ।

प्रतिऽअर्धिम् । देवस्यऽदेवस्य । मह्ना । श्रिया । तु । अग्निम् । अतिथिम् । जनानाम् ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः।
अरुषो जातः पद इळाया: पुरोहितो राजन्यक्षीह देवान्॥ ६॥
सः। तु। वस्त्राणि। अध। पेशनानि। वसानः। अग्निः। नाभा। पृथिव्याः।
अरुषः। जातः। पदे। इळायाः। पुरःऽहितः। राजन्। यक्षि। इह। देवान्॥ ६॥
आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततन्थ।
प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान्॥ ७॥ [३० (२९)]
आ। हि। द्यावापृथिवी इति। अग्ने। उभे इति। सदा। पुत्रः। न। मातरा। ततन्थ।
प्र। याहि। अच्छ। उशतः। यविष्ठ। अथ। आ। वह। सहस्य। इह। देवान्॥ ७॥

[२] [७ त्रित आप्त्यः। अग्निः। त्रिष्टुप्।]

पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँर्ऋतुपते यजेह।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः॥ १॥
पिप्रीहि। देवान्। उशतः। यविष्ठ। विद्वान्। ऋतून्। ऋतुऽपते। यज। इह।
ये। दैव्याः। ऋत्विजः। तेभिः। अग्ने। त्वम्। होतॄणाम्। असि। आऽयजिष्ठः॥ १॥
वेषि होत्रमुत पोत्रं जनानां मन्धातासि द्रविणोदा ऋतावा।
स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन्॥ २॥
वेषि। होत्रम्। उत। पोत्रम्। जनानाम्। मन्धाता। असि। द्रविणःऽदाः। ऋतऽवा।
स्वाहा। वयम्। कृणवाम। हवींषि। देवः। देवान्। यजतु। अग्निः। अर्हन्॥ २॥
आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोळ्हुम्।
अग्निर्विद्वान्त्स यजात्सेदु होता सो अध्वरान्त्स ऋतून्कल्पयाति॥ ३॥
आ। देवानाम्। अपि। पन्थाम्। अगन्म। यत्। शक्नवाम। तत्। अनु। प्रऽवोळ्हुम्।
अग्निः। विद्वान्। सः। यजात्। सः। इत्। ऊँ इति। होता। सः। अध्वरान्। सः। ऋतून्। कल्पयाति॥ ३॥
यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः।
अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाँ ऋतुभिः कल्पयाति॥ ४॥
यत्। वः। वयम्। प्रऽमिनाम। व्रतानि। विदुषाम्। देवाः। अविदुःऽतरासः।
अग्निः। तत्। विश्वम्। आ। पृणाति। विद्वान्। येभिः। देवान्। ऋतुऽभिः। कल्पयाति॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्पाकुत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः।
अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति॥ ५॥
यत्। पाकुऽत्रा। मनसा। दीनऽदक्षाः। न। यज्ञस्य। मन्वते। मर्त्यासः।
अग्निः। तत्। होता। क्रतुऽवित्। विऽजानन्। यजिष्ठः। देवान्। ऋतुऽशः। यजाति॥ ५॥
विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान।
स आ यजस्व नृवतीरनु क्षाः स्पार्हा इषः क्षुमतीर्विश्वजन्याः॥ ६॥
विश्वेषाम्। हि। अध्वराणाम्। अनीकम्। चित्रम्। केतुम्। जनिता। त्वा। जजान।
सः। आ। यजस्व। नृऽवतीः। अनु। क्षाः। स्पार्हाः। इषः। क्षुऽमतीः। विश्वऽजन्याः॥ ६॥
यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान।
पन्थामनु प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि॥ ७॥ [३१ (३०)]
यम्। त्वा। द्यावापृथिवी इति। यम्। त्वा। आपः। त्वष्टा। यम्। त्वा। सुऽजनिमा। जजान।
पन्थाम्। अनु। प्रऽविद्वान्। पितृऽयानम्। द्युऽमत्। अग्ने। सम्ऽइधानः। वि। भाहि॥ ७॥

[३] [७ त्रित आप्त्यः। अग्निः। त्रिष्टुप्।]

इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि।
चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन्॥ १॥
इनः। राजन्। अरतिः। सम्ऽइद्धः। रौद्रः। दक्षाय। सुसुऽमान्। अदर्शि।
चिकित्। वि। भाति। भासा। बृहता। असिक्नीम्। एति। रुशतीम्। अपऽअजन्॥ १॥
कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम्।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति॥ २॥
कृष्णाम्। यत्। एनीम्। अभि। वर्पसा। भूत्। जनयन्। योषाम्। बृहतः। पितुः। जाम्।
ऊर्ध्वम्। भानुम्। सूर्यस्य। स्तभायन्। दिवः। वसुऽभिः। अरतिः। वि। भाति॥ २॥
भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात्।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात्॥ ३॥
भद्रः। भद्रया। सचमानः। आ। अगात्। स्वसारम्। जारः। अभि। एति। पश्चात्।
सुऽप्रकेतैः। द्युऽभिः। अग्निः। विऽतिष्ठन्। रुशत्ऽभिः। वर्णैः। अभि। रामम्। अस्थात्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्य यामासो बृहतो न वग्नूनिन्धाना अग्नेः सख्युः शिवस्य।

ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नक्तवश्चिकित्रे॥ ४॥

अस्य। यामासः। बृहतः। न। वग्नून्। इन्धानाः। अग्नेः। सख्युः। शिवस्य।

ईड्यस्य। वृष्णः। बृहतः। सुऽआसः। भामासः। यामन्। अक्तवः। चिकित्रे॥ ४॥

स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः।

ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्याम्॥ ५॥

स्वनाः। न। यस्य। भामासः। पवन्ते। रोचमानस्य। बृहतः। सुऽदिवः।

ज्येष्ठेभिः। यः। तेजिष्ठैः। क्रीळुमत्ऽभिः। वर्षिष्ठेभिः। भानुऽभिः। नक्षति। द्याम्॥ ५॥

अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः।

प्रत्नेभिर्यो रुशद्भिर्देवतमो वि रेभद्भिररतिर्भाति विभ्वा॥ ६॥

अस्य। शुष्मासः। ददृशानऽपवेः। जेहमानस्य। स्वनयन्। नियुत्ऽभिः।

प्रत्नेभिः। यः। रुशत्ऽभिः। देवऽतमः। वि। रेभत्ऽभिः। अरतिः। भाति। विऽभ्वा॥ ६॥

स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः।

अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः॥ ७॥ [३२ (३१)]

सः। आ। वक्षि। महि। नः। आ। च। सत्सि। दिवःपृथिव्योः। अरतिः। युवत्योः।

अग्निः। सुऽतुकः। सुऽतुकेभिः। अश्वैः। रभस्वत्ऽभिः। रभस्वान्। आ। इह। गम्याः॥ ७॥

[४] [७ त्रित आप्त्यः। अग्निः। त्रिष्टुप्।]

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु।

धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन्॥ १॥

प्र। ते। यक्षि। प्र। ते। इयर्मि। मन्म। भुवः। यथा। वन्द्यः। नः। हवेषु।

धन्वन्ऽइव। प्रऽपा। असि। त्वम्। अग्ने। इयक्षवे। पूरवे। प्रत्न। राजन्॥ १॥

यं त्वा जनासो अभि संचरन्ति गाव उष्णमिव व्रजं यविष्ठ।

दूतो देवानामसि मर्त्यानामन्तर्महाँश्चरसि रोचनेन॥ २॥

यम्। त्वा। जनासः। अभि। सम्ऽचरन्ति। गावः। उष्णम्ऽइव। व्रजम्। यविष्ठ।

दूतः। देवानाम्। असि। मर्त्यानाम्। अन्तः। महान्। चरसि। रोचनेन॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शिशुं न त्वा जेन्यं वर्धयन्ती माता बिभर्ति सचनस्यमाना।

धनोरधि प्रवता यासि हर्यञ्जिगीषसे पशुरिवावसृष्टः ॥ ३ ॥

शिशुम्। न। त्वा। जेन्यम्। वर्धयन्ती। माता। बिभर्ति। सचनस्यमाना।

धनोः। अधि। प्रऽवता। यासि। हर्यन्। जिगीषसे। पशुःऽइव। अवऽसृष्टः ॥ ३ ॥

मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से।

शये वव्रिश्चरति जिह्वयादन्रेरिह्यते युवतिं विश्पतिः सन् ॥ ४ ॥

मूराः। अमूर। न। वयम्। चिकित्वः। महिऽत्वम्। अग्ने। त्वम्। अङ्ग। वित्से।

शये। वव्रिः। चरति। जिह्वया। अदन्। रेरिह्यते। युवतिम्। विश्पतिः। सन् ॥ ४ ॥

कूचिज्जायते सनयासु नव्यो वने तस्थौ पलितो धूमकेतुः।

अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयन्त मर्ताः ॥ ५ ॥

कूऽचित्। जायते। सनयासु। नव्यः। वने। तस्थौ। पलितः। धूमऽकेतुः।

अस्नाता। आपः। वृषभः। न। प्र। वेति। सऽचेतसः। यम्। प्रऽनयन्त। मर्ताः ॥ ५ ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम्।

इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गैः ॥ ६ ॥

तनूत्यजाऽइव। तस्करा। वनर्गू इति। रशनाभिः। दशऽभिः। अभि। अधीताम्।

इयम्। ते। अग्ने। नव्यसी। मनीषी। युक्ष्व। रथम्। न। शुचयत्ऽभिः। अङ्गैः ॥ ६ ॥

ब्रह्म च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत्।

रक्षा णो अग्ने तनयानि तोका रक्षोत नस्तन्वो३ अप्रयुच्छन् ॥ ७ ॥ [३३ (३२)]

ब्रह्म। च। ते। जातऽवेदः। नमः। च। इयम्। च। गीः। सदम्। इत्। वर्धनी। भूत्।

रक्ष। नः। अग्ने। तनयानि। तोका। रक्ष। उत। नः। तन्वः। अप्रऽयुच्छन् ॥ ७ ॥

[५] [७ त्रित आप्त्यः। अग्निः। त्रिष्टुप्।]

एकः समुद्रो धरुणो रयीणामस्मद्धृदो भूरिजन्मा वि चष्टे।

सिषक्त्यूधर्निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः ॥ १ ॥

एकः। समुद्रः। धरुणः। रयीणाम्। अस्मत्। हृदः। भूरिऽजन्मा। वि। चष्टे।

सिसक्ति। ऊधः। निण्योः। उपऽस्थे। उत्सस्य। मध्ये। निऽहितम्। पदम्। वेरिति वेः ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः।
ऋतस्य पदं कवयो नि पान्ति गुहा नामानि दधिरे पराणि॥ २॥

समानम्। नीळम्। वृषणः। वसानाः। सम्। जग्मिरे। महिषाः। अर्वतीभिः।
ऋतस्य। पदम्। कवयः। नि। पान्ति। गुहा। नामानि। दधिरे। पराणि॥ २॥

ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर्वर्धयन्ती।
विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित्तन्तुं मनसा वियन्तः॥ ३॥

ऋतयिनी इत्यृतऽयिनी। मायिनी इति। सम्। दधाते इति। मित्वा। शिशुम्। जज्ञतुः। वर्धयन्ती इति।
विश्वस्य। नाभिम्। चरतः। ध्रुवस्य। कवेः। चित्। तन्तुम्। मनसा। विऽयन्तः॥ ३॥

ऋतस्य हि वर्तनयः सुजातमिषो वाजाय प्रदिवः सचन्ते।
अधीवासं रोदसी वावसाने घृतैरन्नैर्वावृधाते मधूनाम्॥ ४॥

ऋतस्य। हि। वर्तनयः। सुऽजातम्। इषः। वाजाय। प्रऽदिवः। सचन्ते।
अधीवासम्। रोदसी इति। ववसाने इति। घृतैः। अन्नैः। ववृधाते इति। मधूनाम्॥ ४॥

सप्त स्वसृररुषीर्वावशानो विद्वान्मध्व उज्जभारा दृशे कम्।
अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्वव्रिमविदत्पूषणस्य॥ ५॥

सप्त। स्वसृः। अरुषीः। वावशानः। विद्वान्। मध्वः। उत्। जभार। दृशे। कम्।
अन्तः। येमे। अन्तरिक्षे। पुराऽजाः। इच्छन्। वव्रिम्। अविदत्। पूषणस्य॥ ५॥

सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्।
आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ॥ ६॥

सप्त। मर्यादाः। कवयः। ततक्षुः। तासाम्। एकाम्। इत्। अभि। अंहुरः। गात्।
आयोः। ह। स्कम्भः। उपऽमस्य। नीळे। पथाम्। विऽसर्गे। धरुणेषु। तस्थौ॥ ६॥

असच्च सच्च परमे व्योमन्दक्षस्य जन्मन्नदितेरुपस्थे।
अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः॥ ७॥ [३४ (३३)]

असत्। च। सत्। च। परमे। विऽओमन्। दक्षस्य। जन्मन्। अदितेः। उपऽस्थे।
अग्निः। ह। नः। प्रथमऽजाः। ऋतस्य। पूर्वे। आयुनि। वृषभः। च। धेनुः॥ ७॥

इत्याश्वलायन-संहितायां सप्तमाष्टके पञ्चमोऽध्यायः समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके षष्ठोऽध्यायः ॥

[६] [७ त्रित आप्त्यः । अग्निः । त्रिष्टुप् ।]

अयं स यस्य शर्मन्नवोभिरग्नेरेधते जरिताभिष्टौ ।
ज्येष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥ १ ॥
अयम् । सः । यस्य । शर्मन् । अवःऽभिः । अग्नेः । एधते । जरिता । अभिष्टौ ।
ज्येष्ठेभिः । यः । भानुऽभिः । ऋषूणाम् । परिऽएति । परिऽवीतः । विभाऽवा ॥ १ ॥

यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः ।
आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥ २ ॥
यः । भानुऽभिः । विभाऽवा । विऽभाति । अग्निः । देवेभिः । ऋतऽवा । अजस्रः ।
आ । यः । विवाय । सख्या । सखिऽभ्यः । अपरिऽह्वृतः । अत्यः । न । सप्तिः ॥ २ ॥

ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ ।
आ यस्मिन्मना हवींष्यग्नावरिष्टरथः स्कभ्नाति शूषैः ॥ ३ ॥
ईशे । यः । विश्वस्याः । देवऽवीतेः । ईशे । विश्वऽआयुः । उषसः । विऽउष्टौ ।
आ । यस्मिन् । मना । हवींषि । अग्नौ । अरिष्टऽरथः । स्कभ्नाति । शूषैः ॥ ३ ॥

शूषेभिर्वृधो जुषाणो अर्कैर्देवाँ अच्छा रघुपत्वा जिगाति ।
मन्द्रो होता स जुह्वा यजिष्ठः संमिश्लो अग्निरा जिघर्ति देवान् ॥ ४ ॥
शूषेभिः । वृधः । जुषाणः । अर्कैः । देवान् । अच्छ । रघुऽपत्वा । जिगाति ।
मन्द्रः । होता । सः । जुह्वा । यजिष्ठः । सम्ऽमिश्लः । अग्निः । आ । जिघर्ति । देवान् ॥ ४ ॥

तमुस्रामिन्द्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वम् ।
आ यं विप्रासो मतिभिर्गृणन्ति जातवेदसं जुह्वं सहानाम् ॥ ५ ॥
तम् । उस्राम् । इन्द्रम् । न । रेजमानम् । अग्निम् । गीःऽभिः । नमःऽभिः । आ । कृणुध्वम् ।
आ । यम् । विप्रासः । मतिऽभिः । गृणन्ति । जातऽवेदसम् । जुह्वम् । सहानाम् ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवन्त एवैः।

अस्मै ऊतीरिन्द्रवाततमा अर्वाचीना अग्न आ कृणुष्व॥ ६॥

सम्। यस्मिन्। विश्वा। वसूनि। जग्मुः। वाजे। न। अश्वाः। सप्तिऽवन्तः। एवैः।

अस्मै इति। ऊतीः। इन्द्रवातऽतमाः। अर्वाचीनाः। अग्ने। आ। कृणुष्व॥ ६॥

अधा ह्यग्ने मह्ना निषद्या सद्यो जज्ञानो हव्यो बभूथ।

तं ते देवासो अनु केतमायन्नधावर्धन्त प्रथमास ऊमाः॥ ७॥ [१]

अध। हि। अग्ने। मह्ना। निऽसद्य। सद्यः। जज्ञानः। हव्यः। बभूथ।

तम्। ते। देवासः। अनु। केतम्। आयन्। अध। अवर्धन्त। प्रथमासः। ऊमाः॥ ७॥

[७] [७ त्रित आप्त्यः। अग्निः। त्रिष्टुप्।]

स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव।

सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः॥ १॥

स्वस्ति। नः। दिवः। अग्ने। पृथिव्याः। विश्वऽआयुः। धेहि। यजथाय। देव।

सचेमहि। तव। दस्म। प्रऽकेतैः। उरुष्य। नः। उरुऽभिः। देव। शंसैः॥ १॥

इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणन्ति राधः।

यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात॥ २॥

इमाः। अग्ने। मतयः। तुभ्यम्। जाताः। गोभिः। अश्वैः। अभि। गृणन्ति। राधः।

यदा। ते। मर्तः। अनु। भोगम्। आनट्। वसो इति। दधानः। मतिऽभिः। सुऽजात॥ २॥

अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायम्।

अग्नेरनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य॥ ३॥

अग्निम्। मन्ये। पितरम्। अग्निम्। आपिम्। अग्निम्। भ्रातरम्। सदम्। इत्। सखायम्।

अग्नेः। अनीकम्। बृहतः। सपर्यम्। दिवि। शुक्रम्। यजतम्। सूर्यस्य॥ ३॥

सिध्रा अग्ने धियो अस्मे सनुत्रीर्यं त्रायसे दम आ नित्यहोता।

ऋतावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु॥ ४॥

सिध्राः। अग्ने। धियः। अस्मे इति। सनुत्रीः। यम्। त्रायसे। दमे। आ। नित्यऽहोता।

ऋतऽवा। सः। रोहित्ऽअश्वः। पुरुऽक्षुः। द्युऽभिः। अस्मै। अहऽभिः। वामम्। अस्तु॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारम्।
बाहुभ्यामग्निमायवोऽजनन्त विक्षु होतारं न्यसादयन्त॥ ५॥

द्युऽभिः। हितम्। मित्रम्ऽइव। प्रऽयोगम्। प्रत्नम्। ऋत्विजम्। अध्वरस्य। जारम्।
बाहुऽभ्याम्। अग्निम्। आयवः। अजनन्त। विक्षु। होतारम्। नि। असादयन्त॥ ५॥

स्वयं यजस्व दिवि देव देवान् किं ते पाकः कृणवदप्रचेताः।
यथायज ऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात॥ ६॥

स्वयम्। यजस्व। दिवि। देव। देवान्। किम्। ते। पाकः। कृणवत्। अप्रऽचेताः।
यथा। अयजः। ऋतुऽभिः। देव। देवान्। एव। यजस्व। तन्वम्। सुऽजात॥ ६॥

भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः।
रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वो३ अप्रयुच्छन्॥ ७॥ [२]

भव। नः। अग्ने। अविता। उत। गोपाः। भव। वयः२कृत्। उत। नः। वयः२धाः।
रास्व। च। नः। सुऽमहः। हव्यऽदातिम्। त्रास्व। उत। नः। तन्वः। अप्रऽयुच्छन्॥ ७॥

[८] [९ त्रित आप्त्यः। अग्निः। त्रिष्टुप्।]

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति।
दिवश्चिदन्ताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध॥ १॥

प्र। केतुना। बृहता। याति। अग्निः। आ। रोदसी इति। वृषभः। रोरवीति।
दिवः। चित्। अन्तान्। उपऽमान्। उत्। आनट्। अपाम्। उपऽस्थे। महिषः। ववर्ध॥ १॥

मुमोद गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमीवाँ अरावीत्।
स देवतात्युद्यतानि कृण्वन्त्स्वेषु क्षयेषु प्रथमो जिगाति॥ २॥

मुमोद। गर्भः। वृषभः। ककुत्ऽमान्। अस्रेमा। वत्सः। शिमीऽवान्। अरावीत्।
सः। देवऽताति। उत्ऽयतानि। कृण्वन्। स्वेषु। क्षयेषु। प्रथमः। जिगाति॥ २॥

आ यो मूर्धानं पित्रोररब्ध न्यध्वरे दधिरे सूरो अर्णः।
अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषन्त॥ ३॥

आ। यः। मूर्धानम्। पित्रोः। अरब्ध। नि। अध्वरे। दधिरे। सूरः। अर्णः।
अस्य। पत्मन्। अरुषीः। अश्वऽबुध्नाः। ऋतस्य। योनौ। तन्वः। जुषन्त॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उषउषो हि वसो अग्रमेषि त्वं यमयोरभवो विभावा।
ऋताय सप्त दधिषे पदानि जनयन्मित्रं तन्वे३ स्वायै ॥ ४॥
उषःऽउषः। हि। वसो इति। अग्रम्। एषि। त्वम्। यमयोः। अभवः। विभाऽवा।
ऋताय। सप्त। दधिषे। पदानि। जनयन्। मित्रम्। तन्वे। स्वायै ॥ ४॥
भुवश्चक्षुर्मह ऋतस्य गोपा भुवो वरुणो यदृताय वेषि।
भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥ ५॥ [३]
भुवः। चक्षुः। महः। ऋतस्य। गोपाः। भुवः। वरुणः। यत्। ऋताय। वेषि।
भुवः। अपाम्। नपात्। जातऽवेदः। भुवः। दूतः। यस्य। हव्यम्। जुजोषः॥ ५॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम्॥ ६॥
भुवः। यज्ञस्य। रजसः। च। नेता। यत्र। नियुत्ऽभिः। सचसे। शिवाभिः।
दिवि। मूर्धानम्। दधिषे। स्वःऽसाम्। जिह्वाम्। अग्ने। चकृषे। हव्यऽवाहम्॥ ६॥
अस्य त्रितः क्रतुना वव्रे अन्तरिच्छन्धीतिं पितुरेवैः परस्य।
सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति॥ ७॥
अस्य। त्रितः। क्रतुना। वव्रे। अन्तः। इच्छन्। धीतिम्। पितुः। एवैः। परस्य।
सचस्यमानः। पित्रोः। उपऽस्थे। जामि। ब्रुवाणः। आयुधानि। वेति॥ ७॥
स पित्र्याण्यायुधानि विद्वानिन्द्रेषित आप्त्यो अभ्ययुध्यत्।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः॥ ८॥
सः। पित्र्याणि। आयुधानि। विद्वान्। इन्द्रऽइषितः। आप्त्यः। अभि। अयुध्यत्।
त्रिऽशीर्षाणम्। सप्तऽरश्मिम्। जघन्वान्। त्वाष्ट्रस्य। चित्। निः। ससृजे। त्रितः। गाः॥ ८॥
भूरीदिन्द्र उदिनक्षन्तमोजोऽवाभिनत् सत्पतिर्मन्यमानम्।
त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क्॥ ९॥ [४]
भूरि। इत्। इन्द्रः। उत्ऽइनक्षन्तम्। ओजः। अव। अभिनत्। सत्ऽपतिः। मन्यमानम्।
त्वाष्ट्रस्य। चित्। विश्वऽरूपस्य। गोनाम्। आऽचक्राणः। त्रीणि। शीर्षा। परा। वर्गिति वर्क्॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[९] [१० त्रिशिरास्त्वाष्ट्रः सिन्धुद्वीप आम्बरीषो वा। आपः। गायत्री, ५ वर्धमाना गायत्री, ७ प्रतिष्ठा गायत्री, ८-१० अनुष्टुप्।]

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ १॥

आपः। हि। स्थ। मयःऽभुवः। ताः। नः। ऊर्जे। दधातन। महे। रणाय। चक्षसे॥ १॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ २॥

यः। वः। शिवऽतमः। रसः। तस्य। भाजयत। इह। नः। उशतीःऽइव। मातरः॥ २॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ ३॥

तस्मै। अरम्। गमाम। वः। यस्य। क्षयाय। जिन्वथ। आपः। जनयथ। च। नः॥ ३॥

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः॥ ४॥

शम्। नः। देवीः। अभिष्टये। आपः। भवन्तु। पीतये। शम्। योः। अभि। स्रवन्तु। नः॥ ४॥

ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्॥ ५॥

ईशानाः। वार्याणाम्। क्षयन्तीः। चर्षणीनाम्। अपः। याचामि। भेषजम्॥ ५॥

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवम्॥ ६॥

अप्ऽसु। मे। सोमः। अब्रवीत्। अन्तः। विश्वानि। भेषजा। अग्निम्। च। विश्वऽशंभुवम्॥ ६॥

आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक्च सूर्यं दृशे॥ ७॥

आपः। पृणीत। भेषजम्। वरूथम्। तन्वे। मम। ज्योक्। च। सूर्यम्। दृशे॥ ७॥

इदमापः प्र वहत यत्किं च दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम्॥ ८॥

इदम्। आपः। प्र। वहत। यत्। किम्। च। दुःऽइतम्। मयि।
यत्। वा। अहम्। अभिऽदुद्रोह। यत्। वा। शेपे। उत। अनृतम्॥ ८॥

आपो अद्यान्वचारिषं रसेन समगस्महि। पयस्वानग्न आ गहि तं मा सं सृज वर्चसा॥ ९॥ (५)

आपः। अद्य। अनु। अचारिषम्। रसेन। सम्। अगस्महि।
पयस्वान्। अग्ने। आ। गहि। तम्। मा। सम्। सृज। वर्चसा॥ ९॥

ससृुषीस्तदपसो दिवा नक्तं च ससृुषीः। वरेण्यक्रतुरहमा देवीरवसे हुवे॥ १०॥ ★ [५]

ससृुषीः। तत्ऽअपसः। दिवा। नक्तम्। च। ससृुषीः।
वरेण्यऽक्रतुः। अहम्। आ। देवीः। अवसे। हुवे॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१०] [१४ नवमीवर्ज्यानामयुजां षष्ठ्याश्च वैवस्वती यमी ऋषिर्यमो देवता। षष्ठीवर्ज्यानां युजां नवम्याश्च वैवस्वतो यम ऋषिर्यमी देवता। त्रिष्टुप्।]

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान्।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः॥ १॥

ओ इति। चित्। सखायम्। सख्या। ववृत्याम्। तिरः। पुरु। चित्। अर्णवम्। जगन्वान्।
पितुः। नपातम्। आ। दधीत। वेधाः। अधि। क्षमि। प्रऽतरम्। दीध्यानः॥ १॥

न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन्॥ २॥

न। ते। सखा। सख्यम्। वष्टि। एतत्। सऽलक्ष्मा। यत्। विषुऽरूपा। भवाति।
महः। पुत्रासः। असुरस्य। वीराः। दिवः। धर्तारः। उर्विया। परि। ख्यन्॥ २॥

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्वमा विविश्याः॥ ३॥

उशन्ति। घ। ते। अमृतासः। एतत्। एकस्य। चित्। त्यजसम्। मर्त्यस्य।
नि। ते। मनः। मनसि। धायि। अस्मे इति। जन्युः। पतिः। तन्वम्। आ। विविश्याः॥ ३॥

न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम।
गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ॥ ४॥

न। यत्। पुरा। चकृम। कत्। ह। नूनम्। ऋता। वदन्तः। अनृतम्। रपेम।
गन्धर्वः। अप्ऽसु। अप्या। च। योषा। सा। नः। नाभिः। परमम्। जामि। तत्। नौ॥ ४॥

गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः।
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः॥ ५॥ [६]

गर्भे। नु। नौ। जनिता। दंपती इति दम्ऽपती। कः। देवः। त्वष्टा। सविता। विश्वऽरूपः।
नकिः। अस्य। प्र। मिनन्ति। व्रतानि। वेद। नौ। अस्य। पृथिवी। उत। द्यौः॥ ५॥

को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत्।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन्॥ ६॥

कः। अस्य। वेद। प्रथमस्य। अह्नः। कः। ईम्। ददर्श। कः। इह। प्र। वोचत्।
बृहत्। मित्रस्य। वरुणस्य। धाम। कत्। ऊँ इति। ब्रवः। आहनः। वीच्या। नॄन्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय।

जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥ ७ ॥

यमस्य। मा। यम्यम्। कामः। आ। अगन्। समाने। योनौ। सहऽशेय्याय।

जायाऽइव। पत्ये। तन्वम्। रिरिच्याम्। वि। चित्। वृहेव। रथ्याऽइव। चक्रा ॥ ७ ॥

न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति।

अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥ ८ ॥

न। तिष्ठन्ति। न। नि। मिषन्ति। एते। देवानाम्। स्पशः। इह। ये। चरन्ति।

अन्येन। मत्। आहनः। याहि। तूयम्। तेन। वि। वृह। रथ्याऽइव। चक्रा ॥ ८ ॥

रात्रीभिरस्मा अहभिर्दशस्येत् सूर्यस्य चक्षुर्मुहुरुन्मिमीयात्।

दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य बिभृयादजामि ॥ ९ ॥

रात्रीभिः। अस्मै। अहऽभिः। दशस्येत्। सूर्यस्य। चक्षुः। मुहुः। उत्। मिमीयात्।

दिवा। पृथिव्या। मिथुना। सबन्धू इति सऽबन्धू। यमीः। यमस्य। बिभृयात्। अजामि ॥ ९ ॥

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि।

उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥ १० ॥ [७]

आ। घ। ता। गच्छान्। उत्ऽतरा। युगानि। यत्र। जामयः। कृणवन्। अजामि।

उप। बर्बृहि। वृषभाय। बाहुम्। अन्यम्। इच्छस्व। सुऽभगे। पतिम्। मत् ॥ १० ॥

किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात्।

काममूता बह्वे३तद्रपामि तन्वा मे तन्वं१सं पिपृग्धि ॥ ११ ॥

किम्। भ्राता। असत्। यत्। अनाथम्। भवाति। किम्। ऊँ इति। स्वसा। यत्। निःऽर्ऋतिः। निऽगच्छात्।

कामऽमूता। बहु। एतत्। रपामि। तन्वा। मे। तन्वम्। सम्। पिपृग्धि ॥ ११ ॥

न वा उ ते तन्वा तन्वं१सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात्।

अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥ १२ ॥

न। वै। ऊँ इति। ते। तन्वा। तन्वम्। सम्। पपृच्याम्। पापम्। आहुः। यः। स्वसारम्। निऽगच्छात्।

अन्येन। मत्। प्रऽमुदः। कल्पयस्व। न। ते। भ्राता। सुऽभगे। वष्टि। एतत् ॥ १२ ॥

बतो बतासि यम नैव ते मनो हृदयं चाविदाम।

अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षम् ॥ १३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बृतः। बृत। असि। यम। न। एव। ते। मनः। हृदयम्। च। अविदाम।
अन्या। किल। त्वाम्। कृक्ष्याऽइव। युक्तम्। परि। स्वजाते। लिबुजाऽइव। वृक्षम्॥ १३॥
अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम्।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम्॥ १४॥ [८]
अन्यम्। ऊँ इति। सु। त्वम्। यमि। अन्यः। ऊँ इति। त्वाम्। परि। स्वजाते। लिबुजाऽइव। वृक्षम्।
तस्य। वा। त्वम्। मनः। इच्छ। सः। वा। तव। अध। कृणुष्व। सम्ऽविदम्। सुऽभद्राम्॥ १४॥

[११] [९ आङ्गिर्हविर्धानः। अग्निः। जगती, ७-९ त्रिष्टुप्।]

वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून्॥ १॥
वृषा। वृष्णे। दुदुहे। दोहसा। दिवः। पयांसि। यह्वः। अदितेः। अदाभ्यः।
विश्वम्। सः। वेद। वरुणः। यथा। धिया। सः। यज्ञियः। यजतु। यज्ञियान्। ऋतून्॥ १॥
रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति॥ २॥
रपत्। गन्धर्वीः। अप्या। च। योषणा। नदस्य। नादे। परि। पातु। मे। मनः।
इष्टस्य। मध्ये। अदितिः। नि। धातु। नः। भ्राता। नः। ज्येष्ठः। प्रथमः। वि। वोचति॥ २॥
सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती।
यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन्॥ ३॥
सो इति। चित्। नु। भद्रा। क्षुऽमती। यशस्वती। उषाः। उवास। मनवे। स्वःऽवती।
यत्। ईम्। उशन्तम्। उशताम्। अनु। क्रतुम्। अग्निम्। होतारम्। विदथाय। जीजनन्॥ ३॥
अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे।
यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत॥ ४॥
अध। त्यम्। द्रप्सम्। विऽभ्वम्। विऽचक्षणम्। विः। आ। अभरत्। इषितः। श्येनः। अध्वरे।
यदि। विशः। वृणते। दस्मम्। आर्याः। अग्निम्। होतारम्। अध। धीः। अजायत॥ ४॥
सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः।
विप्रस्य वा यच्छशमान उक्थ्यं१ वाजं ससवाँ उपयासि भूरिभिः॥ ५॥ [९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सदा। असि। रण्वः। यवसाऽइव। पुष्यते। होत्राभिः। अग्ने। मनुषः। सुऽअध्वरः।

विप्रस्य। वा। यत्। शशमानः। उक्थ्यम्। वाजम्। ससऽवान्। उपऽयासि। भूरिऽभिः॥ ५॥

उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति।

विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती॥ ६॥

उत्। ईरय। पितरा। जारः। आ। भगम्। इयक्षति। हर्यतः। हृत्तः। इष्यति।

विवक्ति। वह्निः। सुऽअपस्यते। मखः। तविष्यते। असुरः। वेपते। मती॥ ६॥

यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे।

इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून्॥ ७॥

यः। ते। अग्ने। सुऽमतिम्। मर्तः। अक्षत्। सहसः। सूनो इति। अति। सः। प्र। शृण्वे।

इषम्। दधानः। वहमानः। अश्वैः। आ। सः। द्युऽमान्। अमऽवान्। भूषति। द्यून्॥ ७॥

यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र।

रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात्॥ ८॥

यत्। अग्ने। एषा। सम्ऽइतिः। भवाति। देवी। देवेषु। यजता। यजत्र।

रत्ना। च। यत्। विऽभजासि। स्वधाऽवः। भागम्। नः। अत्र। वसुऽमन्तम्। वीतात्॥ ८॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम्।

आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः॥ ९॥ [१०]

श्रुधि। नः। अग्ने। सदने। सधऽस्थे। युक्ष्व। रथम्। अमृतस्य। द्रवित्नुम्।

आ। नः। वह। रोदसी इति। देवपुत्रे इति देवऽपुत्रे। माकिः। देवानाम्। अप। भूः। इह। स्याः॥ ९॥

[१२] [९ आङ्गिर्हविर्धानः। अग्निः। त्रिष्टुप्।]

द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा।

देवो यन्मर्तान्यजथाय कृण्वन्त्सीदद्धोता प्रत्यङ्स्वमसुं यन्॥ १॥

द्यावा। ह। क्षामा। प्रथमे इति। ऋतेन। अभिऽश्रावे। भवतः। सत्यऽवाचा।

देवः। यत्। मर्तान्। यजथाय। कृण्वन्। सीदत्। होता। प्रत्यङ्। स्वम्। असुम्। यन्॥ १॥

देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान्।

धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवः। देवान्। परिऽभूः। ऋतेन। वह। नः। हव्यम्। प्रथमः। चिकित्वान्।
धूमऽकेतुः। सम्ऽइधा। भाःऽऋजीकः। मन्द्रः। होता। नित्यः। वाचा। यजीयान्॥ २॥

स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी।
विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः॥ ३॥

स्वावृक्। देवस्य। अमृतम्। यदि। गोः। अतः। जातासः। धारयन्ते। उर्वी इति।
विश्वे। देवाः। अनु। तत्। ते। यजुः। गुः। दुहे। यत्। एनी। दिव्यम्। घृतम्। वारिति वाः॥ ३॥

अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे।
अहा यद् द्यावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीताम्॥ ४॥

अर्चामि। वाम्। वर्धाय। अपः। घृतस्नू इति घृतऽस्नू। द्यावाभूमी इति। शृणुतम्। रोदसी इति। मे।
अहा। यत्। द्यावः। असुऽनीतिम्। अयन्। मध्वा। नः। अत्र। पितरा। शिशीताम्॥ ४॥

किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद।
मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति॥ ५॥ [११]

किम्। स्वित्। नः। राजा। जगृहे। कत्। अस्य। अति। व्रतम्। चकृम। कः। वि। वेद।
मित्रः। चित्। हि। स्म। जुहुराणः। देवान्। श्लोकः। न। याताम्। अपि। वाजः। अस्ति॥ ५॥

दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन्॥ ६॥

दुःऽमन्तु। अत्र। अमृतस्य। नाम। सऽलक्ष्मा। यत्। विषुऽरूपा। भवाति।
यमस्य। यः। मनवते। सुऽमन्तु। अग्ने। तम्। ऋष्व। पाहि। अप्रऽयुच्छन्॥ ६॥

यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा॥ ७॥

यस्मिन्। देवाः। विदथे। मादयन्ते। विवस्वतः। सदने। धारयन्ते।
सूर्ये। ज्योतिः। अदधुः। मासि। अक्तून्। परि। द्योतनिम्। चरतः। अजस्रा॥ ७॥

यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत्॥ ८॥

यस्मिन्। देवाः। मन्मनि। सम्ऽचरन्ति। अपीच्ये। न। वयम्। अस्य। विद्म।
मित्रः। नः। अत्र। अदितिः। अनागान्। सविता। देवः। वरुणाय। वोचत्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रुधी नों अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम्।

आ नों वह रोदंसी देवपुंत्रे माकिर्देवानामप भूरिह स्याः॥ ९॥ [१२]

श्रुधि। नः। अग्ने। सदने। सधऽस्थे। युक्ष्व। रथम्। अमृतस्य। द्रवित्नुम्।

आ। नः। वह। रोदंसी इति। देवपुत्रे इति देवऽपुंत्रे। माकिः। देवानाम्। अप। भूः। इह। स्याः॥ ९॥

[१३] [५ विवस्वानादित्यः। हविर्धाने। त्रिष्टुप्, ५ जगती।]

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः।

शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः॥ १॥

युजे। वाम्। ब्रह्म। पूर्व्यम्। नमःऽभिः। वि। श्लोकः। एतु। पथ्याऽइव। सूरेः।

शृण्वन्तु। विश्वे। अमृतस्य। पुत्राः। आ। ये। धामानि। दिव्यानि। तस्थुः॥ १॥

यमेइव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः।

आ सीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नः॥ २॥

यमेइवेति यमेऽइव। यतमाने इति। यत्। एतम्। प्र। वाम्। भरन्। मानुषाः। देवऽयन्तः॥ आ। सीदतम्।

स्वम्। ऊँ इति। लोकम्। विदाने इति। स्वासस्थे इति सुऽआसस्थे। भवतम्। इन्दवे। नः॥ २॥

पञ्च पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन।

अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि॥ ३॥

पञ्च। पदानि। रुपः। अनु। अरोहम्। चतुःऽपदीम्। अनु। एमि। व्रतेन।

अक्षरेण। प्रति। मिमे। एताम्। ऋतस्य। नाभौ। अधि। सम्। पुनामि॥ ३॥

देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत।

बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत्॥ ४॥

देवेभ्यः। कम्। अवृणीत। मृत्युम्। प्रऽजायै। कम्। अमृतम्। न। अवृणीत।

बृहस्पतिम्। यज्ञम्। अकृण्वत। ऋषिम्। प्रियाम्। यमः। तन्वम्। अरिरेचीत्॥ ४॥

सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतम्।

उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः॥ ५॥ [१३]

सप्त। क्षरन्ति। शिशवे। मरुत्वते। पित्रे। पुत्रासः। अपि। अवीवतन्। ऋतम्।

उभे इति। इत्। अस्य। उभयस्य। राजतः। उभे इति। यतेते इति। उभयस्य। पुष्यतः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१४] [१६ यमोवैवस्वतः। यमः, ६ अङ्गिरःपित्रथर्वभृगुसोमाः,
७-९ लिङ्गोक्तदेवताः, पितरो वा, १०-१२ श्वानौ।
त्रिष्टुप्, १३, १४, १६, अनुष्टुभः, १५ बृहती।]

परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम्।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य॥ १॥
परेयिऽवांसम्। प्रऽवतः। महीः। अनु। बहुऽभ्यः। पन्थाम्। अनुऽपस्पशानम्।
वैवस्वतम्। सम्ऽगमनम्। जनानाम्। यमम्। राजानम्। हविषा। दुवस्य॥ १॥
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः॥ २॥
यमः। नः। गातुम्। प्रथमः। विवेद। न। एषा। गव्यूतिः। अपऽभर्तवै। ऊँ इति।
यत्र। नः। पूर्वे। पितरः। पराऽईयुः। एना। जज्ञानाः। पथ्याः। अनु। स्वाः॥ २॥
मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः।
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति॥ ३॥
मातली। कव्यैः। यमः। अङ्गिरःऽभिः। बृहस्पतिः। ऋक्वऽभिः। ववृधानः।
यान्। च। देवाः। ववृधुः। ये। च। देवान्। स्वाहा। अन्ये। स्वधया। अन्ये। मदन्ति॥ ३॥
इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥ ४॥
इमम्। यम। प्रऽस्तरम्। आ। हि। सीद। अङ्गिरःऽभिः। पितृऽभिः। सम्ऽविदानः।
आ। त्वा। मन्त्राः। कविऽशस्ताः। वहन्तु। एना। राजन्। हविषा। मादयस्व॥ ४॥
अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व।
विवस्वन्तं हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य॥ ५॥ [१४]
अङ्गिरःऽभिः। आ। गहि। यज्ञियेभिः। यम। वैरूपैः। इह। मादयस्व।
विवस्वन्तम्। हुवे। यः। पिता। ते। अस्मिन्। यज्ञे। बर्हिषि। आ। निऽसद्य॥ ५॥
अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अङ्गिरसः । नः । पितरः । नव॑ऽग्वाः । अथर्वाणः । भृग॑वः । सोम्यासः ।

तेषा॑म् । व॒यम् । सु॒ऽम॒तौ । य॒ज्ञिया॑नाम् । अपि॑ । भ॒द्रे । सौ॒म॒न॒से । स्या॒म॒ ॥ ६ ॥

प्रेहि॒ प्रेहि॑ प॒थिभिः॑ पू॒र्व्येभि॒र्यत्रा॑ नः॒ पूर्वे॑ पि॒तरः॑ परे॒युः ।

उ॒भा राजा॑ना स्व॒धया॒ मद॑न्ता य॒मं प॑श्यासि॒ वरु॑णं च दे॒वम् ॥ ७ ॥

प्र । इ॒हि॒ । प्र । इ॒हि॒ । प॒थिऽभिः॑ । पू॒र्व्येभिः॑ । यत्र॑ । नः॒ । पूर्वे॑ । पि॒तरः॑ । प॒रा॒ऽई॒युः ।

उ॒भा । राजा॑ना । स्व॒धया॑ । मद॑न्ता । य॒मम् । प॒श्या॒सि॒ । वरु॑णम् । च॒ । दे॒वम् ॥ ७ ॥

सं ग॑च्छस्व पि॒तृभिः॒ सं य॒मेने॑ष्टापू॒र्तेन॑ प॒र॒मे व्यो॑मन् ।

हि॒त्वाया॑व॒द्यं पुन॒रस्त॒मेहि॒ सं ग॑च्छस्व त॒न्वा॑ सु॒वर्चाः॑ ॥ ८ ॥

सम् । ग॒च्छ॒स्व॒ । पि॒तृऽभिः॑ । सम् । य॒मेन॑ । इ॒ष्टा॒पू॒र्तेन॑ । प॒र॒मे । विऽओ॑मन् ।

हि॒त्वाय॑ । अ॒व॒द्यम् । पुनः॑ । अस्त॑म् । आ । इ॒हि॒ । सम् । ग॒च्छ॒स्व॒ । त॒न्वा॑ । सु॒ऽवर्चाः॑ ॥ ८ ॥

अपे॑त॒ वीत॒ वि च॑ सर्प॒ताता॒ऽस्मा ए॒तं पि॒तरो॑ लो॒कम॑क्रन् ।

अहो॑भिर॒द्भिर॒क्तुभि॒र्व्य॑क्तं य॒मो द॑दात्यव॒सान॑मस्मै ॥ ९ ॥

अप॑ । इ॒त॒ । वि । इ॒त॒ । वि । च॒ । स॒र्प॒त॒ । अतः॑ । अ॒स्मै । ए॒तम् । पि॒तरः॑ । लो॒कम् । अ॒क्र॒न् ।

अहः॑ऽभिः । अ॒त्ऽभिः । अ॒क्तुऽभिः॑ । विऽअ॑क्तम् । य॒मः । द॒दा॒ति॒ । अ॒व॒ऽसान॑म् । अ॒स्मै॒ ॥ ९ ॥

अति॑ द्रव सार॒मेयौ॑ श्वानौ॑ चतुर॒क्षौ श॒बलौ॑ सा॒धुना॑ प॒था ।

अथा॑ पि॒तॄन्त्सु॑वि॒दत्राँ॒ उपे॑हि य॒मेन॒ ये स॑ध॒माद॒ मद॑न्ति ॥ १० ॥ [१५]

अति॑ । द्र॒व॒ । सा॒र॒मे॒यौ । श्वानौ॑ । च॒तुः॒ऽअ॒क्षौ । श॒बलौ॑ । सा॒धुना॑ । प॒था ।

अथ॑ । पि॒तॄन् । सु॒ऽवि॒दत्रा॑न् । उप॑ । इ॒हि॒ । य॒मेन॑ । ये । स॒ध॒ऽमाद॑म् । मद॑न्ति ॥ १० ॥

यौ ते॒ श्वानौ॑ यम रक्षि॒तारौ॑ चतुर॒क्षौ प॑थि॒रक्षी॑ नृ॒चक्ष॑सौ ।

ताभ्या॑मेनं॒ परि॑ देहि राजन्त्स्व॒स्ति चा॑स्मा अनमी॒वं च॑ धेहि ॥ ११ ॥

यौ । ते॒ । श्वानौ॑ । य॒म॒ । र॒क्षि॒तारौ॑ । च॒तुः॒ऽअ॒क्षौ । प॒थि॒रक्षी॒ इति॑ प॒थि॒ऽरक्षी॑ । नृ॒ऽचक्ष॑सौ ।

ताभ्या॑म् । ए॒न॒म् । परि॑ । दे॒हि॒ । रा॒ज॒न् । स्व॒स्ति । च॒ । अ॒स्मै॒ । अ॒न॒मी॒वम् । च॒ । धे॒हि॒ ॥ ११ ॥

उ॒रू॒ण॒सावसु॒तृपा॑ उदुम्ब॒लौ य॒मस्य॑ दू॒तौ च॑रतो॒ जनाँ॒ अनु॑ ।

ताव॒स्मभ्यं॑ दृ॒शये॒ सूर्या॑य॒ पुन॑र्दाता॒मसु॑म॒द्येह भ॒द्रम् ॥ १२ ॥

उ॒रु॒ऽन॒सौ । अ॒सु॒ऽतृपौ॑ । उ॒दु॒म्ब॒लौ । य॒मस्य॑ । दू॒तौ । च॒र॒तः॒ । जना॑न् । अनु॑ ।

तौ । अ॒स्मभ्य॑म् । दृ॒शयै॑ । सूर्या॑य । पुनः॑ । दा॒ता॒म् । असु॑म् । अ॒द्य । इ॒ह । भ॒द्रम् ॥ १२ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यमाय सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः॥ १३॥

यमाय। सोमम्। सुनुत। यमाय। जुहुत। हविः।

यमम्। ह। यज्ञः। गच्छति। अग्निऽदूतः। अरम्ऽकृतः॥ १३॥

यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत। स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे॥ १४॥

यमाय। घृतऽवत्। हविः। जुहोत। प्र। च। तिष्ठत।

सः। नः। देवेषु। आ। यमत्। दीर्घम्। आयुः। प्र। जीवसे॥ १४॥

यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः॥ १५॥

यमाय। मधुमत्ऽतमम्। राज्ञे। हव्यम्। जुहोतन।

इदम्। नमः। ऋषिऽभ्यः। पूर्वऽजेभ्यः। पूर्वेभ्यः। पथिकृत्ऽभ्यः॥ १५॥

त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत्। त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता॥ १६॥ [१६]

त्रिऽकद्रुकेभिः। पतति। षट्। उर्वीः। एकम्। इत्। बृहत्।

त्रिऽस्तुप्। गायत्री। छन्दांसि। सर्वा। ता। यमे। आऽहिता॥ १६॥

[१५] [१४ शङ्खो यामायनः। पितरः। त्रिष्टुप्, ११ जगती।]

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥ १॥

उत्। ईरताम्। अवरे। उत्। परासः। उत्। मध्यमाः। पितरः। सोम्यासः।

असुम्। ये। ईयुः। अवृकाः। ऋतऽज्ञाः। ते। नः। अवन्तु। पितरः। हवेषु॥ १॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु॥ २॥

इदम्। पितृभ्यः। नमः। अस्तु। अद्य। ये। पूर्वासः। ये। उपरासः। ईयुः।

ये। पर्थिवे। रजसि। आ। निऽसत्ताः। ये। वा। नूनम्। सुऽवृजनासु। विक्षु॥ २॥

आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः॥ ३॥

आ। अहम्। पितॄन्। सुऽविदत्रान्। अवित्सि। नपातम्। च। विऽक्रमणम्। च। विष्णोः।

बर्हिऽसदः। ये। स्वधया। सुतस्य। भजन्त। पित्वः। ते। इह। आऽगमिष्ठाः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वम्।

त आ गतावसा शंतमेनाथा नः शं योररपो दधात॥ ४॥

बर्हिऽसदः। पितरः। ऊती। अर्वाक्। इमा। वः। हव्या। चकृम। जुषध्वम्।

ते। आ। गत। अवसा। शम्ऽतमेन। अथ। नः। शम्। योः। अरपः। दधात॥ ४॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु।

त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान्॥ ५॥ [१७]

उपऽहूताः। पितरः। सोम्यासः। बर्हिष्येषु। निऽधिषु। प्रियेषु।

ते। आ। गमन्तु। ते। इह। श्रुवन्तु। अधि। ब्रुवन्तु। ते। अवन्तु। अस्मान्॥ ५॥

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे।

मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम॥ ६॥

आऽअच्य। जानु। दक्षिणतः। निऽसद्य। इमम्। यज्ञम्। अभि। गृणीत। विश्वे।

मा। हिंसिष्ट। पितरः। केन। चित्। नः। यत्। वः। आगः। पुरुषता। कराम॥ ६॥

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय।

पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात॥ ७॥

आसीनासः। अरुणीनाम्। उपऽस्थे। रयिम्। धत्त। दाशुषे। मर्त्याय।

पुत्रेभ्यः। पितरः। तस्य। वस्वः। प्र। यच्छत। ते। इह। ऊर्जम्। दधात॥ ७॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः।

तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु॥ ८॥

ये। नः। पूर्वे। पितरः। सोम्यासः। अनुऽऊहिरे। सोमऽपीथम्। वसिष्ठाः।

तेभिः। यमः। सम्ऽरराणः। हवींषि। उशन्। उशत्ऽभिः। प्रतिऽकामम्। अत्तु॥ ८॥

ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः।

आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः॥ ९॥

ये। ततृषुः। देवऽत्रा। जेहमानाः। होत्राऽविदः। स्तोमऽतष्टासः। अर्कैः।

आ। अग्ने। याहि। सुऽविदत्रेभिः। अर्वाङ्। सत्यैः। कव्यैः। पितृऽभिः। घर्मसत्ऽभिः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः॥ १०॥ [१८]
ये। सत्यासः। हविःऽअदः। हविःऽपाः। इन्द्रेण। देवैः। सऽरथम्। दधानाः।
आ। अग्ने। याहि। सहस्रम्। देवऽवन्दैः। परैः। पूर्वैः। पितृऽभिः। घर्मसत्ऽभिः॥ १०॥
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन॥ ११॥
अग्निऽस्वात्ताः। पितरः। आ। इह। गच्छत। सदःऽसदः। सदत। सुऽप्रनीतयः।
अत्त। हवींषि। प्रऽयतानि। बर्हिषि। अथ। रयिम्। सर्वऽवीरम्। दधातन॥ ११॥
त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि॥ १२॥
त्वम्। अग्ने। ईळितः। जातऽवेदः। अवाट्। हव्यानि। सुरभीणि। कृत्वी।
प्र। अदाः। पितृऽभ्यः। स्वधया। ते। अक्षन्। अद्धि। त्वम्। देव। प्रऽयता। हवींषि॥ १२॥
ये चेह पितरो ये च नेह यांश्च विद्म याँ उ च न प्रविद्म।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व॥ १३॥
ये। च। इह। पितरः। ये। च। न। इह। यान्। च। विद्म। यान्। ऊँ इति। च। न। प्रऽविद्म॥
त्वम्। वेत्थ। यति। ते। जातऽवेदः। स्वधाभिः। यज्ञम्। सुऽकृतम्। जुषस्व॥ १३॥
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते।
तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व॥ १४॥ [१९]
ये। अग्निऽदग्धाः। ये। अनग्निऽदग्धाः। मध्ये। दिवः। स्वधया। मादयन्ते।
तेभिः। स्वऽराट्। असुऽनीतिम्। एताम्। यथाऽवशम्। तन्वम्। कल्पयस्व॥ १४॥

[१६] [१४ दमनो यामायनः। अग्निः। त्रिष्टुप्, ११-१४ अनुष्टुभः।]

मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरम्।
यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः॥ १॥
मा। एनम्। अग्ने। वि। दहः। मा। अभि। शोचः। मा। अस्य। त्वचम्। चिक्षिपः। मा। शरीरम्।
यदा। शृतम्। कृणवः। जातऽवेदः। अथ। ईम्। एनम्। प्र। हिणुतात्। पितृऽभ्यः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः।

यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति॥ २॥

शृतम्। यदा। करसि। जातऽवेदः। अथ। ईम्। एनम्। परि। दत्तात्। पितृऽभ्यः।

यदा। गच्छाति। असुऽनीतिम्। एताम्। अथ। देवानाम्। वशऽनीः। भवाति॥ २॥

सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा।

अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः॥ ३॥

सूर्यम्। चक्षुः। गच्छतु। वातम्। आत्मा। द्याम्। च। गच्छ। पृथिवीम्। च। धर्मणा।

अपः। वा। गच्छ। यदि। तत्र। ते। हितम्। ओषधीषु। प्रति। तिष्ठ। शरीरैः॥ ३॥

अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः।

यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम्॥ ४॥

अजः। भागः। तपसा। तम्। तपस्व। तम्। ते। शोचिः। तपतु। तम्। ते। अर्चिः।

याः। ते। शिवाः। तन्वः। जातऽवेदः। ताभिः। वह। एनम्। सुऽकृताम्। ऊँ इति। लोकम्॥ ४॥

अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः।

आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः॥ ५॥ [२०]

अव। सृज। पुनः। अग्ने। पितृऽभ्यः। यः। ते। आऽहुतः। चरति। स्वधाभिः।

आयुः। वसानः। उप। वेतु। शेषः। सम्। गच्छताम्। तन्वा। जातऽवेदः॥ ५॥

यत्ते कृष्ण शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः।

अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश॥ ६॥

यत्। ते। कृष्णः। शकुनः। आऽतुतोद। पिपीलः। सर्पः। उत। वा। श्वापदः।

अग्नि। तत्। विश्वऽअत्। अगदम्। कृणोतु। सोमः। च। यः। ब्राह्मणान्। आऽविवेश॥ ६॥

अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च।

नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यङ्खयाते॥ ७॥

अग्नेः। वर्म। परि। गोभिः। व्ययस्व। सम्। प्र। ऊर्णुष्व। पीवसा। मेदसा। च।

न। इत्। त्वा। धृष्णुः। हरसा। जर्हृषाणः। दधृक्। विऽधक्ष्यन्। परिऽअङ्खयाते॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम्।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ते॥ ८॥

इमम्। अग्ने। चमसम्। मा। वि। जिह्वरः। प्रियः। देवानाम्। उत। सोम्यानाम्।
एषः। यः। चमसः। देव॰पानः। तस्मिन्। देवाः। अमृताः। मादयन्ते॥ ८॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्॥ ९॥

क्रव्य॰अदम्। अग्निम्। प्र। हिणोमि। दूरम्। यम॰राज्ञः। गच्छतु। रिप्र॰वाहः।
इह। एव। अयम्। इतरः। जात॰वेदाः। देवेभ्यः। हव्यम्। वहतु। प्र॰जानन्॥ ९॥

यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम्।
तं हरामि पितृयज्ञाय देवं स घर्ममिन्वात्परमे सधस्थे॥ १०॥ [२१]

यः। अग्निः। क्रव्य॰अत्। प्र॰विवेश। वः। गृहम्। इमम्। पश्यन्। इतरम्। जात॰वेदसम्।
तम्। हरामि। पितृ॰यज्ञाय। देवम्। सः। घर्मम्। इन्वात्। परमे। सध॰स्थे॥ १०॥

यो अग्निः क्रव्यवाहनः पितॄन्यक्षदृतावृधः। प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ॥ ११॥

यः। अग्निः। क्रव्य॰वाहनः। पितॄन्। यक्षत्। ऋत॰वृधः।
प्र। इत्। ऊँ इति। हव्यानि। वोचति। देवेभ्यः। च। पितृ॰भ्यः। आ॥ ११॥

उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि। उशन्नुशत आ वह पितॄन्हविषे अत्तवे॥ १२॥

उशन्तः। त्वा। नि। धीमहि। उशन्तः। सम्। इधीमहि।
उशन्। उशतः। आ। वह। पितॄन्। हविषे। अत्तवे॥ १२॥

यं त्वमग्ने समदहस्तमु निर्वापया पुनः। कियाम्ब्वत्र रोहतु पाकदूर्वा व्यल्कशा॥ १३॥

यम्। त्वम्। अग्ने। सम्॰अदहः। तम्। ऊँ इति। निः। वापय। पुनरिति।
कियाम्बु। अत्र। रोहतु। पाक॰दूर्वा। वि॰अल्कशा॥ १३॥

शीतिके शीतिकावति ह्लादिके ह्लादिकावति।
मण्डूक्या३ सु सं गम इमं स्व१ग्निं हर्षय॥ १४॥ [२२] {१}

शीतिके। शीतिका॰वति। ह्लादिके। ह्लादिका॰वति।
मण्डूक्या। सु। सम्। गमः। इमम्। सु। अग्निम्। हर्षय॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१७] [१४ देवश्रवा यामायनः। १-२ सरण्यू, ३-६ पूषा, ७-९ सरस्वती, १०-१४ आपः, ११-१३ सोमो वा। त्रिष्टुप्, १३-१४ अनुष्टुभौ, १३ पुरस्ताद्बृहती वा।]

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति।

यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश॥ १॥

त्वष्टा। दुहित्रे। वहतुम्। कृणोति। इति। इदम्। विश्वम्। भुवनम्। सम्। एति।

यमस्य। माता। परिऽउह्यमाना। महः। जाया। विवस्वतः। ननाश॥ १॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामदद्धुर्विवस्वते।

उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः॥ २॥

अप। अगूहन्। अमृताम्। मर्त्येभ्यः। कृत्वी। सऽवर्णाम्। अददुः। विवस्वते।

उत। अश्विनौ। अभरत्। यत्। तत्। आसीत्। अजहात्। ऊँ इति। द्वा। मिथुना। सरण्यूः॥ २॥

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।

स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः॥ ३॥

पूषा। त्वा। इतः। च्यवयतु। प्र। विद्वान्। अनष्टऽपशुः। भुवनस्य। गोपाः।

सः। त्वा। एतेभ्यः। परि। ददत्। पितृऽभ्यः। अग्निः। देवेभ्यः। सुऽविदत्रियेभ्यः॥ ३॥

आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात्।

यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु॥ ४॥

आयुः। विश्वऽआयुः। परि। पासति। त्वा। पूषा। त्वा। पातु। प्रऽपथे। पुरस्तात्।

यत्र। आसते। सुऽकृतः। यत्र। ते। ययुः। तत्र। त्वा। देवः। सविता। दधातु॥ ४॥

पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत्।

स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन्॥ ५॥ [२३]

पूषा। इमाः। आशाः। अनु। वेद। सर्वाः। सः। अस्मान्। अभयऽतमेन। नेषत्।

स्वस्तिऽदाः। आघृणिः। सर्वऽवीरः। अप्रऽयुच्छन्। पुरः। एतु। प्रऽजानन्॥ ५॥

प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः।

उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रऽपथे। पथाम्। अजनिष्ट। पूषा। प्रऽपथे। दिवः। प्रऽपथे। पृथिव्याः॥ उभे इति। अभि।
प्रियतमे इति प्रियऽतमे। सधस्थे इति सधऽस्थे। आ। च। परा। च। चरति। प्रऽजानन्॥ ६॥

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात्॥ ७॥

सरस्वतीम्। देवऽयन्तः। हवन्ते। सरस्वतीम्। अध्वरे। तायमाने।
सरस्वतीम्। सुऽकृतः। अह्वयन्त। सरस्वती। दाशुषे। वार्यम्। दात्॥ ७॥

सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदन्ती।
आसद्यास्मिन्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे॥ ८॥

सरस्वति। या। सऽरथम्। ययाथ। स्वधाभिः। देवि। पितृऽभिः। मदन्ती।
आऽसद्य। अस्मिन्। बर्हिषि। मादयस्व। अनमीवाः। इषः। आ। धेहि। अस्मे इति॥ ८॥

सरस्वतीं यां पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः।
सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि॥ ९॥

सरस्वतीम्। याम्। पितरः। हवन्ते। दक्षिणा। यज्ञम्। अभिऽनक्षमाणाः।
सहस्रऽअर्घम्। इळः। अत्र। भागम्। रायः। पोषम्। यजमानेषु। धेहि॥ ९॥

आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु।
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि॥ १०॥ [२४]

आपः। अस्मान्। मातरः। शुन्धयन्तु। घृतेन। नः। घृतऽप्वः। पुनन्तु।
विश्वम्। हि। रिप्रम्। प्रऽवहन्ति। देवीः। उत्। इत्। आभ्यः। शुचिः। आ। पूतः। एमि॥ १०॥

द्रप्सश्चस्कन्द प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः॥ ११॥

द्रप्सः। चस्कन्द। प्रथमान्। अनु। द्यून्। इमम्। च। योनिम्। अनु। यः। च। पूर्वः।
समानम्। योनिम्। अनु। सम्ऽचरन्तम्। द्रप्सम्। जुहोमि। अनु। सप्त। होत्राः॥ ११॥

यस्ते द्रप्सः स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात्।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतम्॥ १२॥

यः। ते। द्रप्सः। स्कन्दति। यः। ते। अंशुः। बाहुऽच्युतः। धिषणायाः। उपऽस्थात्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध्वर्योः। वा। परि। वा। यः। पवित्रात्। तम्। ते। जुहोमि। मनसा। वषट्ऽकृतम्॥ १२॥

यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा।

अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे॥ १३॥

यः। ते। द्रप्सः। स्कन्नः। यः। ते। अंशुः। अवः। च। यः। परः। स्रुचा।

अयम्। देवः। बृहस्पतिः। सम्। तम्। सिञ्चतु। राधसे॥ १३॥

पयस्वतीरोषधयः पयस्वन्मामकं वचः। अपां पयस्वदित्पयस्तेन मा सह शुन्धत॥ १४॥ [२५]

पयस्वतीः। ओषधयः। पयस्वत्। मामकम्। वचः।

अपाम्। पयस्वत्। इत्। पयः। तेन। मा। सह। शुन्धत॥ १४॥

[१८] [१४ संकुसुको यामायनः। १-४ मृत्युः, ५ धाता, ६ त्वष्टा, ७-१४ पितृमेधः, १४ प्रजापतिर्वा। त्रिष्टुप्, ११ प्रस्तारपङ्क्ति, १३ जगती, १४ अनुष्टुप्।]

परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात्।

चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्॥ १॥

परम्। मृत्यो इति। अनु। परा। इहि। पन्थाम्। यः। ते। स्वः। इतरः। देवऽयानात्।

चक्षुष्मते। शृण्वते। ते। ब्रवीमि। मा। नः। प्रऽजाम्। रिरिषः। मा। उत। वीरान्॥ १॥

मृत्योः पदं योपयन्तो यदैत द्राघीय आयुः प्रतरं दधानाः।

आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः॥ २॥

मृत्योः। पदम्। योपयन्तः। यत्। ऐत। द्राघीयः। आयुः। प्रऽतरम्। दधानाः।

आऽप्यायमानाः। प्रऽजया। धनेन। शुद्धाः। पूताः। भवत। यज्ञियासः॥ २॥

इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य।

प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः॥ ३॥

इमे। जीवाः। वि। मृतैः। आ। अववृत्रन्। अभूत्। भद्रा। देवऽहूतिः। नः। अद्य।

प्राञ्चः। अगाम। नृतये। हसाय। द्राघीयः। आयुः। प्रऽतरम्। दधानाः॥ ३॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।

शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन॥ ४॥

इमम्। जीवेभ्यः। परिऽधिम्। दधामि। मा। एषाम्। नु। गात्। अपरः। अर्थम्। एतम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शतम्। जीवन्तु। शरदः। पुरुचीः। अन्तः। मृत्युम्। दधताम्। पर्वतेन॥ ४॥

यथाहान्यनुपूर्वं भवन्ति यथ ऋतव ऋतुभिर्यन्ति साधु।

यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्॥ ५॥ [२६]

यथा। अहानि। अनु॰पूर्वम्। भवन्ति। यथा। ऋतवः। ऋतु॰भिः। यन्ति। साधु।

यथा। न। पूर्वम्। अपरः। जहाति। एव। धातः। आयूंषि। कल्पय। एषाम्॥ ५॥

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ।

इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः॥ ६॥

आ। रोहत। आयुः। जरसम्। वृणानाः। अनु॰पूर्वम्। यतमानाः। यति। स्थ।

इह। त्वष्टा। सु॰जनिमा। स॰जोषाः। दीर्घम्। आयुः। करति। जीवसे। वः॥ ६॥

इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं विशन्तु।

अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे॥ ७॥

इमाः। नारीः। अविधवाः। सु॰पत्नीः। आ॰अञ्जनेन। सर्पिषा। सम्। विशन्तु।

अनश्रवः। अनमीवाः। सु॰रत्नाः। आ। रोहन्तु। जनयः। योनिम्। अग्रे॥ ७॥

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि।

हस्तग्राभस्य दधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ॥ ७॥

उत्। ईर्ष्व। नारि। अभि। जीव॰लोकम्। गत॰असुम्। एतम्। उप। शेषे। आ। इहि।

हस्त॰ग्राभस्य। दिधिषोः। तव। इदम्। पत्युः। जनि॰त्वम्। अभि। सम्। बभूथ॥ ८॥

धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय।

अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम॥ ९॥

धनुः। हस्तात्। आ॰ददानः। मृतस्य। अस्मे इति। क्षत्राय। वर्चसे। बलाय।

अत्र। एव। त्वम्। इह। वयम्। सु॰वीराः। विश्वाः। स्पृधः। अभि॰मातीः। जयेम॥ ९॥

उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम्।

ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात्॥ १०॥ [२७]

उप। सर्प। मातरम्। भूमिम्। एताम्। उरु॰व्यचसम्। पृथिवीम्। सु॰शेवाम्।

ऊर्ण॰म्रदाः। युवतिः। दक्षिणा॰वते। एषा। त्वा। पातु। निः॰ऋतेः। उप॰स्थात्॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना।

माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि॥ ११॥

उत्। श्वञ्चस्व। पृथिवि। मा। नि। बाधथाः। सुऽउपायना। अस्मै। भव। सुऽउपवञ्चना।

माता। पुत्रम्। यथा। सिचा। अभि। एनम्। भूमे। ऊर्णुहि॥ ११॥

उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम्।

ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र॥ १२॥

उत्ऽश्वञ्चमाना। पृथिवी। सु। तिष्ठतु। सहस्रम्। मितः। उप। हि। श्रयन्ताम्।

ते। गृहासः। घृतऽश्चुतः। भवन्तु। विश्वाहा। अस्मै। शरणाः। सन्तु। अत्र॥ १२॥

उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम्।

एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः साधना ते मिनोतु॥ १३॥

उत्। ते। स्तभ्नामि। पृथिवीम्। त्वत्। परि। इमम्। लोगम्। निऽदधत्। मो इति। अहम्। रिषम्।

एताम्। स्थूणाम्। पितरः। धारयन्तु। ते। अत्र। यमः। सदना। ते। मिनोतु॥ १३॥

प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः। प्रतीचीं जग्रभा वाचमश्वं रशनया यथा॥ १४॥ [२८]

प्रतीचीने। माम्। अहनि। इष्वाः। पर्णम्ऽइव। आ। दधुः।

प्रतीचीम्। जग्रभ। वाचम्। अश्वम्। रशनया। यथा॥ १४॥

इत्याश्वलायन-संहितायां

सप्तमाष्टके

षष्ठोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके सप्तमोध्यायः ॥

[१९] [८ मथितो यामायनः, भृगुर्वारुणिर्वा, च्यवनोभार्गवो वा। आपः, गावो वा, १ उत्तरार्धर्चस्य अग्नीषोमौ। अनुष्टुप्, ६ गायत्री]

नि वर्तध्वं मानु गातास्मान्त्सिसक्त रेवतीः। अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम्॥ १॥

नि। वर्तध्वम्। मा। अनु। गात। अस्मान्। सिसक्त। रेवतीः।

अग्नीषोमा। पुनर्वसू इति पुनः२वसू। अस्मे इति। धारयतम्। रयिम्॥ १॥

पुनरेना नि वर्तय पुनरेना न्या कुरु। इन्द्र एणा नि यच्छत्वग्निरेना उपाजतु॥ २॥

पुनः। एनाः। नि। वर्तय। पुनः। एनाः। नि। आ। कुरु।

इन्द्रः। एनाः। नि। यच्छतु। अग्निः। एनाः। उप॰आजतु॥ २॥

पुनरेता नि वर्तन्तामस्मिन् पुष्यन्तु गोपतौ। इहैवाग्ने नि धारयेह तिष्ठतु या रयिः॥ ३॥

पुनः। एताः। नि। वर्तन्ताम्। अस्मिन्। पुष्यन्तु। गो॰पतौ।

इह। एव। अग्ने। नि। धारय। इह। तिष्ठतु। या। रयिः॥ ३॥

यन्नियानं न्ययनं संज्ञानं यत्परायणम्। आवर्तनं निवर्तनं यो गोपा अपि तं हुवे॥ ४॥

यत्। नि॰यानम्। नि॰अयनम्। सम्॰ज्ञानम्। यत्। परा॰अयनम्।

आ॰वर्तनम्। नि॰वर्तनम्। यः। गोपाः। अपि। तम्। हुवे॥ ४॥

य उदानड् व्ययनं य उदानट् परायणम्। आवर्तनं निवर्तनमपि गोपा नि वर्तताम्॥ ५॥

यः। उत्॰आनट्। वि॰अयनम्। यः। उत्॰आनट्। परा॰अयनम्।

आ॰वर्तनम्। नि॰वर्तनम्। अपि। गोपाः। नि। वर्तताम्॥ ५॥

आ निवर्त नि वर्तय पुनर्न इन्द्र गा देहि। जीवाभिर्भुनजामहै॥ ६॥

आ। नि॰वर्त। नि। वर्तय। पुनः। नः। इन्द्र। गाः। देहि। जीवाभिः। भुनजामहै॥ ६॥

परि वो विश्वतो दध ऊर्जा घृतेन पयसा।

ये देवाः के च यज्ञियास्ते रय्या सं सृजन्तु नः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि। वः। विश्वतः। दुधे। ऊर्जा। घृतेन। पयसा।

ये। देवाः। के। च। यज्ञियाः। ते। रय्या। सम्। सृजन्तु। नः॥ ७॥

आ निवर्तन वर्तय नि निवर्तन वर्तय। भूम्याश्चतस्रः प्रदिशस्ताभ्य एना नि वर्तय॥ ८॥

आ। निऽवर्तन। वर्तय। नि। निऽवर्तन। वर्तय।

भूम्याः। चतस्रः। प्रऽदिशः। ताभ्यः। एना। नि। वर्तय॥ ८॥ [१]

[२०] [१० विमद ऐन्द्रः प्रजापत्यो वा, वसुकृद्वासुक्रो वा। अग्निः। गायत्री, १ एकपदा विराट्, २ अनुष्टुप्, ९ विराट्, १० त्रिष्टुप्।]

भद्रं नो अपि वातय मनः॥ १॥

भद्रम्। नः। अपि। वातय। मनः॥ १॥

अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम्। यस्य धर्मन्त्स्व१रेनीः सपर्यन्ति मातुरूधः॥ २॥

अग्निम्। ईळे। भुजाम्। यविष्ठम्। शासा। मित्रम्। दुःऽधरीतुम्।

यस्य। धर्मन्। स्वः। एनीः। सपर्यन्ति। मातुः। ऊधः॥ २॥

यमासा कृपनीळं भासाकेतुं वर्धयन्ति। भ्राजते श्रेणिदन्॥ ३॥

यम्। आसा। कृपऽनीळम्। भासाऽकेतुम्। वर्धयन्ति। भ्राजते। श्रेणिऽदन्॥ ३॥

अर्यो विशां गातुरेति प्र यदानड् दिवो अन्तान्। कविरभ्रं दीद्यानः॥ ४॥

अर्यः। विशाम्। गातुः। एति। प्र। यत्। आनट्। दिवः। अन्तान्। कविः। अभ्रम्। दीद्यानः॥ ४॥

जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे। मिन्वन्त्सद्म पुर एति॥ ५॥

जुषत्। हव्या। मानुषस्य। ऊर्ध्वः। तस्थौ। ऋभ्वा। यज्ञे। मिन्वन्। सद्म। पुरः। एति॥ ५॥

स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति। अग्निं देवा वाशीमन्तम्॥ ६॥ [२]

सः। हि। क्षेमः। हविः। यज्ञः। श्रुष्टी। इत्। अस्य। गातुः। एति। अग्निम्। देवाः। वाशीऽमन्तम्॥ ६॥

यज्ञासाहं दुव इषेऽग्निं पूर्वस्य शेवस्य। अद्रेः सूनुमायुमाहुः॥ ७॥

यज्ञऽसहम्। दुवः। इषे। अग्निम्। पूर्वस्य। शेवस्य। अद्रेः। सूनुम्। आयुम्। आहुः॥ ७॥

नरो ये के चास्मदा विश्वेत्ते वाम आ स्युः। अग्निं हविषा वर्धन्तः॥ ८॥

नरः। ये। के। च। अस्मत्। आ। विश्वा। इत्। ते। वामे। आ। स्युरिति स्युः।

अग्निम्। हविषा। वर्धन्तः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान्।
हिरण्यरूपं जनिता जजान॥ ९॥

कृष्णः। श्वेतः। अरुषः। यामः। अस्य। ब्रध्नः। ऋज्रः। उत। शोणः। यशस्वान्।
हिरण्यऽरूपम्। जनिता। जजान॥ ९॥

एवा ते अग्ने विमदो मनीषामूर्जो नपादमृतेभिः सजोषाः।
गिर आ वक्षत्सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः॥ १०॥ [३]

एव। ते। अग्ने। विऽमदः। मनीषाम्। ऊर्जः। नपात्। अमृतेभिः। सऽजोषाः॥ गिरः।
आ। वक्षत्। सुऽमतीः। इयानः। इषम्। ऊर्जम्। सुऽक्षितिम्। विश्वम्। आ। अभारित्यभाः॥ १०॥

[२१] [८ विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वासुक्रो वा। अग्निः। आस्तारपङ्क्तिः।]

आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे॥ १॥

आ। अग्निम्। न। स्ववृक्तिऽभिः। होतारम्। त्वा। वृणीमहे।
यज्ञाय। स्तीर्णऽबर्हिषे। वि। वः। मदे। शीरम्। पावकऽशोचिषम्। विवक्षसे॥ १॥

त्वामु ते स्वाभुवः शुम्भन्त्यश्वराधसः।
वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे॥ २॥

त्वाम्। ऊँ इति। ते। सुऽआभुवः। शुम्भन्ति। अश्वऽराधसः।
वेति। त्वाम्। उपऽसेचनी। वि। वः। मदे। ऋजीतिः। अग्ने। आऽहुतिः। विवक्षसे॥ २॥

त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे॥ ३॥

त्वे इति। धर्माणः। आसते। जुहूभिः। सिञ्चतीःऽइव।
कृष्णा। रूपाणि। अर्जुना। वि। वः। मदे। विश्वाः। अधि। श्रियः। धिषे। विवक्षसे॥ ३॥

यमग्ने मन्यसे रयिं सहसावन्नमर्त्य।
तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भरा विवक्षसे॥ ४॥

यम्। अग्ने। मन्यसे। रयिम्। सहसाऽवन्। अमर्त्य।
तम्। आ। नः। वाजऽसातये। वि। वः। मदे। यज्ञेषु। चित्रम्। आ। भर। विवक्षसे॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या।

भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे॥ ५॥ [४]

अग्निः। जातः। अथर्वणा। विदत्। विश्वानि। काव्या।

भुवत्। दूतः। विवस्वतः। वि। वः। मदे। प्रियः। यमस्य। काम्यः। विवक्षसे॥ ५॥

त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे।

त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे॥ ६॥

त्वाम्। यज्ञेषु। ईळते। अग्ने। प्रऽयति। अध्वरे।

त्वम्। वसूनि। काम्या। वि। वः। मदे। विश्वा। दधासि। दाशुषे। विवक्षसे॥ ६॥

त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे।

घृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्षभिर्विवक्षसे॥ ७॥

त्वाम्। यज्ञेषु। ऋत्विजम्। चारुम्। अग्ने। नि। सेदिरे।

घृतऽप्रतीकम्। मनुषः। वि। वः। मदे। शुक्रम्। चेतिष्ठम्। अक्षऽभिः। विवक्षसे॥ ७॥

अग्ने शुक्रेण शोचिषोरु प्रथयसे बृहत्।

अभिक्रन्दन्वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे॥ ८॥ [५]

अग्ने। शुक्रेण। शोचिषा। उरु। प्रथयसे। बृहत्।

अभिऽक्रन्दन्। वृषऽयसे। वि। वः। मदे। गर्भम्। दधासि। जामिषु। विवक्षसे॥ ८॥

[२२] [१५ विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वासुक्रः वा। इन्द्रः। पुरस्ताद्बृहतीः; ५, ७, ९ अनुष्टुप्, १५ त्रिष्टुप्।]

कुह श्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते।

ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा॥ १॥

कुह। श्रुतः। इन्द्रः। कस्मिन्। अद्य। जने। मित्रः। न। श्रूयते।

ऋषीणाम्। वा। यः। क्षये। गुहा। वा। चर्कृषे। गिरा॥ १॥

इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः। मित्रो न यो जनेष्वा यशश्चक्रे असाम्या॥ २॥

इह। श्रुतः। इन्द्रः। अस्मे इति। अद्य। स्तवे। वज्री। ऋचीषमः।

मित्रः। न। यः। जनेषु। आ। यशः। चक्रे। असामि। आ॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः।

भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियम्॥ ३॥

महः। यः। पतिः। शवसः। असामि। आ। महः। नृम्णस्य। तूतुजिः।

भर्ता। वज्रस्य। धृष्णोः। पिता। पुत्रम्ऽइव। प्रियम्॥ ३॥

युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः।

स्यन्ता पथा विरुक्मता सृजानः स्तोष्यध्वनः॥ ४॥

युजानः। अश्वा। वातस्य। धुनी इति। देवः। देवस्य। वज्रिऽवः।

स्यन्ता। पथा। विरुक्मता। सृजानः। स्तोषि। अध्वनः॥ ४॥

त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्यै। ययोर्देवो न मर्त्यो यन्ता नकिर्विदाय्यः॥ ५॥ [६]

त्वम्। त्या। चित्। वातस्य। अश्वा। आ। अगाः। ऋज्रा। त्मना। वहध्यै।

ययोः। देवः। न। मर्त्यः। यन्ता। नकिः। विदाय्यः॥ ५॥

अध ग्मन्तोशना पृच्छते वां कदर्था न आ गृहम्। आ जग्मथुः पराकाद्दिवश्च ग्मश्च मर्त्यम्॥ ६॥

अध। ग्मन्ता। उशना। पृच्छते। वाम्। कत्ऽअर्था। नः। आ। गृहम्।

आ। जग्मथुः। पराकात्। दिवः। च। ग्मः। च। मर्त्यम्॥ ६॥

आ न इन्द्र पृक्षसेऽस्माकं ब्रह्मोद्यतम्। तत्त्वा याचामहेऽवः शुष्णं यद्धन्नमानुषम्॥ ७॥

आ। नः। इन्द्र। पृक्षसे। अस्माकम्। ब्रह्म। उत्ऽयतम्।

तत्। त्वा। याचामहे। अवः। शुष्णम्। यत्। हन्। अमानुषम्॥ ७॥

अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः। त्वं तस्यामित्रहन् वधर्दासस्य दम्भय॥ ८॥

अकर्मा। दस्युः। अभि। नः। अमन्तुः। अन्यऽव्रतः। अमानुषः।

त्वम्। तस्य। अमित्रऽहन्। वधः। दासस्य। दम्भय॥ ८॥

त्वं न इन्द्र शूर शूरैरुत त्वोतासो बर्हणा। पुरुत्रा ते वि पूर्तयो नवन्त क्षोणयो यथा॥ ९॥

त्वम्। नः। इन्द्र। शूर। शूरैः। उत। त्वाऽऊतासः। बर्हणा।

पुरुऽत्रा। ते। वि। पूर्तयः। नवन्त। क्षोणयः। यथा॥ ९॥

त्वं तान् वृत्रहत्ये चोदयो नॄन् कार्पाणे शूर वज्रिवः।

गुहा यदी कवीनां विशां नक्षत्रशवसाम्॥ १०॥ [७]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। तान्। वृत्र॰हत्ये। चोदयः। नॄन्। कार्पाणे। शूर। वज्रि॰वः।

गुहा। यदि। कवीनाम्। विशाम्। नक्षत्र॰शवसाम्॥ १०॥

मक्षू ता त इन्द्र दानाप्नस आक्षाणे शूर वज्रिवः।

यद्ध शुष्णस्य दम्भयो जातं विश्वं सयावभिः॥ ११॥

मक्षु। ता। ते। इन्द्र। दान॰अप्नसः। आक्षाणे। शूर। वज्रि॰वः।

यत्। ह। शुष्णस्य। दम्भयः। जातम्। विश्वम्। सयाव॰भिः॥ ११॥

माकुध्र्यगिन्द्र शूर वस्वीरस्मे भूवन्नभिष्टयः।

वयंवयं त आसां सुम्ने स्याम वज्रिवः॥ १२॥

मा। अकुध्र्यक्। इन्द्र। शूर। वस्वीः। अस्मे इति। भूवन्। अभिष्टयः।

वयम्॰वयम्। ते। आसाम्। सुम्ने। स्याम। वज्रि॰वः॥ १२॥

अस्मे ता त इन्द्र सन्तु सत्याहिंसन्तीरुपस्पृशः। विद्याम यासां भुजो धेनूनां न वज्रिवः॥ १३॥

अस्मे इति। ता। ते। इन्द्र। सन्तु। सत्या। अहिंसन्तीः। उप॰स्पृशः।

विद्याम। यासाम्। भुजः। धेनूनाम्। न। वज्रि॰वः॥ १३॥

अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानाम्।

शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः॥ १४॥

अहस्ता। यत्। अपदी। वर्धत। क्षाः। शचीभिः। वेद्यानाम्।

शुष्णम्। परि। प्र॰दक्षिणित्। विश्व॰आयवे। नि। शिश्नथः॥ १४॥

पिबापिबेदिन्द्र शूर सोमं मा रिषण्यो वसवान वसुः सन्।

उत त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः॥ १५॥ [८]

पिब॰पिब। इत्। इन्द्र। शूर। सोमम्। मा। रिषण्यः। वसवान। वसुः। सन्।

उत। त्रायस्व। गृणतः। मघोनः। महः। च। रायः। रेवतः। कृधि। नः॥ १५॥

[२३] [७ विमद ऐन्द्रो प्राजापत्यो वा, वसुकृद्वा वासुक्रः। इन्द्रः। जगती; १, ७ त्रिष्टुप्, ५ अभिसारिणी।]

यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं१ विव्रतानाम्।

प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यजामहे। इन्द्रम्। वज्रऽदक्षिणम्। हरीणाम्। रथ्यम्। विऽव्रतानाम्।
प्र। श्मश्रु। दोधुवत्। ऊर्ध्वऽथा। भूत्। वि। सेनाभिः। दयमानः। वि। राधसा॥ १॥

हरी न्वस्य या वने विदे वस्विन्द्रो मघैर्मघवा वृत्रहा भुवत्।
ऋभुर्वाज ऋभुक्षाः पत्यते शवोऽव क्ष्णौमि दासस्य नाम चित्॥ २॥

हरी इति। नु। अस्य। या। वने। विदे। वसु। इन्द्रः। मघैः। मघऽवा। वृत्रऽहा। भुवत्।
ऋभुः। वाजः। ऋभुक्षाः। पत्यते। शवः। अव। क्ष्णौमि। दासस्य। नाम। चित्॥ २॥

यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो वि सूरिभिः।
आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पतिः॥ ३॥

यदा। वज्रम्। हिरण्यम्। इत्। अथ। रथम्। हरी इति। यम्। अस्य। वहतः। वि। सूरिऽभिः।
आ। तिष्ठति। मघऽवा। सनऽश्रुतः। इन्द्रः। वाजस्य। दीर्घऽश्रवसः। पतिः॥ ३॥

सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते।
अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनम्॥ ४॥

सो इति। चित्। नु। वृष्टिः। यूथ्या। स्वा। सचा। इन्द्रः। श्मश्रूणि। हरिता। अभि। प्रुष्णुते।
अव। वेति। सुऽक्षयम्। सुते। मधु। उत्। इत्। धूनोति। वातः। यथा। वनम्॥ ४॥

यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान।
तत्तदिदस्य पौंस्यं गृणीमहि पितेव यस्तविषीं वावृधे शवः॥ ५॥

यः। वाचा। विऽवाचः। मृध्रऽवाचः। पुरु। सहस्रा। अशिवा। जघान।
तत्ऽतत्। इत्। अस्य। पौंस्यम्। गृणीमसि। पिताऽइव। यः। तविषीम्। ववृधे। शवः॥ ५॥

स्तोमं त इन्द्र विमदा अजीजनन्नपूर्व्यं पुरुतमं सुदानवे।
विद्मा ह्यस्य भोजनमिनस्य यदा पशुं न गोपाः करामहे॥ ६॥

स्तोमम्। ते। इन्द्र। विऽमदाः। अजीजनन्। अपूर्व्यम्। पुरुऽतमम्। सुऽदानवे।
विद्म। हि। अस्य। भोजनम्। इनस्य। यत्। आ। पशुम्। न। गोपाः। करामहे॥ ६॥

मार्किर्न एना सख्या वि यौषुस्तव चेन्द्र विमदस्य च ऋषेः।
विद्मा हि ते प्रमतिं देव जामिवदस्मे ते सन्तु सख्या शिवानि॥ ७॥ [९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

माकिः। नः। एना। सख्या। वि। यौषुः। तव। च। इन्द्र। विऽमदस्य। च। ऋषेः।

विद्म। हि। ते। प्रऽमतिम्। देव। जामिऽवत्। अस्मे इति। ते। सन्तु। सख्या। शिवानि॥ ७॥

[२४] [६ विमद ऐन्द्रः, प्राजापत्यो वा, वसुकृद्वावासुक्रो वा। इन्द्रः, ४-६ अश्विनौ। आस्तारपङ्क्तिः, ४-६ अनुष्टुप्।]

इन्द्र सोममिमं पिब मधुमन्तं चमू सुतम्।

अस्मे रयिं नि धारय वि वो मदे सहस्रिणं पुरूवसो विवक्षसे॥ १॥

इन्द्र। सोमम्। इमम्। पिब। मधुऽमन्तम्। चमू इति। सुतम्॥ अस्मे इति।

रयिम्। नि। धारय। वि। वः। मदे। सहस्रिणम्। पुरुवसो इति पुरुऽवसो। विवक्षसे॥ १॥

त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे।

शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे॥ २॥

त्वाम्। यज्ञेभिः। उक्थैः। उप। हव्येभिः। ईमहे।

शचीऽपते। शचीनाम्। वि। वः। मदे। श्रेष्ठम्। नः। धेहि। वार्यम्। विवक्षसे॥ २॥

यस्पतिर्वार्याणामसि रध्रस्य चोदिता।

इन्द्र स्तोतॄणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे॥ ३॥

यः। पतिः। वार्याणाम्। असि। रध्रस्य। चोदिता।

इन्द्र। स्तोतॄणाम्। अविता। वि। वः। मदे। द्विषः। नः। पाहि। अंहसः। विवक्षसे॥ ३॥

युवं शक्रा मायाविना समीची निरमन्थतम्। विमदेन यदीळिता नासत्या निरमन्थतम्॥ ४॥

युवम्। शक्रा। मायाऽविना। समीची इति सम्ऽईची। निः। अमन्थतम्।

विऽमदेन। यत्। ईळिता। नासत्या। निःऽअमन्थतम्॥ ४॥

विश्वे देवा अकृपन्त समीच्योर्निष्पतन्त्योः। नासत्यावब्रुवन् देवाः पुनरा वहतादिति॥ ५॥

विश्वे। देवाः। अकृपन्त। सम्ऽईच्योः। निःऽपतन्त्योः।

नासत्यौ। अब्रुवन्। देवाः। पुनः। आ। वहतात्। इति॥ ५॥

मधुमन्मे परायणं मधुमत्पुनरायनम्। ता नो देवा देवतया युवं मधुमतस्कृतम्॥ ६॥ [१०]

मधुऽमत्। मे। पराऽअयनम्। मधुऽमत्। पुनः। आऽअयनम्।

ता। नः। देवा। देवतया। युवम्। मधुऽमतः। कृतम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[२५] [११ विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वावासुक्रः। सोमः। आस्तारपङ्क्तिः।]

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम्।

अधा ते सख्ये अन्धसो वि वो मदे रणन् गावो न यवसे विवक्षसे॥ १॥

भद्रम्। नः। अपि। वातय। मनः। दक्षम्। उत। क्रतुम्।

अध। ते। सख्ये। अन्धसः। वि। वः। मदे। रणन्। गावः। न। यवसे। विवक्षसे॥ १॥

हृदिस्पृशस्त आसते विश्वेषु सोम धामसु।

अधा कामा इमे मम वि वो मदे वि तिष्ठन्ते वसूयवो विवक्षसे॥ २॥

हृदिऽस्पृशः। ते। आसते। विश्वेषु। सोम। धामऽसु।

अध। कामाः। इमे। मम। वि। वः। मदे। वि। तिष्ठन्ते। वसुऽयवः। विवक्षसे॥ २॥

उत व्रतानि सोम ते प्राहं मिनामि पाक्या।

अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे॥ ३॥

उत। व्रतानि। सोम। ते। प्र। अहम्। मिनामि। पाक्या।

अध। पिताऽइव। सूनवे। वि। वः। मदे। मृळ। नः। अभि। चित्। वधात्। विवक्षसे॥ ३॥

समु प्र यन्ति धीतयः सर्गासोऽवताँइव।

क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँइव विवक्षसे॥ ४॥

सम्। ऊँ इति। प्र। यन्ति। धीतयः। सर्गासः। अवतान्ऽइव।

क्रतुम्। नः। सोम। जीवसे। वि। वः। मदे। धारय। चमसान्ऽइव। विवक्षसे॥ ४॥

तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे।

गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे॥ ५॥ [११]

तव। त्ये। सोम। शक्तिऽभिः। निऽकामासः। वि। ऋण्विरे।

गृत्सस्य। धीराः। तवसः। वि। वः। मदे। व्रजम्। गोऽमन्तम्। अश्विनम्। विवक्षसे॥ ५॥

पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत्।

समाकृणोषि जीवसे वि वो मदे विश्वा संपश्यन्भुवना विवक्षसे॥ ६॥

पशुम्। नः। सोम। रक्षसि। पुरुऽत्रा। विऽस्थितम्। जगत्।

सम्ऽआकृणोषि। जीवसे। वि। वः। मदे। विश्वा। सम्ऽपश्यन्। भुवना। विवक्षसे॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वं नः सोम विश्वतो गोपा अदाभ्यो भव।

सेध राजन्नप स्त्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे॥ ७॥

त्वम्। नः। सोम। विश्वतः। गोपाः। अदाभ्यः। भव।

सेध। राजन्। अप। स्त्रिधः। वि। वः। मदे। मा। नः। दुःऽशंसः। ईशत। विवक्षसे॥ ७॥

त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि।

क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे॥ ८॥

त्वम्। नः। सोम। सुऽक्रतुः। वयःऽधेयाय। जागृहि।

क्षेत्रवित्ऽतरः। मनुषः। वि। वः। मदे। द्रुहः। नः। पाहि। अंहसः। विवक्षसे॥ ८॥

त्वं नो वृत्रहन्तमेन्द्रस्येन्दो शिवः सखा।

यत्सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे॥ ९॥

त्वम्। नः। वृत्रहन्ऽतम। इन्द्रस्य। इन्दो इति। शिवः। सखा।

यत्। सीम्। हवन्ते। सम्ऽइथे। वि। वः। मदे। युध्यमानाः। तोकऽसातौ। विवक्षसे॥ ९॥

अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः।

अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे॥ १०॥

अयम्। घ। सः। तुरः। मदः। इन्द्रस्य। वर्धत। प्रियः।

अयम्। कक्षीवतः। महः। वि। वः। मदे। मतिम्। विप्रस्य। वर्धयत्। विवक्षसे॥ १०॥

अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः।

अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद्विवक्षसे॥ ११॥ [१२]

अयम्। विप्राय। दाशुषे। वाजान्। इयर्ति। गोऽमतः।

अयम्। सप्तऽभ्यः। आ। वरम्। वि। वः। मदे। प्र। अन्धम्। श्रोणम्। च। तारिषत्। विवक्षसे॥ ११॥

[२६] [९ विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वावासुक्रः। पूषा। अनुष्टुप्; १, ४ उष्णिक्।]

प्र ह्यच्छा मनीषाः स्पार्हा यन्ति नियुतः। प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः॥ १॥

प्र। हि। अच्छ। मनीषाः। स्पार्हाः। यन्ति। निऽयुतः।

प्र। दस्रा। नियुत्ऽरथः। पूषा। अविष्टु। माहिनः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्य त्यन्महित्वं वाताप्यमयं जनः। विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम्॥ २॥

यस्य। त्यत्। महिऽत्वम्। वाताप्यम्। अयम्। जनः।

विप्रः। आ। वंसत्। धीतिऽभिः। चिकेत। सुऽस्तुतीनाम्॥ २॥

स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा। अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति॥ ३॥

सः। वेद। सुऽस्तुतीनाम्। इन्दुः। न। पूषा। वृषा।

अभि। प्सुरः। प्रुषायति। व्रजम्। नः। आ। प्रुषायति॥ ३॥

मंसीमहि त्वा वयमस्माकं देव पूषन्। मतीनां च साधनं विप्राणां चाधवम्॥ ४॥

मंसीमहि। त्वा। वयम्। अस्माकम्। देव। पूषन्।

मतीनाम्। च। साधनम्। विप्राणाम्। च। आऽधवम्॥ ४॥

प्रत्यर्धिर्यज्ञानामश्वहयो रथानाम्। ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः॥ ५॥ [१३]

प्रतिऽअर्धिः। यज्ञानाम्। अश्वऽहयः। रथानाम्।

ऋषिः। सः। यः। मनुःऽहितः। विप्रस्य। यवयत्ऽसखः॥ ५॥

आधीषमाणायाः पतिः शुचायाश्च शुचस्य च। वासोवायोऽवीनामा वासांसि मर्मृजत्॥ ६॥

आऽधीषमाणायाः। पतिः। शुचायाः। च। शुचस्य। च।

वासःऽवायः। अवीनाम्। आ। वासांसि। मर्मृजत्॥ ६॥

इनो वाजानां पतिरिनः पुष्टीनां सखा। प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अदाभ्यः॥ ७॥

इनः। वाजानाम्। पतिः। इनः। पुष्टीनाम्। सखा।

प्र। श्मश्रु। हर्यतः। दूधोत्। वि। वृथा। यः। अदाभ्यः॥ ७॥

आ ते रथस्य पूषन्नजा धुरं ववृत्युः। विश्वस्यार्थिनः सखा सनोजा अनपच्युतः॥ ८॥

आ। ते। रथस्य। पूषन्। अजाः। धुरम्। ववृत्युः।

विश्वस्य। अर्थिनः। सखा। सनःऽजाः। अनपऽच्युतः॥ ८॥

अस्माकमूर्जा रथं पूषा अविष्टु माहिनः। भुवद्वाजानां वृध इमं नः शृणवद्धवम्॥ ९॥

अस्माकम्। ऊर्जा। रथम्। पूषा। अविष्टु। माहिनः।

भुवत्। वाजानाम्। वृधः। इमम्। नः। शृणवत्। हवम्॥ ९॥ [१४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[२७] [२४ वसुक्रो ऐन्द्रः । इन्द्रः । त्रिष्टुप् ।]

असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षम् ।

अनाशीर्दामहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम् ॥ १ ॥

असत् । सु । मे । जरितरिति । सः । अभिऽवेगः । यत् । सुन्वते । यजमानाय । शिक्षम् ।

अनाशीःऽदाम् । अहम् । अस्मि । प्रऽहन्ता । सत्यऽध्वृतम् । वृजिनऽयन्तम् । आभुम् ॥ १ ॥

यदीदहं युधये संनयान्यदेवयून् तन्वा३ शूशुजानान् ।

अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम् ॥ २ ॥

यदि । इत् । अहम् । युधये । सम्ऽनयानि । अदेवऽयून् । तन्वा । शूशुजानान् ।

अमा । ते । तुम्रम् । वृषभम् । पचानि । तीव्रम् । सुतम् । पञ्चऽदशम् । नि । सिञ्चम् ॥ २ ॥

नाहं तं वेद य इति ब्रवीत्यदेवयून्त्समरणे जघन्वान् ।

यदावाख्यत्समरणमृघावदादिद्ध मे वृषभा प्र ब्रुवन्ति ॥ ३ ॥

न । अहम् । तम् । वेद । यः । इति । ब्रवीति । अदेवऽयून् । सम्ऽअरणे । जघन्वान् ।

यदा । अवऽअख्यत् । सम्ऽअरणम् । ऋघावत् । आत् । इत् । ह । मे । वृषभा । प्र । ब्रुवन्ति ॥ ३ ॥

यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।

जिनामि वेत्क्षेम आ सन्तमाभुं प्र तं क्षिणां पर्वते पादगृह्य ॥ ४ ॥

यत् । अज्ञातेषु । वृजनेषु । आसम् । विश्वे । सतः । मघऽवानः । मे । आसन् ।

जिनामि । वा । इत् । क्षेमे । आ । सन्तम् । आभुम् । प्र । तम् । क्षिणाम् । पर्वते । पादऽगृह्य ॥ ४ ॥

न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।

मम स्वनात्कृधुकर्णो भयात एवेदनु द्यून्किरणः समेजात् ॥ ५ ॥ [१५]

न । वै । ऊँ इति । माम् । वृजने । वारयन्ते । न । पर्वतासः । यत् । अहम् । मनस्ये ।

मम । स्वनात् । कृधुऽकर्णः । भयाते । एव । इत् । अनु । द्यून् । किरणः । सम् । एजात् ॥ ५ ॥

दर्शन्वत्र शृतपाँ अनिन्द्रान्बाहुक्षदः शरवे पत्यमानान् ।

घृषुं वा ये निनिदुः सखायमध्यू न्वेषु पवयो ववृत्युः ॥ ६ ॥

दर्शन् । नु । अत्र । शृतऽपान् । अनिन्द्रान् । बाहुऽक्षदः । शरवे । पत्यमानान् ।

घृषुम् । वा । ये । निनिदुः । सखायम् । अधि । ऊँ इति । नु । एषु । पवयः । ववृत्युः ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभूर्वौक्षीर्व्यु१ आयुरानड्दर्षन्नु पूर्वो अपरो नु दर्षत्।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष॥ ७॥
अभूः। ऊँ इति। औक्षीः। वि। ऊँ इति। आयुः। आनट्। दर्षत्। नु। पूर्वः। अपरः। नु। दर्षत्।
द्वे इति। पवस्ते इति। परि। तम्। न। भूतः। यः। अस्य। पारे। रजसः। विवेष॥ ७॥

गावो यवं प्रयुता अर्यो अक्षन् ता अपश्यं सहगोपाश्चरन्तीः।
हवा इदर्यो अभितः समायन्कियदासु स्वपतिश्छन्दयाते॥ ८॥
गावः। यवम्। प्रऽयुताः। अर्यः। अक्षन्। ताः। अपश्यम्। सहऽगोपाः। चरन्तीः।
हवाः। इत्। अर्यः। अभितः। सम्। आयन्। कियत्। आसु। स्वऽपतिः। छन्दयाते॥ ८॥

सं यद्वयं यवसादो जनानामहं यवाद उर्वज्रे अन्तः।
अत्रा युक्तोऽवसातारमिच्छादथो अयुक्तं युनजद्ववन्वान्॥ ९॥
सम्। यत्। वयम्। यवसऽअदः। जनानाम्। अहम्। यवऽअदः। उरुऽअज्रे। अन्तरिति।
अत्र। युक्तः। अवऽसातारम्। इच्छात्। अथो इति। अयुक्तम्। युनजत्। ववन्वान्॥ ९॥

अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि।
स्त्रीभिर्यो अत्र वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः॥ १०॥ [१६]
अत्र। इत्। ऊँ इति। मे। मंससे। सत्यम्। उक्तम्। द्विऽपात्। च। यत्। चतुःऽपात्। सम्ऽसृजानि।
स्त्रीभिः। यः। अत्र। वृषणम्। पृतन्यात्। अयुद्धः। अस्य। वि। भजानि। वेदः॥ १०॥

यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अन्धाम्।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात्॥ ११॥
यस्य। अनक्षा। दुहिता। जातु। आस। कः। ताम्। विद्वान्। अभि। मन्याते। अन्धाम्।
कतरः। मेनिम्। प्रति। तम्। मुचाते। यः। ईम्। वहाते। यः। ईम्। वा। वरेऽयात्॥ ११॥

कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण।
भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित्॥ १२॥
कियती। योषा। मर्यतः। वधूऽयोः। परिऽप्रीता। पन्यसा। वार्येण।
भद्रा। वधूः। भवति। यत्। सुऽपेशाः। स्वयम्। सा। मित्रम्। वनुते। जने। चित्॥ १२॥

पत्तो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम्।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम्॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुत्तः। जगार। प्रत्यञ्चम्। अत्ति। शीर्ष्णा। शिरः। प्रति। दधौ। वरूथम्।
आसीनः। ऊर्ध्वाम्। उपसि। क्षिणाति। न्यङ्। उत्तानाम्। अनु। एति। भूमिम्॥ १३॥

बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः॥ १४॥

बृहन्। अच्छायः। अपलाशः। अर्वा। तस्थौ। माता। वि॰सितः। अत्ति। गर्भः।
अन्यस्याः। वत्सम्। रिहती। मिमाय। कया। भुवा। नि। दधे। धेनुः। ऊधः॥ १४॥

सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन् ते।
नव पश्चातात्स्थिविमन्त आयन् दश प्राक्सानु वि तिरन्त्यश्नः॥ १५॥ [१७]

सप्त। वीरासः। अधरात्। उत्। आयन्। अष्ट। उत्तरात्तात्। सम्। अजग्मिरन्। ते।
नव। पश्चातात्। स्थिवि॰मन्तः। आयन्। दश। प्राक्। सानु। वि। तिरन्ति। अश्नः॥ १५॥

दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय।
गर्भं माता सुधितं वक्षणास्ववेनन्तं तुषयन्ती बिभर्ति॥ १६॥

दशानाम्। एकम्। कपिलम्। समानम्। तम्। हिन्वन्ति। क्रतवे। पार्याय।
गर्भम्। माता। सु॰धितम्। वक्षणासु। अवेनन्तम्। तुषयन्ती। बिभर्ति॥ १६॥

पीवानं मेषमपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन्।
द्वा धनुं बृहतीमप्स्व१न्तः पवित्रवन्ता चरतः पुनन्ता॥ १७॥

पीवानम्। मेषम्। अपचन्त। वीराः। नि॰उप्ताः। अक्षाः। अनु। दीवे। आसन्।
द्वा। धनुम्। बृहतीम्। अप्॰सु। अन्तरिति। पवित्र॰वन्ता। चरतः। पुनन्ता॥ १७॥

वि क्रोशनासो विष्वञ्च आयन् पचाति नेमो नहि पक्षदर्धः।
अयं मे देवः सविता तदाह द्रवन्न इद्वनवत्सर्पिरन्नः॥ १८॥

वि। क्रोशनासः। विष्वञ्चः। आयन्। पचाति। नेमः। नहि। पक्षत्। अर्धः।
अयम्। मे। देवः। सविता। तत्। आह। द्रु॰अन्नः। इत्। वनवत्। सर्पिः॰अन्नः॥ १८॥

अपश्यं ग्रामं वहमानमारादचक्रया स्वधया वर्तमानम्।
सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान्॥ १९॥

अपश्यम्। ग्रामम्। वहमानम्। आरात्। अचक्रया। स्वधया। वर्तमानम्।
सिसक्ति। अर्यः। प्र। युगा। जनानाम्। सद्यः। शिश्ना। प्र॰मिनानः। नवीयान्॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममन्धि।
आपश्चिदस्य वि नशन्त्यर्थं सूरश्च मर्क उपरो बभूवान्॥ २०॥ [१८]
एतौ। मे। गावौ। प्रऽमरस्य। युक्तौ। मो इति। सु। प्र। सेधीः। मुहुः। इत्। ममन्धि।
आपः। चित्। अस्य। वि। नशन्ति। अर्थम्। सूरः। च। मर्कः। उपरः। बभूवान्॥ २०॥
अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात्।
श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति॥ २१॥
अयम्। यः। वज्रः। पुरुधा। विऽवृत्तः। अवः। सूर्यस्य। बृहतः। पुरीषात्।
श्रवः। इत्। एना। परः। अन्यत्। अस्ति। तत्। अव्यथी। जरिमाणः। तरन्ति॥ २१॥
वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः।
अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत्॥ २२॥
वृक्षेऽवृक्षे। निऽयता। मीमयत्। गौः। ततः। वयः। प्र। पतान्। पुरुषऽअदः।
अथ। इदम्। विश्वम्। भुवनम्। भयाते। इन्द्राय। सुन्वत्। ऋषये। च। शिक्षत्॥ २२॥
देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन्।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम्॥ २३॥
देवानाम्। माने। प्रथमाः। अतिष्ठन्। कृन्तत्रात्। एषाम्। उपराः। उत्। आयन्।
त्रयः। तपन्ति। पृथिवीम्। अनूपाः। द्वा। बृबूकम्। वहतः। पुरीषम्॥ २३॥
सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते॥ २४॥ [१९]
सा। ते। जीवातुः। उत। तस्य। विद्धि। मा। स्म। एतादृक्। अप। गूहः। सऽमर्ये।
आविः। स्वरिति स्वः। कृणुते। गूहते। बुसम्। सः। पादुः। अस्य। निःऽनिजः। न। मुच्यते॥ २४॥

[२८] [(१२) इन्द्रबसुक्रयोः संवादः, १ इन्द्रस्नुषा वसुक्रपत्नी ऋषिः; २, ६, ८, १०, १२ इन्द्र ऋषिः; ३, ४, ५, ७, ९, ११ ऐन्द्रो वसुक्र ऋषिः। २, ६, ८, १२ ऐन्द्रो वसुक्रो देवता; १, ३, ४, ५, ७, ९, ११, इन्द्रो देवता। त्रिष्टुप्]

विश्वो ह्यन्यो अरिराजगाम ममेदह श्वशुरो ना जगाम।
जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वः। हि। अन्यः। अरिः। आऽजगाम। मम। इत्। अह। श्वसुरः। न। आ। जगाम।

जक्षीयात्। धानाः। उत। सोमम्। पपीयात्। सुऽआशितः। पुनः। अस्तम्। जगायात्॥ १॥

स रोरुवद्वृषभस्तिग्मशृङ्गो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः।

विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति॥ २॥

सः। रोरुवत्। वृषभः। तिग्मऽशृङ्गः। वर्ष्मन्। तस्थौ। वरिमन्। आ। पृथिव्याः।

विश्वेषु। एनम्। वृजनेषु। पामि। यः। मे। कुक्षी इति। सुतऽसोमः। पृणाति॥ २॥

अद्रिणा ते मन्दिन इन्द्र तूयान्त्सुन्वन्ति सोमान्पिबसि त्वमेषाम्।

पचन्ति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन्हूयमानः॥ ३॥

अद्रिणा। ते। मन्दिनः। इन्द्र। तूयान्। सुन्वन्ति। सोमान्। पिबसि। त्वम्। एषाम्।

पचन्ति। ते। वृषभान्। अत्सि। तेषाम्। पृक्षेण। यत्। मघऽवन्। हूयमानः॥ ३॥

इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहन्ति।

लोपाशः सिंहं प्रत्यञ्चमत्साः क्रोष्टा वराहं निरतक्त कक्षात्॥ ४॥

इदम्। सु। मे। जरितः। आ। चिकिद्धि। प्रतिऽईपम्। शापम्। नद्यः। वहन्ति।

लोपाशः। सिंहम्। प्रत्यञ्चम्। अत्सारिति। क्रोष्टा। वराहम्। निः। अतक्त। कक्षात्॥ ४॥

कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषाम्।

त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन् क्षेम्या धूः॥ ५॥

कथा। ते। एतत्। अहम्। आ। चिकेतम्। गृत्सस्य। पाकः। तवसः। मनीषाम्।

त्वम्। नः। विद्वान्। ऋतुऽथा। वि। वोचः। यम्। अर्धम्। ते। मघऽवन्। क्षेम्या। धूः॥ ५॥

एवा हि मां तवसं वर्धयन्ति दिवश्चिन्मे बृहत उत्तरा धूः।

पुरू सहस्रा नि शिशामि साकमशत्रुं हि मा जनिता जजान॥ ६॥ [२०]

एव। हि। माम्। तवसम्। वर्धयन्ति। दिवः। चित्। मे। बृहतः। उत्ऽतरा। धूः।

पुरु। सहस्रा। नि। शिशामि। साकम्। अशत्रुम्। हि। मा। जनिता। जजान॥ ६॥

एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन्वृषणमिन्द्र देवाः।

वधीं वृत्रं वज्रेण मन्दसानोऽप व्रजं महिना दाशुषे वम्॥ ७॥

एव। हि। माम्। तवसम्। जज्ञुः। उग्रम्। कर्मन्ऽकर्मन्। वृषणम्। इन्द्र। देवाः।

वधीम्। वृत्रम्। वज्रेण। मन्दसानः। अप। व्रजम्। महिना। दाशुषे। वम्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवास आयन्परशूँरबिभ्रन् वना वृश्चन्तो अभि विड्भिरायन्।
नि सुद्र्वं१ दधतो वक्षणासु यत्रा कृपीटमनु तद्दहन्ति॥ ८॥
देवासः। आयन्। परशून्। अबिभ्रन्। वना। वृश्चन्तः। अभि। विट्ऽभिः। आयन्।
नि। सुऽद्र्वम्। दधतः। वक्षणासु। यत्र। कृपीटम्। अनु। तत्। दहन्ति॥ ८॥
शशः क्षुरं प्रत्यञ्चं जगारादिं लोगेन व्यभेदमारात्।
बृहन्तं चिदृहते रन्धयानि वयद्वत्सो वृषभं शूशुवानः॥ ९॥
शशः। क्षुरम्। प्रत्यञ्चम्। जगार। अद्रिम्। लोगेन। वि। अभेदम्। आरात्।
बृहन्तम्। चित्। ऋहते। रन्धयानि। वयत्। वत्सः। वृषभम्। शूशुवानः॥ ९॥
सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः।
निरुद्धश्चिन्महिषस्तर्ष्यावान् गोधा तस्मा अयथं कर्षदेतत्॥ १०॥
सुऽपर्णः। इत्था। नखम्। आ। सिसाय। अवऽरुद्धः। परिऽपदम्। न। सिंहः।
निऽरुद्धः। चित्। महिषः। तर्ष्याऽवान्। गोधा। तस्मै। अयथम्। कर्षत्। एतत्॥ १०॥
तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रतिपीयन्त्यन्नैः।
सिम उक्ष्णोऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः शृणानाः॥ ११॥
तेभ्यः। गोधाः। अयथम्। कर्षत्। एतत्। ये। ब्रह्मणः। प्रतिऽपीयन्ति। अन्नैः।
सिमः। उक्ष्णः। अवऽसृष्टान्। अदन्ति। स्वयम्। बलानि। तन्वः। शृणानाः॥ ११॥
एते शमीभिः सुशमी अभूवन् ये हिन्विरे तन्व१ः सोम उक्थैः।
नृवद्वदन्नुप नो माहि वाजान् दिवि श्रवो दधिषे नाम वीरः॥ १२॥ [२१]
एते। शमीभिः। सुऽशमी। अभूवन्। ये। हिन्विरे। तन्वः। सोमे। उक्थैः।
नृऽवत्। वदन्। उप। नः। माहि। वाजान्। दिवि। श्रवः। दधिषे। नाम। वीरः॥ १२॥

[२९] [८ वसुक्र ऐन्द्रः। इन्द्रः। त्रिष्टुप्।]

वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान्॥ १॥
वने। न। वायः। नि। अधायि। चाकन्। शुचिः। वाम्। स्तोमः। भुरणौ। अजीगरिति।
यस्य। इत्। इन्द्रः। पुरुऽदिनेषु। होता। नृणाम्। नर्यः। नृऽतमः। क्षपाऽवान्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र ते॑ अ॒स्या उ॒षसः॒ प्राप॑रस्या नृ॒तौ स्या॑म॒ नृत॑मस्य नृ॒णाम्।
अनु॑ त्रि॒शोकः॑ श॒तमाव॑ह॒न्नॄन्कुत्से॑न॒ रथो॒ यो अस॑त्सस॒वान्॥ २॥
प्र। ते॒। अ॒स्याः। उ॒षसः॑। प्र। अप॑रस्याः। नृ॒तौ। स्या॒म॒। नृऽत॑मस्य। नृ॒णाम्।
अनु॑। त्रि॒ऽशोकः॑। श॒तम्। आ। अ॒व॒ह॒त्। नॄन्। कुत्से॑न। रथः॑। यः। अस॑त्। स॒स॒ऽवान्॥ २॥
कस्ते॒ मद॑ इन्द्र॒ रन्त्यो॑ भूद्दुरो॒ गिरो॑ अ॒भ्यु१ग्रो वि धा॑व।
कद्वाहो॑ अ॒र्वागुप॑ मा मनी॒षा आ त्वा॑ शक्यामुप॒मं राधो॒ अन्नैः॑॥ ३॥
कः। ते॒। मदः॑। इ॒न्द्र॒। रन्त्यः॑। भूत्। दुरः॑। गिरः॑। अ॒भि। उ॒ग्रः। वि। धा॒व॒।
कत्। वाहः॑। अ॒र्वाक्। उप॑। मा॒। म॒नी॒षा। आ। त्वा॒। श॒क्या॒म्। उ॒प॒ऽमम्। राधः॑। अन्नैः॑॥ ३॥
कदु॑ द्यु॒म्नमि॑न्द्र॒ त्वाव॑तो॒ नॄन्कया॑ धि॒या क॑रसे॒ कन्न॒ आग॑न्।
मि॒त्रो न स॒त्य उ॑रुगाय भृ॒त्या अन्ने॑ समस्य॒ यदस॑न्मनी॒षाः॥ ४॥
कत्। ऊँ इति॑। द्यु॒म्नम्। इ॒न्द्र॒। त्वाऽव॑तः। नॄन्। कया॑। धि॒या। क॒र॒से॒। कत्। न॒ः। आ। अ॒ग॒न्।
मि॒त्रः। न। स॒त्यः। उ॒रु॒ऽगा॒य॒। भृ॒त्यै। अन्ने॑। स॒म॒स्य॒। यत्। अस॑न्। म॒नी॒षाः॥ ४॥
प्रेर॑य॒ सूरो॒ अर्थं॒ न पा॒रं ये अ॑स्य॒ काम॑ं जनि॒धाइ॑व॒ ग्मन्।
गिर॑श्च॒ ये ते॑ तुविजात पू॒र्वीर्नर॑ इन्द्र प्रति॒शिक्ष॒न्त्यन्नैः॑॥ ५॥ [२२]
प्र। ई॒र॒य॒। सूरः॑। अर्थ॑म्। न। पा॒रम्। ये। अ॒स्य॒। काम॑म्। ज॒नि॒धाःऽइ॑व। ग्मन्।
गिरः॑। च॒। ये। ते॒। तु॒वि॒ऽजा॒त॒। पू॒र्वीः। नरः॑। इ॒न्द्र॒। प्र॒ति॒ऽशिक्ष॑न्ति। अन्नैः॑॥ ५॥
मात्रे॒ नु ते॒ सुमि॑ते इन्द्र॒ पूर्वी द्यौर्म॒ज्मना॑ पृथि॒वी काव्ये॑न।
वरा॑य ते घृ॒तव॑न्तः सु॒तास॒ः स्वाद्म॑न्भवन्तु पी॒तये॒ मधू॑नि॥ ६॥
मात्रे॒ इति॑। नु। ते॒। सुमि॑ते॒ इति॑ सुऽमि॑ते। इ॒न्द्र॒। पूर्वी इति॑। द्यौः। म॒ज्मना॑। पृ॒थि॒वी। काव्ये॑न।
वरा॑य। ते॒। घृ॒तऽव॑न्तः। सु॒तासः॑। स्वाद्म॑न्। भ॒व॒न्तु॒। पी॒तये॑। मधू॑नि॥ ६॥
आ मध्वो॑ अस्मा असिच॒न्नम॑त्र॒मिन्द्रा॑य पू॒र्णं स हि स॒त्यरा॑धाः।
स वा॑वृधे॒ वरि॑म॒न्ना पृ॑थि॒व्या अ॒भि क्रत्वा॒ नर्यः॒ पौंस्यै॑श्च॥ ७॥
आ। मध्वः॑। अ॒स्मै॒। अ॒सि॒च॒न्। अम॑त्रन्। इन्द्रा॑य। पू॒र्णम्। सः। हि। स॒त्यऽरा॑धाः।
सः। व॒वृ॒धे॒। वरि॑मन्। आ। पृ॒थि॒व्याः। अ॒भि। क्रत्वा॑। नर्यः॑। पौंस्यैः॑। च॒॥ ७॥
व्या॑न॒ळिन्द्रः॒ पृत॑नाः॒ स्वोजा॒ आस्मै॑ यतन्ते स॒ख्याय॒ पू॒र्वीः।
आ स्मा॒ रथं॒ न पृत॑नासु तिष्ठ॒ यं भ॒द्रया॑ सुम॒त्या चो॒दया॑से॥ ८॥ [२३] {२}

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि । आनट् । इन्द्रः । पृतनाः । सुऽओजाः । आ । अस्मै । यतन्ते । सख्याय । पूर्वीः ।
आ । स्म । रथम् । न । पृतनासु । तिष्ठ । यम् । भद्रया । सुऽमत्या । चोदयासे ॥ ८ ॥

[३०] [१५ कवष ऐलूषः । आपः, अपां नपात् वा । त्रिष्टुप् ।]

प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति ।
महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिम् ॥ १ ॥
प्र । देवऽत्रा । ब्रह्मणे । गातुः । एतु । अपः । अच्छ । मनसः । न । प्रऽयुक्ति ।
महीम् । मित्रस्य । वरुणस्य । धासिम् । पृथुऽज्रयसे । रीरध । सुऽवृक्तिम् ॥ १ ॥
अध्वर्यवो हविष्मन्तो हि भूताच्छाप इतोशतीरुशन्तः ।
अव याश्चष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः ॥ २ ॥
अध्वर्यवः । हविष्मन्तः । हि । भूत । अच्छ । अपः । इत । उशतीः । उशन्तः ।
अव । याः । चष्टे । अरुणः । सुऽपर्णः । तम् । आ । अस्यध्वम् । ऊर्मिम् । अद्य । सुऽहस्ताः ॥ २ ॥
अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वम् ।
स वो ददद्दूर्मिमद्या सुपूतं तस्मै सोमं मधुमन्तं सुनोत ॥ ३ ॥
अध्वर्यवः । अपः । इत । समुद्रम् । अपाम् । नपातम् । हविषा । यजध्वम् ।
सः । वः । ददत् । ऊर्मिम् । अद्य । सुऽपूतम् । तस्मै । सोमम् । मधुऽमन्तम् । सुनोत ॥ ३ ॥
यो अनिध्मो दीदयदप्स्व१न्तर्यं विप्रास ईळते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय ॥ ४ ॥
यः । अनिध्मः । दीदयत् । अप्ऽसु । अन्तः । यम् । विप्रासः । ईळते । अध्वरेषु ।
अपाम् । नपात् । मधुऽमतीः । अपः । दाः । याभिः । इन्द्रः । ववृधे । वीर्याय ॥ ४ ॥
याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः ।
ता अध्वर्यो अपो अच्छा परेहि यदासिञ्चा ओषधीभिः पुनीतात् ॥ ५ ॥ [२४]
याभिः । सोमः । मोदते । हर्षते । च । कल्याणीभिः । युवतिऽभिः । न । मर्यः ॥ ताः । अध्वर्यो इति ।
अपः । अच्छ । परा । इहि । यत् । आऽसिञ्चाः । ओषधीभिः । पुनीतात् ॥ ५ ॥
एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एव । इत् । यूने । युवतयः । नमन्त । यत् । ईम् । उशन् । उशतीः । एति । अच्छ ।

सम् । जानते । मनसा । सम् । चिकित्रे । अध्वर्यवः । धिषणा । आपः । च । देवीः ॥ ६ ॥

यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुञ्चत् ।

तस्मा इन्द्राय मधुमन्तमूर्मिं देवमादनं प्र हिणोतनापः ॥ ७ ॥

यः । वः । वृताभ्यः । अकृणोत् । ऊँ इति । लोकम् । यः । वः । मह्याः । अभिऽशस्ते । अमुञ्चत् ।

तस्मै । इन्द्राय । मधुऽमन्तम् । ऊर्मिम् । देवऽमादयन् । प्र । हिणोतन । आपः ॥ ७ ॥

प्रास्मै हिनोत मधुमन्तमूर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः ।

घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥ ८ ॥

प्र । अस्मै । हिनोत । मधुऽमन्तम् । ऊर्मिम् । गर्भः । यः । वः । सिन्धवः । मध्वः । उत्सः ।

घृतऽपृष्ठम् । ईड्यम् । अध्वरेषु । आपः । रेवतीः । शृणुत । हवम् । मे ॥ ८ ॥

तं सिन्धवो मत्सरमिन्द्रपानमूर्मिं प्र हेत उभे इयर्ति ।

मदच्युतमौशानं नभोजां परि त्रितन्तुं विचरन्तमुत्सम् ॥ ९ ॥

तम् । सिन्धवः । मत्सरम् । इन्द्रऽपानम् । ऊर्मिम् । प्र । हेत । यः । उभे इति । इयर्ति ।

मदऽच्युतम् । औशानम् । नभः२जाम् । परि । त्रिऽतन्तुम् । विऽचरन्तम् । उत्सम् ॥ ९ ॥

आवर्वृततीरध नु द्विधारा गोषुयुधो न नियवं चरन्तीः ।

ऋषे जनित्रीर्भुवनस्य पत्नीरपो वन्दस्व सवृधः सयोनीः ॥ १० ॥ [२५]

आऽवर्वृततीः । अध । नु । द्विऽधाराः । गोषुऽयुधः । न । निऽयवम् । चरन्तीः ।

ऋषे । जनित्रीः । भुवनस्य । पत्नीः । अपः । वन्दस्व । सऽवृधः । सऽयोनीः ॥ १० ॥

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम् ।

ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥ ११ ॥

हिनोत । नः । अध्वरम् । देवऽयज्या । हिनोत । ब्रह्म । सनये । धनानाम् ।

ऋतस्य । योगे । वि । स्यध्वम् । ऊधः । श्रुष्टीऽवरीः । भूतन । अस्मभ्यम् । आपः ॥ ११ ॥

आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ।

रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥ १२ ॥

आपः । रेवतीः । क्षयथ । हि । वस्वः । क्रतुम् । च । भद्रम् । बिभृथ । अमृतम् । च ।

रायः । च । स्थ । सुऽअपत्यस्य । पत्नीः । सरस्वती । तत् । गृणते । वयः । धात् ॥ १२ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि।
अध्वर्युभिर्मनसा संविदाना इन्द्राय सोमं सुषुतं भरन्तीः॥ १३॥
प्रति। यत्। आपः। अदृश्रम्। आऽयतीः। घृतम्। पयांसि। बिभ्रतीः। मधूनि।
अध्वर्युऽभिः। मनसा। सम्ऽविदानाः। इन्द्राय। सोमम्। सुऽसुतम्। भरन्तीः॥ १३॥
एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः।
नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानास एनाः॥ १४॥
आ। इमाः। अग्मन्। रेवतीः। जीवऽधन्याः। अध्वर्यवः। सादयत। सखायः।
नि। बर्हिषि। धत्तन। सोम्यासः। अपाम्। नप्त्रा। सम्ऽविदानासः। एनाः॥ १४॥
आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयन्तीः।
अध्वर्यवः सुनुतेन्द्राय सोममभूदु वः सुशका देवयज्या॥ १५॥ [२६]
आ। अग्मन्। आपः। उशतीः। बर्हिः। आ। इदम्। नि। अध्वरे। असदन्। देवऽयन्तीः।
अध्वर्यवः। सुनुत। इन्द्राय। सोमम्। अभूत्। ऊँ इति। वः। सुऽशका। देवऽयज्या॥ १५॥

[३१] [११ कवष ऐलूषः। विश्वेदेवाः त्रिष्टुप्।]

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः।
तेभिर्वयं सुषखायो भवेम तरन्तो विश्वा दुरिता स्याम॥ १॥
आ। नः। देवानाम्। उप। वेतु। शंसः। विश्वेभिः। तुरैः। अवसे। यजत्रः।
तेभिः। वयम्। सुऽसखायः। भवेम। तरन्तः। विश्वा। दुःऽइता। स्याम॥ १॥
परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत्।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात्॥ २॥
परि। चित्। मर्तः। द्रविणम्। ममन्यात्। ऋतस्य। पथा। नमसा। आ। विवासेत्।
उत। स्वेन। क्रतुना। सम्। वदेत। श्रेयांसम्। दक्षम्। मनसा। जगृभ्यात्॥ २॥
अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यन्त्यूमाः।
अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम॥ ३॥
अधायि। धीतिः। असंसृग्रम्। अंशाः। तीर्थे। न। दस्मम्। उप। यन्ति। ऊमाः।
अभि। आनश्म। सुवितस्य। शूषम्। नवेदसः। अमृतानाम्। अभूम॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजान।

भर्गो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात्॥ ४॥

नित्यः। चाकन्यात्। स्वऽपतिः। दमूनाः। यस्मै। ॐ इति। देवः। सविता। जजान।

भर्गः। वा। गोभिः। अर्यमा। ईम्। अनज्यात्। सः। अस्मै। चारुः। छदयत्। उत। स्यात्॥ ४॥

इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन्।

अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः॥ ५॥ [२७]

इयम्। सा। भूयाः। उषसाम्ऽइव। क्षाः। यत्। ह। क्षुऽमन्तः। शवसा। सम्ऽआयन्।

अस्य। स्तुतिम्। जरितुः। भिक्षमाणाः। आ। नः। शग्मासः। उप। यन्तु। वाजाः॥ ५॥

अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः।

अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः॥ ६॥

अस्य। इत्। एषा। सुऽमतिः। पप्रथाना। अभवत्। पूर्व्या। भूमना। गौः।

अस्य। सऽनीळाः। असुरस्य। योनौ। समाने। आ। भरणे। बिभ्रमाणाः॥ ६॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।

संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त॥ ७॥

किम्। स्वित्। वनम्। कः। ॐ इति। सः। वृक्षः। आस। यतः। द्यावापृथिवी इति। निःऽततक्षुः।

संतस्थाने इति सम्ऽतस्थाने। अजरे इति। इतऊती इतीतःऽऊती। अहानि। पूर्वीः। उषसः। जरन्त॥ ७॥

नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति।

त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहन्ति॥ ८॥

न। एतावत्। एना। परः। अन्यत्। अस्ति। उक्षा। सः। द्यावापृथिवी इति। बिभर्ति।

त्वचम्। पवित्रम्। कृणुत। स्वधाऽवान्। यत्। ईम्। सूर्यम्। न। हरितः। वहन्ति॥ ८॥

स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम।

मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकम्॥ ९॥

स्तेगः। न। क्षाम्। अति। एति। पृथ्वीम्। मिहम्। न। वातः। वि। ह। वाति। भूम।

मित्रः। यत्र। वरुणः। अज्यमानः। अग्निः। वने। न। वि। असृष्ट। शोकम्॥ ९॥

स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा।

पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छान्॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्त॒रीः । यत् । सूत॑ । स॒द्यः । अ॒ज्यमा॑ना । व्यथि॑ः । अ॒व्य॒थीः । कृ॒णु॒त॒ । स्व॑ऽगो॑पा ।
पु॒त्रः । यत् । पूर्व॑ः । पि॒त्रोः । जनि॑ष्ट । श॒म्याम् । गौः । ज॒गा॒र॒ । यत् । ह॒ । पृ॒च्छान् ॥ १० ॥

उ॒त कण्वं॑ नृ॒षद॑ः पु॒त्रमा॑हुरु॒त श्या॒वो धन॒माद॑त्त वा॒जी ।
प्र कृ॒ष्णाय॒ रुश॒दपि॑न्व॒तोध॑र्ऋ॒तमत्र॒ नकि॑रस्मा अपीपेत् ॥ ११ ॥ [२८]
उ॒त । कण्व॑म् । नृ॒ऽसद॑ः । पु॒त्रम् । आ॒हु॒ः । उ॒त । श्या॒वः । धन॑म् । आ । अ॒द॒त्त॒ । वा॒जी ।
प्र । कृ॒ष्णाय॑ । रुश॑त् । अ॒पि॒न्व॒त॒ । ऊध॑ः । ऋ॒तम् । अत्र॑ । नकि॑ः । अ॒स्मै॒ । अ॒पी॒पे॒त् ॥ ११ ॥

[३२] [९ कवष ऐलूषः । इन्द्रः । १-५ जगत्यः, ६-९ त्रिष्टुभः ।]

प्र सु ग्मन्ता॑ धियसा॒नस्य॑ स॒क्षणि॑ व॒रेभि॑र्व॒राँ अ॒भि षु प्र॒सीद॑तः ।
अ॒स्माक॒मिन्द्र॑ उ॒भयं॑ जुजोषति॒ यत्सो॒म्यस्यान्ध॑सो॒ बुबो॑धति ॥ १ ॥
प्र । सु । ग्मन्ता॑ । धि॒य॒सा॒नस्य॑ । स॒क्षणि॑ । व॒रेभि॑ः । व॒रान् । अ॒भि । सु । प्र॒ऽसीद॑तः ।
अ॒स्माक॑म् । इन्द्र॑ः । उ॒भय॑म् । जु॒जो॒ष॒ति॒ । यत् । सो॒म्यस्य॑ । अन्ध॑सः । बुबो॑धति ॥ १ ॥

वीन्द्र यासि दि॒व्यानि॑ रोच॒ना वि पार्थि॑वानि॒ रज॑सा पुरुष्टुत ।
ये त्वा॒ वह॑न्ति॒ मुहु॑रध्व॒राँ उप॒ ते सु व॑न्वन्तु वग्व॒नाँ अ॑रा॒धस॑ः ॥ २ ॥
वि । इ॒न्द्र॒ । या॒सि॒ । दि॒व्यानि॑ । रो॒च॒ना । वि । पार्थि॑वानि । रज॑सा । पु॒रु॒ऽस्तु॒त॒ ।
ये । त्वा॒ । वह॑न्ति । मुहु॑ः । अ॒ध्व॒रान् । उप॑ । ते । सु । व॒न्व॒न्तु॒ । व॒ग्व॒नान् । अ॒रा॒धस॑ः ॥ २ ॥

तदिन्मे॑ छन्त्स॒द्वपु॑षो॒ वपु॑ष्टरं पु॒त्रो यज्जानं॑ पि॒त्रोर॒धीय॑ति ।
जा॒या पतिं॑ वहति व॒ग्नुना॑ सु॒मत्पुंस इद्भ॒द्रो व॑ह॒तुः परि॑ष्कृतः ॥ ३ ॥
तत् । इत् । मे॒ । छ॒न्त्स॒त् । वपु॑षः । वपु॑ःऽतरम् । पु॒त्रः । यत् । जान॑म् । पि॒त्रोः । अ॒धि॒ऽइय॑ति ।
जा॒या । पति॑म् । व॒ह॒ति॒ । व॒ग्नुना॑ । सु॒ऽमत् । पुंस॑ः । इत् । भ॒द्रः । व॒ह॒तुः । परि॑ऽकृतः ॥ ३ ॥

तदित्स॒धस्थ॑म॒भि चारु॑ दीधय॒ गावो॒ यच्छास॑न्वह॒तुं न धे॒नव॑ः ।
माता यन्मन्तु॑र्यू॒थस्य॑ पू॒र्व्याभि वा॒णस्य॑ स॒प्तधा॑तु॒रिज्जन॑ः ॥ ४ ॥
तत् । इत् । स॒धऽस्थ॑म् । अ॒भि । चारु॑ । दी॒ध॒य॒ । गाव॑ः । यत् । शास॑न् । व॒ह॒तुम् । न । धे॒नव॑ः ।
मा॒ता । यत् । मन्तु॑ः । यू॒थस्य॑ । पू॒र्व्या । अ॒भि । वा॒णस्य॑ । स॒प्तऽधा॑तुः । इत् । जन॑ः ॥ ४ ॥

प्र वोऽच्छा॑ रिरिचे देव॒युष्प॒दमेको॑ रु॒द्रेभि॑र्याति तु॒र्वणि॑ः ।
ज॒रा वा॒ येष्व॒मृते॑षु दा॒वने॒ परि॑ व॒ ऊमे॑भ्यः सिञ्चता॒ मधु॑ ॥ ५ ॥ [२९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । वः । अच्छ॑ । रिरिचे । देव॒ऽयुः । प॒दम् । एक॑ः । रु॒द्रेभि॑ः । या॒ति । तु॒र्वणि॑ः ।

ज॒रा । वा॒ । येषु॑ । अ॒मृते॑षु । दा॒वने॑ । परि॑ । वः॒ । ऊमे॑भ्यः । सि॒ञ्च॒त॒ । मधु॑ ॥ ५ ॥

नि॒धी॒यमा॑न॒मप॑गूळ्हम॒प्सु प्र मे॑ दे॒वानां॑ व्रत॒पा उ॑वाच ।

इन्द्रो॑ वि॒द्वाँ अनु॑ हि त्वा॑ च॒चक्ष॒ तेना॒हम॑ग्ने॒ अनु॑शिष्ट आगा॑म् ॥ ६ ॥

नि॒ऽधी॒यमा॑नम् । अप॑ऽगूळ्हम् । अ॒प्ऽसु । प्र । मे॒ । दे॒वाना॑म् । व्र॒त॒ऽपाः । उ॒वा॒च॒ ।

इन्द्र॑ः । वि॒द्वान् । अनु॑ । हि । त्वा॒ । च॒चक्ष॑ । तेन॑ । अ॒हम् । अ॒ग्ने॒ । अनु॑ऽशिष्टः । आ । अ॒गा॒म् ॥ ६ ॥

अक्षे॑त्रवित्क्षेत्र॒विदं॒ ह्यप्रा॑ट् स प्रैति॑ क्षेत्र॒विदानु॑शिष्टः ।

ए॒तद्वै भ॒द्रम॑नु॒शास॑नस्यो॒त स्रु॒तिं वि॑न्दत्य॒ञ्ज॒सीना॑म् ॥ ७ ॥

अक्षे॑त्रऽवित् । क्षे॒त्र॒ऽविद॑म् । हि । अप्रा॑ट् । सः । प्र । ए॒ति॒ । क्षे॒त्र॒ऽविदा॑ । अनु॒ऽशिष्टः ।

ए॒तत् । वै । भ॒द्रम् । अ॒नु॒ऽशास॑नस्य । उ॒त । स्रु॒तिम् । वि॒न्द॒ति॒ । अ॒ञ्ज॒सीना॑म् ॥ ७ ॥

अ॒द्येदु॒ प्राणी॒दम॑मन्नि॒माहापी॑वृतो अधयन्मा॒तुरूध॑ः ।

एमे॑नमाप जरि॒मा युवा॑न॒महे॑ळ॒न्वसु॑ः सु॒मना॑ बभूव ॥ ८ ॥

अ॒द्य । इत् । ऊँ इति॑ । प्र । आ॒नी॒त् । अम॑मन् । इ॒मा । अहा॑ । अपि॑ऽवृतः । अ॒ध॒य॒त् । मा॒तुः । ऊध॑ः ।

आ । ई॒म् । ए॒न॒म् । आ॒प॒ । ज॒रि॒मा । युवा॑नम् । अहे॑ळन् । वसु॑ः । सु॒ऽमना॑ः । ब॒भू॒व॒ः ॥ ८ ॥

ए॒तानि॑ भ॒द्रा क॑लश क्रियाम॒ कुरु॑श्रवण॒ दद॑तो म॒घानि॑ ।

दा॒न इद्वो॑ मघवा॒नः सो अ॑स्त्व॒यं च॒ सोमो॑ हृ॒दि यं बिभ॑र्मि ॥ ९ ॥ [३०]

ए॒तानि॑ । भ॒द्रा । क॒ल॒श॒ । क्रि॒या॒म॒ । कुरु॑ऽश्रवण । दद॑तः । म॒घानि॑ ।

दा॒नः । इत् । वः॒ । म॒घ॒ऽवा॒नः॒ । सः । अ॒स्तु॒ । अ॒यम् । च॒ । सोम॑ः । हृ॒दि । यम् । बिभ॑र्मि ॥ ९ ॥

इत्याश्वलायन-संहितायां

सप्तमाष्टके

सप्तमोऽध्यायः

समाप्तः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ सप्तमाष्टके अष्टमोऽध्यायः ॥

[३३] [९ कवष ऐलूषः। १ विश्वे देवाः, २-३ इन्द्र, ४-५ कुरुश्रवणस्त्रासदस्यवः, ६-९ उपश्रवा मैत्रातिथिः। १ त्रिष्टुप्; २-३ प्रगाथः = (२ बृहती, ३ सतोबृहती), ४-९ गायत्री।]

प्र मां युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण।

विश्वे देवासो अध मामरक्षन् दुःशासुरागादिति घोष आसीत्॥ १॥

प्र। मा। युयुज्रे। प्रऽयुजः। जनानाम्। वहामि। स्म। पूषणम्। अन्तरेण।

विश्वे। देवासः। अध। माम्। अरक्षन्। दुःऽशासुः। आ। अगात्। इति। घोषः। आसीत्॥ १॥

सं मां तपन्त्यभितः सपत्नीरिव पर्शवः। नि बाधते अमतिर्नग्नता जसुर्वेर्न वेवीयते मतिः॥ २॥

सम्। मा। तपन्ति। अभितः। सपत्नीःऽइव। पर्शवः।

नि। बाधते। अमतिः। नग्नता। जसुः। वेः। न। वेवीयते। मतिः॥ २॥

मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो।

सकृत्सु नो मघवन्निन्द्र मृळयाधा पितेव नो भव॥ ३॥

मूषः। न। शिश्ना। वि। अदन्ति। मा। आऽध्यः। स्तोतारम्। ते। शतक्रतो इति शतऽक्रतो।

सकृत्। सु। नः। मघऽवन्। इन्द्र। मृळय। अध। पिताऽइव। नः। भव॥ ३॥

कुरुश्रवणमावृणि राजानं त्रासदस्यवम्। मंहिष्टं वाघतामृषिः॥ ४॥

कुरुऽश्रवणम्। अवृणि। राजानम्। त्रासदस्यवम्। मंहिष्ठम्। वाघताम्। ऋषिः॥ ४॥

यस्य मा हरितो रथे तिस्रो वहन्ति साधुया। स्तवै सहस्रदक्षिणे॥ ५॥ [१]

यस्य। मा। हरितः। रथे। तिस्रः। वहन्ति। साधुऽया। स्तवै। सहस्रऽदक्षिणे॥ ५॥

यस्य प्रस्वादसो गिर उपमश्रवसः पितुः। क्षेत्रं न रण्वमूचुषे॥ ६॥

यस्य। प्रऽस्वादसः। गिरः। उपमऽश्रवसः। पितुः। क्षेत्रम्। न। रण्वम्। ऊचुषे॥ ६॥

अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि। पितुष्टे अस्मि वन्दिता॥ ७॥

अधि। पुत्र। उपमऽश्रवः। नपात्। मित्रऽअतिथेः। इहि। पितुः। ते। अस्मि। वन्दिता॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदीशीयामृतानामुत वा मर्त्यानाम्। जीवेदिन्मघवा मम॥ ८॥

यत्। ईशीय। अमृतानाम्। उत। वा। मर्त्यानाम्। जीवेत्। इत्। मघऽवा। मम॥ ८॥

न देवानामति व्रतं शतात्मा चन जीवति। तथा युजा वि वावृते॥ ९॥ [२]

न। देवानाम्। अति। व्रतम्। शतऽआत्मा। चन। जीवति। तथा। युजा। वि। ववृते॥ ९॥

[३४] [१४ कवष ऐलूषः। अक्षो मौजवान् वा। १, ७, ९, १२ अक्षाः, १३ कृषिः, २-६, ८, १०, ११, १४ अक्ष-कितव-निन्दा। त्रिष्टुप्, ७ जगती।]

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान्॥ १॥

प्रावेपाः। मा। बृहतः। मादयन्ति। प्रवातेऽजाः। इरिणे। वर्वृतानाः।
सोमस्यऽइव। मौजऽवतस्य। भक्षः। विऽभीदकः। जागृविः। मह्यम्। अच्छान्॥ १॥

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम्॥ २॥

न। मा। मिमेथ। न। जिहीळे। एषा। शिवा। सखिऽभ्यः। उत। मह्यम्। आसीत्।
अक्षस्य। अहम्। एकऽपरस्य। हेतोः। अनुऽव्रताम्। अप। जायाम्। अरोधम्॥ २॥

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम्॥ ३॥

द्वेष्टि। श्वश्रूः। अप। जाया। रुणद्धि। न। नाथितः। विन्दते। मर्डितारम्।
अश्वस्यऽइव। जरतः। वस्न्यस्य। न। अहम्। विन्दामि। कितवस्य। भोगम्॥ ३॥

अन्ये जायां परि मृशन्त्यस्य यस्यागृधद्वेदने वाज्य१क्षः।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम्॥ ४॥

अन्ये। जायाम्। परि। मृशन्ति। अस्य। यस्य। अगृधत्। वेदने। वाजी। अक्षः।
पिता। माता। भ्रातरः। एनम्। आहुः। न। जानीमः। नयत। बद्धम्। एतम्॥ ४॥

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव॥ ५॥ [३]

यत्। आऽदीध्ये। न। दविषाणि। एभिः। परायत्ऽभ्यः। अव। हीये। सखिऽभ्यः।
निऽउप्ताः। च। बभ्रवः। वाचम्। अक्रत। एमि। इत्। एषाम्। निःऽकृतम्। जारिणीऽइव॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा३ शूशुजानः।
अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि॥ ६॥
सभाम्। एति। कितवः। पृच्छमानः। जेष्यामि। इति। तन्वा। शूशुजानः।
अक्षासः। अस्य। वि। तिरन्ति। कामम्। प्रतिऽदीव्ने। दधतः। आ। कृतानि॥ ६॥
अक्षास इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः।
कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा॥ ७॥
अक्षासः। इत्। अङ्कुशिनः। निऽतोदिनः। निऽकृत्वानः। तपनाः। तापयिष्णवः।
कुमारऽदेष्णाः। जयतः। पुनःऽहनः। मध्वा। सम्ऽपृक्ताः। कितवस्य। बर्हणा॥ ७॥
त्रिपञ्चाशः क्रीळति व्रात एषां देवइव सविता सत्यधर्मा।
उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत्कृणोति॥ ८॥
त्रिऽपञ्चाशः। क्रीळति। व्रातः। एषाम्। देवःऽइव। सविता। सत्यऽधर्मा।
उग्रस्य। चित्। मन्यवे। न। नमन्ते। राजा। चित्। एभ्यः। नमः। इत्। कृणोति॥ ८॥
नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते।
दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति॥ ९॥
नीचा। वर्तन्ते। उपरि। स्फुरन्ति। अहस्तासः। हस्तऽवन्तम्। सहन्ते।
दिव्याः। अङ्गाराः। इरिणे। निऽउप्ताः। शीताः। सन्तः। हृदयम्। निः। दहन्ति॥ ९॥
जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति॥ १०॥ [४]
जाया। तप्यते। कितवस्य। हीना। माता। पुत्रस्य। चरतः। क्व। स्वित्।
ऋणऽवा। बिभ्यत्। धनम्। इच्छमानः। अन्येषाम्। अस्तम्। उप। नक्तम्। एति॥ १०॥
स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम्।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरन्ते वृषलः पपाद॥ ११॥
स्त्रियम्। दृष्ट्वाय। कितवम्। ततापा। अन्येषाम्। जायाम्। सुऽकृतम्। च। योनिम्।
पूर्वाह्णे। अश्वान्। युयुजे। हि। बभ्रून्। सः। अग्नेः। अन्ते। वृषलः। पपाद॥ ११॥
यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव।
तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। वः। सेनाऽनीः। महतः। गणस्य। राजा। व्रातस्य। प्रथमः। बभूव।

तस्मै। कृणोमि। न। धना। रुणध्मि। दश। अहम्। प्राचीः। तत्। ऋतम्। वदामि॥ १२॥

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः।

तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः॥ १३॥

अक्षैः। मा। दीव्यः। कृषिम्। इत्। कृषस्व। वित्ते। रमस्व। बहु। मन्यमानः।

तत्र। गावः। कितव। तत्र। जाया। तत्। मे। वि। चष्टे। सविता। अयम्। अर्यः॥ १३॥

मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु।

नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु॥ १४॥ [५]

मित्रम्। कृणुध्वम्। खलु। मृळत। नः। मा। नः। घोरेण। चरत। अभि। धृष्णु।

नि। वः। नु। मन्युः। विशताम्। अरातिः। अन्यः। बभ्रूणाम्। प्रऽसितौ। नु। अस्तु॥ १४॥

[३५] [१४ लुशो धानाकः। विश्वे देवाः। जगती, १३-१४ त्रिष्टुभौ।]

अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु।

मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे॥ १॥

अबुध्रम्। ऊँ इति। त्ये। इन्द्रऽवन्तः। अग्नयः। ज्योतिः। भरन्तः। उषसः। विऽउष्टिषु।

मही इति। द्यावापृथिवी इति। चेतताम्। अपः। अद्य। देवानाम्। अवः। आ। वृणीमहे॥ १॥

दिवस्पृथिव्योरव आ वृणीमहे मातॄन्त्सिन्धून्पर्वताञ्छर्यणावतः।

अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः॥ २॥

दिवःपृथिव्योः। अवः। आ। वृणीमहे। मातॄन्। सिन्धून्। पर्वतान्। शर्यणाऽवतः।

अनागाःऽत्वम्। सूर्यम्। उषसम्। ईमहे। भद्रम्। सोमः। सुवानः। अद्य। कृणोतु। नः॥ २॥

द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा।

उषा उच्छन्त्यप बाधतामघं स्वस्त्य१ग्निं समिधानमीमहे॥ ३॥

द्यावा। नः। अद्य। पृथिवी इति। अनागसः। मही इति। त्रायेताम्। सुविताय। मातरा।

उषाः। उच्छन्ती। अप। बाधताम्। अघम्। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे॥ ३॥

इयं न उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु।

आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्य१ग्निं समिधानमीमहे॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इयम्। नः। उस्रा। प्रथमा। सुऽदेव्यम्। रेवत्। सनिऽभ्यः। रेवती। वि। उच्छतु।
आरे। मन्युम्। दुःऽविदत्रस्य। धीमहि। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ४॥

प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्य१ग्निं समिधानमीमहे ॥ ५॥ [६]

प्र। याः। सिस्रते। सूर्यस्य। रश्मिऽभिः। ज्योतिः। भरन्तीः। उषसः। विऽउष्टिषु।
भद्राः। नः। अद्य। श्रवसे। वि। उच्छत। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ५॥

अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत्।
आयुक्षातामश्विना तूतुजिं रथं स्वस्त्य१ग्निं समिधानमीमहे ॥ ६॥

अनमीवाः। उषसः। आ। चरन्तु। नः। उत्। अग्नयः। जिहताम्। ज्योतिषा। बृहत्।
अयुक्षाताम्। अश्विना। तूतुजिम्। रथम्। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ६॥

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥ ७॥

श्रेष्ठम्। नः। अद्य। सवितः। वरेण्यम्। भागम्। आ। सुव। सः। हि। रत्नऽधाः। असि।
रायः। जनित्रीम्। धिषणाम्। उप। ब्रुवे। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ७॥

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ॥ ८॥

पिपर्तु। मा। तत्। ऋतस्य। प्रऽवाचनम्। देवानाम्। यत्। मनुष्याः। अमन्महि।
विश्वाः। इत्। उस्राः। स्पट्। उत्। एति। सूर्यः। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ८॥

अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समिधानमीमहे ॥ ९।

अद्वेषः। अद्य। बर्हिषः। स्तरीमणि। ग्राव्णाम्। योगे। मन्मनः। साधे। ईमहे।
आदित्यानाम्। शर्मणि। स्थाः। भुरण्यसि। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ९॥

आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन्।
इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्य१ग्निं समिधानमीमहे ॥ १०॥ [७]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। बर्हिः। सधऽमादे। बृहत्। दिवि। देवान्। ईळे। सादय। सप्त। होतॄन्।
इन्द्रम्। मित्रम्। वरुणम्। सातये। भगम्। स्वस्ति। अग्निम्। समऽइधानम्। ईमहे ॥ १० ॥

त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः।
बृहस्पतिं पूषणमश्विना भगं स्वस्त्य१ग्निं समिधानमीमहे॥ ११॥

ते। आदित्याः। आ। गत। सर्वतातये। वृधे। नः। यज्ञम्। अवत। सऽजोषसः।
बृहस्पतिम्। पूषणम्। अश्विना। भगम्। स्वस्ति। अग्निम्। समऽइधानम्। ईमहे ॥ ११ ॥

तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यम्।
पश्वे तोकाय तनयाय जीवसे स्वस्त्य१ग्निं समिधानमीमहे॥ १२॥

तत्। नः। देवाः। यच्छत। सुऽप्रवाचनम्। छर्दिः। आदित्याः। सुऽभरम्। नृऽपाय्यम्।
पश्वे। तोकाय। तनयाय। जीवसे। स्वस्ति। अग्निम्। समऽइधानम्। ईमहे ॥ १२ ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे॥ १३॥

विश्वे। अद्य। मरुतः। विश्वे। ऊती। विश्वे। भवन्तु। अग्नयः। समऽइद्धाः।
विश्वे। नः। देवाः। अवसा। आ। गमन्तु। विश्वम्। अस्तु। द्रविणम्। वाजः। अस्ते इति ॥ १३ ॥

यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः॥ १४॥ [८]

यम्। देवासः। अवथ। वाजऽसातौ। यम्। त्रायध्वे। यम्। पिपृथ। अति। अंहः।
यः। वः। गोऽपीथे। न। भयस्य। वेद। ते। स्याम। देवऽवीतये। तुरासः॥ १४॥

[३६] [१४ लुशो धानाकः। विश्वे देवाः। जगती, १३-१४ त्रिष्टुभौ।]

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा।
इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः॥ १॥

उषसानक्ता। बृहती इति। सुऽपेशसा। द्यावाक्षामा। वरुणः। मित्रः। अर्यमा।
इन्द्रम्। हुवे। मरुतः। पर्वतान्। अपः। आदित्यान्। द्यावापृथिवी इति। अपः। स्व१रिति स्वः॥ १॥

द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्यौः। च। नः। पृथिवी। च। प्रऽचेतसा। ऋतवरी इत्यृतऽवरी। रक्षताम्। अंहसः। रिषः।
मा। दुःऽविदत्रा। निःऽऋतिः। नः। ईशत। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ २॥

विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः।
स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे॥ ३॥

विश्वस्मात्। नः। अदितिः। पातु। अंहसः। माता। मित्रस्य। वरुणस्य। रेवतः।
स्वःऽवत्। ज्योतिः। अवृकम्। नशीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ ३॥

ग्रावा वदन्नप रक्षांसि सेधतु दुष्ष्वप्न्यं निर्ऋतिं विश्वमत्रिणम्।
आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे॥ ४॥

ग्रावा। वदन्। अप। रक्षांसि। सेधतु। दुःऽस्वप्न्यम्। निःऽऋतिम्। विश्वम्। अत्रिणम्।
आदित्यम्। शर्म। मरुताम्। अशीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ ४॥

एन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु।
सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे॥ ५॥ [९]

आ। इन्द्रः। बर्हिः। सीदतु। पिन्वताम्। इळा। बृहस्पतिः। सामऽभिः। ऋक्वः। अर्चतु।
सुऽप्रकेतम्। जीवसे। मन्म। धीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ ५॥

दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे॥ ६॥

दिविऽस्पृशम्। यज्ञम्। अस्माकम्। अश्विना। जीरऽअध्वरम्। कृणुतम्। सुम्नम्। इष्टये।
प्राचीनऽरश्मिम्। आऽहुतम्। घृतेन। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ ६॥

उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवम्।
रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे॥ ७॥

उप। ह्वये। सुऽहवम्। मारुतम्। गणम्। पावकम्। ऋष्वम्। सख्याय। शम्ऽभुवम्।
रायः। पोषम्। सौश्रवसाय। धीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ ७॥

अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम्।
सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे॥ ८॥

अपाम्। पेरुम्। जीवऽधन्यम्। भरामहे। देवऽअव्यम्। सुऽहवम्। अध्वरऽश्रियम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुऽरश्मिम्। सोमम्। इन्द्रियम्। यमीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ८ ॥

सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः।

ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे॥ ९ ॥

सनेम। तत्। सुऽसनिता। सनित्वऽभिः। वयम्। जीवाः। जीवऽपुत्राः। अनागसः।

ब्रह्मऽद्विषः। विष्वक्। एनः। भरेरत। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ९ ॥

ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन।

जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे॥ १० ॥ [१०]

ये। स्थ। मनोः। यज्ञियाः। ते। शृणोतन। यत्। वः। देवाः। ईमहे। तत्। ददातन।

जैत्रम्। क्रतुम्। रयिमत्। वीरऽवत्। यशः। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ १० ॥

महदद्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणाम्।

यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे॥ ११ ॥

महत्। अद्य। महताम्। आ। वृणीमहे। अवः। देवानाम्। बृहताम्। अनर्वणाम्।

यथा। वसु। वीरऽजातम्। नशामहै। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ११ ॥

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये।

श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे॥ १२ ॥

महः। अग्नेः। सम्ऽइधानस्य। शर्मणि। अनागाः। मित्रे। वरुणे। स्वस्तये।

श्रेष्ठे। स्याम। सवितुः। सवीमनि। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ १२ ॥

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः।

ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे॥ १३ ॥

ये। सवितुः। सत्यऽसवस्य। विश्वे। मित्रस्य। व्रते। वरुणस्य। देवाः।

ते। सौभगम्। वीरऽवत्। गोऽमत्। अप्नः। दधातन। द्रविणम्। चित्रम्। अस्मे इति ॥ १३ ॥

सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।

सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः॥ १४॥ [११]

सविता। पश्चातात्। सविता। पुरस्तात्। सविता। उत्तरात्तात्। सविता। अधरात्तात्।

सविता। नः। सुवतु। सर्वऽतातिम्। सविता। नः। रासताम्। दीर्घम्। आयुः॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३७] [१२ सौर्यः अभितपाः। सूर्यः। जगती, १० त्रिष्टुप्।]

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत॥ १॥

नमः। मित्रस्य। वरुणस्य। चक्षसे। महः। देवाय। तत्। ऋतम्। सपर्यत।
दूरेऽदृशे। देवऽजाताय। केतवे। दिवः। पुत्राय। सूर्याय। शंसत॥ १॥

सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च।
विश्वमन्यन्नि विशते यदेजति विश्वहापो विश्वाहोदेति सूर्यः॥ २॥

सा। मा। सत्यऽउक्तिः। परि। पातु। विश्वतः। द्यावा। च। यत्र। ततनन्। अहानि। च।
विश्वम्। अन्यत्। नि। विशते। यत्। एजति। विश्वाहा। आपः। विश्वाहा। उत्। एति। सूर्यः॥ २॥

न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य॥ ३॥

न। ते। अदेवः। प्रऽदिवः। नि। वासते। यत्। एतशेभिः। पतरैः। रथर्यसि।
प्राचीनम्। अन्यत्। अनु। वर्तते। रजः। उत्। अन्येन। ज्योतिषा। यासि। सूर्य॥ ३॥

येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव॥ ४॥

येन। सूर्य। ज्योतिषा। बाधसे। तमः। जगत्। च। विश्वम्। उत्ऽइयर्षि। भानुना।
तेन। अस्मत्। विश्वाम्। अनिराम्। अनाहुतिम्। अप। अमीवाम्। अप। दुःऽस्वप्न्यम्। सुव॥ ४॥

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु।
यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम्॥ ५॥

विश्वस्य। हि। प्रऽइषितः। रक्षसि। व्रतम्। अहेळयन्। उत्ऽचरसि। स्वधाः। अनु।
यत्। अद्य। त्वा। सूर्य। उपऽब्रवामहै। तम्। नः। देवाः। अनु। मंसीरत। क्रतुम्॥ ५॥

तं नो द्यावापृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः।
मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि॥ ६॥ [१२]

तम्। नः। द्यावापृथिवी इति। तत्। नः। आपः। इन्द्रः। शृण्वन्तु। मरुतः। हवम्। वचः।
मा। शूने। भूम। सूर्यस्य। सम्ऽदृशि। भद्रम्। जीवन्तः। जरणाम्। अशीमहि॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि॒श्वाहा॑ त्वा सु॒मन॑सः सु॒चक्ष॑सः प्र॒जाव॑न्तो अनमी॒वा अना॑गसः।
उ॒द्यन्त॑ं त्वा मित्रमहो दि॒वेदि॑वे॒ ज्योग्जी॒वाः प्रति॑ पश्येम सूर्य॥ ७॥
वि॒श्वाहा॑। त्वा॒। सु॒ऽमन॑सः। सु॒ऽचक्ष॑सः। प्र॒जाऽव॑न्तः। अ॒न॒मी॒वाः। अना॑गसः।
उ॒त्ऽयन्त॑म्। त्वा॒। मि॒त्र॒ऽम॒हः। दि॒वेऽदि॑वे। ज्योक्। जी॒वाः। प्रति॑। प॒श्ये॒म॒। सू॒र्य॒॥ ७॥

म॒हि ज्योति॑र्बिभ्र॑तं त्वा विचक्षण॒ भास्व॑न्तं॒ चक्षु॑षेचक्षुषे॒ मय॑ः।
आ॒रोह॑न्तं बृह॒तः पाज॑स॒स्परि॑ व॒यं जी॒वाः प्रति॑ पश्येम सूर्य॥ ८॥
म॒हि॑। ज्योति॑ः। बिभ्र॑तम्। त्वा॒। वि॒ऽच॒क्ष॒ण॒। भास्व॑न्तम्। चक्षु॑षेऽचक्षुषे। मय॑ः।
आ॒ऽरोह॑न्तम्। बृ॒ह॒तः। पाज॑सः। परि॑। व॒यम्। जी॒वाः। प्रति॑। प॒श्ये॒म॒। सू॒र्य॒॥ ८॥

यस्य॑ ते॒ विश्वा॒ भुव॑नानि के॒तुना॒ प्र चेर॑ते॒ नि च॑ वि॒शन्ते॑ अ॒क्तुभि॑ः।
अ॒नागा॒स्त्वेन॑ हरिकेश सू॒र्याह्ना॑ह्ना नो॒ वस्य॑सावस्य॒सोदि॑हि॥ ९॥
यस्य॑। ते॒। विश्वा॑। भुव॑नानि। के॒तुना॑। प्र। च॒। ईर॑ते। नि। च॒। वि॒शन्ते॑। अ॒क्तुऽभि॑ः।
अ॒ना॒गाः॒ऽत्वेन॑। ह॒रि॒ऽके॒श॒। सू॒र्य॒। अह्ना॑ऽअह्ना। नः॒। वस्य॑साऽवस्यसा। उत्। इ॒हि॒॥ ९॥

शं नो॑ भव॒ चक्ष॑सा॒ शं नो अह्ना॒ शं भा॒नुना शं हि॒मा शं घृ॒णेन॑।
यथा॒ शमध्व॒ञ्छमस॑द्दुरो॒णे तत्सू॑र्य॒ द्रवि॑णं धेहि चि॒त्रम्॥ १०॥
शम्। नः॒। भ॒व॒। चक्ष॑सा। शम्। नः॒। अह्ना॑। शम्। भा॒नुना॑। शम्। हि॒मा। शम्। घृ॒णेन॑।
यथा॑। शम्। अध्व॑न्। शम्। अस॑त्। दु॒रो॒णे। तत्। सू॒र्य॒। द्रवि॑णम्। धे॒हि॒। चि॒त्रम्॥ १०॥

अ॒स्माकं॑ देवा उ॒भया॑य॒ जन्म॑ने॒ शर्म॑ यच्छत द्वि॒पदे॒ चतु॑ष्पदे।
अ॒दत्पिब॑दू॒र्जय॑माना॒माशि॑तं॒ तद॒स्मे शं योर॑र॒पो द॑धातन॥ ११॥
अ॒स्माक॑म्। दे॒वाः॒। उ॒भया॑य। जन्म॑ने। शर्म॑। य॒च्छ॒त॒। द्वि॒ऽपदे। चतु॑ःऽपदे।
अ॒दत्। पिब॑त्। ऊ॒र्जय॑मानम्। आशि॑तम्। तत्। अ॒स्मे इति॑। शम्। योः। अ॒र॒पः। द॒धा॒त॒न॒॥ ११॥

यद्वो॑ देवाश्चकृ॒म जि॒ह्वया॑ गुरु मन॑सो वा॒ प्रयु॑ती देव॒हेळ॑नम्।
अरा॑वा॒ यो नो॑ अ॒भि दु॑च्छुना॒यते॒ तस्मि॒न्तदेनो॑ वसवो॒ नि धे॑तन॥ १२॥ [१३]
यत्। वः॒। दे॒वाः॒। च॒कृ॒म। जि॒ह्वया॑। गु॒रु। मन॑सः। वा॒। प्र॒ऽयु॑ती। दे॒व॒ऽहेळ॑नम्।
अरा॑वा। यः। नः॒। अ॒भि। दु॒च्छु॒न॒ऽयते॑। तस्मि॑न्। तत्। एन॑ः। व॒स॒वः॒। नि। धे॒त॒न॒॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[३८] [५ मुष्कवानिन्द्रः। इन्द्रः। (ताण्ड्यशाटयानानुसारं लुश ऋषिः मुष्कवानिन्द्रो देवता) जगती।]

अस्मिन्न इन्द्र पृत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये।
यत्र गोषाता धृषितेषु खादिषु विष्वक्पतन्ति दिद्यवो नृषाह्ये॥ १॥
अस्मिन्। नः। इन्द्र। पृत्सुतौ। यशस्वति। शिमीऽवति। क्रन्दसि। प्र। अव। सातये।
यत्र। गोऽसाता। धृषितेषु। खादिषु। विष्वक्। पतन्ति। दिद्यवः। नृऽसह्ये॥ १॥

स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम्।
स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि॥ २॥
सः। नः। क्षुऽमन्तम्। सदने। वि। ऊर्णुहि। गोऽअर्णसम्। रयिम्। इन्द्र। श्रवाय्यम्।
स्याम। ते। जयतः। शक्र। मेदिनः। यथा। वयम्। उश्मसि। तत्। वसो इति। कृधि॥ २॥

यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति।
अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे॥ ३॥
यः। नः। दासः। आर्यः। वा। पुरुऽस्तुत। अदेवः। इन्द्र। युधये। चिकेतति।
अस्माभिः। ते। सुऽसहाः। सन्तु। शत्रवः। त्वया। वयम्। तान्। वनुयाम। सम्ऽगमे॥ ३॥

यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्ये।
तं विखादे सस्निमद्य श्रुतं नरमर्वाञ्चमिन्द्रमवसे करामहे॥ ४॥
यः। दभ्रेभिः। हव्यः। यः। च। भूरिऽभिः। यः। अभीके। वरिवःऽवित्। नृऽसह्ये।
तम्। विऽखादे। सस्निम्। अद्य। श्रुतम्। नरम्। अर्वाञ्चम्। इन्द्रम्। अवसे। करामहे॥ ४॥

स्ववृजं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनम्।
प्र मुञ्चस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते॥ ५॥ [१४]
स्वऽवृजम्। हि। त्वाम्। अहम्। इन्द्र। शुश्रव। अननुऽदम्। वृषभ। रध्रऽचोदनम्॥ प्र। मुञ्चस्व।
परि। कुत्सात्। इह। आ। गहि। किम्। ऊँ इति। त्वाऽवान्। मुष्कयोः। बद्धः। आसते॥ ५॥

[३९] [१४ काक्षीवती घोषा। अश्विनौ। जगती, १४ त्रिष्टुप्।]

यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता।
शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः । वाम् । परिऽज्मा । सुऽवृत् । अश्विना । रथः । दोषाम् । उषसः । हव्यः । हविष्मता ।

शश्वत्ऽतमासः । तम् । ऊँ इति । वाम् । इदम् । वयम् । पितुः । न । नाम । सुऽहवम् । हवामहे ॥ १ ॥

चोदयतं सूनृताः पिन्वतं धिय उत्पुरंधीरीरयतं तदुश्मसि ।

यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥ २ ॥

चोदयतम् । सूनृताः । पिन्वतम् । धियः । उत् । पुरम्ऽधीः । ईरयतम् । तत् । उश्मसि ।

यशसम् । भागम् । कृणुतम् । नः । अश्विना । सोमम् । न । चारुम् । मघवत्ऽसु । नः । कृतम् ॥ २ ॥

अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चित् ।

अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥ ३ ॥

अमाऽजुरः । चित् । भवथः । युवम् । भगः । अनाशोः । चित् । अवितारा । अपमस्य । चित् ।

अन्धस्य । चित् । नासत्या । कृशस्य । चित् । युवाम् । इत् । आहुः । भिषजा । रुतस्य । चित् ॥ ३ ॥

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः ।

निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥ ४ ॥

युवम् । च्यवानम् । सनयम् । यथा । रथम् । पुनः । युवानम् । चरथाय । तक्षथुः ।

निः । तौग्र्यम् । ऊहथुः । अत्ऽभ्यः । परि । विश्वा । इत् । ता । वाम् । सवनेषु । प्रऽवाच्या ॥ ४ ॥

पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा ।

तां वां नु नव्यावसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥ ५ ॥ [१५]

पुराणा । वाम् । वीर्या । प्र । ब्रव । जने । अथो इति । ह । आसथुः । भिषजा । मयःऽभुवा ।

ता । वाम् । नु । नव्यौ । अवसे । करामहे । अयम् । नासत्या । श्रत् । अरिः । यथा । दधत् ॥ ५ ॥

इयं वामह्वे शृणुतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम् ।

अनापिरज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतम् ॥ ६ ॥

इयम् । वाम् । अह्वे । शृणुतम् । मे । अश्विना । पुत्रायऽइव । पितरा । मह्यम् । शिक्षतम् ।

अनापिः । अज्ञाः । असजात्या । अमतिः । पुरा । तस्याः । अभिऽशस्तेः । अव । स्पृतम् ॥ ६ ॥

युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम् ।

युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरंधये ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युवम्। रथेन। विऽमदाय। शुन्ध्युवम्। नि। ऊहथुः। पुरुऽमित्रस्य। योषणाम्।
युवम्। हवम्। वध्रिऽमत्याः। अगच्छतम्। युवम्। सुऽसुतिम्। चक्रथुः। पुरम्ऽधये॥ ७॥

युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः।
युवं वन्दनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः॥ ८॥

युवम्। विप्रस्य। जरणाम्। उपऽईयुषः। पुनरिति। कलेः। अकृणुतम्। युवत्। वयः।
युवम्। वन्दनम्। ऋश्यऽदात्। उत्। ऊपथुः। युवम्। सद्यः। विश्पलाम्। एतवे। कृथः॥ ८॥

युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना।
युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये॥ ९॥

युवम्। ह। रेभम्। वृषणा। गुहा। हितम्। उत्। ऐरयतम्। ममृऽवांसम्। अश्विना।
युवम्। ऋबीसम्। उत। तप्तम्। अत्रये। ओमन्ऽवन्तम्। चक्रथुः। सप्तऽवध्रये॥ ९॥

युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजैर्नवती च वाजिनम्।
चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवम्॥ १०॥ [१६]

युवम्। श्वेतम्। पेदवे। अश्विना। अश्वम्। नवऽभिः। वाजैः। नवती। च। वाजिनम्।
चर्कृत्यम्। ददथुः। द्रवयत्ऽसखम्। भगम्। न। नृऽभ्यः। हव्यम्। मयःऽभुवम्॥ १०॥

न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयम्।
यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह॥ ११॥

न। तम्। राजानौ। अदिते। कुतः। चन। न। अंहः। अश्नोति। दुःऽइतम्। नकिः। भयम्।
यम्। अश्विना। सुऽहवा। रुद्रवर्तनी इति रुद्रऽवर्तनी। पुरःऽरथम्। कृणुथः। पत्न्या। सह॥ ११॥

आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः॥ १२॥

आ। तेन। यातम्। मनसः। जवीयसा। रथम्। यम्। वाम्। ऋभवः। चक्रुः। अश्विना॥ यस्य। योगे।
दुहिता। जायते। दिवः। उभे इति। अहनी इति। सुदिने इति सुऽदिने। विवस्वतः॥ १२॥

ता वर्तिर्यातं जयुषा वि पर्वतमपिन्वतं शयवे धेनुमश्विना।
वृकस्य चिद्वर्तिकामन्तरास्याद्युवं शचीभिर्ग्रसिताममुञ्चतम्॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता । वर्तिः । यातम् । जयुषा । वि । पर्वतम् । अपिन्वतम् । शयवे । धेनुम् । अश्विना ।
वृकस्य । चित् । वर्तिकाम् । अन्तः । आस्यात् । युवम् । शचीभिः । ग्रसिताम् । अमुञ्चतम् ॥ १३ ॥

एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथम् ।
न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥ १४ ॥ [१७]

एतम् । वाम् । स्तोमम् । अश्विनौ । अकर्म । अतक्षाम । भृगवः । न । रथम् ।
नि । अमृक्षाम । योषणाम् । न । मर्ये । नित्यम् । न । सूनुम् । तनयम् । दधानाः ॥ १४ ॥

[४०] [१४ काक्षीवती घोषा । अश्विनौ । जगती ।]

रथं यान्तं कुह को ह वां नरा प्रति द्युमन्तं सुविताय भूषति ।
प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्वतोर्वहमानं धिया शमि ॥ १ ॥

रथम् । यान्तम् । कुह । कः । ह । वाम् । नरा । प्रति । द्युऽमन्तम् । सुविताय । भूषति ।
प्रातःऽयावानम् । विऽभ्वम् । विशेऽविशे । वस्तोःऽवस्तोः । वहमानम् । धिया । शमि ॥ १ ॥

कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥ २ ॥

कुह । स्वित् । दोषा । कुह । वस्तोः । अश्विना । कुह । अभिऽपित्वम् । करतः । कुह । ऊषतुः ।
कः । वाम् । शयुऽत्रा । विधवाऽइव । देवरम् । मर्यम् । न । योषा । कृणुते । सधऽस्थे । आ ॥ २ ॥

प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तोर्यजता गच्छथो गृहम् ।
कस्य ध्वस्रा भवथः कस्य वा नरा राजपुत्रेव सवनाव गच्छथः ॥ ३ ॥

प्रातः । जरेथे इति । जरणाऽइव । कापया । वस्तोःऽवस्तोः । यजता । गच्छथः । गृहम् ।
कस्य । ध्वस्रा । भवथः । कस्य । वा । नरा । राजपुत्राऽइव । सवना । अव । गच्छथः ॥ ३ ॥

युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।
युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥ ४ ॥

युवाम् । मृगाऽइव । वारणा । मृगण्यवः । दोषा । वस्तोः । हविषा । नि । ह्वयामहे ।
युवम् । होत्राम् । ऋतुऽथा । जुह्वते । नरा । इषम् । जनाय । वहथः । शुभः । पती इति ॥ ४ ॥

युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा ।
भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥ ५ ॥ [१८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युवाम् । ह । घोषा । परि । अश्विना । यती । राज्ञः । ऊचे । दुहिता । पृच्छे । वाम् । नरा ।
भूतम् । मे । अह्ने । उत । भूतम् । अक्तवे । अश्वऽवते । रथिने । शक्तम् । अर्वते ॥ ५ ॥

युवं कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।
युवोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥ ६ ॥

युवम् । कवी इति । स्थः । परि । अश्विना । रथम् । विशः । न । कुत्सः । जरितुः । नशायथः ।
युवोः । ह । मक्षा । परि । अश्विना । मधु । आसा । भरत । निःऽकृतम् । न । योषणा ॥ ६ ॥

युवं ह भुज्युं युवमश्विना वशं युवं शिञ्जारमुशनामुपारथुः ।
युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥ ७ ॥

युवम् । ह । भुज्युम् । युवम् । अश्विना । वशम् । युवम् । शिञ्जारम् । उशनाम् । उप । आरथुः ।
युवोः । ररावा । परि । सख्यम् । आसते । युवोः । अहम् । अवसा । सुम्नम् । आ । चके ॥ ७ ॥

युवं ह कृशं युवमश्विना शयुं युवं विधन्तं विधवामुरुष्यथः ।
युवं सनिभ्यः स्तनयन्तमश्विनाप व्रजमूर्णुथः सप्तास्यम् ॥ ८ ॥

युवम् । ह । कृशम् । युवम् । अश्विना । शयुम् । युवम् । विधन्तम् । विधवाम् । उरुष्यथः ।
युवम् । सनिऽभ्यः । स्तनयन्तम् । अश्विना । अप । व्रजम् । ऊर्णुथः । सप्तऽआस्यम् ॥ ८ ॥

जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु ।
आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्ने भवति तत्पतित्वनम् ॥ ९ ॥ [१९]

जनिष्ट । योषा । पतयत् । कनीनकः । वि । च । अरुहन् । वीरुधः । दंसनाः । अनु ।
आ । अस्मै । रीयन्ते । निवनाऽइव । सिन्धवः । अस्मै । अह्ने । भवति । तत् । पतिऽत्वनम् ॥ ९ ॥

जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥ १० ॥

जीवम् । रुदन्ति । वि । मयन्ते । अध्वरे । दीर्घाम् । अनु । प्रऽसितिम् । दीधियुः । नरः ।
वामम् । पितृऽभ्यः । ये । इदम् । सम्ऽएरिरे । मयः । पतिऽभ्यः । जनयः । परिऽस्वजे ॥ १० ॥

न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।
प्रियोस्त्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥ ११ ॥

न । तस्य । विद्म । तत् । ऊँ इति । सु । प्र । वोचत । युवा । ह । यत् । युवत्याः । क्षेति । योनिषु ।
प्रियऽउस्त्रियस्य । वृषभस्य । रेतिनः । गृहम् । गमेम । अश्विना । तत् । उश्मसि ॥ ११ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्यां अशीमहि॥ १२॥

आ। वाम्। अगन्। सुऽमतिः। वाजिनीवसू इति वाजिनीऽवसू। नि। अश्विना। हृत्ऽसु। कामाः। अयंसत॥ अभूतम्। गोपा। मिथुना। शुभः। पती इति। प्रियाः। अर्यम्णः। दुर्यान्। अशीमहि॥ १२॥

ता मन्दसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम्॥ १३॥

ता। मन्दसाना। मनुषः। दुरोणे। आ। धत्तम्। रयिम्। सहऽवीरम्। वचस्यवे॥ कृतम्। तीर्थम्। सुऽप्रपानम्। शुभः। पती इति। स्थाणुम्। पथेऽस्थाम्। अप। दुःऽमतिम्। हतम्॥ १३॥

क्व स्विदद्य कतमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती।
क ईं नि येमे कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहम्॥ १४॥ [२०]

क्व। स्वित्। अद्य। कतमासु। अश्विना। विक्षु। दस्रा। मादयेते इति। शुभः। पती इति। कः। ईम्। नि। येमे। कतमस्य। जग्मतुः। विप्रस्य। वा। यजमानस्य। वा। गृहम्॥ १४॥

[४१] [३ सुहस्त्यो घौषेयः। अश्विनौ। जगती।]

समानमु त्यं पुरुहूतमुक्थ्यं१ रथं त्रिचक्रं सवना गनिग्मतम्।
परिज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे॥ १॥

समानम्। ऊँ इति। त्यम्। पुरुहूतम्। उक्थ्यम्। रथम्। त्रिऽचक्रम्। सवना। गनिग्मतम्। परिऽज्मानम्। विदथ्यम्। सुवृक्तिऽभिः। वयम्। विऽउष्टौ। उषसः। हवामहे॥ १॥

प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथम्।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमन्तमश्विना॥ २॥

प्रातःऽयुजम्। नासत्या। अधि। तिष्ठथः। प्रातःऽयावानम्। मधुऽवाहनम्। रथम्। विशः। येन। गच्छथः। यज्वरीः। नरा। कीरेः। चित्। यज्ञम्। होतृऽमन्तम्। अश्विना॥ २॥

अध्वर्युं वा मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसम्।
विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना॥ ३॥ [२१]

अध्वर्युम्। वा। मधुऽपाणिम्। सुऽहस्त्यम्। अग्निधम्। वा। घृतऽदक्षम्। दमूनसम्। विप्रस्य। वा। यत्। सवनानि। गच्छथः। अतः। आ। यातम्। मधुऽपेयम्। अश्विना॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[४२] [११ कृष्ण आङ्गिरसः। इन्द्रः। त्रिष्टुप्।]

अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रम्॥ १॥

अस्ताऽइव। सु। प्र॰तरम्। लायम्। अस्यन्। भूषन्ऽइव। प्र। भर। स्तोमम्। अस्मै।
वाचा। विप्राः। तरत। वाचम्। अर्यः। नि। रमय। जरितरिति। सोमे। इन्द्रम्॥ १॥

दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम्।
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरम्॥ २॥

दोहेन। गाम्। उप। शिक्ष। सखायम्। प्र। बोधय। जरितः। जारम्। इन्द्रम्।
कोशम्। न। पूर्णम्। वसुना। नि॰ऋष्टम्। आ। च्यवय। मघ॰देयाय। शूरम्॥ २॥

किमङ्ग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा शृणोमि।
अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः॥ ३॥

किम्। अङ्ग। त्वा। मघ॰वन्। भोजम्। आहुः। शिशीहि। मा। शिशयम्। त्वा। शृणोमि।
अप्नस्वती। मम। धीः। अस्तु। शक्र। वसु॰विदम्। भगम्। इन्द्र। आ। भर। नः॥ ३॥

त्वां जना ममसत्येष्विन्द्र संतस्थाना वि ह्वयन्ते समीके।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः॥ ४॥

त्वाम्। जनाः। मम॰सत्येषु। इन्द्र। सम्॰तस्थानाः। वि। ह्वयन्ते। सम्॰ईके।
अत्र। युजम्। कृणुते। यः। हविष्मान्। न। असुन्वता। सख्यम्। वष्टि। शूरः॥ ४॥

धनं न स्पन्द्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान्।
तस्मै शत्रून्त्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हन्ति वृत्रम्॥ ५॥ [२२]

धनम्। न। स्पन्द्रम्। बहुलम्। यः। अस्मै। तीव्रान्। सोमान्। आ॰सुनोति। प्रयस्वान्।
तस्मै। शत्रून्। सु॰तुकान्। प्रातः। अह्नः। नि। सु॰अष्ट्रान्। युवति। हन्ति। वृत्रम्॥ ५॥

यस्मिन्वयं दधिमा शंसमिन्द्रे यः शिश्राय मघवा काममस्मे।
आराच्चित्सन्भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमन्ताम्॥ ६॥

यस्मिन्। वयम्। दधिम। शंसम्। इन्द्रे। यः। शिश्राय। मघ॰वा। कामम्। अस्मे इति।
आरात्। चित्। सन्। भयताम्। अस्य। शत्रुः। नि। अस्मै। द्युम्ना। जन्या। नमन्ताम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन।
अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम्॥ ७॥
आरात्। शत्रुम्। अप। बाधस्व। दूरम्। उग्रः। यः। शम्बः। पुरुऽहूत। तेन।
अस्मे इति। धेहि। यवऽमत्। गोऽमत्। इन्द्र। कृधि। धियम्। जरित्रे। वाजऽरत्नाम्॥ ७॥
प्र यमन्तर्वृषसवासो अग्मन् तीव्राः सोमा बहुलान्तास इन्द्रम्।
नाह दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामम्॥ ८॥
प्र। यम्। अन्तः। वृषऽसवासः। अग्मन्। तीव्राः। सोमाः। बहुलऽअन्तासः। इन्द्रम्।
न। अह। दामानम्। मघऽवा। नि। यंसत्। नि। सुन्वते। वहति। भूरि। वामम्॥ ८॥
उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले।
यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान्॥ ९॥
उत। प्रऽहाम्। अतिऽदीव्य। जयाति। कृतम्। यत्। श्वऽघ्नी। विऽचिनोति। काले।
यः। देवऽकामः। न। धना। रुणद्धि। सम्। इत्। राया। सृजति। स्वधाऽवान्॥ ९॥
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम्।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम॥ १०॥
गोभिः। तरेम। अमतिम्। दुःऽएवाम्। यवेन। क्षुधम्। पुरुऽहूत। विश्वाम्।
वयम्। राजऽभिः। प्रथमाः। धनानि। अस्माकेन। वृजनेन। जयेम॥ १०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु॥ ११॥ [२३] {३}
बृहस्पतिः। नः। परि। पातु। पश्चात्। उत। उत्ऽतरस्मात्। अधरात्। अघऽयोः।
इन्द्रः। पुरस्तात्। उत। मध्यतः। नः। सखा। सखिऽभ्यः। वरिवः। कृणोतु॥ ११॥

[४३] [११ कृष्ण आङ्गिरसः। इन्द्रः। जगती, १०-११ त्रिष्टुभौ।]

अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत।
परि ष्वजन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये॥ १॥
अच्छ। मे। इन्द्रम्। मतयः। स्वःऽविदः। सध्रीचीः। विश्वाः। उशतीः। अनूषत।
परि। स्वजन्ते। जनयः। यथा। पतिम्। मर्यम्। न। शुन्ध्युम्। मघऽवानम्। ऊतये॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय।
राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते॥ २॥

न। घ। त्वद्रिक्। अप। वेति। मे। मनः। त्वे इति। इत्। कामम्। पुरुऽहूत। शिश्रय।
राजाऽइव। दस्म। नि। सदः। अधि। बर्हिषि। अस्मिन्। सु। सोमे। अवऽपानम्। अस्तु। ते॥ २॥

विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते।
तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः॥ ३॥

विषुऽवृत्। इन्द्रः। अमतेः। उत। क्षुधः। सः। इत्। रायः। मघऽवा। वस्वः। ईशते।
तस्य। इत्। इमे। प्रवणे। सप्त। सिन्धवः। वयः। वर्धन्ति। वृषभस्य। शुष्मिणः॥ ३॥

वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्रं मन्दिनश्चमूषदः।
प्रैषामनीकं शवसा दविद्युतद्विदत्स्व१र्मनवे ज्योतिरार्यम्॥ ४॥

वयः। न। वृक्षम्। सुऽपलाशम्। आ। असदन्। सोमासः। इन्द्रम्। मन्दिनः। चमूऽसदः।
प्र। एषाम्। अनीकम्। शवसा। दविद्युतत्। विदत्। स्वः। मनवे। ज्योतिः। आर्यम्॥ ४॥

कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत्।
न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः॥ ५॥ [२४]

कृतम्। न। श्वऽघ्नी। वि। चिनोति। देवने। सम्ऽवर्गम्। यत्। मघऽवा। सूर्यम्। जयत्।
न। तत्। ते। अन्यः। अनु। वीर्यम्। शकत्। न। पुराणः। मघऽवन्। न। उत। नूतनः॥ ५॥

विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा।
यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः॥ ६॥

विशम्ऽविशम्। मघऽवा। परि। अशायत। जनानाम्। धेनाः। अवऽचाकशत्। वृषा।
यस्य। अह। शक्रः। सवनेषु। रण्यति। सः। तीव्रैः। सोमैः। सहते। पृतन्यतः॥ ६॥

आपो न सिन्धुमभि यत्समक्षरन्त्सोमास इन्द्रं कुल्याइव ह्रदम्।
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना॥ ७॥

आपः। न। सिन्धुम्। अभि। यत्। सम्ऽअक्षरन्। सोमासः। इन्द्रम्। कुल्याःऽइव। ह्रदम्।
वर्धन्ति। विप्राः। महः। अस्य। सदने। यवम्। न। वृष्टिः। दिव्येन। दानुना॥ ७॥

वृषा न क्रुद्धः पतयद्रजःस्वा यो अर्यपत्नीरकृणोदिमा अपः।
स सुन्वते मघवा जीरदानवेऽविन्दज्ज्योतिर्मनवे हविष्मते॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृषा । न । क्रुद्धः । पतयत् । रजःऽसु । आ । यः । अर्यऽपत्नीः । अकृणोत् । इमाः । अपः ।
सः । सुन्वते । मघवा । जीरऽदानवे । अविन्दत् । ज्योतिः । मनवे । हविष्मते ॥ ८ ॥

उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोचतामरुषो भानुना शुचिः स्वर्ण शुक्रं शुशुचीत सत्पतिः ॥ ९ ॥
उत् । जायताम् । परशुः । ज्योतिषा । सह । भूयाः । ऋतस्य । सुऽदुघा । पुराणऽवत् ।
वि । रोचताम् । अरुषः । भानुना । शुचिः । स्वः । न । शुक्रम् । शुशुचीत । सत्ऽपतिः ॥ ९ ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १० ॥
गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् । पुरुऽहूत । विश्वाम् ।
वयम् । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥ १० ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥
बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इन्द्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११ ॥

[४४] (११) कृष्ण आङ्गिरसः । इन्द्रः । ४-९ जगती; १-३, १०-११ त्रिष्टुप् ।

आ यात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन ॥ १ ॥
आ । यातु । इन्द्रः । स्वऽपतिः । मदाय । यः । धर्मणा । तूतुजानः । तुविष्मान् ।
प्रऽत्वक्षाणः । अति । विश्वा । सहांसि । अपारेण । महता । वृष्ण्येन ॥ १ ॥

सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि ॥ २ ॥
सुऽस्थामा । रथः । सुऽयमा । हरी इति । ते । मिम्यक्ष । वज्रः । नृऽपते । गभस्तौ ।
शीभम् । राजन् । सुऽपथा । आ । याहि । अर्वाङ् । वर्धाम । ते । पपुषः । वृष्ण्यानि ॥ २ ॥

एन्द्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहन्तु ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। इन्द्र॑ऽवाहः। नृ॒ऽपति॑म्। वज्र॑ऽबाहुम्। उ॒ग्रम्। उ॒ग्रासः॑। त॒वि॒षासः॑। ए॒न॒म्।
प्र॒ऽत्व॑क्षसम्। वृ॒ष॒भम्। स॒त्यऽशु॑ष्मम्। आ। ई॒म्। अ॒स्म॒ऽत्रा। स॒ध॒ऽमादः॑। व॒ह॒न्तु॒॥ ३॥

ए॒वा पति॑ं द्रोण॒साच॒ं सचे॑तसमू॒र्जः स्क॒म्भं ध॒रुण॒ आ वृ॑षायसे।
ओजः॑ कृष्व॒ सं गृ॑भाय॒ त्वे अप्यसो॒ यथा॑ केनि॒पाना॑मि॒नो वृ॒धे॥ ४॥

ए॒व। पति॑म्। द्रो॒ण॒ऽसाच॑म्। स॒ऽचे॑तसम्। ऊ॒र्जः। स्क॒म्भम्। ध॒रुणे॑। आ। वृ॒ष॒ऽय॒से॒।
ओजः॑। कृ॒ष्व॒। सम्। गृ॒भा॒य॒। त्वे इति॑। अपि॑। असः॑। यथा॑। के॒ऽनि॒पाना॑म्। इ॒नः। वृ॒धे॥ ४॥

गम॑न्न॒स्मे वसू॒न्या हि शंसि॑षं स्वा॒शिष॒ं भर॒मा या॑हि सो॒मिनः॑।
त्वमी॑शिषे॒ सास्मिन्ना स॑त्सि ब॒र्हिष्य॑नाधृ॒ष्या तव॒ पात्रा॑णि॒ धर्म॑णा॥ ५॥ [२६]

गम॑न्। अ॒स्मे इति॑। वसू॑नि। आ। हि। शंसि॑षम्। सु॒ऽआ॒शिष॑म्। भर॑म्। आ। या॒हि॒। सो॒मिनः॑।
त्वम्। ई॒शि॒षे॒। सः। अ॒स्मिन्। आ। स॒त्सि॒। ब॒र्हिषि॑। अ॒ना॒धृ॒ष्या। तव॑। पात्रा॑णि। धर्म॑णा॥ ५॥

पृथ॑क् प्राय॑न् प्रथ॒मा दे॒वहू॑तयो॒ऽकृ॑ण्वत श्रव॒स्या॑नि दु॒ष्टरा॑।
न ये शे॒कुर्य॒ज्ञियां॒ नाव॑मा॒रुह॑मी॒र्मैव ते न्य॑विशन्त॒ केप॑यः॥ ६॥

पृथ॑क्। प्र। आ॒य॒न्। प्र॒थ॒माः। दे॒वऽहू॑तयः। अकृ॑ण्वत। श्र॒व॒स्या॑नि। दु॒स्तरा॑।
न। ये। शे॒कुः। य॒ज्ञिया॑म्। नाव॑म्। आ॒ऽरुह॑म्। ई॒र्मा। ए॒व। ते। नि। अ॒वि॒श॒न्त॒। केप॑यः॥ ६॥

ए॒वैवापा॒गप॑रे सन्तु दू॒ढ्यो॒ऽश्वा॒ येषां॑ दु॒र्युज आ॑युयु॒ज्रे।
इ॒त्था ये प्रागुप॑रे॒ सन्ति॑ दा॒वने॑ पु॒रूणि॒ यत्र॑ व॒युना॑नि॒ भोज॑ना॥ ७॥

ए॒व। ए॒व। अपा॑क्। अप॑रे। स॒न्तु॒। दुः॒ऽध्यः॑। अश्वाः॑। येषा॑म्। दुः॒ऽयुजः॑। आ॒ऽयु॒यु॒ज्रे।
इ॒त्था। ये। प्राक्। उप॑रे। सन्ति॑। दा॒वने॑। पु॒रूणि॑। यत्र॑। व॒युना॑नि। भोज॑ना॥ ७॥

गि॒रीँरज्रा॒न्रेज॑मानाँ अधारय॒द् द्यौः क्र॑न्दद॒न्तरि॑क्षाणि कोपयत्।
स॒मी॒ची॒ने धि॒षणे॒ वि ष्क॑भायति॒ वृष्णः॑ पी॒त्वा मद॑ उ॒क्थानि॑ शंसयिथ॥ ८॥

गि॒रीन्। अज्रा॑न्। रेज॑मानान्। अ॒धा॒र॒य॒त्। द्यौः। क्र॒न्द॒त्। अ॒न्तरि॑क्षाणि। को॒प॒य॒त्॥ स॒मी॒ची॒ने इति॑
स॒म्ऽई॒ची॒ने। धि॒षणे॒ इति॑। वि। स्क॒भा॒य॒ति॒। वृष्णः॑। पी॒त्वा। मदे॑। उ॒क्थानि॑। शं॒स॒ति॒॥ ८॥

इ॒मं बि॑भर्मि॒ सुकृ॑तं ते अ॒ङ्कुशं येना॑रु॒जासि मघवञ्छफा॒रुजः॑।
अ॒स्मिन्त्सु ते॒ सव॑ने अस्त्वो॒क्य॑ं सुत इ॒ष्टौ मघ॑वन्बो॒ध्याभ॑गः॥ ९॥

इ॒मम्। बि॒भ॒र्मि॒। सु॒ऽकृ॑तम्। ते॒। अ॒ङ्कु॒शम्। येन॑। आ॒ऽरु॒जासि॑। म॒घ॒ऽव॒न्। श॒फ॒ऽआ॒रुजः॑।
अ॒स्मिन्। सु। ते॒। सव॑ने। अ॒स्तु॒। ओ॒क्य॑म्। सु॒ते। इ॒ष्टौ। म॒घ॒ऽव॒न्। बो॒धि॒। आ॒ऽभ॑गः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृषा। न। क्रुद्धः। पतयत्। रजःऽसु। आ। यः। अर्यऽपत्नीः। अकृणोत्। इमाः। अपः।
सः। सुन्वते। मघऽवा। जीरऽदानवे। अविन्दत्। ज्योतिः। मनवे। हविष्मते॥ ८॥

उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत्।
वि रोचतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शुशुचीत सत्पतिः॥ ९॥

उत्। जायताम्। परशुः। ज्योतिषा। सह। भूयाः। ऋतस्य। सुऽदुघा। पुराणऽवत्।
वि। रोचताम्। अरुषः। भानुना। शुचिः। स्वः। न। शुक्रम्। शुशुचीत। सत्ऽपतिः॥ ९॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम्।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम॥ १०॥

गोभिः। तरेम। अमतिम्। दुःऽएवाम्। यवेन। क्षुधम्। पुरुऽहूत। विश्वाम्।
वयम्। राजऽभिः। प्रथमाः। धनानि। अस्माकेन। वृजनेन। जयेम॥ १०॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु॥ ११॥ [२५]

बृहस्पतिः। नः। परि। पातु। पश्चात्। उत। उत्ऽतरस्मात्। अधरात्। अघऽयोः।
इन्द्रः। पुरस्तात्। उत। मध्यतः। नः। सखा। सखिऽभ्यः। वरिवः। कृणोतु॥ ११॥

[४४] [११ कृष्ण आङ्गिरसः। इन्द्रः। जगती; १-३, १०-११ त्रिष्टुप्।]

आ यात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान्।
प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन॥ १॥

आ। यातु। इन्द्रः। स्वऽपतिः। मदाय। यः। धर्मणा। तूतुजानः। तुविष्मान्।
प्रऽत्वक्षाणः। अति। विश्वा। सहांसि। अपारेण। महता। वृष्ण्येन॥ १॥

सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि॥ २॥

सुऽस्थामा। रथः। सुऽयमा। हरी इति। ते। मिम्यक्ष। वज्रः। नृऽपते। गभस्तौ।
शीभम्। राजन्। सुऽपथा। आ। याहि। अर्वाङ्। वर्धाम। ते। पपुषः। वृष्ण्यानि॥ २॥

एन्द्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनम्।
प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहन्तु॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। इन्द्र॰वाहः। नृ॰पतिम्। वज्र॰बाहुम्। उग्रम्। उग्रासः। तविषासः। एनम्।
प्र॰त्वक्षसम्। वृषभम्। सत्य॰शुष्मम्। आ। ईम्। अस्म॰त्रा। सध॰मादः। वहन्तु॥ ३॥

एवा पतिं द्रोणसाचं सचेतसमूर्जः स्कम्भं धरुण आ वृषायसे।
ओजः कृष्व सं गृभाय त्वे अप्यसो यथा केनिपानामिनो वृधे॥ ४॥

एव। पतिम्। द्रोण॰साचम्। स॰चेतसम्। ऊर्जः। स्कम्भम्। धरुणे। आ। वृष॰यसे।
ओजः। कृष्व। सम्। गृभाय। त्वे इति। अपि। असः। यथा। के॰निपानाम्। इनः। वृधे॥ ४॥

गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः।
त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा॥ ५॥ [२६]

गमन्। अस्मे इति। वसूनि। आ। हि। शंसिषम्। सु॰आशिषम्। भरम्। आ। याहि। सोमिनः।
त्वम्। ईशिषे। सः। अस्मिन्। आ। सत्सि। बर्हिषि। अनाधृष्या। तव। पात्राणि। धर्मणा॥ ५॥

पृथक् प्रायन् प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा।
न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशन्त केपयः॥ ६॥

पृथक्। प्र। आयन्। प्रथमाः। देव॰हूतयः। अकृण्वत। श्रवस्यानि। दुस्तरा।
न। ये। शेकुः। यज्ञियाम्। नावम्। आ॰रुहम्। ईर्मा। एव। ते। नि। अविशन्त। केपयः॥ ६॥

एवैवापागपरे सन्तु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे।
इत्था ये प्रागुपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना॥ ७॥

एव। एव। अपाक्। अपरे। सन्तु। दुः॰ध्यः। अश्वाः। येषाम्। दुः॰युजः। आ॰युयुज्रे।
इत्था। ये। प्राक्। उपरे। सन्ति। दावने। पुरूणि। यत्र। वयुनानि। भोजना॥ ७॥

गिरीँरज्रान्रेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत्।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसयिथ॥ ८॥

गिरीन्। अज्रान्। रेजमानान्। अधारयत्। द्यौः। क्रन्दत्। अन्तरिक्षाणि। कोपयत्॥ समीचीने इति
सम्॰ईचीने। धिषणे इति। वि। स्कभायति। वृष्णः। पीत्वा। मदे। उक्थानि। शंसति॥ ८॥

इमं बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवञ्छफारुजः।
अस्मिन्त्सु ते सवने अस्त्वोक्यं सुत इष्टौ मघवन्बोध्याभगः॥ ९॥

इमम्। बिभर्मि। सु॰कृतम्। ते। अङ्कुशम्। येन। आ॰रुजासि। मघ॰वन्। शफ॰आरुजः।
अस्मिन्। सु। ते। सवने। अस्तु। ओक्यम्। सुते। इष्टौ। मघ॰वन्। बोधि। आ॰भगः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम्।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम॥ १०॥
गोभिः। तरेम। अमतिम्। दुःऽएवाम्। यवेन। क्षुधम्। पुरुऽहूत। विश्वाम्।
वयम्। राजऽभिः। प्रथमाः। धनानि। अस्माकेन। वृजनेन। जयेम॥ १०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु॥ ११॥ [२७]
बृहस्पतिः। नः। परि। पातु। पश्चात्। उत। उत्ऽतरस्मात्। अधरात्। अघऽयोः।
इन्द्रः। पुरस्तात्। उत। मध्यतः। नः। सखा। सखिऽभ्यः। वरिवः। कृणोतु॥ ११॥

[४५] [१२ वत्सप्रिर्भालन्दनः। अग्निः। त्रिष्टुप्।]

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः॥ १॥
दिवः। परि। प्रथमम्। जज्ञे। अग्निः। अस्मत्। द्वितीयम्। परि। जातऽवेदाः।
तृतीयम्। अप्ऽसु। नृऽमनाः। अजस्रम्। इन्धानः। एनम्। जरते। सुऽआधीः॥ १॥
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ॥ २॥
विद्म। ते। अग्ने। त्रेधा। त्रयाणि। विद्म। ते। धाम। विऽभृता। पुरुऽत्रा।
विद्म। ते। नाम। परमम्। गुहा। यत्। विद्म। तम्। उत्सम्। यतः। आऽजगन्थ॥ २॥
समुद्रे त्वा नृमणा अप्स्व१न्तर्नृचक्षा ईधे दिवो अग्न ऊधन्।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन्॥ ३॥
समुद्रे। त्वा। नृऽमनाः। अप्ऽसु। अन्तः। नृऽचक्षाः। ईधे। दिवः। अग्ने। ऊधन्।
तृतीये। त्वा। रजसि। तस्थिऽवांसम्। अपाम्। उपऽस्थे। महिषाः। अवर्धन्॥ ३॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥ ४॥
अक्रन्दत्। अग्निः। स्तनयन्ऽइव। द्यौः। क्षाम। रेरिहत्। वीरुधः। समऽअञ्जन्।
सद्यः। जज्ञानः। वि। हि। ईम्। इद्धः। अख्यत्। आ। रोदसी इति। भानुना। भाति। अन्तरिति॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः।
वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः॥ ५॥

श्रीणाम्। उत्ऽआरः। धरुणः। रयीणाम्। मनीषाणाम्। प्रऽअर्पणः। सोमऽगोपाः।
वसुः। सूनुः। सहसः। अप्ऽसु। राजा। वि। भाति। अग्रे। उषसाम्। इधानः॥ ५॥

विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः।
वीळुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च॥ ६॥ [२८]

विश्वस्य। केतुः। भुवनस्य। गर्भः। आ। रोदसी इति। अपृणात्। जायमानः।
वीळुम्। चित्। अद्रिम्। अभिनत्। पराऽयन्। जनाः। यत्। अग्निम्। अयजन्त। पञ्च॥ ६॥

उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन्॥ ७॥

उशिक्। पावकः। अरतिः। सुऽमेधाः। मर्तेषु। अग्निः। अमृतः। नि। धायि।
इयर्ति। धूमम्। अरुषम्। भरिभ्रत्। उत्। शुक्रेण। शोचिषा। द्याम्। इनक्षन्॥ ७॥

दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर्जनयत्सुरेताः॥ ८॥

दृशानः। रुक्मः। उर्विया। वि। अद्यौत्। दुःऽमर्षम्। आयुः। श्रिये। रुचानः।
अग्निः। अमृतः। अभवत्। वयःऽभिः। यत्। एनम्। द्यौः। जनयत्। सुऽरेताः॥ ८॥

यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ॥ ९॥

यः। ते। अद्य। कृणवत्। भद्रऽशोचे। अपूपम्। देव। घृतऽवन्तम्। अग्ने।
प्र। तम्। नय। प्रऽतरम्। वस्यः। अच्छ। अभि। सुम्नम्। देवऽभक्तम्। यविष्ठ॥ ९॥

आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः॥ १०॥

आ। तम्। भज। सौश्रवसेषु। अग्ने। उक्थेऽउक्थे। आ। भज। शस्यमाने।
प्रियः। सूर्ये। प्रियः। अग्ना। भवाति। उत्। जातेन। भिनदत्। उत्। जनिऽत्वैः॥ १०॥

त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वाम्। अ॒ग्ने॒। यज॑मानाः। अनु॑। द्यून्। विश्वा॑। वसु॑। द॒धि॒रे। वार्या॑णि।

त्वया॑। स॒ह। द्रवि॑णम्। इ॒च्छमा॑नाः। व्र॒जम्। गोऽम॑न्तम्। उ॒शिजः॑। वि। व॒व्रुः॥ ११॥

अस्ता॑व्य॒ग्निर्न॒रां सु॒शेवो॑ वैश्वान॒र ऋषि॑भिः॒ सोम॑गोपाः।

अ॒द्वे॒षे द्यावा॑पृथि॒वी हु॑वेम॒ देवा॑ ध॒त्त र॒यिम॒स्मे सु॒वीर॑म्॥ १२॥ [२९]

अस्ता॑वि। अ॒ग्निः। न॒राम्। सु॒ऽशेवः॑। वै॒श्वा॒न॒रः। ऋषि॑ऽभिः। सोम॑ऽगोपाः।

अ॒द्वे॒षे इति॑। द्यावा॑पृथि॒वी इति॑। हु॒वे॒म॒। देवाः॑। ध॒त्त। र॒यिम्। अ॒स्मे इति॑। सु॒ऽवीर॑म्॥ १२॥

इत्याश्वलायन-संहितायां

सप्तमाष्टकेऽष्टमोऽध्यायः समाप्तः॥

॥ समाप्तं च सप्तमाष्टकम्॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथाष्टमाष्टके प्रथमोऽध्यायः ॥

[४६] [१० वत्सप्रिर्भालन्दनः। अग्निः। त्रिष्टुप्।]

प्र होता जातो महान्नभोविन्नृषद्वा सीददपामुपस्थे।
दधिर्यो धायि स ते वयांसि यन्ता वसूनि विधते तनूपाः॥ १॥

प्र। होता। जातः। महान्। नभःऽवित्। नृऽसद्वा। सीदत्। अपाम्। उपऽस्थे।
दधिः। यः। धायि। सः। ते। वयांसि। यन्ता। वसूनि। विधते। तनूऽपाः॥ १॥

इमं विधन्तो अपां सधस्थे पशुं न नष्टं पदैरनु ग्मन्।
गुहा चतन्तमुशिजो नमोभिरिच्छन्तो धीरा भृगवोऽविन्दन्॥ २॥

इमम्। विधन्तः। अपाम्। सधऽस्थे। पशुम्। न। नष्टम्। पदैः। अनु। ग्मन्।
गुहा। चतन्तम्। उशिजः। नमःऽभिः। इच्छन्तः। धीराः। भृगवः। अविन्दन्॥ २॥

इमं त्रितो भूर्यविन्ददिच्छन्वैभूवसो मूर्धन्यघ्न्यायाः।
स शेवृधो जात आ हर्म्येषु नाभिर्युवा भवति रोचनस्य॥ ३॥

इमम्। त्रितः। भूरि। अविन्दत्। इच्छन्। वैभुऽवसः। मूर्धनि। अघ्न्यायाः।
सः। शेऽवृधः। जातः। आ। हर्म्येषु। नाभिः। युवा। भवति। रोचनस्य॥ ३॥

मन्द्रं होतारमुशिजो नमोभिः प्राञ्चं यज्ञं नेतारमध्वराणाम्।
विशामकृण्वन्नरतिं पावकं हव्यवाहं दधतो मानुषेषु॥ ४॥

मन्द्रम्। होतारम्। उशिजः। नमःऽभिः। प्राञ्चम्। यज्ञम्। नेतारम्। अध्वराणाम्।
विशाम्। अकृण्वन्। अरतिम्। पावकम्। हव्यऽवाहम्। दधतः। मानुषेषु॥ ४॥

प्र भूर्जयन्तं महां विपोधां मूरा अमूरं पुरां दर्माणम्।
नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनर्चम्॥ ५॥ [१]

प्र। भूः। जयन्तम्। महाम्। विपःऽधाम्। मूराः। अमूरम्। पुराम्। दर्माणम्।
नयन्तः। गर्भम्। वनाम्। धियम्। धुः। हिरिऽश्मश्रुम्। न। अर्वाणम्। धनऽअर्चम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नि पुस्त्यासु त्रितः स्तभूयन्परिवीतो योनौ सीददन्तः।
अतः संगृभ्या विशां दमूना विधर्मणायन्त्रैरीयते नॄन्॥ ६॥

नि। पुस्त्यासु। त्रितः। स्तभुऽयन्। परिऽवीतः। योनौ। सीदत्। अन्तरिति।
अतः। सम्ऽगृभ्य। विशाम्। दमूनाः। विऽधर्मणा। अयन्त्रैः। ईयते। नॄन्॥ ६॥

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः॥ ७॥

अस्य। अजरासः। दमाम्। अरित्राः। अर्चत्ऽधूमासः। अग्नयः। पावकाः।
श्वितीचयः। श्वात्रासः। भुरण्यवः। वनऽसदः। वायवः। न। सोमाः॥ ७॥

प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः।
तमायवः शुचयन्तं पावकं मन्द्रं होतारं दधिरे यजिष्ठम्॥ ८॥

प्र। जिह्वया। भरते। वेपः। अग्निः। प्र। वयुनानि। चेतसा। पृथिव्याः।
तम्। आयवः। शुचयन्तम्। पावकम्। मन्द्रम्। होतारम्। दधिरे। यजिष्ठम्॥ ८॥

द्यावा यमग्निं पृथिवी जनिष्टामापस्त्वष्टा भृगवो यं सहोभिः।
ईळेन्यं प्रथमं मातरिश्वा देवास्ततक्षुर्मनवे यजत्रम्॥ ९॥

द्यावा। यम्। अग्निम्। पृथिवी इति। जनिष्टाम्। आपः। त्वष्टा। भृगवः। यम्। सहःऽभिः।
ईळेन्यम्। प्रथमम्। मातरिश्वा। देवाः। ततक्षुः। मनवे। यजत्रम्॥ ९॥

यं त्वा देवा दधिरे हव्यवाहं पुरुस्पृहो मानुषासो यजत्रम्।
स यामन्नग्ने स्तुवते वयो धाः प्र देवयन् यशसः सं हि पूर्वीः॥ १०॥ [२]

यम्। त्वा। देवाः। दधिरे। हव्यऽवाहम्। पुरुऽस्पृहः। मानुषासः। यजत्रम्।
सः। यामन्। अग्ने। स्तुवते। वयः। धाः। प्र। देवऽयन्। यशसः। सम्। हि। पूर्वीः॥ १०॥

[४७] [८ सप्तगुराङ्गिरसः। वैकुण्ठ इन्द्रः। त्रिष्टुप्।]

जगृभ्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम्।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः॥ १॥

जगृभ्म। ते। दक्षिणम्। इन्द्र। हस्तम्। वसुऽयवः। वसुऽपते। वसूनाम्।
विद्म। हि। त्वा। गोऽपतिम्। शूर। गोमान्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम्।

चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः॥ २॥

सु॒ऽआयुधम्। सु॒ऽअवसम्। सु॒ऽनीथम्। चतुःऽसमुद्रम्। धरुणम्। रयीणाम्।

चर्कृत्यम्। शंस्यम्। भूरिऽवारम्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ २॥

सुब्रह्माणं देववन्तं बृहन्तमुरुं गभीरं पृथुबुध्नमिन्द्र।

श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः॥ ३॥

सु॒ऽब्रह्माणम्। देवऽवन्तम्। बृहन्तम्। उरुम्। गभीरम्। पृथुऽबुध्नम्। इन्द्र।

श्रुतऽऋषिम्। उग्रम्। अभिमातिऽसहम्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ ३॥

सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम्।

दस्युहनं पूर्भिदमिन्द्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः॥ ४॥

सनत्ऽवाजम्। विप्रऽवीरम्। तरुत्रम्। धनऽस्पृतम्। शूशुऽवांसम्। सुऽदक्षम्।

दस्युऽहनम्। पूःऽभिदम्। इन्द्र। सत्यम्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ ४॥

अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र।

भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः॥ ५॥ [३]

अश्वऽवन्तम्। रथिनम्। वीरऽवन्तम्। सहस्रिणम्। शतिनम्। वाजम्। इन्द्र।

भद्रऽव्रातम्। विप्रऽवीरम्। स्वःऽसाम्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ ५॥

प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति।

य आङ्गिरसो नमसोपसद्योऽस्मभ्यं चित्रं वृषणं रयिं दाः॥ ६॥

प्र। सप्तऽगुम्। ऋतऽधीतिम्। सुऽमेधाम्। बृहस्पतिम्। मतिः। अच्छ। जिगाति।

यः। आङ्गिरसः। नमसा। उपऽसद्यः। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ ६॥

वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः।

हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः॥ ७॥

वनीवानः। मम। दूतासः। इन्द्रम्। स्तोमाः। चरन्ति। सुऽमतीः। इयानाः।

हृदिऽस्पृशः। मनसा। वच्यमानाः। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ ७॥

यत्त्वा यामि दद्धि तन्न इन्द्र बृहन्तं क्षयमसमं जनानाम्।

अभि तद्द्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दाः॥ ८॥ [४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्। त्वा। यामि। दुद्धि। तत्। नः। इन्द्र। बृहन्तम्। क्षयम्। असमम्। जनानाम्।

अभि। तत्। द्यावापृथिवी इति। गृणीताम्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दाः॥ ८॥

[४८] [११ वैकुण्ठ इन्द्रः। इन्द्रः। जगती; ७, १०-११ त्रिष्टुभः।]

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः।

मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम्॥ १॥

अहम्। भुवम्। वसुनः। पूर्व्यः। पतिः। अहम्। धनानि। सम्। जयामि। शश्वतः।

माम्। हवन्ते। पितरम्। न। जन्तवः। अहम्। दाशुषे। वि। भजामि। भोजनम्॥ १॥

अहमिन्द्रो रोधो वक्षो अथर्वणस्त्रिताय गा अजनयमहेरधि।

अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे मातरिश्वने॥ २॥

अहम्। इन्द्रः। रोधः। वक्षः। अथर्वणः। त्रिताय। गाः। अजनयम्। अहेः। अधि।

अहम्। दस्युऽभ्यः। परि। नृम्णम्। आ। ददे। गोत्रा। शिक्षन्। दधीचे। मातरिश्वने॥ २॥

मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुम्।

ममानीकं सूर्यस्येव दुष्टरं मामार्यन्ति कृतेन कर्त्वेन च॥ ३॥

मह्यम्। त्वष्टा। वज्रम्। अतक्षत्। आयसम्। मयि। देवासः। अवृजन्। अपि। क्रतुम्।

मम। अनीकम्। सूर्यस्यऽइव। दुस्तरम्। माम्। आर्यन्ति। कृतेन। कर्त्वेन। च॥ ३॥

अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययम्।

पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः॥ ४॥

अहम्। एतम्। गव्ययम्। अश्व्यम्। पशुम्। पुरीषिणम्। सायकेन। हिरण्ययम्।

पुरु। सहस्रा। नि। शिशामि। दाशुषे। यत्। मा। सोमासः। उक्थिनः। अमन्दिषुः॥ ४॥

अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवेऽव तस्थे कदा चन।

सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन॥ ५॥ [५]

अहम्। इन्द्रः। न। परा। जिग्ये। इत्। धनम्। न। मृत्यवे। अव। तस्थे। कदा। चन।

सोमम्। इत्। मा। सुन्वन्तः। याचत। वसु। न। मे। पूरवः। सख्ये। रिषाथन॥ ५॥

अहमेताञ्छाश्वसतो द्वाद्वेन्द्रं ये वज्रं युधयेऽकृण्वत।

आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्नमस्युर्नमस्विनः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अहम्। एतान्। शाश्वसतः। द्वाद्वा। इन्द्रम्। ये। वज्रम्। युधये। अकृण्वत।
आऽह्वयमानान्। अव। हन्मना। अहनम्। दृळ्हा। वदन्। अनमस्युः। नमस्विनः॥ ६॥

अभीदमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करन्ति।
खले न पर्षान् प्रति हन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः॥ ७॥

अभि। इदम्। एकम्। एकः। अस्मि। निष्षाट्। अभि। द्वा। किम्। ऊँ इति। त्रयः। करन्ति।
खले। न। पर्षान्। प्रति। हन्मि। भूरि। किम्। मा। निन्दन्ति। शत्रवः। अनिन्द्राः॥ ७॥

अहं गुङ्गुभ्यो अतिथिग्वमिष्करमिषं न वृत्रतुरं विक्षु धारयम्।
यत्पर्णयघ्न उत वा करञ्जहे प्राहं महे वृत्रहत्ये अशुश्रवि॥ ८॥

अहम्। गुङ्गुऽभ्यः। अतिथिऽग्वम्। इष्करम्। इषम्। न। वृत्रऽतुरम्। विक्षु। धारयम्।
यत्। पर्णयऽघ्ने। उत। वा। करञ्जऽहे। प्र। अहम्। महे। वृत्रऽहत्ये। अशुश्रवि॥ ८॥

प्र मे नमी साप्य इषे भुजे भूद्गवामेषे सख्या कृणुत द्विता।
दिद्युं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करम्॥ ९॥

प्र। मे। नमी। साप्यः। इषे। भुजे। भूत्। गवाम्। एषे। सख्या। कृणुत। द्विता।
दिद्युम्। यत्। अस्य। सम्ऽइथेषु। मंहयम्। आत्। इत्। एनम्। शंस्यम्। उक्थ्यम्। करम्॥ ९॥

प्र नेमस्मिन्ददृशे सोमो अन्तर्गोपा नेममाविरस्था कृणोति।
स तिग्मशृङ्गं वृषभं युयुत्सन् द्रुहस्तस्थौ बहुले बद्धो अन्तः॥ १०॥

प्र। नेमस्मिन्। ददृशे। सोमः। अन्तः। गोपाः। नेमम्। आविः। अस्था। कृणोति।
सः। तिग्मऽशृङ्गम्। वृषभम्। युयुत्सन्। द्रुहः। तस्थौ। बहुले। बद्धः। अन्तरिति॥ १०॥

आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम।
ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हम्॥ ११॥ [६]

आदित्यानाम्। वसूनाम्। रुद्रियाणाम्। देवः। देवानाम्। न। मिनामि। धाम।
ते। मा। भद्राय। शवसे। ततक्षुः। अपराऽजितम्। अस्तृतम्। अषाळ्हम्॥ ११॥

[४९] [११ वैकुण्ठ इन्द्रः। इन्द्रः। जगती; २, ११ त्रिष्टुभौ।]

अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनम्।
अहं भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन्भरे॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अहम्। दाम्। गृणते। पूर्व्यम्। वसु। अहम्। ब्रह्म। कृणवम्। मह्यम्। वर्धनम्।

अहम्। भुवम्। यजमानस्य। चोदिता। अयज्वनः। साक्षि। विश्वस्मिन्। भरे॥ १॥

मां धुरिन्द्रं नाम देवता दिवश्च ग्मश्चापां च जन्तवः।

अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्ण्वा ददे॥ २॥

माम्। धुः। इन्द्रम्। नाम। देवता। दिवः। च। ग्मः। च। अपाम्। च। जन्तवः।

अहम्। हरी इति। वृषणा। विऽव्रता। रघू इति। अहम्। वज्रम्। शवसे। धृष्णु। आ। ददे॥ २॥

अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः।

अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे॥ ३॥

अहम्। अत्कम्। कवये। शिश्नथम्। हथैः। अहम्। कुत्सम्। आवम्। आभिः। ऊतिऽभिः।

अहम्। शुष्णस्य। श्नथिता। वधः। यमम्। न। यः। ररे। आर्यम्। नाम। दस्यवे॥ ३॥

अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम्।

अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे॥ ४॥

अहम्। पिताऽइव। वेतसून्। अभिष्टये। तुग्रम्। कुत्साय। स्मत्ऽइभम्। च। रन्धयम्।

अहम्। भुवम्। यजमानस्य। राजनि। प्र। यत्। भरे। तुजये। न। प्रिया। आऽधृषे॥ ४॥

अहं रन्धयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक्।

अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरन्धयम्॥ ५॥ [७]

अहम्। रन्धयम्। मृगयम्। श्रुतर्वणे। यत्। मा। अजिहीत। वयुना। चन। आनुषक्।

अहम्। वेशम्। नम्रम्। आयवे। अकरम्। अहम्। सव्याय। पट्ऽगृभिम्। अरन्धयम्॥ ५॥

अहं स यो नववास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम्।

यद्वर्धयन्तं प्रथयन्तमानुषग्दूरे पारे रजसो रोचनाकरम्॥ ६॥

अहम्। सः। यः। नवऽवास्त्वम्। बृहत्ऽरथम्। सम्। वृत्राऽइव। दासम्। वृत्रऽहा। अरुजम्।

यत्। वर्धयन्तम्। प्रथयन्तम्। आनुषक्। दूरे। पारे। रजसः। रोचना। अकरम्॥ ६॥

अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा।

यन्मा सावो मनुष आह निर्णिज ऋधक्कृषे दासं कृत्व्यं हथैः॥ ७॥

अहम्। सूर्यस्य। परि। यामि। आशुऽभिः। प्र। एतशेभिः। वहमानः। ओजसा।

यत्। मा। सावः। मनुषः। आह। निःऽनिजे। ऋधक्। कृषे। दासम्। कृत्व्यम्। हथैः॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अहं सप्तहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुम्।
अहं न्य१न्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयम्॥ ८॥
अहम्। सप्तऽहा। नहुषः। नहुःऽतरः। प्र। अश्रवयम्। शवसा। तुर्वशम्। यदुम्।
अहम्। नि। अन्यम्। सहसा। सहः। करम्। नव। व्राधतः। नवतिम्। च। वक्षयम्॥ ८॥
अहं सप्त स्रवतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि।
अहमर्णांसि वि तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टये॥ ९॥
अहम्। सप्त। स्रवतः। धारयम्। वृषा। द्रवित्न्वः। पृथिव्याम्। सीराः। अधि।
अहम्। अर्णांसि। वि। तिरामि। सुऽक्रतुः। युधा। विदम्। मनवे। गातुम्। इष्टये॥ ९॥
अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत्।
स्पार्हं गवामूधःसु वक्षणास्वा मधोर्मधु श्वात्र्यं सोममाशिरम्॥ १०॥
अहम्। तत्। आसु। धारयम्। यत्। आसु। न। देवः। चन। त्वष्टा। अधारयत्। रुशत्।
स्पार्हम्। गवाम्। ऊधःऽसु। वक्षणासु। आ। मधोः। मधु। श्वात्र्यम्। सोमम्। आऽशिरम्॥ १०॥
एवा देवाँ इन्द्रो विव्ये नॄन् प्र च्यौत्नेन मघवा सत्यराधाः।
विश्वेत्ता ते हरिवः शचीवोऽभि तुरासः स्वयशो गृणन्ति॥ ११॥ [८]
एव। देवान्। इन्द्रः। विव्ये। नॄन्। प्र। च्यौत्नेन। मघऽवा। सत्यऽराधाः।
विश्वा। इत्। ता। ते। हरिऽवः। शचीऽवः। अभि। तुरासः। स्वऽयशः। गृणन्ति॥ ११॥

[५०] [७ वैकुण्ठ इन्द्रः। इन्द्रः। जगती; ३, ४ अभिसारिण्यौ, ५ त्रिष्टुप्।]

प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः॥ १॥
प्र। वः। महे। मन्दमानाय। अन्धसः। अर्च। विश्वानराय। विश्वऽभुवे।
इन्द्रस्य। यस्य। सुऽमखम्। सहः। महि। श्रवः। नृम्णम्। च। रोदसी इति। सपर्यतः॥ १॥
सो चिन्नु सख्या नर्य इनः स्तुतश्चर्कृत्य इन्द्रो मावते नरे।
विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मन्दसे॥ २॥
सः। चित्। नु। सख्या। नर्यः। इनः। स्तुतः। चर्कृत्यः। इन्द्रः। माऽवते। नरे।
विश्वासु। धूःऽसु। वाजऽकृत्येषु। सत्ऽपते। वृत्रे। वा। अप्ऽसु। अभि। शूर। मन्दसे॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

के ते नर इन्द्र ये त इषे ये ते सुम्नं सधन्य१मियक्षान्।
के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ॥ ३ ॥
के। ते। नरः। इन्द्र। ये। ते। इषे। ये। ते। सुम्नम्। सऽधन्यम्। इयक्षान्।
के। ते। वाजाय। असुर्याय। हिन्विरे। के। अप्ऽसु। स्वासु। उर्वरासु। पौंस्ये ॥ ३ ॥
भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः।
भुवो नृँश्च्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ॥ ४ ॥
भुवः। त्वम्। इन्द्र। ब्रह्मणा। महान्। भुवः। विश्वेषु। सवनेषु। यज्ञियः।
भुवः। नॄन्। च्यौत्नः। विश्वस्मिन्। भरे। ज्येष्ठः। च। मन्त्रः। विश्वऽचर्षणे ॥ ४ ॥
अवा नु कं ज्यायान् यज्ञवनसो महीं त ओमात्रां कृष्टयो विदुः।
असो नु कमजरो वर्धाश्च विश्वेदेता सवना तूतुमा कृषे ॥ ५ ॥
अव। नु। कम्। ज्यायान्। यज्ञऽवनसः। महीम्। ते। ओमात्राम्। कृष्टयः। विदुः।
असः। नु। कम्। अजरः। वर्धाः। च। विश्वा। इत्। एता। सवना। तूतुमा। कृषे ॥ ५ ॥
एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे।
वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो ब्रह्मोद्यतं वचः ॥ ६ ॥
एता। विश्वा। सवना। तूतुमा। कृषे। स्वयम्। सूनो इति। सहसः। यानि। दधिषे।
वराय। ते। पात्रम्। धर्मणे। तना। यज्ञः। मन्त्रः। ब्रह्म। उत्ऽयतम्। वचः ॥ ६ ॥
ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने।
प्र ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यान्धसः ॥ ७ ॥ [९]
ये। ते। विप्र। ब्रह्मऽकृतः। सुते। सचा। वसूनाम्। च। वसुनः। च। दावने।
प्र। ते। सुम्नस्य। मनसा। पथा। भुवन्। मदे। सुतस्य। सोम्यस्य। अन्धसः ॥ ७ ॥

[५१] [(९) १, ३, ५, ७, ९ देवाः, २, ४, ६, ८ सौचीकोऽग्निः।
२, ४, ६, ८ देवाः, १, ३, ५, ७, ९ अग्निः। त्रिष्टुप्।]

महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः।
विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ॥ १ ॥
महत्। तत्। उल्बम्। स्थविरम्। तत्। आसीत्। येन। आऽविष्टितः। प्रऽविवेशिथ। अपः।
विश्वाः। अपश्यत्। बहुधा। ते। अग्ने। जातऽवेदः। तन्वः। देव। एकः ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

को मा॑ ददर्श कत॒मः स दे॒वो यो मे॑ त॒न्वो॑ बहु॒धा प॒र्यप॑श्यत्।
क्वाह॑ मित्रावरुणा क्षियन्त्य॒ग्नेर्विश्वा॑ः स॒मिधो॑ देव॒यानी॑ः॥ २॥

कः। मा॒। द॒द॒र्श॒। क॒त॒मः। सः। दे॒वः। यः। मे॒। त॒न्वः॑। ब॒हु॒धा। प॒रि॒॰अप॑श्यत्।
क्व॑। अह॑। मि॒त्रा॒व॒रु॒णा॒। क्षि॒य॒न्ति॒। अ॒ग्नेः। विश्वा॑ः। स॒म्॰इधः॑। दे॒व॒॰यानी॑ः॥ २॥

ऐच्छा॑म त्वा बहु॒धा जा॑तवेदः॒ प्रवि॑ष्टमग्ने अ॒प्स्वोष॑धीषु।
तं त्वा॑ य॒मो अ॑चिकेच्चित्रभानो दशान्तरु॒ष्याद॑ति॒रोच॑मानम्॥ ३॥

ऐच्छा॑म। त्वा॒। ब॒हु॒धा। जा॒त॒॰वे॒दः॒। प्र॰वि॑ष्टम्। अ॒ग्ने॒। अ॒प्॰सु। ओष॑धीषु॥ तम्। त्वा॒।
य॒मः। अ॒चि॒के॒त्। चि॒त्र॒भा॒नो॒ इति॑ चित्र॰भानो। द॒श॒॰अ॒न्त॒रु॒ष्यात्। अ॒ति॒॰रोच॑मानम्॥ ३॥

हो॒त्राद॒हं व॑रुण॒ बिभ्य॑दाय॒ं नेदे॒व मा॑ यु॒नज॒न्नत्र॑ दे॒वाः।
तस्य॑ मे त॒न्वो॑ बहु॒धा निवि॑ष्टा ए॒तमर्थं॒ न चि॑केता॒हम॒ग्निः॥ ४॥

हो॒त्रात्। अ॒हम्। व॒रु॒ण॒। बिभ्य॑त्। आ॒य॒म्। न। इत्। ए॒व। मा॒। यु॒नज॑न्। अत्र॑। दे॒वाः।
तस्य॑। मे॒। त॒न्वः॑। ब॒हु॒धा। नि॰वि॑ष्टाः। ए॒तम्। अर्थ॑म्। न। चि॒के॒त॒। अ॒हम्। अ॒ग्निः॥ ४॥

एहि॒ मनु॑र्देव॒युर्य॒ज्ञका॑मोऽरं॒कृत्या॒ तम॑सि क्षेष्यग्ने।
सु॒गान्प॒थः कृ॑णुहि देव॒याना॒न्वह॑ ह॒व्यानि॑ सुमन॒स्यमा॑नः॥ ५॥ [१०]

आ। इ॒हि॒। मनु॑ः। दे॒व॒॰युः। य॒ज्ञ॰का॑मः। अ॒र॒म्॰कृत्य॑। तम॑सि। क्षे॒षि॒। अ॒ग्ने॒।
सु॒॰गान्। प॒थः। कृ॒णु॒हि॒। दे॒व॒॰याना॑न्। वह॑। ह॒व्यानि॑। सु॒॰म॒न॒स्यमा॑नः॥ ५॥

अ॒ग्नेः पूर्वे॒ भ्रात॑रो॒ अर्थ॑मे॒तं र॒थीवाध्वा॑न॒मन्वाव॑रीवुः।
तस्मा॑द्भि॒या व॑रुण दू॒रमा॑यं गौ॒रो न क्षे॒प्नोर॑विजे॒ ज्याया॑ः॥ ६॥

अ॒ग्नेः। पूर्वे॑। भ्रात॑रः। अर्थ॑म्। ए॒तम्। र॒थीऽइ॑व। अध्वा॑नम्। अनु॑। आ। अ॒व॒री॒वु॒रिति॑।
तस्मा॑त्। भि॒या। व॒रु॒ण॒। दू॒रम्। आ॒य॒म्। गौ॒रः। न। क्षे॒प्नोः। अ॒वि॒जे॒। ज्याया॑ः॥ ६॥

कु॒र्मस्त॒ आयु॑र॒जरं॒ यद॑ग्ने॒ यथा॑ यु॒क्तो जा॑तवेदो॒ न रिष्या॑ः।
अथा॑ वहासि सुमन॒स्यमा॑नो भा॒गं दे॒वेभ्यो॑ ह॒विषः॑ सुजात॥ ७॥

कु॒र्मः। ते॒। आयु॑ः। अ॒जर॑म्। यत्। अ॒ग्ने॒। यथा॑। यु॒क्तः। जा॒त॒॰वे॒दः॒। न। रिष्या॑ः।
अथ॑। व॒हा॒सि॒। सु॒॰म॒न॒स्यमा॑नः। भा॒गम्। दे॒वेभ्य॑ः। ह॒विष॑ः। सु॒॰जा॒त॒॥ ७॥

प्र॒या॒जान्मे॑ अनुया॒जाँश्च॒ केव॑ला॒नूर्ज॑स्वन्तं ह॒विषो॑ दत्त भा॒गम्।
घृ॒तं चा॒पां पुरु॑षं॒ चौष॑धीनाम॒ग्नेश्च॑ दी॒र्घमायु॑रस्तु देवाः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रऽयाजान्। मे। अनुऽयाजान्। च। केवलान्। ऊर्जस्वन्तम्। हविषः। दत्त। भागम्।
घृतम्। च। अपाम्। पुरुषम्। च। ओषधीनाम्। अग्नेः। च। दीर्घम्। आयुः। अस्तु। देवाः॥ ८॥
तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः।
तवाग्ने यज्ञो३यमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः॥ ९॥ [११]
तव। प्रऽयाजाः। अनुऽयाजाः। च। केवले। ऊर्जस्वन्तः। हविषः। सन्तु। भागाः।
तव। अग्ने। यज्ञः। अयम्। अस्तु। सर्वः। तुभ्यम्। नमन्ताम्। प्रऽदिशः। चतस्रः॥ ९॥

[५२] [६ सौचीकोऽग्निः। विश्वे देवाः। त्रिष्टुप्।]

विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि॥ १॥
विश्वे। देवाः। शास्तन। मा। यथा। इह। होता। वृतः। मनवै। यत्। निऽसद्य।
प्र। मे। ब्रूत। भागऽधेयम्। यथा। वः। येन। पथा। हव्यम्। आ। वः। वहानि॥ १॥
अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम्॥ २॥
अहम्। होता। नि। असीदम्। यजीयान्। विश्वे। देवाः। मरुतः। मा। जुनन्ति॥ अहः:२अहः।
अश्विना। आध्वर्यवम्। वाम्। ब्रह्मा। सम्ऽइत्। भवति। सा। आऽहुतिः। वाम्॥ २॥
अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः।
अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम्॥ ३॥
अयम्। यः। होता। किः। ऊँ इति। सः। यमस्य। कम्। अपि। ऊहे। यत्। सम्ऽअञ्जन्ति।
देवाः॥ अहः:२अहः। जायते। मासिऽमासि। अथ। देवाः। दधिरे। हव्यऽवाहम्॥ ३॥
मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम्।
अग्निर्विद्वान्यज्ञं नः कल्पयाति पञ्चयामं त्रिवृतं सप्ततन्तुम्॥ ४॥
माम्। देवाः। दधिरे। हव्यऽवाहम्। अपऽम्लूक्तम्। बहु। कृच्छ्रा। चरन्तम्।
अग्निः। विद्वान्। यज्ञम्। नः। कल्पयाति। पञ्चऽयामम्। त्रिऽवृतम्। सप्तऽतन्तुम्॥ ४॥
आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि।
आ बाह्वोर्वज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। वः। यक्षि। अमृत॰त्वम्। सु॰वीरम्। यथा। वः। देवाः। वरिवः। कराणि।

आ। बाह्वोः। वज्रम्। इन्द्रस्य। धेयाम्। अथ। इमाः। विश्वाः। पृतनाः। जयाति॥ ५॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्।

औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त॥ ६॥ [१२]

त्रीणि। शता। त्री। सहस्राणि। अग्निम्। त्रिंशत्। च। देवाः। नव। च। असपर्यन्।

औक्षन्। घृतैः। अस्तृणन्। बर्हिः। अस्मै। आत्। इत्। होतारम्। नि। असादयन्त॥ ६॥

[५३] [११ देवाः, ४-५ सौचीकोऽग्निः। अग्निः, ४-५ देवाः।
१-५, ८ त्रिष्टुभः, ६-७, ९-११ जगत्य।]

यमैच्छाम मनसा सो३यमागाद्यज्ञस्य विद्वान् परुषश्चिकित्वान्।

स नो यक्षद्देवताता यजीयान्नि षत्सदन्तरः पूर्वो अस्मत्॥ १॥

यम्। ऐच्छाम्। मनसा। सः। अयम्। आ। अगात्। यज्ञस्य। विद्वान्। परुषः। चिकित्वान्।

सः। नः। यक्षत्। देव॰ताता। यजीयान्। नि। हि। सत्सत्। अन्तरः। पूर्वः। अस्मत्॥ १॥

अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत्।

यजामहै यज्ञियान् हन्त देवाँ ईळामहा ईड्याँ आज्येन॥ २॥

अराधि। होता। नि॰सदा। यजीयान्। अभि। प्रयांसि। सु॰धितानि। हि। ख्यत्।

यजामहै। यज्ञियान्। हन्त। देवान्। ईळामहै। ईड्यान्। आज्येन॥ २॥

साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम्।

स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य॥ ३॥

साध्वीम्। अकः। देव॰वीतिम्। नः। अद्य। यज्ञस्य। जिह्वाम्। अविदाम। गुह्याम्।

सः। आयुः। आ। अगात्। सुरभिः। वसानः। भद्राम्। अकः। देव॰हूतिम्। नः। अद्य॥ ३॥

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम।

ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम्॥ ४॥

तत्। अद्य। वाचः। प्रथमम्। मसीय। येन। असुरान्। अभि। देवाः। असाम।

ऊर्ज॰अदः। उत। यज्ञियासः। पञ्च। जनाः। मम। होत्रम्। जुषध्वम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पञ्च जना मम होत्रं जुषन्तां गोजाता उत ये यज्ञियासः।

पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान्॥ ५॥ [१३]

पञ्च। जनाः। मम। होत्रम्। जुषन्ताम्। गोऽजाताः। उत। ये। यज्ञियासः।

पृथिवी। नः। पार्थिवात्। पातु। अंहसः। अन्तरिक्षम्। दिव्यात्। पातु। अस्मान्॥ ५॥

तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान्।

अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम्॥ ६॥

तन्तुम्। तन्वन्। रजसः। भानुम्। अनु। इहि। ज्योतिष्मतः। पथः। रक्ष। धिया। कृतान्।

अनुल्बणम्। वयत। जोगुवाम्। अपः। मनुः। भव। जनय। दैव्यम्। जनम्॥ ६॥

अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत।

अष्टावन्धुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियम्॥ ७॥

अक्षऽनहः। नह्यतन। उत। सोम्याः। इष्कृणुध्वम्। रशनाः। आ। उत। पिंशत।

अष्टाऽवन्धुरम्। वहत। अभितः। रथम्। येन। देवासः। अनयन्। अभि। प्रियम्॥ ७॥

अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः।

अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान्॥ ८॥

अश्मन्ऽवती। रीयते। सम्। रभध्वम्। उत्। तिष्ठत। प्र। तरत। सखायः।

अत्र। जहाम। ये। असन्। अशेवाः। शिवान्। वयम्। उत्। तरेम। अभि। वाजान्॥ ८॥

त्वष्टा माया वेदपसामपस्तमो बिभ्रत्पात्रा देवपानानि शंतमा।

शिशीते नूनं परशुं स्वायसं येन वृश्चादेतशो ब्रह्मणस्पतिः॥ ९॥

त्वष्टा। मायाः। वेत्। अपसाम्। अपःऽतमः। बिभ्रत्। पात्रा। देवऽपानानि। शम्ऽतमा।

शिशीते। नूनम्। परशुम्। सुऽआयसम्। येन। वृश्चात्। एतशः। ब्रह्मणः। पतिः॥ ९॥

सतो नूनं कवयः सं शिशीत वाशीभिर्याभिरमृताय तक्षथ।

विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः॥ १०॥

सतः। नूनम्। कवयः। सम्। शिशीत। वाशीभिः। याभिः। अमृताय। तक्षथ।

विद्वांसः। पदा। गुह्यानि। कर्तन। येन। देवासः। अमृतऽत्वम्। आनशुः॥ १०॥

गर्भे योषामदधुर्वत्समासन्यपीच्येन मनसोत जिह्वया।

स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते कार इज्जितिम्॥ ११॥ [१४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गर्भे। योषाम्। अदधुः। वत्सम्। आसनि। अपीच्येन। मनसा। उत। जिह्वया।
सः। विश्वाहा। सुऽमनाः। योग्याः। अभि। सिसासनिः। वनते। कारः। इत्। जितिम्॥ ११॥

[५४] [६ बृहदुक्थो वामदेव्यः। इन्द्रः। त्रिष्टुप्।]

तां सु ते कीर्तिं मघवन्महित्वा यत्त्वा भीते रोदसी अह्वयेताम्।
प्रावो देवाँ आतिरो दासमोजः प्रजायै त्वस्यै यदशिक्ष इन्द्र॥ १॥
ताम्। सु। ते। कीर्तिम्। मघऽवन्। महिऽत्वा। यत्। त्वा। भीते इति। रोदसी इति। अह्वयेताम्।
प्र। आवः। देवान्। आ। अतिरः। दासम्। ओजः। प्रऽजायै। त्वस्यै। यत्। अशिक्षः। इन्द्र॥ १॥
यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु।
मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से॥ २॥
यत्। अचरः। तन्वा। ववृधानः। बलानि। इन्द्र। प्रऽब्रुवाणः। जनेषु।
माया। इत्। सा। ते। यानि। युद्धानि। आहुः। न। अद्य। शत्रुम्। ननु। पुरा। विवित्से॥ २॥
क उ नु ते महिमनः समस्यास्मत्पूर्व ऋषयोऽन्तमापुः।
यन्मातरं च पितरं च साकमजनयथास्तन्वः१ः स्वायाः॥ ३॥
के। ऊँ इति। नु। ते। महिमनः। समस्य। अस्मत्। पूर्वे। ऋषयः। अन्तम्। आपुः।
यत्। मातरम्। च। पितरम्। च। साकम्। अजनयथाः। तन्वः। स्वायाः॥ ३॥
चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य सन्ति।
त्वमङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ॥ ४॥
चत्वारि। ते। असुर्याणि। नाम। अदाभ्यानि। महिषस्य। सन्ति।
त्वम्। अङ्ग। तानि। विश्वानि। वित्से। येभिः। कर्माणि। मघऽवन्। चकर्थ॥ ४॥
त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि।
काममिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिन्द्रासि दाता॥ ५॥
त्वम्। विश्वा। दधिषे। केवलानि। यानि। आविः। या। च। गुहा। वसूनि।
कामम्। इत्। मे। मघऽवन्। मा। वि। तारीः। त्वम्। आऽज्ञाता। त्वम्। इन्द्र। असि। दाता॥ ५॥
यो अदधाज्ज्योतिषि ज्योतिरन्तर्यो असृजन्मधुना सं मधूनि।
अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः। अदधात्। ज्योतिषि। ज्योतिः। अन्तः। यः। असृजत्। मधुना। सम्। मधूनि।
अध। प्रियम्। शूषम्। इन्द्राय। मन्म। ब्रह्मऽकृतः। बृहत्ऽउक्थात्। अवाचि॥ ६॥

[५५] [८ बृहदुक्थो वामदेव्यः। इन्द्रः। त्रिष्टुप्।]

दूरे तन्नाम गुह्यं पराचैर्यत्त्वा भीते अह्वयेतां वयोधै।
उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः॥ १॥

दूरे। तत्। नाम। गुह्यम्। पराचैः। यत्। त्वा। भीते इति। अह्वयेताम्। वयःऽधै।
उत्। अस्तभ्नाः। पृथिवीम्। द्याम्। अभीके। भ्रातुः। पुत्रान्। मघऽवन्। तित्विषाणः॥ १॥

महत्तन्नाम गुह्यं पुरुस्पृग्येन भूतं जनयो येन भव्यम्।
प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशन्त पञ्च॥ २॥

महत्। तत्। नाम। गुह्यम्। पुरुऽस्पृक्। येन। भूतम्। जनयः। येन। भव्यम्।
प्रत्नम्। जातम्। ज्योतिः। यत्। अस्य। प्रियम्। प्रियाः। सम्। अविशन्त। पञ्च॥ २॥

आ रोदसी अपृणादोत मध्यं पञ्च देवाँ ऋतुशः सप्तसप्त।
चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन॥ ३॥

आ। रोदसी इति। अपृणात्। आ। उत। मध्यम्। पञ्च। देवान्। ऋतुऽशः। सप्तऽसप्त।
चतुःऽत्रिंशता। पुरुधा। वि। चष्टे। सऽरूपेण। ज्योतिषा। विऽव्रतेन॥ ३॥

यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टम्।
यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम्॥ ४॥

यत्। उषः। औच्छः। प्रथमा। विऽभानाम्। अजनयः। येन। पुष्टस्य। पुष्टम्।
यत्। ते। जामिऽत्वम्। अवरम्। परस्याः। महत्। महत्याः। असुरऽत्वम्। एकम्॥ ४॥

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान॥ ५॥ [१६]

विऽधुम्। दद्राणम्। समने। बहूनाम्। युवानम्। सन्तम्। पलितः। जगार।
देवस्य। पश्य। काव्यम्। महिऽत्वा। अद्य। ममार। सः। ह्यः। सम्। आन॥ ५॥

शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः।
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शाक्मना। शाकः। अरुणः। सुऽपर्णः। आ। यः। महः। शूरः। सनात्। अनीळः।
यत्। चिकेत। सत्यम्। इत्। तत्। न। मोघम्। वसु। स्पार्हम्। उत। जेता। उत। दाता॥ ६॥

ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री।
ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः॥ ७॥

आ। एभिः। ददे। वृष्ण्या। पौंस्यानि। येभिः। औक्षत्। वृत्रऽहत्याय। वज्री।
ये। कर्मणः। क्रियमाणस्य। मह्ना। ऋतेऽकर्मम्। उत्ऽअजायन्त। देवाः॥ ७॥

युजा कर्माणि जनयन्विश्वौजा अशस्तिहा विश्वमनास्तुराषाट्।
पीत्वी सोमस्य दिव आ वृधानः शूरो निर्युधाधमद्दस्यून्॥ ८॥ [१७]

युजा। कर्माणि। जनयन्। विश्वऽओजाः। अशस्तिऽहा। विश्वऽमनाः। तुराषाट्।
पीत्वी। सोमस्य। दिवः। आ। वृधानः। शूरः। निः। युधा। अधमत्। दस्यून्॥ ८॥

[५६] [७ बृहदुक्थो वामदेव्यः। विश्वे देवाः। त्रिष्टुप्, ४-६ जगत्यः।]

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व।
संवेशने तन्व१श्चारुरेधि प्रियो देवानां परमे जनित्रे॥ १॥

इदम्। ते। एकम्। परः। ऊँ इति। ते। एकम्। तृतीयेन। ज्योतिषा। सम्। विशस्व।
सम्ऽवेशने। तन्वः। चारुः। एधि। प्रियः। देवानाम्। परमे। जनित्रे॥ १॥

तनूष्टे वाजिन्तन्वं१नयन्ती वाममस्मभ्यं धातु शर्म तुभ्यम्।
अहुतो महो धरुणाय देवान्दिवीव ज्योतिः स्वमा मिमीयाः॥ २॥

तनूः। ते। वाजिन्। तन्वम्। नयन्ती। वामम्। अस्मभ्यम्। धातु। शर्म। तुभ्यम्।
अहुतः। महः। धरुणाय। देवान्। दिविऽइव। ज्योतिः। स्वम्। आ। मिमीयाः॥ २॥

वाज्यसि वाजिनेना सुवेनीः सुवितः स्तोमं सुवितो दिवं गाः।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान्त्सुवितोऽनु पत्म॥ ३॥

वाजी। असि। वाजिनेन। सुऽवेनीः। सुवितः। स्तोमम्। सुवितः। दिवम्। गाः।
सुवितः। धर्म। प्रथमा। अनु। सत्या। सुवितः। देवान्। सुवितः। अनु। पत्म॥ ३॥

महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम्।
समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महिम्नः। एषाम्। पितरः। चन। ईशिरे। देवाः। देवेषु। अदधुः। अपि। क्रतुम्।

सम्। अविव्यचुः। उत। यानि। अत्विषुः। आ। एषाम्। तनूषु। नि। विविशुः। पुनरिति॥ ४॥

सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः।

तनूषु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु॥ ५॥

सहःऽभिः। विश्वम्। परि। चक्रमुः। रजः। पूर्वा। धामानि। अमिता। मिमानाः।

तनूषु। विश्वा। भुवना। नि। येमिरे। प्र। असारयन्त। पुरुध। प्रऽजाः। अनु॥ ५॥

द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा।

स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम्॥ ६॥

द्विधा। सूनवः। असुरम्। स्वःऽविदम्। आ। अस्थापयन्त। तृतीयेन। कर्मणा।

स्वाम्। प्रऽजाम्। पितरः। पित्र्यम्। सहः। आ। अवरेषु। अदधुः। तन्तुम्। आऽततम्॥ ६॥

नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा।

स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु॥ ७॥ [१८]

नावा। न। क्षोदः। प्रऽदिशः। पृथिव्याः। स्वस्तिऽभिः। अति। दुःऽगानि। विश्वा।

स्वाम्। प्रऽजाम्। बृहत्ऽउक्थः। महिऽत्वा। आ। अवरेषु। अदधात्। आ। परेषु॥ ७॥

[५७] [६ बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः। विश्वे देवाः। गायत्री।]

मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः॥ १॥

मा। प्र। गाम। पथः। वयम्। मा। यज्ञात्। इन्द्र। सोमिनः। मा। अन्तरिति। स्थुः। नः। अरातयः॥ १॥

यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः। तमाहुतं नशीमहि॥ २॥

यः। यज्ञस्य। प्रऽसाधनः। तन्तुः। देवेषु। आऽततः। तम्। आऽहुतम्। नशीमहि॥ २॥

मनो न्वा हुवामहे नाराशंसेन सोमेन। पितृणां च मन्मभिः॥ ३॥

मनः। नु। आ। हुवामहे। नाराशंसेन। सोमेन। पितृणाम्। च। मन्मऽभिः॥ ३॥

आ ते एतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक् च सूर्यं दृशे॥ ४॥

आ। ते। एतु। मनः। पुनरिति। क्रत्वे। दक्षाय। जीवसे। ज्योक्। च। सूर्यम्। दृशे॥ ४॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं सचेमहि॥ ५॥

पुनः। नः। पितरः। मनः। ददातु। दैव्यः। जनः। जीवम्। व्रातम्। सचेमहि॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वयं सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि॥ ६॥ [१९]
वयम्। सोम। व्रते। तव। मनः। तनूषु। प्रजाऽवन्तः। सचेमहि॥ ६॥

[५८] [१२ बन्धुश्रुतबन्धुर्विप्रबन्धुर्गौपायनाः। मन आवर्तनम्। अनुष्टुप्।]

यत्ते यमं वैवस्वतं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ १॥
यत्। ते। यमम्। वैवस्वतम्। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ १॥

यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ २॥
यत्। ते। दिवम्। यत्। पृथिवीम्। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ २॥

यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ३॥
यत्। ते। भूमिम्। चतुःऽभृष्टिम्। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ३॥

यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ४॥
यत्। ते। चतस्रः। प्रऽदिशः। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ४॥

यत्ते समुद्रमर्णवं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ५॥
यत्। ते। समुद्रम्। अर्णवम्। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ५॥

यत्ते मरीचीः प्रवतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ६॥ [२०]
यत्। ते। मरीचीः। प्रऽवतः। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ६॥

यत्ते अपो यदोषधीर्मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ७॥
यत्। ते। अपः। यत्। ओषधीः। मनः। जगाम। दूरकम्।
तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ७॥

यत्ते सूर्यं यदुषसं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्। ये। सूर्यम्। यत्। उषसम्। मनः। जगाम। दूरकम्।

तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ८॥

यत्ते पर्वतान्बृहतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ९॥

यत्। ते। पर्वतान्। बृहतः। मनः। जगाम। दूरकम्।

तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ९॥

यत्ते विश्वमिदं जगन्मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ १०॥

यत्। ते। विश्वम्। इदम्। जगत्। मनः। जगाम। दूरकम्।

तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ १०॥

यत्ते पराः परावतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ ११॥

यत्। ते। पराः। पराऽवतः। मनः। जगाम। दूरकम्।

तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ ११॥

यत्ते भूतं च भव्यं च मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे॥ १२॥ [२१]

यत्। ते। भूतम्। च। भव्यम्। च। मनः। जगाम। दूरकम्।

तत्। ते। आ। वर्तयामसि। इह। क्षयाय। जीवसे॥ १२॥

[५९][१० बन्धुः श्रुतबन्दुर्विप्रबन्धुर्गौपायनाः। १-३ निर्ऋतिः, ४ निर्ऋतिः सोमश्च, ५-६ (पूर्वार्ध) असुनीतिः, अनुमतिः, ६ (उत्तरार्ध) ७ पृथिवी-द्व्यन्तरिक्ष-सोम-पूष-पथ्यास्वस्तयः, ८-१० द्यावापृथिवी, १० (पूर्वार्धस्य) इन्द्र-द्यावापृथिव्याः। त्रिष्टुप्, ८ पङ्क्तिः, ९ महापङ्क्तिः, १० पङ्क्त्युत्तरा।]

प्र तार्यायुः प्रतरं नवीयः स्थातारेव क्रतुमता रथस्य।
अध च्यवान उत्तवीत्यर्थं परातरं सु निर्ऋतिर्जिहीताम्॥ १॥

प्र। तारि। आयुः। प्रऽतरम्। नवीयः। स्थातारोऽइव। क्रतुऽमता। रथस्य।

अध। च्यवानः। उत्। तवीति। अर्थम्। पराऽतरम्। सु। निःऽऋतिः। जिहीताम्॥ १॥

सामन्नु राये निधिमन्न्वन्नं करामहे सु पुरुध श्रवांसि।
ता नो विश्वानि जरिता ममत्तु परातरं सु निर्ऋतिर्जिहीताम्॥ २॥

सामन्। नु। राये। निधिऽमत्। नु। अन्नम्। करामहे। सु। पुरुध। श्रवांसि।

ता। नः। विश्वानि। जरिता। ममत्तु। पराऽतरम्। सु। निःऽऋतिः। जिहीताम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभी ष्व१र्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाज्रान्।
ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीताम्॥ ३॥
अभि। सु। अर्यः। पौंस्यैः। भवेम। द्यौः। न। भूमिम्। गिरयः। न। अज्रान्।
ता। नः। विश्वानि। जरिता। चिकेत। पराऽतरम्। सु। निःऽऋतिः। जिहीताम्॥ ३॥
मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरन्तम्।
द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीताम्॥ ४॥
मो इति। सु। नः। सोम। मृत्यवे। परा। दाः। पश्येम। नु। सूर्यम्। उत्ऽचरन्तम्।
द्युऽभिः। हितः। जरिमा। सु। नः। अस्तु। पराऽतरम्। सु। निःऽऋतिः। जिहीताम्॥ ४॥
असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः।
रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व॥ ५॥ [२२]
असुऽनीते। मनः। अस्मासु। धारय। जीवातवे। सु। प्र। तिर। नः। आयुः।
ररन्धि। नः। सूर्यस्य। सम्ऽदृशि। घृतेन। त्वम्। तन्वम्। वर्धयस्व॥ ५॥
असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्।
ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति॥ ६॥
असुऽनीते। पुनः। अस्मासु। चक्षुः। पुनरिति। प्राणम्। इह। नः। धेहि। भोगम्।
ज्योक्। पश्येम। सूर्यम्। उत्ऽचरन्तम्। अनुऽमते। मृळय। नः। स्वस्ति॥ ६॥
पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः॥ ७॥
पुनः। नः। असुम्। पृथिवी। ददातु। पुनः। द्यौः। देवी। पुनः। अन्तरिक्षम्।
पुनः। नः। सोमः। तन्वम्। ददातु। पुनरिति। पूषा। पथ्याम्। या। स्वस्तिः॥ ७॥
शं रोदसी सुबन्धवे यह्वी ऋतस्य मातरा।
भरतामप यद्रपो द्यौः पृथिवी क्षमा रपो मो षु ते किं चनाममत्॥ ८॥
शम्। रोदसी इति। सुऽबन्धवे। यह्वी इति। ऋतस्य। मातरा।
भरताम्। अप। यत्। रपः। द्यौः। पृथिवि। क्षमा। रपः। मो इति। सु। ते। किम्। चन। आममत्॥ ८॥
अव द्वके अव त्रिका दिवश्चरन्ति भेषजा।
क्षमा चरिष्णवेककं भरतामप यद्रपो द्यौः पृथिवी क्षमा रपो मो षु ते किं चनाममत्॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अव॑। द्रुके इति॑। अव॑। त्रिका। दि॒वः। च॒रन्ति॒। भे॒ष॒जा। क्ष॒मा। च॒रि॒ष्णु। ए॒क॒कम्। भर॑ताम्।

अप॑। यत्। रप॑ः। द्यौः। पृ॒थि॒वि॒। क्ष॒मा। रप॑ः। मो इति॑। सु। ते॒। किम्। च॒न। आ॒म॒म॒त्॥ ९॥

समि॑न्द्रेरय॒ गाम॑न॒ड्वाहं॒ य आव॑हदुशी॒नरा॑ण्या॒ अन॑ः।

भर॑ता॒मप॒ यद्रपो॒ द्यौः पृ॑थिवि क्ष॒मा रपो॒ मो षु ते॒ किं च॒नाम॑मत्॥ १०॥ [२३]

सम्। इ॒न्द्र॒। ई॒र॒य॒। गाम्। अ॒न॒ड्वाह॑म्। यः। आ। अव॑हत्। उ॒शी॒नरा॑ण्याः। अन॑ः। भर॑ताम्।

अप॑। यत्। रप॑ः। द्यौः। पृ॒थि॒वि॒। क्ष॒मा। रप॑ः। मो इति॑। सु। ते॒। किम्। च॒न। आ॒म॒म॒त्॥ १०॥

[६०] [१२ बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः, ६ अगस्त्यस्वसा एषां मातऋर्षिका। १-४, ६ असमातिः, ५ इन्द्रः, ७-११ जीवः, १२ हस्तः। १-५ गायत्री, ६-७ अनुष्टुभौ, ८-९ पंक्त्यौ।]

आ जन॑ं त्वे॒षसं॑दृशं॒ माही॑नाना॒मुप॑स्तुतम्। अग॑न्म॒ बिभ्र॑तो॒ नम॑ः॥ १॥

आ। जन॑म्। त्वे॒ष॒ऽसं॑दृशम्। माही॑नानाम्। उप॑ऽस्तुतम्। अग॑न्म। बिभ्र॑तः। नम॑ः॥ १॥

अस॑मातिं नि॒तोश॑नं त्वे॒षं नि॑य॒यिन॒ं रथ॑म्। भ॒जेर॑थस्य॒ सत्प॑तिम्॥ २॥

अस॑मातिम्। नि॒ऽतोश॑नम्। त्वे॒षम्। नि॒ऽय॒यिन॑म्। रथ॑म्। भ॒जेऽर॑थस्य। सत्ऽप॑तिम्॥ २॥

यो जना॑न् महि॒षाँ इ॑वातित॒स्थौ पवी॑रवान्। उ॒ताप॑वीरवान् यु॒धा॥ ३॥

यः। जना॑न्। म॒हि॒षान्ऽइ॑व। अ॒ति॒ऽत॒स्थौ। पवी॑रवान्। उ॒त। अप॑वीरवान्। यु॒धा॥ ३॥

यस्यै॑क्ष्वा॒कुरुप॑ व्र॒ते रे॒वान्म॑रा॒य्येध॑ते दि॒वी॑व॒ पञ्च॑ कृ॒ष्टय॑ः॥ ४॥

यस्य॑। इ॒क्ष्वा॒कुः। उप॑। व्र॒ते। रे॒वान्। म॒रा॒यी। एध॑ते। दि॒विऽइ॑व। पञ्च॑। कृ॒ष्टय॑ः॥ ४॥

इन्द्र॑ क्ष॒त्रास॑मातिषु॒ रथ॑प्रोष्ठेषु धारय। दि॒वी॑व॒ सूर्य॑ं दृ॒शे॥ ५॥

इन्द्र॑। क्ष॒त्रा। अस॑मातिषु। रथ॑ऽप्रोष्ठेषु। धा॒र॒य॒। दि॒विऽइ॑व। सूर्य॑म्। दृ॒शे॥ ५॥

अ॒गस्त्य॑स्य॒ नद्भ्य॑ः सप्ती॑ युनक्षि॒ रोहि॑ता। प॒णीन्न्य॑क्रमीर॒भि विश्वा॑न्राजन्नरा॒धस॑ः॥ ६॥ [२४]

अ॒गस्त्य॑स्य। नत्ऽभ्य॑ः। सप्ती॒ इति॑। यु॒न॒क्षि॒। रोहि॑ता।

प॒णीन्। नि। अ॒क्र॒मी॒ः। अ॒भि। विश्वा॑न्। रा॒ज॒न्। अ॒रा॒धस॑ः॥ ६॥

अ॒यं मा॒ताय॑ं पि॒ताय॑ं जी॒वातु॒राग॑मत्। इ॒दं तव॒ प्र॒सर्प॑णं॒ सुब॑न्ध॒वेहि॒ निरि॑हि॥ ७॥

अ॒यम्। मा॒ता। अ॒यम्। पि॒ता। अ॒यम्। जी॒वातु॑ः। आ। अ॒ग॒म॒त्।

इ॒दम्। तव॑। प्र॒ऽसर्प॑णम्। सुब॑न्धो॒ इति॒ सुऽब॑न्धो। आ। इ॒हि॒। निः। इ॒हि॒॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा॑ यु॒गं व॑र॒त्रया॒ नह्य॑न्ति ध॒रुणा॑य॒ कम्।
ए॒वा दा॑धार ते॒ मनो॑ जी॒वात॑वे॒ न मृ॒त्यवेऽथो॑ अरि॒ष्टता॑तये॥ ८॥

यथा॑। यु॒गम्। व॒र॒त्रया॑। नह्य॑न्ति। ध॒रुणा॑य। कम्।
ए॒व। दा॒धा॒र॒। ते॒। मन॑:। जी॒वात॑वे। न। मृ॒त्यवे॑। अथो॒ इति॑। अ॒रि॒ष्ट॒ऽता॑तये॥ ८॥

यथे॒यं पृ॑थि॒वी म॒ही दा॒धारे॒मान्वन॒स्पती॑न्।
ए॒वा दा॑धार ते॒ मनो॑ जी॒वात॑वे॒ न मृ॒त्यवेऽथो॑ अरि॒ष्टता॑तये॥ ९॥

यथा॑। इ॒यम्। पृ॒थि॒वी। म॒ही। दा॒धार॑। इ॒मान्। व॒न॒स्पती॑न्।
ए॒व। दा॒धा॒र॒। ते॒। मन॑:। जी॒वात॑वे। न। मृ॒त्यवे॑। अथो॒ इति॑। अ॒रि॒ष्ट॒ऽता॑तये॥ ९॥

य॒माद॒हं वै॑वस्व॒तात्सु॒बन्धो॒र्मन॒ आभ॑रम्। जी॒वात॑वे॒ न मृ॒त्यवेऽथो॑ अरि॒ष्टाता॑तये॥ १०॥

य॒मात्। अ॒हम्। वै॒व॒स्व॒तात्। सु॒ऽबन्धो॑:। मन॑:। आ। अ॒भ॒र॒म्।
जी॒वात॑वे। न। मृ॒त्यवे॑। अथो॒ इति॑। अ॒रि॒ष्ट॒ऽता॑तये॥ १०॥

न्य॑१॒ग्वातोऽव॑ वाति॒ न्य॑क्तपति॒ सूर्य॑:। नी॒चीन॑म॒घ्न्या दु॑हे॒ न्य॑ग्भवतु॒ ते॒ रप॑:॥ ११॥

न्य॑क्। वात॑:। अव॑। वा॒ति॒। न्य॑क्। त॒प॒ति॒। सूर्य॑:।
नी॒चीन॑म्। अ॒घ्न्या। दु॒हे॒। न्य॑क्। भ॒व॒तु॒। ते॒। रप॑:॥ ११॥

अ॒यं मे॒ हस्तो॒ भग॑वान॒यं मे॒ भग॑वत्तरः। अ॒यं मे॑ वि॒श्वभे॑षजो॒ऽयं शि॒वाभि॑मर्शनः॥ १२॥[२५]{४}

अ॒यम्। मे॒। हस्त॑:। भग॑ऽवान्। अ॒यम्। मे॒। भग॑वत्ऽतरः।
अ॒यम्। मे॒। वि॒श्वऽभे॑षजः। अ॒यम्। शि॒वऽअ॑भिमर्शनः॥ १२॥

[६१] [२७ नाभानेदिष्ठो मानवः। विश्वे देवाः। त्रिष्टुप्।]

इ॒दमि॒त्था रौद्रं॑ गू॒र्तव॑चा॒ ब्रह्म॒ क्रत्वा॒ शच्या॑म॒न्तरा॒जौ।
क्रा॒णा यद॑स्य पि॒तरा॑ मंहने॒ष्ठाः पर्ष॑त्प॒क्थे अह॒न्ना स॒प्त होतॄ॑न्॥ १॥

इ॒दम्। इ॒त्था। रौद्र॑म्। गू॒र्तऽव॑चाः। ब्रह्म॑। क्रत्वा॑। शच्या॑म्। अ॒न्तः। आ॒जौ।
क्रा॒णा। यत्। अ॒स्य॒। पि॒तरा॑। मं॒ह॒ने॒ऽस्थाः। पर्ष॑त्। प॒क्थे। अह॑न्। आ। स॒प्त। होतॄ॑न्॥ १॥

स इ॒द्दा॒नाय॒ दभ्या॑य व॒न्वञ्च्यव॑ान॒ः सूदै॑रमिमीत॒ वेदि॑म्।
तूर्व॑याणो गू॒र्तव॑चस्मत॒ः क्षोदो॒ न रेत॑ इ॒तऊ॑ति सिञ्चत्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सः। इत्। दानाय। दभ्याय। वन्वन्। च्यवानः। सूदैः। अमिमीत। वेदिम्।

तूर्वयाणः। गूर्तवचःऽतमः। क्षोदः। न। रेतः। इतःऽऊति। सिञ्चत्॥ २॥

मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता।

आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ॥ ३॥

मनः। न। येषु। हवनेषु। तिग्मम्। विपः। शच्या। वनुथः। द्रवन्ता।

आ। यः। शर्याभिः। तुविऽनृम्णः। अस्य। अश्रीणीत। आऽदिशम्। गभस्तौ॥ ३॥

कृष्णा यद्गोष्वरुणीषु सीदद्दिवो नपाताश्विना हुवे वाम्।

वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू॥ ४॥

कृष्णा। यत्। गोषु। अरुणीषु। सीदत्। दिवः। नपाता। अश्विना। हुवे। वाम्॥ वीतम्।

मे। यज्ञम्। आ। गतम्। मे। अन्नम्। ववन्वांसा। न। इषम्। अस्मृतध्रू इत्यस्मृतऽध्रू॥ ४॥

प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत्।

पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभृतमनर्वा॥ ५॥ [२६]

प्रथिष्ट। यस्य। वीरऽकर्मम्। इष्णत्। अनुऽस्थितम्। नु। नर्यः। अप। औहत्।

पुनरिति। तत्। आ। वृहति। यत्। कनायाः। दुहितुः। आ। अनुऽभृतम्। अनर्वा॥ ५॥

मध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम्।

मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य योनौ॥ ६॥

मध्या। यत्। कर्त्वम्। अभवत्। अभीके। कामम्। कृण्वाने। पितरि। युवत्याम्।

मनानक्। रेतः। जहतुः। विऽयन्ता। सानौ। निऽसिक्तम्। सुऽकृतस्य। योनौ॥ ६॥

पिता यत्स्वां दुहितरमधिष्कन् क्ष्मया रेतः संजग्मानो नि षिञ्चत्।

स्वाध्योऽजनयन् ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन्॥ ७॥

पिता। यत्। स्वाम्। दुहितरम्। अधिऽस्कन्। क्ष्मया। रेतः। सम्ऽजग्मानः। नि। सिञ्चत्।

सुऽआध्यः। अजनयन्। ब्रह्म। देवाः। वास्तोः। पतिम्। व्रतऽपाम्। निः। अतक्षन्॥ ७॥

स ईं वृषा न फेनमस्यदाजौ स्मदा परैदप दभ्रचेताः।

सरत्पदा न दक्षिणा परावृङ्न ता नु मे पृशन्यो जगृभ्रे॥ ८॥

सः। ईम्। वृषा। न। फेनम्। अस्यत्। आजौ। स्मत्। आ। परा। ऐत्। अप। दभ्रऽचेताः।

सरत्। पदा। न। दक्षिणा। पराऽवृक्। न। ताः। नु। मे। पृशन्यः। जगृभ्रे॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीदूधः।
सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत्॥ ९॥
मक्षु। न। वह्निः। प्रऽजायाः। उपब्दिः। अग्निम्। न। नग्नः। उप। सीदत्। ऊधः।
सनिता। इध्मम्। सनिता। उत। वाजम्। सः। धर्ता। जज्ञे। सहसा। यविऽयुत्॥ ९॥
मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिमग्मन्।
द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन्॥ १०॥ [२७]
मक्षु। कनायाः। सख्यम्। नवऽग्वाः। ऋतम्। वदन्तः। ऋतुऽयुक्तिम्। अग्मन्।
द्विऽबर्हसः। ये। उप। गोपम्। आ। अगुः। अदक्षिणासः। अच्युता। दुदुक्षन्॥ १०॥
मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन्।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्त्रियायाः॥ ११॥
मक्षु। कनायाः। सख्यम्। नवीयः। राधः। न। रेतः। ऋतम्। इत्। तुरण्यन्।
शुचि। यत्। ते। रेक्णः। आ। अयजन्त। सबःऽदुघायाः। पयः। उस्त्रियायाः॥ ११॥
पश्वा यत्पश्चा वियुता बुधन्तेति ब्रवीति वक्तरी रराणः।
वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु॥ १२॥
पश्वा। यत्। पश्चा। विऽयुता। बुधन्त। इति। ब्रवीति। वक्तरि। रराणः।
वसोः। वसुऽत्वा। कारवः। अनेहा। विश्वम्। विवेष्टि। द्रविणम्। उप। क्षु॥ १२॥
तदिन्वस्य परिषद्वानो अग्मन् पुरू सदन्तो नार्षदं बिभित्सन्।
वि शुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत्॥ १३॥
तत्। इत्। नु। अस्य। परिऽसद्वानः। अग्मन्। पुरु। सदन्तः। नार्सदम्। बिभित्सन्।
वि। शुष्णस्य। सम्ऽग्रथितम्। अनर्वा। विदत्। पुरुऽप्रजातस्य। गुहा। यत्॥ १३॥
भर्गो ह नामोत यस्य देवाः स्व१र्ण ये त्रिषधस्थे निषेदुः।
अग्निर्ह नामोत जातवेदाः श्रुधी नो होतर्ऋतस्य होताध्रुक्॥ १४॥
भर्गः। ह। नाम। उत। यस्य। देवाः। स्वः। न। ये। त्रिऽसधस्थे। निऽसेदुः।
अग्निः। ह। नाम। उत। जातऽवेदाः। श्रुधि। नः। होतः। ऋतस्य। होता। अध्रुक्॥ १४॥
उत त्या मे रौद्रावर्चिमन्ता नासत्याविन्द्र गूर्तये यजध्यै।
मनुष्वद्वृक्तबर्हिषे रराणा मन्दू हितप्रयसा विक्षु यज्यू॥ १५॥ [२८]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत। त्या। मे। रौद्रौ। अर्चिऽमन्ता। नासत्यौ। इन्द्र। गूर्तये। यजध्यै।
मनुष्वत्। वृक्तऽबर्हिषे। रराणा। मन्दू इति। हितऽप्रयसा। विक्षु। यज्यू इति ॥ १५ ॥

अयं स्तुतो राजा वन्दि वेधा अपश्च विप्रस्तरति स्वसेतुः।
स कक्षीवन्तं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ॥ १६ ॥

अयम्। स्तुतः। राजा। वन्दि। वेधाः। अपः। च। विप्रः। तरति। स्वऽसेतुः।
सः। कक्षीवन्तम्। रेजयत्। सः। अग्निम्। नेमिम्। न। अर्वतः। रघुऽद्रु ॥ १६ ॥

स द्विबन्धुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुहध्यै।
सं यन्मित्रावरुणा वृञ्ज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः ॥ १७ ॥

सः। द्विऽबन्धुः। वैतरणः। यष्टा। सबःऽधुम्। धेनुम्। अस्वम्। दुहध्यै।
सम्। यत्। मित्रावरुणा। वृञ्जे। उक्थैः। ज्येष्ठेभिः। अर्यमणम्। वरूथैः ॥ १७ ॥

तद्बन्धुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन्।
सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास ॥ १८ ॥

तत्ऽबन्धुः। सूरिः। दिवि। ते। धियम्ऽधाः। नाभानेदिष्ठः। रपति। प्र। वेनन्।
सा। नः। नाभिः। परमा। अस्य। वा। घ। अहम्। तत्। पश्चा। कतिथः। चित्। आस ॥ १८ ॥

इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः।
द्विजा अह प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना ॥ १९ ॥

इयम्। मे। नाभिः। इह। मे। सधऽस्थम्। इमे। मे। देवाः। अयम्। अस्मि। सर्वः।
द्विऽजाः। अह। प्रथमऽजाः। ऋतस्य। इदम्। धेनुः। अदुहत्। जायमाना ॥ १९ ॥

अधासु मन्द्रो अरतिर्विभावाव स्यति द्विवर्तनिर्वनेषाट्।
ऊर्ध्वा यच्छ्रेणिर्न शिशुर्दन्मक्षू स्थिरं शेवृधं सूत माता ॥ २० ॥ [२९]

अध। आसु। मन्द्रः। अरतिः। विभाऽवा। अव। स्यति। द्विऽवर्तनिः। वनेषाट्।
ऊर्ध्वा। यत्। श्रेणिः। न। शिशुः। दन्। मक्षु। स्थिरम्। शेऽवृधम्। सूत। माता ॥ २० ॥

अधा गाव उपमातिं कनाया अनु श्वान्तस्य कस्य चित्परेयुः।
श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः ॥ २१ ॥

अध। गावः। उपऽमातिम्। कनायाः। अनु। श्वान्तस्य। कस्य। चित्। पराः। ईयुः।
श्रुधि। त्वम्। सुऽद्रविणः। नः। त्वम्। याट्। आश्वऽघ्नस्य। ववृधे। सूनृताभिः ॥ २१ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध त्वमिन्द्र विद्ध्य१स्मान्महो राये नृपते वज्रबाहुः।
रक्षा च नो मघोनः पाहि सूरीननेहसस्ते हरिवो अभिष्टौ॥ २२॥

अध। त्वम्। इन्द्र। विद्धि। अस्मान्। महः। राये। नृऽपते। वज्रऽबाहुः।
रक्ष। च। नः। मघोनः। पाहि। सूरीन्। अनेहसः। ते। हरिऽवः। अभिष्टौ॥ २२॥

अध यद्राजाना गविष्टौ सरत्सरण्युः कारवे जरण्युः।
विप्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत पर्षदेनान्॥ २३॥

अध। यत्। राजाना। गोऽइष्टौ। सरत्। सरण्युः। कारवे। जरण्युः।
विप्रः। प्रेष्ठः। सः। हि। एषाम्। बभूव। परा। च। वक्षत्। उत। पर्षत्। एनान्॥ २३॥

अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभन्त ईमहे तदू नु।
सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ॥ २४॥

अध। नु। अस्य। जेन्यस्य। पुष्टौ। वृथा। रेभन्तः। ईमहे। तत्। ऊँ इति। नु।
सरण्युः। अस्य। सूनुः। अश्वः। विप्रः। च। असि। श्रवसः। च। सातौ॥ २४॥

युवोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान्।
विश्वत्र यस्मिन्ना गिरः समीचीः पूर्वीव गातुर्दाशत्सूनृतायै॥ २५॥

युवोः। यदि। सख्याय। अस्मे इति। शर्धाय। स्तोमम्। जुजुषे। नमस्वान्।
विश्वत्र। यस्मिन। आ। गिरः। सम्ऽईचीः। पूर्वीऽइव। गातुः। दाशत्। सूनृतायै॥ २५॥

स गृणानो अद्भिर्देववानिति सुबन्धुर्नमसा सूक्तैः।
वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः॥ २६॥

सः। गृणानः। अत्ऽभिः। देवऽवान्। इति। सुऽबन्धुः। नमसा। सुऽउक्तैः।
वर्धत्। उक्थैः। वचःऽभिः। आ। हि। नूनम्। वि। अध्वा। एति। पयसः। उस्रियायाः॥ २६॥

त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः।
ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः॥ २७॥ [३०]

ते। ऊँ इति। सु। नः। महः। यजत्राः। भूत। देवासः। ऊतये। सऽजोषाः।
ये। वाजान्। अनयत। विऽयन्तः। ये। स्थ। निऽचेतारः। अमूराः॥ २७॥

इत्याश्वलायन-संहितायामष्टमाष्टके प्रथमोऽध्यायः समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथाष्टमाष्टके द्वितीयोऽध्यायः ॥

[६२] [११ नाभानेदिष्ठो मानवः। विश्वे देवाः, १-६ अङ्गिरसो वा, ८-११ सावर्णेर्दानस्तुतिः। जगती ५, ८, ९ अनुष्टुभः; प्रगाथः = (६ बृहती, ७ सतोबृहती); १० गायत्री, ११ त्रिष्टुप्।]

ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश।
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥ १॥

ये। यज्ञेन। दक्षिणया। सम्ऽअक्ताः। इन्द्रस्य। सख्यम्। अमृतऽत्वम्। आनश।
तेभ्यः। भद्रम्। अङ्गिरसः। वः। अस्तु। प्रति। गृभ्णीत। मानवम्। सुऽमेधसः॥ १॥

य उदाजन् पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे वलम्।
दीर्घायुत्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥ २॥

ये। उत्ऽआजन्। पितरः। गोऽमयम्। वसु। ऋतेन। अभिन्दन्। परिवत्सरे। वलम्॥
दीर्घायुऽत्वम्। अङ्गिरसः। वः। अस्तु। प्रति। गृभ्णीत। मानवम्। सुऽमेधसः॥ २॥

य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन् पृथिवीं मातरं वि।
सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥ ३॥

ये। ऋतेन। सूर्यम्। आ। अरोहयन्। दिवि। अप्रथयन्। पृथिवीम्। मातरम्। वि।
सुप्रजाःऽत्वम्। अङ्गिरसः। वः। अस्तु। प्रति। गृभ्णीत। मानवम्। सुऽमेधसः ३॥

अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन।
सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥ ४॥

अयम्। नाभा। वदति। वल्गु। वः। गृहे। देवऽपुत्राः। ऋषयः। तत्। शृणोतन।
सुऽब्रह्मण्यम्। अङ्गिरसः। वः। अस्तु। प्रति। गृभ्णीत। मानवम्। सुऽमेधसः ४॥

विरूपास इदृषयस्त इद्गम्भीरवेपसः। ते अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे॥ ५॥ [१]

विऽरूपासः। इत्। ऋषयः। ते। इत्। गम्भीरऽवेपसः।
ते। अङ्गिरसः। सूनवः। ते। अग्नेः। परि। जज्ञिरे॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि।
नवंग्वो नु दशंग्वो अङ्गिरस्तमः सचा देवेषु मंहते॥ ६॥
ये। अग्नेः। परि। जज्ञिरे। विऽरूपासः। दिवः। परि।
नवंऽग्वः। नु। दशंऽग्वः। अङ्गिरःऽतमः। सचा। देवेषु। मंहते॥ ६॥
इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम्।
सहस्रं मे ददतो अष्टकर्ण्यः श्रवो देवेष्वक्रत॥ ७॥
इन्द्रेण। युजा। निः। सृजन्त। वाघतः। व्रजम्। गोऽमन्तम्। अश्विनम्।
सहस्रम्। मे। ददतः। अष्टऽकर्ण्यः। श्रवः। देवेषु। अक्रत॥ ७॥
प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु। यः सहस्रं शताश्वं सद्यो दानाय मंहते॥ ८॥
प्र। नूनम्। जायताम्। अयम्। मनुः। तोक्मऽइव। रोहतु।
यः। सहस्रम्। शतऽअश्वम्। सद्यः। दानाय। मंहते॥ ८॥
न तमश्नोति कश्चन दिवइव सान्वारभम्। सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे॥ ९॥
न। तम्। अश्नोति। कः। चन। दिवःऽइव। सानु। आऽरभम्।
सावर्ण्यस्य। दक्षिणा। वि। सिन्धुःऽइव। पप्रथे॥ ९॥
उत दासा परिविषे स्मद्दिष्टी गोपरीणसा। यदुस्तुर्वश्च मामहे॥ १०॥
उत। दासा। परिऽविषे। स्मद्दिष्टी इति स्मत्ऽदिष्टी। गोऽपरीणसा।
यदुः। तुर्वः। च। ममहे॥ १०॥
सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा।
सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम्॥ ११॥ [२]
सहस्रऽदाः। ग्रामऽनीः। मा। रिषत्। मनुः। सूर्येण। अस्य। यतमाना। एतु। दक्षिणा।
सावर्णेः। देवाः। प्र। तिरन्तु। आयुः। यस्मिन्। अश्रान्ताः। असनाम। वाजम्॥ ११॥

[६३] [१७ गयः प्लातः। विश्वे देवाः; १५-१६ पथ्या स्वस्तिः। जगती, १५ त्रिष्टुब् जगती वा; १६-१७ त्रिष्टुभौ।]

परावतो ये दिधिषन्त आप्यं मनुप्रीतासो जनिमा विवस्वतः।
ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरा॑ऽवतः। ये। दिधि॑षन्ते। आप्य॑म्। मनु॑ऽप्रीतासः। जनि॑म। विवस्व॑तः।

ययातेः। ये। नहुष्य॑स्य। बर्हिषि॑। देवाः। आस॑ते। ते। अधि॑। ब्रुवन्तु। नः॥ १॥

विश्वा हि वो॑ नमस्या॑नि वन्द्या नामा॑नि देवा उत यज्ञिया॑नि वः।

ये स्थ जाता अदि॑तेरद्भ्यस्परि ये पृ॑थिव्यास्ते म॑ इह श्रुता हव॑म्॥ २॥

विश्वा॑। हि। वः। नमस्या॑नि। वन्द्या॑। नामा॑नि। देवाः। उत। यज्ञिया॑नि। वः।

ये। स्थ। जाताः। अदि॑तेः। अत्ऽभ्यः। परि॑। ये। पृथिव्याः। ते। मे। इह। श्रुत। हव॑म्॥ २॥

येभ्यो॑ माता मधु॑मत्पिन्व॑ते पय॑ः पीयूषं॑ द्यौरदि॑तिरद्रि॑बर्हाः।

उक्थशु॑ष्मान् वृषभरान्त्स्वप्न॑सस्ताँ आ॑दित्याँ अनु॑ मदा स्वस्तये॑॥ ३॥

येभ्य॑ः। माता। मधु॑ऽमत्। पिन्व॑ते। पय॑ः। पीयूष॑म्। द्यौः। अदि॑तिः। अद्रि॑ऽबर्हाः।

उक्थऽशु॑ष्मान्। वृषऽभरान्। सुऽअप्न॑सः। तान्। आदित्यान्। अनु॑। मद। स्वस्तये॑॥ ३॥

नृचक्ष॑सो अनि॑मिषन्तो अर्हणा॑ बृहद्देवासो॑ अमृतत्वमा॑नशुः।

ज्योती॑रथा अहि॑माया अना॑गसो दिवो वर्ष्मा॑णं वसते स्वस्तये॑॥ ४॥

नृ॑ऽचक्ष॑सः। अनि॑ऽमिषन्तः। अर्हणा॑। बृहत्। देवास॑ः। अमृत॑ऽत्वम्। आनशुः।

ज्योतिः॑ऽरथाः। अहि॑ऽमायाः। अना॑गसः। दिवः। वर्ष्मा॑णम्। वसते। स्वस्तये॑॥ ४॥

सम्राजो ये सुवृधो॑ यज्ञमा॑ययुरप॑रिह्वृता दधिरे दिवि क्षय॑म्।

ताँ आ वि॑वास नम॑सा सुवृक्तिभि॑र्महो आ॑दित्याँ अदि॑तिं स्वस्तये॑॥ ५॥ [३]

सम्ऽराज॑ः। ये। सुऽवृध॑ः। यज्ञम्। आऽययुः। अप॑रिऽह्वृताः। दधिरे। दिवि। क्षय॑म्।

तान्। आ। विवास। नम॑सा। सुवृक्ति॑ऽभिः। महः। आदित्यान्। अदि॑तिम्। स्वस्तये॑॥ ५॥

को वः स्तोम॑ राधति यं जुजो॑षथ विश्वे॑ देवासो मनुषो यति॑ ष्ठन॑।

को वो॑ऽध्वरं तु॑विजाता अर॑ करद्यो नः पर्ष॑दत्यंह॑ः स्वस्तये॑॥ ६॥

कः। वः। स्तोम॑म्। राधति। यम्। जुजो॑षथ। विश्वे॑। देवासः। मनुषः। यति॑। स्थन॑।

कः। वः। अध्वरम्। तुवि॑ऽजाताः। अर॑म्। करत्। यः। नः। पर्ष॑त्। अति॑। अंह॑ः। स्वस्तये॑॥ ६॥

येभ्यो होत्रा॑ प्रथमामा॑येजे मनुः समि॑द्धाग्निर्मन॑सा सप्त होतृ॑भिः।

त आ॑दित्या अभ॑यं शर्म यच्छत सुगा न॑ः कर्त सुपथा॑ स्वस्तये॑॥ ७॥

येभ्य॑ः। होत्रा॑म्। प्रथमाम्। आऽयेजे। मनु॑ः। समि॑द्धऽअग्निः। मन॑सा। सप्त। होतृ॑ऽभिः।

ते॑। आदित्याः। अभ॑यम्। शर्म। यच्छत। सुऽगा। नः। कर्त। सुऽपथा॑। स्वस्तये॑॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये॥ ८॥

ये। ईशिरे। भुवनस्य। प्रऽचेतसः। विश्वस्य। स्थातुः। जगतः। च। मन्तवः।
ते। नः। कृतात्। अकृतात्। एनसः। परि। अद्य। देवासः। पिपृत। स्वस्तये॥ ८॥

भरेष्विन्द्रं सुहवं हवामहेऽहोमुचं सुकृतं दैव्यं जनम्।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये॥ ९॥

भरेषु। इन्द्रम्। सुऽहवम्। हवामहे। अंहःऽमुचम्। सुऽकृतम्। दैव्यम्। जनम्।
अग्निम्। मित्रम्। वरुणम्। सातये। भगम्। द्यावापृथिवी इति। मरुतः। स्वस्तये॥ ९॥

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम्।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये॥ १०॥ [४]

सुऽत्रामाणम्। पृथिवीम्। द्याम्। अनेहसम्। सुऽशर्माणम्। अदितिम्। सुऽप्रनीतिम्।
दैवीम्। नावम्। सुऽअरित्राम्। अनागसम्। अस्रवन्तीम्। आ। रुहेम। स्वस्तये॥ १०॥

विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये॥ ११॥

विश्वे। यजत्राः। अधि। वोचत। ऊतये। त्रायध्वम्। नः। दुःऽएवायाः। अभिऽह्रुतः।
सत्यया। वः। देवऽहूत्या। हुवेम। शृण्वतः। देवाः। अवसे। स्वस्तये॥ ११॥

अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये॥ १२॥

अप। अमीवाम्। अप। विश्वाम्। अनाहुतिम्। अप। अरातिम्। दुःऽविदत्राम्। अघऽयतः।
आरे। देवाः। द्वेषः। अस्मत्। युयोतन। उरु। नः। शर्म। यच्छत। स्वस्तये॥ १२॥

अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये॥ १३॥

अरिष्टः। सः। मर्तः। विश्वः। एधते। प्र। प्रऽजाभिः। जायते। धर्मणः। परि।
यम्। आदित्यासः। नयथ। सुनीतिऽभिः। अति। विश्वानि। दुःऽइता। स्वस्तये॥ १३॥

यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने।
प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यम् । देवासः । अवथ । वाज॑ऽसातौ । यम् । शूर॑ऽसाता । मरुतः । हिते । धने॑ ।

प्रातःऽयावा॑नम् । रथ॑म् । इन्द्र । सानसिम् । अरि॑ष्यन्तम् । आ । रुहेम । स्वस्तये॑ ॥ १४ ॥

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य१प्सु वृजने स्व॑र्वति ।

स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये म॑रुतो दधातन ॥ १५ ॥

स्वस्ति । नः । पथ्या॑सु । धन्व॑ऽसु । स्वस्ति । अप्ऽसु । वृजने॑ । स्वः॑ऽवति ।

स्वस्ति । नः । पुत्र॑ऽकृथेषु॑ । योनि॑षु । स्वस्ति । राये । मरुतः । दधातन ॥ १५ ॥

स्वस्तिरिद्धि प्रप॑थे श्रेष्ठा रेक्ण॑स्वत्यभि या वाममेति॑ ।

सा नो॑ अमा सो अर॑णे नि पा॑तु स्वावेशा भ॑वतु देवगो॑पा ॥ १६ ॥

स्वस्तिः । इत् । हि । प्रऽप॑थे । श्रेष्ठा॑ । रेक्ण॑स्वती । अभि । या । वामम् । एति॑ ।

सा । नः । अमा । सो इति॑ । अर॑णे । नि । पातु । सुऽआवेशा । भवतु । देव॑ऽगो॑पा ॥ १६ ॥

एवा प्लतेः सूनुर॑वीवृधद्वो विश्व॑ आदित्या अदिते मनीषी ।

ईशानासो नरो अम॑र्त्येनास्ता॑वि जनो॑ दिव्यो गये॑न ॥ १७ ॥ [५]

एव । प्लतेः । सूनुः । अवीवृधत् । वः । विश्वे॑ । आदित्याः । अदिते । मनीषी ।

ईशानासः॑ । नरः॑ । अम॑र्त्येन । अस्ता॑वि । जनः॑ । दिव्यः । गये॑न ॥ १७ ॥

[६४] [१७ गयः प्लातः । विश्वे देवाः । जगती; १२, १६, १७ त्रिष्टुभः ।]

कथा देवानां कतमस्य याम॑नि सुमन्तु नाम॑ शृण्वतां म॑नामहे ।

को मृळाति कतमो नो मय॑स्करत्कतम ऊती अभ्या व॑वर्तति ॥ १ ॥

कथा । देवाना॑म् । कतमस्य॑ । याम॑नि । सुऽमन्तु । नाम॑ । शृण्वताम् । मनामहे ।

कः । मृळाति । कतमः । नः । मय॑ः । करत् । कतमः । ऊती । अभि । आ । ववर्तति ॥ १ ॥

क्रतूयन्ति क्रत॑वो हृत्सु धीतयो वेन॑न्ति वेनाः पतयन्त्या दिश॑ः ।

न म॑र्डिता विद्यते अन्य ए॑भ्यो देवेषु मे अधि कामा॑ अयंसत ॥ २ ॥

क्रतुऽयन्ति । क्रत॑वः । हृत्ऽसु । धीतय॑ः । वेन॑न्ति । वेनाः । पतय॑न्ति । आ । दिश॑ः ।

न । मर्डिता । विद्यते । अन्यः । एभ्यः । देवेषु । मे । अधि॑ । कामा॑ः । अयंसत ॥ २ ॥

नरा॑ वा शंसं॑ पूषणमगो॑ह्यमग्निं देवेद्धम॑भ्य॑र्चसे गिरा ।

सूर्या॑मासा॑ चन्द्रम॑सा यमं दिवि त्रितं वात॑मुषस॑मक्तुम॑श्विना॑ ॥ ३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नराशंसम्। वा। पूषणम्। अगोह्यम्। अग्निम्। देवऽइद्धम्। अभि। अर्चसे। गिरा।
सूर्यामासा। चन्द्रमसा। यमम्। दिवि। त्रितम्। वातम्। उषसम्। अक्तुम्। अश्विना॥ ३॥

कथा कविस्तुवीरवान् कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः।
अज एकपात्सुहवेभिर्ऋक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि॥ ४॥

कथा। कविः। तुविऽरवान्। कया। गिरा। बृहस्पतिः। ववृधते। सुवृक्तिऽभिः।
अजः। एकऽपात्। सुऽहवेभिः। ऋक्वऽभिः। अहिः। शृणोतु। बुध्न्यः। हवीमनि॥ ४॥

दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि।
अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु॥ ५॥ [६]

दक्षस्य। वा। अदिते। जन्मनि। व्रते। राजाना। मित्रावरुणा। आ। विवाससि।
अतूर्तऽपन्थाः। पुरुऽरथः। अर्यमा। सप्तऽहोता। विषुऽरूपेण। जन्मऽसु॥ ५॥

ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः।
सहस्रसा मेधसाताविव त्मना महो ये धनं समिथेषु जभ्रिरे॥ ६॥

ते। नः। अर्वन्तः। हवनऽश्रुतः। हवम्। विश्वे। शृण्वन्तु। वाजिनः। मितऽद्रवः।
सहस्रऽसाः। मेधसातौऽइव। त्मना। महः। ये। धनम्। सम्ऽइथेषु। जभ्रिरे॥ ६॥

प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं सख्याय पूषणम्।
ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सचेतसः॥ ७॥

प्र। वः। वायुम्। रथऽयुजम्। पुरम्ऽधिम्। स्तोमैः। कृणुध्वम्। सख्याय। पूषणम्।
ते। हि। देवस्य। सवितुः। सवीमनि। क्रतुम्। सचन्ते। सऽचितः। सऽचेतसः॥ ७॥

त्रिः सप्त सस्रा नद्यो महीरपो वनस्पतीन् पर्वताँ अग्निमूतये।
कृशानुमस्तॄन् तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे॥ ८॥

त्रिः। सप्त। सस्राः। नद्यः। महीः। अपः। वनस्पतीन्। पर्वतान्। अग्निम्। ऊतये।
कृशानुम्। अस्तॄन्। तिष्यम्। सधऽस्थे। आ। रुद्रम्। रुद्रेषु। रुद्रियम्। हवामहे॥ ८॥

सरस्वती सरयुः सिन्धुरूर्मिभिर्महो महीरवसा यन्तु वक्षणीः।
देवीरापो मातरः सूदयित्न्वो घृतवत्पयो मधुमन्नो अर्चत॥ ९॥

सरस्वती। सरयुः। सिन्धुः। ऊर्मिऽभिः। महः। महीः। अवसा। आ। यन्तु। वक्षणीः।
देवीः। आपः। मातरः। सूदयित्न्वः। घृतऽवत्। पयः। मधुऽमत्। नः। अर्चत॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभिः पिता वचः।
ऋभुक्षा वाजो रथस्पतिर्भगो रण्वः शंसः शशमानस्य पातु नः॥ १०॥ [७]

उत। माता। बृहत्ऽदिवा। शृणोतु। नः। त्वष्टा। देवेभिः। जनिऽभिः। पिता। वचः।
ऋभुक्षाः। वाजः। रथःपतिः। भगः। रण्वः। शंसः। शशमानस्य। पातु। नः॥ १०॥

रण्वः संदृष्टौ पितुमाँइव क्षयो भद्रा रुद्राणां मरुतामुपस्तुतिः।
गोभिः ष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि॥ ११॥

रण्वः। सम्ऽदृष्टौ। पितुमान्ऽइव। क्षयः। भद्रा। रुद्राणाम्। मरुताम्। उपऽस्तुतिः।
गोभिः। स्याम। यशसः। जनेषु। आ। सदा। देवासः। इळया। सचेमहि॥ ११॥

यां मे धियं मरुत इन्द्र देवा अददात वरुण मित्र यूयम्।
तां पीपयत पयसेव धेनुं कुविद्गिरो अधि रथे वहाथ॥ १२॥

याम्। मे। धियम्। मरुतः। इन्द्र। देवाः। अददात। वरुण। मित्र। यूयम्।
ताम्। पीपयत। पयसाऽइव। धेनुम्। कुवित्। गिरः। अधि। रथे। वहाथ॥ १२॥

कुविदङ्ग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ।
नाभा यत्र प्रथमं संनसामहे तत्र जामित्वमदितिर्दधातु नः॥ १३॥

कुवित्। अङ्ग। प्रति। यथा। चित्। अस्य। नः। सऽजात्यस्य। मरुतः। बुबोधथ।
नाभा। यत्र। प्रथमम्। सम्ऽनसामहे। तत्र। जामिऽत्वम्। अदितिः। दधातु। नः॥ १३॥

ते हि द्यावापृथिवी मातरा मही देवी देवाञ्जन्मना यज्ञिये इतः।
उभे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिञ्चतः॥ १४॥

ते इति। हि। द्यावापृथिवी इति। मातरा। मही इति। देवी इति। देवान्। जन्मना। यज्ञिये इति। इतः।
उभे इति। बिभृतः। उभयम्। भरीमऽभिः। पुरु। रेतांसि। पितृऽभिः। च। सिञ्चतः॥ १४॥

वि षा होत्रा विश्वमश्नोति वार्यं बृहस्पतिररमतिः पनीयसी।
ग्रावा यत्र मधुषुदुच्यते बृहदवीवशन्त मतिभिर्मनीषिणः॥ १५॥

वि। सा। होत्रा। विश्वम्। अश्नोति। वार्यम्। बृहस्पतिः। अरमतिः। पनीयसी।
ग्रावा। यत्र। मधुऽसुत्। उच्यते। बृहत्। अवीवशन्त। मतिऽभिः। मनीषिणः॥ १५॥

एवा कविस्तुवीरवाँ ऋतज्ञा द्रविणस्युर्द्रविणसश्चकानः।
उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयद्गयो दिव्यानि जन्म॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एव। कविः। तुविऽरवान्। ऋतऽज्ञाः। द्रविणस्युः। द्रविणसः। चकानः।

उक्थेभिः। अत्र। मतिऽभिः। च। विप्रः। अपीपयत्। गयः। दिव्यानि। जन्म॥ १६॥

एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी।

ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन॥ १७॥ [८]

एव। प्लतेः। सूनुः। अवीवृधत्। वः। विश्वे। आदित्याः। अदिते। मनीषी।

ईशानासः। नरः। अमर्त्येन। अस्तावि। जनः। दिव्यः। गयेन॥ १७॥

[६५] [१५ वसुकर्णो वासुक्रः। विश्वे देवाः। जगती, १५ त्रिष्टुप्।]

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः।

आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः॥ १॥

अग्निः। इन्द्रः। वरुणः। मित्रः। अर्यमा। वायुः। पूषा। सरस्वती। सऽजोषसः।

आदित्याः। विष्णुः। मरुतः। स्वः। बृहत्। सोमः। रुद्रः। अदितिः। ब्रह्मणः। पतिः॥ १॥

इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा।

अन्तरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन्॥ २॥

इन्द्राग्नी इति। वृत्रऽहत्येषु। सत्पती इति सत्ऽपती। मिथः। हिन्वाना। तन्वा। सम्ऽओकसा।

अन्तरिक्षम्। महि। आ। पप्रुः। ओजसा। सोमः। घृतऽश्रीः। महिमानम्। ईरयन्॥ २॥

तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम्।

ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः॥ ३॥

तेषाम्। हि। मह्ना। महताम्। अनर्वणाम्। स्तोमान्। इयर्मि। ऋतऽज्ञाः। ऋतऽवृधाम्।

ये। अप्सवम्। अर्णवम्। चित्रऽराधसः। ते। नः। रासन्ताम्। महये। सुऽमित्र्याः॥ ३॥

स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा।

पृक्षाइव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः॥ ४॥

स्वः:ऽनरम्। अन्तरिक्षाणि। रोचना। द्यावाभूमी इति। पृथिवीम्। स्कम्भुः। ओजसा।

पृक्षाःऽइव। महयन्तः। सुऽरातयः। देवाः। स्तवन्ते। मनुषाय। सूरयः॥ ४॥

मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः।

ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ॥ ५॥ [९]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मित्राय । शिक्ष । वरुणाय । दाशुषे । या । सम्ऽराजा । मनसा । न । प्रऽयुच्छतः ।

ययोः । धाम । धर्मणा । रोचते । बृहत् । ययोः । उभे इति । रोदसी इति । नाधसी इति । वृतौ ॥ ५ ॥

या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः ।

सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥ ६ ॥

या । गौः । वर्तनिम् । परिऽएति । निःऽकृतम् । पयः । दुहाना । व्रतऽनीः । अवारतः ।

सा । प्रऽब्रुवाणा । वरुणाय । दाशुषे । देवेभ्यः । दाशत् । हविषा । विवस्वते ॥ ६ ॥

दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते ।

द्यां स्कभित्व्य१प आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥ ७ ॥

दिवक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः । ऋतस्य । योनिम् । विऽमृशन्तः । आसते ।

द्याम् । स्कभित्वी । अपः । आ । चक्रुः । ओजसा । यज्ञम् । जनित्वी । तन्वि । नि । ममृजुः ॥ ७ ॥

परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकशा ।

द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ॥ ८ ॥

परिऽक्षिता । पितरा । पूर्वजावरी इति पूर्वऽजावरी । ऋतस्य । योना । क्षयतः । सम्ऽओकसा ।

द्यावापृथिवी इति । वरुणाय । सव्रते इति सऽव्रते । घृतऽवत् । पयः । महिषाय । पिन्वतः ॥ ८ ॥

पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रो अर्यमा ।

देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥ ९ ॥

पर्जन्यावाता । वृषभा । पुरीषिणा । इन्द्रवायू इति । वरुणः । मित्रः । अर्यमा ।

देवान् । आदित्यान् । अदितिम् । हवामहे । ये । पार्थिवासः । दिव्यासः । अप्ऽसु । ये ॥ ९ ॥

त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।

बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ॥ १० ॥ [१०]

त्वष्टारम् । वायुम् । ऋभवः । यः । ओहते । दैव्या । होतारौ । उषसम् । स्वस्तये ।

बृहस्पतिम् । वृत्रऽखादम् । सुऽमेधसम् । इन्द्रियम् । सोमम् । धनऽसाः । ऊँ इति । ईमहे ॥ १० ॥

ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन् पृथिवीं पर्वताँ अपः ।

सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥ ११ ॥

ब्रह्म । गाम् । अश्वम् । जनयन्तः । ओषधीः । वनस्पतीन् । पृथिवीम् । पर्वतान् । अपः ।

सूर्यम् । दिवि । रोहयन्तः । सुऽदानवः । आर्या । व्रता । विऽसृजन्तः । अधि । क्षमि ॥ ११ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम्।
कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायाव सृजथः॥ १२॥

भुज्युम्। अंहसः। पिपृथः। निः। अश्विना। श्यावम्। पुत्रम्। वध्रिऽमत्याः। अजिन्वतम्।
कमऽद्युवम्। विऽमदाय। ऊहथुः। युवम्। विष्णाप्वम्। विश्वकाय। अव। सृजथ॥ १२॥

पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः।
विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरंध्या॥ १३॥

पावीरवी। तन्यतुः। एकऽपात्। अजः। दिवः। धर्ता। सिन्धुः। आपः। समुद्रियः।
विश्वे। देवासः। शृणवन्। वचांसि। मे। सरस्वती। सह। धीभिः। पुरम्ऽध्या॥ १३॥

विश्वे देवाः सह धीभिः पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञाः।
रातिषाचो अभिषाचः स्वर्विदः स्व१र्गिरो ब्रह्म सूक्तं जुषेरत॥ १४॥

विश्वे। देवाः। सह। धीभिः। पुरम्ऽध्या। मनोः। यजत्राः। अमृताः। ऋतऽज्ञाः।
रातिऽसाचः। अभिऽसाचः। स्वःऽविदः। स्वः। गिरः। ब्रह्म। सुऽउक्तम्। जुषेरत॥ १४॥

देवान्वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थुः।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः॥ १५॥ [११]

देवान्। वसिष्ठः। अमृतान्। ववन्दे। ये। विश्वा। भुवना। अभि। प्रऽतस्थुः।
ते। नः। रासन्ताम्। उरुऽगायम्। अद्य। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १५॥

[६६] [१५ वसुकर्णो वासुक्रः। विश्वे देवाः। जगती, १५ त्रिष्टुप्।]

देवान् हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः।
ये वावृधुः प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृधः॥ १॥

देवान्। हुवे। बृहत्ऽश्रवसः। स्वस्तये। ज्योतिःऽकृतः। अध्वरस्य। प्रऽचेतसः।
ये। ववृधुः। प्रऽतरम्। विश्वऽवेदसः। इन्द्रऽज्येष्ठासः। अमृताः। ऋतऽवृधः॥ १॥

इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः।
मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः॥ २॥

इन्द्रऽप्रसूताः। वरुणऽप्रशिष्टाः। ये। सूर्यस्य। ज्योतिषः। भागम्। आनशुः।
मरुत्ऽगणे। वृजने। मन्म। धीमहि। माघोने। यज्ञम्। जनयन्त। सूरयः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु।

रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु॥ ३॥

इन्द्रः। वसुऽभिः। परि। पातु। नः। गयम्। आदित्यैः। नः। अदितिः। शर्म। यच्छतु।

रुद्रः। रुद्रेभिः। देवः। मृळयाति। नः। त्वष्टा। नः। ग्नाभिः। सुविताय। जिन्वतु॥ ३॥

अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत्।

देवाँ आदित्याँ अवसे हवामहे वसून्रुद्रान्त्सवितारं सुदंससम्॥ ४॥

अदितिः। द्यावापृथिवी इति। ऋतम्। महत्। इन्द्राविष्णू इति। मरुतः। स्वः। बृहत्।

देवान्। आदित्यान्। अवसे। हवामहे। वसून्। रुद्रान्। सवितारम्। सुऽदंससम्॥ ४॥

सरस्वान् धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना।

ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथमंहसः॥ ५॥ [१२]

सरस्वान्। धीभिः। वरुणः। धृतऽव्रतः। पूषा। विष्णुः। महिमा। वायुः। अश्विना।

ब्रह्मऽकृतः। अमृताः। विश्वऽवेदसः। शर्म। नः। यंसन्। त्रिऽवरूथम्। अंहसः॥ ५॥

वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविष्कृतः।

वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः॥ ६॥

वृषा। यज्ञः। वृषणः। सन्तु। यज्ञियाः। वृषणः। देवाः। वृषणः। हविःऽकृतः।

वृषणा। द्यावापृथिवी इति। ऋतवरी इत्यृतऽवरी। वृषा। पर्जन्यः। वृषणः। वृषऽस्तुभः॥ ६॥

अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे।

यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः॥ ७॥

अग्नीषोमा। वृषणा। वाजऽसातये। पुरुऽप्रशस्ता। वृषणौ। उप। ब्रुवे।

यौ। ईजिरे। वृषणः। देवऽयज्यया। ता। नः। शर्म। त्रिऽवरूथम्। वि। यंसतः॥ ७॥

धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः।

अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये॥ ८॥

धृतऽव्रताः। क्षत्रियाः। यज्ञनिःऽकृतः। बृहत्ऽदिवाः। अध्वराणाम्। अभिऽश्रियः।

अग्निऽहोतारः। ऋतऽसापः। अद्रुहः। अपः। असृजन्। अनु। वृत्रऽतूर्ये॥ ८॥

द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया।

अन्तरिक्षं स्व१रा पप्रुरूतये वशं देवासस्तन्वी३ नि मामृजुः॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्यावापृथिवी इति । जनयन् । अभि । व्रता । आपः । ओषधीः । वनिनानि । यज्ञिया ।
अन्तरिक्षम् । स्वः । आ । पप्रुः । ऊतये । वशम् । देवासः । तन्वि । नि । ममृजुः ॥ ९ ॥

धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥ १० ॥ [१३]

धर्तारः । दिवः । ऋभवः । सुऽहस्ताः । वातापर्जन्या । महिषस्य । तन्यतोः ।
आपः । ओषधीः । प्र । तिरन्तु । नः । गिरः । भगः । रातिः । वाजिनः । यन्तु । मे । हवम् ॥ १० ॥

समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः ।
अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥ ११ ॥

समुद्रः । सिन्धुः । रजः । अन्तरिक्षम् । अजः । एकऽपात् । तनयित्नुः । अर्णवः ।
अहिः । बुध्न्यः । शृणवत् । वचांसि । मे । विश्वे । देवासः । उत । सूरयः । मम ॥ ११ ॥

स्याम वो मनवो देववीतये प्राञ्चं नो यज्ञं प्र णयत साधुया ।
आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥ १२ ॥

स्याम । वः । मनवः । देवऽवीतये । प्राञ्चम् । नः । यज्ञम् । प्र । नयत । साधुऽया ।
आदित्याः । रुद्राः । वसवः । सुऽदानवः । इमा । ब्रह्म । शस्यमानानि । जिन्वत ॥ १२ ॥

दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया ।
क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥ १३ ॥

दैव्या । होतारा । प्रथमा । पुरःऽहिता । ऋतस्य । पन्थाम् । अनु । एमि । साधुऽया ।
क्षेत्रस्य । पतिम् । प्रतिऽवेशम् । ईमहे । विश्वान् । देवान् । अमृतान् । अप्रऽयुच्छतः ॥ १३ ॥

वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये ।
प्रीताइव ज्ञातयः काममेत्यास्मे देवासोऽव धूनुता वसु ॥ १४ ॥

वसिष्ठासः । पितृऽवत् । वाचम् । अक्रत । देवान् । ईळानाः । ऋषिऽवत् । स्वस्तये ।
प्रीताःऽइव । ज्ञातयः । कामम् । आऽइत्य । अस्मे इति । देवासः । अव । धूनुत । वसु ॥ १४ ॥

देवान् वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ १५ ॥ [१४]

देवान् । वसिष्ठः । अमृतान् । ववन्दे । ये । विश्वा । भुवना । अभि । प्रऽतस्थुः ।
ते । नः । रासन्ताम् । उरुऽगायम् । अद्य । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६७] [१२ अयास्य आङ्गिरसः। बृहस्पतिः। त्रिष्टुप्।]

इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत्।

तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन्॥ १॥

इमाम्। धियम्। सप्तऽशीर्ष्णीम्। पिता। नः। ऋतऽप्रजाताम्। बृहतीम्। अविन्दत्।

तुरीयम्। स्वित्। जनयत्। विश्वऽजन्यः। अयास्यः। उक्थम्। इन्द्राय। शंसन्॥ १॥

ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः।

विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त॥ २॥

ऋतम्। शंसन्तः। ऋजु। दीध्यानाः। दिवः। पुत्रासः। असुरस्य। वीराः।

विप्रम्। पदम्। अङ्गिरसः। दधानाः। यज्ञस्य। धाम। प्रथमम्। मनन्त॥ २॥

हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन्।

बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत्॥ ३॥

हंसैःऽइव। सखिऽभिः। वावदत्ऽभिः। अश्मन्ऽमयानि। नहना। विऽअस्यन्।

बृहस्पतिः। अभिऽकनिक्रदत्। गाः। उत। प्र। अस्तौत्। उत्। च। विद्वान्। अगायत्॥ ३॥

अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ।

बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः॥ ४॥

अवः। द्वाभ्याम्। परः। एकया। गाः। गुहा। तिष्ठन्तीः। अनृतस्य। सेतौ।

बृहस्पतिः। तमसि। ज्योतिः। इच्छन्। उत्। उस्राः। आ। अकः। वि। हि। तिस्रः। आवरित्यावः॥ ४॥

विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत्।

बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः॥ ५॥

विऽभिद्य। पुरम्। शयथा। ईम्। अपाचीम्। निः। त्रीणि। साकम्। उदऽधेः। अकृन्तत्।

बृहस्पतिः। उषसम्। सूर्यम्। गाम्। अर्कम्। विवेद। स्तनयन्ऽइव। द्यौः॥ ५॥

इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण।

स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात्॥ ६॥ [१५]

इन्द्रः। वलम्। रक्षितारम्। दुघानाम्। करेणऽइव। वि। चकर्त। रवेण।

स्वेदाञ्जिऽभिः। आऽशिरम्। इच्छमानः। अरोदयत्। पणिम्। आ। गाः। अमुष्णात्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः।

ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट्॥ ७॥

सः। ईम्। सत्येभिः। सखिऽभिः। शुचत्ऽभिः। गोऽधायसम्। वि। धनऽसैः। अदर्दरित्यदर्दः।

ब्रह्मणः। पतिः। वृषऽभिः। वराहैः। घर्मऽस्वेदेभिः। द्रविणम्। वि। आनट्॥ ७॥

ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः।

बृहस्पतिर्मिथोअवद्यपेभिरुदुस्त्रिया असृजत स्वयुग्भिः॥ ८॥

ते। सत्येन। मनसा। गोऽपतिम्। गाः। इयानासः। इषणयन्त। धीभिः।

बृहस्पतिः। मिथः२अवद्यपेभिः। उत्। उस्त्रियाः। असृजत। स्वयुक्ऽभिः॥ ८॥

तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे।

बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम्॥ ९॥

तम्। वर्धयन्तः। मतिऽभिः। शिवाभिः। सिंहम्ऽइव। नानदतम्। सधऽस्थे।

बृहस्पतिम्। वृषणम्। शूरऽसातौ। भरेऽभरे। अनु। मदेम। जिष्णुम्॥ ९॥

यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म।

बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा॥ १०॥

यदा। वाजम्। असनत्। विश्वऽरूपम्। आ। द्याम्। अरुक्षत्। उत्ऽतराणि। सद्म।

बृहस्पतिम्। वृषणम्। वर्धयन्तः। नाना। सन्तः। बिभ्रतः। ज्योतिः। आसा॥ १०॥

सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः।

पश्चा मृधो अप भवन्तु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे॥ ११॥

सत्याम्। आऽशिषम्। कृणुत। वयः२धै। कीरिम्। चित्। हि। अवथ। स्वेभिः। एवैः॥ पश्चा। मृधः।

अप। भवन्तु। विश्वाः। तत्। रोदसी इति। शृणुतम्। विश्वमिन्वे इति विश्वम्ऽइन्वे॥ ११॥

इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य।

अहन्नहिमरिणात्सप्त सिन्धून् देवैर्द्यावापृथिवी प्रावतं नः॥ १२॥ [१६]

इन्द्रः। मह्ना। महतः। अर्णवस्य। वि। मूर्धानम्। अभिनत्। अर्बुदस्य।

अहन्। अहिम्। अरिणात्। सप्त। सिन्धून्। देवैः। द्यावापृथिवी इति। प्र। अवतम्। नः॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६८] [१२ अयास्य आङ्गिरसः। बृहस्पतिः। त्रिष्टुप्।]

उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः।

गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१र्का अनावन्॥ १॥

उदऽप्रुतः। न। वयः। रक्षमाणाः। वावदतः। अभ्रियस्यऽइव। घोषाः।

गिरिऽभ्रजः। न। ऊर्मयः। मदन्तः। बृहस्पतिम्। अभि। अर्काः। अनावन्॥ १॥

सं गोभिराङ्गिरसो नक्षमाणो भगइवेदर्यमणं निनाय।

जने मित्रो न दंपती अनक्ति बृहस्पते वाजयाशूँरिवाजौ॥ २॥

सम्। गोभिः। आङ्गिरसः। नक्षमाणः। भगःऽइव। इत्। अर्यमणम्। निनाय।

जने। मित्रः। न। दंपती इति दम्ऽपती। अनक्ति। बृहस्पते। वाजय। आशून्ऽइव। आजौ॥ २॥

साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः।

बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः॥ ३॥

साधुऽअर्याः। अतिथिनीः। इषिराः। स्पार्हाः। सुऽवर्णाः। अनवद्यऽरूपाः।

बृहस्पतिः। पर्वतेभ्यः। विऽतूर्य। निः। गाः। ऊपे। यवम्ऽइव। स्थिविऽभ्यः॥ ३॥

आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः।

बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्गेव वि त्वचं बिभेद॥ ४॥

आऽप्रुषायन्। मधुना। ऋतस्य। योनिम्। अवऽक्षिपन्। अर्कः। उल्काम्ऽइव। द्योः।

बृहस्पतिः। उद्धरन्। अश्मनः। गाः। भूम्याः। उद्गाऽइव। वि। त्वचम्। बिभेद॥ ४॥

अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपालमिव वात आजत्।

बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः॥ ५॥

अप। ज्योतिषा। तमः। अन्तरिक्षात्। उद्नः। शीपालम्ऽइव। वातः। आजत्।

बृहस्पतिः। अनुऽमृश्य। वलस्य। अभ्रम्ऽइव। वातः। आ। चक्रे। आ। गाः॥ ५॥

यदा वलस्य पीयतो जसुं भेद्बृहस्पतिरग्नितपोभिरर्कैः।

दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम्॥ ६॥ [१७]

यदा। वलस्य। पीयतः। जसुम्। भेत्। बृहस्पतिः। अग्नितपःऽभिः। अर्कैः।

दत्ऽभिः। न। जिह्वा। परिऽविष्टम्। आदत्। आविः। निऽधीन्। अकृणोत्। उस्रियाणाम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत्।

आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत्॥ ७॥

बृहस्पतिः। अमत। हि। त्यत्। आसाम्। नाम। स्वरीणाम्। सदने। गुहा। यत्।

आण्डाऽइव। भित्त्वा। शकुनस्य। गर्भम्। उत्। उस्रियाः। पर्वतस्य। त्मना। आजत्॥ ७॥

अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम्।

निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य॥ ८॥

अश्ना। अपिऽनद्धम्। मधु। परि। अपश्यत्। मत्स्यम्। न। दीने। उदनि। क्षियन्तम्।

निः। तत्। जभार। चमसम्। न। वृक्षात्। बृहस्पतिः। विऽरवेण। विऽकृत्य॥ ८॥

सोषामविन्दत्स स्वः१ सो अग्निं सो अर्केण वि बबाधे तमांसि।

बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार॥ ९॥

सः। उषाम्। अविन्दत्। सः। स्वः१रिति स्वः। सः। अग्निम्। सः। अर्केण। वि। बबाधे। तमांसि।

बृहस्पतिः। गोऽवपुषः। वलस्य। निः। मज्जानम्। न। पर्वणः। जभार॥ ९॥

हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः।

अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः॥ १०॥

हिमाऽइव। पर्णा। मुषिता। वनानि। बृहस्पतिना। अकृपयत्। वलः। गाः।

अननुऽकृत्यम्। अपुनरिति। चकार। यात्। सूर्यामासा। मिथः। उत्ऽचरातः॥ १०॥

अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन्।

रात्र्यां तमो अदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिं विदद्गाः॥ ११॥

अभि। श्यावम्। न। कृशनेभिः। अश्वम्। नक्षत्रेभिः। पितरः। द्याम्। अपिंशन्।

रात्र्याम्। तमः। अदधुः। ज्योतिः। अहन्। बृहस्पतिः। भिनत्। अद्रिम्। विदत्। गाः॥ ११॥

इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति।

बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात्॥ १२॥ [१८] {५}

इदम्। अकर्म। नमः। अभ्रियाय। यः। पूर्वीः। अनु। आऽनोनवीति।

बृहस्पतिः। सः। हि। गोभिः। सः। अश्वैः। सः। वीरेभिः। सः। नृऽभिः। नः। वयः। धात्॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[६९] [१२ सुमित्रो वाध्र्यश्वः। अग्निः। त्रिष्टुप्, १-२ जगती।]

भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः।
यदीं सुमित्रा विशो अग्र इन्धते घृतेनाहुतो जरते दविद्युतत्॥ १॥

भद्राः। अग्नेः। वध्रिऽअश्वस्य। सम्ऽदृशः। वामी। प्रऽनीतिः। सुऽरणाः। उपऽइतयः।
यत्। ईम्। सुऽमित्राः। विशः। अग्रे। इन्धते। घृतेन। आऽहुतः। जरते। दविद्युतत्॥ १॥

घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनम्।
घृतेनाहुत उर्विया वि पप्रथे सूर्यइव रोचते सर्पिरासुतिः॥ २॥

घृतम्। अग्नेः। वध्रिऽअश्वस्य। वर्धनम्। घृतम्। अन्नम्। घृतम्। ऊँ इति। अस्य। मेदनम्।
घृतेन। आऽहुतः। उर्विया। वि। पप्रथे। सूर्यःऽइव। रोचते। सर्पिःऽआसुतिः॥ २॥

यत्ते मनुर्यदनीकं सुमित्रः समीधे अग्ने तदिदं नवीयः।
स रेवच्छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः॥ ३॥

यत्। ते। मनुः। यत्। अनीकम्। सुऽमित्रः। सम्ऽईधे। अग्ने। तत्। इदम्। नवीयः।
सः। रेवत्। शोच। सः। गिरः। जुषस्व। सः। वाजम्। दर्षि। सः। इह। श्रवः। धाः॥ ३॥

यं त्वा पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व।
स नः स्तिपा उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे॥ ४।

यम्। त्वा। पूर्वम्। ईळितः। वध्रिऽअश्वः। सम्ऽईधे। अग्ने। सः। इदम्। जुषस्व।
सः। नः। स्तिऽपाः। उत। भव। तनूऽपाः। दात्रम्। रक्षस्व। यत्। इदम्। ते। अस्मे इति॥ ४॥

भवा द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीदभिमातिर्जनानाम्।
शूरइव धृष्णुश्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य नाम॥ ५॥

भव। द्युम्नी। वाध्रिऽअश्व। उत। गोपाः। मा। त्वा। तारीत्। अभिऽमातिः। जनानाम्।
शूरःऽइव। धृष्णुः। च्यवनः। सुऽमित्रः। प्र। नु। वोचम्। वाध्रिऽअश्वस्य। नाम॥ ५॥

समज्र्या पर्वत्या३ वसूनि दासा वृत्राण्यार्या जिगेथ।
शूरइव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँरभि ष्याः॥ ६॥ [१९]

सम्। अज्र्या। पर्वत्या। वसूनि। दासा। वृत्राणि। आर्या। जिगेथ।
शूरःऽइव। धृष्णुः। च्यवनः। जनानाम्। त्वम्। अग्ने। पृतनाऽयून्। अभि। स्याः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्त्रस्तरीः शतनीथ ऋभ्वा।

द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु॥ ७॥

दीर्घऽतन्तुः। बृहत्ऽउक्षा। अयम्। अग्निः। सहस्रऽस्तरीः। शतऽनीथः। ऋभ्वा।

द्युऽमान्। द्युमत्ऽसु। नृऽभिः। मृज्यमानः। सुऽमित्रेषु। दीदयः। देवयत्ऽसु॥ ७॥

त्वे धेनुः सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक्।

त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः॥ ८॥

त्वे इति। धेनुः। सुऽदुघा। जातऽवेदः। असश्चताऽइव। समना। सबःऽधुक्।

त्वम्। नृऽभिः। दक्षिणावत्ऽभिः। अग्ने। सुऽमित्रेभिः। इध्यसे। देवयत्ऽभिः॥ ८॥

देवाश्चित्ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन्।

यत्संपृच्छं मानुषीर्विश आयन्त्वं नृभिरजयस्त्वावृधेभिः॥ ९॥

देवाः। चित्। ते। अमृताः। जातऽवेदः। महिमानम्। वाध्रिऽअश्व। प्र। वोचन्।

यत्। सम्ऽपृच्छम्। मानुषीः। विशः। आयन्। त्वम्। नृऽभिः। अजयः। त्वाऽवृधेभिः॥ ९॥

पितेव पुत्रमबिभरुपस्थे त्वामग्ने बध्र्यश्वः सपर्यन्।

जुषाणो अस्य समिधं यविष्ठोत पूर्वाँ अवनोर्व्राधतश्चित्॥ १०॥

पिताऽइव। पुत्रम्। अबिभः। उपऽस्थे। त्वाम्। अग्ने। वध्रिऽअश्वः। सपर्यन्।

जुषाणः। अस्य। सम्ऽइधम्। यविष्ठ। उत। पूर्वान्। अवनोः। व्राधतः। चित्॥ १०॥

शश्वदग्निर्वध्र्यश्वस्य शत्रून्नृभिर्जिगाय सुतसोमवद्भिः।

समनं चिददहश्चित्रभानोऽव व्राधन्तमभिनद्वृधश्चित्॥ ११॥

शश्वत्। अग्निः। वध्रिऽअश्वस्य। शत्रून्। नृऽभिः। जिगाय। सुतसोमवत्ऽभिः।

समनम्। चित्। अदहः। चित्रभानो इति चित्रऽभानो। अव। व्राधन्तम्। अभिनत्। वृधः। चित्॥ ११॥

अयमग्निर्वध्र्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः।

स नो अजामीँरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व॥ १२॥ [२०]

अयम्। अग्निः। वध्रिऽअश्वस्य। वृत्रऽहा। सनकात्। प्रऽइद्धः। नमसा। उपऽवाक्यः।

सः। नः। अजामीन्। उत। वा। विऽजामीन्। अभि। तिष्ठ। शर्धतः। वाध्रिऽअश्व॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७०] [११ सुमित्रो वाध्र्यश्वः। आप्रीसूक्तं= (१ इध्मः समिद्धोऽग्निर्वा, २ नराशंसः, ३ इळः, ४ बर्हिः, ५ देवीर्द्वारः, ६, उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः, सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः)। त्रिष्टुप्।]

इमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीम्।
वर्ष्मन् पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुक्रतो देवयज्या॥ १॥

इमाम्। मे। अग्ने। सम्ऽइधम्। जुषस्व। इळः। पदे। प्रति। हर्य। घृताचीम्।
वर्ष्मन्। पृथिव्याः। सुदिनऽत्वे। अह्नाम्। ऊर्ध्वः। भव। सुक्रतो इति सुऽक्रतो। देवऽयज्या॥ १॥

आ देवानामग्रयावेह यातु नराशंसो विश्वरूपेभिरश्वैः।
ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सुषूदत्॥ २॥

आ। देवानाम्। अग्रऽयावा। इह। यातु। नराशंसः। विश्वऽरूपेभिः। अश्वैः।
ऋतस्य। पथा। नमसा। मियेधः। देवेभ्यः। देवऽतमः। सुसूदत्॥ २॥

शश्वत्तममीळते दूत्याय हविष्मन्तो मनुष्यासो अग्निम्।
वहिष्ठैरश्वैः सुवृता रथेना देवान् वक्षि नि षदेह होता॥ ३॥

शश्वत्ऽतमम्। ईळते। दूत्याय। हविष्मन्तः। मनुष्यासः। अग्निम्।
वहिष्ठैः। अश्वैः। सुऽवृता। रथेन। आ। देवान्। वक्षि। नि। सद। इह। होता॥ ३॥

वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्वस्मे।
अहेळता मनसा देव बर्हिरिन्द्रज्येष्ठाँ उशतो यक्षि देवान्॥ ४॥

वि। प्रथताम्। देवऽजुष्टम्। तिरश्चा। दीर्घम्। द्राघ्मा। सुरभि। भूतु। अस्मे इति।
अहेळता। मनसा। देव। बर्हिः। इन्द्रऽज्येष्ठान्। उशतः। यक्षि। देवान्॥ ४॥

दिवो वा सानु स्पृशता वरीयः पृथिव्या वा मात्रया वि श्रयध्वम्।
उशतीर्द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वम्॥ ५॥ [२१]

दिवः। वा। सानु। स्पृशत। वरीयः। पृथिव्या। वा। मात्रया। वि। श्रयध्वम्।
उशतीः। द्वारः। महिना। महत्ऽभिः। देवम्। रथम्। रथऽयुः। धारयध्वम्॥ ५॥

देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ।
आ वां देवास उशती उशन्त उरौ सीदन्तु सुभगे उपस्थे॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवी इति । दिवः । दुहितरा । सुशिल्पे इति सुऽशिल्पे । उषसानक्ता । सदताम् । नि । योनौ ।
आ । वाम् । देवासः । उशती इति । उशन्तः । उरौ । सीदन्तु । सुभगे इति सुऽभगे । उपऽस्थे ॥ ६ ॥

ऊर्ध्वो ग्रावा बृहदग्निः समिद्धः प्रिया धामान्यदितेरुपस्थे ।

पुरोहितावृत्विजा यज्ञे अस्मिन् विदुष्टरा द्रविणमा यजेथाम् ॥ ७ ॥

ऊर्ध्वः । ग्रावा । बृहत् । अग्निः । सम्ऽइद्धः । प्रिया । धामानि । अदितेः । उपऽस्थे ।
पुरःऽहितौ । ऋत्विजा । यज्ञे । अस्मिन् । विदुःऽतरा । द्रविणम् । आ । यजेथाम् ॥ ७ ॥

तिस्रो देवीर्बर्हिरिदं वरीय आ सीदत चकृमा वः स्योनम् ।

मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषन्त ॥ ८ ॥

तिस्रः । देवीः । बर्हिः । इदम् । वरीयः । आ । सीदत । चकृम । वः । स्योनम् ।
मनुष्वत् । यज्ञम् । सुऽधिता । हवींषि । इळा । देवी । घृतऽपदी । जुषन्त ॥ ८ ॥

देव त्वष्टर्यद्ध चारुत्वमानड्यदङ्गिरसामभवः सचाभूः ।

स देवानां पाथ उप प्र विद्वानुशन् यक्षि द्रविणोदः सुरत्नः ॥ ९ ॥

देव । त्वष्टः । यत् । ह । चारुऽत्वम् । आनट् । यत् । अङ्गिरसाम् । अभवः । सचाऽभूः ।
सः । देवानाम् । पाथः । उप । प्र । विद्वान् । उशन् । यक्षि । द्रविणःऽदः । सुऽरत्नः ॥ ९ ॥

वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान् ।

स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥ १० ॥

वनस्पते । रशनया । निऽयूय । देवानाम् । पाथः । उप । वक्षि । विद्वान् ।
स्वदाति । देवः । कृणवत् । हवींषि । अवताम् । द्यावापृथिवी इति । हवम् । मे ॥ १० ॥

आग्ने वह वरुणमिष्टये न इन्द्रं दिवो मरुतो अन्तरिक्षात् ।

सीदन्तु बर्हिर्विश्व आ यजत्राः स्वाहा देवा अमृता मादयन्ताम् ॥ ११ ॥ [२२]

आ । अग्ने । वह । वरुणम् । इष्टये । नः । इन्द्रम् । दिवः । मरुतः । अन्तरिक्षात् ।
सीदन्तु । बर्हिः । विश्वे । आ । यजत्राः । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥

[७१] [११ बृहस्पतिराङ्गिरसः । ज्ञानम् । त्रिष्टुप्, ९ जगती ।]

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।

यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बृहस्पते। प्रथमम्। वाचः। अग्रम्। यत्। प्र। ऐरत। नामऽधेयम्। दधानाः॥ यत्। एषाम्।
श्रेष्ठम्। यत्। अरिप्रम्। आसीत्। प्रेणा। तत्। एषाम्। निऽहितम्। गुहा। आविः॥ १॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ २॥

सक्तुम्ऽइव। तितउना। पुनन्तः। यत्र। धीराः। मनसा। वाचम्। अक्रत।
अत्र। सखायः। सख्यानि। जानते। भद्रा। एषाम्। लक्ष्मीः। निऽहिता। अधि। वाचि॥ २॥

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते॥ ३॥

यज्ञेन। वाचः। पदऽवीयम्। आयन्। ताम्। अनु। अविन्दन्। ऋषिषु। प्रऽविष्टाम्।
ताम्। आऽभृत्य। वि। अदधुः। पुरुऽत्रा। ताम्। सप्त। रेभाः। अभि। सम्। नवन्ते॥ ३॥

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं१वि सस्रे जायेव पत्य उशती सुवासाः॥ ४॥

उत। त्वः। पश्यन्। न। ददर्श। वाचम्। उत। त्वः। शृण्वन्। न। शृणोति। एनाम्।
उतो इति। त्वस्मै। तन्वम्। वि। सस्रे। जायाऽइव। पत्ये। उशती। सुऽवासाः॥ ४॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्॥ ५॥ [२३]

उत। त्वम्। सख्ये। स्थिरऽपीतम्। आहुः। न। एनम्। हिन्वन्ति। अपि। वाजिनेषु।
अधेन्वा। चरति। मायया। एषः। वाचम्। शुश्रुऽवान्। अफलाम्। अपुष्पाम्॥ ५॥

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम्॥ ६॥

यः। तित्याज। सचिऽविदम्। सखायम्। न। तस्य। वाचि। अपि। भागः। अस्ति।
यत्। ईम्। शृणोति। अलकम्। शृणोति। नहि। प्रऽवेद। सुऽकृतस्य। पन्थाम्॥ ६॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः।
आदघ्नास उपकक्षास उ त्वे ह्रदाइव स्नात्वा उ त्वे ददृश्रे॥ ७॥

अक्षण्ऽवन्तः। कर्णवन्तः। सखायः। मनःऽजवेषु। असमाः। बभूवुः।
आदघ्नासः। उपऽकक्षासः। ऊँ इति। त्वे। ह्रदाःऽइव। स्नात्वाः। ऊँ इति। त्वे। ददृश्रे॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः।

अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे॥ ८॥

हृदा। तष्टेषु। मनसः। जवेषु। यत्। ब्राह्मणाः। सम्ऽयजन्ते। सखायः।

अत्र। अह। त्वम्। वि। जहुः। वेद्याभिः। ओहऽब्रह्माणः। वि। चरन्ति। ॐ इति। त्वे॥ ८॥

इमे ये नार्वाङ्न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः।

त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः॥ ९॥

इमे। ये। न। अर्वाक्। न। परः। चरन्ति। न। ब्राह्मणासः। न। सुतेऽकरासः।

ते। एते। वाचम्। अभिऽपद्य। पापया। सिरीः। तन्त्रम्। तन्वते। अप्रऽजज्ञयः॥ ९॥

सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः।

किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय॥ १०॥

सर्वे। नन्दन्ति। यशसा। आऽगतेन। सभाऽसहेन। सख्या। सखायः।

किल्बिषऽस्पृत्। पितुऽसनिः। हि। एषाम्। अरम्। हितः। भवति। वाजिनाय॥ १०॥

ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु।

ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः॥ ११॥ [२४]

ऋचाम्। त्वः। पोषम्। आस्ते। पुपुष्वान्। गायत्रम्। त्वः। गायति। शक्वरीषु।

ब्रह्मा। त्वः। वदति। जातऽविद्याम्। यज्ञस्य। मात्राम्। वि। मिमीते। ॐ इति। त्वः॥ ११॥

इत्याश्वलायन-संहितायाम्

अष्टमाष्टके

द्वितीयोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ अष्टमाष्टके तृतीयोऽध्यायः ॥

[७२] [९लौक्यो बृहस्पतिः, बृहस्पतिराङ्गिरसो वा, दाक्षायणी अदितिर्वा।
देवाः। अनुष्टुप्।]

देवानां नु वयं जाना प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे॥ १॥

देवानाम्। नु। वयम्। जाना। प्र। वोचाम। विपन्यया।

उक्थेषु। शस्यमानेषु। यः। पश्यात्। उत्ऽतरे। युगे॥ १॥

ब्रह्मणस्पतिरेता सं कर्मारइवाधमत्। देवानां पूर्व्ये युगेऽसतः सदजायत॥ २॥

ब्रह्मणः। पतिः। एता। सम्। कर्मारःऽइव। अधमत्।

देवानाम्। पूर्व्ये। युगे। असतः। सत्। अजायत॥ २॥

देवानां युगे प्रथमेऽसतः सदजायत। तदाशा अन्वजायन्त तदुत्तानपदस्परि॥ ३।

देवानाम्। युगे। प्रथमे। असतः। सत्। अजायत।

तत्। आशाः। अनु। अजायन्त। तत्। उत्तानऽपदः। परि॥ ३॥

भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त। अदितेर्दक्षो अजायत दक्षाद्वदितिः परि॥ ४॥

भूः। जज्ञे। उत्तानऽपदः। भुवः। आशाः। अजायन्त।

अदितेः। दक्षः। अजायत। दक्षात्। ऊँ इति। अदितिः। परि॥ ४॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायन्त भद्रा अमृतबन्धवः॥ ५॥ [१]

अदितिः। हि। अजनिष्ट। दक्ष। या। दुहिता। तव।

ताम्। देवाः। अनु। अजायन्त। भद्राः। अमृतऽबन्धवः॥ ५॥

यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत। अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत॥ ६॥

यत्। देवाः। अदः। सलिले। सुऽसंरब्धाः। अतिष्ठत।

अत्र। वः। नृत्यताम्ऽइव। तीव्रः। रेणुः। अप। आयत॥ ६॥

यद्देवा यतयो यथा भुवनान्यपिन्वत। अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्। देवाः। यतयः। यथा। भुवनानि। अपिन्वत।

अत्र। समुद्रे। आ। गूळ्हम्। आ। सूर्यम्। अजभर्तन॥ ७॥

अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि। देवाँ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यत्॥ ८॥

अष्टौ। पुत्रासः। अदितेः। ये। जाताः। तन्वः। परि।

देवान्। उप। प्र। ऐत्। सप्तऽभिः। परा। मार्ताण्डम्। आस्यत्॥ ८॥

सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगम्। प्रजायै मृत्यवे त्वत्पुनर्मार्ताण्डमाभरत्॥ ९॥ [२]

सप्तऽभिः। पुत्रैः। अदितिः। उप। प्र। ऐत्। पूर्व्यम्। युगम्।

प्रऽजायै। मृत्यवे। त्वत्। पुनः। मार्ताण्डम्। आ। अभरत्॥ ९॥

[७३] [११ गौरिवीतिः शाक्त्यः। इन्द्रः। त्रिष्टुप्।]

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः।

अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा॥ १॥

जनिष्ठाः। उग्रः। सहसे। तुराय। मन्द्रः। ओजिष्ठः। बहुलऽअभिमानः।

अवर्धन्। इन्द्रम्। मरुतः। चित्। अत्र। माता। यत्। वीरम्। दधनत्। धनिष्ठा॥ १॥

द्रुहो निषत्ता पृशनी चिदेवैः पुरू शंसेन वावृधुष्ट इन्द्रम्।

अभीवृतेव ता महापदेन ध्वान्तात्प्रपित्वादुदरन्त गर्भाः॥ २॥

द्रुहः। निऽसत्ता। पृशनी। चित्। एवैः। पुरु। शंसेन। ववृधुः। ते। इन्द्रम्।

अभिवृताऽइव। ता। महाऽपदेन। ध्वान्तात्। प्रऽपित्वात्। उत्। अरन्त। गर्भाः॥ २॥

ऋष्वा ते पादा प्र यज्जिगास्यवर्धन्वाजा उत ये चिदत्र।

त्वमिन्द्र सालावृकान्त्सहस्रमासन्दधिषे अश्विना ववृत्याः॥ ३॥

ऋष्वा। ते। पादा। प्र। यत्। जिगासि। अवर्धन्। वाजाः। उत। ये। चित्। अत्र।

त्वम्। इन्द्र। सालावृकान्। सहस्रम्। आसन्। दधिषे। अश्विना। आ। ववृत्याः॥ ३॥

समना तूर्णिरुप यासि यज्ञमा नासत्या सख्याय वक्षि।

वसाव्यामिन्द्र धारयः सहस्राश्विना शूर ददतुर्मघानि॥ ४॥

समना। तूर्णिः। उप। यासि। यज्ञम्। आ। नासत्या। सख्याय। वक्षि।

वसाव्याम्। इन्द्र। धारयः। सहस्रा। अश्विना। शूर। ददतुः। मघानि॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मन्दमान ऋतादधि प्रजायै सखिभिरिन्द्र इषिरेभिरर्थम्।

आभिर्हि माया उप दस्युमागान्मिहः प्र तम्रा अवपत्तमांसि॥ ५॥ [३]

मन्दमानः। ऋतात्। अधि। प्रऽजायै। सखिऽभिः। इन्द्रः। इषिरेभिः। अर्थम्।

आ। आभिः। हि। मायाः। उप। दस्युम्। आ। अगात्। मिहः। प्र। तम्राः। अवपत्। तमांसि॥ ५॥

सनामाना चिद् ध्वसयो न्यस्मा अवाहन्निन्द्र उषसो यथानः।

ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघन्थ॥ ६॥

सऽनामाना। चित्। ध्वसयः। नि। अस्मै। अव। अहन्। इन्द्रः। उषसः। यथा। अनः।

ऋष्वैः। अगच्छः। सखिऽभिः। निऽकामैः। साकम्। प्रतिऽस्था। हृद्या। जघन्थ॥ ६॥

त्वं जघन्थ नमुचिं मखस्युं दासं कृण्वान ऋषये विमायम्।

त्वं चकर्थ मनवे स्योनान्पथो देवत्राञ्जसेव यानान्॥ ७॥

त्वम्। जघन्थ। नमुचिम्। मखस्युम्। दासम्। कृण्वानः। ऋषये। विऽमायम्।

त्वम्। चकर्थ। मनवे। स्योनान्। पथः। देवऽत्रा। अञ्जसाऽइव। यानान्॥ ७॥

त्वमेतानि पप्रिषे वि नामेशान इन्द्र दधिषे गभस्तौ।

अनु त्वा देवाः शवसा मदन्त्युपरिबुध्नान्वनिनश्चकर्थ॥ ८॥

त्वम्। एतानि। पप्रिषे। वि। नाम। ईशानः। इन्द्र। दधिषे। गभस्तौ।

अनु। त्वा। देवाः। शवसा। मदन्ति। उपरिऽबुध्नान्। वनिनः। चकर्थ॥ ८॥

चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात्।

पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु॥ ९॥

चक्रम्। यत्। अस्य। अप्ऽसु। आ। निऽसत्तम्। उतो इति। तत्। अस्मै। मधु। इत्। चच्छद्यात्।

पृथिव्याम्। अतिऽसितम्। यत्। ऊधः। पयः। गोषु। अदधाः। ओषधीषु॥ ९॥

अश्वादियायेति यद्वदन्त्योजसो जातमुत मन्य एनम्।

मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद॥ १०॥

अश्वात्। इयाय। इति। यत्। वदन्ति। ओजसः। जातम्। उत। मन्ये। एनम्।

मन्योः। इयाय। हर्म्येषु। तस्थौ। यतः। प्रऽजज्ञे। इन्द्रः। अस्य। वेद॥ १०॥

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः।

अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान्निधयेव बद्धान्॥ ११॥ [४]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वयः। सुऽपर्णाः। उप। सेदुः। इन्द्रम्। प्रियऽमेधाः। ऋषयः। नाधमानाः।
अप। ध्वान्तम्। ऊर्णुहि। पूर्धि। चक्षुः। मुमुग्धि। अस्मान्। निधयाऽइव। बद्धान्॥ ११॥

[७४] [६ गौरिवीतिः शाक्त्यः। इन्द्रः। त्रिष्टुप्।]

वसूनां वा चर्कृष इयक्षन्धिया वा यज्ञैर्वा रोदस्योः।
अर्वन्तो वा ये रयिमन्तः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः॥ १॥
वसूनाम्। वा। चर्कृषे। इयक्षन्। धिया। वा। यज्ञैः। वा। रोदस्योः।
अर्वन्तः। वा। ये। रयिऽमन्तः। सातौ। वनुम्। वा। ये। सुऽश्रुणम्। सुऽश्रुतः। धुरिति धुः॥ १॥
हव एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षाम्।
चक्षाणा यत्र सुविताय देवा द्यौर्न वारेभिः कृणवन्त स्वैः॥ २॥
हवः। एषाम्। असुरः। नक्षत। द्याम्। श्रवस्यता। मनसा। निंसत। क्षाम्।
चक्षाणाः। यत्र। सुविताय। देवाः। द्यौः। न। वारेभिः। कृणवन्त। स्वैः॥ २॥
इयमेषाममृतानां गीः सर्वताता ये कृपणन्त रत्नम्।
धियं च यज्ञं च साधन्तस्ते नो धान्तु वसव्य१मसामि॥ ३॥
इयम्। एषाम्। अमृतानाम्। गीः। सर्वऽताता। ये। कृपणन्त। रत्नम्।
धियम्। च। यज्ञम्। च। साधन्तः। ते। नः। धान्तु। वसव्यम्। असामि॥ ३॥
आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान्।
सकृत्स्वं१ ये पुरुपुत्रां महीं सहस्रधारां बृहतीं दुदुक्षन्॥ ४॥
आ। तत्। ते। इन्द्र। आयवः। पनन्त। अभि। ये। ऊर्वम्। गोऽमन्तम्। तितृत्सान्।
सकृत्ऽस्वम्। ये। पुरुऽपुत्राम्। महीम्। सहस्रऽधाराम्। बृहतीम्। दुधुक्षन्॥ ४॥
शचीव इन्द्रमवसे कृणुध्वमनानतं दमयन्तं पृतन्यून्।
ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः॥ ५॥
शचीऽवः। इन्द्रम्। अवसे। कृणुध्वम्। अनानतम्। दमयन्तम्। पृतन्यून्।
ऋभुक्षणम्। मघऽवानम्। सुऽवृक्तिम्। भर्ता। यः। वज्रम्। नर्यम्। पुरुऽक्षुः॥ ५॥
यद्वावान पुरुतमं पुराषाळा वृत्रहेन्द्रो नामान्यप्राः।
अचेति प्रासहस्पतिस्तुविष्मान् यदीमुश्मसि कर्तवे करत्तत्॥ ६॥ [५]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत् । व॒वान॑ । पु॒रु॒ऽतम॑म् । पु॒रा॒षाट् । आ । वृ॒त्र॒ऽहा । इन्द्र॑: । नामा॑नि । अ॒प्रा॒: ।

अचे॑ति । प्र॒ऽसह॑: । पति॑: । तुवि॑ष्मान् । यत् । ई॒म् । उ॒श्मसि॑ । कर्त॑वे । कर॑त् । तत् ॥ ६ ॥

[७५] [१० सिन्धुक्षित् प्रैयमेधः । नद्यः । जगती ।]

प्र सु व॑ आपो महि॒मान॑मुत्त॒मं का॒रुर्वो॑चाति॒ सद॑ने वि॒वस्व॑तः ।

प्र स॒प्तस॑प्त त्रे॒धा हि च॑क्र॒मुः प्र सृत्व॑रीणा॒मति॒ सिन्धु॒रोज॑सा ॥ १ ॥

प्र । सु । व॒: । आ॒प॒: । म॒हि॒मान॑म् । उ॒त्ऽत॒मम् । का॒रु॒: । वो॒चा॒ति॒ । सद॑ने । वि॒वस्व॑तः ।

प्र । स॒प्तऽस॑प्त । त्रे॒धा । हि । च॒क्र॒मुः । प्र । सृत्व॑रीणाम् । अति॑ । सिन्धु॑: । ओज॑सा ॥ १ ॥

प्र ते॑ऽरद॒द्वरु॑णो॒ यात॑वे प॒थः सिन्धो॒ यद्वाजाँ॑ अ॒भ्यद्र॑व॒स्त्वम् ।

भूम्या॒ अधि॑ प्र॒वता॑ यासि॒ सानु॑ना॒ यदे॑षा॒मग्रं॒ जग॑तामि॒र॒ज्यसि॑ ॥ २ ॥

प्र । ते॒ । अ॒र॒द॒त् । वरु॑णः । यात॑वे । प॒थः । सिन्धो॒ इति॑ । यत् । वाजा॑न् । अ॒भि । अद्र॑वः । त्वम् ।

भूम्या॑: । अधि॑ । प्र॒ऽवता॑ । या॒सि॒ । सानु॑ना । यत् । ए॒षा॒म् । अग्र॑म् । जग॑ताम् । इ॒र॒ज्यसि॑ ॥ २ ॥

दि॒वि स्व॒नो य॑तते॒ भूम्यो॒पर्य॑न॒न्तं शुष्म॒मुदि॑यर्ति॒ भा॒नुना॑ ।

अ॒भ्रादि॑व॒ प्र स्त॑नयन्ति वृ॒ष्टय॒: सिन्धु॒र्यदेति॑ वृष॒भो न रोरु॑वत् ॥ ३ ॥

दि॒वि । स्व॒नः । य॒त॒ते॒ । भूम्या॑ । उ॒परि॑ । अ॒न॒न्तम् । शुष्म॑म् । उत् । इ॒य॒र्ति॒ । भा॒नुना॑ ।

अ॒भ्रात्ऽइ॑व । प्र । स्त॒न॒य॒न्ति॒ । वृ॒ष्टय॑: । सिन्धु॑: । यत् । एति॑ । वृ॒ष॒भः । न । रोरु॑वत् ॥ ३ ॥

अ॒भि त्वा॑ सिन्धो॒ शिशु॒मिन्न मा॒तरो॑ वा॒श्रा अ॑र्षन्ति॒ पय॑सेव धे॒नव॑: ।

राजे॑व॒ युध्वा॑ नयसि॒ त्वमित्सि॒चौ॒ यदा॑सा॒मग्रं॑ प्र॒वता॒मिन॑क्षसि ॥ ४ ॥

अ॒भि । त्वा॒ । सि॒न्धो॒ इति॑ । शिशु॑म् । इत् । न । मा॒तर॑: । वा॒श्रा॑: । अ॒र्ष॒न्ति॒ । पय॑साऽइव । धे॒नव॑: ।

राजा॑ऽइव । युध्वा॑ । न॒य॒सि॒ । त्वम् । इत् । सिचौ॑ । यत् । आ॒सा॒म् । अग्र॑म् । प्र॒ऽवता॑म् । इन॑क्षसि ॥ ४ ॥

इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि॒ स्तोमं॑ सचता॒ परु॒ष्ण्या ।

अ॒सि॒क्न्या म॑रुद्वृधे वि॒तस्त॒यार्जी॑कीये शृणु॒ह्या सु॒षोम॑या ॥ ५ ॥ [६]

इ॒मम् । मे॒ । ग॒ङ्गे॒ । य॒मु॒ने॒ । स॒र॒स्व॒ति॒ । शुतु॑द्रि । स्तोम॑म् । स॒च॒त॒ । परु॑ष्णि । आ ।

अ॒सि॒क्न्या । म॒रु॒त्ऽवृ॒धे॒ । वि॒तस्त॑या । आर्जी॑कीये । शृ॒णु॒हि । आ । सु॒ऽसोम॑या ॥ ५ ॥

सि॒ता॒सि॒ते स॒रि॒ते यत्र॑ सं॒गे तत्रा॑प्लु॒तासो॒ दिव॒मुत्प॑तन्ति ।

ये वै त॒न्व१॒॑ वि सृ॒जन्ति॒ धीरा॒स्ते वै ज॒नासो॑ अ॒मृ॒त॒त्वं भ॑जन्ते ॥ ६ ॥ ★

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सितासिते इति। सरिते इति। यत्र। सङ्गे इति सम्ऽगे। तत्र। आऽप्लुतासः। दिवम्। उत्। पतन्ति।
ये। वै। तन्वम्। वि। सृजन्ति। धीराः। ते। जनासः। अमृतऽत्वम्। भजन्ते ॥ ६ ॥

तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या।
त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ॥ ७ (६) ॥

तृष्टऽअमया। प्रथमम्। यातवे। सऽजूः। सुऽसर्त्वा। रसया। श्वेत्या। त्या।
त्वम्। सिन्धो इति। कुभया। गोऽमतीम्। क्रुमुम्। मेहत्न्वा। सऽरथम्। याभिः। ईयसे ॥ ७ (६) ॥

ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि।
अदब्धा सिन्धुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥ ८ (७) ॥

ऋजीती। एनी। रुशती। महिऽत्वा। परि। ज्रयांसि। भरते। रजांसि।
अदब्धा। सिन्धुः। अपसाम्। अपःऽतमा। अश्वा। न। चित्रा। वपुषीऽइव। दर्शता ॥ ८ (७) ॥

स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती।
ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम् ॥ ९ (८) ॥

सुऽअश्वा। सिन्धुः। सुऽरथा। सुऽवासाः। हिरण्ययी। सुऽकृता। वाजिनीऽवती।
ऊर्णाऽवती। युवतिः। सीलमाऽवती। उत। अधि। वस्ते। सुऽभगा। मधुऽवृधम् ॥ ९ (८) ॥

सुखं रथं युयुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ।
महान् ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः ॥ १० (९) ॥ [७]

सुऽखम्। रथम्। युयुजे। सिन्धुः। अश्विनम्। तेन। वाजम्। सनिषत्। अस्मिन्। आजौ।
महान्। हि। अस्य। महिमा। पनस्यते। अदब्धस्य। स्वऽयशसः। विऽरप्शिनः ॥ १० (९) ॥

[७६] [८ सर्प ऐरावतो जरत्कर्णः। ग्रावाणः। जगती।]

आ व ऋञ्जस ऊर्जां व्युष्टिष्विन्द्रं मरुतो रोदसी अनक्तन।
उभे यथा नो अहनी सचाभुवा सदःसदो वरिवस्यात उद्भिदा ॥ १ ॥

आ। वः। ऋञ्जसे। ऊर्जाम्। विऽउष्टिषु। इन्द्रम्। मरुतः। रोदसी इति। अनक्तन।
उभे इति। यथा। नः। अहनी इति। सचाऽभुवा। सदःऽसदः। वरिवस्यातः। उत्ऽभिदा ॥ १ ॥

तदु श्रेष्ठं सवनं सुनोतनात्यो न हस्तयतो अद्रिः सोतरि।
विदद्ध्य१र्यो अभिभूति पौंस्यं महो राये चित्तरुते यदर्वतः ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्। ॐ इति। श्रेष्ठम्। सवनम्। सुनोतन। अत्यः। न। हस्तऽयतः। अद्रिः। सोतरि।

विदत्। हि। अर्यः। अभिऽभूति। पौंस्यम्। महः। राये। चित्। तरुते। यत्। अर्वतः॥ २॥

तदिद्ध्यस्य सवनं विवेरपो यथा पुरा मनवे गातुमश्रेत्।

गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेमध्वरेष्वध्वराँ अशिश्रयुः॥ ३॥

तत्। इत्। हि। अस्य। सवनम्। विवेः। अपः। यथा। पुरा। मनवे। गातुम्। अश्रेत्।

गोऽअर्णसि। त्वाष्ट्रे। अश्वऽनिर्णिजि। प्र। ईम्। अध्वरेषु। अध्वरान्। अशिश्रयुः॥ ३॥

अप हत रक्षसो भङ्गुरावतः स्कभायत निर्ऋतिं सेधतामतिम्।

आ नो रयिं सर्ववीरं सुनोतन देवाव्यं भरत श्लोकमद्रयः॥ ४॥

अप। हत। रक्षसः। भङ्गुरऽवतः। स्कभायत। निःऽऋतिम्। सेधत। अमतिम्।

आ। नः। रयिम्। सर्वऽवीरम्। सुनोतन। देवऽअव्यम्। भरत। श्लोकम्। अद्रयः॥ ४॥

दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः।

वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्च पितुकृत्तरेभ्यः॥ ५॥ [८]

दिवः। चित्। आ। वः। अमवत्ऽतरेभ्यः। विऽभ्वना। चित्। आश्वपःऽतरेभ्यः।

वायोः। चित्। आ। सोमरभःऽतरेभ्यः। अग्नेः। चित्। अर्च। पितुकृत्ऽतरेभ्यः॥ ५॥

भुरन्तु नो यशसः सोत्वन्धसो ग्रावाणो वाचा दिविता दिवित्मता।

नरो यत्र दुहते काम्यं मध्वाघोषयन्तो अभितो मिथस्तुरः॥ ६॥

भुरन्तु। नः। यशसः। सोतु। अन्धसः। ग्रावाणः। वाचा। दिविता। दिवित्मता।

नरः। यत्र। दुहते। काम्यम्। मधु। आऽघोषयन्तः। अभितः। मिथःऽतुरः॥ ६॥

सुन्वन्ति सोमं रथिरासो अद्रयो निरस्य रसं गविषो दुहन्ति ते।

दुहन्त्यूधरुपसेचनाय कं नरो हव्या न मर्जयन्त आसभिः॥ ७॥

सुन्वन्ति। सोमम्। रथिरासः। अद्रयः। निः। अस्य। रसम्। गोऽइषः। दुहन्ति। ते।

दुहन्ति। ऊधः। उपऽसेचनाय। कम्। नरः। हव्या। न। मर्जयन्ते। आसऽभिः॥ ७॥

एते नरः स्वपसो अभूतन य इन्द्राय सुनुथ सोममद्रयः।

वामंवामं वो दिव्याय धाम्ने वसुवसु वः पार्थिवाय सुन्वते॥ ८॥ [९]

एते। नरः। सुऽअपसः। अभूतन। ये। इन्द्राय। सुनुथ। सोमम्। अद्रयः।

वामम्ऽवामम्। वः। दिव्याय। धाम्ने। वसुऽवसु। वः। पार्थिवाय। सुन्वते॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[७७] [८ स्यूरमश्मिर्भार्गवः। मरुतः। त्रिष्टुप्, ५ जगती।]

अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मन्तो न यज्ञा विजानुषः।
सुमारुतं न ब्रह्माणमर्हसे गणमस्तोष्येषां न शोभसे॥ १॥

अभ्रऽप्रुषः। न। वाचा। प्रुष। वसु। हविष्मन्तः। न। यज्ञाः। विऽजानुषः।
सुऽमारुतम्। न। ब्रह्माणम्। अर्हसे। गणम्। अस्तोषि। एषाम्। न। शोभसे॥ १॥

श्रिये मर्यासो अञ्जीँरकृण्वत सुमारुतं न पूर्वीरति क्षपः।
दिवस्पुत्रास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः॥ २॥

श्रिये। मर्यासः। अञ्जीन्। अकृण्वत। सुऽमारुतम्। न। पूर्वीः। अति। क्षपः।
दिवः। पुत्रासः। एताः। न। येतिरे। आदित्यासः। ते। अक्राः। न। ववृधुः॥ २॥

प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्रान्न सूर्यः।
पाजस्वन्तो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः॥ ३॥

प्र। ये। दिवः। पृथिव्याः। न। बर्हणा। त्मना। रिरिच्रे। अभ्रात्। न। सूर्यः।
पाजस्वन्तः। न। वीराः। पनस्यवः। रिशादसः। न। मर्याः। अभिऽद्यवः॥ ३॥

युष्माकं बुध्ने अपां न यामनि विथुर्यति न मही श्रथर्यति।
विश्वप्सुर्यज्ञो अर्वागयं सु वः प्रयस्वन्तो न सत्राच आ गत॥ ४॥

युष्माकम्। बुध्ने। अपाम्। न। यामनि। विथुर्यति। न। मही। श्रथर्यति।
विश्वऽप्सुः। यज्ञः। अर्वाक्। अयम्। सु। वः। प्रयस्वन्तः। न। सत्राचः। आ। गत॥ ४॥

यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मन्तो न भासा व्युष्टिषु।
श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः॥ ५॥ [१०]

यूयम्। धूःऽसु। प्रऽयुजः। न। रश्मिऽभिः। ज्योतिष्मन्तः। न। भासा। विऽउष्टिषु।
श्येनासः। न। स्वऽयशसः। रिशादसः। प्रवासः। न। प्रऽसितासः। परिऽप्रुषः॥ ५॥

प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः।
विदानासो वसवो राध्यस्याराच्चिद्द्वेषः सनुतर्युयोत॥ ६॥

प्र। यत्। वहध्वे। मरुतः। पराकात्। यूयम्। महः। सम्ऽवरणस्य। वस्वः।
विदानासः। वसवः। राध्यस्य। आरात्। चित्। द्वेषः। सनुतः। युयोत॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत्।
रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु॥ ७॥
यः। उत्ऽऋचि। यज्ञे। अध्वरेऽस्थाः। मरुत्ऽभ्यः। न। मानुषः। ददाशत्।
रेवत्। सः। वयः। दधते। सुऽवीरम्। सः। देवानाम्। अपि। गोऽपीथे। अस्तु॥ ७॥
ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शंभविष्ठाः।
ते नोऽवन्तु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः॥ ८॥ [११]
ते। हि। यज्ञेषु। यज्ञियासः। ऊमाः। आदित्येन। नाम्ना। शम्ऽभविष्ठाः।
ते। नः। अवन्तु। रथऽतूः। मनीषाम्। महः। च। यामन्। अध्वरे। चकानाः॥ ८॥

[७८] [८ स्यूमरश्मिर्भार्गवः। मरुतः। त्रिष्टुप्, २, ५-७ जगत्यः।]

विप्रासो न मन्मभिः स्वाध्यो देवाव्यो३ न यज्ञैः स्वप्नसः।
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः॥ १॥
विप्रासः। न। मन्मऽभिः। सुऽआध्यः। देवऽअव्यः। न। यज्ञैः। सुऽअप्नसः।
राजानः। न। चित्राः। सुऽसंदृशः। क्षितीनाम्। न। मर्याः। अरेपसः॥ १॥
अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते॥ २॥
अग्निः। न। ये। भ्राजसा। रुक्मऽवक्षसः। वातासः। न। स्वऽयुजः। सद्यःऽऊतयः।
प्रऽज्ञातारः। न। ज्येष्ठाः। सुऽनीतयः। सुऽशर्माणः। न। सोमाः। ऋतम्। यते॥ २॥
वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः।
वर्मण्वन्तो न योधाः शिमीवन्तः पितॄणां न शंसाः सुरातयः॥ ३॥
वातासः। न। ये। धुनयः। जिगत्नवः। अग्नीनाम्। न। जिह्वाः। विऽरोकिणः।
वर्मण्ऽवन्तः। न। योधाः। शिमीऽवन्तः। पितॄणाम्। न। शंसाः। सुऽरातयः॥ ३॥
रथानां न येऽराः सनाभयो जिगीवांसो न शूरा अभिद्यवः।
वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः॥ ४॥
रथानाम्। न। ये। अराः। सऽनाभयः। जिगीवांसः। न। शूराः। अभिऽद्यवः।
वरेऽयवः। न। मर्याः। घृतऽप्रुषः। अभिऽस्वर्तारः। अर्कम्। न। सुऽस्तुभः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः।

आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अङ्गिरसो न सामभिः॥ ५॥ [१२]

अश्वासः। न। ये। ज्येष्ठासः। आशवः। दिधिषवः। न। रथ्यः। सुऽदानवः।

आपः। न। निम्नैः। उदऽभिः। जिगत्नवः। विश्वऽरूपाः। अङ्गिरसः। न। सामऽभिः॥ ५॥

ग्रावाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा।

शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा॥ ६॥

ग्रावाणः। न। सूरयः। सिन्धुऽमातरः। आऽदर्दिरासः। अद्रयः। न। विश्वहा।

शिशूलाः। न। क्रीळयः। सुऽमातरः। महाऽग्रामः। न। यामन्। उत। त्विषा॥ ६॥

उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन्।

सिन्धवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे॥ ७॥

उषसाम्। न। केतवः। अध्वरऽश्रियः। शुभम्ऽयवः। न। अञ्जिऽभिः। वि। अश्वितन्।

सिन्धवः। न। ययियः। भ्राजत्ऽऋष्टयः। पराऽवतः। न। योजनानि। ममिरे॥ ७॥

सुभागान्नो देवाः कृणुता सुरत्नानस्मान्स्तोतॄन्मरुतो वावृधानाः।

अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति॥ ८॥ [१३]

सुऽभागान्। नः। देवाः। कृणुत। सुऽरत्नान्। अस्मान्। स्तोतॄन्। मरुतः। ववृधानाः।

अधि। स्तोत्रस्य। सख्यस्य। गात। सनात्। हि। वः। रत्नऽधेयानि। सन्ति॥ ८॥

[७९] [७ सौचीकोऽग्निर्वैश्वानरो वा, सप्तिर्वा वाजंभरः। अग्निः। त्रिष्टुप्।]

अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु।

नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः॥ १॥

अपश्यम्। अस्य। महतः। महिऽत्वम्। अमर्त्यस्य। मर्त्यासु। विक्षु॥ नाना। हनू इति।

विभृते इति विऽभृते। सम्। भरेते इति। असिन्वती इति। बप्सती इति। भूरि। अत्तः॥ १॥

गुहा शिरो निहितमृधगक्षी असिन्वन्नत्ति जिह्वया वनानि।

अत्राण्यस्मै पड्भिः सं भरन्त्युत्तानहस्ता नमसाधि विक्षु॥ २॥

गुहा। शिरः। निऽहितम्। ऋधक्। अक्षी इति। असिन्वन्। अत्ति। जिह्वया। वनानि।

अत्राणि। अस्मै। पट्ऽभिः। सम्। भरन्ति। उत्तानऽहस्ताः। नमसा। अधि। विक्षु॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र मातुः प्रतरं गुह्यमिच्छन् कुमारो न वीरुधः सर्पदुर्वीः।

ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः॥ ३॥

प्र। मातुः। प्रऽतरम्। गुह्यम्। इच्छन्। कुमारः। न। वीरुधः। सर्पत्। उर्वीः।

ससम्। न। पक्वम्। अविदत्। शुचन्तम्। रिरिह्वांसम्। रिपः। उपऽस्थे। अन्तरिति॥ ३॥

तद्वामृतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति।

नाहं देवस्य मर्त्यश्चिकेताग्निरङ्ग विचेताः स प्रचेताः॥ ४॥

तत्। वाम्। ऋतम्। रोदसी इति। प्र। ब्रवीमि। जायमानः। मातरा। गर्भः। अत्ति।

न। अहम्। देवस्य। मर्त्यः। चिकेत। अग्निः। अङ्ग। विऽचेताः। सः। प्रऽचेताः॥ ४॥

यो अस्मा अन्नं तृष्वा३दधात्याज्यैर्घृतैर्जुहोति पुष्यति।

तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वम्॥ ५॥

यः। अस्मै। अन्नम्। तृषु। आऽदधाति। आज्यैः। घृतैः। जुहोति। पुष्यति।

तस्मै। सहस्रम्। अक्षऽभिः। वि। चक्षे। अग्ने। विश्वतः। प्रत्यङ्। असि। त्वम्॥ ५॥

किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान्।

अक्रीळन् क्रीळन् हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः॥ ६॥

किम्। देवेषु। त्यजः। एनः। चकर्थ। अग्ने। पृच्छामि। नु। त्वाम्। अविद्वान्।

अक्रीळन्। क्रीळन्। हरिः। अत्तवे। अदन्। वि। पर्वऽशः। चकर्त। गाम्ऽइव। असिः॥ ६॥

विषूचो अश्वान्युयुजे वनेजा ऋजीतिभी रशनाभिर्गृभीतान्।

चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः॥ ७॥ [१४]

विषूचः। अश्वान्। युयुजे। वनेऽजाः। ऋजीतिऽभिः। रशनाभिः। गृभीतान्।

चक्षदे। मित्रः। वसुऽभिः। सुऽजातः। सम्। आनृधे। पर्वऽभिः। ववृधानः॥ ७॥

[८०] [७ सौचीकोऽग्निर्वैश्वानरो वा, सप्तिर्वा वाजंभरः। अग्निः। त्रिष्टुप्।]

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिःष्ठाम्।

अग्नी रोदसी वि चरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरंधिम्॥ १॥

अग्निः। सप्तिम्। वाजम्ऽभरम्। ददाति। अग्निः। वीरम्। श्रुत्यम्। कर्मनिःऽस्थाम्।

अग्निः। रोदसी इति। वि। चरत्। सम्ऽअञ्जन्। अग्निः। नारीम्। वीरऽकुक्षिम्। पुरम्ऽधिम्॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश।

अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि॥ २॥

अग्नेः। अप्नसः। सम्ऽइत्। अस्तु। भद्रा। अग्निः। मही इति। रोदसी इति। आ। विवेश।

अग्निः। एकम्। चोदयत्। समत्ऽसु। अग्निः। वृत्राणि। दयते। पुरूणि॥ २॥

अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम्।

अग्निरत्रिं घर्म उरुष्यदन्तरग्निर्नृमेधं प्रजयासृजत्सम्॥ ३॥

अग्निः। ह। त्यम्। जरतः। कर्णम्। आव। अग्निः। अत्ऽभ्यः। निः। अदहत्। जरूथम्।

अग्निः। अत्रिम्। घर्मे। उरुष्यत्। अन्तः। अग्निः। नृऽमेधम्। प्रऽजया। असृजत्। सम्॥ ३॥

अग्निर्दाद्द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति।

अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा॥ ४॥

अग्निः। दात्। द्रविणम्। वीरऽपेशाः। अग्निः। ऋषिम्। यः। सहस्रा। सनोति।

अग्निः। दिवि। हव्यम्। आ। ततान। अग्नेः। धामानि। विऽभृता। पुरुऽत्रा॥ ४॥

अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः।

अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम्॥ ५॥

अग्निम्। उक्थैः। ऋषयः। वि। ह्वयन्ते। अग्निम्। नरः। यामनि। बाधितासः।

अग्निम्। वयः। अन्तरिक्षे। पतन्तः। अग्निः। सहस्रा। परि। याति। गोनाम्॥ ५॥

अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः।

अग्निर्गान्धर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता॥ ६॥

अग्निम्। विशः। ईळते। मानुषीः। याः। अग्निम्। मनुषः। नहुषः। वि। जाताः।

अग्निः। गान्धर्वीम्। पथ्याम्। ऋतस्य। अग्नेः। गव्यूतिः। घृते। आ। निऽसत्ता॥ ६॥

अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिम्।

अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व॥ ७॥ [१५]

अग्नये। ब्रह्म। ऋभवः। ततक्षुः। अग्निम्। महाम्। अवोचाम। सुऽवृक्तिम्।

अग्ने। प्र। अव। जरितारम्। यविष्ठ। अग्ने। महि। द्रविणम्। आ। यजस्व॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र मातुः प्रतरं गुह्यमिच्छन् कुमारो न वीरुधः सर्पदुर्वीः ।

ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः ॥ ३ ॥

प्र । मातुः । प्रऽतरम् । गुह्यम् । इच्छन् । कुमारः । न । वीरुधः । सर्पत् । उर्वीः ।

ससम् । न । पक्वम् । अविदत् । शुचन्तम् । रिरिह्वांसम् । रिपः । उपऽस्थे । अन्तरिति ॥ ३ ॥

तद्वामृतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।

नाहं देवस्य मर्त्यश्चिकेताग्निरङ्ग विचेताः स प्रचेताः ॥ ४ ॥

तत् । वाम् । ऋतम् । रोदसी इति । प्र । ब्रवीमि । जायमानः । मातरा । गर्भः । अत्ति ।

न । अहम् । देवस्य । मर्त्यः । चिकेत । अग्निः । अङ्ग । विऽचेताः । सः । प्रऽचेताः ॥ ४ ॥

यो अस्मा अन्नं तृष्वा३दधात्याज्यैर्घृतैर्जुहोति पुष्यति ।

तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वम् ॥ ५ ॥

यः । अस्मै । अन्नम् । तृषु । आऽदधाति । आज्यैः । घृतैः । जुहोति । पुष्यति ।

तस्मै । सहस्रम् । अक्षऽभिः । वि । चक्षे । अग्ने । विश्वतः । प्रत्यङ् । असि । त्वम् ॥ ५ ॥

किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।

अक्रीळन् क्रीळन् हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥ ६ ॥

किम् । देवेषु । त्यजः । एनः । चकर्थ । अग्ने । पृच्छामि । नु । त्वाम् । अविद्वान् ।

अक्रीळन् । क्रीळन् । हरिः । अत्तवे । अदन् । वि । पर्वऽशः । चकर्त । गाम्ऽइव । असिः ॥ ६ ॥

विषूचो अश्वान्युयुजे वनेजा ऋजीतिभी रशनाभिर्गृभीतान् ।

चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः ॥ ७ ॥ [१४]

विषूचः । अश्वान् । युयुजे । वनेऽजाः । ऋजीतिऽभिः । रशनाभिः । गृभीतान् ।

चक्षदे । मित्रः । वसुऽभिः । सुऽजातः । सम् । आनृधे । पर्वऽभिः । ववृधानः ॥ ७ ॥

[८०] [७ सौचीकोऽग्निर्वैश्वानरो वा, सप्तिर्वा वाजंभरः । अग्निः । त्रिष्टुप् ।]

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिःष्ठाम् ।

अग्नी रोदसी वि चरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरंधिम् ॥ १ ॥

अग्निः । सप्तिम् । वाजम्ऽभरम् । ददाति । अग्निः । वीरम् । श्रुत्यम् । कर्मनिःऽस्थाम् ।

अग्निः । रोदसी इति । वि । चरत् । सम्ऽअञ्जन् । अग्निः । नारीम् । वीरम्ऽकुक्षिम् । पुरम्ऽधिम् ॥ १ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश।

अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि॥ २॥

अग्नेः। अप्नसः। सम्ऽइत्। अस्तु। भद्रा। अग्निः। मही इति। रोदसी इति। आ। विवेश।

अग्निः। एकम्। चोदयत्। समत्ऽसु। अग्निः। वृत्राणि। दयते। पुरूणि॥ २॥

अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम्।

अग्निरत्रिं घर्म उरुष्यदन्तरग्निर्नृमेधं प्रजयासृजत्सम्॥ ३॥

अग्निः। ह। त्यम्। जरतः। कर्णम्। आव। अग्निः। अत्ऽभ्यः। निः। अदहत्। जरूथम्।

अग्निः। अत्रिम्। घर्मे। उरुष्यत्। अन्तः। अग्निः। नृऽमेधम्। प्रऽजया। असृजत्। सम्॥ ३॥

अग्निर्दाद्द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति।

अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा॥ ४॥

अग्निः। दात्। द्रविणम्। वीरऽपेशाः। अग्निः। ऋषिम्। यः। सहस्रा। सनोति।

अग्निः। दिवि। हव्यम्। आ। ततान। अग्नेः। धामानि। विऽभृता। पुरुऽत्रा॥ ४॥

अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः।

अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम्॥ ५॥

अग्निम्। उक्थैः। ऋषयः। वि। ह्वयन्ते। अग्निम्। नरः। यामनि। बाधितासः।

अग्निम्। वयः। अन्तरिक्षे। पतन्तः। अग्निः। सहस्रा। परि। याति। गोनाम्॥ ५॥

अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः।

अग्निर्गान्धर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता॥ ६॥

अग्निम्। विशः। ईळते। मानुषीः। याः। अग्निम्। मनुषः। नहुषः। वि। जाताः।

अग्निः। गान्धर्वीम्। पथ्याम्। ऋतस्य। अग्नेः। गव्यूतिः। घृते। आ। निऽसत्ता॥ ६॥

अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिम्।

अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व॥ ७॥ [१५]

अग्नये। ब्रह्म। ऋभवः। ततक्षुः। अग्निम्। महाम्। अवोचाम। सुऽवृक्तिम्।

अग्ने। प्र। अव। जरितारम्। यविष्ठ। अग्ने। महि। द्रविणम्। आ। यजस्व॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८१] [७ विश्वकर्मा भौवनः। विश्वकर्मा। त्रिष्टुप्।]

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश॥ १॥

यः। इमा। विश्वा। भुवनानि। जुह्वत्। ऋषिः। होता। नि। असीदत्। पिता। नः।
सः। आऽशिषा। द्रविणम्। इच्छमानः। प्रथमऽच्छत्। अवरान्। आ। विवेश॥ १॥

किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्।
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः॥ २॥

किम्। स्वित्। आसीत्। अधिऽस्थानम्। आऽरम्भणम्। कतमत्। स्वित्। कथा। आसीत्।
यतः। भूमिम्। जनयन्। विश्वऽकर्मा। वि। द्याम्। और्णोत्। महिना। विश्वऽचक्षाः॥ २॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः॥ ३॥

विश्वतः२चक्षुः। उत। विश्वतः२मुखः। विश्वतः२बाहुः। उत। विश्वतः२पात्।
सम्। बाहुऽभ्याम्। धमति। सम्। पतत्रैः। द्यावाभूमी इति। जनयन्। देवः। एकः॥ ३॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्॥ ४॥

किम्। स्वित्। वनम्। कः। ऊँ इति। सः। वृक्षः। आस। यतः। द्यावापृथिवी इति। निः२ततक्षुः।
मनीषिणः। मनसा। पृच्छत। इत्। ऊँ इति। तत्। यत्। अधिऽअतिष्ठत्। भुवनानि। धारयन्॥ ४॥

या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः॥ ५॥

या। ते। धामानि। परमाणि। या। अवमा। या। मध्यमा। विश्वऽकर्मन्। उत। इमा।
शिक्ष। सखिऽभ्यः। हविषि। स्वधाऽवः। स्वयम्। यजस्व। तन्वम्। वृधानः॥ ५॥

विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम्।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु॥ ६॥

विश्वऽकर्मन्। हविषा। ववृधानः। स्वयम्। यजस्व। पृथिवीम्। उत। द्याम्।
मुह्यन्तु। अन्ये। अभितः। जनासः। इह। अस्माकम्। मघऽवा। सूरिः। अस्तु॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा॥ ७॥ [१६]

वाचः। पतिम्। विश्वऽकर्माणम्। ऊतये। मनःऽजुवम्। वाजे। अद्य। हुवेम।
सः। नः। विश्वानि। हवनानि। जोषत्। विश्वऽशंभूः। अवसे। साधुऽकर्मा॥ ७॥

[८२] [७ विश्वकर्मा भौवनः। विश्वकर्मा। त्रिष्टुप्।]

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने।
यदेदन्ता अददृहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम्॥ १॥

चक्षुषः। पिता। मनसा। हि। धीरः। घृतम्। एने इति। अजनत्। नम्नमाने इति।
यदा। इत्। अन्ताः। अददृहन्त। पूर्वे। आत्। इत्। द्यावापृथिवी इति। अप्रथेताम्॥ १॥

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक्।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः॥ २॥

विश्वऽकर्मा। विऽमनाः। आत्। विऽहायाः। धाता। विऽधाता। परमा। उत। सम्ऽदृक्।
तेषाम्। इष्टानि। सम्। इषा। मदन्ति। यत्र। सप्तऽऋषीन्। परः। एकम्। आहुः॥ २॥

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।
यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या॥ ३॥

यः। नः। पिता। जनिता। यः। विऽधाता। धामानि। वेद। भुवनानि। विश्वा।
यः। देवानाम्। नामऽधाः। एकः। एव। तम्। सम्ऽप्रश्नम्। भुवना। यन्ति। अन्या॥ ३॥

त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि॥ ४॥

ते। आ। अयजन्त। द्रविणम्। सम्। अस्मै। ऋषयः। पूर्वे। जरितारः। न। भूना।
असूर्ते। सूर्ते। रजसि। निऽसत्ते। ये। भूतानि। सम्ऽअकृण्वन्। इमानि॥ ४॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे॥ ५॥

परः। दिवा। परः। एना। पृथिव्या। परः। देवेभिः। असुरैः। यत्। अस्ति।
कम्। स्वित्। गर्भम्। प्रथमम्। दध्रे। आपः। यत्र। देवाः। सम्ऽअपश्यन्त। विश्वे॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे।

अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः॥ ६॥

तम्। इत्। गर्भम्। प्रथमम्। दध्रे। आपः। यत्र। देवाः। सम्ऽअगच्छन्त। विश्वे।

अजस्य। नाभौ। अधि। एकम्। अर्पितम्। यस्मिन्। विश्वानि। भुवनानि। तस्थुः॥ ६॥

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव।

नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति॥ ७॥ [१७]

न। तम्। विदाथ। यः। इमा। जजान। अन्यत्। युष्माकम्। अन्तरम्। बभूव।

नीहारेण। प्रावृताः। जल्प्या। च। असुऽतृपः। उक्थऽशसः। चरन्ति॥ ७॥

[८३] [७ मन्युस्तापसः। मन्युः। त्रिष्टुप्, १ जगती।]

यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक्।

साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता॥ १॥

यः। ते। मन्यो इति। अविधत्। वज्र। सायक। सहः। ओजः। पुष्यति। विश्वम्। आनुषक्।

सह्याम। दासम्। आर्यम्। त्वया। युजा। सहः२कृतेन। सहसा। सहस्वता॥ १॥

मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः।

मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः॥ २॥

मन्युः। इन्द्रः। मन्युः। एव। आस। देवः। मन्युः। होता। वरुणः। जातऽवेदाः।

मन्युम्। विशः। ईळते। मानुषीः। याः। पाहि। नः। मन्यो इति। तपसा। सऽजोषाः॥ २॥

अभीहि मन्यो तवसस्तवीयान् तपसा युजा वि जहि शत्रून्।

अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः॥ ३॥

अभि। इहि। मन्यो इति। तवसः। तवीयान्। तपसा। युजा। वि। जहि। शत्रून्।

अमित्रऽहा। वृत्रऽहा। दस्युऽहा। च। विश्वा। वसूनि। आ। भर। त्वम्। नः॥ ३॥

त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः।

विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि॥ ४॥

त्वम्। हि। मन्यो इति। अभिभूतिऽओजाः। स्वयम्ऽभूः। भामः। अभिमातिऽसहः।

विश्वऽचर्षणिः। सहुरिः। सहावान्। अस्मासु। ओजः। पृतनासु। धेहि॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः।

तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि॥ ५॥

अभागः। सन्। अप। पराऽइतः। अस्मि। तव। क्रत्वा। तविषस्य। प्रचेत इति प्रऽचेतः।

तम्। त्वा। मन्यो इति। अक्रतुः। जिहीळ। अहम्। स्वा। तनूः। बलऽदेयाय। मा। आ। इहि॥ ५॥

अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधायः।

मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः॥ ६॥

अयम्। ते। अस्मि। उप। मा। आ। इहि। अर्वाङ्। प्रतीचीनः। सहुरे। विश्वऽधायः।

मन्यो इति। वज्रिन्। अभि। माम्। आ। ववृत्स्व। हनाव। दस्यून्। उत। बोधि। आपेः॥ ६॥

अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जङ्घनाव भूरि।

जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव॥ ७॥ [१८]

अभि। प्र। इहि। दक्षिणतः। भव। मे। अध। वृत्राणि। जङ्घनाव। भूरि।

जुहोमि। ते। धरुणम्। मध्वः। अग्रम्। उभौ। उपऽअंशु। प्रथमा। पिबाव॥ ७॥

[८४] [७ मन्युस्तापसः। मन्युः। ४-७ जगत्यः, १-३ त्रिष्टुभः।]

त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः।

तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः॥ १॥

त्वया। मन्यो इति। सऽरथम्। आऽरुजन्तः। हर्षमाणासः। धृषिताः। मरुत्वः।

तिग्मऽइषवः। आयुधा। सम्ऽशिशानाः। अभि। प्र। यन्तु। नरः। अग्निऽरूपाः॥ १॥

अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि।

हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व॥ २॥

अग्निःऽइव। मन्यो इति। त्विषितः। सहस्व। सेनाऽनीः। नः। सहुरे। हूतः। एधि।

हत्वाय। शत्रून्। वि। भजस्व। वेदः। ओजः। मिमानः। वि। मृधः। नुदस्व॥ २॥

सहस्व मन्यो अभिमातिमस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून्।

उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम्॥ ३॥

सहस्व। मन्यो इति। अभिऽमातिम्। अस्मे इति। रुजन्। मृणन्। प्रऽमृणन्। प्र। इहि। शत्रून्।

उग्रम्। ते। पाजः। ननु। आ। रुरुध्रे। वशी। वशम्। नयसे। एकऽज। त्वम्॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि।

अकृत्तरुक्त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे॥ ४॥

एकः। बहूनाम्। असि। मन्यो इति। ईळितः। विशम्ऽविशम्। युधये। सम्। शिशाधि।

अकृत्तऽरुक्। त्वया। युजा। वयम्। द्युऽमन्तम्। घोषम्। विऽजयाय। कृण्महे॥ ४॥

विजेषकृदिन्द्रइवानवब्रवो३स्माकं मन्यो अधिपा भवेह।

प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ॥ ५॥

विजेषऽकृत्। इन्द्रःऽइव। अनवऽब्रवः। अस्माकम्। मन्यो इति। अधिऽपाः। भव। इह।

प्रियम्। ते। नाम। सहुरे। गृणीमसि। विद्म। तम्। उत्सम्। यतः। आऽबभूथ॥ ५॥

आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम्।

क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि॥ ६॥

आऽभूत्या। सहऽजाः। वज्र। सायक। सहः। बिभर्षि। अभिऽभूते। उत्ऽतरम्।

क्रत्वा। नः। मन्यो इति। सह। मेदी। एधि। महाऽधनस्य। पुरुऽहूत। सम्ऽसृजि॥ ६॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः।

भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम्॥ ७॥ [१९] {६}

सम्ऽसृष्टम्। धनम्। उभयम्। सम्ऽआकृतम्। अस्मभ्यम्। दत्ताम्। वरुणः। च। मन्युः।

भियम्। दधानाः। हृदयेषु। शत्रवः। पराऽजितासः। अप। नि। लयन्ताम्॥ ७॥

[८५] [५३ सूर्या सावित्री। १-५ सोम, ६-१६ सूर्याविवाहः, १७ देवाः, १८ सामार्कौ, १९ चन्द्रमाः, २०-२८ विवाहमन्त्र आशीःप्रायाः, २९-३०, ३४-३५ विवाहकाले परिहितस्य वाससः संस्पशा-निन्दा, ३१ दम्पत्योः यक्ष्मानाशिनी, ३३-४३ वध्व आशीर्मन्त्राः। अनुष्टुप्; १४, १९-२१, २३, २४, २६, ३६, ३७, ४४, त्रिष्टुभः; १८, २७, ४३ जगत्।]

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः। ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः॥ १॥

सत्येन। उत्तभिता। भूमिः। सूर्येण। उत्तभिता। द्यौः।

ऋतेन। आदित्याः। तिष्ठन्ति। दिवि। सोमः। अधि। श्रितः॥ १॥

सोमेनादित्या बलिनः सोमेन पृथिवी मही। अथो नक्षत्राणामेषामुपस्थे सोम आहितः॥ २॥

सोमेन। आदित्याः। बलिनः। सोमेन। पृथिवी। मही।

अथो इति। नक्षत्राणाम्। एषाम्। उपऽस्थे। सोमः। आऽहितः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमं मन्यते पपिवान् यत्संपिंषन्त्योषधिम्। सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन॥ ३॥

सोमम्। मन्यते। पपिऽवान्। यत्। सम्ऽपिंषन्ति। ओषधिम्।

सोमम्। यम्। ब्रह्माणः। विदुः। न। तस्य। अश्नाति। कः। चन॥ ३॥

आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः।

ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः॥ ४॥

आच्छत्ऽविधानैः। गुपितः। बार्हतैः। सोम। रक्षितः।

ग्राव्णाम्। इत्। शृण्वन्। तिष्ठसि। न। ते। अश्नाति। पार्थिवः॥ ४॥

यत्त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः।

वायुः सोमस्य रक्षिता समानां मास आकृतिः॥ ५॥ [२०]

यत्। त्वा। देव। प्रऽपिबन्ति। ततः। आ। प्यायसे। पुनरिति।

वायुः। सोमस्य। रक्षिता। समानाम्। मासः। आऽकृतिः॥ ५॥

रैभ्यासीदनुदेयी नाराशंसी न्योचनी। सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम्॥ ६॥

रैभी। आसीत्। अनुऽदेयी। नाराशंसी। निऽओचनी।

सूर्यायाः। भद्रम्। इत्। वासः। गाथया। एति। परिऽकृतम्॥ ६॥

चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम्। द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम्॥ ७॥

चित्तिः। आः। उपऽबर्हणम्। चक्षुः। आः। अभिऽअञ्जनम्।

द्यौः। भूमिः। कोशः। आसीत्। यत्। अयात्। सूर्या। पतिम्॥ ७॥

स्तोमा आसन्प्रतिधयः कुरीरं छन्द ओपशः। सूर्याया अश्विना वराग्निरासीत्पुरोगवः॥ ८॥

स्तोमाः। आसन्। प्रतिऽधयः। कुरीरम्। छन्दः। ओपशः।

सूर्यायाः। अश्विना। वरा। अग्निः। आसीत्। पुरःऽगवः॥ ८॥

सोमो वधूयुरभवदश्विनास्तामुभा वरा। सूर्यां यत्पत्ये शंसन्तीं मनसा सविताददात्॥ ९॥

सोमः। वधूऽयुः। अभवत्। अश्विना। आस्ताम्। उभा। वरा।

सूर्याम्। यत्। पत्ये। शंसन्तीम्। मनसा। सविता। अददात्॥ ९॥

मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः। शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहम्॥ १०॥

मनः। अस्याः। अनः। आसीत्। द्यौः। आसीत्। उत। छदिः। [२१]

शुक्रौ। अनड्वाहौ। आस्ताम्। यत्। अयात्। सूर्या। गृहम्॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः।

श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः॥ ११॥

ऋक्ऽसामाभ्याम्। अभिऽहितौ। गावौ। ते। सामनौ। इतः।

श्रोत्रम्। ते। चक्रे इति। आस्ताम्। दिवि। पन्थाः। चराचरः॥ ११॥

शुची ते चक्रे यात्या व्यानो अक्ष आहतः। अनो मनस्मयं सूर्यारोहत्प्रयती पतिम्॥ १२॥

शुची इति। ते। चक्रे इति। यात्याः। विऽआनः। अक्षः। आऽहतः।

अनः। मनस्मयम्। सूर्या। आ। अरोहत्। प्रऽयती। पतिम्॥ १२॥

सूर्याया वहतुः प्रागात्सविता यमवासृजत्। अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते॥ १३॥

सूर्यायाः। वहतुः। प्र। अगात्। सविता। यम्। अवऽअसृजत्।

अघासु। हन्यन्ते। गावः। अर्जुन्योः। परि। उह्यते॥ १३॥

यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः।

विश्वे देवा अनु तद्वामजानन् पुत्रः पितरावृणीत पूषा॥ १४॥

यत्। अश्विना। पृच्छमानौ। अयातम्। त्रिऽचक्रेण। वहतुम्। सूर्यायाः।

विश्वे। देवाः। अनु। तत्। वाम्। अजानन्। पुत्रः। पितरौ। अवृणीत। पूषा॥ १४॥

यदयातं शुभस्पती वरेयं सूर्यामुप। क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः॥ १५॥ [२२]

यत्। अयातम्। शुभः। पती इति। वरेऽयम्। सूर्याम्। उप।

क्व। एकम्। चक्रम्। वाम्। आसीत्। क्व। देष्ट्राय। तस्थथुः॥ १५॥

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः। अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः॥ १६॥

द्वे इति। ते। चक्रे इति। सूर्ये। ब्रह्माणः। ऋतुऽथा। विदुः।

अथ। एकम्। चक्रम्। यत्। गुहा। तत्। अद्धातयः। इत्। विदुः॥ १६॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च। ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः॥ १७॥

सूर्यायै। देवेभ्यः। मित्राय। वरुणाय। च।

ये। भूतस्य। प्रऽचेतसः। इदम्। तेभ्यः। अकरम्। नमः॥ १७॥

पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम्।

विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पूर्व॒ऽअ॒प॒रम्। च॒र॒तः। मा॒यया॑। ए॒तौ। शिशू॒ इति॑। क्रीळ॑न्तौ। परि॑। या॒तः। अ॒ध्व॒रम्।
विश्वा॑नि। अ॒न्यः। भुव॑ना। अ॒भि॒ऽचष्टे॑। ऋ॒तून्। अ॒न्यः। वि॒ऽदध॑त्। जा॒य॒ते। पुन॒रिति॑॥ १८॥

नवो॑नवो भवति॒ जाय॑मा॒नोऽह्नां॑ के॒तुरु॒षसा॑मे॒त्यग्र॑म्।
भा॒गं दे॒वेभ्यो॒ वि द॑धात्या॒यन् प्र च॒न्द्रमा॑स्तिरते दी॒र्घमायुः॑॥ १९॥
नव॑ःऽनवः। भ॒व॒ति॒। जाय॑मानः। अह्ना॑म्। के॒तुः। उ॒षसा॑म्। ए॒ति॒। अग्र॑म्।
भा॒गम्। दे॒वेभ्यः॑। वि। द॒धा॒ति॒। आ॒ऽयन्। प्र। च॒न्द्रमाः॑। ति॒र॒ते॒। दी॒र्घम्। आयुः॑॥ १९॥

सु॒किं॒शु॒कं श॑ल्म॒लिं वि॒श्वरू॑पं॒ हिर॑ण्यवर्णं सु॒वृतं॑ सुच॒क्रम्।
आ रो॑ह सूर्ये अ॒मृत॑स्य लो॒कं स्यो॒नं पत्ये॑ वह॒तुं कृ॑णुष्व॥ २०॥ [२३]
सु॒ऽकिं॒शु॒कम्। श॒ल्म॒लिम्। वि॒श्वऽरू॑पम्। हिर॑ण्यऽवर्णम्। सु॒ऽवृत॑म्। सु॒ऽच॒क्रम्।
आ। रो॒ह॒। सूर्ये॒। अ॒मृत॑स्य। लो॒कम्। स्यो॒नम्। पत्ये॑। व॒ह॒तुम्। कृ॒णु॒ष्व॒॥ २०॥

उदी॒र्ष्वातः॒ पति॑वती॒ ह्ये३॒॑षा वि॒श्वाव॑सुं॒ नम॑सा गी॒र्भिरी॑ळे।
अ॒न्यामि॑च्छ पितृ॒षदं॒ व्य॑क्तां॒ स ते॑ भा॒गो ज॒नुषा॒ तस्य॑ विद्धि॥ २१॥
उत्। ई॒र्ष्व॒। अतः॑। पति॑ऽवती। हि। ए॒षा। वि॒श्वऽव॑सुम्। नम॑सा। गी॒ःऽभिः। ई॒ळे॒।
अ॒न्याम्। इ॒च्छ॒। पि॒तृ॒ऽसद॑म्। वि॒ऽअ॑क्ताम्। सः। ते॒। भा॒गः। ज॒नुषा॑। तस्य॑। वि॒द्धि॒॥ २१॥

उदी॒र्ष्वातो॑ विश्वावसो॒ नम॑सेळामहे त्वा। अ॒न्यामि॑च्छ प्रफ॒र्व्यं१॒॑ सं जा॒यां पत्या॑ सृज॥ २२॥
उत्। ई॒र्ष्व॒। अतः॑। वि॒श्व॒व॒सो॒ इति॑ विश्व॒ऽवसो। नम॑सा। ई॒ळा॒म॒हे॒। त्वा॒।
अ॒न्याम्। इ॒च्छ॒। प्र॒ऽफ॒र्व्य॑म्। सम्। जा॒याम्। पत्या॑। सृ॒ज॒॥ २२॥

अ॒नृ॒क्ष॒राः ऋ॒जवः॑ सन्तु॒ पन्था॒ येभिः॒ सखा॑यो॒ यन्ति॑ नो वरे॒यम्।
सम॑र्य॒मा सं भगो॑ नो निनीया॒त्सं जा॑स्प॒त्यं सु॒यम॑मस्तु देवाः॥ २३॥
अ॒नृ॒क्ष॒राः। ऋ॒जवः॑। स॒न्तु॒। पन्थाः॑। येभिः॑। सखा॑यः। यन्ति॑। नः॒। व॒रे॒ऽयम्।
सम्। अ॒र्य॒मा। सम्। भगः॑। नः। नि॒नी॒या॒त्। सम्। जा॒ःऽप॒त्यम्। सु॒ऽयम॑म्। अ॒स्तु॒। दे॒वाः॒॥ २३॥

प्र त्वा॑ मुञ्चामि॒ वरु॑णस्य॒ पाशा॒द्येन॒ त्वाब॑ध्नात्सवि॒ता सु॒शेवः॑।
ऋ॒तस्य॒ योनौ॑ सुकृ॒तस्य॑ लो॒केऽरि॑ष्टां त्वा स॒ह पत्या॑ दधामि॥ २४॥
प्र। त्वा॒। मु॒ञ्चा॒मि॒। वरु॑णस्य। पाशा॑त्। येन॑। त्वा॒। अब॑ध्नात्। स॒वि॒ता। सु॒ऽशेवः॑।
ऋ॒तस्य॑। योनौ॑। सु॒ऽकृ॒तस्य॑। लो॒के। अरि॑ष्टाम्। त्वा॒। स॒ह। पत्या॑। द॒धा॒मि॒॥ २४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम्।

यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति॥ २५॥ [२४]

प्र। इतः। मुञ्चामि। न। अमुतः। सुऽबद्धाम्। अमुतः। करम्।

यथा। इयम्। इन्द्र। मीढ्वः। सुऽपुत्रा। सुऽभगा। असति॥ २५॥

पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन।

गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि॥ २६॥

पूषा। त्वा। इतः। नयतु। हस्तऽगृह्य। अश्विना। त्वा। प्र। वहताम्। रथेन।

गृहान्। गच्छ। गृहऽपत्नी। यथा। असः। वशिनी। त्वम्। विदथम्। आ। वदासि॥ २६॥

इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि।

एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः॥ २७॥

इह। प्रियम्। प्रऽजया। ते। सम्। ऋध्यताम्। अस्मिन्। गृहे। गार्हऽपत्याय। जागृहि।

एना। पत्या। तन्वम्। सम्। सृजस्व। अध। जिव्री इति। विदथम्। आ। वदाथः॥ २७॥

नीललोहितं भवति कृत्यासक्तिर्व्यज्यते। एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते॥ २८॥

नीलऽलोहितम्। भवति। कृत्या। आसक्तिः। वि। अज्यते।

एधन्ते। अस्याः। ज्ञातयः। पतिः। बन्धेषु। बध्यते॥ २८॥

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्व्या जाया विशते पतिम्॥ २९॥

परा। देहि। शामुल्यम्। ब्रह्मऽभ्यः। वि। भज। वसु।

कृत्या। एषा। पत्ऽवती। भूत्वी। आ। जाया। विशते। पतिम्॥ २९॥

अश्रीरा तनूर्भवति रुशती पापयामुया।

पतिर्यद्वध्वो३ वाससा स्वमङ्गमभिधित्सते॥ ३०॥ [२५]

अश्रीरा। तनूः। भवति। रुशती। पापया। अमुया।

पतिः। यत्। वध्वः। वाससा। स्वम्। अङ्गम्। अभिऽधित्सते॥ ३०॥

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनादनु। पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः॥ ३१॥

ये। वध्वः। चन्द्रम्। वहतुम्। यक्ष्माः। यन्ति। जनात्। अनु।

पुनरिति। तान्। यज्ञियाः। देवाः। नयन्तु। यतः। आऽगताः॥ ३१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा वि॑दन् परिप॒न्थिनो॒ य आ॒सीद॑न्ति॒ दंप॑ती। सु॒गेभि॑र्दु॒र्गमती॑ता॒मप॑ द्रा॒न्त्वरा॑तयः॥ ३२॥

मा। वि॒द॒न्। प॒रि॒ऽप॒न्थिनः॑। ये। आ॒ऽसीद॑न्ति। दंप॑ती॒ इति॒ दम्ऽप॑ती।

सु॒ऽगेभि॑ः। दुः॒ऽगम्। अति॑। इ॒ता॒म्। अप॑। द्रा॒न्तु॒। अरा॑तयः॥ ३२॥

सु॒म॒ङ्ग॒लीरि॒यं व॒धूरि॒मां स॒मेत॒ पश्य॑त। सौभा॑ग्यमस्यै द॒त्त्वायाथास्तं॒ वि परे॑तन॥ ३३॥

सु॒ऽम॒ङ्ग॒लीः। इ॒यम्। व॒धूः। इ॒माम्। स॒म्ऽए॒त॒। पश्य॑त।

सौभा॑ग्यम्। अ॒स्यै॒। द॒त्त्वाय॑। अथ॑। अस्त॑म्। वि। परा॑। इ॒त॒न॒॥ ३३॥

तृ॒ष्टमे॒तत्कटु॑कमे॒तद॑पा॒ष्ठव॑द्वि॒षव॒न्नैतदत्त॑वे। सूर्यां॒ यो ब्र॒ह्मा वि॒द्यात्स इद्वाधू॑यमर्हति॥ ३४॥

तृ॒ष्टम्। ए॒तत्। कटु॑कम्। ए॒तत्। अ॒पा॒ष्ठऽव॑त्। वि॒षऽव॑त्। न। ए॒तत्। अत्त॑वे।

सू॒र्याम्। यः। ब्र॒ह्मा। वि॒द्यात्। सः। इत्। वाधू॑ऽयम्। अ॒र्ह॒ति॒॥ ३४॥

आ॒शस॑नं वि॒शस॑न॒मथो॑ अधिवि॒कर्त॑नम्।

सू॒र्या॑याः पश्य रू॒पाणि॒ तानि॑ ब्र॒ह्मा तु शु॑न्धति॥ ३५॥ [२६]

आ॒ऽशस॑नम्। वि॒ऽशस॑नम्। अथो॒ इति॑। अ॒धि॒ऽविकर्त॑नम्।

सू॒र्या॑याः। प॒श्य॒। रू॒पाणि॑। तानि॑। ब्र॒ह्मा। तु। शु॒न्ध॒ति॒॥ ३५॥

गृ॒भ्णामि॑ ते सौभग॒त्वाय॒ हस्तं॒ मया॒ पत्या॑ ज॒रद॑ष्टि॒र्यथास॑ः।

भगो॑ अर्य॒मा स॑वि॒ता पुरं॑धि॒र्मह्यं॑ त्वादु॒र्गार्ह॑पत्याय दे॒वाः॥ ३६॥

गृ॒भ्णामि॑। ते॒। सौ॒भ॒ग॒ऽत्वाय॑। हस्त॑म्। मया॑। पत्या॑। ज॒रत्ऽअ॑ष्टिः। यथा॑। अस॑ः।

भग॑ः। अ॒र्य॒मा। स॒वि॒ता। पुर॑म्ऽधिः। मह्य॑म्। त्वा॒। अ॒दुः॒। गार्ह॑ऽपत्याय। दे॒वाः॥ ३६॥

तां पू॑षञ्छि॒वत॑मा॒मेर॑यस्व॒ यस्यां॒ बीजं॒ मनु॒ष्या॒३॒ वप॑न्ति।

या न॑ ऊ॒रू उ॑श॒ती वि॒श्रया॑ते॒ यस्या॑मु॒शन्त॑ः प्र॒हरा॑म॒ शेप॑म्॥ ३७॥

ताम्। पू॒ष॒न्। शि॒वऽत॑माम्। आ। ई॒र॒य॒स्व॒। यस्या॑म्। बीज॑म्। म॒नु॒ष्या॑ः। वप॑न्ति।

या। नः॒। ऊ॒रू इति॑। उ॒श॒ती। वि॒ऽश्रया॑ते। यस्या॑म्। उ॒शन्त॑ः। प्र॒ऽहरा॑म। शेप॑म्॥ ३७॥

तुभ्य॒मग्रे॒ पर्य॑वहन्त्सू॒र्यां व॑ह॒तुना॑ स॒ह। पुन॒ः पति॑भ्यो जा॒यां दा अ॑ग्ने प्र॒जया॑ स॒ह॥ ३८॥

तुभ्य॑म्। अग्रे॑। परि॑। अ॒व॒ह॒न्। सू॒र्याम्। व॒हतुना॑। स॒ह।

पुन॒रिति॑। पति॑ऽभ्यः। जा॒याम्। दाः। अ॒ग्ने॒। प्र॒ऽजया॑। स॒ह॥ ३८॥

पुन॒ः पत्नी॑म॒ग्निर॑दा॒दायु॑षा स॒ह वर्च॑सा। दी॒र्घायु॑रस्या॒ यः पति॒र्जीवा॑ति श॒रद॑ः श॒तम्॥ ३९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुनरिति। पत्नीम्। अग्निः। अदात्। आयुषा। सह। वर्चसा।

दीर्घऽआयुः। अस्याः। यः। पतिः। जीवाति। शरदः। शतम्॥ ३९॥

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।

तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ ४०॥ [२७]

सोमः। प्रथमः। विविदे। गन्धर्व। विविदे। उत्ऽतरः।

तृतीयः। अग्निः। ते। पतिः। तुरीयः। ते। मनुष्यऽजाः॥ ४०॥

सोमो ददद्गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम्॥ ४१॥

सोमः। ददत्। गन्धर्वाय। गन्धर्वः। ददत्। अग्नये।

रयिम्। च। पुत्रान्। च। अदात्। अग्निः। मह्यम्। अथो इति। इमाम्॥ ४१॥

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥ ४२॥

इह। एव। स्तम्। मा। वि। यौष्टम्। विश्वम्। आयुः। वि। अश्नुतम्।

क्रीळन्तौ। पुत्रैः। नप्तृऽभिः। मोदमानौ। स्वे। गृहे॥ ४२॥

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा।

अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे॥ ४३॥

आ। नः। प्रऽजाम्। जनयतु। प्रजाऽपतिः। आऽजरसाय। सम्। अनक्तु। अर्यमा।

अदुःऽमङ्गलीः। पतिऽलोकम्। आ। विश। शम्। नः। भव। द्विऽपदे। शम्। चतुःऽपदे॥ ४३॥

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः।

वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे॥ ४४॥

अघोरऽचक्षुः। अपतिऽघ्नी। एधि। शिवा। पशुऽभ्यः। सुऽमनाः। सुऽवर्चाः।

वीरऽसूः। देवऽकामा। स्योना। शम्। नः। भव। द्विऽपदे। शम्। चतुःऽपदे॥ ४४॥

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु।

दशास्यां पुत्राना धेहि पतिमेकादशं कृधि॥ ४५॥

इमाम्। त्वम्। इन्द्र। मीढ्वः। सुऽपुत्राम्। सुऽभगाम्। कृणु।

दश। अस्याम्। पुत्रान्। आ। धेहि। पतिम्। एकादशम्। कृधि॥ ४५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।

ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥ ४६॥

सम्ऽराज्ञी। श्वशुरे। भव। सम्ऽराज्ञी। श्वश्र्वाम्। भव।

ननान्दरि। सम्ऽराज्ञी। भव। सम्ऽराज्ञी। अधि। देवृषु॥ ४६॥

समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ।

सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ॥ ४७॥ [२८]

सम्। अञ्जन्तु। विश्वे। देवाः। सम्। आपः। हृदयानि। नौ।

सम्। मातरिश्वा। सम्। धाता। सम्। ऊँ इति। देष्ट्री। दधातु। नौ॥ ४७॥

अविधवा भव वर्षाणि शतं साग्रं तु सुव्रता।

तेजस्वी च यशस्वी च धर्मपत्नी पतिव्रता॥ ४८॥ ★

अविधवा। भव। वर्षाणि। शतम्। सऽअग्रम्। तु। सुऽव्रता।

तेजस्वी। च। यशस्वी। च। धर्मऽपत्नी। पतिऽव्रता॥ ४८॥

जनयद् बहुपुत्राणि मा च दुःखं लभेत् क्व चित्।

भर्ता ते सोमपा नित्यं भवेद्धर्मपरायणः॥ ४९॥ ★

जनयत्। बहुऽपुत्राणि। मा। च। दुःखम्। लभेत्। क्व। चित्।

भर्ता। ते। सोमऽपाः। नित्यम्। भवेत्। धर्मऽपरायणः॥ ४९॥

अष्टपुत्रा भव त्वं च सुभगा च पतिव्रता।

भर्तुश्चैव पितुर्भ्रातुर्हृदयानन्दिनी सदा॥ ५०॥ ★

अष्टऽपुत्रा। भव। त्वम्। च। सुऽभगा। च। पतिऽव्रता।

भर्तुः। च। एव। पितुः। भ्रातुः। हृदयऽआनन्दिनी। सदा॥ ५०॥

इन्द्रस्य तु यथेन्द्राणी श्रीधरस्य यथा श्रिया।

शङ्करस्य यथा गौरी तद्भर्तुरपि भर्तरि॥ ५१॥ ★

इन्द्रस्य। तु। यथा। इन्द्राणी। श्रीऽधरस्य। यथा। श्रिया।

शङ्करस्य। यथा। गौरी। तत्ऽभर्तुः। अपि। भर्तरि॥ ५१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्रे॒र्यथान॑सूया॒ स्याद् वसि॑ष्ठ॒स्याप्य॑रुन्ध॒ती ।

कौ॒शिक॑स्य॒ यथा॒ सती॒ तथा॒ त्वमपि॑ भ॒र्तरि॑ ॥ ५२ ॥ *

अत्रेः॑ । यथा॑ । अन॑सूया । स्याद् । वसि॑ष्ठस्य । अपि॑ । अ॒रु॒न्ध॒ती ।

कौ॒शिक॑स्य । यथा॑ । सती॑ । तथा॑ । त्वम् । अपि॑ । भ॒र्तरि॑ ॥ ५२ ॥

ध्रु॒वैधि॒ पोष्या॒ मयि॒ मह्यं॑ त्वादा॒द् बृह॒स्पतिः॑ ।

मया॒ पत्या॑ प्र॒जाव॑ती॒ सं जी॑व श॒रदः॑ श॒तम् ॥ ५३ ॥ * [२९]

ध्रु॒वा । ए॒धि॒ । पोष्या॑ । मयि॑ । मह्य॑म् । त्वा॒ । अ॒दा॒त् । बृह॒स्पतिः॑ ।

मया॑ । पत्या॑ । प्र॒जाऽव॑ती । सम् । जी॒व॒ । श॒रदः॑ । श॒तम् ॥ ५३ ॥

इत्याश्वलायन-संहितायां

अष्टमाष्टके

तृतीयोऽध्यायः

समाप्तः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथाष्टमाष्टके चतुर्थोऽध्यायः ॥

[८६] [२३ : १, ८, ११-१२, १४, १९-२२ इन्द्रः; २-६, ९-१०, १५-१८ इन्द्राणी; ७, १३, २३ वृषाकपि ऐन्द्रः। इन्द्रः। पङ्क्तिः।]

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत।

यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः॥ १॥

वि। हि। सोतोः। असृक्षत। न। इन्द्रम्। देवम्। अमंसत।

यत्र। अमदत्। वृषाकपिः। अर्यः। पुष्टेषु। मत्ऽसखा। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ १॥

परा हीन्द्र धावसि वृषाकपेरति व्यथिः।

नो अह प्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः॥ २॥

परा। हि। इन्द्र। धावसि। वृषाकपेः। अति। व्यथिः।

नो इति। अह। प्र। विन्दसि। अन्यत्र। सोमऽपीतये। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ २॥

किमयं त्वां वृषाकपिश्चकार हरितो मृग।

यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र उत्तरः॥ ३॥

किम्। अयम्। त्वाम्। वृषाकपिः। चकार। हरितः। मृगः॥ यस्मै। इरस्यसि। इत्।

ऊँ इति। नु। अर्यः। वा। पुष्टिऽमत्। वसु। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ३॥

यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि।

श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः॥ ४॥

यम्। इमम्। त्वम्। वृषाकपिम्। प्रियम्। इन्द्र। अभिऽरक्षसि।

श्वा। नु। अस्य। जम्भिषत्। अपि। कर्णे। वराहऽयुः। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ४॥

प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत्।

शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः॥ ५॥ [१]

प्रिया। तष्टानि। मे। कपिः। विऽअक्ता। वि। अदूदुषत्॥ शिरः। नु। अस्य।

राविषम्। न। सुऽगम्। दुःऽकृते। भुवम्। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत्।

न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः॥ ६॥

न। मत्। स्त्री। सुभसत्ऽतरा। न। सुयाशुऽतरा। भुवत्।

न। मत्। प्रतिऽच्यवीयसी। न। सक्थि। उत्ऽयमीयसी। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ६॥

उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति।

भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः॥ ७॥

उवे। अम्ब। सुलाभिके। यथाऽइव। अङ्ग। भविष्यति॥ भसत्। मे। अम्ब।

सक्थि। मे। शिरः। मे। विऽइव। हृष्यति। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ७॥

किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने।

किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः॥ ८॥

किम्। सुबाहो इति सुऽबाहो। सुऽअङ्गुरे। पृथुस्तो इति पृथुऽस्तो। पृथुऽजघने।

किम्। शूरऽपत्नि। नः। त्वम्। अभि। अमीषि। वृषाकपिम्। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ८॥

अवीरामिव मामयं शरारुरभि मन्यते।

उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः॥ ९॥

अवीराम्ऽइव। माम्। अयम्। शरारुः। अभि। मन्यते।

उत। अहम्। अस्मि। वीरिणी। इन्द्रऽपत्नी। मरुत्ऽसखा। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ९॥

संहोत्रं स्म पुरा नारी समनं वाव गच्छति।

वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः॥ १०॥ [२]

सम्ऽहोत्रम्। स्म। पुरा। नारी। समनम्। वा। अव। गच्छति।

वेधाः। ऋतस्य। वीरिणी। इन्द्रऽपत्नी। महीयते। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ १०॥

इन्द्राणीमासु नारिषु सुभगामहमश्रवम्।

नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः॥ ११॥

इन्द्राणीम्। आसु। नारिषु। सुऽभगाम्। अहम्। अश्रवम्।

नहि। अस्याः। अपरम्। चन। जरसा। मरते। पतिः। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नाहमि॑न्द्राणि रारण॒ सख्यु॑र्वृ॒षाक॑पेर्ऋ॒ते।

यस्ये॒दमप्यं॑ ह॒विः प्रि॒यं दे॒वेषु॒ गच्छ॑ति॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः॥ १२॥

न। अ॒हम्। इ॒न्द्रा॒णि॒। र॒र॒ण॒। सख्यु॑ः। वृ॒षाक॑पेः। ऋ॒ते।

यस्य॑। इ॒दम्। अप्य॑म्। ह॒विः। प्रि॒यम्। दे॒वेषु॑। गच्छ॑ति। विश्व॑स्मात्। इन्द्र॑ः। उत्ऽत॑रः॥ १२॥

वृषा॑कपायि॒ रेव॑ति॒ सुपु॑त्र॒ आदु॒ सुस्नु॑षे।

घस॑त्त॒ इन्द्र॑ उ॒क्षण॑ः प्रि॒यं का॑चित्क॒रं ह॒विर्विश्व॑स्मा॒दिन्द्र॒ उत्त॑र॥ १३॥

वृषा॑कपायि। रेव॑ति। सु॒ऽपु॑त्रे। आत्। ऊँ॒ इति॑। सु॒ऽस्नु॑षे॥ घस॑त्। ते॒। इन्द्र॑ः। उ॒क्षण॑ः।

प्रि॒यम्। का॒चि॒त्ऽक॒रम्। ह॒विः। विश्व॑स्मात्। इन्द्र॑ः। उत्ऽत॑रः॥ १३॥

उ॒क्ष्णो हि मे॒ पञ्च॑दश सा॒कं पच॑न्ति विंश॒तिम्।

उ॒ताहम॑द्मि॒ पीव॒ इदु॒भा कु॒क्षी पृ॑णन्ति मे॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः॥ १४॥

उ॒क्ष्णः। हि। मे॒। पञ्च॑ऽदश। सा॒कम्। पच॑न्ति। वि॒श॒तिम्॥ उ॒त। अ॒हम्। अ॒द्मि॒।

पीव॑ः। इत्। उ॒भा। कु॒क्षी इति॑। पृ॒ण॒न्ति॒। मे॒। विश्व॑स्मात्। इन्द्र॑ः। उत्ऽत॑रः॥ १४॥

वृ॒ष॒भो न ति॒ग्मशृ॑ङ्गो॒ऽन्तर्यू॒थेषु॒ रोरु॑वत्।

म॒न्थस्त॑ इन्द्र॒ शं हृ॒दे यं ते॑ सु॒नोति॑ भाव॒युर्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः॥ १५॥ [३]

वृ॒ष॒भः। न। ति॒ग्मऽशृ॑ङ्गः। अ॒न्तः। यू॒थेषु॑। रोरु॑वत्॥ म॒न्थः। ते॒। इ॒न्द्र॒।

शम्। हृ॒दे। यम्। ते॒। सु॒नोति॑। भा॒व॒युः। विश्व॑स्मात्। इन्द्र॑ः। उत्ऽत॑रः॥ १५॥

न सेशे॒ यस्य॒ रम्ब॑ते॒ऽन्त॒रा स॒क्थ्या॒३॒ कपृ॑त्।

सेदी॑शे॒ यस्य॑ रोम॒शं नि॑षे॒दुषो॑ वि॒जृम्भ॑ते॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः॥ १६॥

न। सः। ई॒शे॒। यस्य॑। रम्ब॑ते। अ॒न्त॒रा। स॒क्थ्या॑। कपृ॑त्॥ सः। इत्। ई॒शे॒।

यस्य॑। रो॒म॒शम्। नि॒ऽसे॒दुष॑ः। वि॒ऽजृम्भ॑ते। विश्व॑स्मात्। इन्द्र॑ः। उत्ऽत॑रः॥ १६॥

न सेशे॒ यस्य॑ रोम॒शं नि॑षे॒दुष॒ वि॒जृम्भ॑ते।

सेदी॑शे॒ यस्य॒ रम्ब॑ते॒ऽन्त॒रा स॒क्थ्या॒३॒ कपृ॒द्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः॥ १७॥

न। सः। ई॒शे॒। यस्य॑। रो॒म॒शम्। नि॒ऽसे॒दुष॑ः। वि॒ऽजृम्भ॑ते॥ सः। इत्। ई॒शे॒।

यस्य॑। रम्ब॑ते। अ॒न्त॒रा। स॒क्थ्या॑। कपृ॑त्। विश्व॑स्मात्। इन्द्र॑ः। उत्ऽत॑रः॥ १७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत्।
असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः ॥ १८ ॥
अयम् । इन्द्र । वृषाकपिः । परस्वन्तम् । हतम् । विदत् ॥ असिम् । सूनाम् । नवम् ।
चरुम् । आत् । एधस्य । अनः । आऽचितम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १८ ॥
अयमेमि विचाकशद्विचिन्वन् दासमार्यम्।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः ॥ १९ ॥
अयम् । एमि । विऽचाकशत् । विऽचिन्वन् । दासम् । आर्यम् ।
पिबामि । पाकऽसुत्वनः । अभि । धीरम् । अचाकशम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १९ ॥
धन्व च यत्कृन्तत्रं च कति स्वित्ता वि योजना।
नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः ॥ २० ॥
धन्व । च । यत् । कृन्तत्रम् । च । कति । स्वित् । ता । वि । योजना ।
नेदीयसः । वृषाकपे । अस्तम् । आ । इहि । गृहान् । उप । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ २० ॥
पुनरेहि वृषाकपे सुविता कल्पयावहै।
य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥ २१ ॥
पुनः । आ । इहि । वृषाकपे । सुविता । कल्पयावहै ।
यः । एषः । स्वप्नऽनंशनः । अस्तम् । एषि । पथा । पुनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ २१ ॥
यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन।
क्व स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः ॥ २२ ॥
यत् । उदञ्चः । वृषाकपे । गृहम् । इन्द्र । अजगन्तन । क्व । स्यः । पुल्वघः । मृगः । कम् ।
अगन् । जनऽयोपनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ २२ ॥
पर्शुर्ह नाम मानवी साकं ससूव विंशतिम्।
भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः ॥ २३ ॥ [४]
पर्शुः । ह । नाम । मानवी । साकम् । ससूव । विंशतिम् ॥ भद्रम् । भल । त्यस्यै ।
अभूत् । यस्याः । उदरम् । आमयत् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ २३ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८७] [२५ पायुर्भारद्वाजः। रक्षोहाग्निः। त्रिष्टुप्, २२-२५ अनुष्टुप्।]

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म।

शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम्॥ १॥

रक्षःऽहनम्। वाजिनम्। आ। जिघर्मि। मित्रम्। प्रथिष्ठम्। उप। यामि। शर्म।

शिशानः। अग्निः। क्रतुऽभिः। सम्ऽइद्धः। सः। नः। दिवा। सः। रिषः। पातु। नक्तम्॥ १॥

अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः।

आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन्॥ २॥

अयःऽदंष्ट्रः। अर्चिषा। यातुऽधानान्। उप। स्पृश। जातऽवेदः। सम्ऽइद्धः।

आ। जिह्वया। मूरऽदेवान्। रभस्व। क्रव्यऽअदः। वृक्त्वी। अपि। धत्स्व। आसन्॥ २॥

उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च।

उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान्॥ ३॥

उभा। उभयाविन्। उप। धेहि। दंष्ट्रा। हिंस्रः। शिशानः। अवरम्। परम्। च।

उत। अन्तरिक्षे। परि। याहि। राजन्। जम्भैः। सम्। धेहि। अभि। यातुऽधानान्॥ ३॥

यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः।

ताभिर्विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ध्येषाम्॥ ४॥

यज्ञैः। इषूः। सम्ऽनममानः। अग्ने। वाचा। शल्यान्। अशनिऽभिः। दिहानः।

ताभिः। विध्य। हृदये। यातुऽधानान्। प्रतीचः। बाहून्। प्रति। भङ्ग्धि। एषाम्॥ ४॥

अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम्।

प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम्॥ ५॥ [५]

अग्ने। त्वचम्। यातुऽधानस्य। भिन्धि। हिंस्रा। अशनिः। हरसा। हन्तु। एनम्।

प्र। पर्वाणि। जातऽवेदः। शृणीहि। क्रव्यऽअत्। क्रविष्णुः। वि। चिनोतु। वृक्णम्॥ ५॥

यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम्।

यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः॥ ६॥

यत्र। इदानीम्। पश्यसि। जातऽवेदः। तिष्ठन्तम्। अग्ने। उत। वा। चरन्तम्।

यत्। वा। अन्तरिक्षे। पथिऽभिः। पतन्तम्। तम्। अस्ता। विध्य। शर्वा। शिशानः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत्।

असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः॥ १८॥

अयम्। इन्द्र। वृषाकपिः। परस्वन्तम्। हतम्। विदत्॥ असिम्। सूनाम्। नवम्।

चरुम्। आत्। एधस्य। अनः। आऽचितम्। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ १८॥

अयमेमि विचाकशद्विचिन्वन् दासमार्यम्।

पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः॥ १९॥

अयम्। एमि। विऽचाकशत्। विऽचिन्वन्। दासम्। आर्यम्।

पिबामि। पाकऽसुत्वनः। अभि। धीरम्। अचाकशम्। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ १९॥

धन्व च यत्कृन्तत्रं च कति स्वित्ता वि योजना।

नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः॥ २०॥

धन्व। च। यत्। कृन्तत्रम्। च। कति। स्वित्। ता। वि। योजना।

नेदीयसः। वृषाकपे। अस्तम्। आ। इहि। गृहान्। उप। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ २०॥

पुनरेहि वृषाकपे सुविता कल्पयावहै।

य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः॥ २१॥

पुनः। आ। इहि। वृषाकपे। सुविता। कल्पयावहै।

यः। एषः। स्वप्नऽनंशनः। अस्तम्। एषि। पथा। पुनः। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ २१॥

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन।

क्व१स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः॥ २२॥

यत्। उदञ्चः। वृषाकपे। गृहम्। इन्द्र। अजगन्तन। क्व। स्यः। पुल्वघः। मृगः। कम्।

अगन्। जनऽयोपनः। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ २२॥

पर्शुर्ह नाम मानवी साकं ससूव विंशतिम्।

भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः॥ २३॥ [४]

पर्शुः। ह। नाम। मानवी। साकम्। ससूव। विंशतिम्॥ भद्रम्। भल। त्यस्यै।

अभूत्। यस्याः। उदरम्। आमयत्। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ २३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८७] [२५ पायुर्भारद्वाजः। रक्षोहाग्निः। त्रिष्टुप्, २२-२५ अनुष्टुप्।]

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम्॥ १॥

रक्षः२हनम्। वाजिनम्। आ। जिघर्मि। मित्रम्। प्रथिष्ठम्। उप। यामि। शर्म।
शिशानः। अग्निः। क्रतुऽभिः। सम्ऽइद्धः। सः। नः। दिवा। सः। रिषः। पातु। नक्तम्॥ १॥

अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः।
आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन्॥ २॥

अयः२दंष्ट्रः। अर्चिषा। यातुऽधानान्। उप। स्पृश। जातऽवेदः। सम्ऽइद्धः।
आ। जिह्वया। मूरऽदेवान्। रभस्व। क्रव्यऽअदः। वृक्त्वी। अपि। धत्स्व। आसन्॥ २॥

उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च।
उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान्॥ ३॥

उभा। उभयाविन्। उप। धेहि। दंष्ट्रा। हिंस्रः। शिशानः। अवरम्। परम्। च।
उत। अन्तरिक्षे। परि। याहि। राजन्। जम्भैः। सम्। धेहि। अभि। यातुऽधानान्॥ ३॥

यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः।
ताभिर्विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ध्येषाम्॥ ४॥

यज्ञैः। इषूः। सम्ऽनममानः। अग्ने। वाचा। शल्यान्। अशनिऽभिः। दिहानः।
ताभिः। विध्य। हृदये। यातुऽधानान्। प्रतीचः। बाहून्। प्रति। भङ्ग्धि। एषाम्॥ ४॥

अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम्।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम्॥ ५॥ [५]

अग्ने। त्वचम्। यातुऽधानस्य। भिन्धि। हिंस्रा। अशनिः। हरसा। हन्तु। एनम्।
प्र। पर्वाणि। जातऽवेदः। शृणीहि। क्रव्यऽअत्। क्रविष्णुः। वि। चिनोतु। वृक्णम्॥ ५॥

यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम्।
यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः॥ ६॥

यत्र। इदानीम्। पश्यसि। जातऽवेदः। तिष्ठन्तम्। अग्ने। उत। वा। चरन्तम्।
यत्। वा। अन्तरिक्षे। पथिऽभिः। पतन्तम्। तम्। अस्ता। विध्य। शर्वा। शिशानः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उ॒ताल॑ब्धं स्पृणुहि जातवेद आलेभा॒नादृ॒ष्टिभि॑र्यातु॒धाना॑त्।

अग्ने॒ पूर्वो॒ नि ज॑हि॒ शोशु॑चान आ॒माद॒ः क्ष्विङ्क्षा॒स्तम॑द॒न्त्वेनीः॑ ॥ ७ ॥

उ॒त। आ॒ऽल॑ब्धम्। स्पृ॒णु॒हि॒। जा॒त॒ऽवे॒द॒ः। आ॒ऽले॒भा॒नात्। ऋ॒ष्टिऽभि॑ः। या॒तु॒ऽधाना॑त्।

अग्ने॑। पूर्व॑ः। नि। ज॒हि॒। शोशु॑चानः। आ॒म॒ऽअद॑ः। क्ष्विङ्का॑ः। तम्। अ॒द॒न्तु॒। एनीः॑ ॥ ७ ॥

इ॒ह प्र ब्रू॑हि यत॒मः सो अ॑ग्ने॒ यो या॑तु॒धानो॒ य इ॒दं कृ॒णोति॑।

तमा र॑भस्व स॒मिधा॑ यविष्ठा नृ॒चक्ष॑स॒श्चक्षु॑षे रन्धयैनम् ॥ ८ ॥

इ॒ह। प्र। ब्रू॒हि॒। य॒त॒मः। सः। अ॒ग्ने॒। यः। या॒तु॒ऽधान॑ः। यः। इ॒दम्। कृ॒णोति॑।

तम्। आ। र॒भ॒स्व॒। स॒म्ऽइधा॑। य॒वि॒ष्ठ॒। नृ॒ऽचक्ष॑सः। चक्षु॑षे। र॒न्ध॒य॒। ए॒न॒म् ॥ ८ ॥

ती॒क्ष्णेना॑ग्ने॒ चक्षु॑षा रक्ष य॒ज्ञं प्राञ्च॑ं वसु॑भ्य॒ः प्र ण॑य प्रचेतः।

हिं॒स्रं रक्षां॑स्य॒भि शोशु॑चान॒ं मा त्वा॑ दभन्यातुधाना॑ नृचक्षः ॥ ९ ॥

ती॒क्ष्णेन॑। अ॒ग्ने॒। चक्षु॑षा। र॒क्ष॒। य॒ज्ञम्। प्राञ्च॑म्। वसु॑ऽभ्यः। प्र। न॒य॒। प्र॒चे॒त॒ इति॑ प्र॒ऽचेतः।

हिं॒स्रम्। रक्षां॑सि। अ॒भि। शोशु॑चानम्। मा। त्वा॒। द॒भ॒न्। या॒तु॒ऽधाना॑ः। नृ॒ऽच॒क्ष॒ः ॥ ९ ॥

नृ॒चक्षा॒ रक्षः॒ परि॑ पश्य वि॒क्षु तस्य॒ त्रीणि॒ प्रति॑ शृण॒ीह्यग्रा॑।

तस्या॑ग्ने पृष्टीर्हर॑सा शृणीहि त्रे॒धा मूल॑ं यातुधान॑स्य वृश्च ॥ १० ॥ [६]

नृ॒ऽचक्षा॑ः। रक्ष॑ः। परि॑। प॒श्य॒। वि॒क्षु। तस्य॑। त्रीणि॑। प्रति॑। शृ॒णी॒हि॒। अग्रा॑।

तस्य॑। अ॒ग्ने॒। पृ॒ष्टीः। हर॑सा। शृ॒णी॒हि॒। त्रे॒धा। मूल॑म्। या॒तु॒ऽधान॑स्य। वृ॒श्च॒ ॥ १० ॥

त्रिर्या॑तु॒धान॒ः प्रसि॑तिं त ए॒त्वृ॒तं यो अ॑ग्ने॒ अनृ॑तेन॒ हन्ति॑।

तम॒र्चिषा॑ स्फू॒र्जय॑ञ्जातवेदः स॒मक्षमे॑नं गृण॒ते नि वृ॑ङ्ग्धि ॥ ११ ॥

त्रिः। या॒तु॒ऽधान॑ः। प्र॒ऽसि॑तिम्। ते॒। ए॒तु॒। ऋ॒तम्। यः। अ॒ग्ने॒। अनृ॑तेन। हन्ति॑।

तम्। अ॒र्चिषा॑। स्फू॒र्जय॑न्। जा॒त॒ऽवे॒द॒ः। स॒म्ऽअ॒क्षम्। ए॒न॒म्। गृ॒ण॒ते। नि। वृ॒ङ्ग्धि॒ ॥ ११ ॥

तद॑ग्ने॒ चक्षु॒ः प्रति॑ धेहि रे॒भे श॑फा॒रुज॒ं येन॒ पश्य॑सि यातु॒धान॑म्।

अ॒थ॒र्व॒वज्ज्योति॑षा॒ दैव्ये॑न स॒त्यं धूर्व॑न्तम॒चित॒ं न्यो॑ष ॥ १२ ॥

तत्। अ॒ग्ने॒। चक्षु॑ः। प्रति॑। धे॒हि॒। रे॒भे। श॒फ॒ऽआ॒रुज॑म्। येन॑। पश्य॑सि। या॒तु॒ऽधान॑म्।

अ॒थ॒र्व॒ऽवत्। ज्योति॑षा। दैव्ये॑न। स॒त्यम्। धूर्व॑न्तम्। अ॒चित॑म्। नि। ओ॒ष॒ ॥ १२ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यद॑ग्ने अ॒द्य मि॑थु॒ना शपा॑तो॒ यद्वा॒चस्तृ॒ष्टं ज॒नय॑न्त रे॒भाः।

म॒न्योर्मन॑सः शर॒व्या॒३॒ जाय॑ते॒ या तया॑ विध्य॒ हृद॑ये यातु॒धाना॑न्॥ १३॥

यत्। अ॒ग्ने॒। अ॒द्य मि॒थु॒ना। शपा॑तः। यत्। वा॒चः। तृ॒ष्टम्। ज॒नय॑न्त। रे॒भाः।

म॒न्योः। मन॑सः। श॒र॒व्या॑। जाय॑ते। या। तया॑। वि॒ध्य॒। हृद॑ये। या॒तु॒ऽधाना॑न्॥ १३॥

परा॑ शृणीहि॒ तप॑सा यातु॒धाना॒न् परा॑ग्ने॒ रक्षो॒ हर॑सा शृणीहि।

परा॒र्चिषा॒ मूर॑देवाञ्छृणीहि॒ परा॑सु॒तृपो॑ अ॒भि शोशु॑चानः॥ १४॥

परा॑। शृ॒णी॒हि॒। तप॑सा। या॒तु॒ऽधाना॑न्। परा॑। अ॒ग्ने॒। रक्षः॑। हर॑सा। शृ॒णी॒हि॒।

परा॑। अ॒र्चिषा॑। मूर॑ऽदेवान्। शृ॒णी॒हि॒। परा॑। अ॒सु॒ऽतृपः॑। अ॒भि। शोशु॑चानः॥ १४॥

परा॒द्य दे॒वा वृ॑जि॒नं शृ॑णन्तु प्र॒त्यगे॑नं श॒पथा॑ यन्तु तृ॒ष्टाः।

वा॒चास्ते॑नं॒ शर॑व ऋच्छन्तु॒ मर्म॒न् विश्व॑स्यैतु॒ प्रसि॑तिं यातु॒धानः॑॥ १५॥ [७]

परा॑। अ॒द्य। दे॒वाः। वृ॒जि॒नम्। शृ॒ण॒न्तु॒। प्र॒त्यक्। ए॒न॒म्। श॒पथाः॑। य॒न्तु॒। तृ॒ष्टाः।

वा॒चा॒ऽस्ते॑नम्। शर॑वः। ऋ॒च्छ॒न्तु॒। मर्म॑न्। विश्व॑स्य। ए॒तु॒। प्र॒ऽसि॑तिम्। या॒तु॒ऽधानः॑॥ १५॥

यः पौरु॑षेयेण क्र॒विषा॑ सम॒ङ्क्ते यो अश्व्ये॑न प॒शुना॑ यातु॒धानः॑।

यो अ॒घ्न्याया॒ भर॑ति क्षी॒रम॑ग्ने॒ तेषां॑ शी॒र्षाणि॒ हर॒सापि॑ वृश्च॥ १६॥

यः। पौरु॑षेयेण। क्र॒विषा॑। स॒म्ऽअ॒ङ्क्ते। यः। अश्व्ये॑न। प॒शुना॑। या॒तु॒ऽधानः॑।

यः। अ॒घ्न्यायाः॑। भर॑ति। क्षी॒रम्। अ॒ग्ने॒। तेषा॑म्। शी॒र्षाणि॑। हर॑सा। अपि॑। वृ॒श्च॒॥ १६॥

सं॒व॒त्स॒रीणं॒ पय॑ उ॒स्रिया॑या॒स्तस्य॒ माशी॑द्यातु॒धानो॑ नृचक्षः।

पी॒यूष॑मग्ने य॒तम॒स्तितृ॑प्सा॒त्तं प्र॒त्यञ्च॑म॒र्चिषा॑ विध्य॒ मर्म॑न्॥ १७॥

सं॒व॒त्स॒रीण॑म्। पयः॑। उ॒स्रिया॑याः। तस्य॑। मा। अ॒शी॒त्। या॒तु॒ऽधानः॑। नृ॒ऽच॒क्षः॒।

पी॒यूष॑म्। अ॒ग्ने॒। य॒त॒मः। तितृ॑प्सात्। तम्। प्र॒त्यञ्च॑म्। अ॒र्चिषा॑। वि॒ध्य॒। मर्म॑न्॥ १७॥

वि॒षं गवां॑ यातु॒धानाः॑ पिब॒न्त्वा वृ॑श्च्यन्ता॒मदि॑तये दु॒रेवाः॑।

परै॑नान् दे॒वः स॑वि॒ता द॑दातु॒ परा॑ भा॒गमोष॑धीनां जयन्ताम्॥ १८॥

वि॒षम्। गवा॑म्। या॒तु॒ऽधानाः॑। पि॒ब॒न्तु॒। आ। वृ॒श्च्य॒न्ता॒म्। अदि॑तये। दुः॒ऽएवाः॑।

परा॑। ए॒ना॒न्। दे॒वः। स॒वि॒ता। द॒दा॒तु॒। परा॑। भा॒गम्। ओष॑धीनाम्। ज॒य॒न्ता॒म्॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः।

अनु दह सहमूरान् क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः॥ १९॥

सनात्। अग्ने। मृणसि। यातुऽधानान्। न। त्वा। रक्षांसि। पृतनासु। जिग्युः।

अनु। दह। सहऽमूरान्। क्रव्यऽअदः। मा। ते। हेत्याः। मुक्षत। दैव्यायाः॥ १९॥

त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात्।

प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहन्तु॥ २०॥ [८]

त्वम्। नः। अग्ने। अधरात्। उदक्तात्। त्वम्। पश्चात्। उत। रक्ष। पुरस्तात्।

प्रति। ते। ते। अजरासः। तपिष्ठाः। अघऽशंसम्। शोशुचतः। दहन्तु॥ २०॥

पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन्।

सखे सखायमजरो जरिम्णेऽग्ने मर्तां अमर्त्यस्त्वं नः॥ २१॥

पश्चात्। पुरस्तात्। अधरात्। उदक्तात्। कविः। काव्येन। परि। पाहि। राजन्।

सखे। सखायम्। अजरः। जरिम्णे। अग्ने। मर्तान्। अमर्त्यः। त्वम्। नः॥ २१॥

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावताम्॥ २२॥

परि। त्वा। अग्ने। पुरम्। वयम्। विप्रम्। सहस्य। धीमहि।

धृषत्ऽवर्णम्। दिवेऽदिवे। हन्तारम्। भङ्गुरऽवताम्॥ २२॥

विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह। अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः॥ २३॥

विषेण। भङ्गुरऽवतः। प्रति। स्म। रक्षसः। दह।

अग्ने। तिग्मेन। शोचिषा। तपुः२अग्राभिः। ऋष्टिऽभिः॥ २३॥

प्रत्यग्ने मिथुना दह यातुधाना किमीदिना।

सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः॥ २४॥

प्रति। अग्ने। मिथुना। दह। यातुऽधाना। किमीदिना।

सम्। त्वा। शिशामि। जागृहि। अदब्धम्। विप्र। मन्मऽभिः॥ २४॥

प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति। यातुधानस्य रक्षसो बलं वि रुज वीर्यम्॥ २५॥ [९]

प्रति। अग्ने। हरसा। हरः। शृणीहि। विश्वतः। प्रति।

यातुऽधानस्य। रक्षसः। बलम्। वि। रुज। वीर्यम्॥ २५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८८] [१९ मूर्धन्वान् आङ्गिरसो, वामदेव्यो वा। सूर्यवैश्वानरौ। त्रिष्टुप्।]

हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ।

तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त॥ १॥

हविः। पान्तम्। अजरम्। स्वःऽविदि। दिविऽस्पृशि। आऽहुतम्। जुष्टम्। अग्नौ।

तस्य। भर्मणे। भुवनाय। देवाः। धर्मणे। कम्। स्वधया। पप्रथन्त॥ १॥

गीर्णं भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ।

तस्य देवाः पृथिवी द्यौरुतापोऽरणयन्नोषधीः सख्ये अस्य॥ २॥

गीर्णम्। भुवनम्। तमसा। अपऽगूळ्हम्। आविः। स्वः। अभवत्। जाते। अग्नौ।

तस्य। देवाः। पृथिवी। द्यौः। उत। आपः। अरणयन्। ओषधीः। सख्ये। अस्य॥ २॥

देवेभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम्।

यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम्॥ ३॥

देवेभिः। नु। इषितः। यज्ञियेभिः। अग्निम्। स्तोषाणि। अजरम्। बृहन्तम्।

यः। भानुना। पृथिवीम्। द्याम्। उत। इमाम्। आऽततान। रोदसी इति। अन्तरिक्षम्॥ ३॥

यो होतासीत्प्रथमो देवजुष्टो यं समाञ्जन्नाज्येना वृणानाः।

स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः॥ ४॥

यः। होता। आसीत्। प्रथमः। देवऽजुष्टः। यम्। सम्ऽआञ्जन्। आज्येन। वृणानाः।

सः। पतत्रि। इत्वरम्। स्थाः। जगत्। यत्। श्वात्रम्। अग्निः। अकृणोत्। जातऽवेदाः॥ ४॥

यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन।

तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः॥ ५॥ [१०]

यत्। जातऽवेदः। भुवनस्य। मूर्धन्। अतिष्ठः। अग्ने। सह। रोचनेन।

तम्। त्वा। अहेम। मतिऽभिः। गीःऽभिः। उक्थैः। सः। यज्ञियः। अभवः। रोदसिऽप्राः॥ ५॥

मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्।

मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन्॥ ६॥

मूर्धा। भुवः। भवति। नक्तम्। अग्निः। ततः। सूर्यः। जायते। प्रातः। उत्ऽयन्।

मायाम्। ऊँ इति। तु। यज्ञियानाम्। एताम्। अपः। यत्। तूर्णिः। चरति। प्रऽजानन्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा।

तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः॥ ७॥

दृशेन्यः। यः। महिना। सम्ऽइद्धः। अरोचत। दिविऽयोनिः। विभाऽवा।

तस्मिन्। अग्नौ। सूक्तऽवाकेन। देवाः। हविः। विश्वे। आ। अजुहवुः। तनूऽपाः॥ ७॥

सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयन्त देवाः।

स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः॥ ८॥

सूक्तऽवाकम्। प्रथमम्। आत्। इत्। अग्निम्। आत्। इत्। हविः। अजनयन्त। देवाः।

सः। एषाम्। यज्ञः। अभवत्। तनूऽपाः। तम्। द्यौः। वेद। तम्। पृथिवी। तम्। आपः॥ ८॥

यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा।

सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा॥ ९॥

यम्। देवासः। अजनयन्त। अग्निम्। यस्मिन्। आ। अजुहवुः। भुवनानि। विश्वा।

सः। अर्चिषा। पृथिवीम्। द्याम्। उत। इमाम्। ऋजुऽयमानः। अतपत्। महिऽत्वा॥ ९॥

स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम्।

तमू अकृण्वन्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः॥ १०॥ [११]

स्तोमेन। हि। दिवि। देवासः। अग्निम्। अजीजनन्। शक्तिऽभिः। रोदसिऽप्राम्।

तम्। ऊँ। इति। अकृण्वन्। त्रेधा। भुवे। कम्। सः। ओषधीः। पचति। विश्वऽरूपाः॥ १०॥

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम्।

यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा॥ ११॥

यदा। इत्। एनम्। अदधुः। यज्ञियासः। दिवि। देवाः। सूर्यम्। आदितेयम्।

यदा। चरिष्णू इति। मिथुनौ। अभूताम्। आत्। इत्। प्र। अपश्यन्। भुवनानि। विश्वा॥ ११॥

विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्।

आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन्॥ १२॥

विश्वस्मै। अग्निम्। भुवनाय। देवाः। वैश्वानरम्। केतुम्। अह्नाम्। अकृण्वन्।

आ। यः। ततान। उषसः। विऽभातीः। अपो इति। ऊर्णोति। तमः। अर्चिषा। यन्॥ १२॥

वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यम्।

नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम्॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वैश्वानरम्। कवयः। यज्ञियासः। अग्निम्। देवाः। अजनयन्। अजुर्यम्।
नक्षत्रम्। प्रत्नम्। अमिनत्। चरिष्णु। यक्षस्य। अधिऽअक्षम्। तविषम्। बृहन्तम्॥ १३॥

वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात्॥ १४॥

वैश्वानरम्। विश्वहा। दीदिऽवांसम्। मन्त्रैः। अग्निम्। कविम्। अच्छ। वदामः।
यः। महिम्ना। परिऽबभूव। उर्वी इति। उत। अवस्तात्। उत। देवः। परस्तात्॥ १४॥

द्वे स्रुती अशृणवं पितृणामहं देवानामुत मर्त्यानाम्।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च॥ १५॥ [१२]

द्वे इति। स्रुती इति। अशृणवम्। पितृणाम्। अहम्। देवानाम्। उत। मर्त्यानाम्।
ताभ्याम्। इदम्। विश्वम्। एजत्। सम्। एति। यत्। अन्तरा। पितरम्। मातरम्। च॥ १५॥

द्वे समीची बिभृतश्चरन्तं शीर्षतो जातं मनसा विमृष्टम्।
स प्रत्यङ् विश्वा भुवनानि तस्थावप्रयुच्छन् तरणिर्भ्राजमानः॥ १६॥

द्वे इति। समीची इति सम्ऽईची। बिभृतः। चरन्तम्। शीर्षतः। जातम्। मनसा। विऽमृष्टम्।
सः। प्रत्यङ्। विश्वा। भुवनानि। तस्थौ। अप्रऽयुच्छन्। तरणिः। भ्राजमानः॥ १६॥

यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद।
आ शेकुरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत्॥ १७॥

यत्र। वदेते इति। अवरः। परः। च। यज्ञन्योः। कतरः। नौ। वि। वेद।
आ। शेकुः। इत्। सधऽमादम्। सखायः। नक्षन्त। यज्ञम्। कः। इदम्। वि। वोचत्॥ १७॥

कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम्॥ १८॥

कति। अग्नयः। कति। सूर्यासः। कति। उषसः। कति। ऊँ इति। स्वित्। आपः।
न। उपऽस्पिजम्। वः। पितरः। वदामि। पृच्छामि। वः। कवयः। विद्मने। कम्॥ १८॥

यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः।
तावद्दधात्युप यज्ञमायन् ब्राह्मणो होतुरवरो निषीदन्॥ १९॥ [१३]

यावत्ऽमात्रम्। उषसः। न। प्रतीकम्। सुऽपर्ण्यः। वसते। मातरिश्वः।
तावत्। दधाति। उप। यज्ञम्। आऽयन्। ब्राह्मणः। होतुः। अवरः। निऽसीदन्॥ १९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[८९] [१८ रेणुर्वैश्वामित्रः। इन्द्र, ५ इन्द्रासोमौ। त्रिष्टुप्।]

इन्द्रं॑ स्तवा॒ नृत॑मं॒ यस्य॑ म॒ह्ना वि॑बबा॒धे रो॑च॒ना वि ज्मो अन्ता॑न्।

आ यः प॒प्रौ च॑र्षणी॒धृद्वरो॑भिः॒ प्र सिन्धु॑भ्य रिरिचा॒नो म॑हि॒त्वा॥ १॥

इन्द्र॑म्। स्त॒व॒। नृ॰त॑मम्। यस्य॑। म॒ह्ना। वि॒॰ब॒बा॒धे। रो॒च॒ना। वि। ज्मः। अन्ता॑न्।

आ। यः। प॒प्रौ। च॒र्ष॒णि॒॰धृत्। वर॑ःऽभिः। प्र। सिन्धु॑॰भ्यः। रि॒रि॒चा॒नः। म॒हि॒॰त्वा॥ १॥

स सूर्यः॒ पर्यु॒रू वरा॒स्येन्द्रो॑ ववृत्या॒द्रथ्ये॑व च॒क्रा।

अति॑ष्ठन्तमप॒स्यं॑१ न सर्गं॑ कृष्णा तमां॑सि॒ त्विष्या॑ जघान॥ २॥

सः। सूर्यः॑। परि॑। उ॒रु। वरां॑सि। आ। इन्द्रः॑। व॒वृ॒त्या॒त्। रथ्या॑ऽइव। च॒क्रा।

अति॑ष्ठन्तम्। अ॒प॒स्य॑म्। न। सर्ग॑म्। कृ॒ष्णा। तमां॑सि। त्विष्या॑। ज॒घा॒न॥ २॥

स॒मा॒नम॑स्मा॒ अन॑पावृदर्च क्ष्म॒या दि॒वो अस॑मं॒ ब्रह्म॒ नव्य॑म्।

वि यः पृ॒ष्ठेव॒ जनि॑मान्य॒र्य इन्द्र॑श्चि॒काय॒ न सखा॑यमी॒षे॥ ३॥

स॒मा॒नम्। अ॒स्मै॒। अन॑प॰वृत्। अ॒र्च॒। क्ष्म॒या। दि॒वः। अस॑मम्। ब्रह्म॑। नव्य॑म्।

वि। यः। पृ॒ष्ठाऽइ॑व। जनि॑मानि। अ॒र्यः। इन्द्रः॑। चि॒काय॑। न। सखा॑यम्। ई॒षे॥ ३॥

आपा॑न्तमन्युस्तृ॒पल॑प्रभर्मा॒ धुनिः॒ शिमी॑वा॒ञ्छरु॑माँ ऋ॒जी॒षी।

सोमो॒ विश्वा॑न्यत॒सा वना॑नि॒ नार्वागिन्द्रं॑ प्रति॒माना॑नि देभुः॥ ५॥ [१४]

आपा॑न्त॰मन्युः। तृ॒पल॑॰प्रभर्मा। धुनि॑ः। शिमी॑॰वान्। शरु॑॰मान्। ऋ॒जी॒षी।

सोम॑ः। विश्वा॑नि। अ॒त॒सा। वना॑नि। न। अ॒र्वाक्। इन्द्र॑म्। प्र॒ति॒॰माना॑नि। दे॒भुः॥ ५॥

न यस्य॒ द्यावा॑पृथि॒वी न धन्व॒ नान्तरि॑क्षं॒ नाद्र॑यः॒ सोमो॑ अक्षाः।

यद॑स्य म॒न्युर॑धिनी॒यमा॑नः शृ॒णाति॑ वी॒ळु रु॒जति॑ स्थि॒राणि॑॥ ६॥

न। यस्य॑। द्यावा॑पृथि॒वी इति॑। न। धन्व॑। न। अ॒न्तरि॑क्षम्। न। अद्र॑यः। सोम॑ः। अ॒क्षा॒रिति॑।

यत्। अ॒स्य॒। म॒न्युः। अ॒धि॒॰नी॒यमा॑नः। शृ॒णाति॑। वी॒ळु। रु॒जति॑। स्थि॒राणि॑॥ ६॥

ज॒घान॑ वृ॒त्रं स्वधि॑ति॒र्वने॑व रु॒रोज॒ पुरो॒ अर॑द॒न्न सिन्धू॑न्।

बि॒भेद॑ गि॒रिं नव॒मिन्न कु॒म्भमा गा इन्द्रो॑ अकृणुत स्व॒युग्भिः॑॥ ७॥

ज॒घान॑। वृ॒त्रम्। स्व॰धि॑तिः। वना॑ऽइव। रु॒रोज॑। पुर॑ः। अर॑दत्। न। सिन्धू॑न्।

बि॒भेद॑। गि॒रिम्। नव॑म्। इत्। न। कु॒म्भम्। आ। गाः। इन्द्रः॑। अ॒कृ॒णु॒त॒। स्व॒युक्॰भिः॑॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वं ह त्यदृणया इन्द्र धीरोऽसिर्न पर्व वृजिना शृणासि।

प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम्॥ ८॥

त्वम्। ह। त्यत्। ऋणऽयाः। इन्द्र। धीरः। असिः। न। पर्व। वृजिना। शृणासि।

प्र। ये। मित्रस्य। वरुणस्य। धाम। युजम्। न। जनाः। मिनन्ति। मित्रम्॥ ८॥

प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनन्ति।

न्य१मित्रेषु वधमिन्द्र तुम्रं वृषन् वृषाणमरुषं शिशीहि॥ ९॥

प्र। ये। मित्रम्। प्र। अर्यमणम्। दुःऽएवाः। प्र। सम्ऽगिरः। प्र। वरुणम्। मिनन्ति।

नि। अमित्रेषु। वधम्। इन्द्र। तुम्रम्। वृषन्। वृषाणम्। अरुषम्। शिशीहि॥ ९॥

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम्।

इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः॥ १०॥ [१५]

इन्द्रः। दिवः। इन्द्रः। ईशे। पृथिव्याः। इन्द्रः। अपाम्। इन्द्रः। इत्। पर्वतानाम्।

इन्द्रः। वृधाम्। इन्द्रः। इत्। मेधिराणाम्। इन्द्रः। क्षेमे। योगे। हव्यः। इन्द्रः॥ १०॥

प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात्प्र समुद्रस्य धासेः।

प्र वातस्य प्रथसः प्र ज्मो अन्तात्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः॥ ११॥

प्र। अक्तुऽभ्यः। इन्द्रः। प्र। वृधः। अहऽभ्यः। प्र। अन्तरिक्षात्। प्र। समुद्रस्य। धासेः।

प्र। वातस्य। प्रथसः। प्र। ज्मः। अन्तात्। प्र। सिन्धुऽभ्यः। रिरिचे। प्र। क्षितिऽभ्यः॥ ११॥

प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः।

अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान्॥ १२॥

प्र। शोशुचत्याः। उषसः। न। केतुः। असिन्वा। ते। वर्तताम्। इन्द्र। हेतिः।

अश्वाऽइव। विध्य। दिवः। आ। सृजानः। तपिष्ठेन। हेषसा। द्रोघऽमित्रान्॥ १२॥

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः।

अन्विन्द्रं रोदसी वावशाने अन्वापो अजिहत जायमानम्॥ १३॥

अनु। अह। मासाः। अनु। इत्। वनानि। अनु। ओषधीः। अनु। पर्वतासः।

अनु। इन्द्रम्। रोदसी इति। वावशाने इति। अनु। आपः। अजिहत। जायमानम्॥ १३॥

कर्हि स्वित्सा त इन्द्र चेत्यासदघस्य यद्भिनदो रक्ष एषत्।

मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयन्ते॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कर्हि । स्वित् । सा । ते । इन्द्र । चेत्या । असत् । अघस्य । यत् । भिनदः । रक्षः । आऽईषत् ।
मित्रऽक्रुवः । यत् । शसने । न । गावः । पृथिव्याः । आऽपृक् । अमुया । शयन्ते ॥ १४ ॥

शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणास इन्द्र।
अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥ १५ ॥

शत्रुऽयन्तः । अभि । ये । नः । ततस्रे । महि । व्राधन्तः । ओगणासः । इन्द्र ॥ अन्धेन । अमित्राः ।
तमसा । सचन्ताम् । सुऽज्योतिषः । अक्तवः । तान् । अभि । स्युरिति स्युः ॥ १५ ॥

पुरूणि हि त्वा सवना जनानां ब्रह्माणि मन्दन् गृणतामृषीणाम्।
इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ्॥ १६ ॥

पुरूणि । हि । त्वा । सवना । जनानाम् । ब्रह्माणि । मन्दन् । गृणताम् । ऋषीणाम् ।
इमाम् । आऽघोषन् । अवसा । सऽहूतिम् । तिरः । विश्वान् । अर्चतः । याहि । अर्वाङ्॥ १६ ॥

एवा ते वयमिन्द्र भुञ्जतीनां विद्याम सुमतीनां नवानाम्।
विद्याम वस्तोरवसा गृणन्तो विश्वामित्रा उत त इन्द्र नूनम्॥ १७ ॥

एव । ते । वयम् । इन्द्र । भुञ्जतीनाम् । विद्याम । सुऽमतीनाम् । नवानाम् ।
विद्याम । वस्तोः । अवसा । गृणन्तः । विश्वामित्राः । उत । ते । इन्द्र । नूनम् ॥ १७ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ १८ ॥ [१६]

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ १८ ॥

[९०] [१६ नारायणः। पुरुषः। अनुष्टुप्, १६ त्रिष्टुप्।]

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥ १ ॥
सहस्रऽशीर्षा । पुरुषः । सहस्रऽअक्षः । सहस्रऽपात् ।
सः । भूमिम् । विश्वतः । वृत्वा । अति । अतिष्ठत् । दशऽअङ्गुलम् ॥ १ ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ २ ॥
पुरुषः । एव । इदम् । सर्वम् । यत् । भूतम् । यत् । च । भव्यम् ।
उत । अमृतऽत्वस्य । ईशानः । यत् । अन्नेन । अतिऽरोहति ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतावा॑नस्य महि॒मातो॒ ज्याया॑ँश्च॒ पूरु॑षः।

पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृत॑ं दि॒वि॥ ३॥

ए॒तावा॑न्। अ॒स्य॒। म॒हि॒मा। अत॑ः। ज्याया॑न्। च॒। पुरु॑षः।

पाद॑ः। अ॒स्य॒। विश्वा॑। भू॒तानि॑। त्रि॒ऽपात्। अ॒स्य॒। अ॒मृत॑म्। दि॒वि॥ ३॥

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः॒ पादो॑ऽस्ये॒हाभ॑व॒त् पुन॑ः।

ततो॒ विष्व॒ङ् व्य॑क्रामत्साशनानश॒ने अ॒भि॥ ४॥

त्रि॒ऽपात्। ऊ॒र्ध्वः। उत्। ऐ॒त्। पुरु॑षः। पाद॑ः। अ॒स्य॒। इ॒ह। अ॒भ॒व॒त्। पु॒नरिति॑।

तत॑ः। विष्व॑ङ्। वि। अ॒क्रा॒म॒त्। सा॒श॒ना॒न॒श॒ने इति॑। अ॒भि॥ ४॥

तस्मा॑द्वि॒राळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः।

स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॑म॒थो॑ पु॒रः॥ ५॥ [१७]

तस्मा॑त्। वि॒ऽराट्। अ॒जा॒य॒त॒। वि॒ऽराज॑ः। अधि॑। पुरु॑षः।

सः। जा॒तः। अति॑। अ॒रि॒च्य॒त॒। प॒श्चात्। भूमि॑म्। अथो॒ इति॑। पु॒रः॥ ५॥

यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत। व॒स॒न्तो अ॑स्यासी॒दाज्य॑ं ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः॥ ६॥

यत्। पुरु॑षेण। ह॒विषा॑। दे॒वाः। य॒ज्ञम्। अत॑न्वत।

व॒स॒न्तः। अ॒स्य॒। आ॒सी॒त्। आज्य॑म्। ग्री॒ष्मः। इ॒ध्मः। श॒रत्। ह॒विः॥ ६॥

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न् पुरु॑षं जा॒तम॑ग्र॒तः। तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये॥ ७॥

तम्। य॒ज्ञम्। ब॒र्हिषि॑। प्र। औ॒क्ष॒न्। पुरु॑षम्। जा॒तम्। अ॒ग्र॒तः।

तेन॑। दे॒वाः। अ॒य॒ज॒न्त॒। सा॒ध्याः। ऋष॑यः। च॒। ये॥ ७॥

तस्मा॑द्य॒ज्ञात् स॑र्व॒हुत॒ः संभृ॑तं पृषदा॒ज्यम्।

प॒शून् तांश्च॑क्रे वाय॒व्या॑नार॒ण्यान् ग्रा॒म्याश्च॒ ये॥ ८॥

तस्मा॑त्। य॒ज्ञात्। स॒र्व॒ऽहुत॑ः। सम्ऽभृ॑तम्। पृ॒ष॒त्ऽआ॒ज्यम्।

प॒शून्। तान्। च॒क्रे॒। वा॒य॒व्या॑न्। आ॒र॒ण्यान्। ग्रा॒म्याः। च॒। ये॥ ८॥

तस्मा॑द्य॒ज्ञात् स॑र्व॒हुत॒ ऋच॒ः सामा॑नि जज्ञिरे। छन्दा॑ंसि जज्ञि॒रे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत॥ ९॥

तस्मा॑त्। य॒ज्ञात्। स॒र्व॒ऽहुत॑ः। ऋच॑ः। सामा॑नि। ज॒ज्ञि॒रे॒।

छन्दा॑ंसि। ज॒ज्ञि॒रे॒। तस्मा॑त्। यजु॑ः। तस्मा॑त्। अ॒जा॒य॒त॒॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्मादश्वा अजायन्त ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः॥ १०॥ [१८]

तस्मात्। अश्वाः। अजायन्त। ये। के। च। उभयादतः।

गावः। ह। जज्ञिरे। तस्मात्। तस्मात्। जाताः। अजावयः॥ १०॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते॥ ११॥

यत्। पुरुषम्। वि। अदधुः। कतिधा। वि। अकल्पयन्।

मुखम्। किम्। अस्य। कौ। बाहू इति। कौ। ऊरू इति। पादौ। उच्येते इति॥ ११॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ १२॥

ब्राह्मणः। अस्य। मुखम्। आसीत्। बाहू इति। राजन्यः। कृतः।

ऊरू इति। तत्। अस्य। यत्। वैश्यः। पत्ऽभ्याम्। शूद्रः। अजायत॥ १२॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥ १३॥

चन्द्रमाः। मनसः। जातः। चक्षोः। सूर्यः। अजायत।

मुखात्। इन्द्रः। च। अग्निः। च। प्राणात्। वायुः। अजायत॥ १३॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ १४॥

नाभ्याः। आसीत्। अन्तरिक्षम्। शीर्ष्णः। द्यौः। सम्। अवर्तत।

पत्ऽभ्याम्। भूमिः। दिशः। श्रोत्रात्। तथा। लोकान्। अकल्पयन्॥ १४॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः।

देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्॥ १५॥

सप्त। अस्य। आसन्। परिऽधयः। त्रिः। सप्त। सम्ऽइधः। कृताः।

देवाः। यत्। यज्ञम्। तन्वानाः। अबध्नन्। पुरुषम्। पशुम्॥ १५॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ १६॥ [१९] {७}

यज्ञेन। यज्ञम्। अयजन्त। देवाः। तानि। धर्माणि। प्रथमानि। आसन्।

ते। ह। नाकम्। महिमानः। सचन्त। यत्र। पूर्वे। साध्याः। सन्ति। देवाः॥ १६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[९१] [१५ अरुणो वैतहव्यः। अग्निः। जगती, १५ त्रिष्टुप्।]

सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इषयन्निळस्पदे।

विश्वस्य होता हविषो वरेण्यो विभुर्विभावा सुषखा सखीयते॥ १॥

सम्। जागृवत्ऽभिः। जरमाणः। इध्यते। दमे। दमूनाः। इषयन्। इळः। पदे।

विश्वस्य। होता। हविषः। वरेण्यः। विऽभुः। विभाऽवा। सुऽसखा। सखिऽयते॥ १॥

स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव।

जनंजनं जन्यो नाति मन्यते विश आ क्षेति विश्यो३ विशंविशम्॥ २॥

सः। दर्शतऽश्रीः। अतिथिः। गृहेऽगृहे। वनेऽवने। शिश्रिये। तक्ववीःऽइव।

जनम्ऽजनम्। जन्यः। न। अति। मन्यते। विशः। आ। क्षेति। विश्यः। विशम्ऽविशम्॥ २॥

सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्ववित्।

वसुर्वसूनां क्षयसि त्वमेक इद् द्यावा च यानि पृथिवी च पुष्यतः॥ ३॥

सुऽदक्षः। दक्षैः। क्रतुना। असि। सुऽक्रतुः। अग्ने। कविः। काव्येन। असि। विश्वऽवित्।

वसुः। वसूनाम्। क्षयसि। त्वम्। एकः। इत्। द्यावा। च। यानि। पृथिवी इति। च। पुष्यतः॥ ३॥

प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः।

आ ते चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्मयः॥ ४॥

प्रऽजानन्। अग्ने। तव। योनिम्। ऋत्वियम्। इळायाः। पदे। घृतऽवन्तम्। आ। असदः।

आ। ते। चिकित्रे। उषसाम्ऽइव। एतयः। अरेपसः। सूर्यस्यऽइव। रश्मयः॥ ४॥

तव श्रियो वर्ष्यस्येव विद्युतश्चित्राश्चिकित्र उषसां न केतवः।

यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये॥ ५॥ [२०]

तव। श्रियः। वर्ष्यस्यऽइव। विऽद्युतः। चित्राः। चिकित्रे। उषसाम्। न। केतवः।

यत्। ओषधीः। अभिऽसृष्टः। वनानि। च। परि। स्वयम्। चिनुषे। अन्नम्। आस्ये॥ ५॥

तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः।

तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा॥ ६॥

तम्। ओषधीः। दधिरे। गर्भम्। ऋत्वियम्। तम्। आपः। अग्निम्। जनयन्त। मातरः।

तम्। इत्। समानम्। वनिनः। च। वीरुधः। अन्तःऽवतीः। च। सुवते। च। विश्वहा॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे।
आप ते यतन्ते रथ्यो३ यथा पृथक्शर्धांस्यग्ने अजराणि धक्षतः॥ ७॥
वातऽउपधूतः। इषितः। वशान्। अनु। तृषु। यत्। अन्ना। वेविषत्। विऽतिष्ठसे।
आ। ते। यतन्ते। रथ्यः। यथा। पृथक्। शर्धांसि। अग्ने। अजराणि। धक्षतः॥ ७॥
मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम्।
तमिदर्भे हविष्या समानमित्तमिन्महे वृणते नान्यं त्वत्॥ ८॥
मेधाऽकारम्। विदथस्य। प्रऽसाधनम्। अग्निम्। होतारम्। परिऽभूतमम्। मतिम्।
तम्। इत्। अर्भे। हविषि। आ। समानम्। इत्। तम्। इत्। महे। वृणते। न। अन्यम्। त्वत्॥ ८॥
त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः।
यद्देवयन्तो दधति प्रयांसि ते हविष्मन्तो मनवो वृक्तबर्हिषः॥ ९॥
त्वाम्। इत्। अत्र। वृणते। त्वाऽयवः। होतारम्। अग्ने। विदथेषु। वेधसः।
यत्। देवऽयन्तः। दधति। प्रयांसि। ते। हविष्मन्तः। मनवः। वृक्तऽबर्हिषः॥ ९॥
तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे॥ १०॥ [२१]
तव। अग्ने। होत्रम्। तव। पोत्रम्। ऋत्वियम्। तव। नेष्ट्रम्। त्वम्। अग्नित्। ऋतऽयतः।
तव। प्रऽशास्त्रम्। त्वम्। अध्वरिऽयसि। ब्रह्मा। च। असि। गृहऽपतिः। च। नः। दमे॥ १०॥
यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति।
तस्य होता भवसि यासि दूत्य१मुप ब्रूषे यजस्यध्वरीयसि॥ ११॥
यः। तुभ्यम्। अग्ने। अमृताय। मर्त्यः। सम्ऽइधा। दाशत्। उत। वा। हविःऽकृति।
तस्य। होता। भवसि। यासि। दूत्यम्। उप। ब्रूषे। यजसि। अध्वरिऽयसि॥ ११॥
इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत।
वसूयवो वसवे जातवेदसे वृद्धासु चिद्वर्धनो यासु चाकनत्॥ १२॥
इमाः। अस्मै। मतयः। वाचः। अस्मत्। आ। ऋचः। गिरः। सुऽस्तुतयः। सम्। अग्मत्।
वसुऽयवः। वसवे। जातऽवेदसे। वृद्धासु। चित्। वर्धनः। यासु। चाकनत्॥ १२॥
इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः।
भूया अन्तरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमाम्। प्रत्नाय। सुऽस्तुतिम्। नवीयसीम्। वोचेयम्। अस्मै। उशते। शृणोतु। नः।
भूयाः। अन्तरा। हृदि। अस्य। निऽस्पृशे। जायाऽइव। पत्ये। उशती। सुऽवासाः॥ १३॥

यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये॥ १४॥

यस्मिन्। अश्वासः। ऋषभासः। उक्षणः। वशाः। मेषाः। अवऽसृष्टासः। आऽहुताः।
कीलालऽपे। सोमऽपृष्ठाय। वेधसे। हृदा। मतिम्। जनये। चारुम्। अग्नये॥ १४॥

अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम्॥ १५॥ [२२]

अहावि। अग्ने। हविः। आस्ये। ते। स्रुचिऽइव। घृतम्। चम्विऽइव। सोमः।
वाजऽसनिम्। रयिम्। अस्मे इति। सुऽवीरम्। प्रऽशस्तम्। धेहि। यशसम्। बृहन्तम्॥ १५॥

[९२] [१५ शार्यातो मानवः। विश्वे देवाः। जगती।]

यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुम्।
शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत॥ १॥

यज्ञस्य। वः। रथ्यम्। विश्पतिम्। विशाम्। होतारम्। अक्तोः। अतिथिम्। विभाऽवसुम्।
शोचन्। शुष्कासु। हरिणीषु। जर्भुरत्। वृषा। केतुः। यजतः। द्याम्। अशायत॥ १॥

इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम्।
अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते॥ २॥

इमम्। अञ्जःऽपाम्। उभये। अकृण्वत। धर्माणम्। अग्निम्। विदथस्य। साधनम्।
अक्तुम्। न। यह्वम्। उषसः। पुरःऽहितम्। तनूऽनपातम्। अरुषस्य। निंसते॥ २॥

बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्तवे।
यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन्॥ ३॥

बट्। अस्य। नीथा। वि। पणेः। च। मन्महे। वयाः। अस्य। प्रऽहुताः। आसुः। अत्तवे।
यदा। घोरासः। अमृतऽत्वम्। आशत। आत्। इत्। जनस्य। दैव्यस्य। चर्किरन्॥ ३॥

ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्य१रमतिः पनीयसी।
इन्द्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋतस्यं। हि। प्रऽसितिः। द्यौः। उरु। व्यचः। नमः। मही। अरमतिः। पनीयसी।
इन्द्रः। मित्रः। वरुणः। सम्। चिकित्रिरे। अथो इति। भगः। सविता। पूतऽदक्षसः॥ ४॥

प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे।
येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते॥ ५॥ [२३]

प्र। रुद्रेण। ययिना। यन्ति। सिन्धवः। तिरः। महीम्। अरमतिम्। दधन्विरे।
येभिः। परिऽज्मा। परिऽयन्। उरु। ज्रयः। वि। रोरुवत्। जठरे। विश्वम्। उक्षते॥ ५॥

क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः।
तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वशः॥ ६॥

क्राणाः। रुद्राः। मरुतः। विश्वऽकृष्टयः। दिवः। श्येनासः। असुरस्य। नीळयः।
तेभिः। चष्टे। वरुणः। मित्रः। अर्यमा। इन्द्रः। देवेभिः। अर्वशेभिः। अर्वशः॥ ६॥

इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये।
प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः॥ ७॥

इन्द्रे। भुजम्। शशमानासः। आशत। सूरः। दृशीके। वृषणः। च। पौंस्ये।
प्र। ये। नु। अस्य। अर्हणा। ततक्षिरे। युजम्। वज्रम्। नृऽसदनेषु। कारवः॥ ७॥

सूरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयसः।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः स्तन्नबाधितः॥ ८॥

सूरः। चित्। आ। हरितः। अस्य। रीरमत्। इन्द्रात्। आ। कः। चित्। भयते। तवीयसः।
भीमस्य। वृष्णः। जठरात्। अभिऽश्वसः। दिवेऽदिवे। सहुरिः। स्तन्। अबाधितः॥ ८॥

स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन।
येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः॥ ९॥

स्तोमम्। वः। अद्य। रुद्राय। शिक्वसे। क्षयत्ऽवीराय। नमसा। दिदिष्टन।
येभिः। शिवः। स्वऽवान्। एवयावऽभिः। दिवः। सिसक्ति। स्वऽयशाः। निकामऽभिः॥ ९॥

ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमजामयः।
यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे॥ १०॥ [२४]

ते। हि। प्रऽजायाः। अभरन्त। वि। श्रवः। बृहस्पतिः। वृषभः। सोमऽजामयः।
यज्ञैः। अथर्वा। प्रथमः। वि। धारयत्। देवाः। दक्षैः। भृगवः। सम्। चिकित्रिरे॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरङ्गो यमोऽदितिः।

देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे॥ ११॥

ते इति। हि। द्यावापृथिवी इति। भूरिऽरेतसा। नराशंसः। चतुःऽअङ्गः। यमः। अदितिः।

देवः। त्वष्टा। द्रविणःऽदाः। ऋभुक्षणः। प्र। रोदसी इति। मरुतः। विष्णुः। अर्हिरे॥ ११॥

उत स्य न उशिजामुर्विया कविरहिः शृणोतु बुध्न्यो३ हवीमनि।

सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम्॥ १२॥

उत। स्यः। नः। उशिजाम्। उर्विया। कविः। अहिः। शृणोतु। बुध्न्यः। हवीमनि।

सूर्यामासा। विऽचरन्ता। दिविऽक्षिता। धिया। शमीनहुषी इति। अस्य। बोधतम्॥ १२॥

प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये।

आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम्॥ १३॥

प्र। नः। पूषा। चरथम्। विश्वऽदेव्यः। अपाम्। नपात्। अवतु। वायुः। इष्टये।

आत्मानम्। वस्यः। अभि। वातम्। अर्चत। तत्। अश्विना। सुऽहवा। यामनि। श्रुतम्॥ १३॥

विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि।

ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिम्॥ १४॥

विशाम्। आसाम्। अभयानाम्। अधिऽक्षितम्। गीःऽभिः। ऊँ इति। स्वऽयशसम्। गृणीमसि।

ग्नाभिः। विश्वाभिः। अदितिम्। अनर्वणम्। अक्तोः। युवानम्। नृऽमनाः। अध। पतिम्॥ १४॥

रेभदत्र जनुषा पूर्वो अङ्गिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम्।

येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति॥ १५॥ [२५]

रेभत्। अत्र। जनुषा। पूर्वः। अङ्गिराः। ग्रावाणः। ऊर्ध्वाः। अभि। चक्षुः। अध्वरम्।

येभिः। विऽहायाः। अभवत्। विऽचक्षणः। पाथः। सुऽमेकम्। स्वऽधितिः। वनन्ऽवति॥ १५॥

[९३] [१५ तान्वः पार्थ्यः। विश्वे देवाः। प्रस्तारपंक्तिः; २, ३, १३ अनुष्टुभः; ९ अक्षरैः पंक्तिः, ११ न्यङ्कुसारिणी, १५ पुरस्ताद्बृहती।]

महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः।

तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महि॑ । द्यावा॑पृथि॒वी इति॑ । भू॒तम् । उ॒र्वी इति॑ । नारी॑ इति॑ । य॒ह्वी इति॑ । न । रोद॑सी॒ इति॑ । सद॑म् । न॒ः ।

तेभि॑ः । न॒ः । पा॒त॒म् । सह्य॑सः । ए॒भिः । न॒ः । पा॒त॒म् । शू॒षणि॑ ॥ १ ॥

य॒ज्ञेय॑ज्ञे स मर्त्यो॑ दे॒वान्त्स॑पर्यति । यः सु॒म्नैर्दी॑र्घ॒श्रु॑त्तम आ॒विवा॑सात्येनान् ॥ २ ॥

य॒ज्ञेऽय॑ज्ञे । सः । मर्त्य॑ः । दे॒वान् । स॒प॒र्य॒ति॒ । यः । सु॒म्नैः । दी॒र्घ॒श्रु॒त॑ऽतमः । आ॒ऽविवा॑साति । ए॒ना॒न् ॥ २ ॥

विश्वे॑षामिरज्यवो दे॒वाना॒ं वार्म॒हः । विश्वे॒ हि वि॒श्वम॑हसो॒ विश्वे॑ य॒ज्ञेषु॑ य॒ज्ञिया॑ः ॥ ३ ॥

विश्वे॑षाम् । इ॒र॒ज्य॒व॒ः । दे॒वाना॑म् । वाः । म॒हः ।

विश्वे॑ । हि । वि॒श्व॑ऽम॑हसः । विश्वे॑ । य॒ज्ञेषु॑ । य॒ज्ञिया॑ः ॥ ३ ॥

ते घा॒ राजा॑नो अ॒मृत॑स्य म॒न्द्रा अ॑र्य॒मा मि॒त्रो वरु॑ण॒ः परि॑ज्मा ।

कद्रु॒द्रो नृ॒णां स्तु॒तो म॒रुत॑ः पू॒षणो॒ भग॑ः ॥ ४ ॥

ते । घ॒ । राजा॑नः । अ॒मृत॑स्य । म॒न्द्राः । अ॒र्य॒मा । मि॒त्रः । वरु॑णः । परि॑ऽज्मा ।

कत् । रु॒द्रः । नृ॒णाम् । स्तु॒तः । म॒रुत॑ः । पू॒षण॑ः । भग॑ः ॥ ४ ॥

उ॒त नो॒ नक्त॑म॒पां वृ॑षण्वसू सू॒र्या॑मासा सद॑नाय स॒धन्या॑ ।

सचा॒ यत्सा॒द्ये॑षा॒महि॑र्बु॒ध्नेषु॑ बु॒ध्न्य॑ः ॥ ५ ॥ [२६]

उ॒त । न॒ः । नक्त॑म् । अ॒पाम् । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू । सू॒र्या॒मासा॑ । सद॑नाय । स॒ऽध॒न्या॑ ।

सचा॑ । यत् । सादि॑ । ए॒षा॒म् । अहि॑ः । बु॒ध्नेषु॑ । बु॒ध्न्य॑ः ॥ ५ ॥

उ॒त नो॑ दे॒वाव॒श्विना॑ शु॒भस्पती॒ धाम॑भिर्मि॒त्रावरु॑णा उरुष्यताम् ।

म॒हः स रा॒य एष॒तेऽति॒ धन्वे॑व दुरि॒ता ॥ ६ ॥

उ॒त । न॒ः । दे॒वौ । अ॒श्विना॑ । शु॒भः । पती॒ इति॑ । धाम॑ऽभिः । मि॒त्रावरु॑णौ । उ॒रु॒ष्य॒ता॒म् ।

म॒हः । सः । रा॒यः । आ । ई॒ष॒ते॒ । अति॑ । धन्व॑ऽइव । दुः॒ऽइ॒ता ॥ ६ ॥

उ॒त नो॑ रु॒द्रा चि॑न्मृळता॒म॒श्विना॒ विश्वे॑ दे॒वासो॒ रथ॒स्पति॒र्भग॑ः ।

ऋ॒भुर्वाज॑ ऋ॒भुक्षण॒ः परि॑ज्मा विश्ववेदसः ॥ ७ ॥

उ॒त । न॒ः । रु॒द्रा । चि॒त् । मृ॒ळ॒ता॒म् । अ॒श्विना॑ । विश्वे॑ । दे॒वास॑ः । रथ॒ःऽपति॑ः । भग॑ः ।

ऋ॒भुः । वाज॑ः । ऋ॒भु॒क्ष॒ण॒ः । परि॑ऽज्मा । वि॒श्व॒ऽवे॒द॒स॒ः ॥ ७ ॥

ऋ॒भुर्ऋ॒भुक्षा ऋ॒भुर्वि॑ध॒तो मद॒ आ ते॒ हरी॑ जूजुवा॒नस्य॑ वा॒जिना॑ ।

दु॒ष्टरं॒ यस्य॒ साम॑ चि॒दृध॑ग्य॒ज्ञो न मानु॑षः ॥ ८ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋभुः। ऋभुक्षाः। ऋभुः। विधतः। मदः। आ। ते। हरी इति। जूजुवानस्य। वाजिना।
दुस्तरम्। यस्य। साम। चित्। ऋधक्। यज्ञः। न। मानुषः॥ ८॥

कृधी नो अह्रयो देव सवितः स च स्तुषे मघोनाम्।
सहो न इन्द्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न योयुवे॥ ९।

कृधि। नः। अह्रयः। देव। सवितरिति। सः। च। स्तुषे। मघोनाम्॥ सहो इति। नः।
इन्द्रः। वह्निऽभिः। नि। एषाम्। चर्षणीनाम्। चक्रम्। रश्मिम्। न। योयुवे॥ ९॥

ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे॥ १०॥ [२७]

आ। एषु। द्यावापृथिवी इति। धातम्। महत्। अस्मे इति। वीरेषु। विश्वऽचर्षणि। श्रवः।
पृक्षम्। वाजस्य। सातये। पृक्षम्। राया। उत। तुर्वणे॥ १०॥

एतं शंसमिन्द्रास्मयुष्ट्वं कूचित्सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये।
मेदतां वेदता वसो॥ ११॥

एतम्। शंसम्। इन्द्र। अस्मऽयुः। त्वम्। कूऽचित्। सन्तम्। सहसाऽवन्। अभिष्टये।
सदा। पाहि। अभिष्टये॥ मेदताम्। वेदता। वसो इति॥ ११॥

एतं मे स्तोमं तना न सूर्ये द्युतद्यामानं वावृधन्त नृणाम्।
संवननं नाश्व्यं तष्टेवानपच्युतम्॥ १२॥

एतम्। मे। स्तोमम्। तना। न। सूर्ये। द्युतत्ऽयामानम्। ववृधन्त। नृणाम्।
सम्ऽवननम्। न। अश्व्यम्। तष्टाऽइव। अनपऽच्युतम्॥ १२॥

वावर्त येषां राया युक्तैषां हिरण्ययी। नेमधिता न पौंस्या वृथेव विष्टान्ता॥ १३॥

ववर्त। येषाम्। राया। युक्ता। एषाम्। हिरण्ययी।
नेमऽधिता। न। पौंस्या। वृथाऽइव। विष्टऽअन्ता॥ १३॥

प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु।
ये युक्त्वाय पञ्च शतास्मयु पथा विश्राव्येषाम्॥ १४॥

प्र। तत्। दुःऽशीमे। पृथवाने। वेने। प्र। रामे। वोचम्। असुरे। मघवत्ऽसु।
ये। युक्त्वाय। पञ्च। शता। अस्मऽयु। पथा। विऽश्रावि। एषाम्॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अधीन्वत्र सप्ततिं च सप्त च।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः॥ १५॥ [२८]

अधि। इत्। नु। अत्र। सप्ततिम्। च। सप्त। च।
सद्यः। दिदिष्ट। तान्वः। सद्यः। दिदिष्ट। पार्थ्यः। सद्यः। दिदिष्ट। मायवः॥ १५॥

[९४] [१४ अर्बुदः काद्रवेयः सर्पः। ग्रावाणः। जगती; ५, ७, १४ त्रिष्टुभः।]

प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः॥ १॥

प्र। एते। वदन्तु। प्र। वयम्। वदाम। ग्रावऽभ्यः। वाचम्। वदत। वदत्ऽभ्यः।
यत्। अद्रयः। पर्वताः। साकम्। आशवः। श्लोकम्। घोषम्। भरथ। इन्द्राय। सोमिनः॥ १॥

एते वदन्ति शतवत्सहस्रवदभि क्रन्दन्ति हरितेभिरासभिः।
विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत॥ २॥

एते। वदन्ति। शतऽवत्। सहस्रऽवत्। अभि। क्रन्दन्ति। हरितेभिः। आसऽभिः।
विष्ट्वी। ग्रावाणः। सुऽकृतः। सुऽकृत्यया। होतुः। चित्। पूर्वे। हविः२अद्यम्। आशत॥ २॥

एते वदन्त्यविदन्नना मधु न्यूङ्खयन्ते अधि पक्व आमिषि।
वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वा वृषभाः प्रेमराविषुः॥ ३॥

एते। वदन्ति। अविदन्। अना। मधु। नि। ऊङ्खयन्ते। अधि। पक्वे। आमिषि।
वृक्षस्य। शाखाम्। अरुणस्य। बप्सतः। ते। सूभर्वा। वृषभाः। प्र। ईम्। अराविषुः॥ ३॥

बृहद्वदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्नना मधु।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः॥ ४॥

बृहत्। वदन्ति। मदिरेण। मन्दिना। इन्द्रम्। क्रोशन्तः। अविदन्। अना। मधु।
सम्ऽरभ्य। धीराः। स्वसृऽभिः। अनर्तिषुः। आऽघोषयन्तः। पृथिवीम्। उपब्दिऽभिः॥ ४॥

सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः।
न्य१ङ्नि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः॥ ५॥ [२९]

सुऽपर्णाः। वाचम्। अक्रत। उप। द्यवि। आऽखरे। कृष्णाः। इषिराः। अनर्तिषुः।
न्यक्। नि। यन्ति। उपरस्य। निः२कृतम्। पुरु। रेतः। दधिरे। सूर्यऽश्वितः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उग्राइव प्रवहन्तः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः।

यच्छ्वसन्तो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव॥ ६॥

उग्राःऽइव। प्रऽवहन्तः। सम्ऽआयमुः। साकम्। युक्ताः। वृषणः। बिभ्रतः। धुरः।

यत्। श्वसन्तः। जग्रसानाः। अराविषुः। शृण्वे। एषाम्। प्रोथथः। अर्वताम्ऽइव॥ ६॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः।

दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः॥ ७॥

दशावनिऽभ्यः। दशऽकक्ष्येभ्यः। दशऽयोक्त्रेभ्यः। दशऽयोजनेभ्यः।

दशाभीशुऽभ्यः। अर्चत। अजरेभ्यः। दश। धुरः। दश। युक्ताः। वहत्ऽभ्यः॥ ७॥

ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम्।

त ऊं सुतस्य सोम्यस्यान्धसोंऽशोः पीयूषं प्रथमस्य भेजिरे॥ ८॥

ते। अद्रयः। दशऽयन्त्रासः। आशवः। तेषाम्। आऽधानम्। परि। एति। हर्यतम्।

ते। ऊँ इति। सुतस्य। सोम्यस्य। अन्धसः। अंशोः। पीयूषम्। प्रथमस्य। भेजिरे॥ ८॥

ते सोमादो हरी इन्द्रस्य निंसतेंऽशुं दुहन्तो अध्यासते गवि।

तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विन्द्रो वर्धते प्रथते वृषायते॥ ९॥

ते। सोमऽअदः। हरी इति। इन्द्रस्य। निंसते। अंशुम्। दुहन्तः। अधि। आसते। गवि।

तेभिः। दुग्धम्। पपिऽवान्। सोम्यम्। मधु। इन्द्रः। वर्धते। प्रथते। वृषऽयते॥ ९॥

वृषा वो अंशुर्न किला रिषाथनेळावन्तः सदमित्स्थनाशिताः।

रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो अजुषध्वमध्वरम्॥ १०॥ [३०]

वृषा। वः। अंशुः। न। किल। रिषाथन। इळाऽवन्तः। सदम्। इत्। स्थन। आशिताः।

रैवत्याऽइव। महसा। चारवः। स्थन। यस्य। ग्रावाणः। अजुषध्वम्। अध्वरम्॥ १०॥

तृदिला अतृदिलासो अद्रयोऽश्रमणा अशृथिता अमृत्यवः।

अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः॥ ११॥

तृदिलाः। अतृदिलासः। अद्रयः। अश्रमणाः। अशृथिताः। अमृत्यवः।

अनातुराः। अजराः। स्थ। अमविष्णवः। सुऽपीवसः। अतृषिताः। अतृष्णऽजः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युञ्जते।
अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः॥ १२॥
ध्रुवाः। एव। वः। पितरः। युगेऽयुगे। क्षेमऽकामासः। सदसः। न। युञ्जते।
अजुर्यासः। हरिऽसाचः। हरिद्रवः। आ। द्याम्। रवेण। पृथिवीम्। अशुश्रवुः॥ १२॥
तदिद्वदन्त्यद्रयो विमोचने यामन्नञ्जस्पाइव घेदुपब्दिभिः।
वपन्तो बीजमिव धान्याकृतः पृञ्चन्ति सोमं न मिनन्ति बप्सतः॥ १३॥
तत्। इत्। वदन्ति। अद्रयः। विऽमोचने। यामन्। अञ्जःपाःऽइव। घ। इत्। उपब्धिऽभिः।
वपन्तः। बीजम्ऽइव। धान्यऽकृतः। पृञ्चन्ति। सोमम्। न। मिनन्ति। बप्सतः॥ १३॥
सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः।
वि षू मुञ्चा सुषुवुषो मनीषां वि वर्तन्तामद्रयश्चायमानाः॥ १४॥ [३१]
सुते। अध्वरे। अधि। वाचम्। अक्रत। आ। क्रीळयः। न। मातरम्। तुदन्तः।
वि। सु। मुञ्च। सुसुऽवुषः। मनीषाम्। वि। वर्तन्ताम्। अद्रयः। चायमानाः॥ १४॥

इत्याश्वलायन-संहितायां
अष्टमाष्टके
चतुर्थोऽध्यायः
समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथाष्टमाष्टके पंचमोऽध्यायः॥

[९५] [१९ : १, ३, ६, ८-१०, १२, १४, १७, १९ पुरूरवा ऐळः। उर्वशी देवता।
२, ४-५, ७, ११, १३, १५-१६, १८-१९, उर्वशी ऋषिका। पुरूरवा देवता। त्रिष्टुप्।]

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु।
न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन्॥ १॥
हये। जाये। मनसा। तिष्ठ। घोरे। वचांसि। मिश्रा। कृणवावहै। नु।
न। नौ। मन्त्राः। अनुदितासः। एते। मयः। करन्। पर॑ऽतरे। चन। अहन्॥ १॥
किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव।
पुरूरवः पुनरस्तं परेहि दुरापना वातइवाहमस्मि॥ २॥
किम्। एता। वाचा। कृणव। तव। अहम्। प्र। अक्रमिषम्। उषसाम्। अग्रियाऽइव।
पुरूरवः। पुनः। अस्तम्। परा। इहि। दुःऽआपना। वातःऽइव। अहम्। अस्मि॥ २॥
इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः। ३॥
इषुः। न। श्रिये। इषुऽधेः। असना। गोऽसाः। शतऽसाः। न। रंहिः।
अवीरे। क्रतौ। वि। दविद्युतत्। न। उरा। न। मायुम्। चितयन्त। धुनयः॥ ३॥
सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात्।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन॥ ४॥
सा। वसु। दधती। श्वशुराय। वयः। उषः। यदि। वष्टि। अन्तिऽगृहात्।
अस्तम्। ननक्षे। यस्मिन्। चाकन्। दिवा। नक्तम्। श्नथिता। वैतसेन॥ ४॥
त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१स्तदासीः॥ ५॥ [१]
त्रिः। स्म। मा। अह्नः। श्नथयः। वैतसेन। उत। स्म। मे। अव्यत्यै। पृणासि।
पुरूरवः। अनु। ते। केतम्। आयम्। राजा। मे। वीर। तन्वः। तत्। आसीः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

या सुजूर्णिः श्रेणिः सुम्नआपिर्हृदेचक्षुर्न ग्रन्थिनी चरण्युः।
ता अञ्जयोऽरुणयो न सस्त्रुः श्रिये गावो न धेनवोऽनवन्त॥ ६॥
या। सुजूर्णिः। श्रेणिः। सुम्नेआपिः। हृदेचक्षुः। न। ग्रन्थिनी। चरण्युः।
ताः। अञ्जयः। अरुणयः। न। सस्त्रुः। श्रिये। गावः। न। धेनवः। अनवन्त॥ ६॥
सम॑स्मिञ्जाय॑मान आसत ग्ना उतेमवर्धन्नद्य१ः स्वगूर्ताः।
महे यत्त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः॥ ७॥
सम्। अस्मिन्। जायमाने। आसत। ग्नाः। उत। ईम्। अवर्धन्। नद्यः। स्वगूर्ताः।
महे। यत्। त्वा। पुरूरवः। रणाय। अवर्धयन्। दस्युहत्याय। देवाः॥ ७॥
सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे।
अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः॥ ८॥
सचा। यत्। आसु। जहतीषु। अत्कम्। अमानुषीषु। मानुषः। निसेवे।
अप। स्म। मत्। तरसन्ती। न। भुज्युः। ताः। अत्रसन्। रथस्पृशः। न। अश्वाः॥ ८॥
यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः॥ ९॥
यत्। आसु। मर्तः। अमृतासु। निस्पृक्। सम्। क्षोणीभिः। क्रतुभिः। न। पृङ्क्ते।
ताः। आतयः। न। तन्वः। शुम्भत। स्वाः। अश्वासः। न। क्रीळयः। दन्दशानाः॥ ९॥
विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः॥ १०॥ [२]
विद्युत्। न। या। पतन्ती। दविद्योत्। भरन्ती। मे। अप्या। काम्यानि।
जनिष्टो इति। अपः। नर्यः। सुजातः। प्र। उर्वशी। तिरत। दीर्घम्। आयुः॥ १०॥
जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः।
अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि॥ ११॥
जज्ञिषे। इत्था। गोपीथ्याय। हि। दधाथ। तत्। पुरूरवः। मे। ओजः।
अशासम्। त्वा। विदुषी। सस्मिन्। अहन्। न। मे। आ। अशृणोः। किम्। अभुक्। वदासि॥ ११॥
कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्।
को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत्॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुदा। सूनुः। पितरम्। जातः। इच्छात्। चक्रन्। न। अश्रु। वर्तयत्। विऽजानन्।

कः। दंपती इति दम्ऽपती। सऽमनसा। वि। यूयोत्। अध। यत्। अग्निः। श्वशुरेषु। दीदयत्॥ १२॥

प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै।

प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः॥ १३॥

प्रति। ब्रवाणि। वर्तयते। अश्रु। चक्रन्। न। क्रन्दत्। आऽध्ये। शिवायै।

प्र। तत्। ते। हिनव। यत्। ते। अस्मे इति। परा। इहि। अस्मत्। नहि। मूर। मा। आपः॥ १३॥

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ।

अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः॥ १४॥

सुऽदेवः। अद्य। प्रऽपतेत्। अनावृत्। पराऽवतम्। परमाम्। गन्तवै। ऊँ इति।

अध। शयीत। निःऽऋतेः। उपऽस्थे। अध। एनम्। वृकाः। रभसासः। अद्युः॥ १४॥

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन्।

न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता॥ १५॥ [२]

पुरूरवः। मा। मृथाः। मा। प्र। पप्तः। मा। त्वा। वृकासः। अशिवासः। ऊँ इति। क्षन्।

न। वै। स्त्रैणानि। सख्यानि। सन्ति। सालावृकाणाम्। हृदयानि। एता॥ १५॥

यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः।

घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि॥ १६॥

यत्। विऽरूपा। अचरम्। मर्त्येषु। अवसम्। रात्रीः। शरदः। चतस्रः।

घृतस्य। स्तोकम्। सकृत्। अह्नः। आश्नाम्। तात्। एव। इदम्। ततृपाणा। चरामि॥ १६॥

अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः।

उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे॥ १७॥

अन्तरिक्षऽप्राम्। रजसः। विऽमानीम्। उप। शिक्षामि। उर्वशीम्। वसिष्ठः।

उप। त्वा। रातिः। सुऽकृतस्य। तिष्ठात्। नि। वर्तस्व। हृदयम्। तप्यते। मे॥ १७॥

इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबन्धुः।

प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयासे॥ १८॥

इति। त्वा। देवाः। इमे। आहुः। ऐळ। यथा। ईम्। एतत्। भवसि। मृत्युऽबन्धुः।

प्रऽजा। ते। देवान्। हविषा। यजाति। स्वःऽगे। ऊँ इति। त्वम्। अपि। मादयासे॥ १८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उद॑पप्ताम वसतेर्वयो॑ यथा रिणन्त्वा भृग॑वो मन्य॑माना॑ः।

पुरू॑रवः पुनरस्तं परेह्या मे मनो॑ देवजना अया॑सुः॥ १९॥ ★ [४]

उत्। अपप्ताम्। वसतेः। वय॑ः। यथा। रिणन्तु॑। आ। भृग॑वः। मन्य॑मानाः।

पुरू॑रवः। पुन॑ः। अस्त॑म्। परा॑। इहि। आ। मे। मन॑ः। देव॒ऽजनाः। अया॑सुः॥ १९॥

[९६] [१३ वरुणाङ्गिरसः, सर्वहरिर्वा ऐन्द्रः। हरिः। जगती, १२-१३ त्रिष्टुभौ।]

प्र ते॑ महे विदथे॑ शंसिषं हरी प्र ते॑ वन्वे वनुषो॑ हर्यतं मद॑म्।

घृतं न यो हरि॑भिश्चारु सेच॑त आ त्वा॑ विशन्तु हरि॑वर्पसं गिर॑ः॥ १॥

प्र। ते। महे। विदथे॑। शंसिषम्। हरी इति॑। प्र। ते। वन्वे। वनुष॑ः। हर्य॑तम्। मद॑म्।

घृतम्। न। यः। हरि॑ऽभिः। चारु॑। सेच॑ते। आ। त्वा। विशन्तु। हरि॑ऽवर्पसम्। गिर॑ः॥ १॥

हरिं॑ हि योनि॑मभि ये समस्व॑रन् हिन्वन्तो॑ हरी॑ दिव्यं यथा सद॑ः।

आ यं पृणन्ति हरि॑भिर्न धेनव इन्द्रा॑य शूषं हरि॑वन्तमर्चत॥ २॥

हरि॑म्। हि। योनि॑म्। अभि। ये। सम्ऽअस्व॑रन्। हिन्वन्त॑ः। हरी इति॑। दिव्यम्। यथा॑। सद॑ः।

आ। यम्। पृणन्ति॑। हरि॑ऽभिः। न। धेनव॑ः। इन्द्रा॑य। शूषम्। हरि॑ऽवन्तम्। अर्चत॥ २॥

सो अ॑स्य वज्रो॑ हरि॑तो य आ॑यसो हरि॑र्निका॑मो हरि॑रा गभ॑स्त्योः।

द्युम्नी सु॑शिप्रो हरि॑मन्युसायक इन्द्रे नि रूपा हरि॑ता मिमिक्षिरे॥ ३॥

सः। अस्य। वज्र॑ः। हरि॑तः। यः। आयसः। हरि॑ः। निऽका॑मः। हरि॑ः। आ। गभ॑स्त्योः।

द्युम्नी। सुऽशिप्रः। हरि॑मन्युऽसायकः। इन्द्रे॑। नि। रूपा। हरि॑ता। मिमिक्षिरे॥ ३॥

दिवि न केतुरधि॑ धायि हर्यतो विव्यचद्वज्रो॑ हरि॑तो न रंह्या॑।

तुददहिं॑ हरि॑शिप्रो य आ॑यसः सहस्र॑शोका अभवद्धरिं॑भरः॥ ४॥

दिवि। न। केतुः। अधि॑। धायि। हर्य॑तः। विव्यच॑त्। वज्र॑ः। हरि॑तः। न। रंह्या॑।

तुदत्। अहि॑म्। हरि॑ऽशिप्रः। यः। आयसः। सहस्र॑ऽशोकाः। अभवत्। हरिम्ऽभरः॥ ४॥

त्वंत्व॑महर्यथा उप॑स्तुतः पूर्वे॑भिरिन्द्र हरिकेश यज्व॑भिः।

त्वं ह॑र्यसि तव विश्व॑मुक्थ्य॑१मसा॑मि राधो॑ हरिजात हर्यतम्॥ ५॥ [५]

त्वम्ऽत्व॑म्। अहर्यथाः। उप॑ऽस्तुतः। पूर्वे॑भिः। इन्द्र। हरि॑ऽकेश। यज्व॑ऽभिः।

त्वम्। हर्यसि। तव॑। विश्व॑म्। उक्थ्य॑म्। असा॑मि। राध॑ः। हरि॑ऽजात। हर्य॑तम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे॥ ६॥
ता। वज्रिणम्। मन्दिनम्। स्तोम्यम्। मदे। इन्द्रम्। रथे। वहतः। हर्यता। हरी इति।
पुरूणि। अस्मै। सवनानि। हर्यते। इन्द्राय। सोमाः। हरयः। दधन्विरे॥ ६॥
अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन् हरयो हरी तुरा।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे॥ ७॥
अरम्। कामाय। हरयः। दधन्विरे। स्थिराय। हिन्वन्। हरयः। हरी इति। तुरा।
अर्वत्ऽभिः। यः। हरिऽभिः। जोषम्। ईयते। सः। अस्य। कामम्। हरिऽवन्तम्। आनशे॥ ७॥
हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत।
अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी॥ ८॥
हरिऽश्मशारुः। हरिऽकेशः। आयसः। तुरःऽपेये। यः। हरिऽपाः। अवर्धत॥ अर्वत्ऽभिः।
यः। हरिऽभिः। वाजिनीऽवसुः। अति। विश्वा। दुःऽइता। पारिषत्। हरी इति॥ ८॥
स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः।
प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः॥ ९॥
स्रुवाऽइव। यस्य। हरिणी इति। विऽपेततुः। शिप्रे इति। वाजाय। हरिणी इति। दविध्वतः।
प्र। यत्। कृते। चमसे। मर्मृजत्। हरी इति। पीत्वा। मदस्य। हर्यतस्य। अन्धसः॥ ९॥
उत स्म सद्म हर्यतस्य पस्त्यो३रत्यो न वाजं हरिवाँ अचिक्रदत्।
मही चिद्धि धिषणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा॥ १०॥ [६]
उत। स्म। सद्म। हर्यतस्य। पस्त्योः। अत्यः। न। वाजम्। हरिऽवान्। अचिक्रदत्।
मही। चित्। हि। धिषणा। अहर्यत्। ओजसा। बृहत्। वयः। दधिषे। हर्यतः। चित्। आ॥ १०॥
आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम्।
प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय॥ ११॥
आ। रोदसी इति। हर्यमाणः। महिऽत्वा। नव्यम्ऽनव्यम्। हर्यसि। मन्म। नु। प्रियम्।
प्र। पस्त्यम्। असुर। हर्यतम्। गोः। आविः। कृधि। हरये। सूर्याय॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिम्॥ १२॥
आ। त्वा। हर्यन्तम्। प्रऽयुजः। जनानाम्। रथे। वहन्तु। हरिऽशिप्रम्। इन्द्र।
पिब। यथा। प्रतिऽभृतस्य। मध्वः। हर्यन्। यज्ञम्। सधऽमादे। दशऽओणिम्॥ १२॥
अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व॥ १३॥ [७]
अपाः। पूर्वेषाम्। हरिऽवः। सुतानाम्। अथो इति। इदम्। सवनम्। केवलम्। ते।
ममद्धि। सोमम्। मधुऽमन्तम्। इन्द्र। सत्रा। वृषन्। जठरे। आ। वृषस्व॥ १३॥

[९७] [२४ भिषग् आथर्वणः। ओषधयः। अनुष्टुप्।]

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च॥ १॥
याः। ओषधीः। पूर्वाः। जाताः। देवेभ्यः। त्रिऽयुगम्। पुरा।
मनै। नु। बभ्रूणाम्। अहम्। शतम्। धामानि। सप्त। च॥ १॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मे अगदं कृत॥ २॥
शतम्। वः। अम्ब। धामानि। सहस्रम्। उत। वः। रुहः।
अध। शतऽक्रत्वः। यूयम्। इमम्। मे। अगदम्। कृत॥ २॥
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाइव सजित्वरीर्वीरुधः पारयिष्ण्वः॥ ३॥
ओषधीः। प्रति। मोदध्वम्। पुष्पऽवतीः। प्रऽसूवरीः।
अश्वाःऽइव। सऽजित्वरीः। वीरुधः। पारयिष्ण्वः॥ ३॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे। सनेयमश्वं गां वास आत्मानं तव पूरुष॥ ४॥
ओषधीः। इति। मातरः। तत्। वः। देवीः। उप। ब्रुवे।
सनेयम्। अश्वम्। गाम्। वासः। आत्मानम्। तव। पुरुष॥ ४॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।
गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥ ५॥ [८]
अश्वत्थे। वः। निऽसदनम्। पर्णे। वः। वसतिः। कृता।
गोऽभाजः। इत्। किल। असथ। यत्। सनवथ। पुरुषम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः॥ ६॥

यत्र। ओषधीः। सम्ऽअग्मत। राजानः। समितौऽइव।

विप्रः। सः। उच्यते। भिषक्। रक्षःऽहा। अमीवऽचातनः॥ ६॥

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये॥ ७॥

अश्वऽवतीम्। सोमऽवतीम्। ऊर्जयन्तीम्। उत्ऽओजसम्।

आ। अवित्सि। सर्वाः। ओषधीः। अस्मै। अरिष्टऽतातये॥ ७॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनं सनिष्यन्तीनामात्मानं तव पूरुष॥ ८॥

उत्। शुष्माः। ओषधीनाम्। गावः। गोस्थात्ऽइव। ईरते।

धनम्। सनिष्यन्तीनाम्। आत्मानम्। तव। पुरुष॥ ८॥

इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणीः स्थन यदामयति निष्कृथ॥ ९॥

इष्कृतिः। नाम। वः। माता। अथो इति। यूयम्। स्थ। निःऽकृतीः।

सीराः। पतत्रिणीः। स्थन। यत्। आमयति। निः। कृथ॥ ९॥

अति विश्वाः परिष्ठाः स्तेनइव व्रजमक्रमुः।

ओषधीः प्राचुच्यवुर्यत्किं च तन्वो३ रपः॥ १०॥ [९]

अति। विश्वाः। परिऽस्थाः। स्तेनःऽइव। व्रजम्। अक्रमुः।

ओषधीः। प्र। अचुच्यवुः। यत्। किम्। च। तन्वः। रपः॥ १०॥

यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा॥ ११॥

यत्। इमाः। वाजयन्। अहम्। ओषधीः। हस्ते। आऽदधे।

आत्मा। यक्ष्मस्य। नश्यति। पुरा। जीवऽगृभः। यथा॥ ११॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः। ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव॥ १२॥

यस्य। ओषधीः। प्रऽसर्पथ। अङ्गम्ऽअङ्गम्। परुःऽपरुः।

ततः। यक्ष्मम्। वि। बाधध्वे। उग्रः। मध्यमशीःऽइव॥ १२॥

साकं यक्ष्म प्र पत चाषेण किकिदीविना।

साकं वातस्य ध्राज्या साकं नश्य निहाकया॥ १३॥

साकम्। यक्ष्म। प्र। पत। चाषेण। किकिदीविना।

साकम्। वातस्य। ध्राज्या। साकम्। नश्य। निऽहाकया॥ १३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्या वो अन्यामवत्वन्यान्यस्या उपावत। ताः सर्वाः संविदाना इदं मे प्रावता वचः॥ १४॥

अन्या। वः। अन्याम्। अवतु। अन्या। अन्यस्याः। उप। अवत।

ताः। सर्वाः। सम्ऽविदानाः। इदम्। मे। प्र। अवत। वचः॥ १४॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।

बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः॥ १५॥ [१०]

याः। फलिनीः। याः। अफलाः। अपुष्पाः। याः। च। पुष्पिणीः।

बृहस्पतिऽप्रसूताः। ताः। नः। मुञ्चन्तु। अंहसः॥ १५॥

मुञ्चन्तु मा शपथ्या३दथो वरुण्यादुत।

अथो यमस्य पड्बीशात् सर्वस्माद्देवकिल्बिषात्॥ १६॥

मुञ्चन्तु। मा। शपथ्यात्। अथो इति। वरुण्यात्। उत।

अथो इति। यमस्य। पड्बीशात्। सर्वस्मात्। देवऽकिल्बिषात्॥ १६॥

अवपतन्तीरवदन् दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः॥ १७॥

अवऽपतन्तीः। अवदन्। दिवः। ओषधयः। परि।

यम्। जीवम्। अश्नवामहै। न। सः। रिष्याति। पुरुषः॥ १७॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। तासां त्वमस्युत्तमारं कामाय शं हृदे॥ १८॥

याः। ओषधीः। सोमऽराज्ञीः। बह्वीः। शतऽविचक्षणाः।

तासाम्। त्वम्। असि। उत्ऽतमा। अरम्। कामाय। शम्। हृदे॥ १८॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम्॥ १९॥

याः। ओषधीः। सोमऽराज्ञीः। विऽस्थिताः। पृथिवीम्। अनु।

बृहस्पतिऽप्रसूताः। अस्यै। सम्। दत्त। वीर्यम्॥ १९॥

मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम्॥ २०॥

मा। वः। रिषत्। खनिता। यस्मै। च। अहम्। खनामि। वः।

द्विऽपत्। चतुःऽपत्। अस्माकम्। सर्वम्। अस्तु। अनातुरम्॥ २०॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः। सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम्॥ २१॥

याः। च। इदम्। उपऽशृण्वन्ति। याः। च। दूरम्। पराऽगताः।

सर्वाः। सम्ऽगत्य। वीरुधः। अस्यै। सम्। दत्त। वीर्यम्॥ २१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ओषधयः सं वदन्ते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि॥ २२॥

ओषधयः। सम्। वदन्ते। सोमेन। सह। राज्ञा।

यस्मै। कृणोति। ब्राह्मणः। तम्। राजन्। पारयामसि॥ २२॥

त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः। उपस्तिरस्तु सो३ऽस्माकं यो अस्माँ अभिदासति॥ २३॥

त्वम्। उत्ऽतमा। असि। ओषधे। तव। वृक्षाः। उपस्तयः।

उपस्तिः। अस्तु। सः। अस्माकम्। यः। अस्मान्। अभिऽदासति॥ २३॥

यच्च कृतं यदकृतं यदेनश्चकृमा वयम्। ओषधयस्तस्मात्पान्तु दुरितादेनसस्परि॥ २४॥ ★

यत्। च। कृतम्। यत्। अकृतम्। यत्। एनः। चकृम। वयम्। [११]

ओषधयः। तस्मात्। पान्तु। दुःऽइतात्। एनसः। परि॥ २४॥

[९८] [१२ आर्ष्टिषेणो देवापिः (वृष्टिकामः)। देवाः। त्रिष्टुप्।]

बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा।
आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शंतनवे वृषाय॥ १॥

बृहस्पते। प्रति। मे। देवताम्। इहि। मित्रः। वा। यत्। वरुणः। वा। असि। पूषा।

आदित्यैः। वा। यत्। वसुऽभिः। मरुत्वान्। सः। पर्जन्यम्। शम्ऽतनवे। वृषय॥ १॥

आ देवो दूतो अजिरश्चिकित्वान् त्वद्देवापे अभि मामगच्छत्।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन्॥ २॥

आ। देवः। दूतः। अजिरः। चिकित्वान्। त्वत्। देवऽआपे। अभि। माम्। अगच्छत्।

प्रतीचीनः। प्रति। माम्। आ। ववृत्स्व। दधामि। ते। द्युऽमतीम्। वाचम्। आसन्॥ २॥

अस्मे धेहि द्युमतीं वाचमासन् बृहस्पते अनमीवामिषिराम्।
यया वृष्टिं शंतनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश॥ ३॥

अस्मे इति। धेहि। द्युऽमतीम्। वाचम्। आसन्। बृहस्पते। अनमीवाम्। इषिराम्।

यया। वृष्टिम्। शम्ऽतनवे। वनाव। दिवः। द्रप्सः। मधुऽमान्। आ। विवेश॥ ३॥

आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्र देह्यधिरथं सहस्रम्।
नि षीद होत्रमृतुथा यजस्व देवान् देवापे हविषा सपर्य॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। नः। द्रप्साः। मधुमन्तः। विशन्तु। इन्द्र। देहि। अधिऽरथम्। सहस्रम्।
नि। सीद। होत्रम्। ऋतुऽथा। यजस्व। देवान्। देवऽआपे। हविषा। सपर्य ॥ ४ ॥

आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान्।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥ ५ ॥

आर्ष्टिषेणः। होत्रम्। ऋषिः। निऽसीदन्। देवऽआपिः। देवऽसुमतिम्। चिकित्वान्।
सः। उत्ऽतरस्मात्। अधरम्। समुद्रम्। अपः। दिव्याः। असृजत्। वर्ष्याः। अभि ॥ ५ ॥

अस्मिन्त्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन्।
ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु ॥ ६ ॥ [१२]

अस्मिन्। समुद्रे। अधि। उत्ऽतरस्मिन्। आपः। देवेभिः। निऽवृताः। अतिष्ठन्।
ताः। अद्रवन्। आर्ष्टिषेणेन। सृष्टाः। देवऽआपिना। प्रऽइषिताः। मृक्षिणीषु ॥ ६ ॥

यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ॥ ७ ॥

यत्। देवऽआपिः। शम्ऽतनवे। पुरःऽहितः। होत्राय। वृतः। कृपयन्। अदीधेत्।
देवऽश्रुतम्। वृष्टिऽवनिम्। रराणः। बृहस्पतिः। वाचम्। अस्मै। अयच्छत् ॥ ७ ॥

यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ॥ ८ ॥

यम्। त्वा। देवऽआपिः। शुशुचानः। अग्ने। आर्ष्टिषेणः। मनुष्यः। सम्ऽईधे।
विश्वेभिः। देवैः। अनुऽमद्यमानः। प्र। पर्जन्यम्। ईरय। वृष्टिऽमन्तम् ॥ ८ ॥

त्वां पूर्व ऋषयो गीर्भिरायन् त्वामध्वरेषु पुरुहूत विश्वे।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ॥ ९ ॥

त्वाम्। पूर्वे। ऋषयः। गीःऽभिः। आयन्। त्वाम्। अध्वरेषु। पुरुऽहूत। विश्वे।
सहस्राणि। अधिऽरथानि। अस्मे इति। आ। नः। यज्ञम्। रोहित्ऽअश्व। उप। याहि ॥ ९ ॥

एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ॥ १० ॥

एतानि। अग्ने। नवतिः। नव। त्वे इति। आऽहुतानि। अधिऽरथा। सहस्रा।
तेभिः। वर्धस्व। तन्वः। शूर। पूर्वीः। दिवः। नः। वृष्टिम्। इषितः। रिरीहि ॥ १० ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम्।
विद्वान् पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि॥ ११॥

एतानि। अग्ने। नवतिम्। सहस्रा। सम्। प्र। यच्छ। वृष्णे। इन्द्राय। भागम्।
विद्वान्। पथः। ऋतुऽशः। देवऽयानान्। अपि। औलानम्। दिवि। देवेषु। धेहि॥ ११॥

अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध।
अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह॥ १२॥ [१३]

अग्ने। बाधस्व। वि। मृधः। वि। दुःऽगहा। अप। अमीवाम्। अप। रक्षांसि। सेध।
अस्मात्। समुद्रात्। बृहतः। दिवः। नः। अपाम्। भूमानम्। उप। नः। सृज। इह॥ १२॥

[९९] [१२ वम्रो वैखानसः। इन्द्रः। त्रिष्टुप्।]

कं नश्चित्रमिषण्यसि चिकित्वान् पृथुग्मानं वाश्रं वावृधध्यै।
कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत्॥ १॥

कम्। नः। चित्रम्। इषण्यसि। चिकित्वान्। पृथुऽग्मानम्। वाश्रम्। ववृधध्यै।
कत्। तस्य। दातु। शवसः। विऽउष्टौ। तक्षत्। वज्रम्। वृत्रऽतुरम्। अपिन्वत्॥ १॥

स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः॥ २॥

सः। हि। द्युता। विऽद्युता। वेति। साम। पृथुम्। योनिम्। असुरऽत्वा। आ। ससाद।
सः। सऽनीळेभिः। प्रऽसहानः। अस्य। भ्रातुः। न। ऋते। सप्तथस्य। मायाः॥ २॥

स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन्।
अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत्॥ ३॥

सः। वाजम्। याता। अपदुःऽपदा। यन्। स्वःऽसाता। परि। सदत्। सनिष्यन्।
अनर्वा। यत्। शतऽदुरस्य। वेदः। घ्नन्। शिश्नऽदेवान्। अभि। वर्पसा। भूत्॥ ३॥

य यह्व्यो३ऽवनीर्गोष्वर्वा जुहोति प्रधन्यासु सस्रिः।
अपादो यत्र युज्यासोऽरथा द्रोण्यश्वास ईरते घृतं वाः॥ ४॥

सः। यह्व्यः। अवनीः। गोषु। अर्वा। आ। जुहोति। प्रऽधन्यासु। सस्रिः।
अपादः। यत्र। युज्यासः। अरथाः। द्रोणिऽअश्वासः। ईरते। घृतम्। वारिति वाः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात्।
वम्रस्य मन्ये मिथुना विवव्री अन्नमभीत्यारोदयन्मुषायन्॥ ५॥
सः। रुद्रेभिः। अशस्तऽवारः। ऋभ्वा। हित्वी। गयम्। आरेऽअवद्यः। आ। अगात्।
वम्रस्य। मन्ये। मिथुना। विवव्री इति विऽवव्री। अन्नम्। अभिऽइत्य। अरोदयत्। मुषायन्॥ ५॥
स इद्दासं तुवीरवं पतिर्दन् षळक्षं त्रिशीर्षाणं दमन्यत्।
अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन्॥ ६॥ [१४]
सः। इत्। दासम्। तुविऽरवम्। पतिः। दन्। षट्ऽअक्षम्। त्रिऽशीर्षाणम्। दमन्यत्।
अस्य। त्रितः। नु। ओजसा। वृधानः। विपा। वराहम्। अयः२अग्रया। हन्निति हन्॥ ६॥
स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम्।
स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन् दस्युहत्ये॥ ७॥
सः। द्रुह्वणे। मनुषे। ऊर्ध्वसानः। आ। साविषत्। अर्शसानाय। शरुम्।
सः। नृऽतमः। नहुषः। अस्मत्। सुऽजातः। पुरः। अभिनत्। अर्हन्। दस्युऽहत्ये॥ ७॥
सो अभ्रियो न यवस उदन्यन् क्षयाय गातुं विदन्नो अस्मे।
उप यत्सीददिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून्॥ ८॥
सः। अभ्रियः। न। यवसे। उदन्यन्। क्षयाय। गातुम्। विदत्। नः। अस्मे इति।
उप। यत्। सीदत्। इन्दुम्। शरीरैः। श्येनः। अयः२अपाष्टिः। हन्ति। दस्यून्॥ ८॥
स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात्।
अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नृणाम्॥ ९॥
सः। व्राधतः। शवसानेभिः। अस्य। कुत्साय। शुष्णम्। कृपणे। परा। अदात्।
अयम्। कविम्। अनयत्। शस्यमानम्। अत्कम्। यः। अस्य। सनिता। उत। नृणाम्॥ ९॥
अयं दशस्यन्नर्येभिरस्य दस्मो देवेभिर्वरुणो न मायी।
अयं कनीन ऋतुपा अवेद्यमिमीताररुं यश्चतुष्पात्॥ १०॥
अयम्। दशस्यन्। नर्येभिः। अस्य। दस्मः। देवेभिः। वरुणः। न। मायी।
अयम्। कनीनः। ऋतुऽपाः। अवेदि। अमिमीत। अररुम्। यः। चतुः२पात्॥ १०॥
अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दरयद्वृषभेण पिप्रोः।
सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत्॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्य। स्तोमेभिः। औशिजः। ऋजिश्वा। व्रजम्। दरयत्। वृषभेण। पिप्रोः।
सुत्वा। यत्। यजतः। दीदयत्। गीः। पुरः। इयानः। अभि। वर्पसा। भूत्॥ ११॥

एवा महो असुर वक्षथाय वम्रकः पड्भिरुप सर्पदिन्द्रम्।
स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः॥ १२॥ [१५] {८}

एव। महः। असुर। वक्षथाय। वम्रकः। पट्ऽभिः। उप। सर्पत्। इन्द्रम्॥ सः। इयानः।
करति। स्वस्तिम्। अस्मै। इषम्। ऊर्जम्। सुऽक्षितिम्। विश्वम्। आ। अभारित्यभाः॥ १२॥

[१००] [१२ दुवस्युर्वान्दनः। विश्वे देवाः। जगती, १२ त्रिष्टुप्।]

इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे॥ १॥

इन्द्र। दृह्य। मघऽवन्। त्वाऽवत्। इत्। भुजे। इह। स्तुतः। सुतऽपाः। बोधि। नः। वृधे।
देवेभिः। नः। सविता। प्र। अवतु। श्रुतम्। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे॥ १॥

भराय सु भरत भागमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे॥ २॥

भराय। सु। भरत। भागम्। ऋत्वियम्। प्र। वायवे। शुचिऽपे। शुचिऽपे। क्रन्दत्ऽइष्टये।
गौरस्य। यः। पयसः। पीतिम्। आनशे। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे॥ ३॥

इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः।
यथायथा मित्रधितानि संदधुरा सर्वतातिमदितिं वृणीमहे॥ ४॥

इन्द्रः। अस्मे इति। सुऽमनाः। अस्तु। विश्वहा। राजा। सोमः। सुवितस्य। अधि। एतु। नः।
यथाऽयथा। मित्रऽधितानि। सम्ऽदधुः। आ। सर्वतातिम्। अदितिम्। वृणीमहे॥ ४॥

इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः।
यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे॥ ५॥

इन्द्रः। उक्थेन। शवसा। परुः। दधे। बृहस्पते। प्रऽतरीता। असि। आयुषः।
यज्ञः। मनुः। प्रऽमतिः। नः। पिता। हि। कम्। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे॥ ५॥

इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः।
यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे॥ ६॥ [१६]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रस्य। नु। सुऽकृतम्। दैव्यम्। सहः। अग्निः। गृहे। जरिता। मेधिरः। कविः।

यज्ञः। च। भूत्। विदथे। चारुः। अन्तमः। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे ॥ ६ ॥

न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम्।

माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥ ७ ॥

न। वः। गुहा। चकृम। भूरि। दुःऽकृतम्। न। आविःऽत्यम्। वसवः। देवऽहेळनम्।

माकिः। नः। देवाः। अनृतस्य। वर्पसः। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे ॥ ७ ॥

अपामीवां सविता साविषन्न्य१ग्वरीय इदप सेधन्त्वद्रयः।

ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥ ८ ॥

अप। अमीवाम्। सविता। साविषत्। न्यक्। वरीयः। इत्। अप। सेधन्तु। अद्रयः।

ग्रावा। यत्र। मधुऽसुत्। उच्यते। बृहत्। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे ॥ ८ ॥

ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत।

स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ॥ ९ ॥

ऊर्ध्वः। ग्रावा। वसवः। अस्तु। सोतरि। विश्वा। द्वेषांसि। सनुतः। युयोत।

सः। नः। देवः। सविता। पायुः। ईड्यः। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे ॥ ९ ॥

ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ग्ध्वे।

तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥ १० ॥

ऊर्जम्। गावः। यवसे। पीवः। अत्तन। ऋतस्य। याः। सदने। कोशे। अङ्ग्ध्वे।

तनूः। एव। तन्वः। अस्तु। भेषजम्। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे ॥ १० ॥

क्रतुप्रावा जरिता शश्वतामव इन्द्र इद्भद्रा प्रमतिः सुतावताम्।

पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ॥ ११ ॥

क्रतुऽप्रावा। जरिता। शश्वताम्। अवः। इन्द्रः। इत्। भद्रा। प्रऽमतिः। सुतऽवताम्।

पूर्णम्। ऊधः। दिव्यम्। यस्य। सिक्तये। आ। सर्वतातिम्। अदितिम्। वृणीमहे ॥ ११ ॥

चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः।

रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः ॥ १२ ॥ [१७]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चित्रः। ते। भानुः। क्रतुऽप्राः। अभिष्टिः। सन्ति। स्पृधः। जरणिऽप्राः। अधृष्टाः।

रजिष्ठया। रज्या। पश्वः। आ। गोः। तूतूर्षति। परि। अग्रम्। दुवस्युः॥ १२॥

[१०१] [१२ बुधः सौम्यः। विश्वे देवाः, ऋत्विजो वा।
त्रिष्टुप्; ४, ६ गायत्र्यौ, ५ बृहती; ९, १२ जगत्यौ।]

उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः।

दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः॥ १॥

उत्। बुध्यध्वम्। सऽमनसः। सखायः। सम्। अग्निम्। इन्ध्वम्। बहवः। सऽनीळाः।

दधिऽक्राम्। अग्निम्। उषसम्। च। देवीम्। इन्द्रऽवतः। अवसे। नि। ह्वये। वः॥ १॥

मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम्।

इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः॥ २॥

मन्द्रा। कृणुध्वम्। धियः। आ। तनुध्वम्। नावम्। अरित्रऽपरणीम्। कृणुध्वम्।

इष्कृणुध्वम्। आयुधा। अरम्। कृणुध्वम्। प्राञ्चम्। यज्ञम्। प्र। नयत। सखायः॥ २॥

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम्।

गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्॥ ३॥

युनक्त। सीरा। वि। युगा। तनुध्वम्। कृते। योनौ। वपत। इह। बीजम्।

गिरा। च। श्रुष्टिः। सऽभराः। असत्। नः। नेदीयः। इत्। सृण्यः। पक्वम्। आ। इयात्॥ ३॥

सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया॥ ४॥

सीरा। युञ्जन्ति। कवयः। युगा। वि। तन्वते। पृथक्। धीराः। देवेषु। सुम्नऽया॥ ४॥

निराहावान् कृणोतन सं वरत्रा दधातन। सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम्॥ ५॥

निः। आऽहावान्। कृणोतन। सम्। वरत्राः। दधातन।

सिञ्चामहै। अवतम्। उद्रिणम्। वयम्। सुऽसेकम्। अनुपऽक्षितम्॥ ५॥

इष्कृताहावमवतं सुवरत्रं सुषेचनम्। उद्रिणं सिञ्चे अक्षितम्॥ ६॥ [१८]

इष्कृतऽआहावम्। अवतम्। सुऽवरत्रम्। सुऽसेचनम्। उद्रिणम्। सिञ्चे। अक्षितम्॥ ६॥

प्रीणीताश्वान् हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम्।

द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम्॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रीणीत। अश्वान्। हितम्। जयाथ। स्वस्ति॰वाहम्। रथम्। इत्। कृणुध्वम्।
द्रोण॰आहावम्। अवतम्। अश्म॰चक्रम्। अंसत्र॰कोशम्। सिञ्चत। नृ॰पानम्॥ ७॥

व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्त्रोच्चमसो दृंहता तम्॥ ८॥

व्रजम्। कृणुध्वम्। सः। हि। वः। नृ॰पानः। वर्म। सीव्यध्वम्। बहुला। पृथूनि।
पुरः। कृणुध्वम्। आयसीः। अधृष्टाः। मा। वः। सुस्त्रोत्। चमसः। दृंहत। तम्॥ ८॥

आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः॥ ९॥

आ। वः। धियम्। यज्ञियाम्। वर्ते। ऊतये। देवाः। देवीम्। यजताम्। यज्ञियाम्। इह।
सा। नः। दुहीयत्। यवसाऽइव। गत्वी। सहस्र॰धारा। पयसा। मही। गौः॥ ९॥

आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त॥ १०॥

आ। तु। सिञ्च। हरिम्। ईम्। द्रोः। उप॰स्थे। वाशीभिः। तक्षत। अश्मन्॰मयीभिः।
परि। स्वजध्वम्। दश। कक्ष्याभिः। उभे इति। धूरौ। प्रति। वह्निम्। युनक्त॥ १०॥

उभे धुरौ वह्निरापिब्दमानोऽन्तर्योनेव चरति द्विजानिः।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम्॥ ११॥

उभे इति। धुरौ। वह्निः। आ॰पिब्दमानः। अन्तः। योनाऽइव। चरति। द्वि॰जानिः।
वनस्पतिम्। वने। आ। अस्थापयध्वम्। नि। सु। दधिध्वम्। अखनन्तः। उत्सम्॥ ११॥

कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये॥ १२॥ [१९]

कपृत्। नरः। कपृथम्। उत्। दधातन। चोदयत। खुदत। वाजसातये।
निष्टिग्र्यः। पुत्रम्। आ। च्यवय। ऊतये। इन्द्रम्। स॰बाधः। इह। सोम॰पीतये॥ १२॥

[१०२] [१२ मुद्गलो भार्म्यश्वः। द्रुघणः, इन्द्रो वा। त्रिष्टुप्, १, ३, १२ बृहती।]

प्र ते रथं मिथूकृतमिन्द्रोऽवतु धृष्णुया। अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र । ते । रथम् । मिथुऽकृतम् । इन्द्रः । अवतु । धृष्णुऽया ।
अस्मिन् । आजौ । पुरुऽहूत । श्रवाय्ये । धनऽभक्षेषु । नः । अव ॥ १ ॥

उत्स्म वातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम् ।
रथीरभूमुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना ॥ २ ॥

उत् । स्म । वातः । वहति । वासः । अस्याः । अधिऽरथम् । यत् । अजयत् । सहस्रम् ।
रथीः । अभूत् । मुद्गलानी । गोऽइष्टौ । भरे । कृतम् । वि । अचेत् । इन्द्रऽसेना ॥ २ ॥

अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।
दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ॥ ३ ॥

अन्तः । यच्छ । जिघांसतः ! वज्रम् । इन्द्र । अभिऽदासतः ।
दासस्य । वा । मघऽवन् । आर्यस्य । वा । सनुतः । यवय । वधम् ॥ ३ ॥

उद्गो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥ ४ ॥

उद्गः । ह्रदम् । अपिबत् । जर्हृषाणः । कूटम् । स्म । तृंहत् । अभिऽमातिम् । एति ।
प्र । मुष्कऽभारः । श्रवः । इच्छमानः । अजिरम् । बाहू इति । अभरत् । सिसासन् ॥ ४ ॥

न्यक्रन्दयन्नुपयन्त एनममेहयन् वृषभं मध्य आजेः ।
तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥ ५ ॥

नि । अक्रन्दयन् । उपऽयन्तः । एनम् । अमेहयन् । वृषभम् । मध्ये । आजेः ।
तेन । सूभर्वम् । शतऽवत् । सहस्रम् । गवाम् । मुद्गलः । प्रऽधने । जिगाय ॥ ५ ॥

कुकर्दवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ॥ ६ ॥ [२०]

ककर्दवे । वृषभः । युक्तः । आसीत् । अवावचीत् । सारथिः । अस्य । केशी ।
दुधेः । युक्तस्य । द्रवतः । सह । अनसा । ऋच्छन्ति । स्म । निःऽपदः । मुद्गलानीम् ॥ ६ ॥

उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।
इन्द्र उदावत्पतिमघ्न्यानामरंहत पद्याभिः ककुद्मान् ॥ ७ ॥

उत । प्रऽधिम् । उत् । अहन् । अस्य । विद्वान् । उप । अयुनक् । वंसगम् । अत्र । शिक्षन् ।
इन्द्रः । उत् । आवत् । पतिम् । अघ्न्यानाम् । अरंहत । पद्याभिः । ककुत्ऽमान् ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शुनमष्ट्राव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः।

नृम्णानि कृण्वन् बहवे जनाय गाः पस्पशानस्तविषीरधत्त॥ ८॥

शुनम्। अष्ट्राऽवी। अचरत्। कपर्दी। वरत्रायाम्। दारु। आऽनह्यमानः।

नृम्णानि। कृण्वन्। बहवे। जनाय। गाः। पस्पशानः। तविषीः। अधत्त॥ ८॥

इमं तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम्।

येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु॥ ९॥

इमम्। तम्। पश्य। वृषभस्य। युञ्जम्। काष्ठायाः। मध्ये। द्रुऽघनम्। शयानम्।

येन। जिगाय। शतऽवत्। सहस्रम्। गवाम्। मुद्गलः। पृतनाज्येषु॥ ९॥

आरे अघा को न्वि१त्था ददर्श यं युञ्जन्ति तम्वा स्थापयन्ति।

नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत्॥ १०॥

आरे। अघा। कः। नु। इत्था। ददर्श। यम्। युञ्जन्ति। तम्। ऊँ इति। आ। स्थापयन्ति।

न। अस्मै। तृणम्। न। उदकम्। आ। भरन्ति। उत्ऽतरः। धुरः। वहति। प्रऽदेदिशत्॥ १०॥

परिवृक्तेव पतिविद्यमानट् पीप्याना कूचक्रेणेव सिञ्चन्।

एषैष्या चिद्रथ्या जयेम सुमङ्गलं सिनवदस्तु सातम्॥ ११॥

परिवृक्ताऽइव। पतिऽविद्यम्। आनट्। पीप्याना। कूचक्रेणऽइव। सिञ्चन्।

एषऽएष्या। चित्। रथ्या। जयेम। सुऽमङ्गलम्। सिनऽवत्। अस्तु। सातम्॥ ११॥

त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः।

वृषा यदाजिं वृषणा सिषाससि चोदयन् वध्रिणा युजा॥ १२॥ **[२१]**

त्वम्। विश्वस्य। जगतः। चक्षुः। इन्द्र। असि। चक्षुषः।

वृषा। यत्। आजिम्। वृषणा। सिसाससि। चोदयन्। वध्रिणा। युजा॥ १२॥

[१०३] [१५ अप्रतिरथ ऐन्द्रः। इन्द्रः, ४ बृहस्पतिः, १२ अप्वा देवी, १३ मरुतो वा। १४-१५ मरुतः। त्रिष्टुप्, १३ अनुष्टुप्।]

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।

संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः॥ १॥

आशुः। शिशानः। वृषभः। न। भीमः। घनाघनः। क्षोभणः। चर्षणीनाम्।

सम्ऽक्रन्दनः। अनिऽमिषः। एकऽवीरः। शतम्। सेनाः। अजयत्। साकम्। इन्द्रः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।

तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥ २॥

सम्ऽक्रन्दनेन। अनिऽमिषेण। जिष्णुना। युत्ऽकारेण। दुःऽच्यवनेन। धृष्णुना।

तत्। इन्द्रेण। जयत। तत्। सहध्वम्। युधः। नरः। इषुऽहस्तेन। वृष्णा॥ २॥

स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन।

संसृष्टजित्सोमपा बाहुशर्ध्यु१ग्रधन्वा प्रतिहिताभिरस्ता॥ ३॥

सः। इषुऽहस्तैः। सः। निषङ्गिऽभिः। वशी। सम्ऽस्रष्टा। सः। युधः। इन्द्रः। गणेन।

संसृष्टऽजित्। सोमऽपाः। बाहुऽशर्धी। उग्रऽधन्वा। प्रतिऽहिताभिः। अस्ता॥ ३॥

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः।

प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥ ४॥

बृहस्पते। परि। दीय। रथेन। रक्षःऽहा। अमित्रान्। अपऽबाधमानः।

प्रऽभञ्जन्। सेनाः। प्रऽमृणः। युधा। जयन्। अस्माकम्। एधि। अविता। रथानाम्॥ ४॥

बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः।

अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्॥ ५॥

बलऽविज्ञायः। स्थविरः। प्रऽवीरः। सहस्वान्। वाजी। सहमानः। उग्रः।

अभिऽवीरः। अभिऽसत्ता। सहःऽजाः। जैत्रम्। इन्द्र। रथम्। आ। तिष्ठ। गोऽवित्॥ ५॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा।

इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम्॥ ६॥ [२२]

गोत्रऽभिदम्। गोऽविदम्। वज्रऽबाहुम्। जयन्तम्। अज्म। प्रऽमृणन्तम्। ओजसा।

इमम्। सऽजाताः। अनु। वीरयध्वम्। इन्द्रम्। सखायः। अनु। सम्। रभध्वम्॥ ६॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः।

दुश्च्यवनः पृतनाषाळयुध्यो३ऽस्माकं सेना अवतु प्र युत्सु॥ ७॥

अभि। गोत्राणि। सहसा। गाहमानः। अदयः। वीरः। शतऽमन्युः। इन्द्रः।

दुःऽच्यवनः। पृतनाषाट्। अयुध्यः। अस्माकम्। सेनाः। अवतु। प्र। युत्ऽसु॥ ७॥

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।

देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रः। आसाम्। नेता। बृहस्पतिः। दक्षिणा। यज्ञः। पुरः। एतु। सोमः।

देवऽसेनानाम्। अभिऽभञ्जतीनाम्। जयन्तीनाम्। मरुतः। यन्तु। अग्रम्॥ ८॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्।

महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥ ९॥

इन्द्रस्य। वृष्णः। वरुणस्य। राज्ञः। आदित्यानाम्। मरुताम्। शर्धः। उग्रम्।

महाऽमनसाम्। भुवनऽच्यवानाम्। घोषः। देवानाम्। जयताम्। उत्। अस्थात्॥ ९॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि।

उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः॥ १०॥

उत्। हर्षय। मघऽवन्। आयुधानि। उत्। सत्वनाम्। मामकानाम्। मनांसि।

उत्। वृत्रऽहन्। वाजिनाम्। वाजिनानि। उत्। रथानाम्। जयताम्। यन्तु। घोषाः॥ १०॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु।

अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु॥ ११॥

अस्माकम्। इन्द्रः। सम्ऽऋतेषु। ध्वजेषु। अस्माकम्। याः। इषवः। ताः। जयन्तु।

अस्माकम्। वीराः। उत्ऽतरे। भवन्तु। अस्मान्। ऊँ इति। देवाः। अवत। हवेषु॥ ११॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि।

अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥ १२॥

अमीषाम्। चित्तम्। प्रतिऽलोभयन्ती। गृहाण। अङ्गानि। अप्वे। परा। इहि।

अभि। प्र। इहि। निः। दह। हृत्ऽसु। शोकैः। अन्धेन। अमित्राः। तमसा। सचन्ताम्॥ १२॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु। उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ॥ १३॥ (२३)

प्र। इत। जयत। नरः। इन्द्रः। वः। शर्म। यच्छतु।

उग्राः। वः। सन्तु। बाहवः। अनाधृष्याः। यथा। असथ॥ १३॥

असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना।

तां गूहत तमसापव्रतेन यथामीषामन्यो अन्यं न जानात्॥ १४॥ ★

असौ। या। सेना। मरुतः। परेषाम्। अभि। आऽएति। नः। ओजसा। स्पर्धमाना॥

ताम्। गूहत। तमसा। अपऽव्रतेन। यथा। अमीषाम्। अन्यः। अन्यम्। न। जानात्॥ १४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्धा अमित्रा भवताशीर्षाणो अहयइव।

तेषां वो अग्निदग्धानामिन्द्रो हन्तु वरंवरम्॥ १५॥ ★ [२३]

अन्धाः। अमित्राः। भवत। अशीर्षाणः। अहयःऽइव॥

तेषाम्। वः। अग्निऽदग्धानाम्। इन्द्रः। हन्तु। वरम्ऽवरम्॥ १५॥

[१०४] [११ अष्टको वैश्वामित्रः। इन्द्रः। त्रिष्टुप्।]

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयम्।

तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य॥ १॥

असावि। सोमः। पुरुऽहूत। तुभ्यम्। हरिऽभ्याम्। यज्ञम्। उप। याहि। तूयम्।

तुभ्यम्। गिरः। विप्रऽवीराः। इयानाः। दधन्विरे। इन्द्र। पिब। सुतस्य॥ १॥

अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व।

मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः॥ २॥

अप्ऽसु। धूतस्य। हरिऽवः। पिब। इह। नृऽभिः। सुतस्य। जठरम्। पृणस्व।

मिमिक्षुः। यम्। अद्रयः। इन्द्र। तुभ्यम्। तेभिः। वर्धस्व। मदम्। उक्थऽवाहः॥ २॥

प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम्।

इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः॥ ३॥

प्र। उग्राम्। पीतिम्। वृष्णे। इयर्मि। सत्याम्। प्रऽयै। सुतस्य। हरिऽअश्व। तुभ्यम्।

इन्द्र। धेनाभिः। इह। मादयस्व। धीभिः। विश्वाभिः। शच्या। गृणानः॥ ३॥

ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋतज्ञाः।

प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणन्तः सधमाद्यासः॥ ४॥

ऊती। शचीऽवः। तव। वीर्येण। वयः। दधानाः। उशिजः। ऋतऽज्ञाः।

प्रजाऽवत्। इन्द्र। मनुषः। दुरोणे। तस्थुः। गृणन्तः। सधऽमाद्यासः॥ ४॥

प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः।

मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इन्द्र तव सूनृताभिः॥ ५॥ [२४]

प्रनीतिऽभिः। ते। हरिऽअश्व। सुऽस्तोः। सुऽसुम्नस्य। पुरुऽरुचः। जनासः।

मंहिष्ठाम्। ऊतिम्। विऽतिरे। दधानाः। स्तोतारः। इन्द्र। तव। सूनृताभिः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य।

इन्द्र त्वा यज्ञः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः॥ ६॥

उप। ब्रह्माणि। हरि॰वः। हरि॰भ्याम्। सोमस्य। याहि। पीतये। सुतस्य।

इन्द्र। त्वा। यज्ञः। क्षममाणम्। आनट्। दाश्वान्। असि। अध्वरस्य। प्र॰केतः॥ ६॥

सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम्।

उप भूषन्ति गिरो अप्रतीतमिन्द्रं नमस्या जरितुः पनन्त॥ ७॥

सहस्र॰वाजम्। अभिमाति॰सहम्। सुते॰रणम्। मघ॰वानम्। सु॰वृक्तिम्।

उप। भूषन्ति। गिरः। अप्रति॰इतम्। इन्द्रम्। नमस्याः। जरितुः। पनन्त॥ ७॥

सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित्।

नवतिं स्रोत्या नव च स्रवन्तीर्देवेभ्यो गातुं मनुषे च विन्दः॥ ८॥

सप्त। आपः। देवीः। सु॰रणाः। अमृक्ताः। याभिः। सिन्धुम्। अतरः। इन्द्र। पूः॰भित्।

नवतिम्। स्रोत्याः। नव। च। स्रवन्तीः। देवेभ्यः। गातुम्। मनुषे। च। विन्दः॥ ८॥

अपो महीरभिशस्तेरमुञ्चोऽजागरास्वधि देव एकः।

इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः॥ ९॥

अपः। महीः। अभि॰शस्ते। अमुञ्चः। अजागः। आसु। अधि। देवः। एकः।

इन्द्र। याः। त्वम्। वृत्र॰तूर्ये। चकर्थ। ताभिः। विश्व॰आयुः। तन्वम्। पुपुष्याः॥ ९॥

वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे।

आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः॥ १०॥

वीरेण्यः। क्रतुः। इन्द्रः। सु॰शस्तिः। उत। अपि। धेना। पुरु॰हूतम्। ईट्टे।

आर्दयत्। वृत्रम्। अकृणोत्। ऊँ इति। लोकम्। ससहे। शक्रः। पृतनाः। अभिष्टिः॥ १०॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ।

शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ ११॥ [२५]

शुनम्। हुवेम। मघ॰वानम्। इन्द्रम्। अस्मिन्। भरे। नृ॰तमम्। वाज॰सातौ।

शृण्वन्तम्। उग्रम्। ऊतये। समत्॰सु। घ्नन्तम्। वृत्राणि। सम्॰जितम्। धनानाम्॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१०५] [११ दुर्मित्रः सुमित्रो वा कौत्सः। इन्द्रः।
उष्णिक्; १ गायत्री वा; २, ७, ८ पिपीलिकमध्या उष्णिहः; ११ त्रिष्टुप्।]

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः। दीर्घं सुतं वाताप्याय॥ १॥

कदा। वसो इति। स्तोत्रम्। हर्यते। आ। अव। श्मशा। रुधत्। वारिति वाः।

दीर्घम्। सुतम्। वाताप्याय॥ १॥

हरी यस्य सुयुजा विव्रता वेरर्वन्तानु शेपा। उभा रजी न केशिना पतिर्दन्॥ २॥

हरी इति। यस्य। सुऽयुजा। विऽव्रता। वेः। अर्वन्ता। अनु। शेपा।

उभा। रजी इति। न। केशिना। पतिः। दन्॥ २॥

अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान्। शुभे यद्युयुजे तविषीवान्॥ ३॥

अप। योः। इन्द्रः। पापजे। आ। मर्तः। न। शश्रमाणः। बिभीवान्।

शुभे। यत्। युयुजे। तविषीऽवान्॥ ३॥

सचायोरिन्द्रश्चर्कृष आँ उपानसः सपर्यन्। नदयोर्विव्रतयोः शूर इन्द्रः॥ ४॥

सचा। आयोः। इन्द्रः। चर्कृषे। आ। उपानसः। सपर्यन्। नदयोः। विऽव्रतयोः। शूरः। इन्द्रः॥ ४॥

अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै। वनोति शिप्राभ्यां शिप्रिणीवान्॥ ५॥ [२६]

अधि। यः। तस्थौ। केशवन्ता। व्यचस्वन्ता। न। पुष्ट्यै॥

वनोति। शिप्राभ्याम्। शिप्रिणीऽवान्॥ ५॥

प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा। ऋभुर्न क्रतुभिर्मातरिश्वा॥ ६॥

प्र। अस्तौत्। ऋष्वऽओजाः। ऋष्वेभिः। ततक्ष। शूरः। शवसा।

ऋभुः। न। क्रतुऽभिः। मातरिश्वा॥ ६॥

वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान्। अरुतहनुरद्भुतं न रजः॥ ७॥

वज्रम्। यः। चक्रे। सुऽहनाय। दस्यवे। हिरीमशः। हिरीमान्।

अरुतऽहनुः। अद्भुतम्। न। रजः॥ ७॥

अव नो वृजिना शिशीह्यृचा वनेमानृचः। नाब्रह्मा यज्ञ ऋधग्जोषति त्वे॥ ८॥

अव। नः। वृजिना। शिशीहि। ऋचा। वनेम। अनृचः।

न। अब्रह्मा। यज्ञः। ऋधक्। जोषति। त्वे इति॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऊ॒र्ध्वा यत्ते॑ त्रे॒तिनी॒ भू॒द्य॒ज्ञस्य॑ धू॒र्षु सद्म॑न्। स॒जूर्नावं॒ स्वय॑शसं॒ सचा॒योः॥ ९॥

ऊ॒र्ध्वा। यत्। ते॒। त्रे॒तिनी॑। भूत्। य॒ज्ञस्य॑। धूः॒ऽसु। सद्म॑न्।

स॒ऽजूः। नाव॑म्। स्वऽय॑शसम्। सचा॑। आ॒योः॥ ९॥

श्रि॒ये ते॒ पृश्नि॑रुप॒सेच॑नी भू॒च्छ्रि॒ये दर्वि॑रे॒रेपाः। यया॒ स्वे पात्रे॑ सि॒ञ्चस॒ उत्॥ १०॥

श्रि॒ये। ते॒। पृश्नि॑ः। उ॒प॒ऽसेच॑नी। भूत्। श्रि॒ये। दर्वि॑ः। अ॒रे॒पाः॥ यया॑। स्वे। पात्रे॑। सि॒ञ्चसे॑। उत्॥ १०॥

श॒तं वा॒ यद॑सु॒र्य॒ प्रति॑ त्वा सुमि॒त्र इ॒त्थास्तौ॒द्दुर्मि॑त्र इ॒त्थास्तौ॑त्।

आवो॒ यद्द॑स्यु॒हत्ये॑ कुत्सपु॒त्रं प्रावो॒ यद्द॑स्यु॒हत्ये॑ कुत्सव॒त्सम्॥ ११॥ [२७]

श॒तम्। वा॒। यत्। अ॒सु॒र्य॒। प्रति॑। त्वा॒। सु॒ऽमि॒त्रः। इ॒त्था। अ॒स्तौ॒त्। दु॒ःऽमि॒त्रः। इ॒त्था। अ॒स्तौ॒त्।

आव॑ः। यत्। द॒स्यु॒ऽहत्ये॑। कु॒त्स॒ऽपु॒त्रम्। प्र। आव॑ः। यत्। द॒स्यु॒ऽहत्ये॑। कु॒त्स॒ऽव॒त्सम्॥ ११॥

इत्याश्वलायन-संहितायाम्
अष्टमाष्टके
पञ्चमोऽध्यायः
समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथाष्टमाष्टके षष्ठोऽध्यायः॥

[१०६] [१२ भूतांशः काश्यपः। अश्विनौ। त्रिष्टुप्।]

उभा उं नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव।

सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे॥ १॥

उभौ। ॐ इति। नूनम्। तत्। इत्। अर्थयेथे इति। वि। तन्वाथे इति। धियः। वस्त्रा। अपसाऽइव।

सध्रीचीना। यातवे। प्र। ईम्। अजीगरिति। सुदिनाऽइव। पृक्षः। आ। तंसयेथे इति॥ १॥

उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शासुरेथः।

दूतेव हि ष्ठो यशसा जनेषु माप स्थातं महिषेवावपानात्॥ २॥

उष्टाराऽइव। फर्वरेषु। श्रयेथे इति। प्रायोगाऽइव। श्वात्र्या। शासुः। आ। इथः।

दूताऽइव। हि। स्थः। यशसा। जनेषु। मा। अप। स्थातम्। महिषाऽइव। अवऽपानात्॥ २॥

साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुरा गमिष्टम्।

अग्निरिव देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुत्रा॥ ३॥

साकम्ऽयुजा। शकुनस्यऽइव। पक्षा। पश्वाऽइव। चित्रा। यजुः। आ। गमिष्टम्।

अग्निःऽइव। देवऽयोः। दीदिऽवांसा। परिज्मानाऽइव। यजथः। पुरुऽत्रा॥ ३॥

आपी वो अस्मे पितरेव पुत्रोग्रेव रुचा नृपतीव तुर्यै।

इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टम्॥ ४॥

आपी इति। वः। अस्मे इति। पितराऽइव। पुत्रा। उग्राऽइव। रुचा। नृपतीइवेति नृपतीऽइव। तुर्यै।

इर्याऽइव। पुष्ट्यै। किरणाऽइव। भुज्यै। श्रुष्टीवानाऽइव। हवम्। आ। गमिष्टम्॥ ४॥

वंसगेव पूषर्या शिम्बाता मित्रेव ऋता शतरा शातपन्ता।

वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा सपर्या३ पुरीषा॥ ५॥ [१]

वंसगाऽइव। पूषर्या। शिम्बाता। मित्राऽइव। ऋता। शतरा। शातपन्ता।

वाजाऽइव। उच्चा। वयसा। घर्म्येऽस्था। मेषाऽइव। इषा। सपर्या। पुरीषा॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका।

उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु॥ ६॥

सृण्याऽइव। जर्भरी इति। तुर्फरीतू इति। नैतोशाऽइव। तुर्फरी इति। पर्फरीका।

उदन्यजाऽइव। जेमना। मदेरू इति। ता। मे। जरायु। अजरम्। मरायु॥ ६॥

पज्रेव चर्चरं जारं मरायु क्षद्मेवार्थेषु तर्तरीथ उग्रा।

ऋभू नापत्खरमज्रा खरज्रुर्वायुर्न पर्फरत्क्षयद्रयीणाम्॥ ७॥

पज्राऽइव। चर्चरम्। जारम्। मरायु। क्षद्मऽइव। अर्थेषु। तर्तरीथः। उग्रा।

ऋभू इति। न। आपत्। खरमज्रा। खरऽज्रुः। वायुः। न। पर्फरत्। क्षयत्। रयीणाम्॥ ७॥

घर्मेव मधु जठरे सनेरू भगेविता तुर्फरी फारिवारम्।

पतरेव चचरा चन्द्रनिर्णिङ्मनऋङ्गा मनन्या३ न जग्मी॥ ८॥

घर्माऽइव। मधु। जठरे। सनेरू इति। भगेऽअविता। तुर्फरी इति। फारिवा। अरम्।

पतराऽइव। चचरा। चन्द्रऽनिर्निक्। मनःऽऋङ्गा। मनन्या। न। जग्मी इति॥ ८॥

बृहन्तेव गम्भरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः।

कर्णेव शासुरनु हि स्मराथोंऽशेव नो भजतं चित्रमप्नः॥ ९॥

बृहन्ताऽइव। गम्भरेषु। प्रतिऽस्थाम्। पादाऽइव। गाधम्। तरते। विदाथः।

कर्णाऽइव। शासुः। अनु। हि। स्मराथः। अंशाऽइव। नः। भजतम्। चित्रम्। अप्नः॥ ९॥

आरङ्गरेव मध्वेरयेथे सारघेव गवि नीचीनबारे।

कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात् सचेथे॥ १०॥

आरङ्गराऽइव। मधु। आ। ईरयेथे इति। सारघाऽइव। गवि। नीचीनऽवारे।

कीनाराऽइव। स्वेदम्। आऽसिस्विदाना। क्षामऽइव। ऊर्जा। सुयवसऽअत्। सचेथे इति॥ १०॥

ऋध्याम स्तोमं सनुयाम वाजमा नो मन्त्रं सरथेहोप यातम्।

यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः॥ ११॥

ऋध्याम। स्तोमम्। सनुयाम। वाजम्। आ। नः। मन्त्रम्। सऽरथा। इह। उप। यातम्।

यशः। न। पक्वम्। मधु। गोषु। अन्तः। आ। भूतऽअंशः। अश्विनोः। कामम्। अप्राः॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्।
शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम॥ १२॥ ★ [२]
हविःऽभिः। एके। स्वः। इतः। सचन्ते। सुन्वन्तः। एके। सवनेषु। सोमान्।
शचीः। मदन्तः। उत। दक्षिणाभिः। न। इत्। जिह्मऽयन्त्यः। नरकम्। पताम॥ १२॥

[१०७] [११ दिव्य आङ्गिरसः, दक्षिणा वा प्राजापत्या।
दक्षिणा, दक्षिमादातारो वा। त्रिष्टुप्, ४ जगती।]

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि॥ १॥
आविः। अभूत्। महि। माघोनम्। एषाम्। विश्वम्। जीवम्। तमसः। निः। अमोचि।
महि। ज्योतिः। पितृऽभिः। दत्तम्। आ। अगात्। उरुः। पन्थाः। दक्षिणायाः। अदर्शि॥ १॥
उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण।
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः॥ २॥
उच्चा। दिवि। दक्षिणाऽवन्तः। अस्थुः। ये। अश्वऽदाः। सह। ते। सूर्येण।
हिरण्यऽदाः। अमृतऽत्वम्। भजन्ते। वासःऽदाः। सोम। प्र। तिरन्ते। आयुः॥ २॥
दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति।
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति॥ ३॥
दैवी। पूर्तिः। दक्षिणा। देवऽयज्या। न। कवऽअरिभ्यः। नहि। ते। पृणन्ति।
अथ। नरः। प्रयतऽदक्षिणासः। अवद्यऽभिया। बहवः। पृणन्ति॥ ३॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः।
ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम्॥ ४॥
शतऽधारम्। वायुम्। अर्कम्। स्वःऽविदम्। नृऽचक्षसः। ते। अभि। चक्षते। हविः।
ये। पृणन्ति। प्र। च। यच्छन्ति। सम्ऽगमे। ते। दक्षिणाम्। दुहते। सप्तऽमातरम्॥ ४॥
दक्षिणावान् प्रथमो हूत एति दक्षिणावान् ग्रामणीरग्रमेति।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय॥ ५॥ [३]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दक्षि॑णाऽवान्। प्र॒थ॒मः। हू॒तः। ए॒ति॒। दक्षि॑णाऽवान्। ग्रा॒म॒ऽणीः। अग्र॑म्। ए॒ति॒।

तम्। ए॒व। म॒न्ये॒। नृ॒ऽपति॑म्। जना॑नाम्। यः। प्र॒थ॒मः। दक्षि॑णाम्। आ॒ऽवि॒वाय॑॥ ५॥

तमे॒व ऋषि॒ं तमु॑ ब्र॒ह्माण॑माहुर्यज्ञ॒न्यं॑ साम॒गामु॑क्थ॒शास॑म्।

स शु॒क्रस्य॑ त॒न्वो॑ वेद ति॒स्रो यः प्र॑थ॒मो दक्षि॑णया र॒राध॑॥ ६॥

तम्। ए॒व। ऋषि॑म्। तम्। ऊँ इति॑। ब्र॒ह्माण॑म्। आ॒हुः। य॒ज्ञ॒ऽन्य॑म्। सा॒म॒ऽगाम्। उ॒क्थ॒ऽशस॑म्।

सः। शु॒क्रस्य॑। त॒न्वः॑। वे॒द॒। ति॒स्रः। यः। प्र॒थ॒मः। दक्षि॑णया। र॒राध॑॥ ६॥

दक्षि॒णाश्वं॒ दक्षि॑णा॒ गां द॑दाति॒ दक्षि॑णा च॒न्द्रमु॒त यद्धिर॑ण्यम्।

दक्षि॒णान्नं॑ वनु॒ते यो न॑ आ॒त्मा दक्षि॑णा॒ां वर्म॑ कृणुते वि॒जा॒नन्॥ ७॥

दक्षि॑णा। अश्व॑म्। दक्षि॑णा। गाम्। द॒दा॒ति॒। दक्षि॑णा। च॒न्द्रम्। उ॒त। यत्। हिर॑ण्यम्।

दक्षि॑णा। अन्न॑म्। व॒नु॒ते॒। यः। नः॒। आ॒त्मा। दक्षि॑णाम्। वर्म॑। कृ॒णु॒ते॒। वि॒ऽजा॒नन्॥ ७॥

न भो॒जा म॑म्रुर्न न्य॒र्थमी॑युर्न रि॑ष्यन्ति॒ न व्य॑थन्ते ह भो॒जाः।

इ॒दं यद्विश्वं॒ भुव॑नं॒ स्व॑श्चै॒तत्सर्वं॒ दक्षि॑णैभ्यो ददाति॥ ८॥

न। भो॒जाः। म॒म्रुः। न। नि॒ऽअ॒र्थम्। ई॒युः। न। रि॒ष्य॒न्ति॒। न। व्य॒थ॒न्ते॒। ह॒। भो॒जाः।

इ॒दम्। यत्। विश्व॑म्। भुव॑नम्। स्व॑१रिति स्वः॑। च॒। ए॒तत्। सर्व॑म्। दक्षि॑णा। ए॒भ्य॒ः। द॒दा॒ति॒॥ ८॥

भो॒जा जि॑ग्युः सुर॒भिं योनि॒मग्रे॑ भो॒जा जि॑ग्युर्व॒ध्व१॑ या सु॒वासा॑ः।

भो॒जा जि॑ग्युरन्तः॒पेयं॒ सुरा॑या भो॒जा जि॑ग्युर्ये अहू॑ताः प्र॒यन्ति॑॥ ९॥

भो॒जाः। जि॒ग्यु॒ः। सु॒र॒भिम्। योनि॑म्। अग्रे॑। भो॒जाः। जि॒ग्यु॒ः। व॒ध्व॑म्। या। सु॒ऽवासा॑ः।

भो॒जाः। जि॒ग्यु॒ः। अ॒न्तः॒ऽपेय॑म्। सुरा॑याः। भो॒जाः। जि॒ग्यु॒ः। ये। अहू॑ताः। प्र॒ऽयन्ति॑॥ ९॥

भो॒जाया॑श्वं॒ सं मृ॑जन्त्या॒शुं भो॒जाया॑स्ते क॒न्या॒३ शुम्भ॑माना।

भो॒जस्ये॒दं पु॑ष्क॒रिणी॑व॒ वेश्म॒ परि॑ष्कृतं देवमा॒नेव॑ चि॒त्रम्॥ १०॥

भो॒जाय॑। अश्व॑म्। सम्। मृ॒ज॒न्ति॒। आ॒शुम्। भो॒जाय॑। आ॒स्ते॒। क॒न्या॑। शुम्भ॑माना।

भो॒जस्य॑। इ॒दम्। पु॒ष्क॒रिणी॑ऽइव। वेश्म॑। परि॑ऽकृतम्। दे॒व॒मा॒नाऽइव। चि॒त्रम्॥ १०॥

भो॒जमश्वा॑ः सुष्ठु॒वाहो॑ वहन्ति सु॒वृद्रथो॑ वर्तते दक्षि॑णायाः।

भो॒जं दे॑वासोऽवता॒ भरे॑षु भो॒जः शत्रू॑न्त्समनी॒केषु॒ जेता॑॥ ११॥ [४]

भो॒जम्। अश्वा॑ः। सु॒ष्ठु॒ऽवाह॑ः। व॒ह॒न्ति॒। सु॒ऽवृत्। रथ॑ः। व॒र्त॒ते॒। दक्षि॑णायाः।

भो॒जम्। दे॒वा॒स॒ः। अ॒व॒त॒। भरे॑षु। भो॒जः। शत्रू॑न्। स॒म्ऽअ॒नी॒केषु॑। जेता॑॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१०८] [११ : १, ३, ५, ७, ९ पणयोऽसुरा ऋषयः। सरमा देवता। २, ४, ६, ८, १०-११ सरमा देवशुनी ऋषिका। पणयो देवता। त्रिष्टुप्।]

किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः।

कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि॥ १॥

किम्। इच्छन्ती। सरमा। प्र। इदम्। आनट्। दूरे। हि। अध्वा। जगुरिः। पराचैः।

का। अस्मेऽहितिः। का। परिऽतक्म्या। आसीत्। कथम्। रसायाः। अतरः। पयांसि॥ १॥

इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः।

अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि॥ २॥

इन्द्रस्य। दूतीः। इषिता। चरामि। महः। इच्छन्ती। पणयः। निऽधीन्। वः।

अतिऽस्कदः। भियसा। तत्। नः। आवत्। तथा। रसायाः। अतरम्। पयांसि॥ २॥

कीदृङिङन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्।

आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति॥ ३॥

कीदृङ्। इन्द्रः। सरमे। का। दृशीका। यस्य। इदम्। दूतीः। असरः। पराकात्।

आ। च। गच्छात्। मित्रम्। एन। दधाम। अथ। गवाम्। गोऽपतिः। नः। भवाति॥ ३॥

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात्।

न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे॥ ४॥

न। अहम्। तम्। वेद। दभ्यम्। दभत्। सः। यस्य। इदम्। दूतीः। असरम्। पराकात्।

न। तम्। गूहन्ति। स्रवतः। गभीराः। हताः। इन्द्रेण। पणयः। शयध्वे॥ ४॥

इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्त्सुभगे पतन्ती।

कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा॥ ५॥ [५]

इमाः। गावः। सरमे। याः। ऐच्छः। परि। दिवः। अन्तान्। सुऽभगे। पतन्ती।

कः। ते। एनाः। अव। सृजात्। अयुध्वी। उत। अस्माकम्। आयुधा। सन्ति। तिग्मा॥ ५॥

असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः।

अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात्॥ ६॥

असेन्या। वः। पणयः। वचांसि। अनिषव्याः। तन्वः। सन्तु। पापीः।

अधृष्टः। वः। एतवै। अस्तु। पन्थाः। बृहस्पतिः। वः। उभया। न। मृळात्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः।

रक्षन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ॥ ७॥

अयम्। निऽधिः। सरमे। अद्रिऽबुध्नः। गोभिः। अश्वेभिः। वसुऽभिः। निऽऋष्टः।

रक्षन्ति। तम्। पणयः। ये। सुऽगोपाः। रेकु। पदम्। अलकम्। आ। जगन्थ॥ ७॥

एह गमन्नृषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः।

त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित्॥ ८॥

आ। इह। गमन्। ऋषयः। सोमऽशिताः। अयास्यः। अङ्गिरसः। नवऽग्वाः।

ते। एतम्। ऊर्वम्। वि। भजन्त। गोनाम्। अथ। एतत्। वचः। पणयः। वमन्। इत्॥ ८॥

एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन।

स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम॥ ९॥

एव। च। त्वम्। सरमे। आऽजगन्थ। प्रऽबाधिता। सहसा। दैव्येन।

स्वसारम्। त्वा। कृणवै। मा। पुनः। गाः। अप। ते। गवाम्। सुऽभगे। भजाम॥ ९॥

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुरङ्गिरसश्च घोराः।

गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः॥ १०॥

न। अहम्। वेद। भ्रातृऽत्वम्। नो इति। स्वसृऽत्वम्। इन्द्रः। विदुः। अङ्गिरसः। च। घोराः।

गोऽकामाः। मे। अच्छदयन्। यत्। आयम्। अप। अतः। इत। पणयः। वरीयः॥ १०॥

दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन।

बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः॥ ११॥ [६]

दूरम्। इत। पणयः। वरीयः। उत्। गावः। यन्तु। मिनतीः। ऋतेन।

बृहस्पतिः। याः। अविन्दत्। निऽगूळ्हाः। सोमः। ग्रावाणः। ऋषयः। च। विप्राः॥ ११॥

[१०९] [७ जुहूर्ब्रह्मजाया, ऊर्ध्वनाभा वा ब्राह्मः। विश्वे देवाः। त्रिष्टुप्, ६-७ अनुष्टुभौ।]

तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा।

वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन॥ १॥

ते। अवदन्। प्रथमाः। ब्रह्मऽकिल्बिषे। अकूपारः। सलिलः। मातरिश्वा।

वीळुऽहराः। तपः। उग्रः। मयःऽभूः। आपः। देवीः। प्रथमऽजाः। ऋतेन॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः।

अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय॥ २॥

सोमः। राजा। प्रथमः। ब्रह्म॰जायाम्। पुनरिति। प्र। अयच्छत्। अहृणीयमानः।

अनु॰अर्तिता। वरुणः। मित्रः। आसीत्। अग्निः। होता। हस्त॰गृह्य। आ। निनाय॥ २॥

हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन्।

न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य॥ ३॥

हस्तेन। एव। ग्राह्यः। आ॰धिः। अस्याः। ब्रह्म॰जाया। इयम्। च। इति। अवोचन्।

न। दूताय। प्र॰ह्ये। तस्थे। एषा। तथा। राष्ट्रम्। गुपितम्। क्षत्रियस्य॥ ३॥

देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः।

भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन्॥ ४॥

देवाः। एतस्याम्। अवदन्त। पूर्वे। सप्त॰ऋषयः। तपसे। ये। नि॰सेदुः।

भीमा। जाया। ब्राह्मणस्य। उप॰नीता। दुः२धाम्। दधाति। परमे। वि॰ओमन्॥ ४॥

ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम्।

तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं१ न देवाः॥ ५॥

ब्रह्म॰चारी। चरति। वेविषत्। विषः। सः। देवानाम्। भवति। एकम्। अङ्गम्।

तेन। जायाम्। अनु। अविन्दत्। बृहस्पतिः। सोमेन। नीताम्। जुह्वम्। न। देवाः॥ ५॥

पुनर्वै देवा अददुः पुनर्मनुष्या उत। राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः॥ ६॥

पुनः। वै। देवाः। अददुः। पुनः। मनुष्याः। उत।

राजानः। सत्यम्। कृण्वानाः। ब्रह्म॰जायाम्। पुनः। ददुः॥ ६॥

पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम्।

ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते॥ ७॥ [७]

पुनः२दाय। ब्रह्म॰जायाम्। कृत्वी। देवैः। निः॰किल्बिषम्।

ऊर्जम्। पृथिव्याः। भक्त्वाय। उरु॰गायम्। उप। आसते॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[११०] [११ जमदग्निर्भार्गवः, जामदग्न्यो रामो वा। आप्रियः = (१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ इळः, ४ बर्हिः, ५ देवीर्द्वारः, ६, उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः)। त्रिष्टुप्।]

समि॑द्धो अ॒द्य मनु॑षो दुरो॒णे दे॒वो दे॒वान्य॑जसि जातवेदः ।

आ च॒ वह॑ मित्रमहश्चिकि॒त्वान्त्वं दूतः क॒विर॑सि॒ प्रचे॑ताः ॥ १ ॥

सम्ऽइ॑द्धः । अ॒द्य । मनु॑षः । दु॒रो॒णे । दे॒वः । दे॒वान् । य॒ज॒सि॒ । जा॒त॒ऽवे॒दः॒ ।

आ । च॒ । वह॑ । मि॒त्र॒ऽम॒हः॒ । चि॒कि॒त्वान् । त्वम् । दू॒तः । क॒विः । अ॒सि॒ । प्र॒ऽचे॑ताः ॥ १ ॥

तनू॑नपात्प॒थ ऋ॒तस्य॒ याना॒न्मध्वा॑ सम॒ञ्जन्त्स्व॑दया सुजिह्व ।

मन्मा॑नि धी॒भिरु॒त य॒ज्ञमृ॒न्धन् दे॑व॒त्रा च॑ कृणुह्यध्व॒रं नः॑ ॥ २ ॥

तनू॑ऽनपात् । प॒थः । ऋ॒तस्य॑ । याना॑न् । मध्वा॑ । स॒म्ऽअ॒ञ्जन् । स्व॒द॒य॒ । सु॒ऽजि॒ह्व॒ ।

मन्मा॑नि । धी॒भिः । उ॒त । य॒ज्ञम् । ऋ॒न्धन् । दे॒व॒ऽत्रा । च॒ । कृ॒णु॒हि॒ । अ॒ध्व॒रम् । न॒ः ॥ २ ॥

आ॒जुह्वा॑न॒ ईड्यो॒ वन्द्य॒श्चा या॑ह्यग्ने॒ वसु॑भिः स॒जोषाः॑ ।

त्वं दे॒वाना॑मसि यह्व होता॒ स ए॑नान्यक्षीषि॒तो यजी॑यान् ॥ ३ ॥

आ॒ऽजुह्वा॑नः । ईड्यः॑ । वन्द्यः॑ । च॒ । आ । या॒हि॒ । अ॒ग्ने॒ । वसु॑ऽभिः । स॒ऽजोषाः॑ ।

त्वम् । दे॒वाना॑म् । अ॒सि॒ । य॒ह्व॒ । होता॑ । सः । ए॒ना॒न् । य॒क्षि॒ । इ॒षि॒तः । यजी॑यान् ॥ ३ ॥

प्रा॒चीनं॑ ब॒र्हिः प्र॒दिशा॑ पृथि॒व्या वस्तो॑र॒स्या वृ॑ज्यते॒ अग्रे॒ अह्ना॑म् ।

व्यु॑ प्रथते वित॒रं वरी॑यो दे॒वेभ्यो॒ अदि॑तये स्यो॒नम् ॥ ४ ॥

प्रा॒चीन॑म् । ब॒र्हिः । प्र॒ऽदिशा॑ । पृ॒थि॒व्याः । वस्तोः॑ । अ॒स्याः । वृ॒ज्य॒ते॒ । अग्रे॑ । अह्ना॑म् ।

वि । ऊँ॒ इति॑ । प्र॒थ॒ते॒ । वि॒ऽत॒रम् । वरी॑यः । दे॒वेभ्यः॑ । अदि॑तये । स्यो॒नम् ॥ ४ ॥

व्यच॑स्वतीरुर्वि॒या वि श्र॑यन्तां॒ पति॑भ्यो॒ न जन॑यः॒ शुम्भ॑मानाः ।

देवी॑र्द्वारो बृहतीर्विश्वमिन्वा दे॒वेभ्यो॑ भवत सुप्राय॒णाः ॥ ५ ॥ [८]

व्यच॑स्वतीः । उ॒र्वि॒या । वि । श्र॒य॒न्ता॒म् । पति॑ऽभ्यः । न । जन॑यः । शुम्भ॑मानाः ।

देवीः॑ । द्वा॒रः॒ । बृ॒ह॒तीः॒ । वि॒श्व॒म्ऽइ॒न्वाः॒ । दे॒वेभ्यः॑ । भ॒व॒त॒ । सु॒प्र॒ऽअ॒य॒नाः ॥ ५ ॥

आ सु॒ष्वय॑न्ती यज॒ते उपा॑के उ॒षासा॒नक्ता॑ सदतां॒ नि योनौ॑ ।

दि॒व्ये योष॑णे बृह॒ती सु॑रु॒क्मे अधि॒ श्रियं॑ शुक्र॒पिशं॒ दधा॑ने ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। सुस्वयन्ती इति। यजते इति। उपाके इति। उषसानक्ता। सदताम्। नि। योनौ॥ दिव्ये इति।
योषणे इति। बृहती इति। सुरुक्मे इति सुऽरुक्मे। अधि। श्रियम्। शुक्रऽपिशम्। दधाने इति॥ ६॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता॥ ७॥

दैव्या। होतारा। प्रथमा। सुऽवाचा। मिमाना। यज्ञम्। मनुषः। यजध्यै।
प्रऽचोदयन्ता। विदथेषु। कारू इति। प्राचीनम्। ज्योतिः। प्रऽदिशा। दिशन्ता॥ ७॥

आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु॥ ८॥

आ। नः। यज्ञम्। भारती। तूयम्। एतु। इळा। मनुष्वत्। इह। चेतयन्ती।
तिस्रः। देवीः। बर्हिः। आ। इदम्। स्योनम्। सरस्वती। सुऽअपसः। सदन्तु॥ ८॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान्॥ ९॥

यः। इमे इति। द्यावापृथिवी इति। जनित्री इति। रूपैः। अपिंशत्। भुवनानि। विश्वा।
तम्। अद्य। होतरिति। इषितः। यजीयान्। देवम्। त्वष्टारम्। इह। यक्षि। विद्वान्॥ ९॥

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन॥ १०॥

उपऽअवसृज। त्मन्या। सम्ऽअञ्जन्। देवानाम्। पाथः। ऋतुऽथा। हवींषि।
वनस्पतिः। शमिता। देवः। अग्निः। स्वदन्तु। हव्यम्। मधुना। घृतेन॥ १०॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः॥ ११॥ [९]

सद्यः। जातः। वि। अमिमीत। यज्ञम्। अग्निः। देवानाम्। अभवत्। पुरःऽगाः।
अस्य। होतुः। प्रऽदिशि। ऋतस्य। वाचि। स्वाहाऽकृतम्। हविः। अदन्तु। देवाः॥ ११॥

[१११] [१० अष्टादंष्ट्रो वैरूपः। इन्द्रः। त्रिष्टुप्।]

मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः सन्ति नृणाम्।
इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मनीषिणः। प्र। भरध्वम्। मनीषाम्। यथाऽयथा। मतयः। सन्ति। नृणाम्।
इन्द्रम्। सत्यैः। आ। ईरयाम। कृतेभिः। सः। हि। वीरः। गिर्वणस्युः। विदानः॥ १॥

ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो वृषभो गोभिरानट्।
उदतिष्ठत्तविषेणा रवेण महान्ति चित्सं विव्याचा रजांसि॥ २॥

ऋतस्य। हि। सदसः। धीतिः। अद्यौत्। सम्। गार्ष्टेयः। वृषभः। गोभिः। आनट्।
उत्। अतिष्ठत्। तविषेण। रवेण। महान्ति। चित्। सम्। विव्याच। रजांसि॥ २॥

इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय।
आत्मेनां कृण्वन्नच्युतो भुवद्गो पतिर्दिवः सनजा अप्रतीतः॥ ३॥

इन्द्रः। किल। श्रुत्यै। अस्य। वेद। सः। हि। जिष्णुः। पथिऽकृत्। सूर्याय।
आत्। मेनाम्। कृण्वन्। अच्युतः। भुवत्। गोः। पतिः। दिवः। सनऽजाः। अप्रतिऽइतः॥ ३॥

इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनादङ्गिरोभिर्गृणानः।
पुरूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता॥ ४॥

इन्द्रः। मह्ना। महतः। अर्णवस्य। व्रता। अमिनात्। अङ्गिरःऽभिः। गृणानः।
पुरूणि। चित्। नि।ततान। रजांसि। दाधार। यः। धरुणम्। सत्यऽताता॥ ४॥

इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम्।
महीं चिद् द्यामातनोत्सूर्येण चास्कम्भ चित्कम्भनेन स्कभीयान्॥ ५॥ [१०]

इन्द्रः। दिवः। प्रतिऽमानम्। पृथिव्याः। विश्वा। वेद। सवना। हन्ति। शुष्णम्।
महीम्। चित्। द्याम्। आ। अतनोत्। सूर्येण। चास्कम्भ। चित्। स्कम्भनेन। स्कभीयान्॥ ५॥

वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः।
वि धृष्णो अत्र धृषता जघन्थाथाभवो मघवन् बाह्वोजाः॥ ६॥

वज्रेण। हि। वृत्रऽहा। वृत्रम्। अस्तः। अदेवस्य। शूशुवानस्य। मायाः।
वि। धृष्णो इति। अत्र। धृषता। जघन्थ। अथ। अभवः। मघऽवन्। बाहुऽओजाः॥ ६॥

सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन्।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद॥ ७॥

सचन्त। यत्। उषसः। सूर्येण। चित्राम्। अस्य। केतवः। राम्। अविन्दन्।
आ। यत्। नक्षत्रम्। ददृशे। दिवः। न। पुनः। यतः। नकिः। अद्धा। नु। वेद॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दूरं किल प्रथमा जग्मुरासामिन्द्रस्य याः प्रसवे सस्रुरापः।

क्व स्विदग्रं क्व बुध्न आसामापो मध्यं क्व वो नूनमन्तः ॥ ८ ॥

दूरम्। किल। प्रथमाः। जग्मुः। आसाम्। इन्द्रस्य। याः। प्रऽसवे। सस्रुः। आपः।

क्व। स्वित्। अग्रम्। क्व। बुध्नः। आसाम्। आपः। मध्यम्। क्व। वः। नूनम्। अन्तः॥ ८॥

सृजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन।

मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमन्ते नितिक्ताः॥ ९॥

सृजः। सिन्धून्। अहिना। जग्रसानान्। आत्। इत्। एताः। प्र। विविज्रे। जवेन।

मुमुक्षमाणाः। उत। याः। मुमुच्रे। अध। इत्। एताः। न। रमन्ते। निऽतिक्ताः॥ ९॥

सध्रीचीः सिन्धुमुशतीरिवायन्त्सनाज्जार आरितः पूर्भिदासाम्।

अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इन्द्र पूर्वीः॥ १०॥ [११]

सध्रीचीः। सिन्धुम्। उशतीःऽइव। आयन्। सनात्। जारः। आरितः। पूःऽभित्। आसाम्।

अस्तम्। आ। ते। पार्थिवा। वसूनि। अस्मे इति। जग्मुः। सूनृताः। इन्द्र। पूर्वीः॥ १०॥

[११२] [१० नभःप्रभेदनो वैरूपः। इन्द्रः। त्रिष्टुप्।]

इन्द्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः।

हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या३ प्र ब्रवाम॥ १॥

इन्द्र। पिब। प्रतिऽकामम्। सुतस्य। प्रातःऽसावः। तव। हि। पूर्वऽपीतिः।

हर्षस्व। हन्तवे। शूर। शत्रून्। उक्थेभिः। ते। वीर्या। प्र। ब्रवाम॥ १॥

यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि।

तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः॥ २॥

यः। ते। रथः। मनसः। जवीयान्। आ। इन्द्र। तेन। सोमऽपेयाय। याहि।

तूयम्। आ। ते। हरयः। प्र। द्रवन्तु। येभिः। यासि। वृषऽभिः। मन्दमानः॥ २॥

हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व।

अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्व निषद्य॥ ३॥

हरित्वता। वर्चसा। सूर्यस्य। श्रेष्ठैः। रूपैः। तन्वम्। स्पर्शयस्व।

अस्माभिः। इन्द्र। सखिऽभिः। हुवानः। सध्रीचीनः। मादयस्व। निऽसद्य॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्य॒ त्यत्ते॑ महि॒मानं॒ मदे॑ष्वि॒मे म॒ही रोद॑सी॒ नावि॑विक्ताम्।

तदोक॒ आ हरि॑भिरिन्द्र यु॒क्तैः प्रि॒येभि॑र्याहि प्रि॒यमन्न॒मच्छ॑ ॥ ४॥

यस्य॑। त्यत्। ते॒। म॒हि॒मान॑म्। मदे॑षु। इ॒मे इति॑। म॒ही इति॑। रोद॑सी॒ इति॑। न। अवि॑विक्ताम्।

तत्। ओकः॑। आ। हरि॑ऽभिः। इ॒न्द्र॒। यु॒क्तैः। प्रि॒येभिः॑। या॒हि॒। प्रि॒यम्। अन्न॑म्। अच्छ॑ ॥ ४॥

यस्य॒ शश्व॑त्पपि॒वाँ इ॑न्द्र शत्रू॑ननानुकृ॒त्या रण्या॑ च॒कर्थ।

स ते॒ पुरं॑धिं॒ तवि॑षीमियर्ति॒ स ते॒ मदा॑य सु॒त इ॑न्द्र॒ सोमः॑ ॥ ५॥ [१२]

यस्य॑। शश्व॑त्। प॒पि॒ऽवान्। इ॒न्द्र॒। शत्रू॑न्। अ॒न॒नु॒ऽकृ॒त्या। रण्या॑। च॒कर्थ॑।

सः। ते॒। पुर॑म्ऽधिम्। तवि॑षीम्। इ॒य॒र्ति॒। सः। ते॒। मदा॑य। सु॒तः। इ॒न्द्र॒। सोमः॑ ॥ ५॥

इ॒दं ते॒ पात्रं॒ सन॑वित्तमिन्द्र॒ पिबा॒ सोम॑मे॒ना श॑तक्रतो।

पूर्ण आ॑हा॒वो म॑दि॒रस्य॒ मध्वो॒ यं विश्व॒ इद॑भि॒हर्य॑न्ति दे॒वाः ॥ ६॥

इ॒दम्। ते॒। पात्र॑म्। सन॑ऽवित्तम्। इ॒न्द्र॒। पिब॑। सोम॑म्। ए॒ना। श॒त॒क्र॒तो॒ इति॑ शतक्रतो।

पू॒र्णः। आ॒ऽहा॒वः। म॒दि॒रस्य॑। मध्वः॑। यम्। विश्वे॑। इत्। अ॒भि॒ऽहर्य॑न्ति। दे॒वाः ॥ ६॥

वि हि त्वामि॑न्द्र पुरु॒धा जना॑सो हि॒तप्र॑यसो वृषभ॒ ह्वय॑न्ते।

अ॒स्माकं॑ ते॒ मधु॑मत्तमानी॒मा भुव॑न॒त्सव॑ना॒ तेषु॑ हर्य ॥ ७॥

वि। हि। त्वाम्। इ॒न्द्र॒। पु॒रु॒धा। जना॑सः। हि॒तऽप्र॑यसः। वृ॒ष॒भ॒। हय॑न्ते।

अ॒स्माक॑म्। ते॒। मधु॑मत्ऽतमानि। इ॒मा। भुव॑न्। सव॑ना। तेषु॑। ह॒र्य॒ ॥ ७॥

प्र त॑ इन्द्र पू॒र्व्याणि॒ प्र नूनं वी॒र्या॑ वोचं प्रथ॒मा कृ॒तानि॑।

स॒ती॒नम॑न्युरश्रथायो॒ अद्रिं॑ सुवे॒दना॑मकृणो॒र्ब्रह्म॑णे॒ गाम् ॥ ८॥

प्र। ते॒। इ॒न्द्र॒। पू॒र्व्याणि॑। प्र। नू॒नम्। वी॒र्या॑। वो॒च॒म्। प्र॒थ॒मा। कृ॒तानि॑।

स॒ती॒नऽम॑न्युः। अ॒श्र॒थ॒यः॒। अद्रि॑म्। सु॒ऽवे॒दना॑म्। अ॒कृ॒णोः॒। ब्रह्म॑णे। गाम् ॥ ८॥

नि षु सी॑द गणपते ग॒णेषु॒ त्वामा॑हु॒र्विप्र॑तमं कवी॒नाम्।

न ऋ॒ते त्वत्क्रि॑यते॒ किं च॒नारे म॒हाम॒र्कं म॑घवञ्चि॒त्रम॑र्च ॥ ९॥

नि। सु। सी॒द॒। ग॒ण॒ऽप॒ते॒। ग॒णेषु॑। त्वाम्। आ॒हुः॒। विप्र॑ऽतमम्। क॒वी॒नाम्।

न। ऋ॒ते। त्वत्। क्रि॒य॒ते॒। किम्। च॒न। आ॒रे। म॒हाम्। अ॒र्कम्। म॒घ॒ऽव॒न्। चि॒त्रम्। अ॒र्च॒ ॥ ९॥

अ॒भि॒ख्या नो॑ मघव॒न्नाध॑माना॒न्त्सखे॑ बो॒धि व॑सुपते॒ सखी॑नाम्।

रणं॑ कृधि रणकृत्सत्यशु॒ष्माभ॑क्ते चि॒दा भ॑जा रा॒ये अ॒स्मान् ॥ १० ॥ [१३] {१}

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभिऽख्या । नः । मघऽवन् । नाधमानान् । सखे । बोधि । वसुऽपते । सखीनाम् ।
रणम् । कृधि । रणऽकृत् । सत्यऽशुष्म । अभक्ते । चित् । आ । भज । राये । अस्मान् ॥ १० ॥

[११३] [१० शतप्रभेदनो वैरूपः । इन्द्रः । जगती, १० त्रिष्टुप् ।]

तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावताम् ।
यदैत्कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥ १ ॥

तम् । अस्य । द्यावापृथिवी इति । सऽचेतसा । विश्वेभिः । देवैः । अनु । शुष्मम् । आवताम् ।
यत् । ऐत् । कृण्वानः । महिमानम् । इन्द्रियम् । पीत्वी । सोमस्य । क्रतुऽमान् । अवर्धत ॥ १ ॥

तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते ।
देवेभिरिन्द्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥ २ ॥

तम् । अस्य । विष्णुः । महिमानम् । ओजसा । अंशुम् । दधन्वान् । मधुनः । वि । रप्शते ।
देवेभिः । इन्द्रः । मघऽवा । सयावऽभिः । वृत्रम् । जघन्वान् । अभवत् । वरेण्यः ॥ २ ॥

वृत्रेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे ।
विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिन्द्रियम् ॥ ३ ॥

वृत्रेण । यत् । अहिना । बिभ्रत् । आयुधा । सम्ऽअस्थिथाः । युधये । शंसम् । आऽविदे ।
विश्वे । ते । अत्र । मरुतः । सह । त्मना । अवर्धन् । उग्र । महिमानम् । इन्द्रियम् ॥ ३ ॥

जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणम् ।
अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुम् ॥ ४ ॥

जज्ञानः । एव । वि । अबाधत । स्पृधः । प्र । अपश्यत् । वीरः । अभि । पौंस्यम् । रणम् ।
अवृश्चत् । अद्रिम् । अव । सऽस्यदः । सृजत् । अस्तभ्नात् । नाकम् । सुऽअपस्यया । पृथुम् ॥ ४ ॥

आदिन्द्रः सत्रा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत ।
अवाभरद्धृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥ ५ ॥ [१४]

आत् । इन्द्रः । सत्रा । तविषीः । अपत्यत । वरीयः । द्यावापृथिवी इति । अबाधत ।
अव । अभरत् । धृषितः । वज्रम् । आयसम् । शेवम् । मित्राय । वरुणाय । दाशुषे ॥ ५ ॥

इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।
वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतम् ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रस्य । अत्र । तविषीभ्यः । विऽरप्शिनः । ऋघायतः । अरंहयन्त । मन्यवे ।

वृत्रम् । यत् । उग्रः । वि । अवृश्चत् । ओजसा । अपः । बिभ्रतम् । तमसा । परिऽवृतम् ॥ ६ ॥

या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः ।

ध्वान्तं तमोऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूतावपत्यत ॥ ७ ॥

या । वीर्याणि । प्रथमानि । कर्त्वा । महिऽत्वेभिः । यतमानौ । सम्ऽईयतुः ।

ध्वान्तम् । तमः । अव । दध्वसे । हते । इन्द्रः । मह्ना । पूर्वऽहूतौ । अपत्यत ॥ ७ ॥

विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्त्सोमवत्या वचस्यया ।

रुद्धं वृत्रमहिमिन्द्रस्य हन्मनाग्निर्न जम्भैस्तृष्वन्नमावयत् ॥ ८ ॥

विश्वे । देवासः । अध । वृष्ण्यानि । ते । अवर्धयन् । सोमऽवत्या । वचस्यया ।

रुद्धम् । वृत्रम् । अहिम् । इन्द्रस्य । हन्मना । अग्निः । न । जम्भैः । तृषु । अन्नम् । आवयत् ॥ ८ ॥

भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र वोचत ।

इन्द्रो धुनिं च चुमुरिं च दम्भयञ्छ्रद्धामनस्या शृणुते दभीतये ॥ ९ ॥

भूरि । दक्षेभिः । वचनेभिः । ऋक्वऽभिः । सख्येभिः । सख्यानि । प्र । वोचत ।

इन्द्रः । धुनिम् । च । चुमुरिम् । च । दम्भयन् । श्रद्धाऽमनस्या । शृणुते । दभीतये ॥ ९ ॥

त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शंसन् ।

सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य ॥ १० ॥ [१५]

त्वम् । पुरूणि । आ । भर । सुऽअश्व्या । येभिः । मंसै । निऽवचनानि । शंसन् ।

सुऽगेभिः । विश्वा । दुःऽइता । तरेम । विदो इति । सु । नः । उर्विया । गाधम् । अद्य ॥ १० ॥

[११४] [१० सध्रिर्वैरूपः, घर्मो वा तापसः । विश्वे देवाः । त्रिष्टुप्, ४ जगती ।]

घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।

दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ॥ १ ॥

घर्मा । सम्ऽअन्ता । त्रिऽवृतम् । वि । आपतुः । तयोः । जुष्टिम् । मातरिश्वा । जगाम ।

दिवः । पयः । दिधिषाणाः । अवेषन् । विदुः । देवाः । सहऽसामानम् । अर्कम् ॥ १ ॥

तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।

तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तिस्रः। देष्ट्राय। निःऽऋतीः। उप। आसते। दीर्घऽश्रुतः। वि। हि। जानन्ति। वह्नयः।
तासाम्। नि। चिक्युः। कवयः। निऽदानम्। परेषु। याः। गुह्येषु। व्रतेषु॥ २॥

चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम्॥ ३॥

चतुःऽकपर्दा। युवतिः। सुऽपेशाः। घृतऽप्रतीका। वयुनानि। वस्ते।
तस्याम्। सुऽपर्णा। वृषणा। नि। सेदतुः। यत्र। देवाः। दधिरे। भागऽधेयम्॥ ३॥

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम्॥ ४॥

एकः। सुऽपर्णः। सः। समुद्रम्। आ। विवेश। सः। इदम्। विश्वम्। भुवनम्। वि। चष्टे।
तम्। पाकेन। मनसा। अपश्यम्। अन्तितः। तम्। माता। रेळ्हि। सः। ऊँ इति। रेळ्हि। मातरम्॥ ४॥

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश॥ ५॥ [१६]

सुऽपर्णम्। विप्राः। कवयः। वचःऽभिः। एकम्। सन्तम्। बहुधा। कल्पयन्ति।
छन्दांसि। च। दधतः। अध्वरेषु। ग्रहान्। सोमस्य। मिमते। द्वादश॥ ५॥

षट्त्रिंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम्।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति॥ ६॥

षट्ऽत्रिंशान्। च। चतुरः। कल्पयन्तः। छन्दांसि। च। दधतः। आऽद्वादशम्।
यज्ञम्। विऽमाय। कवयः। मनीषा। ऋक्ऽसामाभ्याम्। प्र। रथम्। वर्तयन्ति॥ ६॥

चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त।
आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य॥ ७॥

चतुःऽदश। अन्ये। महिमानः। अस्य। तम्। धीराः। वाचा। प्र। नयन्ति। सप्त।
आप्नानम्। तीर्थम्। कः। इह। प्र। वोचत्। येन। पथा। प्रऽपिबन्ते। सुतस्य॥ ७॥

सहस्रधा पञ्चदशान्युक्था यावद्द्यावापृथिवी तावदित्तत्।
सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक्॥ ८॥

सहस्रधा। पञ्चऽदशानि। उक्था। यावत्। द्यावापृथिवी इति। तावत्। इत्। तत्।
सहस्रधा। महिमानः। सहस्रम्। यावत्। ब्रह्म। विऽस्थितम्। तावती। वाक्॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद।

कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित्॥ ९॥

कः। छन्दसाम्। योगम्। आ। वेद। धीरः। कः। धिष्ण्याम्। प्रति। वाचम्। पपाद।

कम्। ऋत्विजाम्। अष्टमम्। शूरम्। आहुः। हरी इति। इन्द्रस्य। नि। चिकाय। कः। स्वित्॥ ९॥

भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः।

श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः॥ १०॥ [१७]

भूम्याः। अन्तम्। परि। एके। चरन्ति। रथस्य। धूःऽसु। युक्तासः। अस्थुः।

श्रमस्य। दायम्। वि। भजन्ति। एभ्यः। यदा। यमः। भवति। हर्म्ये। हितः॥ १०॥

[११५] [९ उपस्तुतो वार्ष्टिहव्यः। अग्निः। जगती, ८ त्रिष्टुप्, ९ शक्वरी।]

चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे।

अनूधा यदि जीजनदधा च नु ववक्ष सद्यो महि दूत्यं१चरन्॥ १॥

चित्रः। इत्। शिशोः। तरुणस्य। वक्षथः। न। यः। मातरौ। अपिऽएति। धातवे।

अनूधाः। यदि। जीजनत्। अध। च। नु। ववक्ष। सद्यः। महि। दूत्यम्। चरन्॥ १॥

अग्निर्ह नाम धायि दन्नपस्तमः सं यो वना युवते भस्मना दता।

अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा॥ २॥

अग्निः। ह। नाम। धायि। दन्। अपःऽतमः। सम्। यः। वना। युवते। भस्मना। दता।

अभिऽप्रमुरा। जुह्वा। सुऽअध्वरः। इनः। न। प्रोथमानः। यवसे। वृषा॥ २॥

तं वो विं न द्रुषदं देवमन्धस इन्दुं प्रोथन्तं प्रवपन्तमर्णवम्।

आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सरजन्तमध्वनः॥ ३॥

तम्। वः। विम्। न। द्रुऽसदम्। देवम्। अन्धसः। इन्दुम्। प्रोथन्तम्। प्रऽवपन्तम्। अर्णवम्।

आसा। वह्निम्। न। शोचिषा। विऽरप्शिनम्। महिऽव्रतम्। न। सरजन्तम्। अध्वनः॥ ३॥

वि यस्य ते ज्रयसानस्याजर धक्षोर्न वाताः परि सन्त्यच्युताः।

आ रण्वासो युयुधयो न सत्वनं त्रितं नशन्त प्र शिषन्त इष्टये॥ ४॥

वि। यस्य। ते। ज्रयसानस्य। अजर। धक्षोः। न। वाताः। परि। सन्ति। अच्युताः।

आ। रण्वासः। युयुधयः। न। सत्वनम्। त्रितम्। नशन्त। प्र। शिषन्तः। इष्टये॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स इद॒ग्निः कण्व॑तम॒: कण्व॑सखा॒र्यः प॒रस्या॒न्त॑रस्य॒ तरु॑षः।

अ॒ग्निः पा॑तु गृण॒तो अ॒ग्निः सू॒रीन॒ग्निर्द॑दातु॒ तेषा॒मवो॑ नः॥ ५॥ [१८]

सः। इत्। अ॒ग्निः। कण्व॑ऽतमः। कण्व॑ऽसखा। अ॒र्यः। पर॑स्य। अन्त॑रस्य। तरु॑षः।

अ॒ग्निः। पा॒तु। गृ॒ण॒तः। अ॒ग्निः। सू॒रीन्। अ॒ग्निः। द॒दा॒तु॒। तेषा॑म्। अव॑ः। न॒ः॥ ५॥

वा॒जिन्त॑माय॒ सह्य॑से सुपित्र्य तृ॒षु च्यवा॑नो॒ अनु॑ जा॒तवे॑दसे।

अ॒नु॒द्रे चि॒द्यो धृ॑ष॒ता वरं॑ स॒ते म॒हिन्त॑माय॒ धन्व॒नेद॑विष्य॒ते॥ ६॥

वा॒जिन्ऽत॑माय। सह्य॑से। सु॒ऽपि॒त्र्य॒। तृ॒षु। च्यवा॑नः। अनु॑। जा॒तऽवे॑दसे।

अ॒नु॒द्रे। चि॒त्। यः। धृ॒ष॒ता। वर॑म्। स॒ते। म॒हिन्ऽत॑माय। धन्व॑ना। इत्। अ॒वि॒ष्य॒ते॥ ६॥

ए॒वाग्निर्मर्तैः॑ स॒ह सू॒रिभि॒र्वसु॑: ष्टवे॒ सह॑सः सू॒नरो॒ नृभि॑ः।

मि॒त्रासो॒ न ये सुधि॑ता ऋ॒ता॒यवो॒ द्यावो॒ न द्यु॒म्नैर॒भि सन्ति॒ मानु॑षान्॥ ७॥

ए॒व। अ॒ग्निः। मर्तैः॑। स॒ह। सू॒रिऽभि॑ः। वसु॑ः। स्त॒वे॒। सह॑सः। सू॒नर॑ः। नृऽभि॑ः।

मि॒त्रास॑ः। न। ये। सुऽधि॑ताः। ऋ॒त॒ऽयव॑ः। द्याव॑ः। न। द्यु॒म्नैः। अ॒भि। सन्ति॑। मानु॑षान्॥ ७॥

ऊर्जो॑ नपात्सहसाव॒न्निति॑ त्वोपस्तुतस्य॑ वन्दते॒ वृषा॒ वाक्।

त्वां स्तो॑षाम॒ त्वया॑ सु॒वीरा॒ द्राघी॑य॒ आयु॑: प्रत॒रं दधा॑नाः॥ ८॥

ऊर्जः। न॒पा॒त्। स॒ह॒सा॒ऽव॒न्। इति॑। त्वा॒। उ॒प॒ऽस्तु॒तस्य॑। व॒न्द॒ते॒। वृषा॑। वाक्।

त्वाम्। स्तो॒षा॒म॒। त्वया॑। सु॒ऽवीरा॑ः। द्राघी॑यः। आयु॑ः। प्र॒ऽत॒रम्। दधा॑नाः॥ ८॥

इति॑ त्वाग्ने वृष्टि॒हव्य॑स्य पु॒त्रा उ॑पस्तुतास ऋष॑योऽवोचन्।

ताँश्च॑ पा॒हि गृ॑ण॒तश्च॑ सू॒रीन् वष॒ड्वष॒ळित्यू॒र्ध्वासो॑ अनक्षन् नमो॒ नम॒ इत्यू॒र्ध्वासो॑ अनक्षन्॥ ९॥

इति॑। त्वा॒। अ॒ग्ने॒। वृष्टि॒ऽहव्य॑स्य। पु॒त्राः। उप॒ऽस्तु॒तास॑ः। ऋष॑यः। अ॒वो॒च॒न्। [१९]

तान्। च॒। पा॒हि। गृ॒ण॒तः। च॒। सू॒रीन्। वष॑ट्। वष॑ट्। इति॑। ऊ॒र्ध्वास॑ः। अ॒न॒क्ष॒न्।

नम॑ः। नम॑ः। इति॑। ऊ॒र्ध्वास॑ः। अ॒न॒क्ष॒न्॥ ९॥

[११६] [९ अग्नियुतः स्थौरः अग्नियूपो वा स्थौरः। इन्द्रः। त्रिष्टुप्।]

पिबा॒ सोम॑ं मह॒त इ॑न्द्रि॒याय॒ पिबा॑ वृ॒त्राय॒ हन्त॑वे शविष्ठ।

पिब॑ रा॒ये शव॑से हूयमा॑न॒: पिब॒ मध्व॑स्तृ॒पदि॑न्द्रा वृ॑षस्व॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पिब । सोमम् । महते । इन्द्रियाय । पिब । वृत्राय । हन्तवे । शविष्ठ ।

पिब । राये । शवसे । हूयमानः । पिब । मध्वः । तृपत् । इन्द्र । आ । वृषस्व ॥ १ ॥

अस्य पिब क्षुमतः प्रस्थितस्येन्द्र सोमस्य वरमा सुतस्य ।

स्वस्तिदा मनसा मादयस्वार्वाचीनो रेवते सौभगाय ॥ २ ॥

अस्य । पिब । क्षुऽमतः । प्रऽस्थितस्य । इन्द्र । सोमस्य । वरम् । आ । सुतस्य ।

स्वस्तिऽदाः । मनसा । मादयस्व । अर्वाचीनः । रेवते । सौभगाय ॥ २ ॥

ममत्तु त्वा दिव्यः सोम इन्द्र ममत्तु यः सूयते पार्थिवेषु ।

ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ॥ ३ ॥

ममत्तु । त्वा । दिव्यः । सोमः । इन्द्र । ममत्तु । यः । सूयते । पार्थिवेषु ।

ममत्तु । येन । वरिवः । चकर्थ । ममत्तु । येन । निऽरिणासि । शत्रून् ॥ ३ ॥

आ द्विबर्हा अमिनो यात्विन्द्रो वृषा हरिभ्यां परिषिक्तमन्धः ।

गव्या सुतस्य प्रभृतस्य मध्वः सत्रा खेदामरुशहा वृषस्व ॥ ४ ॥

आ । द्विऽबर्हाः । अमिनः । यातु । इन्द्रः । वृषा । हरिऽभ्याम् । परिऽसिक्तम् । अन्धः ।

गवि । आ । सुतस्य । प्रऽभृतस्य । मध्वः । सत्रा । खेदाम् । अरुशऽहा । आ । वृषस्व ॥ ४ ॥

नि तिग्मानि भ्राशयन् भ्राश्यान्यव स्थिरा तनुहि यातुजूनाम् ।

उग्राय ते सहो बलं ददामि प्रतीत्या शत्रून् विगदेषु वृश्च ॥ ५ ॥ [२०]

नि । तिग्मानि । भ्राशयन् । भ्राश्यानि । अव । स्थिरा । तनुहि । यातुऽजूनाम् ।

उग्राय । ते । सहः । बलम् । ददामि । प्रतिऽइत्य । शत्रून् । विऽगदेषु । वृश्च ॥ ५ ॥

व्य१र्य इन्द्र तनुहि श्रवांस्योजः स्थिरेव धन्वनोऽभिमातीः ।

अस्मद्र्यग्वावृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥ ६ ॥

वि । अर्यः । इन्द्र । तनुहि । श्रवांसि । ओजः । स्थिराऽइव । धन्वनः । अभिऽमातीः ।

अस्मद्र्यक् । ववृधानः । सहःऽभिः । अनिऽभृष्टः । तन्वम् । ववृधस्व ॥ ६ ॥

इदं हविर्मघवन् तुभ्यं रातं प्रति सम्राळहृणानो गृभाय ।

तुभ्यं सुतो मघवन् तुभ्यं पक्वो३ऽद्धीन्द्र पिब च प्रस्थितस्य ॥ ७ ॥

इदम् । हविः । मघऽवन् । तुभ्यम् । रातम् । प्रति । सम्ऽराट् । अहृणानः । गृभाय ।

तुभ्यम् । सुतः । मघऽवन् । तुभ्यम् । पक्वः । अद्धि । इन्द्र । पिब । च । प्रऽस्थितस्य ॥ ७ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम्।

प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः॥ ८॥

अद्धि। इत्। इन्द्र। प्रऽस्थिता। इमा। हवींषि। चनः। दधिष्व। पचता। उत। सोमम्।

पयस्वन्तः। प्रति। हर्यामसि। त्वा। सत्याः। सन्तु। यजमानस्य। कामाः॥ ८॥

प्रेन्द्राग्निभ्यां सुवचस्यामियर्मि सिन्धाविव प्रेरयं नावमर्कैः।

अयाइव परि चरन्ति देवा ये अस्मभ्यं धनदा उद्भिदश्च॥ ९॥ [२१]

प्र। इन्द्राग्निऽभ्याम्। सुऽवचस्याम्। इयर्मि। सिन्धौऽइव। प्र। ईरयम्। नावम्। अर्कैः।

अयाःऽइव। परि। चरन्ति। देवाः। ये। अस्मभ्यम्। धनऽदाः। उत्ऽभिदः। च॥ ९॥

[११७] [९ भिक्षुराङ्गिरसः। धनान्नदानस्तुतिः। त्रिष्टुप्, १-२ जगती।]

न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छन्ति मृत्यवः।

उतो रयिः पृणतो नोप दस्यत्युतापृणन् मर्डितारं न विन्दते॥ १॥

न। वै। ऊँ इति। देवाः। क्षुधम्। इत्। वधम्। ददुः। उत। आशितम्। उप। गच्छन्ति। मृत्यवः।

उतो इति। रयिः। पृणतः। न। उप। दस्यति। उत। अपृणन्। मर्डितारम्। न। विन्दते॥ १॥

य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्रफितायोपजग्मुषे।

स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विन्दते॥ २॥

यः। आध्राय। चकमानाय। पित्वः। अन्नऽवान्। सन्। रफिताय। उपऽजग्मुषे।

स्थिरम्। मनः। कृणुते। सेवते। पुरा। उतो इति। चित्। सः। मर्डितारम्। न। विन्दते॥ २॥

स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय।

अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम्॥ ३॥

सः। इत्। भोजः। यः। गृहवे। ददाति। अन्नऽकामाय। चरते। कृशाय।

अरम्। अस्मै। भवति। यामऽहूतौ। उत। अपरीषु। कृणुते। सखायम्॥ ३॥

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः।

अपास्मात्प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत्॥ ४॥

न। सः। सखा। यः। न। ददाति। सख्ये। सचाऽभुवे। सचमानाय। पित्वः॥ अप। अस्मात्।

प्र। इयात्। न। तत्। ओकः। अस्ति। पृणन्तम्। अन्यम्। अरणम्। चित्। इच्छेत्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृणीयादिन्नाधमानाय तव्यान् द्राघीयांसमनु पश्येत पन्थाम्।

ओ हि वर्तन्ते रथ्येव चक्रान्यमन्यमुप तिष्ठन्त रायः ॥ ५ ॥ [२२]

पृणीयात्। इत्। नाधमानाय। तव्यान्। द्राघीयांसम्। अनु। पश्येत। पन्थाम्।

ओ इति। हि। वर्तन्ते। रथ्याऽइव। चक्रा। अन्यम्ऽअन्यम्। उप। तिष्ठन्त। रायः ॥ ५ ॥

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य।

नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥ ६ ॥

मोघम्। अन्नम्। विन्दते। अप्रऽचेताः। सत्यम्। ब्रवीमि। वधः। इत्। सः। तस्य।

न। अर्यमणम्। पुष्यति। नो इति। सखायम्। केवलऽअघः। भवति। केवलऽआदी ॥ ६ ॥

कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः।

वदन् ब्रह्मावदतो वनीयान् पृणन्नापिरपृणन्तमभि ष्यात् ॥ ७ ॥

कृषन्। इत्। फालः। आशितम्। कृणोति। यन्। अध्वानम्। अप। वृङ्क्ते। चरित्रैः।

वदन्। ब्रह्मा। अवदतः। वनीयान्। पृणन्। आपिः। अपृणन्तम्। अभि। स्यात् ॥ ७ ॥

एकपाद्भूयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात्।

चतुष्पादेति द्विपदामभिस्वरे संपश्यन् पङ्क्तीरुपतिष्ठमानः ॥ ८ ॥

एकऽपात्। भूयः। द्विऽपदः। वि। चक्रमे। द्विऽपात्। त्रिऽपादम्। अभि। एति। पश्चात्।

चतुःऽपात्। एति। द्विऽपदाम्। अभिऽस्वरे। सम्ऽपश्यन्। पङ्क्तीः। उपऽतिष्ठमानः ॥ ८ ॥

समौ चिद्धस्तौ न समं विविष्टः संमातरा चिन्न समं दुहाते।

यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तौ न समं पृणीतः ॥ ९ ॥ [२३]

समौ। चित्। हस्तौ। न। समम्। विविष्टः। सम्ऽमातरा। चित्। न। समम्। दुहाते इति।

यमयोः। चित्। न। समा। वीर्याणि। ज्ञाती इति। चित्। सन्तौ। न। समम्। पृणीतः ॥ ९ ॥

[११८] [९ उरुक्षय आमहीयवः। रक्षोहाऽग्निः। गायत्री।]

अग्ने हंसि न्यत्रिणं दीद्यन् मर्त्येष्वा। स्वे क्षये शुचिव्रत ॥ १ ॥

अग्ने। हंसि। नि। अत्रिणम्। दीद्यत्। मर्त्येषु। आ। स्वे। क्षये। शुचिऽव्रत ॥ १ ॥

उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे। यत्त्वा स्रुचः समस्थिरन् ॥ २ ॥

उत्। तिष्ठसि। सुऽआहुतः। घृतानि। प्रति। मोदसे। यत्। त्वा। स्रुचः। सम्ऽअस्थिरन् ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स आहुतो वि रोचतेऽग्निरीळेन्यो गिरा। स्रुचा प्रतीकमज्यते॥ ३॥

सः। आऽहुतः। वि। रोचते। अग्निः। ईळेन्यः। गिरा। स्रुचा। प्रतीकम्। अज्यते॥ ३॥

घृतेनाग्निः समज्यते मधुप्रतीक आहुतः। रोचमानो विभावसुः॥ ४॥

घृतेन। अग्निः। सम्। अज्यते। मधुऽप्रतीकः। आऽहुतः। रोचमानः। विभाऽवसुः॥ ४॥

जरमाणः समिध्यसे देवेभ्यो हव्यवाहन। तं त्वा हवन्त मर्त्याः॥ ५॥ [२४]

जरमाणः। सम्। इध्यसे। देवेभ्यः। हव्यऽवाहन। तम्। त्वा। हवन्त। मर्त्याः॥ ५॥

तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत। अदाभ्यं गृहपतिम्॥ ६॥

तम्। मर्ताः। अमर्त्यम्। घृतेन। अग्निम्। सपर्यत। अदाभ्यम्। गृहऽपतिम्॥ ६॥

अदाभ्येन शोचिषाग्ने रक्षस्त्वं दह। गोपा ऋतस्य दीदिहि॥ ७॥

अदाभ्येन। शोचिषा। अग्ने। रक्षः। त्वम्। दह। गोपाः। ऋतस्य। दीदिहि॥ ७॥

स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत्॥ ८॥

सः। त्वम्। अग्ने। प्रतीकेन। प्रति। ओष। यातुऽधान्यः। उरुऽक्षयेषु। दीद्यत्॥ ८॥

तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे। यजिष्ठं मानुषे जने॥ ९॥ [२५]

तम्। त्वा। गीःऽभिः। उरुऽक्षयाः। हव्यऽवाहम्। सम्। ईधिरे। यजिष्ठम्। मानुषे। जने॥ ९॥

[११९] [१३ लब ऐन्द्रः। आत्मा (इन्द्रः)। गायत्री।]

इति वा इति मे मनो गामश्वं सनुयामिति। कुवित्सोमस्यापामिति॥ १॥

इति। वै। इति। मे। मनः। गाम्। अश्वम्। सनुयाम्। इति। कुवित्। सोमस्य। अपाम्। इति॥ १॥

प्र वाताइव दोधत उन्मा पीता अयंसत। कुवित्सोमस्यापामिति॥ २॥

प्र। वाताःऽइव। दोधतः। उत्। मा। पीताः। अयंसत। कुवित्। सोमस्य। अपाम्। इति॥ २॥

उन्मा पीता अयंसत रथमश्वाइवाशवः। कुवित्सोमस्यापामिति॥ ३॥

उत्। मा। पीताः। अयंसत। रथम्। अश्वाःऽइव। आशवः। कुवित्। सोमस्य। अपाम्। इति॥ ३॥

उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम्। कुवित्सोमस्यापामिति॥ ४॥

उप। मा। मतिः। अस्थित। वाश्रा। पुत्रम्ऽइव। प्रियम्। कुवित्। सोमस्य। अपाम्। इति॥ ४॥

अहं तष्टेव वन्धुरं पर्यचामि हृदा मतिम्। कुवित्सोमस्यापामिति॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अहम् । तष्टाऽइव । वन्धुरम् । परि । अचामि । हृदा । मतिम् । कुवित् । सोमस्य । अपाम् । इति ॥ ५ ॥

नहि मे अक्षिपच्चनाच्छान्त्सुः पञ्च कृष्टयः । कुवित्सोमस्यापामिति ॥ ६ ॥ [२६]

नहि । मे । अक्षिऽपत् । चन । अच्छान्त्सुः । पञ्च । कृष्टयः । कुवित् । सोमस्य । अपाम् । इति ॥ ६ ॥

नहि मे रोदसी उभे अन्यं पक्षं चन प्रति । कुवित्सोमस्यापामिति ॥ ७ ॥

नहि । मे । रोदसी इति । उभे इति । अन्यम् । पक्षम् । चन । प्रति । कुवित् । सोमस्य । अपाम् । इति ॥ ७ ॥

अभि द्यां महिना भुवमभी३मां पृथिवीं महीम् । कुवित्सोमस्यापामिति ॥ ८ ॥

अभि । द्याम् । महिना । भुवम् । अभि । इमाम् । पृथिवीम् । महीम् । कुवित् । सोमस्य । अपाम् । इति ॥ ८ ॥

हन्ताहं पृथिवीमिमां नि दधानीह वेह वा । कुवित्सोमस्यापामिति ॥ ९ ॥

हन्त । अहम् । पृथिवीम् । इमाम् । नि । दधानि । इह । वा । इह । वा । कुवित् । सोमस्य । अपाम् । इति ॥ ९ ॥

ओषमित्पृथिवीमहं जङ्घनानीह वेह वा । कुवित्सोमस्यापामिति ॥ १० ॥

ओषम् । इत् । पृथिवीम् । अहम् । जङ्घनानि । इह । वा । इह । वा । कुवित् । सोमस्य । अपाम् । इति ॥ १० ॥

दिवि मे अन्यः पक्षो३धो अन्यमचीकृषम् । कुवित्सोमस्यापामिति ॥ ११ ॥

दिवि । मे । अन्यः । पक्षः । अधः । अन्यम् । अचीकृषम् । कुवित् । सोमस्य । अपाम् । इति ॥ ११ ॥

अहमस्मि महामहोऽभिनभ्यमुदीषितः । कुवित्सोमस्यापामिति ॥ १२ ॥

अहम् । अस्मि । महाऽमहः । अभिऽनभ्यम् । उत्ऽईषितः । कुवित् । सोमस्य । अपाम् । इति ॥ १२ ॥

गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः । कुवित्सोमस्यापामिति ॥ १३ ॥ [२७]

गृहः । यामि । अरम्ऽकृतः । देवेभ्यः । हव्यऽवाहनः । कुवित् । सोमस्य । अपाम् । इति ॥ १३ ॥

इत्याश्वलायन-संहितायाम्

अष्टमाष्टके

षष्ठोऽध्यायः

समाप्तः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथाष्टमाष्टके सप्तमोऽध्यायः ॥

[१२०] [९ बृहद्दिव आथर्वणः। इन्द्रः। त्रिष्टुप्।]

तदिदा॑स॒ भुव॑नेषु॒ ज्येष्ठं॒ यतो॑ ज॒ज्ञ उ॒ग्रस्त्वे॒षनृ॑म्णः।

स॒द्यो ज॑ज्ञा॒नो नि रि॑णाति॒ शत्रू॒ननु॒ यं विश्वे॒ मद॒न्त्यूमाः॑ ॥ १ ॥

तत्। इत्। आ॒स॒। भुव॑नेषु। ज्येष्ठ॑म्। यतः॑। ज॒ज्ञे। उ॒ग्रः। त्वे॒षऽनृ॑म्णः।

स॒द्यः। ज॒ज्ञा॒नः। नि। रि॒णा॒ति॒। शत्रू॑न्। अनु॑। यम्। विश्वे॑। मद॑न्ति। ऊमाः॑ ॥ १ ॥

वा॒वृ॒धा॒नः शव॑सा॒ भूर्यो॑जाः॒ शत्रु॑र्दा॒साय॑ भि॒यसं॑ दधाति।

अव्य॑नच्च व्य॒नच्च॒ सस्नि॒ सं ते॑ नवन्त॒ प्रभृ॑ता॒ मदे॑षु ॥ २ ॥

व॒वृ॒धा॒नः। शव॑सा। भूरि॑ऽओजाः। शत्रुः॑। दा॒साय॑। भि॒यस॑म्। द॒धा॒ति॒।

अवि॑ऽअनत्। च॒। वि॒ऽअ॒नत्। च॒। सस्नि॑। सम्। ते॒। न॒व॒न्त॒। प्र॒ऽभृ॑ता। मदे॑षु ॥ २ ॥

त्वे क्रतु॒मपि॑ वृञ्जन्ति॒ विश्वे॒ द्विर्यदे॒ते त्रिर्भव॒न्त्यूमाः॑।

स्वा॒दोः स्वादी॑यः स्वा॒दुना॑ सृजा॒ सम॒दः सु मधु॒ मधु॑ना॒भि योधीः॑ ॥ ३ ॥

त्वे इति॑। क्रतु॑म्। अपि॑। वृ॒ञ्ज॒न्ति॒। विश्वे॑। द्विः। यत्। ए॒ते। त्रिः। भव॑न्ति। ऊमाः॑।

स्वा॒दोः। स्वादी॑यः। स्वा॒दुना॑। सृ॒ज॒। सम्। अ॒दः। सु। मधु॑। मधु॑ना। अ॒भि। यो॒धीः॒ ॥ ३ ॥

इति॑ चि॒द्धि त्वा॒ धना॒ जय॑न्तं॒ मदे॑मदे अनु॒मद॑न्ति॒ विप्राः॑।

ओजी॑यो धृष्णो स्थि॒रमा त॑नुष्व॒ मा त्वा॑ दभन्यातु॒धाना॑ दु॒रेवाः॑ ॥ ४ ॥

इति॑। चि॒त्। हि। त्वा॒। धना॑। जय॑न्तम्। मदे॑ऽमदे। अ॒नु॒ऽमद॑न्ति। विप्राः॑।

ओजी॑यः। धृ॒ष्णो॒ इति॑। स्थि॒रम्। आ। त॒नु॒ष्व॒। मा। त्वा॒। द॒भ॒न्। या॒तु॒ऽधानाः॑। दुः॒ऽएवाः॑ ॥ ४ ॥

त्वया॑ व॒यं शा॑शद्म॒हे रणे॑षु प्र॒पश्य॑न्तो यु॒धेन्या॑नि॒ भूरि॑।

चो॒दया॑मि त॒ आयु॑धा॒ वचो॑भिः॒ सं ते॑ शिशामि॒ ब्रह्म॑णा॒ वयां॑सि ॥ ५ ॥ [१]

त्वया॑। व॒यम्। शा॒श॒द्म॒हे। रणे॑षु। प्र॒ऽपश्य॑न्तः। यु॒धेन्या॑नि। भूरि॑।

चो॒दया॑मि। ते॒। आयु॑धा। वचः॑ऽभिः। सम्। ते॒। शि॒शा॒मि॒। ब्रह्म॑णा। वयां॑सि ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्तुषेय्यं पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानाम्।

आ दर्षते शवसा सप्त दानून् प्र साक्षते प्रतिमानानि भूरि॥ ६॥

स्तुषेय्यम्। पुरुऽवर्पसम्। ऋभ्वम्। इनऽतमम्। आप्त्यम्। आप्त्यानाम्।

आ। दर्षते। शवसा। सप्त। दानून्। प्र। साक्षते। प्रतिऽमानानि। भूरि॥ ६॥

नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे।

आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि॥ ७॥

नि। तत्। दधिषे। अवरम्। परम्। च। यस्मिन्। आविथ। अवसा। दुरोणे।

आ। मातरा। स्थापयसे। जिगत्नू इति। अतः। इनोषि। कर्वरा। पुरूणि॥ ७॥

इमा ब्रह्म बृहद्दिवो विवक्तीन्द्राय शूषमग्रियः स्वर्षाः।

महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः॥ ८॥

इमा। ब्रह्म। बृहत्ऽदिवः। विवक्ति। इन्द्राय। शूषम्। अग्रियः। स्वःऽसाः।

महः। गोत्रस्य। क्षयति। स्वऽराजः। दुरः। च। विश्वाः। अवृणोत्। अप। स्वाः॥ ८॥

एवा महान् बृहद्दिवो अथर्वावोचत्स्वां तन्व१मिन्द्रमेव।

स्वसारो मातरिभ्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च॥ ९॥ [२]

एव। महान्। बृहत्ऽदिवः। अथर्वा। अवोचत्। स्वाम्। तन्वम्। इन्द्रम्। एव।

स्वसारः। मातरिभ्वरीः। अरिप्राः। हिन्वन्ति। च। शवसा। वर्धयन्ति। च॥ ९॥

[१२१] [१० हिरण्यगर्भः प्राजापत्यः। कः (प्रजापतिः)। त्रिष्टुप्।]

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ १॥

हिरण्यऽगर्भः। सम्। अवर्तत। अग्रे। भूतस्य। जातः। पतिः। एकः। आसीत्।

सः। दाधार। पृथिवीम्। द्याम्। उत। इमाम्। कस्मै। देवाय। हविषा। विधेम॥ १॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।

यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥ २॥

यः। आत्मऽदाः। बलऽदाः। यस्य। विश्वे। उपऽआसते। प्रऽशिषम्। यस्य। देवाः।

यस्य। छाया। अमृतम्। यस्य। मृत्युः। कस्मै। देवाय। हविषा। विधेम॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।

य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ ३॥

यः। प्राणतः। निऽमिषतः। महिऽत्वा। एकः। इत्। राजा। जगतः। बभूव।

यः। ईशे। अस्य। द्विऽपदः। चतुःऽपदः। कस्मै। देवाय। हविषा। विधेम॥ ३॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।

यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥ ४॥

यस्य। इमे। हिमऽवन्तः। महिऽत्वा। यस्य। समुद्रम्। रसया। सह। आहुः।

यस्य। इमाः। प्रऽदिशः। यस्य। बाहू इति। कस्मै। देवाय। हविषा। विधेम॥ ४॥

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः।

यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥ ५॥ [३]

येन। द्यौः। उग्रा। पृथिवी। च। दृळ्हा। येन। स्वऽरिति स्वः। स्तभितम्। येन। नाकः।

यः। अन्तरिक्षे। रजसः। विऽमानः। कस्मै। देवाय। हविषा। विधेम॥ ५॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।

यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥ ६॥

यम्। क्रन्दसी इति। अवसा। तस्तभाने इति। अभि। ऐक्षेताम्। मनसा। रेजमाने इति।

यत्र। अधि। सूरः। उत्ऽइतः। विऽभाति। कस्मै। देवाय। हविषा। विधेम॥ ६॥

आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।

ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेय॥ ७॥

आपः। ह। यत्। बृहतीः। विश्वम्। आयन्। गर्भम्। दधानाः। जनयन्तीः। अग्निम्।

ततः। देवानाम्। सम्। अवर्तत। असुः। एकः। कस्मै। देवाय। हविषा। विधेम॥ ७॥

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम्।

यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम॥ ८॥

यः। चित्। आपः। महिना। परिऽअपश्यत्। दक्षम्। दधानाः। जनयन्तीः। यज्ञम्।

यः। देवेषु। अधि। देवः। एकः। आसीत्। कस्मै। देवाय। हविषा। विधेम॥ ८॥

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।

यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम॥ ९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा। नः॒। हिं॒सी॒त्। ज॒नि॒ता। यः। पृ॒थि॒व्याः। यः। वा॒। दिव॑म्। स॒त्यऽध॑र्मा। ज॒जान॑।
यः। च॒। अ॒पः। च॒न्द्राः। बृ॒ह॒तीः। ज॒जान॑। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॒॥ ९॥

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव।
यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒यं स्या॑म॒ पत॑यो रयी॒णाम्॥ १०॥ [४]

प्रजा॑ऽपते। न। त्वत्। ए॒तानि॑। अ॒न्यः। विश्वा॑। जा॒तानि॑। परि॑। ता। ब॒भू॒व॒।
यत्ऽका॑माः। ते॒। जु॒हु॒मः। तत्। नः॒। अ॒स्तु॒। व॒यम्। स्या॒म॒। पत॑यः। र॒यी॒णाम्॥ १०॥

[१२२] [८ चित्रमहा वासिष्ठः। अग्निः। जगती; १, ५ त्रिष्टुप्।]

वसुं॒ न चि॒त्रम॑हसं गृणीषे वा॒मं शेव॒मति॑थिमद्विषे॒ण्यम्।
स रा॑सते शुरुधो॑ वि॒श्वधा॑यसो॒ऽग्निर्होता॑ गृ॒हप॑तिः सुवीर्य॑म्॥ १॥

वसु॑म्। न। चि॒त्रऽम॑हसम्। गृ॒णी॒षे॒। वा॒मम्। शेव॑म्। अति॑थिम्। अ॒द्वि॒षे॒ण्यम्।
सः। रा॒स॒ते॒। शु॒रुध॑ः। वि॒श्वऽधा॑यसः। अ॒ग्निः। होता॑। गृ॒हऽप॑तिः। सु॒ऽवीर्य॑म्॥ १॥

जुषा॒णो अ॑ग्ने॒ प्रति॑ हर्य मे॒ वचो॒ विश्वा॑नि वि॒द्वान् व॒युना॑नि सुक्रतो।
घृत॑निर्णि॒ग्ब्रह्म॑णे गा॒तुमेर॑य॒ तव॑ दे॒वा अ॑जनय॒न्ननु॑ व्र॒तम्॥ २॥

जु॒षा॒णः। अ॒ग्ने॒। प्रति॑। ह॒र्य॒। मे॒। वच॑ः। विश्वा॑नि। वि॒द्वान्। व॒युना॑नि। सु॒क्र॒तो॒ इति॑ सु॒ऽक्रतो।
घृत॑ऽनिर्निक्। ब्रह्म॑णे। गा॒तुम्। आ। ई॒र॒य॒। तव॑। दे॒वाः। अ॒ज॒न॒य॒न्। अनु॑। व्र॒तम्॥ २॥

स॒प्त धामा॑नि परि॒यन्नम॑र्त्यो॒ दाश॑द्दा॒शुषे॑ सु॒कृते॑ मामहस्व।
सु॒वीरे॑ण र॒यिणा॑ग्ने स्वा॒भुवा॒ यस्त॒ आन॑ट् स॒मिधा॒ तं जु॑षस्व॥ ३॥

स॒प्त। धामा॑नि। प॒रि॒ऽयन्। अम॑र्त्यः। दाश॑त्। दा॒शुषे॑। सु॒ऽकृते॑। म॒म॒ह॒स्व॒।
सु॒ऽवीरे॑ण। र॒यिणा॑। अ॒ग्ने॒। सु॒ऽआ॒भुवा॑। यः। ते॒। आन॑ट्। स॒म्ऽइधा॑। तम्। जु॒ष॒स्व॒॥ ३॥

य॒ज्ञस्य॑ के॒तुं प्र॑थ॒मं पु॒रोहि॑तं ह॒विष्म॑न्त ईळते स॒प्त वा॒जिन॑म्।
शृ॒ण्वन्त॑म॒ग्निं घृ॒तपृ॑ष्ठमु॒क्षणं॑ पृ॒णन्तं॑ दे॒वं पृ॑ण॒ते सु॒वीर्य॑म्॥ ४॥

य॒ज्ञस्य॑। के॒तुम्। प्र॒थ॒मम्। पु॒रःऽहि॑तम्। ह॒विष्म॑न्तः। ई॒ळ॒ते॒। स॒प्त। वा॒जिन॑म्।
शृ॒ण्वन्त॑म्। अ॒ग्निम्। घृ॒तऽपृ॑ष्ठम्। उ॒क्षण॑म्। पृ॒णन्त॑म्। दे॒वम्। पृ॒ण॒ते। सु॒ऽवीर्य॑म्॥ ४॥

त्वं दू॒तः प्र॑थ॒मो वरे॑ण्य॒ः स हू॒यमा॑नो अ॒मृता॑य मत्स्व।
त्वां म॑र्जयन्म॒रुतो॑ दा॒शुषो॑ गृ॒हे त्वां स्तोमे॑भि॒र्भृग॑वो॒ वि रु॑रुचुः॥ ५॥ [५]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वम्। दूतः। प्रथमः। वरेण्यः। सः। हूयमानः। अमृताय। मत्स्व।

त्वाम्। मर्जयन्। मरुतः। दाशुषः। गृहे। त्वाम्। स्तोमेभिः। भृगवः। वि। रुरुचुः॥ ५॥

इषं दुहन्त्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो।

अग्ने घृतस्नुस्त्रिरृतानि दीद्यद्वर्तिर्यज्ञं परियन्त्सुक्रतूयसे॥ ६॥

इषम्। दुहन्। सुऽदुघाम्। विश्वऽधायसम्। यज्ञऽप्रिये। यजमानाय। सुक्रतो इति सुक्रतो।

अग्ने। घृतऽस्नुः। त्रिः। ऋतानि। दीद्यत्। वर्तिः। यज्ञम्। परिऽयन्। सुक्रतुऽयसे॥ ६॥

त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः।

त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजन्तो अध्वरे॥ ७॥

त्वाम्। इत्। अस्याः। उषसः। विऽउष्टिषु। दूतम्। कृण्वानाः। अयजन्त। मानुषाः

त्वाम्। देवाः। महयाय्याय। ववृधुः। आज्यम्। अग्ने। निऽमृजन्तः। अध्वरे॥ ७॥

नि त्वा वसिष्ठा अह्वन्त वाजिनं गृणन्तो अग्ने विदथेषु वेधसः।

रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः॥ ८॥ [६]

नि। त्वा। वसिष्ठाः। अह्वन्त। वाजिनम्। गृणन्तः। अग्ने। विदथेषु। वेधसः।

रायः। पोषम्। यजमानेषु। धारय। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥

[१२३] [८ वेनो भार्गवः। वेनः। त्रिष्टुप्।]

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने।

इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥ १॥

अयम्। वेनः। चोदयत्। पृश्निऽगर्भाः। ज्योतिःऽजरायुः। रजसः। विऽमाने।

इमाम्। अपाम्। सम्ऽगमे। सूर्यस्य। शिशुम्। न। विप्राः। मतिऽभिः। रिहन्ति॥ १॥

समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शि।

ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः॥ २॥

समुद्रात्। ऊर्मिम्। उत्। इयर्ति। वेनः। नभःऽजाः। पृष्ठम्। हर्यतस्य। दर्शि।

ऋतस्य। सानौ। अधि। विष्टपि। भ्राट्। समानम्। योनिम्। अभि। अनूषत। व्राः॥ २॥

समानं पूर्वीरभि वावशानास्तिष्ठन् वत्सस्य मातरः सनीळाः।

ऋतस्य सानावधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणीः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुमानम्। पूर्वीः। अभि। वावशानाः। तिष्ठन्। वत्सस्य। मातरः। स॰नीळाः।
ऋतस्य। सानौ। अधि। चुक्रमाणाः। रिहन्ति। मध्वः। अमृतस्य। वाणीः॥ ३॥

जानन्तो रूपमकृपन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन्।
ऋतेन यन्तो अधि सिन्धुमस्थुर्विदद्गन्धर्वो अमृतानि नाम॥ ४॥
जानन्तः। रूपम्। अकृपन्त। विप्राः। मृगस्य। घोषम्। महिषस्य। हि। ग्मन्।
ऋतेन। यन्तः। अधि। सिन्धुम्। अस्थुः। विदत्। गन्धर्वः। अमृतानि। नाम॥ ४॥

अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन्।
चरत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पक्षे हिरण्यये स वेनः॥ ५॥ [७]
अप्सराः। जारम्। उप॰सिष्मियाणा। योषा। बिभर्ति। परमे। वि॰ओमन्।
चरत्। प्रियस्य। योनिषु। प्रियः। सन्। सीदत्। पक्षे। हिरण्यये। सः। वेनः॥ ५॥

नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्॥ ६॥
नाके। सु॰पर्णम्। उप। यत्। पतन्तम्। हृदा। वेनन्तः। अभि। अचक्षत। त्वा।
हिरण्य॰पक्षम्। वरुणस्य। दूतम्। यमस्य। योनौ। शकुनम्। भुरण्युम्॥ ६॥

ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ् चित्रा बिभ्रदस्यायुधानि।
वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नाम जनत प्रियाणि॥ ७॥
ऊर्ध्वः। गन्धर्वः। अधि। नाके। अस्थात्। प्रत्यङ्। चित्रा। बिभ्रत्। अस्य। आयुधानि।
वसानः। अत्कम्। सुरभिम्। दृशे। कम्। स्वः। न। नाम। जनत। प्रियाणि॥ ७॥

द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन्।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि॥ ८॥ [८]
द्रप्सः। समुद्रम्। अभि। यत्। जिगाति। पश्यन्। गृध्रस्य। चक्षसा। वि॰धर्मन्।
भानुः। शुक्रेण। शोचिषा। चकानः। तृतीये। चक्रे। रजसि। प्रियाणि॥ ८॥

[१२४] [९ अग्निः, १, ५-९ अग्नि-वरुण-सोमाः। १ अग्निः; २-४ अग्नेरात्मा; ५, ७-८ वरुणः; ६ सोमः, ९ इन्द्रः। त्रिष्टुप्, ७ जगती।]

इमं नो अग्न उप यज्ञमेहि पञ्चयामं त्रिवृतं सप्ततन्तुम्।
असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घं तम आशयिष्ठाः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमम्। नः। अग्ने। उप। यज्ञम्। आ। इहि। पञ्चऽयामम्। त्रिऽवृतम्। सप्तऽतन्तुम्।
असः। हव्यऽवाट्। उत। नः। पुरःऽगाः। ज्योक्। एव। दीर्घम्। तमः। आ। अशयिष्ठाः॥ १॥

अदेवाद्देवः प्रचता गुहा यन् प्रपश्यमानो अमृतत्वमेमि।
शिवं यत्सन्तमशिवो जहामि स्वात्सख्यादरणीं नाभिमेमि॥ २॥

अदेवात्। देवः। प्रऽचता। गुहा। यन्। प्रऽपश्यमानः। अमृतऽत्वम्। एमि।
शिवम्। यत्। सन्तम्। अशिवः। जहामि। स्वात्। सख्यात्। अरणीम्। नाभिम्। एमि॥ २॥

पश्यन्नन्यस्या अतिथिं वयाया ऋतस्य धाम वि मिमे पुरूणि।
शंसामि पित्रे असुराय शेवमयज्ञियाद्यज्ञियं भागमेमि॥ ३॥

पश्यन्। अन्यस्याः। अतिथिम्। वयायाः। ऋतस्य। धाम। वि। मिमे। पुरूणि।
शंसामि। पित्रे। असुराय। शेवम्। अयज्ञियात्। यज्ञियम्। भागम्। एमि॥ ३॥

बह्वीः समा अकरमन्तरस्मिन्निन्द्रं वृणानः पितरं जहामि।
अग्निः सोमो वरुणस्ते च्यवन्ते पर्यावर्द्राष्ट्रं तदवाम्यायन्॥ ४॥

बह्वीः। समाः। अकरम्। अन्तः। अस्मिन्। इन्द्रम्। वृणानः। पितरम्। जहामि।
अग्निः। सोमः। वरुणः। ते। च्यवन्ते। परिऽआवर्त्। राष्ट्रम्। तत्। अवामि। आऽयन्॥ ४॥

निर्माया उ त्ये असुरा अभूवन् त्वं च मा वरुण कामयासे।
ऋतेन राजन्ननृतं विविञ्चन् मम राष्ट्रस्याधिपत्यमेहि॥ ५॥ [९]

निःऽमायाः। ऊँ इति। त्ये। असुराः। अभूवन्। त्वम्। च। मा। वरुण। कामयासे।
ऋतेन। राजन्। अनृतम्। विऽविञ्चन्। मम। राष्ट्रस्य। अधिऽपत्यम्। आ। इहि॥ ५॥

इदं स्वरिदमिदास वाममयं प्रकाश उर्व१न्तरिक्षम्।
हनाव वृत्रं निरेहि सोम हविष्ट्वा सन्तं हविषा यजाम॥ ६॥

इदम्। स्वः। इदम्। इत्। आस। वामम्। अयम्। प्रऽकाशः। उरु। अन्तरिक्षम्।
हनाव। वृत्रम्। निःऽएहि। सोम। हविः। त्वा। सन्तम्। हविषा। यजाम॥ ६॥

कविः कवित्वा दिवि रूपमासजदप्रभूती वरुणो निरपः सृजत्।
क्षेमं कृण्वाना जनयो न सिन्धवस्ता अस्य वर्णं शुचयो भरिभ्रति॥ ७॥

कविः। कविऽत्वा। दिवि। रूपम्। आ। असजत्। अप्रऽभूती। वरुणः। निः। अपः। सृजत्।
क्षेमम्। कृण्वानाः। जनयः। न। सिन्धवः। ताः। अस्य। वर्णम्। शुचयः। भरिभ्रति॥ ७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता अस्य ज्येष्ठमिन्द्रियं सचन्ते ता ईमा क्षेति स्वधया मदन्तीः।

ता ईं विशो न राजानं वृणाना बीभत्सुवो अप वृत्रादतिष्ठन्॥ ८॥

ताः। अस्य। ज्येष्ठम्। इन्द्रियम्। सचन्ते। ताः। ईम्। आ। क्षेति। स्वधया। मदन्तीः।

ताः। ईम्। विशः। न। राजानम्। वृणानाः। बीभत्सुवः। अप। वृत्रात्। अतिष्ठन्॥ ८॥

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम्। [१०]

अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं नि चिक्युः कवयो मनीषा॥ ९॥

बीभत्सूनाम्। सऽयुजम्। हंसम्। आहुः। अपाम्। दिव्यानाम्। सख्ये। चरन्तम्।

अनुऽस्तुभम्। अनु। चर्चूर्यमाणम्। इन्द्रम्। नि। चिक्युः। कवयः। मनीषा॥ ९॥

[१२५] [८ वागाम्भृणी। आत्मा। त्रिष्टुप्, २ जगती।]

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥ १॥

अहम्। रुद्रेभिः। वसुऽभिः। चरामि। अहम्। आदित्यैः। उत। विश्वेऽदेवैः।

अहम्। मित्रावरुणा। उभा। बिभर्मि। अहम्। इन्द्राग्नी इति। अहम्। अश्विना। उभा॥ १॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्।

अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते॥ २॥

अहम्। सोमम्। आहनसम्। बिभर्मि। अहम्। त्वष्टारम्। उत। पूषणम्। भगम्।

अहम्। दधामि। द्रविणम्। हविष्मते। सुप्रऽअव्ये। यजमानाय। सुन्वते॥ २॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।

तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥ ३॥

अहम्। राष्ट्री। सम्ऽगमनी। वसूनाम्। चिकितुषी। प्रथमा। यज्ञियानाम्।

ताम्। मा। देवाः। वि। अदधुः। पुरुऽत्रा। भूरिऽस्थात्राम्। भूरि। आऽवेशयन्तीम्॥ ३॥

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम्।

अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि॥ ४॥

मया। सः। अन्नम्। अत्ति। यः। विऽपश्यति। यः। प्राणिति। यः। ईम्। शृणोति। उक्तम्।

अमन्तवः। माम्। ते। उप। क्षियन्ति। श्रुधि। श्रुत। श्रद्धिऽवम्। ते। वदामि॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥ ५॥ [११]

अहम्। एव। स्वयम्। इदम्। वदामि। जुष्टम्। देवेभिः। उत। मानुषेभिः।
यम्। कामये। तम्ऽतम्। उग्रम्। कृणोमि। तम्। ब्रह्माणम्। तम्। ऋषिम्। तम्। सुऽमेधाम्॥ ५॥

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उं।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश॥ ६॥

अहम्। रुद्राय। धनुः। आ। तनोमि। ब्रह्मऽद्विषे। शरवे। हन्तवै। ऊँ इति।
अहम्। जनाय। सऽमदम्। कृणोमि। अहम्। द्यावापृथिवी इति। आ। विवेश॥ ६॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व१न्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि॥ ७॥

अहम्। सुवे। पितरम्। अस्य। मूर्धन्। मम। योनिः। अप्ऽसु। अन्तरिति। समुद्रे।
ततः। वि। तिष्ठे। भुवना। अनु। विश्वा। उत। अमूम्। द्याम्। वर्ष्मणा। उप। स्पृशामि॥ ७॥

अहमेव वातइव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव॥ ८॥ [१२]

अहम्। एव। वातःऽइव। प्र। वामि। आऽरभमाणा। भुवनानि। विश्वा।
परः। दिवा। परः। एना। पृथिव्या। एतावती। महिना। सम्। बभूव॥ ८॥

[१२६] [८ कुल्मलबर्हिषः शैलूषिः, अंहोमुग्वा वामदेव्यः। विश्वे देवाः। उपरिष्टाद्बृहती, ८ त्रिष्टुप्।]

न तमंहो न दुरितं देवासो अष्ट मर्त्यम्।
सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः॥ १॥

न। तम्। अंहः। न। दुःऽइतम्। देवासः। अष्ट। मर्त्यम्।
सऽजोषसः। यम्। अर्यमा। मित्रः। नयन्ति। वरुणः। अति। द्विषः॥ १॥

तद्धि वयं वृणीमहे वरुण मित्रार्यमन्। येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः॥ २॥

तत्। हि। वयम्। वृणीमहे। वरुण। मित्र। अर्यमन्।
येन। निः। अंहसः। यूयम्। पाथ। नेथ। च। मर्त्यम्। अति। द्विषः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः॥ ३॥

ते। नूनम्। नः। अयम्। ऊतये। वरुणः। मित्रः। अर्यमा।
नयिष्ठाः। ऊँ इति। नः। नेषणि। पर्षिष्ठाः। ऊँ इति। नः। पर्षणि। अति। द्विषः॥ ३॥

यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा।
युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः॥ ४॥

यूयम्। विश्वम्। परि। पाथ। वरुणः। मित्रः। अर्यमा।
युष्माकम्। शर्मणि। प्रिये। स्याम। सुऽप्रनीतयः। अति। द्विषः॥ ४॥

आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा।
उग्रं मरुद्भी रुद्रं हुवेमेन्द्रमग्निं स्वस्तयेऽति द्विषः॥ ५॥

आदित्यासः। अति। स्रिधः। वरुणः। मित्रः। अर्यमा।
उग्रम्। मरुत्ऽभिः। रुद्रम्। हुवेम। इन्द्रम्। अग्निम्। स्वस्तये। अति। द्विषः॥ ५॥

नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा।
अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः॥ ६॥

नेतारः। ऊँ इति। सु। नः। तिरः। वरुणः। मित्रः। अर्यमा।
अति। विश्वानि। दुःऽइता। राजानः। चर्षणीनाम्। अति। द्विषः॥ ६॥

शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा।
शर्म यच्छन्तु सप्रथ आदित्यासो यदीमहे अति द्विषः॥ ७॥

शुनम्। अस्मभ्यम्। ऊतये। वरुणः। मित्रः। अर्यमा।
शर्म। यच्छन्तु। सऽप्रथः। आदित्यासः। यत्। ईमहे। अति। द्विषः॥ ७॥

यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः।
एवो ष्व१स्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः॥ ८॥ [१३]

यथा। ह। त्यत्। वसवः। गौर्यम्। चित्। पदि। सिताम्। अमुञ्चत। यजत्राः।
एवो इति। सु। अस्मत्। मुञ्चत। वि। अंहः। प्र। तारि। अग्ने। प्रऽतरम्। नः। आयुः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१२७] [८ कुशिकः सौभरः, रात्रिर्वा भारद्वाजी। रात्रिः। गायत्री।]

रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः। विश्वा अधि श्रियोऽधित॥ १॥

रात्री। वि। अख्यत्। आऽयती। पुरुऽत्रा। देवी। अक्षऽभिः। विश्वाः। अधि। श्रियः। अधित॥ १॥

ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः। ज्योतिषा बाधते तमः॥ २॥

आ। उरु। अप्राः। अमर्त्या। निऽवतः। देवी। उत्ऽवतः। ज्योतिषा। बाधते। तमः॥ २॥

निरु स्वसारमस्कृतोषसं देव्यायती। अपेदु हासते तमः॥ ३॥

निः। ऊँ इति। स्वसारम्। अकृत। उषसम्। देवी। आऽयती॥ अप। इत्। ऊँ इति। हासते। तमः॥ ३॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि। वृक्षे न वसतिं वयः॥ ४॥

सा। नः। अद्य। यस्याः। वयम्। नि। ते। यामन्। अविक्ष्महि। वृक्षे। न। वसतिम्। वयः॥ ४॥

नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः। नि श्येनासश्चिदर्थिनः॥ ५॥

नि। ग्रामासः। अविक्षत। नि। पत्ऽवन्तः। नि। पक्षिणः। नि। श्येनासः। चित्। अर्थिनः॥ ५॥

यावया वृक्य१ं वृकं यवय स्तेनमूर्म्ये। अथा नः सुतरा भव॥ ६॥

यवय। वृक्यम्। वृकम्। यवय। स्तेनम्। ऊर्म्ये। अथ। नः। सुऽतरा। भव॥ ६॥

उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित। उष ऋणेव यातय॥ ७॥

उप। मा। पेपिशत्। तमः। कृष्णम्। विऽअक्तम्। अस्थित। उषः। ऋणाऽइव। यातय॥ ७॥

उप ते गाइवाकरं वृणीष्व दुहितर्दिवः। रात्रि स्तोमं न जिग्युषे॥ ८॥ [१४]

उप। ते। गाःऽइव। आ। अकरम्। वृणीष्व। दुहितः। दिवः। रात्रि। स्तोमम्। न। जिग्युषे॥ ८॥

*[१२८] [८ कुशिकः सौभरः, रात्रिर्वा भारद्वाजी। रात्रिस्तवम्। २-६, ८-९, १४-१५, २२-२३ अनुष्टुभः; १, १०-१३, १७-२० बृहत्यः; ७ त्रिष्टुप्; १६ पंक्तिः; २१ अतिजगती।]

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः॥ १॥ *

आ। रात्रि। पार्थिवम्। रजः। पितुः। अप्रायि। धामऽभिः।
दिवः। सदांसि। बृहती। वि। तिष्ठसे। आ। त्वा। इषम्। वर्तते। तमः॥ १॥

ये ते रात्रि नृचक्षसो युक्तासो नवतिर्नव। अशीतिः सन्त्वष्टा उतो ते सप्त सप्ततिः॥ २॥ *

ये। ते। रात्रि। नृऽचक्षसः। युक्तासः। नवतिः। नव।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अशीतिः। सन्तु। अष्टा। उतो इति। ते। सप्त। सप्ततिः॥ २॥

रात्रीं प्र पद्ये जननीं सर्वभूतनिवेशनीम्। भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम्॥ ३॥ ★

रात्रीम्। प्र। पद्ये। जननीम्। सर्वऽभूतनिवेशनीम्।

भद्राम्। भगऽवतीम्। कृष्णाम्। विश्वस्य। जगतः। निशाम्॥ ३॥

संवेशनीं संयमनीं ग्रहनक्षत्रमालिनीम्। प्रपन्नोऽहं शिवां रात्रीं भद्रे पारमशीमहि॥ ४॥ ★

सम्ऽवेशनीम्। सम्ऽयमनीम्। ग्रहनक्षत्रऽमालिनीम्।

प्रऽपन्नः। अहम्। शिवाम्। रात्रीम्। भद्रे। पारम्। अशीमहि॥ ४॥

दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे। अग्निचोरनिपातेषु सर्वग्रहनिवारणे॥ ५॥ ★

दुःऽगेषु। विऽसमे। घोरे। सम्ऽग्रामे। रिपुऽसङ्कटे। अग्निचोरऽनिपातेषु। सर्वग्रहऽनिवारणे॥ ५॥

दुर्गेषु विषमेषु त्वं संग्रामेषु वनेषु च। नमस्कृत्वा प्र पद्यन्ते तेषां नो अभयं कुरु॥ ६॥ ★

दुःऽगेषु। विऽसमेषु। त्वम्। सम्ऽग्रामेषु। वनेषु। च।

नमः। कृत्वा। प्र। पद्यन्ते। तेषाम्। नः। अभयम्। कुरु॥ ६॥

आदित्यवर्णां तपसा ज्वलन्तीं वैरोचनीं चन्द्रसहस्त्रदीप्तिम्।

देवीं कुमारीमृषिपूजितां तां तां दुर्गमातां शरणं प्र पद्ये॥ ७॥ ★

आदित्यऽवर्णाम्। तपसा। ज्वलन्तीम्। वैरोचनीम्। चन्द्रसहस्त्रऽदीप्तिम्।

देवीम्। कुमारीम्। ऋषिऽपूजिताम्। ताम्। ताम्। दुर्गऽमाताम्। शरणम्। प्र। पद्ये॥ ७॥

क्षीरेण स्नापिता दुर्गा चन्दनेनानुलेपिता। बैल्वपत्रकृतामाला नमो दुर्गे नमो नमः॥ ८॥ ★

क्षीरेण। स्नापिता। दुःऽगा। चन्दनेन। अनुऽलेपिता।

बैल्वपत्रकृताऽमाला। नमः। दुःऽगे। नमः। नमः॥ ८॥

सर्वभूतपिशाचेभ्यः सर्वशत्रुसरीसृपैः।

देवेभ्यो मानुषेभ्यश्चोभयेभ्यो माभि रक्षताम्॥ ९॥ ★ [१५]

सर्वऽभूतपिशाचेभ्यः। सर्वऽशत्रुसरीसृपैः।

देवेभ्यः। मानुषेभ्यः। च। उभयेभ्यः। मा। अभि। रक्षताम्॥ ९॥

ऋग्वेदे स्तुतया देवी काश्यपेनोदाहृता। जातवेदप्रभा गौरी जातवेदसे सुनवाम सोमम्॥ १०॥ ★

ऋक्ऽवेदे। स्तुतया। देवी। काश्यपेन। उत्ऽआहृता।

जातवेदऽप्रभा। गौरी। जातऽवेदसे। सुनवाम। सोमम्॥ १०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुरासुरैर्द्विजवैरैः पिशाचासुरराक्षसैः। अरातिभयमुत्पन्नमरातीयतो नि दहाति वेदः॥ ११॥ ★

सुरासुरैः। द्विज्ऽवैरैः। पिशाचासुरराक्षसैः।

अरातिऽभयम्। उत्ऽपन्नम्। अरातिऽयतः। नि। दहाति। वेदः॥ ११॥

राजद्वारे पथे घोरे संग्रामेषु च गौतमी। सर्वं रक्षतु दुरितं स नः पर्षदति दुर्गाणि विश्वा॥ १२॥★

राज्ऽद्वारे। पथे। घोरे। सम्ऽग्रामेषु। च। गौतमी।

सर्वम्। रक्षतु। दुःऽइतम्। सः। नः। पर्षत्। अति। दुःऽगानि। विश्वा॥ १२॥

महद्भये समुत्पन्ने स्मरन्ति च जपन्ति च। सर्वं तारयते दुर्गा नावेव सिन्धुं दुरितान्यग्निः॥ १३॥★

महद्ऽभये। सम्ऽउत्पन्ने। स्मरन्ति। च। जपन्ति। च।

सर्वम्। तारयते। दुःऽगा। नावाऽइव। सिन्धुम्। दुःऽइतानि। अग्निः॥ १३॥

य इमं स्तवं दुर्गायाः शृण्वन्ति च पठन्ति च।

त्रिषु लोकेषु विख्यातं त्रिषु लोकेषु पूजितम्॥ १४॥ ★

ये। इमम्। स्तवम्। दुःऽगायाः। शृण्वन्ति। च। पठन्ति। च।

त्रिषु। लोकेषु। विऽख्यातम्। त्रिषु। लोकेषु। पूजितम्॥ १४॥

अपुत्रो लभते पुत्रान् धनहीनो धनं लभेत्। अचक्षुर्लभते चक्षुर्बद्धो मुच्येत बन्धनात्॥ १५॥ ★

अपुत्रः। लभते। पुत्रान्। धनऽहीनः। धनम्। लभेत्।

अचक्षुः। लभते। चक्षुः। बद्धः। मुच्येत। बन्धनात्॥ १५॥

व्याधितो मुच्यते रोगादरोगी श्रियमाप्नुयात्।

सर्वं कामं त्वं ददासि नारायणि नमोऽस्तु ते। कात्यायनि नमोऽस्तु ते॥ १६॥ ★ [१६]

विऽआधितः। मुच्यते। रोगात्। अरोगी। श्रियम्। आप्नुयात्।

सर्वम्। कामम्। त्वम्। ददासि। नारायणि। नमः। अस्तु। ते। कात्यायनि। नमः। अस्तु। ते॥ १६॥

केशी वै सर्वभूतानां पञ्चमीति च नाम च।

सा मां सामेति वै देवी सर्वतः परि रक्षति सर्वतः परि रक्षत्यों नमः॥ १७॥ ★

केशी। वै। सर्वऽभूतानाम्। पञ्चमी। इति। च। नाम। च॥ सा। माम्।

साम। इति। वै। देवी। सर्वतः। परि। रक्षति। सर्वतः। परि। रक्षति। ओम्। नमः॥ १७॥

स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियाम्।

सहस्रसंमितां दुर्गां जातवेदसे सुनवाम सोमम्॥ १८॥ ★

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्तोष्यामि। प्र॰यतः। देवीम्। शरण्याम्। बह्वृच॰प्रियाम्।

सहस्र॰समिताम्। दुः॰गाम्। जात॰वेदसे। सुनवाम। सोमम्॥ १८॥

शान्त्यर्थं तद् द्विजातीनामृषिभिः समुपाश्रिता।

ऋग्वेदे त्वं समुत्पन्नारातीयतो नि दहाति वेदः॥ १९॥ ★

शान्ति॰अर्थम्। तद्। द्वि॰जातीनाम्। ऋषि॰भिः। सम्॰उपाश्रिता।

ऋक्॰वेदे। त्वम्। सम्॰उत्पन्ना। अराति॰यतः। नि। दहाति। वेदः॥ १९॥

ये त्वां देवि प्रपद्यन्ते ब्राह्मणा हव्यवाहनीम्।

अविद्यो बहुविद्यो वा स नः पर्षदति दुर्गाणि विश्वा॥ २०॥ ★

ये। त्वाम्। देवि। प्र॰पद्यन्ते। ब्राह्मणाः। हव्य॰वाहनीम्।

अविद्यः। बहु॰विद्यः। वा। सः। नः। पर्षत्। अति। दुः॰गानि। विश्वा॥ २०॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्।

दुर्गां देवीं शरणमहं प्र पद्ये सुतरसि तरसे नमः सुतरसि तरसे नमः॥ २१॥ ★

ताम्। अग्नि॰वर्णाम्। तपसा। ज्वलन्तीम्। वैरोचनीम्। कर्म॰फलेषु। जुष्टाम्॥ दुः॰गाम्। देवीम्।

शरणम्। अहम्। प्र। पद्ये। सु॰तरसि। तरसे। नमः। सु॰तरसि। तरसे। नमः॥ २१॥

दुर्गा दुर्गेषु स्थानेषु शं नो देवीरभिष्टये। इमं दुर्गास्तवं पुण्यं रात्रौरात्रौ सदा पठेत्॥ २२॥ ★

दुः॰गा। दुः॰गेषु। स्थानेषु। शम्। नः। देवीः। अभिष्टये।

इमम्। दुर्गा॰स्तवम्। पुण्यम्। रात्रौ॰रात्रौ। सदा। पठेत्॥ २२॥

रात्रिः कुशिकः सौभरो रात्रिस्तवं गायत्री। रात्रीसूक्तं जपेन्नित्यं तत्कालमुप पद्यते॥ २३॥ ★ [१७]

रात्रिः। कुशिकः। सौभरः। रात्रि॰स्तवम्। गायत्री।

रात्री॰सूक्तम्। जपेत्। नित्यम्। तत्॰कालम्। उप। पद्यते॥ २३॥

[१२९ (१२८)] [१० विहव्य आङ्गिरसः। विश्वे देवाः। त्रिष्टुप्, ९ जगती।]

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम।

मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम॥ १॥

मम। अग्ने। वर्चः। वि॰हवेषु। अस्तु। वयम्। त्वा। इन्धानाः। तन्वम्। पुषेम।

मह्यम्। नमन्ताम्। प्र॰दिशः। चतस्रः। त्वया। अधि॰अक्षेण। पृतनाः। जयेम॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ममं देवा विंहवे संन्तु सर्वं इन्द्रंवन्तो मुरुतो विष्णुंरग्निः।

ममान्तरिंक्षमुरुलोंकमस्तु मह्यं वातः पवतां कामें अस्मिन्॥ २॥

ममं। देवाः। विऽहवे। सुन्तु। सर्वे। इन्द्रऽवन्तः। मुरुतः। विष्णुंः। अग्निः।

ममं। अन्तरिंक्षम्। उरुऽलोंकम्। अस्तु। मह्यंम्। वातः। पवताम्। कामें। अस्मिन्॥ २॥

मयिं देवा द्रविंणमा यंजन्तां मय्याशीरंस्तु मयिं देवहूंतिः।

दैव्या होतांरो वनुषन्त पूर्वेऽरिंष्टाः स्याम तन्वां सुवीराः॥ ३॥

मयिं। देवाः। द्रविंणम्। आ। यजन्ताम्। मयिं। आऽशीः। अस्तु। मयिं। देवऽहूंतिः।

दैव्याः। होतांरः। वनुषन्तु। पूर्वे। अरिंष्टाः। स्याम। तन्वां। सुऽवीराः॥ ३॥

मह्यं यजन्तु मम यानिं हुव्याकूंतिः सुत्या मनंसो मे अस्तु।

एनो मा नि गां कतुमच्चुनाहं विश्वें देवासो अधिं वोचता नः॥ ४॥

मह्यंम्। यजन्तु। ममं। यानिं। हुव्या। आऽकूंतिः। सुत्या। मनंसः। मे। अस्तु।

एनंः। मा। नि। गाम्। कुतमत्। चुन। अहम्। विश्वें। देवासः। अधिं। वोचत। नः॥ ४॥

देवीः षळुर्वीरुरु नंः कृणोत विश्वें देवास इह वीरयध्वम्।

मा हांस्महि प्रजया मा तनूभिर्मा रंधाम द्विषते सोंम राजन्॥ ५॥ [१८ (१५)]

देवीः। षट्। उर्वीः। उरु। नः। कृणोत। विश्वें। देवासः। इह। वीरयध्वम्।

मा। हास्महि। प्रऽजयां। मा। तनूभिः। मा। रधाम। द्विषते। सोम। राजन्॥ ५॥

अग्नें मन्युं प्रंतिनुदन् परेंषामदंब्धो गोपाः परिं पाहि नस्त्वम्।

प्रत्यञ्चों यन्तु निगुतः पुनस्ते३मैषां चित्तं प्रबुधां वि नेंशत्॥ ६॥

अग्नें। मन्युम्। प्रतिऽनुदन्। परेंषाम्। अदंब्धः। गोपाः। परिं। पाहि। नः। त्वम्।

प्रत्यञ्चः। यन्तु। निऽगुतः। पुनरितिं। ते। अमा। एषाम्। चित्तम्। प्रऽबुधाम्। वि। नेशत्॥ ६॥

धाता धांतृणां भुवंनस्य यस्पतिर्देवं त्रातारंमभिमातिषाहम्।

इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजंमानं न्यर्थात्॥ ७॥

धाता। धातृणाम्। भुवंनस्य। यः। पतिंः। देवम्। त्रातारंम्। अभिमातिऽसहम्।

इमम्। यज्ञम्। अश्विनां। उभा। बृहस्पतिंः। देवाः। पान्तु। यजंमानम्। निऽअर्थात्॥ ७॥

उरुव्यचां नो महिषः शर्मं यंसदस्मिन् हवें पुरुहूतः पुंरुक्षुः।

स नंः प्रजायै हर्यश्व मृळयेन्द्र मा नों रीरिषो मा परां दाः॥ ८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उरुऽव्यचाः। नः। महिषः। शर्म। यंसत्। अस्मिन्। हवे। पुरुऽहूतः। पुरुऽक्षुः।

सः। नः। प्रऽजायै। हरिऽअश्व। मृळय। इन्द्र। मा। नः। रिरिषः। मा। परा। दाः॥ ८॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्।

वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥ ९॥ (१६)

ये। नः। सऽपत्नाः। अप। ते। भवन्तु। इन्द्राग्निऽभ्याम्। अव। बाधामहे। तान्।

वसवः। रुद्राः। आदित्या। उपरिऽस्पृशम्। मा। उग्रम्। चेत्तारम्। अधिऽराजम्। अक्रन्॥ ९॥

अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः।

इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा॥ १०॥ ★ [१९] {१०}

अर्वाञ्चम्। इन्द्रम्। अमुतः। हवामहे। यः। गोऽजित्। धनऽजित्। अश्वऽजित्। यः।

इमम्। नः। यज्ञम्। विऽहवे। जुषस्व। अस्य। कुर्मः। हरिऽवः। मेदिनम्। त्वा॥ १०॥

★[१३०] [११ सनकसनन्दनसनातनादयः दाक्षाः। हिरण्यम्। अनुष्टुभः (१-४, ६, १०), त्रिष्टुभः (५, ८, ९), शक्वरी (७), पङ्क्तिः (११)]

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम्। इदं हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम्॥ १॥ ★

आयुष्यम्। वर्चस्यम्। रायः। पोषम्। औद्भिदम्।

इदम्। हिरण्यम्। वर्चस्वत्। जैत्राय। आ। विशतात्। ऊँ इति। माम्॥ १॥

उच्चैर्वाजि पृतनाषाट् सभासाहं धनञ्जयम्।

सर्वाः समग्रा ऋद्धयो हिरण्येऽस्मिन्त्समाहिताः॥ २॥ ★

उच्चैः। वाजि। पृतनाऽसाट्। सभाऽसाहम्। धनम्ऽजयम्।

सर्वाः। सम्ऽअग्राः। ऋद्धयः। हिरण्ये। अस्मिन्। सम्ऽआहिताः॥ २॥

शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ। तेन मां सूर्यत्वचमकरं पूरुषु प्रियम्॥ ३॥ ★

शुनम्। अहम्। हिरण्यस्य। पितुः। मानऽइव। जग्रभ।

तेन। माम्। सूर्यऽत्वचम्। अकरम्। पूरुषु। प्रियम्॥ ३॥

सम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा। लक्ष्मी राष्ट्रस्य या मुखे तया मामिन्द्र सं सृज॥ ४॥ ★

सम्ऽराजम्। च। विऽराजम्। च। अभिष्टिः। या। च। मे। ध्रुवा।

लक्ष्मीः। राष्ट्रस्य। या। मुखे। तया। माम्। इन्द्र। सम्। सृज॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्नेः प्रजातं परि यद्धिरण्यममृतं जज्ञे अधि मर्त्येषु।

य एनद् वेद स इदेनदर्हति जरामृत्यु भवति यो बिभर्ति॥ ५॥ ★ [२०]

अग्नेः। प्रऽजातम्। परि। यत्। हिरण्यम्। अमृतम्। जज्ञे। अधि। मर्त्येषु।

यः। एनत्। वेद। सः। इत्। एनत्। अर्हति। जरा। अमृत्यु। भवति। यः। बिभर्ति॥ ५॥

यद्वेद राजा वरुणो यदु देवी सरस्वती। इन्द्रो यद् दस्युहा वेद तन्मे वर्चस आयुषे॥ ६॥ ★

यत्। वेद। राजा। वरुणः। यत्। ऊँ इति। देवी। सरस्वती।

इन्द्रः। यत्। दस्युऽहा। वेद। तत्। मे। वर्चसे। आयुषे॥ ६॥

न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्ये३तत्।

यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः। स मनुष्येषु कृणुते दीर्घमायुः॥ ७॥ ★

न। तत्। रक्षांसि। न। पिशाचाः। तरन्ति। देवानाम्। ओजः। प्रथमऽजम्। हि। एतत्।

यः। बिभर्ति। दाक्षायणम्। हिरण्यम्। सः। देवेषु। कृणुते। दीर्घम्। आयुः।

सः। मनुष्येषु। कृणुते। दीर्घम्। आयुः॥ ७॥

यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः।

तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्॥ ८॥ ★

यत्। आऽअबध्नन्। दाक्षायणाः। हिरण्यम्। शतऽअनीकाय। सुऽमनस्यमानाः।

तत्। मे। आ। बध्नामि। शतऽशारदाय। आयुष्मान्। जरत्ऽअष्टिः। यथा। असत्॥ ८॥

घृतादुल्लुप्तं मधुमत् सुवर्णं धनञ्जयं धरुणं धारयिष्णुम्।

ऋणक् सपत्नानधरांश्च कृण्वदा रोह मां महते सौभगाय॥ ९॥ ★

घृतात्। उत्ऽलुप्तम्। मधुऽमत्। सुऽवर्णम्। धनम्ऽजयम्। धरुणम्। धारयिऽष्णुम्॥

ऋणक्। सऽपत्नान्। अधरान्। च। कृण्वत्। आ। रोह। माम्। महते। सौभगाय॥ ९॥

प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु। प्रियं विश्वेषु गोप्त्रेषु मयि धेहि रुचा रुचम्॥ १०॥ ★

प्रियम्। मा। कुरु। देवेषु। प्रियम्। राजऽसु। मा। कुरु।

प्रियम्। विश्वेषु। गोप्त्रेषु। मयि। धेहि। रुचा। रुचम्॥ १०॥

अग्निर्येन विराजति सूर्यो येन विराजति।

विराड् येन विराजति तेनास्मान् ब्रह्मणस्पते विराजं समिधं कुरु॥ ११॥ ★ [२१]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निः। येन। विऽराजति। सूर्यः। येन। विऽराजति॥ विऽराट्। येन।

विऽराजति। तेन। अस्मान्। ब्रह्मणस्पते। विऽराजम्। सम्ऽइधम्। कुरु॥ ११॥

[१३१ (१२९)] [७ प्रजापतिः परमेष्ठी। भाववृत्तम्। त्रिष्टुप्।]

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।

किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥ १॥

न। असत्। आसीत्। नो इति। सत्। आसीत्। तदानीम्। न। आसीत्। रजः। नो इति। विऽओम। परः।

यत्॥ किम्। आ। अवरीवरिति। कुह। कस्य। शर्मन्। अम्भः। किम्। आसीत्। गहनम्। गभीरम्॥ १॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।

आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥ २॥

न। मृत्युः। आसीत्। अमृतम्। न। तर्हि। न। रात्र्याः। अह्नः। आसीत्। प्रऽकेतः।

आनीत्। अवातम्। स्वधया। तत्। एकम्। तस्मात्। ह। अन्यत्। न। परः। किम्। चन। आस॥ २॥

तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।

तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम्॥ ३॥

तमः। आसीत्। तमसा। गूळ्हम्। अग्रे। अप्रऽकेतम्। सलिलम्। सर्वम्। आः। इदम्।

तुच्छ्येन। आभु। अपिऽहितम्। यत्। आसीत्। तपसः। तत्। महिना। अजायत। एकम्॥ ३॥

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।

सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा॥ ४॥

कामः। तत्। अग्रे। सम्। अवर्तत। अधि। मनसः। रेतः। प्रथमम्। यत्। आसीत्।

सतः। बन्धुम्। असति। निः। अविन्दन्। हृदि। प्रतिऽइष्य। कवयः। मनीषा॥ ४॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।

रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात्॥ ५॥

तिरश्चीनः। विऽततः। रश्मिः। एषाम्। अधः। स्वित्। आसी३त्। उपरि। स्वित्। आसी३त्।

रेतःऽधा। आसन्। महिमानः। आसन्। स्वधा। अवस्तात्। प्रऽयतिः। परस्तात्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।

अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ ६ ॥

कः। अद्धा। वेद। कः। इह। प्र। वोचत्। कुतः। आऽजाता। कुतः। इयम्। विऽसृष्टिः।

अर्वाक्। देवाः। अस्य। विऽसर्जनेन। अथ। कः। वेद। यतः। आऽबभूव ॥ ६ ॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।

यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥ ७ ॥ [२२ (१७)]

इयम्। विऽसृष्टिः। यतः। आऽबभूव। यदि। वा। दधे। यदि। वा। न।

यः। अस्य। अधिऽअक्षः। परमे। विऽओमन्। सः। अङ्ग। वेद। यदि। वा। न। वेद ॥ ७ ॥

[१३२ (१३०)] [७ यज्ञः प्राजापत्यः। भाववृत्तम्। त्रिष्टुप्, १ जगती।]

यो यज्ञो विश्वतस्तन्तुभिस्तत एकशतं देवकर्मेभिरायतः।

इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्यासते तते ॥ १ ॥

यः। यज्ञः। विश्वतः। तन्तुऽभिः। ततः। एकऽशतम्। देवऽकर्मेभिः। आऽयतः।

इमे। वयन्ति। पितरः। ये। आऽययुः। प्र। वय। अप। वय। इति। आसते। तते ॥ १ ॥

पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन्।

इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥ २ ॥

पुमान्। एनम्। तनुते। उत्। कृणत्ति। पुमान्। वि। तत्ने। अधि। नाके। अस्मिन्।

इमे। मयूखाः। उप। सेदुः। ऊँ इति। सदः। सामानि। चक्रुः। तसराणि। ओतवे ॥ २ ॥

कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत्।

छन्दः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे ॥ ३ ॥

का। आसीत्। प्रऽमा। प्रतिऽमा। किम्। निऽदानम्। आज्यम्। किम्। आसीत्। परिऽधिः। कः। आसीत्।

छन्दः। किम्। आसीत्। प्रउगम्। किम्। उक्थम्। यत्। देवाः। देवम्। अयजन्त। विश्वे ॥ ३ ॥

अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव।

अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत् ॥ ४ ॥

अग्नेः। गायत्री। अभवत्। सऽयुग्वा। उष्णिहया। सविता। सम्। बभूव।

अनुऽस्तुभा। सोमः। उक्थैः। महस्वान्। बृहस्पतेः। बृहती। वाचम्। आवत् ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विराणिमित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः।
विश्वान् देवाञ्जगत्या विवेश तेन चाक्लृप्र ऋषयो मनुष्याः॥ ५॥
वि॒ऽराट्। मित्रावरुणयोः। अभिऽश्रीः। इन्द्रस्य। त्रिऽस्तुप्। इह। भागः। अह्नः।
विश्वान्। देवान्। जगती। आ। विवेश। तेन। चाक्लृप्रे। ऋषयः। मनुष्याः॥ ५॥
चाक्लृप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे।
पश्यन् मन्ये मनसा चक्षसा तान् य इमं यज्ञमयजन्त पूर्वे॥ ६॥
चाक्लृप्रे। तेन। ऋषयः। मनुष्याः। यज्ञे। जाते। पितरः। नः। पुराणे।
पश्यन्। मन्ये। मनसा। चक्षसा। तान्। ये। इमम्। यज्ञम्। अयजन्त। पूर्वे॥ ६॥
सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो३ न रश्मीन्॥ ७॥ [२३ (१८)]
सहऽस्तोमाः। सहऽछन्दसः। आऽवृतः। सहऽप्रमाः। ऋषयः। सप्त। दैव्याः।
पूर्वेषाम्। पन्थाम्। अनुऽदृश्य। धीराः। अनुऽआलेभिरे। रथ्यः। न। रश्मीन्॥ ७॥

[१३३ (१३१)] [७ सुकीर्तिः काक्षीवतः। इन्द्रः, ४-५ अश्विनौ। त्रिष्टुप्, ४ अनुष्टुप्।]

अप प्राच इन्द्र विश्वाँ अमित्रानपापाचो अभिभूते नुदस्व।
अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम॥ १॥
अप। प्राचः। इन्द्र। विश्वान्। अमित्रान्। अप। अपाचः। अभिऽभूते। नुदस्व।
अप। उदीचः। अप। शूर। अधराचः। उरौ। यथा। तव। शर्मन्। मदेम॥ १॥
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः॥ २॥
कुवित्। अङ्ग। यवऽमन्तः। यवम्। चित्। यथा। दान्ति। अनुऽपूर्वम्। विऽयूय।
इहऽइह। एषाम्। कृणुहि। भोजनानि। ये। बर्हिषः। नमःऽवृक्तिम्। न। जग्मुः॥ २॥
नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु।
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः॥ ३॥
नहि। स्थूरि। ऋतुऽथा। यातम्। अस्ति। न। उत। श्रवः। विविदे। सम्ऽगमेषु।
गव्यन्तः। इन्द्रम्। सख्याय। विप्राः। अश्वऽयन्तः। वृषणम्। वाजयन्तः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युवं सुराममश्विना नमुचावासुरे सचा।

विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम्॥ ४॥

युवम्। सुरामम्। अश्विना। नमुचौ। आसुरे। सचा।

विऽपिपाना। शुभः। पती इति। इन्द्रम्। कर्मऽसु। आवतम्॥ ४॥

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः।

यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक्॥ ५॥

पुत्रम्ऽइव। पितरौ। अश्विना। उभा। इन्द्र। आवथुः। काव्यैः। दंसनाभिः।

यत्। सुरामम्। वि। अपिबः। शचीभिः। सरस्वती। त्वा। मघऽवन्। अभिष्णक्॥ ५॥

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः।

बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम॥ ६॥

इन्द्रः। सुऽत्रामा। स्वऽवान्। अवःऽभिः। सुऽमृळीकः। भवतु। विश्वऽवेदाः।

बाधताम्। द्वेषः। अभयम्। कृणोतु। सुऽवीर्यस्य। पतयः। स्याम॥ ६॥

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम।

स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु॥ ७॥ [२४ (१९)]

तस्य। वयम्। सुऽमतौ। यज्ञियस्य। अपि। भद्रे। सौमनसे। स्याम।

सः। सुऽत्रामा। स्वऽवान्। इन्द्रः। अस्मे इति। आरात्। चित्। द्वेषः। सनुतः। युयोतु॥ ७॥

[१३४ (१३२)] [७ शकपूतो नार्मेधः। मित्रावरुणौ, १ द्युभूम्यश्विनः। विराड्रूपा, १ न्यङ्कुसारिणी, २, ६ प्रस्तारपङ्क्ती, ७ महासतोबृहती।]

ईजानमिद् द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभूषणि। ईजानं देवावश्विनावभि सुम्नैरवर्धताम्॥ १॥

ईजानम्। इत्। द्यौः। गूर्तऽवसुः। ईजानम्। भूमिः। अभि। प्रऽभूषणि।

ईजानम्। देवौ। अश्विनौ। अभि। सुम्नैः। अवर्धताम्॥ १॥

ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि।

युवोः क्राणाय सख्यैरभि ष्याम रक्षसः॥ २॥

ता। वाम्। मित्रावरुणा। धारयत्क्षिती इति धारयत्ऽक्षिती। सुऽसुम्ना। इषितत्वता। यजामसि।

युवोः। क्राणाय। सख्यैः। अभि। स्याम। रक्षसः॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अधा चिन्नु यद्दिधिषामहे वामभि प्रियं रेक्णः पत्यमानाः।

दद्वाँ वा यत्पुष्यति रेक्णः सम्वारन्नकिरस्य मघानि॥ ३॥

अध। चित्। नु। यत्। दिधिषामहे। वाम्। अभि। प्रियम्। रेक्णः। पत्यमानाः।

दद्वान्। वा। यत्। पुष्यति। रेक्णः। सम्। ॐ इति। आरन्। नकिः। अस्य। मघानि॥ ३॥

असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा।

मूर्धा रथस्य चाकन्नैतावतैनसान्तकध्रुक्॥ ४॥

असौ। अन्यः। असुर। सूयत। द्यौ। त्वम्। विश्वेषाम्। वरुण। असि। राजा।

मूर्धा। रथस्य। चाकन्। न। एतावता। एनसा। अन्तकऽध्रुक्॥ ४॥

अस्मिन्त्स्वे३तच्छकपूत एनो हिते मित्रे निगतान् हन्ति वीरान्।

अवोर्वा यद्धात्तनूष्ववः प्रियासु यज्ञियास्वर्वा॥ ५॥

अस्मिन्। सु। एतत्। शकऽपूते। एनः। हिते। मित्रे। निऽगतान्। हन्ति। वीरान्।

अवोः। वा। यत्। धात्। तनूषु। अवः। प्रियासु। यज्ञियासु। अर्वा॥ ५॥

युवोर्हि मातादितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि।

अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः॥ ६॥

युवोः। हि। माता। अदितिः। विऽचेतसा। द्यौः। न। भूमिः। पयसा। पुपूतनि।

अव। प्रिया। दिदिष्टन। सूरः। निनिक्त। रश्मिऽभिः॥ ६॥

युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदम्।

ता नः कणूकयन्तीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः॥ ७॥ [२५ (२०)]

युवम्। हि। अप्नऽराजौ। असीदतम्। तिष्ठत्। रथम्। न। धूःऽसदम्। वनऽसदम्।

ताः। नः। कणूकऽयन्तीः। नृऽमेधः। तत्रे। अंहसः। सुऽमेधः। तत्रे। अंहसः॥ ७॥

[१३५ (१३३)] [७ सुदाः पैजवनः। इन्द्रः। शक्वरी, ४-६ महापङ्क्तिः, ७ त्रिष्टुप्।]

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत।

अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता

नभन्तामन्यकेषां ज्याका अधि धन्वसु॥ १॥

प्रो इति। सु। अस्मै। पुरःऽरथम्। इन्द्राय। शूषम्। अर्चत।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभीके । चित् । ऊँ इति । लोककृत् । सम्ऽगे । समत्ऽसु । वृत्रऽहा । अस्माकम् । बोधि । चोदिता ।
नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥ १ ॥

त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् ।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे
नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ २ ॥

त्वम् । सिन्धून् । अव । असृजः । अधराचः । अहन् । अहिम् ।
अशत्रुः । इन्द्र । जज्ञिषे । विश्वम् । पुष्यसि । वार्यम् । तम् । त्वा । परि । स्वजामहे ।
नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥ २ ॥

वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः ।
अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु
नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ ३ ॥

वि । सु । विश्वाः । अरातयः । अर्यः । नशन्त । नः । धियः ॥ अस्ता । असि । शत्रवे । वधम् । यः । नः ।
इन्द्र । जिघांसति । या । ते । रातिः । ददिः । वसु । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥ ३ ॥

यो न इन्द्राभितो जनो वृकायुरादिदेशति ।
अधस्पदं तमीं कृधि विबाधो असि सासहिर्नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ ४ ॥

यः । नः । इन्द्र । अभितः । जनः । वृकऽयुः । आऽदिदेशति ॥ अधःऽपदम् । तम् । ईम् । कृधि ।
विऽबाधः । असि । ससहिः । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥ ४ ॥

यो न इन्द्राभिदासति सनाभिर्यश्च निष्ट्यः ।
अव तस्य बलं तिर महीव द्यौरध त्मना नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ ५ ॥

यः । नः । इन्द्र । अभिऽदासति । सऽनाभिः । यः । च । निष्ट्यः ॥ अव । तस्य । बलम् । तिर ।
महीऽइव । द्यौः । अध । त्मना । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥ ५ ॥

वयमिन्द्र त्वायवः सखित्वमा रभामहे ।
ऋतस्य नः पथा नयाति विश्वानि दुरिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ ६ ॥

वयम् । इन्द्र । त्वाऽयवः । सखिऽत्वम् । आ । रभामहे ॥ ऋतस्य । नः । पथा । नय ।
अति । विश्वानि । दुःऽइता । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥ ६ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्मभ्यं सु त्वमिन्द्र तां शिक्ष या दोहते प्रति वरं जरित्रे।
अच्छिद्रोध्नी पीपयद्यथा नः सहस्रधारा पयसा मही गौः॥ ७॥ [२६ (२१)]

अस्मभ्यम्। सु। त्वम्। इन्द्र। ताम्। शिक्ष। या। दोहते। प्रति। वरम्। जरित्रे।
अच्छिद्रऽऊध्नी। पीपयत्। यथा। नः। सहस्रऽधारा। पयसा। मही। गौः॥ ७॥

[१३६ (१३४)] [७ : १-६ (पूर्वार्धस्य) मान्धाता यौवनाश्वः, ६ (उत्तरार्धस्य)-७ गोधा ऋषिका। इन्द्रः। महापङ्क्तिः, ७ पंक्तिः।]

उभे यदिन्द्र रोदसी आपप्राथोषाइव।
महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ १॥

उभे इति। यत्। इन्द्र। रोदसी इति। आऽपप्राथ। उषाःऽइव॥ महान्तम्। त्वा। महीनाम्।
सम्ऽराजम्। चर्षणीनाम्। देवी। जनित्री। अजीजनत्। भद्रा। जनित्री। अजीजनत्॥ १॥

अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम्।
अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ ॥।

अव। स्म। दुःऽहनायतः। मर्तस्य। तनुहि। स्थिरम्॥ अधःऽपदम्। तम्। ईम्। कृधि।
यः। अस्मान्। आऽदिदेशति। देवी। जनित्री। अजीजनत्। भद्रा। जनित्री। अजीजनत्॥ २॥

अव त्या बृहतीरिषो विश्वश्चन्द्रा अमित्रहन्।
शचीभिः शक्र धूनुहीन्द्र विश्वाभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ ३॥

अव। त्याः। बृहतीः। इषः। विश्वऽचन्द्राः। अमित्रऽहन्। शचीभिः। शक्र। धूनुहि।
इन्द्र। विश्वाभिः। ऊतिऽभिः। देवी। जनित्री। अजीजनत्। भद्रा। जनित्री। अजीजनत्॥ ३॥

अव यत्त्वं शतक्रतविन्द्र विश्वानि धूनुषे।
रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ ४॥

अव। यत्। त्वम्। शतक्रतो इति शतऽक्रतो। इन्द्र। विश्वानि। धूनुषे। रयिम्। न। सुन्वते। सचा।
सहस्रिणीभिः। ऊतिऽभिः। देवी। जनित्री। अजीजनत्। भद्रा। जनित्री। अजीजनत्॥ ४॥

अव स्वेदाइवाभितो विष्वक्पतन्तु दिद्यवः।
दूर्वायाइव तन्तवो व्य१स्मदेतु दुर्मतिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अव । स्वेदाःऽइव । अभितः । विष्वक् । पतन्तु । दिद्यवः । दूर्वायाःऽइव । तन्तवः । वि ।
अस्मत् । एतु । दुःऽमतिः । देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ ५ ॥

दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
पूर्वेण मघवन्पदाजो वयां यथा यमो देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ६ ॥

दीर्घम् । हि । अङ्कुशम् । यथा । शक्तिम् । बिभर्षि । मन्तुऽमः । पूर्वेण । मघऽवन् । पदा । अजः ।
वयाम् । यथा । यमः । देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ ६ ॥

नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि ।
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ॥ ७ ॥ [२७ (२२)]

नकिः । देवाः । मिनीमसि । नकिः । आ । योपयामसि । मन्त्रऽश्रुत्यम् । चरामसि ।
पक्षेभिः । अपिऽकक्षेभिः । अत्र । अभि । सम् । रभामहे ॥ ७ ॥

[१३७ (१३५)] [७ कुमारो यामायनः । यमः । अनुष्टुप् ।]

यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ १ ॥

यस्मिन् । वृक्षे । सुऽपलाशे । देवैः । सम्ऽपिबते । यमः ।
अत्र । नः । विश्पतिः । पिता । पुराणान् । अनु । वेनति ॥ १ ॥

पुराणाँ अनुवेनन्तं चरन्तं पापयामुया । असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः ॥ २ ॥

पुराणान् । अनुऽवेनन्तम् । चरन्तम् । पापया । अमुया ।
असूयन् । अभि । अचाकशम् । तस्मै । अस्पृहयम् । पुनरिति ॥ २ ॥

यं कुमार नवं रथमचक्रं मनसाकृणोः । एकेषं विश्वतः प्राञ्चमपश्यन्नधि तिष्ठसि ॥ २ ॥

यम् । कुमार । नवम् । रथम् । अचक्रम् । मनसा । अकृणोः ।
एकऽईषम् । विश्वतः । प्राञ्चम् । अपश्यन् । अधि । तिष्ठसि ॥ ३ ॥

यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि । तं सामानु प्रावर्तत समितो नाव्याहितम् ॥ ४ ॥

यम् । कुमार । प्र । अवर्तयः । रथम् । विप्रेभ्यः । परि ।
तम् । साम । अनु । प्र । अवर्तत । सम् । इतः । नावि । आऽहितम् ॥ ४ ॥

कः कुमारमजनयद्रथं को निरवर्तयत् । कः स्वित्तदद्य नो ब्रूयादनुदेयी यथाभवत् ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कः। कुमारम्। अजनयत्। रथम्। कः। निः। अवर्तयत्।

कः। स्वित्। तत्। अद्य। नः। ब्रूयात्। अनुऽदेयी। यथा। अभवत्॥ ५॥

यथाभवदनुदेयी ततो अग्रमजायत। पुरस्ताद्बुध्न आततः पश्चान्निरयणं कृतम्॥ ६॥

यथा। अभवत्। अनुऽदेयी। ततः। अग्रम्। अजायत।

पुरस्तात्। बुध्नः। आऽततः। पश्चात्। निःऽअयनम्। कृतम्॥ ६॥

इदं यमस्य सादनं देवमानं यदुच्यते। इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृतः॥ ७॥ [२८ (२३)]

इदम्। यमस्य। सदनम्। देवऽमानम्। यत्। उच्यते।

इयम्। अस्य। धम्यते। नाळीः। अयम्। गीःऽभिः। परिऽकृतः॥ ७॥

[१३८ (१३६)] [७ : १ जूतिः, २ वातजूतिः, ३ विप्रजूतिः, ४ वृषाणकः, ५ करिक्रतः, ६ एतशः, ७ ऋष्यशृङ्गः (एते वातरशना मुनयः)। केशिनः = अग्नि-सूर्य-वायवः। अनुष्टुप्।]

केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते॥ १॥

केशी। अग्निम्। केशी। विषम्। केशी। बिभर्ति। रोदसी इति।

केशी। विश्वम्। स्वः। दृशे। केशी। इदम्। ज्योतिः। उच्यते॥ १॥

मुनयो वातरशनाः पिशङ्गा वसते मला। वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत॥ २॥

मुनयः। वातऽरशनाः। पिशङ्गा। वसते। मला।

वातस्य। अनु। ध्राजिम्। यन्ति। यत्। देवासः। अविक्षत॥ २॥

उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम्। शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ॥ ३॥

उत्ऽमदिताः। मौनेयेन। वातान्। आ। तस्थिम। वयम्।

शरीरा। इत्। अस्माकम्। यूयम्। मर्तासः। अभि। पश्यथ॥ ३॥

अन्तरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः॥ ४॥

अन्तरिक्षेण। पतति। विश्वा। रूपा। अवऽचाकशत्।

मुनिः। देवस्यऽदेवस्य। सौकृत्याय। सखा। हितः॥ ४॥

वातस्याश्वो वायोः सखाथो देवेषितो मुनिः। उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः॥ ५॥

वातस्य। अश्वः। वायोः। सखा। अथो इति। देवऽइषितः। मुनिः।

उभौ। समुद्रौ। आ। क्षेति। यः। च। पूर्वः। उत। अपरः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्। केशी केतस्य विद्वान्त्सखा स्वादुर्मदिन्तमः॥ ६॥

अप्सरसाम्। गन्धर्वाणाम्। मृगाणाम्। चरणे। चरन्।

केशी। केतस्य। विद्वान्। सखा। स्वादुः। मदिन्ऽतमः॥ ६॥

वायुरस्मा उपामन्थत्पिनष्टि स्मा कुनंनमा।

केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह॥ ७॥ [२९ (२४)]

वायुः। अस्मै। उप। अमन्थत्। पिनष्टि। स्म। कुनंनमा।

केशी। विषस्य। पात्रेण। यत्। रुद्रेण। अपिबत्। सह॥ ७॥

[१३९ (१३७)] [७ : १ भरद्वाजः, २ कश्यपः, ३ गोतमः, ४ अग्निः, ५ विश्वामित्र, ६ जमदग्निः, ७ वसिष्ठः। विश्वे देवाः। अनुष्टुप्।]

उत देवा अवहितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः॥ १॥

उत। देवाः। अवऽहितम्। देवाः। उत्। नयथ। पुनरिति।

उत। आगः। चक्रुषम्। देवाः। देवाः। जीवयथ। पुनरिति॥ १॥

द्वाविमौ वातौ वात आ सिन्धोरा परावतः। दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः॥ २॥

द्वौ। इमौ। वातौ। वातः। आ। सिन्धोः। आ। पराऽवतः।

दक्षम्। ते। अन्यः। आ। वातु। परा। अन्यः। वातु। यत्। रपः॥ २॥

आ वात वाहि भेषजं वि वात वाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे॥ ३॥

आ। वात। वाहि। भेषजम्। वि। वात। वाहि। यत्। रपः।

त्वम्। हि। विश्वऽभेषजः। देवानाम्। दूतः। ईयसे॥ ३॥

आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः। दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते॥ ४॥

आ। त्वा। अगमम्। शंतातिऽभिः। अथो इति। अरिष्टतातिऽभिः।

दक्षम्। ते। भद्रम्। आ। अभार्षम्। परा। यक्ष्मम्। सुवामि। ते॥ ४॥

त्रायन्तामिह देवास्त्रायतां मरुतां गणः। त्रायन्तां विश्वा भूतानि यथायमरपा असत्॥ ५॥

त्रायन्ताम्। इह। देवाः। त्रायताम्। मरुताम्। गणः।

त्रायन्ताम्। विश्वा। भूतानि। यथा। अयम्। अरपाः। असत्॥ ५॥

आप इद्वा उ भेषजीरापो अमीवचातनीः। आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम्॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आपः। इत्। वै। ॐ इति। भेषजीः। आपः। अमीवऽचातनीः।

आपः। सर्वस्य। भेषजीः। ताः। ते। कृण्वन्तु। भेषजम्॥ ६॥

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।

अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि॥ ७॥ [३० (२५)]

हस्ताभ्याम्। दशऽशाखाभ्याम्। जिह्वा। वाचः। पुरःऽगवी।

अनामयित्नुऽभ्याम्। त्वा। ताभ्याम्। त्वा। उप। स्पृशामसि॥ ७॥

[१४० (१३८)] [६ अङ्ग औरवः। इन्द्रः। जगती।]

तव त्य इन्द्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलम्।

यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः॥ १॥

तव। त्ये। इन्द्र। सख्येषु। वह्नयः। ऋतम्। मन्वानाः। वि। अदर्दिरुः। वलम्।

यत्र। दशस्यन्। उषसः। रिणन्। अपः। कुत्साय। मन्मन्। अह्यः। च। दंसयः॥ १॥

अवासृजः प्रस्वः श्वञ्चयो गिरीनुदाज उस्रा अपिबो मधु प्रियम्।

अवर्धयो वनिनो अस्य दंससा शुशोच सूर्य ऋतजातया गिरा॥ २॥

अव। असृजः। प्रऽस्वः। श्वञ्चयः। गिरीन्। उत्। आजः। उस्राः। अपिबः। मधु। प्रियम्।

अवर्धयः। वनिनः। अस्य। दंससा। शुशोच। सूर्यः। ऋतऽजातया। गिरा॥ २॥

वि सूर्यो मध्ये अमुचद्रथं दिवो विदद्दासाय प्रतिमानमार्यः।

दृळ्हानि पिप्रोरसुरस्य मायिन इन्द्रो व्यास्यच्चकृवाँ ऋजिश्वना॥ ३॥

वि। सूर्यः। मध्ये। अमुचत्। रथम्। दिवः। विदत्। दासाय। प्रतिऽमानम्। आर्यः।

दृळ्हानि। पिप्रोः। असुरस्य। मायिनः। इन्द्रः। वि। आस्यत्। चकृऽवान्। ऋजिश्वना॥ ३॥

अनाधृष्टानि धृषितो व्यास्यन्निधीँरदेवाँ अमृणदयास्यः।

मासेव सूर्यो वसु पुर्यमा ददे गृणानः शत्रूँरश्रृणाद्विरुक्मता॥ ४॥

अनाधृष्टानि। धृषितः। वि। आस्यत्। निऽधीन्। अदेवान्। अमृणत्। अयास्यः।

मासाऽइव। सूर्यः। वसु। पुर्यम्। आ। ददे। गृणानः। शत्रून्। अश्रृणात्। विरुक्मता॥ ४॥

अयुद्धसेनो विभ्वा विभिन्दता दाशद्वृत्रहा तुज्यानि तेजते।

इन्द्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुन्ध्यूरजहादुषा अनः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयुद्धऽसेनः। विऽभ्वा। विऽभिन्दता। दाशत्। वृत्रऽहा। तुज्यानि। तेजते।
इन्द्रस्य। वज्रात्। अबिभेत्। अभिऽश्नथः। प्र। अक्रामत्। शुन्ध्यूः। अजहात्। उषाः। अनः॥ ५॥

एता त्या ते श्रुत्यानि केवला यदेक एकमकृणोरयज्ञम्।
मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता॥ ६॥ **[३१ (२६)]**

एता। त्या। ते। श्रुत्यानि। केवला। यत्। एकः। एकम्। अकृणोः। अयज्ञम्।
मासाम्। विऽधानम्। अदधाः। अधि। द्यवि। त्वया। विऽभिन्नम्। भरति। प्रऽधिम्। पिता॥ ६॥

[१४१ (१३९)] [६ देवगन्धर्वो विश्वावसुः। सविता, ४-६ आत्मा। त्रिष्टुप्।]

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रम्।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः॥ १॥

सूर्यऽरश्मिः। हरिऽकेशः। पुरस्तात्। सविता। ज्योतिः। उत्। अयान्। अजस्रम्।
तस्य। पूषा। प्रऽसवे। याति। विद्वान्। सम्ऽपश्यन्। विश्वा। भुवनानि। गोपाः॥ १॥

नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम्।
स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम्॥ २॥

नृऽचक्षाः। एषः। दिवः। मध्ये। आस्ते। आपप्रिऽवान्। रोदसी इति। अन्तरिक्षम्।
सः। विश्वाचीः। अभि। चष्टे। घृताचीः। अन्तरा। पूर्वम्। अपरम्। च। केतुम्॥ २॥

रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः।
देवइव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम्॥ ३॥

रायः। बुध्नः। सम्ऽगमनः। वसूनाम्। विश्वा। रूपा। अभि। चष्टे। शचीभिः।
देवःऽइव। सविता। सत्यऽधर्मा। इन्द्रः। न। तस्थौ। सम्ऽअरे। धनानाम्॥ ३॥

विश्वावसुं सोम गन्धर्वमापो ददृशुषीस्तदृतेना व्यायन्।
तदन्ववैदिन्द्रो रारहाण आसां परि सूर्यस्य परिधीँरपश्यत्॥ ४॥

विश्वऽवसुम्। सोम। गन्धर्वम्। आपः। ददृशुषीः। तत्। ऋतेन। वि। आयन्।
तत्। अनुऽअवैत्। इन्द्रः। ररहाणः। आसाम्। परि। सूर्यस्य। परिऽधीन्। अपश्यत्॥ ४॥

विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः।
यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वऽवसुः। अभि। तत्। नः। गृणातु। दिव्यः। गन्धर्वः। रजसः। विऽमानः।

यत्। वा। घ। सत्यम्। उत। यत्। न। विद्म। धियः। हिन्वानः। धियः। इत्। नः। अव्याः॥ ५॥

सस्निमविन्दच्चरणे नदीनामपावृणोदुरो अश्मव्रजानाम्।

प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनाम्॥ ६॥ **[३२ (२७)]**

सस्निम्। अविन्दत्। चरणे। नदीनाम्। अप। अवृणोत्। दुरः। अश्मऽव्रजानाम्।

प्र। आसाम्। गन्धर्वः। अमृतानि। वोचत्। इन्द्रः। दक्षम्। परि। जानात्। अहीनाम्॥ ६॥

[१४२ (१४०)] [६ अग्निः पावकः। अग्निः। सतोबृहती, १-२ विष्टारपङ्क्तिः, ६ उपरिष्टाज्ज्योतिः।]

अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो।

बृहद्भानो शवसा वाजमुक्थ्यं१ दधासि दाशुषे कवे॥ १॥

अग्ने। तव। श्रवः। वयः। महि। भ्राजन्ते। अर्चयः। विभावसो इति विभाऽवसो।

बृहद्भानो इति बृहत्ऽभानो। शवसा। वाजम्। उक्थ्यम्। दधासि। दाशुषे। कवे॥ १॥

पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना।

पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे॥ २॥

पावकऽवर्चाः। शुक्रऽवर्चाः। अनूनऽवर्चाः। उत्। इयर्षि। भानुना।

पुत्रः। मातरा। विऽचरन्। उप। अवसि। पृणक्षि। रोदसी इति। उभे इति॥ २॥

ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः।

त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः॥ ३॥

ऊर्जः। नपात्। जातऽवेदः। सुशस्तिऽभिः। मन्दस्व। धीतिऽभिः। हितः।

त्वे इति। इषः। सम्। दधुः। भूरिऽवर्पसः। चित्रऽऊतयः। वामऽजाताः॥ ३॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य।

स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम्॥ ४॥

इरज्यन्। अग्ने। प्रथयस्व। जन्तुऽभिः। अस्मे इति। रायः। अमर्त्य।

सः। दर्शतस्य। वपुषः। वि। राजसि। पृणक्षि। सानसिम्। क्रतुम्॥ ४॥

इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः।

रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इष्कर्तारम्। अध्वरस्य। प्रऽचेतसम्। क्षयन्तम्। राधसः। महः।

रातिम्। वामस्य। सुऽभगाम्। महीम्। इषम्। दधासि। सानसिम्। रयिम्॥ ५॥

ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः।

श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा॥ ६॥ [३३ (२८)]

ऋतऽवानम्। महिषम्। विश्वऽदर्शतम्। अग्निम्। सुम्नाय। दधिरे। पुरः। जनाः।

श्रुतऽकर्णम्। सप्रथःऽतमम्। त्वा। गिरा। दैव्यम्। मानुषा। युगा॥ ६॥

[१४३ (१४१)] [६ अग्निस्तापसः। विश्वे देवाः। अनुष्टुप्।]

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव। प्र नो यच्छ विशस्पते धनदा असि नस्त्वम्॥ १॥

अग्ने। अच्छ। वद। इह। नः। प्रत्यङ्। नः। सुऽमनाः। भव।

प्र। नः। यच्छ। विशः। पते। धनऽदाः। असि। नः। त्वम्॥ १॥

प्र नो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता रायो देवी ददातु नः॥ २॥

प्र। नः। यच्छतु। अर्यमा। प्र। भगः। प्र। बृहस्पतिः।

प्र। देवाः। प्र। उत। सूनृता। रायः। देवी। ददातु। नः॥ २॥

सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। आदित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम्॥ ३॥

सोमम्। राजानम्। अवसे। अग्निम्। गीःऽभिः। हवामहे।

आदित्यान्। विष्णुम्। सूर्यम्। ब्रह्माणम्। च। बृहस्पतिम्॥ ३॥

इन्द्रवायू बृहस्पतिं सुहवेह हवामहे। यथा नः सर्व इज्जनः संगत्यां सुमना असत्॥ ४॥

इन्द्रवायू इति। बृहस्पतिम्। सुऽहवा। इह। हवामहे।

यथा। नः। सर्वः। इत्। जनः। सम्ऽगत्याम्। सुऽमनाः। असत्॥ ४॥

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वातं विष्णुं सरस्वतीं सवितारं च वाजिनम्॥ ५॥

अर्यमणम्। बृहस्पतिम्। इन्द्रम्। दानाय। चोदय।

वातम्। विष्णुम्। सरस्वतीम्। सवितारम्। च। वाजिनम्॥ ५॥

त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय। त्वं नो देवतातये रायो दानाय चोदय॥ ६॥ [३४ (२९)]

त्वम्। नः। अग्ने। अग्निऽभिः। ब्रह्म। यज्ञम्। च। वर्धय।

त्वम्। नः। देवऽतातये। रायः। दानाय। चोदय॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१४४ (१४२)] [८ शार्ङ्गाः-१-२ जरिता, ३-४ द्रोणः, ५-६ सारिसृक्वः, ७-८ स्तम्बमित्रः। अग्निः। त्रिष्टुप्, १-२ जगत्यौ, ७-८ अनुष्टुभौ।]

अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्य१न्यदस्त्याप्यम्।
भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि॥ १॥

अयम्। अग्ने। जरिता। त्वे इति। अभूत्। अपि। सहसः। सूनो इति। नहि। अन्यत्। अस्ति। आप्यम्।
भद्रम्। हि। शर्म। त्रिऽवरूथम्। अस्ति। ते। आरे। हिंसानाम्। अप। दिद्युम्। आ। कृधि॥ १॥

प्रवत्ते अग्ने जनिमा पितूयतः साचीव विश्वा भुवना न्यृञ्जसे।
प्र सप्तयः प्र सनिषन्त नो धियः पुरश्चरन्ति पशुपाइव त्मना॥ २॥

प्रऽवत्। ते। अग्ने। जनिम। पितुऽयतः। साचीऽइव। विश्वा। भुवना। नि। ऋञ्जसे।
प्र। सप्तयः। प्र। सनिषन्त। नः। धियः। पुरः। चरन्ति। पशुपाःऽइव। त्मना॥ २॥

उत वा उ परि वृणक्षि बप्सद्बहोरग्न उलपस्य स्वधावः।
उत खिल्या उर्वराणां भवन्ति मा ते हेतिं तविषीं चुक्रुधाम॥ ३॥

उत। वै। ऊँ इति। परि। वृणक्षि। बप्सत्। बहोः। अग्ने। उलपस्य। स्वधाऽवः।
उत। खिल्याः। उर्वराणाम्। भवन्ति। मा। ते। हेतिम्। तविषीम्। चुक्रुधाम॥ ३॥

यदुद्वतो निवतो यासि बप्सत्पृथगेषि प्रगर्धिनीव सेना।
यदा ते वातो अनुवाति शोचिर्वप्तेव श्मश्रु वपसि प्र भूम॥ ४॥

यत्। उत्ऽवतः। निऽवतः। यासि। बप्सत्। पृथक्। एषि। प्रगर्धिनीऽइव। सेना।
यदा। ते। वातः। अनुऽवाति। शोचिः। वप्ताऽइव। श्मश्रु। वपसि। प्र। भूम॥ ४॥

प्रत्यस्य श्रेणयो ददृश्र एकं नियानं बहवो रथासः।
बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वेषि भूमिम्॥ ५॥

प्रति। अस्य। श्रेणयः। ददृश्रे। एकम्। निऽयानम्। बहवः। रथासः।
बाहू इति। यत्। अग्ने। अनुऽमर्मृजानः। न्यङ्। उत्तानाम्। अनुऽएषि। भूमिम्॥ ५॥

उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य वाजाः।
उच्छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदन्तु॥ ६॥

उत्। ते। शुष्माः। जिहताम्। उत्। ते। अर्चिः। उत्। ते। अग्ने। शशमानस्य। वाजाः।
उत्। श्वञ्चस्व। नि। नम। वर्धमानः। आ। त्वा। अद्य। विश्वे। वसवः। सदन्तु॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपामिदं न्ययनं समुद्रस्य निवेशनम्। अन्यं कृणुष्वेतः पन्थां तेन याहि वशां अनु॥ ७॥

अपाम्। इदम्। नि॰अयनम्। समुद्रस्य। नि॰वेशनम्।

अन्यम्। कृणुष्व। इतः। पन्थाम्। तेन। याहि। वशान्। अनु॥ ७॥

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः।

ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे॥ ८॥ [३५ (३०)]

आ॰अयने। ते। परा॰अयने। दूर्वाः। रोहन्तु। पुष्पिणीः।

ह्रदाः। च। पुण्डरीकाणि। समुद्रस्य। गृहाः। इमे॥ ८॥

*[१४५] [९ शन्तातिः। शाला। अनुष्टुप्, १ वर्णसंख्यानुसारं जगती]

हिमस्य त्वा जरायुणा शाले परि व्ययामसि।

उत ह्रदो हि नो भुवोऽग्निर्ददातु भेषजम्।

शीतह्रदो हि नो भुवोऽग्निर्ददातु भेषजम्॥ १॥ *

हिमस्य। त्वा। जरायुणा। शाले। परि। व्ययामसि।

उत। ह्रदः। हि। नः। भुवः। अग्निः। ददातु। भेषजम्।

शीत॰ह्रदः। हि। नः। भुवः। अग्निः। ददातु। भेषजम्॥ १॥

अन्तिकादग्निरभवद्दुर्वादः शिशुरागमत्। अजातपुत्रपुत्राया ह्रदयं मम दूयते॥ २॥ *

अन्तिकात्। अग्निः। अभवत्। दुःरवादः। शिशुः। आ। गमत्।

अजातपुत्र॰पुत्रायाः। ह्रदयम्। मम। दूयते॥ २॥

विपुलं वनं बह्वाकाशं चर जातवेदः कामाय। मां च रक्ष पुत्राँश्च शरणमुभौ तव॥ ३॥ *

विपुलम्। वनम्। बहु। आकाशम्। चर। जात॰वेदः। कामाय।

माम्। च। रक्ष। पुत्रान्। च। शरणम्। उभौ। तव॥ ३॥

पिङ्गाक्ष लोहितग्रीव कृष्णवर्ण नमोऽस्तु ते।

अस्मन्नि बर्हीरस्योनं सागरस्योर्मयो यथा॥ ४॥ *

पिङ्ग॰अक्ष। लोहित॰ग्रीव। कृष्ण॰वर्ण। नमः। अस्तु। ते।

अस्मत्। नि। बर्हीः। अस्य। ऊनम्। सागरस्य। ऊर्मयः। यथा॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्र॑ः क्ष॒त्रं द॑दातु वरु॑ण॒स्तमभि॑ षिञ्चतु। शत्र॑वो नि॒धनं॑ यान्तु॒ जय॑ं त्वं ब्रह्म॑तेजसा ॥ ५ ॥ ★

इन्द्र॑ः। क्ष॒त्रम्। द॒दा॒तु। वरु॑णः। तम्। अभि॑। सि॒ञ्च॒तु।

शत्र॑वः। नि॒ऽधनं॑म्। या॒न्तु॒। जय॑म्। त्वम्। ब्रह्म॑ऽतेजसा ॥ ५ ॥

क॒पि॒लजंटीं॑ सर्व॑भक्षं चा॒ग्निं प्र॒त्यक्ष॑दैवतम्। व॒रु॒ण॒व॒शाँ ह्य१॒ग्निर्मम॑ पु॒त्राँश्च॑ रक्षतु ॥ ६ ॥ ★

क॒पि॒ल॒ऽज॑टीम्। सर्व॑ऽभक्षम्। च॒। अ॒ग्निम्। प्र॒त्यक्ष॑ऽदैवतम्।

व॒रु॒ण॒ऽव॒शान्। हि। अ॒ग्निः। मम॑। पु॒त्रान्। च॒। र॒क्ष॒तु ॥ ६ ॥

याव॑दादि॒त्यस्तप॑ति॒ याव॒द् भ्राज॑ति च॒न्द्रमा॑ः। याव॒द् वात॑ः प्र॒वाय॑ति॒ ताव॑ज्जीव॒ तया॑ स॒ह ॥ ७ ॥ ★

याव॑त्। आ॒दि॒त्यः। तप॑ति। याव॑त्। भ्राज॑ति। च॒न्द्रमा॑ः।

याव॑त्। वात॑ः। प्र॒ऽवाय॑ति। ताव॑त्। जी॒व॒। तया॑। स॒ह ॥ ७ ॥

एक॑शफैर्ह॒स्तिनो॒द्देशे॑न॒ त्वं वि॑पुले॑न। पृ॒थि॒वीं त्वं भु॑ञ्ज॒स्वैक॑च्छत्रेण द॒ण्डेन॑ ॥ ८ ॥ ★

एक॑ऽशफैः। ह॒स्तिना॑। उ॒त्ऽदेशे॑न। त्वम्। वि॒पु॒लेन॑।

पृ॒थि॒वीम्। त्वम्। भु॒ञ्ज॒स्व॒। एक॑ऽछत्रेण। द॒ण्डेन॑ ॥ ८ ॥

येन॒ केन॑ प्र॒कारे॑ण मे॒हना॒कोऽपि॑ जीवति।

परे॑षामु॒पकारा॑र्थं यज्जीव॑ति॒ स जीवति ॥ ९ ॥ ★ [३६ (३१)]

येन॑। केन॑। प्र॒ऽकारे॑ण। मे॒हना॑कः। अपि॑। जी॒व॒ति॒।

परे॑षाम्। उ॒प॒का॒र॒ऽअ॒र्थम्। यत्। जीव॑ति। सः। जी॒व॒ति॒ ॥ ९ ॥

इत्याश्वलायन-संहितायाम्

अष्टमाष्टके

सप्तमोऽध्यायः

समाप्तः॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अथ अष्टमाष्टकेऽष्टमोऽध्यायः ॥

[१४६ (१४३)] [६ अत्रिः सांख्यः। अश्विनौ। अनुष्टुप्।]

त्यं चिदत्रिमृतजुरमर्थमश्वं न यातवे। कक्षीवन्तं यदी पुना रथं न कृणुथो नवम्॥ १॥

त्यम्। चित्। अत्रिम्। ऋतऽजुरम्। अर्थम्। अश्वम्। न। यातवे।

कक्षीवन्तम्। यदि। पुनरिति। रथम्। न। कृणुथः। नवम्॥ १॥

त्यं चिदश्वं न वाजिनमरेणवो यमत्नत। दृळ्हं ग्रन्थिं न वि ष्यतमत्रिं यविष्ठमा रजः॥ २॥

त्यम्। चित्। अश्वम्। न। वाजिनम्। अरेणवः। यम्। अत्नत।

दृळ्हम्। ग्रन्थिम्। न। वि। स्यतम्। अत्रिम्। यविष्ठम्। आ। रजः॥ २॥

नरा दंसिष्ठावत्रये शुभ्रा सिषासतं धियः। अथा हि वां दिवो नरा पुनः स्तोमो न विशसे॥ ३॥

नरा। दंसिष्ठौ। अत्रये। शुभ्रा। सिसासतम्। धियः।

अथ। हि। वाम्। दिवः। नरा। पुनरिति। स्तोमः। न। विऽशसे॥ ३॥

चिते तद्वां सुराधसा रातिः सुमतिरश्विना।
आ यन्नः सदने पृथौ समने पर्षथो नरा॥ ४॥

चिते। तत्। वाम्। सुऽराधसा। रातिः। सुऽमतिः। अश्विना।

आ। यत्। नः। सदने। पृथौ। समने। पर्षथः। नरा॥ ४॥

युवं भुज्युं समुद्र आ रजसः पार ईङ्खितम्। यातमच्छा पतत्रिभिर्नासत्या सातये कृतम्॥ ५॥

युवम्। भुज्युम्। समुद्रे। आ। रजसः। पारे। ईङ्खितम्।

यातम्। अच्छ। पतत्रिऽभिः। नासत्या। सातये। कृतम्॥ ५॥

आ वां सुम्नैः शंयूइव महिष्ठा विश्ववेदसा। [१]
समस्मे भूषतं नरोत्सं न पिप्युषीरिषः॥ ६॥

आ। वाम्। सुम्नैः। शंयूइवेति शंयूऽइव। मंहिष्ठा। विश्वऽवेदसा।

सम्। अस्मे इति। भूषतम्। नरा। उत्सम्। न। पिप्युषीः। इषः॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१४७ (१४४)] [६ तार्क्ष्यः सुपर्णः, यामायन ऊर्ध्वकृशनो वा। इन्द्रः। गायत्री, २ बृहती, ५ सतोबृहती, ६ विष्टारपङ्क्तिः।]

अयं हि ते अमर्त्य इन्दुरत्यो न पत्यते। दक्षो विश्वायुर्वेधसे॥ १॥

अयम्। हि। ते। अमर्त्यः। इन्दुः। अत्यः। न। पत्यते। दक्षः। विश्वऽआयुः। वेधसे॥ १॥

अयमस्मासु काव्य ऋभुर्वज्रो दास्वते। अयं बिभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदम्॥ २॥

अयम्। अस्मासु। काव्यः। ऋभुः। वज्रः। दास्वते।

अयम्। बिभर्ति। ऊर्ध्वऽकृशनम्। मदम्। ऋभुः। न। कृत्व्यम्। मदम्॥ २॥

घृषुः श्येनाय कृत्वन आसु स्वासु वंसगः। अव दीधेदहीशुवः॥ ३॥

घृषुः। श्येनाय। कृत्वने। आसु। स्वासु। वंसगः। अव। दीधेत्। अहीशुवः॥ ३॥

यं सुपर्णः परावतः श्येनस्य पुत्र आभरत्। शतचक्रं यो३ह्यो वर्तनिः॥ ४॥

यम्। सुऽपर्णः। पराऽवतः। श्येनस्य। पुत्रः। आ। अभरत्। शतऽचक्रम्। यः। अह्यः। वर्तनिः॥ ४॥

यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमन्धसः।

एना वयो वि तार्यायुर्जीवस एना जागार बन्धुता॥ ५॥

यम्। ते। श्येनः। चारुम्। अवृकम्। पदा। आ। अभरत्। अरुणम्। मानम्। अन्धसः।

एना। वयः। वि। तारि। आयुः। जीवसे। एना। जागार। बन्धुता॥ ५॥

एवा तदिन्द्र इन्दुना देवेषु चिद्धारयाते महि त्यजः।

क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वायमस्मदा सुतः॥ ६॥ [२]

एव। तत्। इन्द्रः। इन्दुना। देवेषु। चित्। धारयाते। महि। त्यजः॥ क्रत्वा। वयः। वि। तारि।

आयुः। सुक्रतो इति सुऽक्रतो। क्रत्वा। अयम्। अस्मत्। आ। सुतः॥ ६॥

[१४८ (१४५)] [६ इन्द्राग्नी। सपत्नीबाधनम् (उपनिषत्)। अनुष्टुप्, ६ पङ्क्तिः।]

इमां खनाम्योषधिं वीरुधं बलवत्तमाम्। यया सपत्नीं बाधते यया संविन्दते पतिम्॥ १॥

इमाम्। खनामि। ओषधिम्। वीरुधम्। बलवत्ऽतमाम्।

यया। सऽपत्नीम्। बाधते। यया। सम्ऽविन्दते। पतिम्॥ १॥

उत्तानपर्णे सुभगे देवजूते सहस्वति। सपत्नीं मे परा धम पतिं मे केवलं कुरु॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्तान॑ऽपर्णे । सुऽभ॑गे । देव॑ऽजूते । सह॑स्वति । सुऽपत्नी॑म् । मे । परा॑ । धम । पति॑म् । मे । केव॑लम् । कुरु ॥ २ ॥

उत्त॑राहमु॑त्तर उत्तरेदुत्त॑राभ्यः । अथा॑ सपत्नी या ममाध॑रा साध॑राभ्यः ॥ ३ ॥

उत्ऽत॑रा । अहम् । उत्ऽतरे । उत्ऽत॑रा । इत् । उत्ऽत॑राभ्यः ।

अथ॑ । सुऽपत्नी॑ । या । मम॑ । अध॑रा । सा । अध॑राभ्यः ॥ ३ ॥

नह्य॑स्या नाम॑ गृभ्णामि नो अस्मिन्र॑मते जने॑ । परा॑मेव प॑रावतं॑ सपत्नीं॑ गमयामसि ॥ ४ ॥

नहि । अस्याः । नाम॑ । गृभ्णामि॑ । नो इति॑ । अस्मिन् । रमते । जने॑ ।

परा॑म् । एव । पराऽवत॑म् । सुऽपत्नी॑म् । गमयामसि ॥ ४ ॥

अहम॑स्मि सह॑मानाथ त्वम॑सि सासहिः । उभे सह॑स्वती भूत्वी सपत्नीं॑ मे सहावहै ॥ ५ ॥

अहम् । अस्मि । सह॑माना । अथ॑ । त्वम् । असि । ससहिः ।

उभे इति॑ । सह॑स्वती इति॑ । भूत्वी । सपत्नी॑म् । मे । सहावहै ॥ ५ ॥

उप॑ तेऽधां सह॑मानामभि त्वा॑धां सही॑यसा ।

मामनु प्र ते मनो॑ वत्सं गौरि॑व धावतु पथा वारि॑व धावतु ॥ ६ ॥ [३]

उप॑ । ते । अधाम् । सह॑मानाम् । अभि । त्वा । अधाम् । सही॑यसा ।

माम् । अनु॑ । प्र । ते । मन॑ः । वत्सम् । गौःऽइ॑व । धावतु । पथा । वाःऽइ॑व । धावतु ॥ ६ ॥

[१४९ (१४६)] [६ देवमुनि ऐरम्मदः । अरण्यानी । अनुष्टुप् ।]

अर॑ण्यान्यर॑ण्यान्यसौ या प्रेव नश्य॑सि । कथा ग्राम॑ न पृ॑च्छसि न त्वा भीरि॑व विन्दतीँ३ ॥ १ ॥

अर॑ण्यानि । अर॑ण्यानि । असौ । या । प्रऽइ॑व । नश्य॑सि ।

कथा । ग्राम॑म् । न । पृच्छसि । न । त्वा । भीःऽइ॑व । विन्दतीँ३ ॥ १ ॥

वृषारवाय वद॑ते यदुपाव॑ति चिच्चिकः । आघाटिभि॑रिव धावयन्नरण्यानिर्म॑हीयते ॥ २ ॥

वृषऽरवाय॑ । वद॑ते । यत् । उपऽअव॑ति । चिच्चिकः ।

आघाटिभि॑ःऽइव । धावय॑न् । अरण्यानिः । महीयते ॥ २ ॥

उत गाव॑इवादन्त्युत वेश्मै॑व दृश्यते । उतो अ॑रण्यानिः सायं श॑कटीरि॑व सर्जति ॥ ३ ॥

उत । गाव॑ःऽइव । अदन्ति । उत । वेश्म॑ऽइव । दृश्यते ।

उतो इति॑ । अरण्यानिः । सायम् । शकटीःऽइ॑व । सर्जति ॥ ३ ॥

गामङ्गैष आ ह्व॑यति दार्वङ्गैषो अपा॑वधीत् । वस॑न्नरण्यान्यां सायमक्रु॑क्षदिति॑ मन्यते ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गाम्। अङ्ग। एषः। आ। ह्वयति। दारु। अङ्ग। एषः। अप। अवधीत्।

वसन्। अरण्यान्याम्। सायम्। अक्रुक्षत्। इति। मन्यते॥ ४॥

न वा अरण्यानिर्हन्त्यन्यश्चेनाभिगच्छति। स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते॥ ५॥

न। वै। अरण्यानिः। हन्ति। अन्यः। च। इत्। न। अभिऽगच्छति।

स्वादोः। फलस्य। जग्ध्वाय। यथाऽकामम्। नि। पद्यते॥ ५॥

आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम्। प्राहं मृगाणां मातरमरण्यानिमशंसिषम्॥ ६॥ [४]

आञ्जनऽगन्धिम्। सुरभिम्। बहुऽअन्नाम्। अकृषिऽवलाम्।

प्र। अहम्। मृगाणाम्। मातरम्। अरण्यानिम्। अशंसिषम्॥ ६॥

[१५० (१४७)] [५ सुवेदाः शैरीषिः। इन्द्रः। जगती, ५ त्रिष्टुप्।]

श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं नर्यं विवेरपः।
उभे यत्त्वा भवतो रोदसी अनु रेजते शुष्मात्पृथिवी चिदद्रिवः॥ १॥

श्रत्। ते। दधामि। प्रथमाय। मन्यवे। अहन्। यत्। वृत्रम्। नर्यम्। विवेः। अपः।

उभे इति। यत्। त्वा। भवतः। रोदसी इति। अनु। रेजते। शुष्मात्। पृथिवी। चित्। अद्रिऽवः॥ १॥

त्वं मायाभिरनवद्य मायिनं श्रवस्यता मनसा वृत्रमर्दयः।
त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु॥ २॥

त्वम्। मायाभिः। अनवद्य। मायिनम्। श्रवस्यता। मनसा। वृत्रम्। अर्दयः।

त्वाम्। इत्। नरः। वृणते। गोऽइष्टिषु। त्वाम्। विश्वासु। हव्यासु। इष्टिषु॥ २॥

ऐषु चाकन्धि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघम्।
अर्चन्ति तोके तनये परिष्टिषु मेधसाता वाजिनमह्नये धने॥ ३॥

आ। एषु। चाकन्धि। पुरुऽहूत। सूरिषु। वृधासः। ये। मघऽवन्। आनशुः। मघम्।

अर्चन्ति। तोके। तनये। परिष्टिषु। मेधऽसाता। वाजिनम्। अह्नये। धने॥ ३॥

स इन्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति।
त्वावृधो मघवन्दाश्वध्वरो मक्षू स वाजं भरते धना नृभिः॥ ४॥

सः। इत्। नु। रायः। सुऽभृतस्य। चाकनत्। मदम्। यः। अस्य। रंह्यम्। चिकेतति।

त्वाऽवृधः। मघऽवन्। दाशुऽअध्वरः। मक्षु। सः। वाजम्। भरते। धना। नृऽभिः॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वं शर्धाय महिना गृणान उरु कृधि मघवञ्छग्धि रायः।
त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता॥ ५॥ [५]
त्वम्। शर्धाय। महिना। गृणानः। उरु। कृधि। मघऽवन्। शग्धि। रायः।
त्वम्। नः। मित्रः। वरुणः। न। मायी। पित्वः। न। दस्म। दयसे। विऽभक्ता॥ ५॥

[१५१ (१४८)] [५ पृथुर्वैन्यः। इन्द्रः। त्रिष्टुप्।]

सुष्वाणास इन्द्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण वाजम्।
आ नो भर सुवितं यस्य चाकन्त्मना तना सनुयाम त्वोताः॥ १॥
सुस्वानासः। इन्द्र। स्तुमसि। त्वा। ससऽवांसः। च। तुविऽनृम्ण। वाजम्।
आ। नः। भर। सुवितम्। यस्य। चाकन्। त्मना। तना। सनुयाम। त्वाऽऊताः॥ १॥
ऋष्वस्त्वमिन्द्र शूर जातो दासीर्विशः सूर्येण सह्याः।
गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमम्॥ २॥
ऋष्वः। त्वम्। इन्द्र। शूर। जातः। दासीः। विशः। सूर्येण। सह्याः।
गुहा। हितम्। गुह्यम्। गूळ्हम्। अप्ऽसु। बिभृमसि। प्रऽस्रवणे। न। सोमम्॥ २॥
अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं चकानः।
ते स्याम ये रणयन्त सोमैरेनोत तुभ्यं रथोळ्ह भक्षैः॥ ३॥
अर्यः। वा। गिरः। अभि। अर्च। विद्वान्। ऋषीणाम्। विप्रः। सुऽमतिम्। चकानः।
ते। स्याम। ये। रणयन्त। सोमैः। एना। उत। तुभ्यम्। रथऽओळ्ह। भक्षैः॥ ३॥
इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः।
तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन्॥ ४॥
इमा। ब्रह्म। इन्द्र। तुभ्यम्। शंसि। दाः। नृऽभ्यः। नृणाम्। शूर। शवः।
तेभिः। भव। सऽक्रतुः। येषु। चाकन्। उत। त्रायस्व। गृणतः। उत। स्तीन्॥ ४॥
श्रुधी हवमिन्द्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः।
आ यस्ते योनिं घृतवन्तमस्वारूर्मिर्न निम्नैर्द्रवयन्त वक्वाः॥ ५॥ [६]
श्रुधि। हवम्। इन्द्र। शूर। पृथ्याः। उत। स्तवसे। वेन्यस्य। अर्कैः।
आ। यः। ते। योनिम्। घृतऽवन्तम्। अस्वाः। ऊर्मिः। न। निम्नैः। द्रवयन्त। वक्वाः॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१५२ (१४९)] [५ अर्चन् हैरण्यस्तूपः। सविता। त्रिष्टुप्।]

स॒वि॒ता य॒न्त्रैः पृ॑थि॒वीम॑रम्णादस्कम्भ॒ने स॑वि॒ता द्याम॑दृंहत्।

अश्व॑मिवाधुक्ष॒द्धुनि॑म॒न्तरि॑क्षम॒तूर्ते॑ ब॒द्धं स॑वि॒ता स॑मु॒द्रम्॥ १॥

स॒वि॒ता। य॒न्त्रैः। पृ॒थि॒वीम्। अ॒र॒म्णा॒त्। अ॒स्क॒म्भ॒ने। स॒वि॒ता। द्याम्। अ॒दृं॒ह॒त्।

अश्व॑म्ऽइव। अ॒धु॒क्ष॒त्। धुनि॑म्। अ॒न्तरि॑क्षम्। अ॒तूर्ते॑। ब॒द्धम्। स॒वि॒ता। स॒मु॒द्रम्॥ १॥

यत्रा॑ समु॒द्रः स्क॑भि॒तो व्यौन॒दपां॑ नपात्सवि॒ता तस्य॑ वेद।

अतो॒ भूरत॑ आ॒ उत्थि॑त॒ं रजोऽतो॒ द्यावा॑पृथि॒वी अ॑प्रथेताम्॥ २॥

यत्र॑। स॒मु॒द्रः। स्क॒भि॒तः। वि। औन॑त्। अपा॑म्। न॒पा॒त्। स॒वि॒ता। तस्य॑। वे॒द॒।

अत॑ः। भूः। अत॑ः। आ॒ः। उत्थि॑तम्। रज॑ः। अत॑ः। द्यावा॑पृथिवी इति॑। अ॒प्र॒थे॒ता॒म्॥ २॥

प॒श्चेदम॒न्यद॑भव॒द्यज॑त्रमम॑र्त्यस्य॒ भुव॑नस्य भू॒ना।

सु॒प॒र्णो अ॒ङ्ग स॑वि॒तुर्ग॒रुत्मा॒न्पूर्वो॑ जा॒तः स उ॑ अ॒स्यानु॒ धर्म॑॥ ३॥

प॒श्चा। इ॒दम्। अ॒न्यत्। अ॒भ॒व॒त्। यज॑त्रम्। अम॑र्त्यस्य। भुव॑नस्य। भूना।

सु॒ऽप॒र्णः। अ॒ङ्ग। स॒वि॒तुः। ग॒रुत्मा॑न्। पूर्व॑ः। जा॒तः। सः। ऊँ इति॑। अ॒स्य॒। अनु॑। धर्म॑॥ ३॥

गाव॑इव॒ ग्रामं॑ यूयु॑धिरि॒वाश्वा॑न्वा॒श्रेव॑ व॒त्सं सु॒मना॒ दुहा॑ना।

पति॑रिव जा॒याम॒भि नो॒ न्ये॑तु ध॒र्ता दि॒वः स॑वि॒ता वि॒श्ववा॑रः॥ ४॥

गाव॑ःऽइव। ग्राम॑म्। युयु॑धिःऽइव। अश्वा॑न्। वा॒श्राऽइ॑व। व॒त्सम्। सु॒ऽमना॑ः। दुहा॑ना।

पति॑ःऽइव। जायाम्। अभि। नः। नि। ए॒तु॒। ध॒र्ता। दि॒वः। स॒वि॒ता। वि॒श्वऽवा॑रः॥ ४॥

हिर॑ण्यस्तूपः सवित॒र्यथा॑ त्वाङ्गि॒रसो॒ जु॒ह्वे वाजे॑ अ॒स्मिन्।

ए॒वा त्वार्च॒न्नव॑से॒ वन्द॑मा॒नः सोम॑स्येवा॒ंशुं प्रति॑ जागरा॒हम्॥ ५॥ [७]

हिर॑ण्यऽस्तूपः। स॒वि॒त॒ः। यथा॑। त्वा॒। आ॒ङ्गि॒र॒स॒ः। जु॒ह्वे। वाजे॑। अ॒स्मिन्।

ए॒व। त्वा॒। अर्च॑न्। अव॑से। वन्द॑मानः। सोम॑स्यऽइव। अ॒ंशुम्। प्रति॑। जा॒ग॒र॒। अ॒हम्॥ ५॥

[१५३ (१५०)] [५ मृळीको वासिष्ठः। अग्निः। बृहती, ४-५ उपरिष्टाज्ज्योतिः, ४ जगती वा।]

समि॑द्धश्चि॒त्समि॑ध्यसे दे॒वेभ्यो॑ हव्यवाहन।

आ॒दि॒त्यै रु॒द्रैर्वसु॑भिर्न॒ आ ग॑हि मृ॒ळीका॑य न॒ आ ग॑हि॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्ऽइद्धः। चित्। सम्। इध्यसे। देवेभ्यः। हव्यऽवाहन।

आदित्यैः। रुद्रैः। वसुऽभिः। नः। आ। गहि। मृळीकाय। नः। आ। गहि॥ १॥

इमं यज्ञमिदं वचो जुजुषाण उपागहि। मर्तासस्त्वा समिधान हवामहे मृळीकाय हवामहे॥ २॥

इमम्। यज्ञम्। वचः। जुजुषाणः। उपऽआगहि।

मर्तासः। त्वा। सम्ऽइधान। हवामहे। मृळीकाय। हवामहे॥ २॥

त्वामु जातवेदसं विश्ववारं गृणे धिया।

अग्ने देवाँ आ वह नः प्रियव्रतान् मृळीकाय प्रियव्रतान्॥ ३॥

त्वाम्। ऊँ इति। जातऽवेदसम्। विश्वऽवारम्। गृणे। धिया।

अग्ने। देवान्। आ। वह। नः। प्रियऽव्रतान्। मृळीकाय। प्रियऽव्रतान्॥ ३॥

अग्निर्देवो देवानामभवत्पुरोहितोऽग्निं मनुष्या३ ऋषयः समीधिरे।

अग्निं महो धनसातावहं हुवे मृळीकं धनसातये॥ ४॥

अग्निः। देवः। देवानाम्। अभवत्। पुरःऽहितः। अग्निम्। मनुष्याः। ऋषयः। सम्। ईधिरे।

अग्निम्। महः। धनऽसातौ। अहम्। हुवे। मृळीकम्। धनऽसातये॥ ४॥

अग्निरत्रिं भरद्वाजं गविष्ठिरं प्रावन्नः कण्वं त्रसदस्युमाहवे।

अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय पुरोहितः॥ ५॥ [८]

अग्निः। अत्रिम्। भरत्ऽवाजम्। गविष्ठिरम्। प्र। आवत्। नः। कण्वम्। त्रसदस्युम्। आऽहवे।

अग्निम्। वसिष्ठः। हवते। पुरःऽहितः। मृळीकाय। पुरःऽहितः॥ ५॥

[१५४ (१५१)] [५ श्रद्धा कामायनी। श्रद्धा। अनुष्टुप्।]

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि॥ १॥

श्रद्धया। अग्निः। सम्। इध्यते। श्रद्धया। हूयते। हविः।

श्रद्धाम्। भगस्य। मूर्धनि। वचसा। आ। वेदयामसि॥ १॥

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः। प्रियं भोजेषु यज्वस्विदं म उदितं कृधि॥ २॥

प्रियम्। श्रद्धे। ददतः। प्रियम्। श्रद्धे। दिदासतः।

प्रियम्। भोजेषु। यज्वऽसु। इदम्। मे। उदितम्। कृधि॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वस्वस्माकमुदितं कृधि॥ ३॥

यथा। देवाः। असुरेषु। श्रद्धाम्। उग्रेषु। चक्रिरे।

एवम्। भोजेषु। यज्वऽसु। अस्माकम्। उदितम्। कृधि॥ ३॥

श्रद्धां देवा यजमाना वायुगोपा उपासते। श्रद्धां हृदय्य१याकूत्या श्रद्धया विन्दते वसु॥ ४॥

श्रद्धाम्। देवाः। यजमानाः। वायुऽगोपाः। उप। आसते।

श्रद्धाम्। हृदय्यया। आऽकूत्या। श्रद्धया। विन्दते। वसु॥ ४॥

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि। श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः॥ ५॥ [९]

श्रद्धाम्। प्रातः। हवामहे। श्रद्धाम्। मध्यंदिनम्। परि। {११}

श्रद्धाम्। सूर्यस्य। निऽम्रुचि। श्रद्धे। श्रत्। धापय। इह। नः॥ ५॥

★ [१५५] [९ मेधावी। मेधासूक्तम्। १-३, ८ अनुष्टुभः, ४ महाबृहती; ५ पंक्तिः, ६ विराड् जगती, ७ गायत्री; ९ त्रिष्टुप्]

मेधां मह्यमङ्गिरसो मेधां सप्त ऋषयो ददुः। मेधामिन्द्रश्चाग्निश्च मेधां धाता दधातु मे॥ १॥ ★

मेधाम्। मह्यम्। अङ्गिरसः। मेधाम्। सप्त। ऋषयः। ददुः।

मेधाम्। इन्द्रः। च। अग्निः। च। मेधाम्। धाता। दधातु। मे॥ १॥

मेधां मे वरुणो राजा मेधां देवी सरस्वती। मेधां मे अश्विनौ देवावा धत्तां पुष्करस्रजा॥ २॥ ★

मेधाम्। मे। वरुणः। राजा। मेधाम्। देवी। सरस्वती।

मेधाम्। मे। अश्विनौ। देवौ। आ। धत्ताम्। पुष्करऽस्रजा॥ २॥

या मेधाप्सरसि गन्धर्वेषु च यन्नरे। दैवी या मानुषी मेधा सा मामा विशतादिह॥ ३॥ ★

या। मेधा। अप्सरसि। गन्धर्वेषु। च। यत्। नरे।

दैवी। या। मानुषी। मेधा। सा। माम्। आ। विशतात्। इह॥ ३॥

यन्मे नोक्तं प्र द्रवतां शकेयं यदनुब्रुवे।

निशामितं नि शामहै मयि श्रुतं सह व्रतेन भूयासं ब्रह्मणा सं गमेमहि॥ ४॥ ★

यत्। मे। न। उक्तम्। प्र। द्रवताम्। शकेयम्। यत्। अनुऽब्रुवे॥

निऽशामितम्। नि। शामहै। मयि। श्रुतम्। सह। व्रतेन। भूयासम्। ब्रह्मणा। सम्। गमेमहि॥ ४॥

शरीरं मे विचक्षणं वाङ् मे मधुमद्दुहा।

अवृधमहमसौ सूर्यो ब्रह्मण आणी स्थः। श्रुतं मे मा प्र हासीत्॥ ५॥ ★ [१०]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शरीरम्। मे। वि॒ऽच॒क्षणम्। वाक्। मे। मधु॑मत्ऽदुहा।

अवृ॑धम्। अ॒हम्। अ॒सौ। सूर्यः॑। ब्रह्म॑णः। आ॒णी। स्थः॒।

श्रु॒तम्। मे॒। मा। प्र। हा॒सी॒त्॥ ५॥

मे॒धां दे॒वीं मन॑सा रेज॑मानां गन्ध॒र्वजु॑ष्टां॒ प्रति॑ नो जुषस्व।

मह्यं॑ मे॒धां व॑द॒ मह्यं॒ श्रियं॑ वद मेधा॒वी भू॑यासमजराज॒रि॒ष्णुः॥ ६॥ ★

मे॒धाम्। दे॒वीम्। मन॑सा। रेज॑मानाम्। ग॒न्ध॒र्वऽजु॑ष्टाम्। प्रति॑। न॒ः। जु॒ष॒स्व॒॥

मह्य॑म्। मे॒धाम्। व॒द॒। मह्य॑म्। श्रिय॑म्। व॒द॒। मे॒धा॒वी। भू॒या॒स॒म्। अ॒ज॒र॒ऽआ॒ज॒रि॒ष्णुः॥ ६॥

सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒ काम्य॑म्। स॒निं मे॒धाम॑यासिषम्॥ ७॥ ★

सद॑सः। पति॑म्। अद्भु॑तम्। प्रि॒यम्। इन्द्र॑स्य। काम्य॑म्। स॒निम्। मे॒धाम्। अ॒या॒सि॒ष॒म्॥ ७॥

यां मे॒धां दे॑वग॒णाः पि॒तर॑श्चोपा॒स॑ते। तया॒ माम॒द्य मे॒धयाग्ने॑ मे॒धा॒विनं॑ कुरु॥ ८॥ ★

याम्। मे॒धाम्। दे॒व॒ऽग॒णाः। पि॒तर॑ः। च॒। उ॒प॒ऽआस॑ते।

तया॑। माम्। अ॒द्य। मे॒धया॑। अग्ने॑। मे॒धा॒विन॑म्। कु॒रु॒॥ ८॥

मे॒धा॒व्य१॒॑हं सु॒मना॑ः सु॒प्रती॑कः श्र॒द्धाम॑ना स॒त्यम॑तिः सु॒शेव॑ः।

म॒हाय॑शा धारयि॒ष्णुः प्र॒वक्ता भू॑यास॒मर्ये॑ स्व॒धया॑ प्र॒योगे॑॥ ९॥ ★ [११] {११}

मे॒धा॒वी। अ॒हम्। सु॒ऽमना॑ः। सु॒ऽप्रती॑कः। श्र॒द्धाऽम॑ना। स॒त्यऽम॑तिः। सु॒ऽशेव॑ः।

म॒हाऽय॑शाः। धा॒र॒यि॒ष्णुः। प्र॒ऽव॒क्ता। भू॒यास॑म्। अ॒र्ये। स्व॒धया॑। प्र॒ऽयोगे॑॥ ९॥

[१५६ (१५२)] [५ शासो भारद्वाजः। इन्द्रः। अनुष्टुप्।]

शा॒स इ॒त्था म॒हाँ अ॑स्यमित्रखा॒दो अद्भु॑तः। न यस्य॑ ह॒न्यते॒ सखा॒ न जीय॑ते॒ कदा॑ च॒न॥ १॥

शा॒सः। इ॒त्था। म॒हान्। अ॒सि॒। अ॒मि॒त्र॒ऽखा॒दः। अद्भु॑तः।

न। यस्य॑। ह॒न्यते॑। सखा॑। न। जीय॑ते। कदा॑। च॒न॥ १॥

स्व॒स्ति॒दा वि॒शस्पति॑र्वृत्र॒हा वि॑मृधो व॒शी। वृषेन्द्र॑ः पुर ए॑तु नः सोम॒पा अ॑भयंक॒रः॥ २॥

स्व॒स्ति॒ऽदाः। वि॒शः। पति॑ः। वृ॒त्र॒ऽहा। वि॒ऽमृधः। व॒शी।

वृषा॑। इन्द्र॑ः। पु॒रः। ए॒तु॒। न॒ः। सो॒म॒ऽपाः। अ॒भ॒य॒म्ऽक॒रः॥ २॥

वि रक्षो॒ वि मृधो॑ जहि॒ वि वृ॒त्रस्य॒ हनू॑ रुज। वि म॒न्युमि॑न्द्र वृत्रहन्न॒मित्र॑स्याभि॒दास॑तः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि। रक्षः। वि। मृधः। जहि। वि। वृत्रस्य। हनू इति। रुज।
वि। मन्युम्। इन्द्र। वृत्रहन्। अमित्रस्य। अभिदासतः॥ ३॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। यो अस्माँ अभिदासत्यधरं गमया तमः॥ ४॥
वि। नः। इन्द्र। मृधः। जहि। नीचा। यच्छ। पृतन्यतः।
यः। अस्मान्। अभिदासति। अधरम्। गमय। तमः॥ ४॥
अपेन्द्र द्विषतो मनोऽप जिज्यासतो वधम्। वि मन्योः शर्म यच्छ वरीयो यवया वधम्॥ ५॥
अप। इन्द्र। द्विषतः। मनः। अप। जिज्यासतः। वधम्। [१२ (१०)]
वि। मन्योः। शर्म। यच्छ। वरीयः। यवय। वधम्॥ ५॥

[१५७ (१५३)] [५ देवजामय इन्द्रमातरः। इन्द्रः। गायत्री।]

ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते। भेजानासः सुवीर्यम्॥ १॥
ईङ्खयन्तीः। अपस्युवः। इन्द्रम्। जातम्। उप। आसते। भेजानासः। सुवीर्यम्॥ १॥
त्वमिन्द्र बलादधि सहसो जात ओजसः। त्वं वृषन्वृषेदसि॥ २॥
त्वम्। इन्द्र। बलात्। अधि। सहसः। जातः। ओजसः। त्वम्। वृषन्। वृषा। इत्। असि॥ २॥
त्वमिन्द्रासि वृत्रहा व्य१न्तरिक्षमतिरः। उद् द्यामस्तभ्ना ओजसा॥ ३॥
त्वम्। इन्द्र। असि। वृत्रहा। वि। अन्तरिक्षम्। अतिरः। उत्। द्याम्। अस्तभ्नाः। ओजसा॥ ३॥
त्वमिन्द्र सजोषसमर्कं बिभर्षि बाह्वोः। वज्रं शिशान ओजसा॥ ४॥
त्वम्। इन्द्र। सजोषसम्। अर्कम्। बिभर्षि। बाह्वोः। वज्रम्। शिशानः। ओजसा॥ ४॥
त्वमिन्द्राभिभूरसि विश्वा जातान्योजसा। स विश्वा भुव आभवः॥ ५॥ [१३ (११)]
त्वम्। इन्द्र। अभिभूः। असि। विश्वा। जातानि। ओजसा। सः। विश्वाः। भुवः। आ। अभवः॥ ५॥

[१५८ (१५४)] [५ यमी वैवस्वती। भाववृत्तम्। अनुष्टुप्।]

सोम एकेभ्यः पवते घृतमेक उपासते। येभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छतात्॥ १॥
सोमः। एकेभ्यः। पवते। घृतम्। एके। उप। आसते।
येभ्यः। मधु। प्रधावति। तान्। चित्। एव। अपि। गच्छतात्॥ १॥
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः। तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तप॑सा । ये । अ॒ना॒धृ॒ष्याः । तप॑सा । ये । स्वः॑ । य॒युः ।

तपः॑ । ये । च॒क्रि॒रे । महः॑ । तान् । चि॒त् । ए॒व । अपि॑ । ग॒च्छ॒ता॒त् ॥ २ ॥

ये युध्य॑न्ते प्र॒धने॑षु॒ शूरा॑सो॒ ये त॑नू॒त्यजः॑ । ये वा॑ स॒हस्र॑दक्षिणा॒स्ताँश्चि॑दे॒वापि॑ गच्छतात् ॥ ३ ॥

ये । युध्य॑न्ते । प्र॒ऽधने॑षु । शूरा॑सः । ये । त॒नू॒ऽत्यजः॑ ।

ये । वा॒ । स॒हस्र॑ऽदक्षिणाः । तान् । चि॒त् । ए॒व । अपि॑ । ग॒च्छ॒ता॒त् ॥ ३ ॥

ये चि॒त्पूर्व॑ ऋत॒साप॑ ऋ॒ताना॑न ऋता॒वृधः॑ । पि॒तॄन्तप॑स्वतो यम॒ ताँश्चि॑दे॒वापि॑ गच्छतात् ॥ ४ ॥

ये । चि॒त् । पूर्वे॑ । ऋ॒त॒ऽसापः॑ । ऋ॒त॒ऽवा॑नः । ऋ॒त॒ऽवृधः॑ ।

पि॒तॄन् । तप॑स्वतः । य॒म॒ । तान् । चि॒त् । ए॒व । अपि॑ । ग॒च्छ॒ता॒त् ॥ ४ ॥

स॒हस्र॑णीथाः क॒वयो॒ ये गो॑पा॒यन्ति॒ सूर्य॑म् ।

ऋषी॒न् तप॑स्वतो यम तपो॒जाँ अपि॑ गच्छतात् ॥ ५ ॥ [१४ (१२)]

स॒हस्र॑ऽनीथाः । क॒वयः॑ । ये । गो॒पा॒यन्ति॑ । सूर्य॑म् ।

ऋषी॑न् । तप॑स्वतः । य॒म॒ । त॒पः॒ऽजान् । अपि॑ । ग॒च्छ॒ता॒त् ॥ ५ ॥

[१५९ (१५५)] [५ शिरिम्बिठो भारद्वाजः । अलक्ष्मीघ्नम्, २-३ ब्रह्मणस्पतिः, ५ विश्वे देवाः । अनुष्टुप् ।]

अरा॑यि॒ काणे॒ विक॑टे॒ गि॒रिं ग॑च्छ सदान्वे । शिरिम्बि॑ठस्य॒ सत्व॑भि॒स्तेभि॑ष्ट्वा चातयामसि ॥ १ ॥

अरा॑यि । काणे॑ । वि॒ऽक॑टे । गि॒रिम् । ग॒च्छ॒ । स॒दा॒न्वे॒ ।

शि॒रिम्बि॑ठस्य । सत्व॑ऽभिः । तेभिः॑ । त्वा॒ । चा॒त॒या॒म॒सि॒ ॥ १ ॥

च॒त्तो इ॒तश्च॒त्तामु॒तः सर्वा॑ भ्रू॒णान्या॒रुषी॑ । अ॒रा॒य्यं॑ ब्रह्मणस्पते॒ तीक्ष्ण॑शृङ्गोदृ॒षन्नि॑हि ॥ २ ॥

च॒त्तो इति॑ । इ॒तः । च॒त्ता । अ॒मुतः॑ । सर्वा॑ । भ्रूणानि॑ । आ॒रुषी॑ ।

अ॒रा॒य्य॑म् । ब्र॒ह्म॒णः॒ । प॒ते॒ । तीक्ष्ण॑ऽशृङ्ग । उ॒त्ऽऋ॒षन् । इ॒हि॒ ॥ २ ॥

अ॒दो यद्दारु॒ प्लव॑ते॒ सिन्धोः॑ पा॒रे अ॑पूरु॒षम् । तदा र॑भस्व दुर्हणो॒ तेन॑ गच्छ परस्त॒रम् ॥ ३ ॥

अ॒दः । यत् । दारु॑ । प्लव॑ते । सिन्धोः॑ । पा॒रे । अ॒पु॒रु॒षम् ।

तत् । आ । र॒भ॒स्व॒ । दु॒र्ह॒नो॒ इति॑ दुःऽहनो । तेन॑ । ग॒च्छ॒ । प॒रः॒ऽत॒रम् ॥ ३ ॥

यद्ध॒ प्राची॒रज॑ग॒न्तोरो॑ मण्डूरधाणिकीः । ह॒ता इन्द्र॑स्य॒ शत्र॑वः॒ सर्वे॑ बुद्बु॒दया॑शवः ॥ ४ ॥

यत् । ह॒ । प्राचीः॑ । अज॑गन्त । उरः॑ । म॒ण्डू॒र॒ऽधा॒णि॒कीः॒ ।

ह॒ताः । इन्द्र॑स्य । शत्र॑वः । सर्वे॑ः । बु॒द्बु॒द॑ऽया॑शवः ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥ ५ ॥ [१५ (१३)]

परि। इमे। गाम्। अनेषत। परि। अग्निम्। अहृषत। देवेषु। अक्रत। श्रवः। कः। इमान्। दधर्षति ॥ ५ ॥।

[१६० (१५६)] [५ केतुराग्नेयः। अग्निः। गायत्री।]

अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु। तेन जेष्म धनंधनम् ॥ १ ॥

अग्निम्। हिन्वन्तु। नः। धियः। सप्तिम्। आशुम्ऽइव। आजिषु। तेन। जेष्म। धनम्ऽधनम् ॥ १ ॥

यया गा आकरामहे सेनयाग्ने तवोत्या। तां नो हिन्व मघत्तये ॥ २ ॥

यया। गाः। आऽकरामहे। सेनया। अग्ने। तव। ऊत्या। ताम्। नः। हिन्व। मघत्तये ॥ २ ॥

आग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनम्। अङ्धि खं वर्तया पणिम् ॥ ३ ॥

आ। अग्ने। स्थूरम्। रयिम्। भर। पृथुम्। गोऽमन्तम्। अश्विनम्। अङ्धि। खम्। वर्तय। पणिम् ॥ ३ ॥

अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि। दधज्ज्योतिर्जनेभ्यः ॥ ४ ॥

अग्ने। नक्षत्रम्। अजरम्। आ। सूर्यम्। रोहयः। दिवि। दधत्। ज्योतिः। जनेभ्यः ॥ ४ ॥

अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्। बोधा स्तोत्रे वयो दधत् ॥ ५ ॥ [१६ (१४)]

अग्ने। केतुः। विशाम्। असि। प्रेष्ठः। श्रेष्ठः। उपस्थऽसत्। बोध। स्तोत्रे। वयः। दधत् ॥ ५ ॥

[१६१ (१५७)] [५ भुवन आप्त्यः, साधनो वा भौवनः। विश्वे देवाः। द्विपदा त्रिष्टुप्।]

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ॥ १ ॥

इमा। नु। कम्। भुवना। सीसधाम। इन्द्रः। च। विश्वे। च। देवाः ॥ १ ॥

यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥ २ ॥

यज्ञम्। च। नः। तन्वम्। च। प्रऽजाम्। च। आदित्यैः। इन्द्रः। सह। चीक्लृपाति ॥ २ ॥

आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ॥ ३ ॥

आदित्यैः। इन्द्रः। सऽगणः। मरुत्ऽभिः। अस्माकम्। भूतु। अविता। तनूनाम् ॥ ३ ॥

हत्वाय देवा असुरान् यदायन् देवा देवत्वमभिरक्षमाणाः ॥ ४ ॥

हत्वाय। देवाः। असुरान्। यत्। आयन्। देवाः। देवऽत्वम्। अभिऽरक्षमाणाः ॥ ४ ॥

प्रत्यञ्चमर्कमनयञ्छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ॥ ५ ॥ [१७ (१५)]

प्रत्यञ्चम्। अर्कम्। अनयन्। शचीभिः। आत्। इत्। स्वधाम्। इषिराम्। परि। अपश्यन् ॥ ५ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१६२ (१५८)] [५ चक्षुः सौर्यः। सूर्यः। गायत्री, २ स्वराट्।]

सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः॥ १॥

सूर्यः। नः। दिवः। पातु। वातः। अन्तरिक्षात्। अग्निः। नः। पार्थिवेभ्यः॥ १॥

जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति। पाहि नो दिद्युतः पतन्त्यः॥ २॥

जोष। सवितः। यस्य। ते। हरः। शतम्। सवान्। अर्हति। पाहि। नः। दिद्युतः। पतन्त्याः॥ २॥

चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः। चक्षुर्धाता दधातु नः॥ ३॥

चक्षुः। नः। देवः। सविता। चक्षुः। नः। उत। पर्वतः। चक्षुः। धाता। दधातु। नः॥ ३॥

चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः। सं चेदं वि च पश्येम॥ ४॥

चक्षुः। नः। धेहि। चक्षुषे। चक्षुः। विऽख्यै। तनूभ्यः। सम्। च। इदम्। वि। च। पश्येम॥ ४॥

सुसंदृशं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः॥ ५॥ [१८ (१६)]

सुऽसंदृशम्। त्वा। वयम्। प्रति। पश्येम। सूर्य। वि। पश्येम। नृऽचक्षसः॥ ५॥

[१६३ (१५९)] [६ शची पौलोमी। शची। अनुष्टुप्।]

उदसौ सूर्यो अगादुदयं मामको भगः। अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः॥ १॥

उत्। असौ। सूर्यः। अगात्। उत्। अयम्। मामकः। भगः।

अहम्। तत्। विद्वला। पतिम्। अभि। असाक्षि। विऽससहिः॥ १॥

अहं केतुरहं मूर्धाहमुग्रा विवाचनी। ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्॥ २॥

अहम्। केतुः। अहम्। मूर्धा। अहम्। उग्रा। विऽवाचनी।

मम। इत्। अनु। क्रतुम्। पतिः। सेहानायाः। उपऽआचरेत्॥ २॥

मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट्। उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः॥ ३॥

मम। पुत्राः। शत्रुऽहनः। अथो इति। मे। दुहिता। विऽराट्।

उत। अहम्। अस्मि। सम्ऽजया। पत्यौ। मे। श्लोकः। उत्ऽतमः॥ ३॥

यनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्ना किलाभुवम्॥ ४॥

येन। इन्द्रः। हविषा। कृत्वी। अभवत्। द्युम्नी। उत्ऽतमः।

इदम्। तत्। अक्रि। देवाः। असपत्ना। किल। अभुवम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी। आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव॥ ५॥

असपत्ना। सपत्नऽघ्नी। जयन्ती। अभिऽभूवरी।

आ। अवृक्षम्। अन्यासाम्। वर्चः। राधः। अस्थेयसाम्ऽइव॥ ५॥

समजैषमिमा अहं सपत्नीरभिभूवरी। यथाहमस्य वीरस्य विराजानि जनस्य च॥ ६॥

[१९ (१७)]

सम्। अजैषम्। इमाः। अहम्। सऽपत्नीः। अभिऽभूवरी।

यथा। अहम्। अस्य। वीरस्य। विऽराजानि। जनस्य। च॥ ६॥

[१६४ (१६०)] [५ पूरणो वैश्वामित्रः। इन्द्रः। त्रिष्टुप्।]

तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुञ्च।

इन्द्र मा त्वा यजमानासो अन्ये नि रीरमन् तुभ्यमिमे सुतासः॥ १॥

तीव्रस्य। अभिऽवयसः। अस्य। पाहि। सर्वऽरथा। वि। हरी इति। इह। मुञ्च।

इन्द्र। मा। त्वा। यजमानासः। अन्ये। नि। रीरमन्। तुभ्यम्। इमे। सुतासः॥ १॥

तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयन्ति।

इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम्॥ २॥

तुभ्यम्। सुताः। तुभ्यम्। ऊँ इति। सोत्वासः। त्वाम्। गिरः। श्वात्र्याः। आ। ह्वयन्ति।

इन्द्र। इदम्। अद्य। सवनम्। जुषाणः। विश्वस्य। विद्वान्। इह। पाहि। सोमम्॥ २॥

य उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति।

न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति॥ ३॥

यः। उशता। मनसा। सोमम्। अस्मै। सर्वऽहृदा। देवऽकामः। सुनोति।

न। गाः। इन्द्रः। तस्य। परा। ददाति। प्रऽशस्तम्। इत्। चारुम्। अस्मै। कृणोति॥ ३॥

अनुस्पष्टो भवत्येषो अस्य यो अस्मै रेवान्न सुनोति सोमम्।

निररत्नौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः॥ ४॥

अनुऽस्पष्टः। भवति। एषः। अस्य। यः। अस्मै। रेवान्। न। सुनोति। सोमम्।

निः। अरत्नौ। मघऽवा। तम्। दधाति। ब्रह्मऽद्विषः। हन्ति। अननुऽदिष्टः॥ ४॥

अश्वायन्तो गव्यन्तो वाजयन्तो हवामहे त्वोपगन्तवा उ।

आभूषन्तस्ते सुमतौ नवायां वयमिन्द्र त्वा शुनं हुवेम॥ ५॥

[२० (१८)]

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अश्व॰यन्तः। गव्यन्तः। वाजयन्तः। हवामहे। त्वा। उप॰गन्तवै। ऊँ इति।
आ॰भूषन्तः। ते। सु॰मतौ। नवायाम्। वयम्। इन्द्र। त्वा। शुनम्। हुवेम॥ ५॥

[१६५ (१६१)] [५ यक्ष्मनाशनः प्राजापत्यः, इन्द्रः, राजयक्ष्मघ्नं वा। त्रिष्टुप्, ५ अनुष्टुप्।]

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम्॥ १॥
मुञ्चामि। त्वा। हविषा। जीवनाय। कम्। अज्ञात॰यक्ष्मात्। उत। राज॰यक्ष्मात्।
ग्राहिः। जग्राह। यदि। वा। एतत्। एनम्। तस्याः। इन्द्राग्नी इति। प्र। मुमुक्तम्। एनम्॥ १॥

यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव।
तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय॥ २॥
यदि। क्षित॰आयुः। यदि। वा। परा॰इतः। यदि। मृत्योः। अन्तिकम्। नि॰इतः। एव।
तम्। आ। हरामि। निः॰ऋतेः। उप॰स्थात्। अस्पार्षम्। एनम्। शत॰शारदाय॥ २॥

सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम्।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम्॥ ३॥
सहस्र॰अक्षेण। शत॰शारदेन। शत॰आयुषा। हविषा। आ। अहार्षम्। एनम्।
शतम्। यथा। इमम्। शरदः। नयाति। इन्द्रः। विश्वस्य। दुः॰इतस्य। पारम्॥ ३॥

शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान्।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ ४॥
शतम्। जीव। शरदः। वर्धमानः। शतम्। हेमन्तान्। शतम्। ऊँ इति। वसन्तान्।
शतम्। इन्द्राग्नी इति। सविता। बृहस्पतिः। शत॰आयुषा। हविषा। इमम्। पुनः। दुः॥ ४॥

आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव। सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम्॥ ५॥
आ। अहार्षम्। त्वा। अविदम्। त्वा। पुनः। आ। अगाः। पुनः॰नव। [२१ (१९)]
सर्व॰अङ्ग। सर्वम्। ते। चक्षुः। सर्वम्। आयुः। च। ते। अविदम्॥ ५॥

[१६६ (१६२)] [६ रक्षोहा ब्राह्मः। गर्भरक्षोहा। अनुष्टुप्।]

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अमीवा यस्ते गर्भं दुर्णामा योनिमाशये॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ब्रह्मणा। अग्निः। सम्ऽविदानः। रक्षःऽहा। बाधताम्। इतः।
अमीवा। यः। ते। गर्भम्। दुःऽनामा। योनिम्। आऽशये॥ १॥

यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत्॥ २॥
यः। ते। गर्भम्। अमीवा। दुःऽनामा। योनिम्। आऽशये।
अग्निः। तम्। ब्रह्मणा। सह। निः। क्रव्यऽअदम्। अनीनशत्॥ २॥

यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि॥ ३॥
यः। ते। हन्ति। पतयन्तम्। निऽसत्स्नुम्। यः। सरीसृपम्।
जातम्। यः। ते। जिघांसति। तम्। इतः। नाशयामसि॥ ३॥

यस्त उरू विहरत्यन्तरा दंपती शये। योनिं यो अन्तरारेळ्हि तमितो नाशयामसि॥ ४॥
यः। ते। उरू इति। विऽहरति। अन्तरा। दंपती इति दम्ऽपती। शये।
योनिम्। यः। अन्तः। आऽरेळ्हि। तम्। इतः। नाशयामसि॥ ४॥

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि॥ ५॥
यः। त्वा। भ्राता। पतिः। भूत्वा। जारः। भूत्वा। निऽपद्यते।
प्रऽजाम्। यः। ते। जिघांसति। तम्। इतः। नाशयामसि॥ ५॥

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते।
प्रजां यस्ते जिघांसति तमितो नाशयामसि॥ ६॥ [२२ (२०)]
यः। त्वा। स्वप्नेन। तमसा। मोहयित्वा। निऽपद्यते।
प्रऽजाम्। यः। ते। जिघांसति। तम्। इतः। नाशयामसि॥ ६॥

[१६७ (१६३)] [६ विवृहा काश्यपः। यक्ष्मघ्नम्। अनुष्टुप्।]

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते॥ १॥
अक्षीभ्याम्। ते। नासिकाभ्याम्। कर्णाभ्याम्। छुबुकात्। अधि।
यक्ष्मम्। शीर्षण्यम्। मस्तिष्कात्। जिह्वायाः। वि। वृहामि। ते॥ १॥

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्।
यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ग्रीवाभ्यः। ते। उष्णिहाभ्यः। कीकसाभ्यः। अनूक्यात्।

यक्ष्मम्। दोषण्यम्। अंसाभ्याम्। बाहुऽभ्याम्। वि। वृहामि। ते ॥ २ ॥

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि।

यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते॥ ३ ॥

आन्त्रेभ्यः। ते। गुदाभ्यः। वनिष्ठोः। हृदयात्। अधि।

यक्ष्मम्। मतस्नाभ्याम्। यक्नः। प्लाशिऽभ्यः। वि। वृहामि। ते ॥ ३ ॥

ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्।

यक्ष्मं श्रोणिभ्यां भासदाद्भंससो वि वृहामि ते॥ ४ ॥

ऊरुऽभ्याम्। ते। अष्ठीवत्ऽभ्याम्। पार्ष्णिऽभ्याम्। प्रऽपदाभ्याम्।

यक्ष्मम्। श्रोणिऽभ्याम्। भासदात्। भंससः। वि। वृहामि। ते ॥ ४ ॥

मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः।

यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते॥ ५ ॥

मेहनात्। वनम्ऽकरणात्। लोमऽभ्यः। ते। नखेभ्यः।

यक्ष्मम्। सर्वस्मात्। आत्मनः। तम्। इदम्। वि। वृहामि। ते ॥ ५ ॥

अङ्गादङ्गाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि।

यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते॥ ६ ॥ [२३ (२१)]

अङ्गात्ऽअङ्गात्। लोम्नःऽलोम्नः। जातम्। पर्वणिऽपर्वणि।

यक्ष्मम्। सर्वस्मात्। आत्मनः। तम्। इदम्। वि। वृहामि। ते ॥ ६ ॥

[१६८ (१६४)] [५ प्रचेता आङ्गिरसः। दुःस्वप्ननाशनम्। अनुष्टुप्, ३ त्रिष्टुप्, ५ पङ्क्तिः।]

अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः॥ १ ॥

अप। इहि। मनसः। पते। अप। क्राम। परः। चर।

परः। निःऽऋत्यै। आ। चक्ष्व। बहुधा। जीवतः। मनः ॥ १ ॥

भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम्। भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः॥ २ ॥

भद्रम्। वै। वरम्। वृणते। भद्रम्। युञ्जन्ति। दक्षिणम्।

भद्रम्। वैवस्वते। चक्षुः। बहुऽत्रा। जीवतः। मनः ॥ २ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपन्तः।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु॥ ३॥

यत्। आऽशसा। निःऽशसा। अभिऽशसा। उपऽआरिम। जाग्रतः। यत्। स्वपन्तः।
अग्निः। विश्वानि। अप। दुःऽकृतानि। अजुष्टानि। आरे। अस्मत्। दधातु॥ ३॥

यदिन्द्र ब्रह्मस्पतेऽभिद्रोहं चरामसि। प्रचेता न आङ्गिरसो द्विषतां पात्वंहसः॥ ४॥

यत्। इन्द्र। ब्रह्मणः। पते। अभिऽद्रोहम्। चरामसि।
प्रऽचेताः। नः। आङ्गिरसः। द्विषताम्। पातु। अंहसः॥ ४॥

अजैष्माद्यासनाम चाभूमानागसो वयम्।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु॥ ५॥ [२४ (२२)]

अजैष्म। अद्य। असनाम। च। अभूम। अनागसः। वयम्॥ जाग्रत्ऽस्वप्नः। सम्ऽकल्पः।
पापः। यम्। द्विष्मः। तम्। सः। ऋच्छतु। यः। नः। द्वेष्टि। तम्। ऋच्छतु॥ ५॥

[१६९] [५ कपोतो नैर्ऋतः। विश्वे देवाः। त्रिष्टुप्।]

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे॥ १॥

देवाः। कपोतः। इषितः। यत्। इच्छन्। दूतः। निःऽऋत्याः। इदम्। आऽजगाम।
तस्मै। अर्चाम। कृणवाम। निःऽकृतिम्। शम्। नः। अस्तु। द्विऽपदे। शम्। चतुःऽपदे॥ १॥

शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु॥ २॥

शिवः। कपोतः। इषितः। नः। अस्तु। अनागाः। देवाः। शकुनः। गृहेषु।
अग्निः। हि। विप्रः। जुषताम्। हविः। नः। परि। हेतिः। पक्षिणी। नः। वृणक्तु॥ २॥

हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः॥ ३॥

हेतिः। पक्षिणी। न। दभाति। अस्मान्। आष्ट्र्याम्। पदम्। कृणुते। अग्निऽधाने।
शम्। नः। गोभ्यः। च। पुरुषेभ्यः। च। अस्तु। मा। नः। हिंसीत्। इह। देवाः। कपोतः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति।

यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे॥ ४॥

यत्। उलूकः। वदति। मोघम्। एतत्। यत्। कपोतः। पदम्। अग्नौ। कृणोति।

यस्य। दूतः। प्रऽहितः। एषः। एतत्। तस्मै। यमाय। नमः। अस्तु। मृत्यवे॥ ४॥

ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वम्।

संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात्पतिष्ठः॥ ५॥ [२५ (२३)]

ऋचा। कपोतम्। नुदत। प्रऽनोदम्। इषम्। मदन्तः। परि। गाम्। नयध्वम्।

सम्ऽयोपयन्तः। दुःऽइतानि। विश्वा। हित्वा। नः। ऊर्जम्। प्र। पतात्। पतिष्ठः॥ ५॥

[१७० (१६६)] [५ ऋषभो वैराजः, ऋषभः शाक्वरो वा। सपत्नघ्नम्। अनुष्टुप्, ५ महापङ्क्तिः।]

ऋषभं मा समानानां सपत्नानां विषासहिम्। हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम्॥ १॥

ऋषभम्। मा। समानानाम्। सऽपत्नानाम्। विऽससहिम्।

हन्तारम्। शत्रूणाम्। कृधि। विऽराजम्। गोऽपतिम्। गवाम्॥ १॥

अहमस्मि सपत्नहेन्द्रइवारिष्टो अक्षतः। अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः॥ २॥

अहम्। अस्मि। सपत्नऽहा। इन्द्रःऽइव। अरिष्टः। अक्षतः।

अधः। सऽपत्नाः। मे। पदोः। इमे। सर्वे। अभिऽस्थिताः॥ २॥

अत्रैव वोऽपि नह्याम्युभे आर्त्नीइव ज्यया। वाचस्पते नि षेधेमान्यथा मदधरं वदान्॥ ३॥

अत्र। एव। वः। अपि। नह्यामि। उभे इति। आर्त्नी इवेत्यार्त्नीऽइव। ज्यया।

वाचः। पते। नि। सेध। इमान्। यथा। मत्। अधरम्। वदान्॥ ३॥

अभिभूरहमागमं विश्वकर्मेण धाम्ना। आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे॥ ४॥

अभिऽभूः। अहम्। आ। अगमम्। विश्वऽकर्मेण। धाम्ना।

आ। वः। चित्तम्। आ। वः। व्रतम्। आ। वः। अहम्। सम्ऽइतिम्। ददे॥ ४॥

योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम्।

अधस्पदान्म उद्वदत मण्डूकाइवोदकान्मण्डूका उदकादिव॥ ५॥ [२६ (२४)]

योगऽक्षेमम्। वः। आऽदाय। अहम्। भूयासम्। उत्ऽतमः। आ। वः। मूर्धानम्। अक्रमीम्।

अधःऽपदात्। मे। उत्। वदत। मण्डूकाःऽइव। उदकात्। मण्डूकाः। उदकात्ऽइव॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

★[१७१] [२८ मानवः। मानससूक्तम्। शिवसङ्कल्पः। मनो देवता। १-१३, १५-१६, ३१ त्रिष्टुभः; एकपाद त्रिपादनुष्टुप्-त्रिष्टुप; २७ चतुष्पादनुष्टुप्-एकपाद त्रिष्टुप्; १४, १७-२७]

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्।

येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥ १॥ ★

येन। इदम्। भूतम्। भुवनम्। भविष्यत्। परिऽगृहीतम्। अमृतेन। सर्वम्।

येन। यज्ञः। तायते। सप्तऽहोता। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ २॥ ★

येन। कर्माणि। अपसः। मनीषिणः। यज्ञे। कृण्वन्ति। विदथेषु। धीराः॥ यत्। अपूर्वम्।

यक्षम्। अन्तरिति। प्रऽजानाम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २॥

येन कर्माणि प्रतिरन्ति धीरा यतो वाचा मनसा तानि हन्ति।

यस्यान्वितमनु कृण्वन्ति प्राणिनस्तन्मे मनः शिवसङ्कल्पमस्तु॥ ३॥ ★

येन। कर्माणि। प्रऽतिरन्ति। धीराः। यतः। वाचा। मनसा। तानि। हन्ति।

यस्य। अनुऽइतम्। अनु। कृण्वन्ति। प्राणिनः। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ३॥

यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।

यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ ४॥ ★

यस्मिन्। ऋचः। साम। यजूंषि। यस्मिन्। प्रतिऽस्थिताः। रथनाभौऽइव। अराः॥

यस्मिन्। चित्तम्। सर्वम्। ओतम्। प्रऽजानाम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ४॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।

यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥ ५॥ ★ [२७]

यत्। प्रऽज्ञानम्। उत। चेतः। धृतिः। च। यत्। ज्योतिः। अन्तः। अमृतम्। प्रऽजासु॥ यस्मात्।

न। ऋते। किम्। चन। कर्म। क्रियते। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ५॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।

हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥ ६॥ ★

सुऽसारथिः। अश्वान्ऽइव। यत्। मनुष्यान्। नेनीयते। अभीशुऽभिः। वाजिनःऽइव।

हृत्ऽप्रतिष्ठम्। यत्। अजिरम्। जविष्ठम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।

दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥ ७॥ ★

यत्। जाग्रतः। दूरम्। उत्ऽऐति। दैवम्। तत्। ऊँ इति। सुप्तस्य। तथा। एव। एति।

दूरम्ऽगमम्। ज्योतिषाम्। ज्योतिः। एकम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ७॥

येनेदं सर्वं जगतो बभूव तदेवापि महतो जातवेदाः।

तदेवाग्निस्तपसो ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥ ८॥ ★

येन। इदम्। सर्वम्। जगतः। बभूव। तत्। एव। अपि। महतः। जातऽवेदाः॥ तत्। एव।

अग्निः। तपसः। ज्योतिः। एकम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ८॥

येन द्यौरुग्रा पृथिवी चान्तरिक्षं येन पर्वताः प्रदिशो दिशश्च।

येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ ९॥ ★

येन। द्यौः। उग्रा। पृथिवी। च। अन्तरिक्षम्। येन। पर्वताः। प्रऽदिशः। दिशः। च।

येन। इदम्। जगत्। विऽआप्तम्। प्रऽजानाम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ९॥

ये पञ्चपञ्चा दशतं शतं च सहस्रं च नियुतं न्यर्बुदं च।

ते अग्निचित्येष्टकात्तं शरीरं तन्मे मनः शिवसङ्कल्पमस्तु॥ १०॥ ★ [२८]

ये। पञ्चऽपञ्च। दशतम्। शतम्। च। सहस्रम्। च। निऽयुतम्। निऽअर्बुदम्। च॥

ते। अग्निचित्येष्टकाऽआत्तम्। शरीरम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १०॥

ये मनो हृदयं ये च देवा या दिव्या आपो यः सूर्यरश्मिः।

ये श्रोत्रं चक्षुषी संचरन्ति तन्मे मनः शिवसङ्कल्पमस्तु॥ ११॥ ★

ये। मनः। हृदयम्। ये। च। देवाः। याः। दिव्याः। आपः। यः। सूर्यऽरश्मिः।

ये। श्रोत्रम्। चक्षुषी इति। सम्ऽचरन्ति। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ ११॥

यदत्र षष्ठं त्रिशतं शरीरं यज्ञस्य गुह्यं नव नावमाद्यम्।

दश पञ्च त्रिंशतं यत्परं च तन्मे मनः शिवसङ्कल्पमस्तु॥ १२॥ ★

यत्। अत्र। षष्ठम्। त्रिऽशतम्। शरीरम्। यज्ञस्य। गुह्यम्। नव। नावम्। आद्यम्।

दश। पञ्च। त्रिंऽशतम्। यत्। परम्। च। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।

तस्य योनिं परि पश्यन्ति धीरास्तन्मे मनः शिवसङ्कल्पमस्तु॥ १३॥ ★

वेद। अहम्। एतम्। पुरुषम्। महान्तम्। आदित्यऽवर्णम्। तमसः। परस्तात्।

तस्य। योनिम्। परि। पश्यन्ति। धीराः। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १३॥

अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत्।

सूक्ष्मात् सूक्ष्मतरं ध्यानं तन्मे मनः शिवसङ्कल्पमस्तु॥ १४॥ ★

अचिन्त्यम्। च। अप्रऽमेयम्। च। व्यक्ताव्यक्तऽपरम्। च। यत्॥

सूक्ष्मात्। सूक्ष्मऽतरम्। ध्यानम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १४॥

अस्ति विनाशयित्वा सर्वमिदं नास्ति पुनस्तथैव धृष्टं ध्रुवम्।

अस्ति नास्ति हितं मध्यमं परं तन्मे मनः शिवसङ्कल्पमस्तु॥ १५॥ ★ [२९]

अस्ति। विऽनाशयित्वा। सर्वम्। इदम्। न। अस्ति। पुनरिति। तथा। एव। धृष्टम्। ध्रुवम्॥

अस्ति। न। अस्ति। हितम्। मध्यमम्। परम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १५॥

अस्ति नास्ति विपरीतो प्रवादोऽस्ति नास्ति सर्वं वा इदं गुह्यम्।

अस्ति नास्ति परात्परो यत् परं तन्मे मनः शिवसङ्कल्पमस्तु॥ १६॥ ★

अस्ति। न। अस्ति। विऽपरीतः। प्रऽवादः। अस्ति। न। अस्ति। सर्वम्। वै। इदम्। गुह्यम्।

अस्ति। न। अस्ति। परात्। परः। यत्। परम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १६॥

परात्परतरं यच्च तत्पराच्चैव तत्परम्। तत्परात्परतरं ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु॥ १७॥ ★

परात्। परऽतरम्। यत्। च। तत्ऽपरात्। च। एव। तत्ऽपरम्।

तत्ऽपरात्। परऽतरम्। ज्ञेयम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १७॥

परात्परतरो ब्रह्मा तत्परात्परतो हरिः। तत्परात्परतो ह्येष तन्मे मनः शिवसङ्कल्पमस्तु॥ १८॥ ★

परात्। परऽतरः। ब्रह्मा। तत्ऽपरात्। परतः। हरिः॥

तत्ऽपरात्। परतः। हि। एषः। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १८॥

गोभिर्जुष्टो धनेन ह्यायुषा च बलेन च।

प्रजया पशुभिः पुष्कलार्घ्यं तन्मे मनः शिवसङ्कल्पमस्तु॥ १९॥ ★

गोभिः। जुष्टः। धनेन। हि। आयुषा। च। बलेन। च।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रऽजया। पशुऽभिः। पुष्कलऽअर्घ्यम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ १९॥

प्रयतः प्रणवो नित्यं परमं पुरुषोत्तमम्।

ॐकारं परमात्मानं तन्मे मनः शिवसङ्ककल्पमस्तु॥ २०॥ ★ [३०]

प्रऽयतः। प्रऽनवः। नित्यम्। परमम्। पुरुषऽउत्तमम्।

ॐऽकारम्। परमऽआत्मानम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २०॥

यो वै वेदादिषु गायत्री सर्वव्यापी महेश्वरात्।

यद्विरुतं तथा वैश्यं तन्मे मनः शिवसङ्ककल्पमस्तु॥ २१॥ ★

यः। वै। वेदऽआदिषु। गायत्री। सर्वऽव्यापी। महाऽईश्वरात्।

यत्। विऽरुतम्। तथा। वैश्यम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २१॥

यो वै वेद महादेवं परमं पुरुषोत्तमम्।

यः सर्वं यस्यचित्सर्वं तन्मे मनः शिवसङ्ककल्पमस्तु॥ २२॥ ★

यः। वै। वेद। महाऽदेवम्। परमम्। पुरुषऽउत्तमम्॥

यः। सर्वम्। यस्य। चित्। सर्वम्। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २२॥

यो३सौ सर्वेषु वेदेषु पठ्यते ह्य१ज ईश्वरः।

अकायो निर्गुणोऽध्यात्मा तन्मे मनः शिवसङ्ककल्पमस्तु॥ २३॥ ★

यः। असौ। सर्वेषु। वेदेषु। पठ्यते। हि। अजः। ईश्वरः॥

अकायः। निःरगुणः। अधिऽआत्मा। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २३॥

कैलाशशिखराभासं हिमवद्गिरिसंस्थितम्।

नीलकण्ठं त्र्यक्षं च तन्मे मनः शिवसङ्ककल्पमस्तु॥ २४॥ ★

कैलाशशिखरऽआभासम्। हिमवद्गिरिऽसंस्थितम्।

नीलऽकण्ठम्। त्रिऽअक्षम्। च। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २४॥

कैलाशशिखरे रम्ये शङ्करस्य शुभे गृहे।

देवतास्तत्र मोदन्ति तन्मे मनः शिवसङ्ककल्पमस्तु॥ २५॥ ★

कैलाशऽशिखरे। रम्ये। शङ्करस्य। शुभे। गृहे।

देवताः। तत्र। मोदन्ति। तत्। मे। मनः। शिवऽसङ्कल्पम्। अस्तु॥ २५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आब्रह्मस्तम्बपर्यन्तं त्रैलोक्यं सचराचरम्।
उत्पादितं जगद्व्याप्तं तन्मे मनः शिवसङ्कल्पमस्तु॥ २६॥ ★

आ॰ब्रह्मस्तम्बपर्यन्तम्। त्रैलोक्यम्। स॰चराचरम्।
उत्॰पादितम्। जगत्। वि॰आप्तम्। तत्। मे। मनः। शिव॰सङ्कल्पम्। अस्तु॥ २७॥

य इमं शिवसङ्कल्पं सदा ध्यायन्ति ब्राह्मणाः।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्पमस्तु॥ २७॥ ★

ये। इमम्। शिव॰सङ्कल्पम्। सदा। ध्यायन्ति। ब्राह्मणाः।
ते। परम्। मोक्षम्। गमिष्यन्ति। तत्। मे। मनः। शिव॰सङ्कल्पम्। अस्तु॥ २७॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्। तन्मे मनः शिवसङ्कल्पमस्तु॥ २८॥ ★ [३१]

त्रि॰अम्बकम्। यजामहे। सु॰गन्धिम्। पुष्टि॰वर्धनम्। उर्वारुकम्ऽइव।
बन्धनात्। मृत्योः। मुक्षीय। मा। अमृतात्। तत्। मे। मनः। शिव॰सङ्कल्पम्। अस्तु॥ २८॥

[१७२ (१६७)] [४ विश्वामित्रजमदग्नी। इन्द्रः, ३ सोम-वरुण-बृहस्पति-अनुमति-मघवत्-धातु-विधातारः। जगती।]

तुभ्येदमिन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि।
त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्याजयः स्वः॥ १॥

तुभ्य। इदम्। इन्द्र। परि। सिच्यते। मधु। त्वम्। सुतस्य। कलशस्य। राजसि॥ त्वम्। रयिम्।
पुरु॰वीराम्। ऊँ इति। नः। कृधि। त्वम्। तपः। परि॰तप्य। अजयः। स्व१रिति स्वः॥ १॥

स्वर्जितं महि मन्दानमन्धसो हवामहे परि शक्रं सुताँ उप।
इमं नो यज्ञमिह बोध्या गहि स्पृधो जयन्तं मघवानमीमहे॥ २॥

स्वः॰जितम्। महि। मन्दानम्। अन्धसः। हवामहे। परि। शक्रम्। सुतान्। उप।
इमम्। नः। यज्ञम्। इह। बोधि। आ। गहि। स्पृधः। जयन्तम्। मघ॰वानम्। ईमहे॥ २॥

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम्॥ ३॥

सोमस्य। राज्ञः। वरुणस्य। धर्मणि। बृहस्पतेः। अनु॰मत्याः। ऊँ इति। शर्मणि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तव॑। अ॒हम्। अ॒द्य। म॒घ॒ऽव॒न्। उप॑ऽस्तुतौ। धात॒रिति॑। विधा॑त॒रिति॒ वि॑ऽधा॑तः। क॒लशा॑न्। अ॒भ॒क्ष॒य॒म्॥ ३॥

प्रसू॑तो भ॒क्षम॑करं च॒रावपि॒ स्तोम॑ं चे॒मं प्र॑थ॒मः सू॒रिरुन्मृ॑जे।

सु॒ते सा॒तेन॒ यद्याग॑मं वां प्रति॒ विश्वामित्रजमदग्नी॒ दमे॑॥ ४॥ [३२ (२५)]

प्र॑ऽसू॑तः। भ॒क्षम्। अ॒क॒र॒म्। च॒रौ। अपि॑। स्तोम॑म्। च॒। इ॒मम्। प्र॒थ॒मः। सू॒रिः। उत्। मृ॒जे॒।

सु॒ते। सा॒तेन॑। यदि॑। आ। अग॑मम्। वा॒म्। प्रति॑। वि॒श्वा॒मि॒त्र॒ज॒म॒द॒ग्नी॒ इति॑। दमे॑॥ ४॥

[१७३ (१६८)] [४ अनिलो वातायनः। वायुः। त्रिष्टुप्।]

वात॑स्य॒ नु म॑हि॒मानं॒ रथ॑स्य रु॒जन्ने॑ति स्त॒नय॑न्नस्य॒ घोषः॑।

दि॒वि॒स्पृग्या॑त्यरु॒णानि॑ कृ॒ण्वन्नु॒तो ए॑ति पृथि॒व्या रे॒णुमस्य॑न्॥ १॥

वात॑स्य। नु। म॒हि॒मान॑म्। रथ॑स्य। रु॒जन्। ए॒ति॒। स्त॒नय॑न्। अ॒स्य॒। घोष॑ः।

दि॒वि॒ऽस्पृक्। या॒ति॒। अ॒रु॒णानि॑। कृ॒ण्वन्। उ॒तो इति॑। ए॒ति॒। पृ॒थि॒व्या। रे॒णुम्। अस्य॑न्॥ १॥

सं प्रेर॑ते॒ अनु॒ वात॑स्य वि॒ष्ठा ऐनं॑ गच्छन्ति॒ सम॑नं॒ न योषाः॑।

ताभि॑ः स॒युक्स॒रथं॑ दे॒व ईयते॒ऽस्य विश्व॑स्य॒ भुव॑नस्य॒ राजा॑॥ २॥

सम्। प्र। ई॒र॒ते॒। अनु॑। वात॑स्य। वि॒ऽस्थाः। आ। ए॒न॒म्। ग॒च्छ॒न्ति॒। सम॑नम्। न। योषाः॑।

ताभि॑ः। स॒ऽयुक्। स॒ऽरथ॑म्। दे॒वः। ई॒य॒ते॒। अ॒स्य। विश्व॑स्य। भुव॑नस्य। राजा॑॥ २॥

अ॒न्तरि॑क्षे प॒थिभि॒रीय॑मानो॒ न नि वि॑शते कत॒मच्च॒नाहः॑।

अ॒पां सखा॑ प्रथम॒जा ऋ॒तावा॒ क्व॑ स्विज्जा॒तः कुत॒ आ ब॑भूव॥ ३॥

अ॒न्तरि॑क्षे। प॒थिऽभिः॑। ईय॑मानः। न। नि। वि॒श॒ते॒। क॒त॒मत्। च॒न। अ॒ह॒रिति॑।

अ॒पाम्। सखा॑। प्र॒थ॒म॒ऽजाः। ऋ॒तऽवा॑। क्व॑। स्वि॒त्। जा॒तः। कुत॑ः। आ। ब॒भू॒व॒॥ ३॥

आ॒त्मा दे॒वानां॒ भुव॑नस्य॒ गर्भो॑ यथाव॒शं च॑रति दे॒व ए॒षः।

घोषा॒ इद॑स्य शृण्वि॒रे न रू॒पं तस्मै॒ वाता॑य ह॒विषा॑ विधेम॥ ४॥ [३३ (२६)]

आ॒त्मा। दे॒वाना॑म्। भुव॑नस्य। गर्भः॑। य॒था॒ऽव॒शम्। च॒र॒ति॒। देवः॑। ए॒षः।

घोषाः॑। इत्। अ॒स्य॒। शृ॒ण्वि॒रे॒। न। रू॒पम्। तस्मै॑। वाता॑य। ह॒विषा॑। वि॒धे॒म॒॥ ४॥

[१७४ (१६९)] [६ शबरः काक्षीवतः। गावः। त्रिष्टुप्, ५ अनुष्टुप्, ६ पङ्क्ति]

म॒यो॒भूर्वातो॑ अ॒भि वा॑तू॒स्रा ऊर्ज॑स्वती॒रोष॑धी॒रा रि॑शन्ताम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृळ॥ १॥

मयःऽभू। वातः। अभि। वातु। उस्राः। ऊर्जस्वतीः। ओषधीः। आ। रिशन्ताम्।

पीवस्वतीः। जीवऽधन्याः। पिबन्तु। अवसाय। पत्ऽवते। रुद्र। मृळ॥ १॥

याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद।

या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ॥ २॥

याः। सऽरूपाः। विऽरूपाः। एकऽरूपाः। यासाम्। अग्निः। इष्ट्या। नामानि। वेद।

याः। अङ्गिरसः। तपसा। इह। चक्रुः। ताभ्यः। पर्जन्य। महि। शर्म। यच्छ॥ २॥

या देवेषु तन्व१मैरयन्त यासां सोमो विश्वा रूपाणि वेद।

ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि॥ ३॥

याः। देवेषु। तन्वम्। ऐरयन्त। यासाम्। सोमः। विश्वा। रूपाणि। वेद।

ताः। अस्मभ्यम्। पयसा। पिन्वमानाः। प्रजाऽवतीः। इन्द्र। गोऽस्थे। रिरीहि॥ ३॥

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः।

शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम॥ ४॥ (२७)

प्रजाऽपतिः। मह्यम्। एताः। रराणः। विश्वैः। देवैः। पितृऽभिः। सम्ऽविदानः॥ शिवाः।

सतीः। उप। नः। गोऽस्थम्। आ। अकरित्यकः। तासाम्। वयम्। प्रऽजया। सम्। सदेम॥ ४॥

यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च। ता नः सन्तु पयस्वतीर्बह्वीर्गोष्ठे घृताच्यः॥ ५॥ ★

यासाम्। ऊधः। चतुःऽबिलम्। मधोः। पूर्णम्। घृतस्य। च।

ताः। नः। सन्तु। पयस्वतीः। बह्वीः। गोऽस्थे। घृताच्यः॥ ५॥

उप मैतु मयोभुवः ऊर्जं चौजश्च बिभ्रतीः।

दुहाना अक्षितं पयो मयि गोष्ठे नि वर्तध्वं यथा भवान्युत्तमः॥ ६॥ ★ [३४]

उप। मा। आ। एतु। मयःऽभुवः। ऊर्जम्। च। ओजः। च। बिभ्रतीः।

दुहानाः। अक्षितम्। पयः। मयि। गोऽस्थे। नि। वर्तध्वम्। यथा। भवानि। उत्ऽतमः॥ ६॥

[१७५ (१७०)] [४ विभ्राद् सौर्यः। सूर्यः। जगती, ४ आस्तारपङ्क्ति।]

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतम्।

वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वि॒ऽभ्राट्। बृ॒हत्। पि॒ब॒तु॒। सो॒म्य॑म्। मधु॑। आयुः॑। दध॑त्। य॒ज्ञऽप॑तौ। अवि॑ऽह्रुतम्।
वात॑ऽजूतः। यः। अ॒भि॒ऽरक्ष॑ति। त्मना॑। प्र॒ऽजाः॑। पु॒पो॒ष॒। पु॒रु॒धा। वि। रा॒ज॒ति॒॥ १॥

वि॒भ्राड् बृ॒हत्सुभृ॑तं वाज॒सात॑मं॒ धर्म॑न् दि॒वो ध॒रुणे॑ स॒त्यमर्पि॑तम्।
अ॒मि॒त्र॒हा वृ॑त्र॒हा द॑स्यु॒हन्त॑म॒ं ज्योति॑र्जज्ञे असुर॒हा स॑पत्न॒हा॥ २॥

वि॒ऽभ्राट्। बृ॒हत्। सु॒ऽभृ॑तम्। वा॒ज॒ऽसात॑मम्। धर्म॑न्। दि॒वः। ध॒रुणे॑। स॒त्यम्। अर्पि॑तम्।
अ॒मि॒त्र॒ऽहा। वृ॒त्र॒ऽहा। द॒स्यु॒ह॒म्ऽत॑मम्। ज्योतिः॑। ज॒ज्ञे॒। अ॒सु॒र॒ऽहा। स॒प॒त्न॒ऽहा॥ २॥

इ॒दं श्रेष्ठं॒ ज्योति॑षां॒ ज्योति॑रुत्त॒मं वि॑श्व॒जिद्ध॑न॒जिदु॑च्यते बृ॒हत्।
वि॒श्व॒भ्राड् भ्रा॒जो महि॒ सूर्यो॑ दृ॒श उ॒रु प॑प्रथे॒ सह॒ ओजो॒ अच्यु॑तम्॥ ३॥

इ॒दम्। श्रेष्ठ॑म्। ज्योति॑षाम्। ज्योतिः॑। उ॒त्ऽत॒मम्। वि॒श्व॒ऽजित्। ध॒न॒ऽजित्। उ॒च्य॒ते॒। बृ॒हत्।
वि॒श्व॒ऽभ्राट्। भ्रा॒जः। महि॑। सूर्यः॑। दृ॒शे। उ॒रु। प॒प्र॒थे॒। सहः॑। ओजः॑। अच्यु॑तम्॥ ३॥

वि॒भ्राज॒ञ्ज्योति॑षा॒ स्व१॒॑रग॑च्छो रोच॒नं दि॒वः।
येने॒मा विश्वा॒ भुव॑ना॒न्याभृ॑ता वि॒श्वक॑र्मणा वि॒श्वदे॑व्यावता॥ ४॥ [३५ (२८)]

वि॒ऽभ्राज॑न्। ज्योति॑षा। स्वः॑। अग॑च्छः। रो॒च॒नम्। दि॒वः।
येन॑। इ॒मा। विश्वा॑। भुव॑नानि। आऽभृ॑ता। वि॒श्वऽक॑र्मणा। वि॒श्वदे॑व्य॒ऽवता॥ ४॥

[१७६ (१७१)] [४ इटो भार्गवः। इन्द्रः। गायत्री।]

त्वं त्यमि॒टतो॒ रथ॒मिन्द्र॒ प्राव॑: सु॒ताव॑तः। अशृ॑णोः सो॒मिनो॒ हव॑म्॥ १॥
त्वम्। त्यम्। इ॒टत॑ः। रथ॑म्। इन्द्र॑। प्र। आ॒वः॒। सु॒त॒ऽव॑तः। अशृ॑णोः। सो॒मिन॑ः। हव॑म्॥ १॥

त्वं म॒खस्य॒ दोध॑तः॒ शिरोऽव॑ त्व॒चो भ॑रः। अग॑च्छः सो॒मिनो॑ गृ॒हम्॥ २॥
त्वम्। म॒खस्य॑। दोध॑तः। शिरः॑। अव॑। त्व॒चः। भ॒रः॒। अग॑च्छः। सो॒मिन॑ः। गृ॒हम्॥ २॥

त्वं त्यमि॑न्द्र॒ मर्त्य॑मास्त्रबु॒ध्नाय॑ वे॒न्यम्। मुहु॑: श्रथ्ना मन॒स्यवे॑॥ ३॥
त्वम्। त्यम्। इ॒न्द्र॒। मर्त्य॑म्। आ॒स्त्र॒ऽबु॒ध्नाय॑। वे॒न्यम्। मुहु॑ः। श्र॒थ्नाः॒। म॒न॒स्यवे॑॥ ३॥

त्वं त्यमि॑न्द्र॒ सूर्यं॑ प॒श्चा सन्तं॑ पु॒रस्कृ॑धि। दे॒वानां॑ चित्ति॒रो वश॑म्॥ ४॥ [३६ (२९)]
त्वम्। त्यम्। इ॒न्द्र॒। सूर्य॑म्। प॒श्चा। सन्त॑म्। पु॒रः। कृ॒धि॒। दे॒वाना॑म्। चि॒त्। ति॒रः। वश॑म्॥ ४॥

[१७७ (१७२)] [४ संवर्त आङ्गिरसः। उषाः। द्विपदा विराट्।]

आ या॑हि॒ वन॑सा स॒ह गाव॑: सचन्त वर्त॒निं यदूध॑भिः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ। याहि। वनसा। सह। गावः। सचन्त। वर्तनिम्। यत्। ऊधऽभिः॥ १॥

आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः॥ २॥

आ। याहि। वस्व्या। धिया। मंहिष्ठः। जारयत्ऽमखः। सुदानुऽभिः॥ २॥

पितुभृतो न तन्तुमित्सुदानवः प्रति दध्मो यजामसि॥ ३॥

पितुऽभृतः। न। तन्तुम्। इत्। सुऽदानवः। प्रति। दध्मः। यजामसि॥ ३॥

उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता॥ ४॥ [३७ (३०)]

उषाः। अप। स्वसुः। तमः। सम्। वर्तयति। वर्तनिम्। सुऽजातता॥ ४॥

[१७८ (१७३)] [६ ध्रुव आङ्गिरसः। राज्ञः स्तुतिः। अनुष्टुप्।]

आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः।

विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत्॥ १॥

आ। त्वा। अहार्षम्। अन्तः। एधि। ध्रुवः। तिष्ठ। अविऽचाचलिः।

विशः। त्वा। सर्वाः। वाञ्छन्तु। मा। त्वत्। राष्ट्रम्। अधि। भ्रशत्॥ १॥

इहैवैधि माप च्योष्ठाः पर्वतइवाविचाचलिः। इन्द्रइवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय॥ २॥

इह। एव। एधि। मा। अप। च्योष्ठाः। पर्वतःऽइव। अविऽचाचलिः।

इन्द्रःऽइव। इह। ध्रुवः। तिष्ठ। इह। राष्ट्रम्। ऊँ इति। धारय॥ २॥

इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः॥ ३॥

इमम्। इन्द्रः। अदीधरत्। ध्रुवम्। ध्रुवेण। हविषा।

तस्मै। सोमः। अधि। ब्रवत्। तस्मै। ऊँ इति। ब्रह्मणः। पतिः॥ ३॥

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्॥ ४॥

ध्रुवा। द्यौः। ध्रुवा। पृथिवी। ध्रुवासः। पर्वताः। इमे।

ध्रुवम्। विश्वम्। इदम्। जगत्। ध्रुवः। राजा। विशाम्। अयम्॥ ४॥

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः। ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥ ५॥

ध्रुवम्। ते। राजा। वरुणः। ध्रुवम्। देवः। बृहस्पतिः।

ध्रुवम्। ते। इन्द्रः। च। अग्निः। च। राष्ट्रम्। धारयताम्। ध्रुवम्॥ ५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि।

अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्॥ ६॥ [३८ (३१)]

ध्रुवम्। ध्रुवेण। हविषा। अभि। सोमम्। मृशामसि।

अथो इति। ते। इन्द्रः। केवलीः। विशः। बलिऽहृतः। करत्॥ ६॥

[१७९ (१७४)] [५ अभीवर्त आङ्गिरस। राज्ञः स्तुतिः। अनुष्टुप्।]

अभीवर्तेन हविषा येनेन्द्रो अभिवावृते। तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय॥ १॥

अभिऽवर्तेन। हविषा। येन। इन्द्रः। अभिऽववृते।

तेन। अस्मान्। ब्रह्मणः। पते। अभि। राष्ट्राय। वर्तय॥ १॥

अभिवृत्य सपत्नानभि या नो अरातयः। अभि पृतन्यन्तं तिष्ठाभि यो न इरस्यति॥ २॥

अभिऽवृत्य। सऽपत्नान्। अभि। याः। नः। अरातयः।

अभि। पृतन्यन्तम्। तिष्ठ। अभि। यः। नः। इरस्यति॥ २॥

अभि त्वा देवः सविताभि सोमो अवीवृतत्। अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि॥ ३॥

अभि। त्वा। देवः। सविता। अभि। सोमः। अवीवृतत्।

अभि। त्वा। विश्वा। भूतानि। अभिऽवर्तः। यथा। अससि॥ ३॥

येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्नः किलाभुवम्॥ ४॥

येन। इन्द्रः। हविषा। कृत्वी। अभवत्। द्युम्नी। उत्ऽतमः।

इदम्। तत्। अक्रि। देवाः। असपत्नः। किळ। अभुवम्॥ ४॥

असपत्नः सपत्नहाभिराष्ट्रो विषासहिः। यथाहमेषां भूतानां विराजानि जनस्य च॥ ५॥

असपत्नः। सपत्नऽहा। अभिऽराष्ट्रः। विऽससहिः। [३९ (३२)]

यथा। अहम्। एषाम्। भूतानाम्। विऽराजानि। जनस्य। च॥ ५॥

[१८० (१७५)] [४ ऊर्ध्वग्रावा सर्प आर्बुदिः। ग्रावाणः। गायत्री।]

प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा। धूर्षु युज्यध्वं सुनुत॥ १॥

प्र। वः। ग्रावाणः। सविता। देवः। सुवतु। धर्मणा। धूःऽसु। युज्यध्वम्। सुनुत॥ १॥

ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिम्। उस्राः कर्तन भेषजम्॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ग्रावाणः। अप। दुच्छुनाम्। अप। सेधत। दुःऽमतिम्। उस्राः। कर्तन। भेषजम्॥ २॥

ग्रावाण उपरेष्वा महीयन्ते सजोषसः। वृष्णे दधतो वृष्ण्यम्॥ ३॥

ग्रावाणः। उपरेषु। आ। महीयन्ते। सऽजोषसः। वृष्णे। दधतः। वृष्ण्यम्॥ ३॥

ग्रावाणः सविता नु वो देवः सुवतु धर्मणा। यजमानाय सुन्वते॥ ४॥ [४० (३३)]

ग्रावाणः। सविता। नु। वः। देवः। सुवतु। धर्मणा। यजमानाय। सुन्वते॥ ४॥

[१८१ (१७६)] [४ सूनुरार्भवः। १ ऋभवः, २-४ अग्निः। अनुष्टुप्, २ गायत्री।]

प्र सूनव ऋभूणां बृहन्नवन्त वृजना। क्षामा ये विश्वधायसोऽश्नन् धेनुं न मातरम्॥ १॥

प्र। सूनवः। ऋभूणाम्। बृहत्। नवन्त। वृजना।

क्षाम। ये। विश्वऽधायसः। अश्नन्। धेनुम्। न। मातरम्॥ १॥

प्र देवं देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक्॥ २॥

प्र। देवम्। देव्या। धिया। भरत। जातऽवेदसम्। हव्या। नः। वक्षत्। आनुषक्॥ २॥

अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवाञ्चेतति त्मना॥ ३॥

अयम्। ऊँ इति। स्यः। प्र। देवऽयुः। होता। यज्ञाय। नीयते।

रथः। न। योः। अभिऽवृतः। घृणिऽवान्। चेतति। त्मना॥ ३॥

अयमग्निरुरुष्यत्यमृतादिव जन्मनः। सहसश्चित् सहीयान् देवो जीवातवे कृतः॥ ४॥

अयम्। अग्निः। उरुष्यति। अमृतात्ऽइव। जन्मनः। [४१ (३४)]

सहसः। चित्। सहीयान्। देवः। जीवातवे। कृतः॥ ४॥

[१८२ (१७७)] [३ पतङ्गः प्राजापत्यः। मायाभेदः। त्रिष्टुप्, १ जगती।]

पतङ्गमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः।

समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः॥ १॥

पतङ्गम्। अक्तम्। असुरस्य। मायया। हृदा। पश्यन्ति। मनसा। विपःऽचितः।

समुद्रे। अन्तरिति। कवयः। वि। चक्षते। मरीचीनाम्। पदम्। इच्छन्ति। वेधसः॥ १॥

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद्गर्भे अन्तः।

तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति॥ २॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पतङ्गः। वाचम्। मनसा। बिभर्ति। ताम्। गन्धर्वः। अवदत्। गर्भे। अन्तरिति।
ताम्। द्योतमानाम्। स्वर्यम्। मनीषाम्। ऋतस्य। पदे। कवयः। नि। पान्ति॥ २॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः॥ ३॥ [४२ (३५)]

अपश्यम्। गोपाम्। अनिऽपद्यमानम्। आ। च। परा। च। पथिऽभिः। चरन्तम्।
सः। सध्रीचीः। सः। विषूचीः। वसानः। आ। वरीवर्ति। भुवनेषु। अन्तरिति॥ ३॥

[१८३ (१७८)] [३ अरिष्टनेमिस्तार्क्ष्यः। तार्क्ष्यः। त्रिष्टुप्।]

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम्।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम॥ १॥

त्यम्। ऊँ इति। सु। वाजिनम्। देवऽजूतम्। सहऽवानम्। तरुतारम्। रथानाम्।
अरिष्टऽनेमिम्। पृतनाजम्। आशुम्। स्वस्तये। तार्क्ष्यम्। इह। हुवेम॥ १॥

इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम।
उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम॥ २॥

इन्द्रस्यऽइव। रातिम्। आऽजोहुवानाः। स्वस्तये। नावम्ऽइव। आ। रुहेम॥ उर्वी इति। न।
पृथ्वी इति। बहुले इति। गभीरे इति। मा। वाम्। आऽइतौ। मा। पराऽइतौ। रिषाम॥ २॥

सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्यइव ज्योतिषापस्ततान।
सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम्॥ ३॥

सद्यः। चित्। यः। शवसा। पञ्च। कृष्टीः। सूर्यःऽइव। ज्योतिषा। अपः। ततान।
सहस्रऽसाः। शतऽसाः। अस्य। रंहिः। न। स्म। वरन्ते। युवतिम्। न। शर्याम्॥ ३॥ [४३ (३६)]

[१८४ (१७९)] [३ : १ शिविरौशीनरः, २ काशिराजः प्रतर्दनः, ३ वसुमनारौहिदश्वः।
इन्द्रः। त्रिष्टुप्, १ अनुष्टुप्।]

उत्तिष्ठताव पश्यतेन्द्रस्य भागमृत्वियम्। यदि श्रातो जुहोतन यद्यश्रातो ममत्तन॥ १॥

उत्। तिष्ठत। अव। पश्यत। इन्द्रस्य। भागम्। ऋत्वियम्।
यदि। श्रातः। जुहोतन। यदि। अश्रातः। ममत्तन॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रातं ह॒विरो ष्विन्द्र॒ प्र या॑हि ज॒गाम सूरो॒ अध्व॑नो॒ विम॑ध्यम्।

परि॑ त्वासते नि॒धिभि॑ः सखा॑यः कुल॒पा न व्रा॒जप॑तिं॒ चर॑न्तम्॥ २॥

श्रा॒तम्। ह॒विः। ओ इति॑। सु। इ॒न्द्र॒। प्र। या॒हि॒। ज॒गाम॑। सूर॑ः। अध्व॑नः। वि॒ऽम॑ध्यम्।

परि॑। त्वा॒। आ॒स॒ते॒। नि॒धिऽभि॑ः। सखा॑यः। कु॒ल॒ऽपाः। न। व्रा॒जऽप॑तिम्। चर॑न्तम्॥ २॥

श्रा॒तं म॑न्य॒ ऊध॑नि श्रा॒तम॒ग्नौ सुश्रा॑तं मन्ये॒ तदृ॒तं नवी॑यः।

माध्यं॑दिनस्य॒ सव॑नस्य द॒ध्नः पिबे॑न्द्र वज्रिन् पुरुकृज्जुषा॒णः॥ ३॥ [४४ (३७)]

श्रा॒तम्। म॒न्ये॒। ऊध॑नि। श्रा॒तम्। अ॒ग्नौ। सु॒ऽश्रा॑तम्। म॒न्ये॒। तत्। ऋ॒तम्। नवी॑यः।

माध्यं॑दिनस्य। सव॑नस्य। द॒ध्नः। पिब॑। इ॒न्द्र॒। व॒ज्रि॒न्। पु॒रु॒ऽकृ॒त्। जु॒षा॒णः॥ ३॥

[१८५ (१८०)] [३ जय ऐन्द्रः। इन्द्र। त्रिष्टुप्।]

प्र स॑साहिषे पुरुहूत॒ शत्रू॒ञ्ज्येष्ठ॑स्ते॒ शुष्म॑ इ॒ह रा॒तिर॑स्तु।

इन्द्रा भ॑र॒ दक्षि॑णेना॒ वसू॑नि॒ पति॒ः सिन्धू॑नामसि रे॒वती॑नाम्॥ १॥

प्र। स॒स॒हि॒षे॒। पु॒रु॒ऽहू॒त॒। शत्रू॑न्। ज्येष्ठ॑ः। ते॒। शुष्म॑ः। इ॒ह। रा॒तिः। अ॒स्तु॒।

इन्द्र॑। आ। भ॒र॒। दक्षि॑णेन। वसू॑नि। पति॑ः। सिन्धू॑नाम्। अ॒सि॒। रे॒वती॑नाम्॥ १॥

मृ॒गो न भी॒मः कु॑च॒रो गिरि॒ष्ठाः प॑रा॒वत॒ आ ज॑गन्था॒ पर॑स्याः।

सृ॒कं सं॒शाय॑ प॒विमि॑न्द्र ति॒ग्मं वि शत्रू॑न् ताळ्हि॒ वि मृधो॑ नुदस्व॥ २॥

मृ॒गः। न। भी॒मः। कु॒च॒रः। गि॒रि॒ऽस्थाः। प॒रा॒ऽवत॑ः। आ। ज॒ग॒न्थ॒। पर॑स्याः।

सृ॒कम्। स॒म्ऽशाय॑। प॒विम्। इ॒न्द्र॒। ति॒ग्मम्। वि। शत्रू॑न्। ता॒ळ्हि॒। वि। मृध॑ः। नु॒द॒स्व॒॥ २॥

इन्द्र॑ क्ष॒त्रम॒भि वा॒ममोजोऽजा॑यथा वृषभ चर्षणी॒नाम्।

अपा॑नुदो॒ जन॑ममित्र॒यन्त॑मु॒रुं दे॒वेभ्यो॑ अकृणोरु लो॒कम्॥ ३॥ [४५ (३८)]

इन्द्र॑। क्ष॒त्रम्। अ॒भि। वा॒मम्। ओज॑ः। अजा॑यथाः। वृ॒ष॒भ॒। च॒र्ष॒णी॒नाम्।

अप॑। अ॒नु॒दः॒। जन॑म्। अ॒मि॒त्र॒ऽयन्त॑म्। उ॒रुम्। दे॒वेभ्य॑ः। अ॒कृ॒णो॒ः। ऊँ इति॑। लो॒कम्॥ ३॥

[१८६ (१८१)] [३ : १ प्रथो वासिष्ठः, २ सप्रथो भारद्वाजः, ३ घर्मः सौर्यः। विश्वे देवाः। त्रिष्टुप्।]

प्रथ॑श्च॒ यस्य॑ स॒प्रथ॑श्च॒ नामानु॑ष्टुभस्य ह॒विषो॑ ह॒विर्यत्।

धा॒तुर्द्युता॑नात्सवि॒तुश्च॒ विष्णो॑ रथंत॒रमा ज॑भारा॒ वसि॑ष्ठः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रथः। च। यस्य। सुऽप्रथः। च। नाम। आनुऽस्तुभस्य। हविषः। हविः। यत्।
धातुः। द्युतानात्। सवितुः। च। विष्णोः। रथम्ऽतरम्। आ। जभार। वसिष्ठः॥ १॥

अविन्दन् ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत्।
धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः॥ २॥

अविन्दन्। ते। अतिऽहितम्। यत्। आसीत्। यज्ञस्य। धाम। परमम्। गुहा। यत्।
धातुः। द्युतानात्। सवितुः। च। विष्णोः। भरत्ऽवाजः। बृहत्। आ। चक्रे। अग्नेः॥ २॥

तेऽविन्दन्मनसा दीध्याना यजुः ष्कन्नं प्रथमं देवयानम्।
धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन् घर्ममेते॥ ३॥ [४६ (३९)]

ते। अविन्दन्। मनसा। दीध्यानाः। यजुः। स्कन्नम्। प्रथमम्। देवऽयानम्।
धातुः। द्युतानात्। सवितुः। च। विष्णोः। आ। सूर्यात्। अभरन्। घर्मम्। एते॥ ३॥

[१८७ (१८२)] [३ तपुर्मूर्धा बार्हस्पत्यः। बृहस्पतिः। त्रिष्टुप्।]

बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषदघशंसाय मन्म।
क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः॥ १॥

बृहस्पतिः। नयतु। दुःऽगहा। तिरः। पुनः। नेषत्। अघऽशंसाय। मन्म।
क्षिपत्। अशस्तिम्। अप। दुःऽमतिम्। हन्। अथ। करत्। यजमानाय। शम्। योः॥ १॥

नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु।
क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः॥ २॥

नराशंसः। नः। अवतु। प्रऽयाजे। शम्। नः। अस्तु। अनुऽयाजः। हवेषु।
क्षिपत्। अशस्तिम्। अप। दुःऽमतिम्। हन्। अथ। करत्। यजमानाय। शम्। योः॥ २॥

तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे हन्तवा उ।
क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः॥ ३॥ [४७ (४०)]

तपुःऽमूर्धा। तपतु। रक्षसः। ये। ब्रह्मऽद्विषः। शरवे। हन्तवै। ऊँ इति।
क्षिपत्। अशस्तिम्। अप। दुःऽमतिम्। हन्। अथ। करत्। यजमानाय। शम्। योः॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१८८ (१८३)] [३ प्रजावान् प्राजापत्यः। १ यजमानः, २ यजमानपत्नी, ३ होत्राशिषः। त्रिष्टुप्।]

अप॑श्यं त्वा॒ मन॑सा॒ चेकि॑तान॒ं तप॑सो जा॒तं तप॑सो॒ विभू॑तम्।

इ॒ह प्र॒जामि॒ह र॒यिं ररा॑णः॒ प्र जा॑यस्व प्र॒जया॑ पुत्रकाम॥ १॥

अप॑श्यम्। त्वा॒। मन॑सा। चेकि॑तानम्। तप॑सः। जा॒तम्। तप॑सः। वि॰भू॑तम्।

इ॒ह। प्र॒॰जाम्। इ॒ह। र॒यिम्। ररा॑णः। प्र। जा॒य॒स्व॒। प्र॒॰जया॑। पु॒त्र॒॰का॒म॒॥ १॥

अप॑श्यं त्वा॒ मनसा॒ दीध्या॑ना॒ं स्वाया॑ं त॒नू ऋत्व्ये॒ नाध॑मानाम्।

उप॒ माम॒च्चा यु॑व॒तिर्बभूया॒ः प्र जा॑यस्व प्र॒जया॑ पुत्रकामे॥ २॥

अप॑श्यम्। त्वा॒। मन॑सा। दीध्या॑नाम्। स्वाया॑म्। त॒नू इति॑। ऋत्व्ये॑। नाध॑मानाम्।

उप॑। माम्। उ॒च्चा। यु॒व॒तिः। ब॒भू॒याः॒। प्र। जा॒य॒स्व॒। प्र॒॰जया॑। पु॒त्र॒॰का॒मे॒॥ २॥

अ॒हं गर्भ॑मदधा॒मोष॑धीष्व॒हं विश्वे॑षु भुव॑नेष्व॒न्तः।

अ॒हं प्र॒जा अ॑जनयं पृथि॒व्याम॒हं जनि॑भ्यो अप॒रीषु॑ पु॒त्रान्॥ ३॥ [४८ (४१)]

अ॒हम्। गर्भ॑म्। अ॒द॒धा॒म्। ओष॑धीषु। अ॒हम्। विश्वे॑षु। भुव॑नेषु। अ॒न्तरिति॑।

अ॒हम्। प्र॒॰जाः। अ॒ज॒न॒य॒म्। पृ॒थि॒व्याम्। अ॒हम्। जनि॑॰भ्यः। अ॒प॒रीषु॑। पु॒त्रान्॥ ३॥

[१८९ (१८४)] [६ त्वष्टा, विष्णुर्वा प्राजापत्यः। १ विष्णु-त्वष्टृ-प्रजापति-धातारः, २ सिनीवालीसरस्वत्यश्विनः, ३ अश्विनौ, ४-६ गर्भधारणार्थप्रार्थना। अनुष्टुप्।]

विष्णु॒र्योनि॑ं कल्पयतु॒ त्वष्टा॑ रू॒पाणि॑ पिंशतु। आ सि॑ञ्चतु प्र॒जाप॑तिर्धा॒ता गर्भ॑ं दधातु ते॥ १॥

विष्णु॑ः। योनि॑म्। क॒ल्प॒य॒तु॒। त्वष्टा॑। रू॒पाणि॑। पिं॒श॒तु॒।

आ। सि॒ञ्च॒तु॒। प्र॒जा॰प॑तिः। धा॒ता। गर्भ॑म्। द॒धा॒तु॒। ते॒॥ १॥

गर्भ॑ं धेहि सिनीवालि॒ गर्भ॑ं धेहि सरस्वति। गर्भ॑ं ते अ॒श्विनौ॑ दे॒वावा ध॑त्तां॒ पुष्क॑रस्रजा॥ २॥

गर्भ॑म्। धे॒हि॒। सि॒नी॒वा॒लि॒। गर्भ॑म्। धे॒हि॒। स॒र॒स्व॒ति॒।

गर्भ॑म्। ते॒। अ॒श्विनौ॑। दे॒वौ। आ। ध॒त्ता॒म्। पुष्क॑र॰स्रजा॥ २॥

हि॒र॒ण्ययी॑ अ॒रणी॒ यं नि॒र्मन्थ॑तो अ॒श्विना॑।

तं ते॒ गर्भ॑ं हवामहे दशमे मा॒सि सूत॑वे॥ ३॥ [४९ (४२)]

हि॒र॒ण्य॒यी॒ इति॑। अ॒रणी॒ इति॑। यम्। नि॒ः॰मन्थ॑तः। अ॒श्विना॑।

तम्। ते॒। गर्भ॑म्। ह॒वा॒म॒हे॒। द॒श॒मे। मा॒सि। सूत॑वे॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नेजमेष परा पत सुपुत्र पुनरा पत। अस्यै मे पुत्रकामायै गर्भमा धेहि यः पुमान्॥ ४॥ ★

नेजमेष। परा। पत। सुऽपुत्र। पुनः। आ। पत।

अस्यै। मे। पुत्रऽकामायै। गर्भम्। आ। धेहि। यः। पुमान्॥ ४॥

यथेयं पृथिवी मह्युत्ताना गर्भमादधे। एवं त्वं गर्भमा धेहि दशमे मासि सूतवे॥ ५॥ ★

यथा। इयम्। पृथिवी। मही। उत्ऽताना। गर्भम्। आऽदधे।

एवम्। त्वम्। गर्भम्। आ। धेहि। दशमे। मासि। सूतवे॥ ५॥

विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम्।

पुमांसं पुत्रमा धेहि दशमे मासि सूतवे॥ ६॥ ★ [५०]

विष्णोः। श्रेष्ठेन। रूपेण। अस्याम्। नार्याम्। गवीन्याम्।

पुमांसम्। पुत्रम्। आ। धेहि। दशमे। मासि। सूतवे॥ ६॥

[१९० (१८५)] **[३ सत्यधृतिर्वारुणिः। आदित्यः (स्वस्त्ययनम्)। गायत्री।]**

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य॥ १॥

महि। त्रीणाम्। अवः। अस्तु। द्युक्षम्। मित्रस्य। अर्यम्णः। दुःऽआधर्षम्। वरुणस्य॥ १॥

नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः॥ २॥

नहि। तेषाम्। अमा। चन। न। अध्वऽसु। वारणेषु। ईशे। रिपुः। अघऽशंसः॥ २॥

यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रम्॥ ३॥ [५१ (४३)]

यस्मै। पुत्रासः। अदितेः। प्र। जीवसे। मर्त्याय। ज्योतिः। यच्छन्ति। अजस्रम्॥ ३॥

[१९१ (१८६)] **[३ उलो वातायनः। वायुः। गायत्री।]**

वात आ वातु भेषजं शंभु मयोभु नो हृदे। प्र ण आयूंषि तारिषत्॥ १॥

वातः। आ। वातु। भेषजम्। शम्ऽभु। मयःऽभु। नः। हृदे। प्र। नः। आयूंषि। तारिषत्॥ १॥

उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि॥ २॥

उत। वात। पिता। असि। नः। उत। भ्राता। उत। नः। सखा। सः। नः। जीवातवे। कृधि॥ २॥

यददो वात ते गृहे३ऽमृतस्य निधिर्हितः। ततो नो धेहि जीवसे॥ ३॥ [५२ (४४)]

यत्। अदः। वात। ते। गृहे। अमृतस्य। निऽधिः। हितः। ततः। नः। देहि। जीवसे॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१९२ (१८७)] [५ वत्स आग्नेयः। अग्निः। गायत्री।]

प्राग्नये वाचमीरय वृषभाय क्षितीनाम्। सः नः पर्षदति द्विषः॥ १॥

प्र। अग्नये। वाचम्। ईरय। वृषभाय। क्षितीनाम्। सः। नः। पर्षत्। अति। द्विषः॥ १॥

यः परस्याः परावतस्तिरो धन्वातिरोचते। स नः पर्षदति द्विषः॥ २॥

यः। परस्याः। पराऽवतः। तिरः। धन्व। अतिऽरोचते। सः। नः। पर्षत्। अति। द्विषः॥ २॥

यो रक्षांसि निजूर्वत्यग्निस्तिग्मेन शोचिषा। स नः पर्षदति द्विषः॥ ३॥

यः। रक्षांसि। निऽजूर्वति। वृषा। शुक्रेण। शोचिषा। सः। नः। पर्षत्। अति। द्विषः॥ ३॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पर्षदति द्विषः॥ ४॥

यः। विश्वा। अभि। विऽपश्यति। भुवना। सम्। च। पश्यति। सः। नः। पर्षत्। अति। द्विषः॥ ४॥

यो अस्य पारे रजसः शुक्रो अग्निरजायत। स नः पर्षदति द्विषः॥ ५॥ (४५)

यः। अस्य। पारे। रजसः। शुक्रः। अग्निः। अजायत। सः। नः। पर्षत्। अति। द्विषः॥ ५॥

अनीकवन्तमूतयेऽग्निं गीर्भिर्हवामहे। स नः पर्षदति द्विषः॥ ६॥ ★ [५३]

अनीकऽवन्तम्। ऊतये। अग्निम्। गीःऽभिः। हवामहे। सः। नः। पर्षत्। अति। द्विषः॥ ६॥

[१९३ (१८८)] [३ श्येन आग्नेयः। जातवेदा अग्निः। गायत्री।]

प्र नूनं जातवेदसमश्वं हिनोत वाजिनम्। इदं नो बर्हिरासदे॥ १॥

प्र। नूनम्। जातऽवेदसम्। अश्वम्। हिनोत। वाजिनम्। इदम्। नः। बर्हिः। आऽसदे॥ १॥

अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः। महीमियर्मि सुष्टुतिम्॥ २॥

अस्य। प्र। जातऽवेदसः। विप्रऽवीरस्य। मीळ्हुषः। महीम्। इयर्मि। सुऽस्तुतिम्॥ २॥

या रुचो जातवेदसो देवत्रा हव्यवाहनीः। ताभिर्नो यज्ञमिन्वतु॥ ३॥ [५४ (४६)]

याः। रुचः। जातऽवेदसः। देवऽत्रा। हव्यऽवाहनीः। ताभिः। नः। यज्ञम्। इन्वतु॥ ३॥

[१९४ (१८९)] [३ सार्पराज्ञी। आत्मा, सूर्यो वा। गायत्री।]

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः॥ १॥

आ। अयम्। गौः। पृश्निः। अक्रमीत्। असदत्। मातरम्। पुरः।
पितरम्। च। प्रऽयन्। स्वः१रिति स्वः॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवम्॥ २॥

अन्तरिति। चरति। रोचना। अस्य। प्राणात्। अपऽअनती। वि। अख्यत्। महिषः। दिवम्॥ २॥

त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते। प्रति वस्तोरह द्युभिः॥ ३॥ [५५ (४७)]

त्रिंशत्। धाम। वि। राजति। वाक्। पतङ्गाय। धीयते। प्रति। वस्तोः। अह। द्युऽभिः॥ ३॥

[१९५ (१९०)] [३ माधुच्छन्दसोऽघमर्षणः। भाववृत्तम्। अनुष्टुप्।]

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः॥ १॥

ऋतम्। च। सत्यम्। च। अभिऽइद्धात्। तपसः। अधि। अजायत।

ततः। रात्री। अजायत। ततः। समुद्रः। अर्णवः॥ १॥

समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ २॥

समुद्रात्। अर्णवात्। अधि। सम्ऽवत्सरः। अजायत।

अहोरात्राणि। विऽदधत्। विश्वस्य। मिषतः। वशी॥ २॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥ ३॥ [५६ (४८)]

सूर्याचन्द्रमसौ। धाता। यथाऽपूर्वम्। अकल्पयत्।

दिवम्। च। पृथिवीम्। च। अन्तरिक्षम्। अथो इति। स्व१रिति स्वः॥ ३॥

[१९६ (१९१)] [४ संवनन आङ्गिरसः। १ अग्निः, २-४ संज्ञानम्। अनुष्टुप्, ३ त्रिष्टुप्।]

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इळस्पदे समिध्यसे स नो वसून्या भर॥ १॥

सम्ऽसम्। इत्। युवसे। वृषन्। अग्ने। विश्वानि। अर्यः। आ।

इळः। पदे। सम्। इध्यसे। सः। नः। वसूनि। आ। भर॥ १॥

सं गच्छध्वं स वदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे संजानाना उपासते॥ २॥

सम्। गच्छध्वम्। सम्। वदध्वम्। सम्। वः। मनांसि। जानताम्।

देवाः। भागम्। यथा। पूर्वे। सम्ऽजानानाः। उपऽआसते॥ २॥

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।

समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि॥ ३॥

समानः। मन्त्रः। सम्ऽइतिः। समानी। समानम्। मनः। सह। चित्तम्। एषाम्।

समानम्। मन्त्रम्। अभि। मन्त्रये। वः। समानेन। वः। हविषा। जुहोमि॥ ३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति॥ ४॥ [५७ (४९)]

समानी। वः। आऽकूतिः। समाना। हृदयानि। वः।

समानम्। अस्तु। वः। मनः। यथा। वः। सुऽसह। असति॥ ४॥

★ [१९७] [५ कश्यपः। १-४ संज्ञानम्, शंयुः साशीः। अनुष्टुप्, ५ शक्वरी।]

संज्ञानमुशना वदत् संज्ञानं वरुणो वदत्। संज्ञानमिन्द्रश्चाग्निश्च संज्ञानं सविता वदत्॥ १॥ ★

सम्ऽज्ञानम्। उशना। वदत्। सम्ऽज्ञानम्। वरुणः। वदत्।

सम्ऽज्ञानम्। इन्द्रः। च। अग्निः। च। सम्ऽज्ञानम्। सविता। वदत्॥ १॥

संज्ञानं नः स्वेभ्यः संज्ञानमरणेभ्यः। संज्ञानमश्विना युवमिहास्मासु नि यच्छतम्॥ २॥ ★

सम्ऽज्ञानम्। नः। स्वेभ्यः। सम्ऽज्ञानम्। अरणेभ्यः।

सम्ऽज्ञानम्। अश्विना। युवम्। इह। अस्मासु। नि। यच्छतम्॥ २॥

यत्कक्षीवान् संवननं पुत्रो अङ्गिरसामवेत्। तेन नोऽद्य विश्वे देवाः सं प्रियां समजीजनन्॥ ३॥ ★

यत्। कक्षीवान्। सम्ऽवननम्। पुत्रः। अङ्गिरसाम्। अवेत्।

तेन। नः। अद्य। विश्वे। देवाः। सम्। प्रियाम्। सम्। अजीजनन्॥ ३॥

सं वो मनांसि जानतां समाकूतीर्मनामसि। असौ यो विमना जनस्तं समावर्तयामसि॥ ४॥ ★

सम्। वः। मनांसि। जानताम्। सम्। आऽकूतीः। मनामसि।

असौ। यः। विऽमनाः। जनः। तम्। सम्ऽआवर्तयामसि॥ ४॥

तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः।

ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे॥ ५॥ ★ [५८]

तत्। शम्ऽयोः। आ। वृणीमहे। गातुम्। यज्ञाय। गातुम्। यज्ञऽपतये। दैवी। स्वस्तिः। अस्तु। नः।

स्वस्तिः। मानुषेभ्यः। ऊर्ध्वम्। जिगातु। भेषजम्। शम्। नः। अस्तु। द्विऽपदे। शम्। चतुःऽपदे॥ ५॥

★[१९८] [३ निर्हस्त्यः। सपत्नघ्नम्। १, ३ अनुष्टुभौ, २ बृहती।]

नैर्हस्त्यं सेनादरणं परिवर्त्मे तु यद्धविः। तेनामित्राणां बाहून् हविषा शोषयामसि॥ १॥ ★

नैर्हस्त्यम्। सेनाऽदरणम्। परिऽवर्त्मे। तु। यत्। हविः।

तेन। अमित्राणाम्। बाहून्। हविषा। शोषयामसि॥ १॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परि वर्त्मान्येषामिन्द्रः पूषा च सस्रतुः।

तेषां वो अग्निदग्धानामग्निगूळ्हानामिन्द्रो हन्तु वरंवरम्॥ २॥ ★

परि। वर्त्मानि। एषाम्। इन्द्रः। पूषा। च। सस्रतुः।

तेषाम्। वः। अग्नि॰दग्धानाम्। अग्नि॰गूळ्हानाम्। इन्द्रः। हन्तु। वरम्॰वरम्॥ २॥

ऐषु नह्य वृषाजिनं हरिणस्य भयं यथा। पराँ अमित्राँ एजत्वर्वाची गौरुपेजतु॥ ३॥ ★ [५९]

आ। एषु। नह्य। वृष॰अजिनम्। हरिणस्य। भयम्। यथा।

परा। अमित्रान्। एजतु। अर्वाची। गौः। उप। एजतु॥ ३॥

[१९९] [कश्यपो जमदग्निः, ७ शंयुर्बार्हस्पत्यः। १ अग्निः, २, ६ आशीः, ३ अक्षरस्तुतिः, ४ सोम, ५ सूर्यः। १ गायत्री, ४ षट्पदा जगती, ६ पङ्क्ति, २-३ अनुष्टुप्, ७ शक्वरी]

प्राध्वराणां पते वसो होतर्वरेण्यक्रतो। तुभ्यं गायत्रमृच्यते॥ १॥ ★

प्र। अध्वराणाम्। पते। वसो इति। होतः। वरेण्यक्रतो इति वरेण्य॰क्रतो।

तुभ्यम्। गायत्रम्। ऋच्यते॥ १॥

गोकामो अन्नकामः प्रजाकाम उत कश्यपः।

भूतं भविष्यत्प्र स्तौति महद्ब्रह्मैकमक्षरम् बहुब्रह्मैकमक्षरम्॥ २॥ ★

गो॰कामः। अन्न॰कामः। प्रजा॰कामः। उत। कश्यपः।

भूतम्। भविष्यत्। प्र। स्तौति। महत्॰ब्रह्म। एकम्॰अक्षरम्। बहु॰ब्रह्म। एकम्॰अक्षरम्॥ २॥

यदक्षरं भूतकृतो विश्वे देवा उपासते। महऋषिमस्य गोप्तारं जमदग्निमकुर्वत॥ ३॥ ★

यत्। अक्षरम्। भूत॰कृतः। विश्वे। देवाः। उप॰आसते।

महा॰ऋषिम्। अस्य। गोप्तारम्। जमत्॰अग्निम्। अकुर्वत॥ ३॥

जमदग्निरा प्यायते छन्दोभिश्चतुरुत्तरैः। राज्ञः सोमस्य भक्षेण ब्रह्मणा वीर्यावता

शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः॥ ४॥ ★ [६०]

जमत्॰अग्निः। आ। प्यायते। छन्दःऽभिः। चतुःऽउत्तरैः॥ राज्ञः। सोमस्य। भक्षेण। ब्रह्मणा।

वीर्य॰वता। शिवा। नः। प्र॰दिशः। दिशः। सत्या। नः। प्र॰दिशः। दिशः॥ ४॥

अजो यत्तेजो ददृशे शुक्रं ज्योतिः परोगुहा।

तदृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरं ध्रुवं ब्रह्म चराचरम्॥ ५॥ ★

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अजः। यत्। तेजः। दद‍ृशे। शुक्रम्। ज्योतिः। परः२गुहा।

तत्ऽऋषिः। कश्यपः। स्तौति। सत्यम्। ब्रह्म। चराचरम्। ध्रुवम्। ब्रह्म। चराचरम्॥ ५॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।

अगस्त्यस्य त्र्यायुषम् यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम्॥ ६॥ ★

त्रिऽआयुषम्। जमत्ऽअग्नेः। कश्यपस्य। त्रिऽआयुषम्॥ अगस्त्यस्य। त्रिऽआयुषम्।

यत्। देवानाम्। त्रिऽआयुषम्। तत्। मे। अस्तु। त्रिऽआयुषम्॥ ६॥

तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः।

ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे॥ ७॥ ★ [६१]

तत्। शम्ऽयोः। आ। वृणीमहे। गातुम्। यज्ञाय। गातुम्। यज्ञऽपतये। दैवी। स्वस्तिः। अस्तु। नः।

स्वस्तिः। मानुषेभ्यः॥ ऊर्ध्वम्। जिगातु। भेषजम्। शम्। नः। अस्तु। द्विऽपदे। शम्। चतुः२पदे॥ ७॥

[२००] [१२ महानाम्न्य ऋचः, १-५ विश्वामित्र इन्द्रो वा प्रजापतिः। इन्द्रः]

विदा मघवन् विदा गातुमनु शंसिषो दिशः। शिक्षा शचीनां पते पूर्वीणां पुरूवसो॥ १॥ ★

विदाः। मघऽवन्। विदाः। गातुम्। अनु। शंसिषः। दिशः।

शिक्ष। शचीनाम्। पते। पूर्वीणाम्। पुरूवसो इति पुरूऽवसो॥ १॥

आभिष्ट्वमभिष्टिभिः प्रचेतन प्र चेतय। इन्द्र द्युम्नाय न इष एवा हि शक्रः॥ २॥ ★

आभिः। त्वम्। अभिष्टिऽभिः। प्रऽचेतन। प्र। चेतय।

इन्द्र। द्युम्नाय। नः। इषे। एव। हि। शक्रः॥ २॥

राये वाजाय वज्रिवः शविष्ठ वज्रिन्नृञ्जसे।

मंहिष्ठ वज्रिन्नृञ्जस आ याहि पिब मत्स्व॥ ३॥ ★

राये। वाजाय। वज्रिऽवः। शविष्ठ। वज्रिन्। ऋञ्जसे।

मंहिष्ठ। वज्रिन्। ऋञ्जसे। आ। याहि। पिब। मत्स्व॥ ३॥

विदा राये सुवीर्यं भुवो वाजानां पतिर्वशाँ अनु।

मंहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम्॥ ४॥ ★

विदाः। राये। सुऽवीर्यम्। भुवः। वाजानाम्। पतिः। वशान्। अनु।

मंहिष्ठ। वज्रिन्। ऋञ्जसे। यः। शविष्ठः। शूराणाम्॥ ४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो मंहिष्ठो मघोनां चिकित्वाँ अभि नो नय।

इन्द्रो विदे तमु स्तुषे वशी हि शक्रः॥ ५॥ ★ [६२]

यः। मंहिष्ठः। मघोनाम्। चिकित्वान्। अभि। नः। नय।

इन्द्रः। विदे। तम्। ऊँ इति। स्तुषे। वशी। हि। शक्रः॥ ५॥

तमूतये हवामहे जेतारमपराजितम्। स नः पर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत्॥ ६॥ ★

तम्। ऊतये। हवामहे। जेतारम्। अपराऽजितम्।

सः। नः। पर्षत्। अति। द्विषः। क्रतुः२छन्दः। ऋतम्। बृहत्॥ ६॥

इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम्।

स नः पर्षदति द्विषः स नः पर्षदति स्रिधः॥ ७॥ ★

इन्द्रम्। धनस्य। सातये। हवामहे। जेतारम्। अपराऽजितम्।

सः। नः। पर्षत्। अति। द्विषः। सः। नः। पर्षत्। अति। स्रिधः॥ ७॥

पूर्वस्य यत्ते अद्रिवः सुम्न आ धेहि नो वसो।

पूर्द्धि शविष्ठ शश्वत ईशे हि शक्रः॥ ८॥ ★ [६३]

पूर्वस्य। यत्। ते। अद्रिऽवः। सुम्ने। आ। धेहि। नः। वसो इति।

पूर्द्धि। शविष्ठ। शश्वतः। ईशे। हि। शक्रः॥ ८॥

नूनं तं नव्यं संन्यसे प्रभो जनस्य वृत्रहन्।

समन्येषु ब्रवावहै शूरो यो गोषु गच्छति सखा सुशेवो अद्वयाः॥ ९॥ ★

नूनम्। तम्। नव्यम्। संन्यसे। प्रभो इति प्रऽभो। जनस्य। वृत्रऽहन्।

सम्। अन्येषु। ब्रवावहै। शूरः। यः। गोषु। गच्छति। सखा। सुऽशेवः। अद्वयाः॥ ९॥

एवा ह्येऽ३व। एवा ह्यग्ने। एवा हीन्द्र। एवा हि पूषन्। एवा हि देवाः॥ १०॥ ★

एव। हि। एव। एव। हि। अग्ने। एव। हि। इन्द्र। एव। हि। पूषन्। एव। हि। देवाः॥ १०॥

एवा हि शक्रो वशी हि शक्रो वशाँ अनु।

आयो मन्याय मन्यव उपो मन्याय मन्यव उपो हि विश्वथ॥ ११॥ ★

एव। हि। शक्रः। वशी। हि। शक्रः। वशान्। अनु॥ आयो इति। मन्याय।

मन्यवे। उपो इति। मन्याय। मन्यवे। उपो इति। हि। विश्वथ॥ ११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अ॒ग्निर्दे॒वेद्धः॑। वि॒दा म॑घवन् वि॒दोम्॥ १२॥ ★

अ॒ग्निः। दे॒व॑ऽइ॑द्धः। वि॒दाः। म॒घ॒व॒न्। वि॒दाः॥ १२॥

ॐ नमो॒ ब्रह्म॑णे॒ नमो॑ऽस्त्व॒ग्नये॒ नमः॑ पृथि॒व्यै नम॒ ओष॑धीभ्यः।

नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नमो॒ विष्ण॑वे मह॒ते क॑रोमि॥ १३॥ ★ [६४] {१२}

नम॑ः। ब्रह्म॑णे। नम॑ः। अ॒स्तु। अ॒ग्नये॑। नम॑ः। पृ॒थि॒व्यै। नम॑ः। ओष॑धीभ्यः॥

नम॑ः। वा॒चः। पत॑ये। नमः। वि॒ष्णवे॑। म॒ह॒ते। क॒रो॒मि॒॥ १३॥

इत्याश्वलायन-संहितायां अष्टमाष्टके अष्टमोऽध्यायः संपूर्णः॥

॥ इत्याश्वलायनसंहितायां दशमं मण्डलं समाप्तम्॥

